SUPADMA VYAKARANA

DR. R. S. SAINI



पद्मनाभदत्तप्रणीतम्

सुपद्मव्याकरणम्

The Supadma-Vyākaraṇa

of

Padmanābhadatta

By

DR. R.S. SAINI

Reader in Sanskrit

Motilal Nehru College (Evening)

New Delhi

Bharatiya Vidya Prakashan

DELHI VARANASI

(INDIA)

Publisher :
BHARATIYA VIDYA PRAKASHAN
1. I.U.B, Jawaharnagar, Bungalow Road, Delhi-110007.
2. Kachauri Gali, P. Box 1108. Varanasi-220001.

ISBN—81-217-0052-3

First Edition, 1989

Price : Rs. 400.00 (Rupees Four hundred)

Printed by :
A.R. Printers, D-102, New Seelampur, Delhi-110053

PREFACE

The Supadma-Vyākaraṇa, founded by Padmanābhadatta, occupies a prominent place among the Post-Pāṇinian systems of Sanskrit grammar. Padmanābha or Padmanābhadatta wrote this Vyākaraṇa in the 14th century of Christian era in Bengal. Though the Pāṇinian system, including the Vārttikas of Kātyāyana, the Mahābhāṣya of Patañjali with several other accessories, is still regarded an authority on Grammar, an independent channel of Sanskrit grammar started in the 1st century of Christian era with the composition of the Kātantra-Vyākaraṇa by Śarvavarman and it flowed continuously till the 14th centry assuming different names and different forms e.g. Kātantra, Cāndra, Jainendra, Haima, Mugdhabodha, Sārasvata, Sarasvatī-Kaṇṭhābharaṇa, Supadma and Saṁkṣiptasāra. The main object of the founders of these systems undoubtedly had been primarily to teach the rules of classical Sanskrit language in the shortest possible way, free from cumbersome and tedious method adopted in the Aṣṭādhyāyī. The Supadma-Vyākaraṇa too, was meant to present a complete and clear picture of Sanskrit grammar for the common students. The accessories, commentries and sub-commentries written later on right from the time of its composition upto the 18th century, are sufficient enough to determine the place and popularity which this system once had among the scholars.

But unfortunably due to certain constraints, the study of the Supadma-Vyākaraṇa came to a stand still to this extent that even the texts became rather extinct in the 19th century of Christian era. It was again at the beginning of the 20th century that this important system was brought to light and its texts were made available to the Sanskrit world by Pt. Kṛṣnacandra Smṛtitīrtha in Bengali characters. Though three editions of Supadma came one after the other but its studies remained limited only among the Bengali speaking persons or to say in the Bengal province comprising modern Banglā Deśa' and West Bengal. But what can be a more pitiable state of affairs that neither Dr. S.K. Belvalkar made any reference to any edition of Supadma in his work "Systems of

Sanskrit-Vyākaraṇa" published in 1915 nor Pt. Haraprasāda Śāstrī mentioned in his work "Descriptive Catalogue of Sanskrit, Manuscripts, Vol.VI of Royal Asiatioc society of Bengal, published in 1931.

Now this Supadama-Vyākaraṇa in Devanāgari edition, is presented before the scholars. In 1960, I undertook the study of Post-Pāṇinian systems for my Ph-D. work in the University of Delhi. Out of more than a dozen Post-Pāṇinian systems, I could hardly get a few because even the very texts of these systems were not available. However I succeeded in tracing these works in Calcutta but in Bengali characters. After completing my Ph. D., I thought of transcribing the three important texts i.e. The Kātantra-Vyākaraṇa, (2) The Supadma-Vyākaraṇa and (3) The Saṁkśiptasāra-Vyākaraṇa. All of these books were published about 60-70 years back from Calcutta. But now these books were of no use and were rather going to be extinct. Being in Bengali characters but the language being Sanskrit, no Benglā knowing person could make out any sense of them. For a non-Bengali knowing scholar, the Bengali characters were unintelligible, hence going to be forgotten.

After a gap of about 20 years, in 1985, I published the Kātantra-Vyākarana of Śarvavārman with the financial assistance from university Grants Commission. And now I am presenting the Supadma-Vyākaraṇa of Padmanābhadatta. The Saṁkṣiptasāra of Kramadīśvara has been sent to the press. It is hoped the same will be out very soon.

I express my deep gratitude to my teachers Dr. Ramgopal, former Vice-Chancellor M.D. University, Dr. R.V. Joshi, Professor Deptt. of Sanskrit, University of Delhi and Prof. S.P. Chaturvedi, formerly officer on special duty, Ministry of Education. I extend my thanks to Prof. Pushpendra Kumar Sharma, University of Delhi who has always been a source of inspiration to me in my academic pursuits.

In the end, I wish to record my thanks to Shri Kishore Chand Jain, Propriter Bhartiya Vidya Prakashan Delhi & Varanasi, the onerous responsibilities of his organisation, took keen and personal interest in the timely publication of these books both the Kātantra and the Supadma-vyakarana :

Dr. R.S. Saini

285/Sector 14.
GURGAON.

INTRODUCTION

The Supadma-Vyākaraṇa by Padmanābhadatta, is one of the foremost systems of Sanskrit grammar which were written in Bengal in the Bengali script for the benefit of the natives of Bengal. As most of the technical terms in almost all these minor systems of Sanskrit grammar, were adopted from the Aṣṭādhyāyī of Pāṇini, it can be presumed safely that such independent systems of Sanskrit grammar were like the recasts of the Pāṇinian System, and were meant only to cater the needs of local students only. Whatever aim might have been in the minds of the writers of these systems, but one thing is quite clear that in the period when India was being invaded by the Turks and the Afgans in the 12th century of Christian era, their attempts in writing news systems indirectly helped in preserving The Pāṇinian system in a different garb under different names. Thus the authors like Padmanābhadatta, Jumarnadin and others deserve a word of thanks for their commendable efforts at least to preserve the granmatical literature alive in their local script, perhaps to save it from mass destruction at the hands of the Muslim but farnatic invaders.

Padmanābhadatta, a Maithila Brāhmaṇa born in the 14th centry A.D., is stated to be the author of the Supadma-Vyākaraṇa. At that time Mithilā was ruled by a Brāhmin dynasty founded by Nānya-deva at the beginning of the 12th centrary after the fall of Karṇātaki Kingdom. Padmanābha has given his date in his work entiled Praṣodarādi-Vṛtti in words—शाके शैल नवादित्ये equal to Śaka 1297=1375 A.D. At the beginning of this work Padmanābha gives his genealogy in which 5 lines giving the names of five of his immediate ancestors are unfortunately missing. This genealogy starts from Vararuci who along with Kālidāsa is said to have been the court-poet of Vikramāditya. From a manuscript of Paribhāṣā. by Padmanābhadatta, of Śaka 1714, preseved in the Asiatic Society of Bengal, Pt. Haraprasāda Śāstrī in the VI volume of "Descriptive catalogue of Sanskrit Manuscripts", has given the following account of Padmanābhadatta's literary activities and his genealogy :

नत्वा श्री श्रीनिवासं प्रणतजनमनः शङ्कुसंहारकालम् ।
सन्यासाश्रमवन्तमन्तदमनं श्रीगोपेशं विभुम् ।।१।।

पाणिन्यामरभाष्य-भाष्यविततग्रन्थार्थमालोकनात् ।
वक्तुं युक्तमिदं मितं सदर्थरुचिरं सम्पूर्णमाविष्कृतम् ।।२।।

दिङ्मात्रं दर्शितं किन्तु सकलार्थविकासनम् ।
धैर्य्याविधेयं धीराः श्रीपद्मनाभनिवेदितम् ।।३।।

उत्तमो व्याकरणादर्शः सुपद्मस्तस्य टिप्पणी ।
ततो बालकबोधाय प्रयोगाणाञ्च दीपिका ।।४।।

उणादिवृत्ति रचिता तथा च धातुकौमुदी ।
ततैव यङ्लुको वृत्तिः परिभाषा ततः परम् ।।५।।

गोपालचरितं नाम साहित्ये ग्रन्थरत्नकम् ।
आनन्दलहरी टीका स्मृतावाचारचन्द्रिका ।।६।।

कोशे भूरिप्रयोगाख्यो रचितस्तातयत्नतः ।
धीराः श्रीपद्मनाभेन गृह्यते ह्यञ्जलिः ।।७।।

संस्कार्य्या प्रतिपाल्या वः पुत्रवत् मम पुस्तकाः ।
चञ्चलाप्यचला लक्ष्मीर्वाणी यत्र गृहे गृहे ।
तं विदूक्ष्यं(?)सदा वन्दे विक्रमो यत्र भूपतिः ।।८।।

कालिदासादयस्तत्र संख्यावन्त सहस्रशः ।
तेषामेको वररुचिः सर्व्वशास्त्रविशारदः ।।९।।

तत्सुतो न्यासदत्तश्च फणिभाष्यार्थतत्त्ववित् ।
तत्सुतो दुर्घटो ज्ञेयः पाणिनीयार्थतत्त्ववित् ।।१०।।

जयादित्यस्तत्सुतश्च मीमांसाशास्त्रपारगः ।
श्रीपतिस्तत्सुतश्च सांख्यशास्त्रविशारदः ।।११।।

गणेश्वरस्तत्सुतश्च काव्यशास्त्रविशारदः ।
भानुभट्टस्तत्सुतश्च रसमञ्जरीकारकः ।।१२।।

हलायुधस्तत्सुतश्च मीमांसाशास्त्रपरागः ।
श्रीदत्तस्तत्सुतश्चैव स्मृतिशास्त्रार्थतत्ववित् ।
तत्सुतो भवदत्तश्च वेदान्ती कविसत्तमः ।।१३।।

दामोदरस्तत्सुतश्च काव्यालङ्कारकारकः ।
तत्सुतो पद्मनाभोऽहं मयैवैतन्निगद्यते ।।१४।।

The scribe of this manuscript has added the following note in order to clarify any confusion possible in the minds of the readers :

"नन्वे(न्ये)वं सति श्रीदत्तप्रपौत्र पद्मनाभः इत्यवधार्य्यंते, तर्हि कथं पूर्वोक्त-श्रीदत्तात्मजसूनुना इत्यनेन अविरोधः तेन हि श्रीदत्तपौत्रोऽवधार्य्यंते । सत्यं सूनुशब्दोऽत्र पौत्रपर्य्यायः तस्मात् श्रीदत्तात्मजपौत्रत्वेन श्रीदत्तप्रपौत्र इत्यवरोधः ।" तथा च हड्ड-चन्द्रः—सूनुः सूर्य्ये पुत्रपौत्रे कनीयसि च दृश्यते" ।

From the above mentioned genealogy we can draw following table showing the achievements even of Padmanābha's forefathers :

1. Vararuci (contemporary of Kālidāsa)
↓
2. Nyāsadatta, expert in Pāṇini
↓
3. Jayāditya, expert in Mīmāṁsā
↓
4. Śripati, expert in Sāṁkhya
↓
5. Gaṇeśvara, expert in Kāvya
↓
6. Bhānubhaṭṭa, author of Rasamañjarī
↓
7. Śrīdatta, expert in Smṛtis
↓
8. Bhavadatta. expert in Vedānta
↓
9. Dāmodar, expert in Kāvya and Alaṅkāra
|
10. Padmanābhadatta.

As stated by Pt. Haraprasāda Śāstri, in catalogue of Skt. MSS. (Vol VI,), Padmanābha was an inhabitant of Bhoragrāma, a few miles from Darabhanga (Darabhangā), but the Supadma Vyākaraṇa, composed by him gained popularity in the districts of Jessore, Khulna and the towns of Naihati and Bhatapara.

The details of genealogy preserved by the scribes of Padmanābha. who made untiring efforts to give the Supadma-Vyakāraṇa a shape of fullfledged systems of Sanskrit-Vyākarṇa, tell us that Padmanābha himself, besides the Supadma-Vyākaraṇa wrote the following works also :

1. Supadmavivaraṇapañjikā—A commentry on the Supadma-Vyākaraṇa.

2. Prayogadīpikā—A treatise showing the grammatical usages from this system, extent in ślokas 1400.
3. Uṇādivṛtti—A commentry on Uṇādis
4. Dhātukaumudī—A treatise on conjugation of roots.
5. Yaṇlugādivrtti—A treatise on frequentatives extent in ślokas 240
6. Paribhāṣā-Vṛtti—A work on the Paribhāṣās' used in Sanskrit-grammar, extent in ślokas 750
7. Gopālcarita—A poetical work
8. Chando-ratna—A work on Prosody and Meters
9. Ācāracandrikā—A work on Smṛtis
10. Bhurihrayoga—A work on Lexicon
11. Praśodarādivṛtti—A treatise on पृषोदरादि group of words.
12. Ānanadalahariṭīkā—A commentry on Ānandalaharī.
13. A treatise on declension of Subantas, extent in ślokas 500—Subantaprakriyā
14. A commentry on Śiśupālavadham of Māgha.

According to Pt. Gurupada Hāldāra, Padmanābha, in addition to the works mentioned above, also wrote Lingānuśāsana related to his own system. Dr. S.K. Belvalkar ascribed the aurhorship of a Dhātupāṭha to Padmanābhadatta. None of the two works mentioned above, is available to us.

Accessories of the Supadma-Vyākaraṇa :

A sufficent number of accessory treatises related to the Supadma-Vyākaraṇa were written by the followers of Padmanābhadatta with a view to place it parallel to the Pāṇinian System right from the time of the composition of the Supadma-Vyākaraṇa till the later part of 18th centry of Christian era. A list of such accessories of Supadma-Vyākaraṇa has been incorporated in the Catalogue of Skt Mss. by Pt. H.P. Shastri. The details about the each Mss. given there can be summarised and put forward as the follows :

	Name of the Mss.	Date	Writer	Remarks
1.	Supadma—Makaranda	Śaka 1635	Vishṇumiśra	135 folio to the end of 2nd chapter
2.	Supadma—Tīkā	,,	Rāmaśaṅkara Tarkapañcānana	a mere fragment

3.	Paribhāṣā	Śaka 1714	ŚivaRāma Śarmā	Extent in ślokas 750
4.	Paribhāṣā Vṛtti	Saka 1641	Gaṅgādhara Śarmā	Extent in ślokas 850
5.	Paribhaṣā Vṛtti	Saka 1722	Dvija Rāma Bhadra	Extent in ślokas 600
6.	Paribhāṣā Vṛtti	Saka 1698	UdayChandra deva Sarmā	incomplete about 27 folio of 6 line each
7.	Subanta-Prakriyā	Śaka 1673	Śrikṛṣṇa-Caraṇadra	Extent in ślokas-500
8.	Śukasaptatika-(Supadma-Vyākaraṇagaṇa-Vṛtti)	Śaka 1511	Viśṇuśrmā	incomplete
9.	Supadma-Bindu (a commentry on Supadma)	Saka 1730	Rāmabhadra Śarmā	Extent in ślokas 120

A glance at this table shows that the Supadma-Vyākarana was popular among the Brāhmannas and that too among those who knew the Bengalī characters along with the Sanskrit language. The Supadṃa-Vyākaraṇa was compared to an ocean by Rāma Śaṅkara-deva Śarmā and the commentry there on by him a boat i.e. "नौकां सौपद्मसिन्धोरिव मतिमतां and he dared even to point out the wrong usages in Sanskrit language by the sage, i.e, :

ऋषीणामपि ये दोषा भवन्ति सततं भ्रमात् ।
तानर्हन्ति बुधा अत्र तेनितुं मम पुस्तके ।।

On the other hand, the benedictory words, which we come across in these accesories and commentries of the Supadma Vyāka-raṇa, indicate that the study of this system was not limited among the Brāhmaṇas only. A few of such are shown below.

१. ॐ नमो ब्रह्मणे ॐ नमो विष्णवे ।

२. श्री हरिशरणम् ।

३. वरदं माधवं नत्वा ।

४. ॐ नमः परमदेवतायै ।

५. श्रीरस्तु लेखके मयि ।

६. नत्वा दुर्गापदद्वन्द्वं ज्ञानमोक्षप्रदायकं ।

७. ॐ लेखन्यै नमः ।

८. सदा सुकेलिलालिता दशमस्तकोज्वला: ।
कल्पान्तं कल्पलतिका सुरभीन्धकतां दिशः ।।
शाके महेशक्षणतर्कभेदसुधामयूखैर्गणिता ।।

Homage paid to Brahman, Viṣṇu, Hari, Mādhava, Paramdevatā, Durgā, Laxmī and Maheśvar while writing commentries by persons of different ideologies--confirm the very aim of composing the new system of grammar in the mind of Padmanābhadatta—that it was written with a view to teach the basic fundamentals of Sanskrit grammar to all alike. The opening verse of yaṅgalugādi Vṛtti which runs as follows :

प्रणम्यं बालगोपालं पिवन्तं नवनीतकम् ।

द्विजश्रीपद्मनाभेन यङ्लुको वृत्तिरिष्यते ।। —is in accordance with the opening verse of the Supadma-Vyākaraṇa wherein Padmanābhadatta promises to present a clear and full (स्फुट, पूर्ण) idea of Sanskrit grammar to ordinary students, but at the same time, leading them to Pāṇinian school, if they wanted to be experts in grammar :

प्रणम्य परमं देवं देवीं वाचमृषीन् गुरून् ।
पद्मनाभः स्फुटं पूर्णं भाषायामाहृत लक्षणम् ।।

WORKS ON SANSKRIT VYĀKARAṆA BY PADMANĀBHADATTA

1. *Prayogadīpikā*

Based on the Supadma-Vyākaraṇa itself Padmanābhadatta wrote the Proyogdīpikā where in the examples of Kākaras, Sandhis, Samāsas the Kṛt-affices the Taddhita-affixes were presented for the benefit of the students. It begins with the following verse :

वरदं माधवं नत्वा बालबोधाय दीपिका ।
एषा सुपद्मकारेण प्रयोगानां विनिर्मिता ।।
कारकाणां च सन्धीनां समासानां समुच्चयः ।
कृतां च तद्धितानां च समासेनात्र कीर्तितः ।।

समासेन संक्षेपेणेत्यर्थः । तत्र कारकसमुच्चयस्य विवरणं यथा । कर्त्ता, कर्म्म, करणं, सम्प्रदानमपादानमधिकरणं चेति षट् कारकाणि भवन्ति ।

The last Colophon of Proyadīpikā, attributing its authership to Padmanābha.runs as follows :—

इति श्रीपद्मनाभदत्तविरचितायां प्रयोगदीपिकायां तद्धितसमुच्चयस्य विवरणं समाप्तम् ।

The earliest available manuscript of Prayogadīpikā dates back to śaka 1650, written in Bengali characters.

2. *The Uṇādivṛtti.*

The Uṇādivṛtti consists of two chapters. The first chapter treats of vowel-suffixes and the second of consonantal—suffixes arranged in the alphabetical order according to the final consonants. Another work Pṛṣodarādivṛtti, though supposed to be an independent work on the uṇādis, is a part of the Uṇādivṛtti. But this view does not seem teanable because Pṛaṣodarādi is considered as an appendix to the Samāsas and Uṇādi to the Kṛt-chapter. It appears that owing to difficulty and uncertainty of both these portions, Padmanābha treated them together. This work as mentioned by Padmanābha himself was written in Śaka 1297 corresponding to 1375 A-D (शाके शैल नवादित्ये). Here in this work the genealogy of Padmanābha in found mentioned. Except the first sūtras of the two chapters, this work differs to a great extent from the Pāṇinian system.

3. *Dhātu Kaumudī*

As mentioned in the list of Padmanābha's work, Dhātu-Kaumudī or Dhātupāṭha is an accessory to the Supadma-Vyākarṇa. In a commentry Dhātu-Nirṇaya on Dhāṭukaumudī, we come across about 50 authorities quoted by the author of these works. But the identification of its auother has not been established so far. In a commentry on Dhātu-Nirnaya or Dhātu Pradīpa of Padmanābha, by some unknown author, the following authorities have been quoted :-

Halāyudha, Govindabhaṭṭa, Bhaṭṭi, Durga, Trilocana, Dhātupradīpa by Maitreya-rakṣita and Vopadeva.

Authors-mentioned less frequently are Aruṇadatta, Kauśika, Ksīrasvāmi, Gada, Govardhana, Caturbhuja, Jaymaṅgala Durghaṭa, Durghata vrtti, Dhātukārikā, Padmanābha, Dhātupārāyaṇa, Pārāyaṇikā, Puruṣottama, Purṇacandra, Bhaṭṭa, Bhāgavṛtti, Bhūriprayoga, Rabhasa, Rāma, Rāmadāsa, Rudra, Vararuci, Varṇadesnā, Vardhamāna, Vallabhadeva, Vāmana, Vikramāditya,

Vrtti, śabdārṇava, Saraṇadeva, Śrīpatī, Supadma, Sparśākārikā, Haridāsa and Hemamālā. The propularity and importance of Dhātu-Nirṇaya can very well he imagined from this list easily.

The best commentry on the Supadma is the Supadma-Makaranda by Viṣṇumiśra in 20 sections called Bindus (drops). Supadma is a lotus, the commentry dripping from its chapters—drops.

The India office catalogue No. 193, wherein Dhātupāṭha finds its reference, contains a metrical arrangement of the Supadma Dhātupātha by an unknown brāḥmaṇa, the son of Sundara and and Jayā. This work is entitled Gaṇa-paṅktikā. According to the author, this work would be useful to those who study Vyākaraṇa, Purāṇas, Sāhitya and current Smṛti literature

4. Yaṅglugādivṛtti.

The much talked about Yaṅglugādivṛtti as its very title indicates deals with the verbal forms when the affix' yaṅg is attached and when it is dropped. This special grammatical process is technically known as frequentatives No earlier grammiand a has even treated it as a separate portion of Sanskrit grammar except Padmanābha. The extent of this work in ślokas is 240, preserved and available in in the Bengāli characters of nineteenth century. The Yaṅgluādi-vṛtti beginns with the following opening verse indicating its object of writing :-

प्रणम्य बालगोपालं पिबन्तं नवनीतकम्

द्विजश्रीपद्मनाभेन यङ्लुको वृत्तिरुच्यते ।।

While commenting upon, he further says :

यङ्लुगित्युपलक्षणम् । अन्येषामपि ग्रहणम् । ननु धातोरेकाचो इत्यस्य यत् भृशमाभीक्ष्णमुक्तं तत्र भृशार्थोऽतिशयार्थः । तत्र किं कर्त्तुरतिशये यङ् कर्म्मणो वा किं क्रियाया इति चेन्न । यत्र एक व्यक्तिकर्त्ता तत्रातिशयपरिहरन्न यङ्लुक् । एवं यत्र अकर्मकधातुस्तत्र यङ्लुग् न भवति ।

After having completed his work यङ्लुगादिवृत्ति, padmanābha sums up again what he has dealt with in this work i.e.

यदेवं व्याख्यायते । दशगणपरिपठितः शब्विकरणा भूवादयः, अशब्विकरणा अदादयः । एवं क्रयादयः, सनाद्यन्ताश्चेति । चकारान्नामधातोर्ग्रहणम् । तेन पुत्रकाम्यतीत्यादि ।

This portion known as Yaṅgluādivṛtti, though treated as an independent work by Pt H.P Sastri, must have been a part of the Supadma Vyākarana. This contention is confirmed in clear terms with the last colophon of it wherein the Yaṅgalugādivṛtti has been termed as Uttar-Supadma cf :—

इति श्रीपद्मनाभदत्तकृतौ उत्तरसुपद्मे व्याकरणे यङ्लुगादिवृत्तिः समाप्ता ।

It appears that Padmanābha might have seen the lost चर्करीतरहस्यम्, a work belonging to the Kātantra school and based on which Pt. Kavikanthahāra wrote a small compendium 'Carkrīta-Rahasayam' consisting of 25 verses only, giving refercnce to the treatment of frequentatives in the Supadma-Vyākaraṇa of.

रसवत् पद्मशब्दानुशासनयुगले चाभिहितं वीक्ष्य ।
तत्सर्वं संक्षेपात् वावद्मि चर्करीतानाम् ।।
(चर्करीत-रहस्यम्—पद्य० सं० ३)

5. *Paribhāṣā-Vṛtti*

Padmanābha imitating Panini's system, wrote a work on the grammatical maxims known as Paribhdṣāā in order to explain the application of grammatical sūtras of the Supadm-Vyākarana. This original work along with a commentry thereon by Padmanābha himself was having extent in 'ślokas, 750 to 800. The earliest manuscripts of this work preserved in the Royal Asiatic society-date back to Sāka 1641 1698, 1714 and 1722,. All these manuscripts contain a detailed genealogy of Padmanābha along with the list of books written by Padmanābha. All the three MSS. end in the colophon "इति श्रीपद्मनाभदत्तविरचिता परिभाषावृत्तिः समाप्ता ।" Besides, Padmanābha claims that the Supadma-Vyākarṇa was an ideal work on grammar i.e. "उक्तोव्याकरणादर्शः" ।

6. *Pṛṣodarādi-vṛtti*

Pāṇini in his Aṣṭādhyāyī, has mentioned a group of words, with irregularity in the coalesence of the two constituent members in the compound. cf. पृषोदरादीनि यथोपदिष्टम् (P. VI. 3.109 and येषु लोपागमवर्णविकाराः शास्त्रेण न विहिताः दृश्यन्ते च तानि, यथोपदिष्टानि साधूनि

भवन्ति । पृषोदरम्, वलाहकः जीमूतः, पिशाचः (c. Kāśikā on P. VI 3.109) Pṛśodarādi-vṛtti was written by Padmanābha keeping the above Pāṇinian sūtra in his mind as an independent work though this sūtra comes under the Uṇādi-vṛtti :

7. *Subanta-Prakriyā*

Subanta-Prakriyā is also a work on Sanskrit grammar written by Padmanābha. Its extent in Ślokes was 500 and the MSS dates back to Śāka 1673. The Subanta-Prakriyā starts with the benediction to goddess Sarasvatī, The subject matter of this work is also found mentioned here. cf :

ॐ नमः सरस्वत्यै । ये धातवः सन्ति गणान्तरेषु वर्णार्थनिर्देशपदैरभिन्नाः विभिन्नशब्दप्रतिपादनार्थं रूपाणि तेषां समुदाहरिष्ये ।

भूवादिषूभयपदी बुध बोधनेऽस्ति च ।
रूपद्वयं भवति बोधति बोध्यते च ॥

.........नपुंसके भवत् भवति भवन्ति । तृतीयायामप्येवं तृतीयादौ पुंसा तुल्यम् ।

The last colophon indicates that this work was written by Padmanābha cf. इति श्रीपद्मनाभदत्तकृतायां सुबन्तप्रक्रिया समाप्ता ।—though the name of this work is Subanta Prakriyā, (on Subantas), the scope of the subject matter covered is comparatively wider. The conjugaticn of dhātus, which does not fall under the category of the substantives, has been dealt here along with the declension of Śabdas. (nouns)

8. *Supadma-Vyākaraṇa*

It has ālreādy been indicated above that Padmanābha or Padmanābhadatta, aimed at imparting the rules of Sanskrit grammar which he borrowed from the Pāṇinian system and presented these sūitras in a way more congenial to be understood. In others words, The Supadma-Vyākaraṇa, though a new and independent system of Sanskrit grammar, was not totally independent as it was based on the Pāṇinian sūtras. Besides, Padmanābha had a score of predecessors, well versed in the different branches of Sanskrit learning. He utilised the material available to him and quoted profusely in his works to confirm his views and contentions. An appendix has been attached to this effect giving the names of the authorities and books, quoted by Padmanābhadatta.

Padmanābha borrowed the technical terms from the Aṣṭādhyāyī In order to achieve brevity, he adopted the same Pratyāhāra system and perhaps the same order of the sūtras as found in the Aṣṭādhyāyī. This was possibly partly equally a factor responsible for in the popularity and disappearance of the study of this system.

The whole of the Supadma-Vyākaraṇa is divided into 5 chapters and each chapter is again subdivided into 4 pādas. The division of 2800 sūtras of the Supadma has been done as shown below :

	Pâda	Number of sūtras	Rem arks
Chapter I	1	35	Saṁjñas Sandhis and
	2	79	changes of sa to ṣa and
	3	78	na to ṇa.
	4	33	
Chapter II	1	46	Kārakas and the dcclen-
	2	67	sion of nouns, pronous
	3	147	and the numerals.
	4	71	
Chapter III	1	147	The con jugation of the
	2	157	roots, inclunding san,
	3	151	ṇic, Yaṅ and yaṅluk.
	4	145	
Chapter IV	1	165	The Kṛt-affixes and the
	2	180	Uṇādis
	3	130	Samāsas (Compounds)
	4	90	Aluk-Prakaraṇa
Chapter V	1	157	The Taddhita-affixes.
	2	230	The feminine afflxes
	3	352	The Śesa-Taddhita affixes
	4	340	The Madhu-Taddhita.
Total		2800	

Padmanābha has dealt with only the rules of classical Sanskrit or Bhāṣā and totaly ignored or excluded the rules dealing with the Vedic language. But within the frame work of 2800 sūtras, he could. not include the "Frequentatives" the words formed from the roots after attaching yaṅ or the yaṅluk grammatical operation. It is

generally an accepted fact that both the formations and use of frequentative 'yaṅ' is the most difficult part and it becomes still more difficult when the frequentative affix (yaṅ) is dropped. Padmanābha devoted special attention to the treatment of this particular process of Sanskrit grammar and this is a new feature of this system. He separately wrote a Vṛtti on the topic known as Yaṅlugādi-Vṛtti and designated it as Uttar-Supadma cf. the colophon—

इति श्रीपद्मनाभदत्तकृतौ उत्तरसुपद्मे व्याकरणे यङ्लुगादिवृत्ति समाप्ता ।

The Pratyāhārs

Padmanābhdaatta begins his new system of Sanskrit vyākaraṇa with the enumeration of the Pratyāhāras though the Pratyāhāra-sūtras are missing in the Supadma-Vyākarana. The technical terms in certain cases have been borrowed from the Astādhyāyī but the nomenclature of the vowels and the consonants for the sake of grouping them, is modelled on the lines of the Sārasvata-Vyākaraṇa.

The abridged terms like 'hal', 'khay', 'Jaś', have been commonly used. No doubt the sūtra "Ādirantyena samadhyaḥ" corresponding to Ādirantyena sahetāḥ' of the Aṣṭādhyāyī exists very much in the Supadma-Vyākarana but it is applicable in case of vowels only. For enumeration of the consonants Padmanābha has used the commenly understood terms like 'hal' etc and each such term is well defined in the sūtras, as shown below :—

1. Hal—(Sup-vyā 1.1.2). The letters other than 'ac' i.e. the consonants.
2. Khay—'Sup-vyā. 1.1.3) the first two letters of each varga.
3. Jaś—(Sup-vyā-1.1.4). The third letters of each varga.
4. Jhaṣ—(Sup-vyā-1.1.5). The 4th letters of each varga.
5. Ñam—(Sup-vyā-1.1.6). The 5th letters of each varga.
6. Jhay—(Sup-vyā-1.1.7). Tth 1st, 2nd, 3rd and 4th letters of each varga.
7. Yaṇ—(Sup-vyā-2.1.8)—ya, va, ra, and la.
8. Śar—(Sup-vyā-1.1.9)—Śa, Ṣa and sa.
9. Khar—(Sup-vyā-1.1.10). The first two letters of the vargas along with Śa, ṣa and sa.
10. Haś—(1.1.11). The consonants excluding 'khar'.
11. Jhal—(Sup-vyār-1.1.12). The consonants excluding Ñam and Yaṇ.
12. Yay—(Sup-vyā-1.1.13). The consonants excluding Śar and 'ha'.

Besides the Pratyāhāras mentioned above, Padmanābha adopted a sufficient number of technical terms in his vyākaraṇa from the Aṣṭādhyāyī of Pāṇini but gave a different defination in comparison to that of the Aṣṭādhyāyī in certain cases claiming originality to some extent. It can be well understood from the table given below :—

Technical terms	*Supadma sūtra*	*Aṣṭādhyāyī sūtra*
1. अनुनासिक	—अं ङमोऽनुनासिकाः 1.1.14	मुखनासिकावचनोऽनुनासिकः I.1.8
2. सवर्ण	—वर्ग्य स्वरौ स्वजातीयैः सवर्णौ 1.1.15	तुल्यास्यप्रयत्नं सवर्णम् I.1.9
3. लघु	—ह्रस्वो लघुः 1.1.16	ह्रस्वं लघु I.4.10
4. गुरुः—	दीर्घो गुरुः 1.1.17	दीर्घं च I.4.12
	ह्रस्वश्च संयोगे 1.1.18	संयोगे गुरुः I.4.11
5. संयोग	—हलो लग्नाः संयोगः 1.1.20	हलोऽनन्तरा संयोगः I.1.7
6. वृद्धिः	—वृद्धिरादैजारालोऽक ऐजेश्च 1.1.21	वृद्धिरादच् I.1.1
7. गुण	—एङरलो गुण इकः 1.1.22	अदेङ् गुणः I.1.2.
8. घु	—दा धा-धुरप् 1.1.23	दाधाघ्वदाप् I.1.20
9. संख्या	—कतिबहुगणतावदादि संख्या 1.1.24	बहुगुणवतुडति संख्या, ष्णान्ता षट्, डति च I.1.23—25
10. अव्यय	—स्वरादि-घादि-वदादि तद्धित-क्त्वा-मान्त-कृदव्ययम्	स्वरादिनिपातमव्ययम् I.1.37
11. निपात	—निपाताश्चादयोऽसत्त्वे 1.1.26	निपात एकाजनाङ् I.1.14
12. उपसर्ग	—प्रादुपसर्गः प्राग्धातोः 1.1.27	उपसर्गा क्रियायोगे I.4.59
13. उपधा	—उपधोपान्त्यः 1.1.28	अलोऽन्त्यात् पूर्वं उपधा I.I.65
14. टि	—अचोन्त्यादि टिः 1.1.29	अचोऽन्त्यादि टिः I.1.65
15. प्रथम— मध्यम उत्तम	—तिङां स्त्रिशः प्रथम-मध्यमोत्तमाः 2.1.30	तिङस्त्रीणि त्रीणि त्रीणि प्रथममध्योमोत्तमाः I.4.101

16. एकवचन द्विवचन वहुवचन —वचन सुप्तिङान्त्रिकमेकद्विबहुष्वैक-वचन द्विवचन-बहुवचनमेकशो विभक्तिश्च 2.1.35	तान्येकवचन-द्विवचन बहुवचनान्येकशः I.4.102
17. प्रतिपादिक—अधातुविभक्त्यर्थवत् प्रातिपदिकम् 2.2.1	अर्थवदरधातुरप्रत्ययः प्रातिपदिकम् I.2.45
18. सम्बुद्धि—सम्बोधनैकवचनं सम्बुद्धिः 2.2.6	एकवचनं सम्बुद्धिः II.3.49
19. पद—सुप्तिङन्तं पदम् 2.3.1	सुप्तिङन्तं पदम् I.4.14
20. भ—यचिभमसादिस्थाने 2.3.5	यचि भम् I.4.18
21. सादिस्थान—शिः सुट् चाक्लीबस्य सादिस्थानम् 2.3.6	सुडनपुंसकस्य I.1 43
22. घि—उदितौ घिः सख्यसमासपतिवर्जम् 2.3.7	शेषो घ्यसखि I.4.7
23. नदी—स्त्रीयूचानियुवौ नदी 2.3.8	यूस्त्र्याख्यौ नदी I.4.3
24. सर्वनाम—सर्वादीनि सर्वनामानि स्वार्थेऽसंज्ञायाम् 2.4.1	सर्वादीनी सर्वनामानि I.1.27
25. इत्—चिह्नार्थमित् 2.3.10	उपदेशेऽजनुनासिकः इत्, हलन्त्यम् I.3.2—3
26. धातु—भूवादिसनाद्यन्ता धातवः 3.1.49	भूवादयो धातवः I.3.1
27. निष्ठा—क्तक्तवतौ निष्ठा 3.2.16	क्तक्तवतू निष्ठा I.1.26
28. सार्वधातुक—शिल्लट्लोट्लिङ्लङः सार्वधातुकम् 3.2.17	तिङ्शित्सार्वधातुकम् III.4.113
29. आर्धधातुक—शेषमलुङार्द्धधातुकम् 3.2.18	आर्धधातुकं शेषः III 4.114
30. परस्मैपद—लस्तिङिपूर्वार्धं शतृक्वसू च परस्मैपदम् 3.2.78	लः परस्मैपदम् I.4.99
31. आत्मनेपद्—परार्द्धं मानश्चात्मनेपदं तङ् च 3.2.88	तङानावात्मनेपदम् I.4.100
32. कृत्य—कृत्याः प्राङ्णकात् 4.1.8	कृत्याः प्राङ्ण्वुलः III.1.95

Sandhi

Padmanābha does not differ much from Pāṇini in the treatment of the Sandhis. All the sūtras dealing with Sandhi, have been grouped under three heads :—

(1) स्वर संधि (The Saṅdhi of Vowels)

(2) व्यञ्जन संधि The Saṅdhi of Consonants)

(3) विसर्ग संधि (The Saṅdhi of Visarga)

The portions dealing with change of sa to ṣa and na to ṇa, have been kept at the end of treatment of Sandhi rules in this chapter because these changes take place only while applying the rules of Saṅdhi.

The Kārakas and the Vibhakatis :—

The Kārakas and the Vibhaktis have been dealt with by Padmanābhadatta in the 2nd chapter of the Supadma Vyākarana. 'Kāṛka' according to Padmanābhadatta is the cause of action i.e. 'Kriyānimittam kārakam'—(Sup. Ṭīkā 2.1.1) The definations of the six Kārakas given by Padmanābhatta differ to a great extent from what we find in the Astādhyāyī as is evident from the definations given below :—

1.	कर्ता (Nominative)	स्वतन्त्र तत्प्रयोजको कर्ता	(Sup. 2.1.2)
2.	कर्म (Accusative)	क्रियाव्याप्यं कर्म	(Sup .2.1.3)
3.	करण (Instrumental)	साधकतमं करणम्	(Sup· 2.1.9)
4.	सम्प्रदान (Dative)	प्रदानादिभिसम्बध्यमानं सम्प्रदानम्	(Sup. 2,1.12)
5.	अपादान (Ablative)	अवधिरपायादिष्वपादनाम्	(Sup. 2.1.20)
6.	अधिकरण (Locative)	आधारोऽधिकरणम्	(Sup. 2.1.21)

The seven Vibhaktis which indicate the relation of the substantives with a verb in a sentence are the same as are met with in the Aṣṭādhyāyī except that Padmanābhadatta makes no distinction between a Kāraka-Vibhakti and an Upapada-Vibhakti. Consequently the Karmapravacanīya found no place in the Supadma-Vyākaraṇa. On the contrary, he stated that such and such prefixes will have Dvitiyā. To some extent it can be termed as simplicity in compari son to the Aṣṭādhyāyī. Similary in place of Akathita (अकथित), the very 12 roots have been mentioned. The sūtras determining the use of singular number and plural number have also been kept along with the sūtras dealing with the case-endings.

The declension of the Subantas

The third and the fourth pādas of the 2nd chapter in the Supadma-vyākaraṇa have been devoted to the rules dealing with the declension of the nouns and the pronouns respectively. The third pāda deals with the rules concerning the words ending in vowels and consonants. The second chapter begins with the definitions of 'pada, bha, sādisthāna, ghi, nadī and it. The required grammatical operation in case of words ending in vowels, has been summarised and cut short in 60 sutras only. The subjectmatter of the sūtras in the Subanta-prakaraṇa, has been arranged in accordance with the various grammatical operations which the nouns undergo when followed by the different case endings. For example, the sūtras regarding the 'guṇa' have been kept together at one place, the sūtras directing the lengthening of 'Upadhā' at another place. The sūtras directing the 'lopa' of the case ending 'su' have been put alongwith the sūtras which direet the application of 'su', etc.

The sūtras dealing with the change of 'sa' to 'ṣa' and 'na' to 'ṇa' have also found place in this very section.

Besides, the sūtras dealing with the change of 'sa' to 'ṣa' and 'na' to 'ṇa' in the subantas due to case-endings, have also found place in this section. In the last 10 sūtras of this section of IV pāda, Padmanābhadatta has also dealt with the letters which are used to convey the meaning of various Vibhaktis (e.g. thus tasi, tra, at, ha and tasi).

The tiṅantas (conjugation of roots).

The conjugation system in the Supadma-Vyākarana is on the lines of the Kātantra-Vyākaraṇa, though the sūtras to some extent resemble with those of the Aṣṭādhyāyī. The lengthy grammatical operations have been cut short. All the roots are divided in 10 gaṇas and the roots in each gaṇa are governed according to the vikarṇas attached to them. The Third Chapter consisting of 4 padas has been devoted to the treatment of the conjugation, The first pāda of the 3rd chapter is devoted to the treatment of the desiderative, the intensive, the causative and the denominative forms of roots. The same pāda also deals with

Ātmanepada and Parasmaipadaprakriyā. The second pāda deals with the rules as to which affixes should be regarded as ṅ-eliding or k-eliding. It also mentions the names of the tenses and moods Laṭ, Loṭ etc., indicating various tenses, 180 verbal endings, and the various vikaraṇas which come after the roots. It also discusses the rules regarding the various modifications which the roots as well as the verbal endings undergo under certain circumstances. The 3rd pāda again deals with the rules regarding the various modifications of the roots followed by certain affixes and vikaraṇas, the rules for augmenting 'num', 'am' etc. to certain roots, the rules regarding the elision of the nasals of the roots, the substitution of roots (like 'ghasḷ' in the place of the root 'ad'; 'vadha' in the place of the root 'han' etc.) under certain circumstances, the vocalization (Samprasāraṇa) of the roots. The 4th pāda consists of the rules regarding the reduplication of the roots, the augmentation of 'it' to the roots, as well as the rules for Guṇa and Vṛddhi substitution of the vowels of the roots and their prohibition when followed by certain affixes.

Regarding the treatment of the conjugation of the roots Padmanābhadatta has mainly followed Pāṇini except a few differences. Instead of 18 verbal endings of Pāṇini has mentioned 180 verbal endings following his other predecessors. The verbal endings in each lakāra are as follow :

1) laṭ lṛṭo-stip-tas-anti, sip thas tha, mip vas mas. te āte ante, se āthe dhve, a vahe mahe. (Sup : vyā.3.2.78).

2) loṭastup tām antu, hi tam ta, ānip āvap āmap. tām ātām antām, sva āthām dhvam, aip āvahaip āmahaip (Sup. Vyā. 3.2.79).

3) liṭo ṇal atus us, thal athus a, ṇal va ma. e āte ire, se āthe dhve, e vahe mahe. (Sup. Vyā. 3.2.80).

4) luṭastā tārau tāras, tāsi tāsthas tāstha, tāsmi tāsvas tāsmas. tā tārau tāras, tāse tāsāthe tādhve, tāhe tāsvahe tāsmahe (Sup. Vyā.3.2.83)

5) luṅ laṅ-lṛṅām dip tām an, sip tam ta, pam va ma. ta ātām anta, thās āthām dhvam, i vahi mahi (Sup.Vyā.3.2.84)

6) liṅo-yāt yātam yus, yās yātām yāta, yām yāva yāma. īta īyātām īran, īthās īyāthām īdhvam. īya īvahi īmahi (Sup.vyā.3.2.85)

7) loṅo yāt yāstām yāsus, yās yāstam yāsta, yāsam yāsva yāsma. sīṣṭa sīyāstām sīran, sīṣṭhās sīyāsthām sīdhvam, sīya sīvahi sīmahiṅ. kiccādyarddham (Sup.vyā.3.2.86)

Ten gaṇas of roots are admitted by Padmanābhadatta These are Bhvādi, Adādi, Hvādi Divādi, Svādi, Tudādi, Rudhādi, Tanādi, Kryādi, and Curādi. The vikaraṇas are the same as that of Pāṇini. The only difference is while Pāṇini directs sap luk after the Adādi class of roots and the vikaraṇa 'ślu' after the Juhotyādi class of roots, Padmanābhadatta did not ordain any vikraṇa for these two classes of roots and has stated that the vikaraṇa 'śap' should nat come after the Adādi and Hvādi class of roots. The different vikaraṇas are mentioned below :

1)	Bhvādi	—	śap (kartari śab and hvādi-yaṅ-lukaḥ,		Sup.vyā.	3.2.145
2)	Adādi	—	X			
3)	Hvadi	—	X			
4)	Divādi	—	śyan	divādibhyaḥ śyan,	,,	3.2.146.
5)	Svādi	—	śnu	svādibhyaḥ ṣnuḥ,	,,	3.2.149.
6)	Tudādi	—	śa	tudādighyaḥ śaḥ,	,,	3.2.153.
7)	Rudhādi	—	śnam	rudhādeḥ śnam,	,,	3.2.154.
8)	Tanādi	—	u	tanādibhya uḥ,	,,	3.2.155.
9)	Kryādi	—	śnā	kryādeḥ snā pvādihrasvaśca,	,,	3.2.156.
10)	Curādi	—	ṇic	curādibhyo ṇic,	,,	3.1.22.

Ten different Lakāras are admitted by Padmanābhadatta. The Leṭ lakāra mainly used in the Vedic texts, treated by Pāṇini, has been naturally left out by Padmanābhadatta. One striking feature of the Supadma-vyākaraṇa is that here for the first time 'Āśīrliṅ' is called 'Loṅ, Lakāra. (āśiṣi loṅloṭau. Sup.vyā. 3.2.71.)

The Kṛt-affixes have been taken up by Padmanābha in the first pāda of the 4th Chapter. Covering almost all the kṛt-affixes in 165 sūtras, he has totally dropped those affixes which were meant to differentiate only on the basis of accents in the Aṣṭādhyāyī Consequently the number of the kṛt-affixes has gone down in this chapter. The point to be worth noticing in respect of such affixes is that because of this method वाऽसरूपोऽस्त्रियाम् (P.III.94) has been rendered superflous simply by taking resort of कृद्बहुलम् (Sup. Vya. IV 1.1) cf. अतो बाहुलकमाश्रित्य मुनिप्रणीतमपि वा सरूपोऽस्त्रियामिति सूत्रमनेनैव प्रत्यादिष्टेयम् (Sup. Vṛtti on IV. 1.9). Though the Supadma-Vyākarana claims to deal with the words of classical Sanskrit only, we come across the formation of Vedic words in abundance in this kṛt-section.

Uṇadis

The Uṇādiś have been taken up by Padmanābha in the 2nd pāda of this chapter covering the Uṇādi formations in 180 sūtras. He has followed Pāṇini because such formations have been treated as irregular formations and taken for granted in use from the tradition. So it is not at all possible to show and justify their formation through proper derivation. Still the Unādis are treated as sūtras to facilitate the students only.

नन्वेषां प्रकृति प्रत्यविभागमकृत्वा किमित्युणादयो बहुलमित्युच्यते इत्याह यदाहुरिति. मुनय इति शेषः 'उणादिप्रत्यान्ताः शब्दाः अव्युत्पन्नानि प्रातिपदिकानि रूढ़ा इत्यर्थः। औणादिका हि संज्ञाशब्दास्ते च व्युत्पत्तिमन्तरेण लोके विशिष्टविषयितया प्रसिद्धाः, न च तेषां व्युत्पत्तिः कर्त्तुं शक्यते आनन्त्यात्। कृतान्तु प्रकृतिप्रत्ययविभागो दर्शित एव, अत्र तेषां शक्तेः, ननु सूत्रमेव प्रणीयतामिति चेत्। युक्तमुक्तम् बालव्युत्पत्तये सूत्रप्रणयनम्।

(Sup. Vṛtti on उणादयो बहुलम्, IV.2.1)

The underlying principle applicable, in case of Uṇādis has been summed in the kārikā given below :

संज्ञासु धातुरूपाणिप्रत्ययांश्च ततः परे।
कार्य्याद् विद्यादनुबन्धमेतच्छास्त्रमुणादिषु ।।

One has to imagine the existence of the roots and the possible affixes without caring for the Guṇa and Vṛdhi operations.

The Samāsas

The Samāsas (compounds) have been taken up in the 3rd pāda of 4th chapter in the Supadma-Vyākarṇa in 130 sūtras. After

giving the सपासविधिसूत्रs Padmanābha has prescribed the sūtras which decide the first position of a word in the compounded form. The Sūp. Sūtra—प्रथमा पूर्वं समासे appears slightly an improvement upon the Pāṇinian sūtra प्रथमा निर्दिष्टं समास उपसर्जनम्(p.I.2.43)। Similarly cf. ह्रस्वो नपुंसके प्रतिपदिकान्तस्य Sup-Sūtra and the Paninian sūtra ह्रस्वो नपुंसके प्रातिपदिकस्य । (P.I. 3.47)

The 4th pāda of this chapter known as Aluk-Prakaraṇa is not limited only to the Aluk form of compond. The other grammatical operations which are due while compounding words, have also found place in this chapter e.g. the changes in the former member of the compound, substitutes of the former part, the sūtras deciding पुंवद्भाव, lengthening of vowel in former part, sūbsitutes to the subsequent later word in a compound including the application of Nañ and other such changes. This chapter concludes with पृषोदरादीनि यथोपदिष्टम्, justifying the irreuglar forms of the compound.

The Taddhita affixes and the Samāsānt-affixes hāve been treated in the V chapter of the Supadma-Vyākaraṇa. The sūtras determining formations have been treated in the 3rd pāda of this chapter. The remaining taddhita formations haee been taken up in the 4th pāda. More or less the affixes and formatios are as given in the Pāṇinian system.

—x x x—

विषयानुक्रमणी

सुपद्मव्याकरणम्

प्रथमोऽध्यायः

प्रथमः पादः

ॐ नमो गणेशाय

प्रणम्य परं देवं देवी वाचमृषीन् गुरून् ।
पद्मनाभः स्फुटं[1] पूर्णं[2] भाषायामाह[3] लक्षणम्[4] ॥

अथ विवरणञ्च तस्य शब्दानुशासनेन सह पाणिनीयादि शब्दस्मृतीरूपलक्ष्य सौकर्य्योपाधये[5] प्रति संस्कृतस्य शब्दलक्षणस्य । तत्रादौ वर्णोपदेशः शास्त्रप्रयोगाय ।६। अ इ उ ण्, ऋ लृ क्, ए ओङ्, ऐ औच् ।

---

(१) अकुटिलार्थमसन्दिग्धार्थं निर्दोषमित्यर्थः ।

(२) एक कर्तृत्वेन संहितादितद्धितान्तप्रतिपादनक्षमम्, यावद् ग्रन्थसन्दर्भेण व्युत्पत्तिर्भविष्यति तावदित्यर्थः ।

(३) प्रकृति-प्रत्ययविभागेन साधुशब्दव्युत्पादनं भाषा, तस्यामित्यर्थः ।

(४) लक्ष्यते संस्कृत भाषा ज्ञायते येन तत् लक्षणम् सूत्रमिति ।
तस्य लक्षणन्तु—'अल्पाक्षरमसन्दिग्धं सारवत् सर्वतोमुखम्' ।

अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ।

तच्च षड्विधम् । यथा—

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अधिकारोऽतिदेशश्च षड्विधं सूत्रलक्षणम् ।

(५) सुखेन बोधाय । प्रकरणसौष्ठवार्थमानुपूर्व्वर्या स्थापितस्य भणितस्य वा ।

(६) अत्र अ इ उ ण् इत्यादि संज्ञासूत्रेषु सन्ध्याभावोऽव्ययत्वेन प्रयोगात् विभक्त्याभावश्च बोद्धव्यः ।

१. आदिरितान्त्येन समध्यः ।

आदिवर्णोऽन्त्येन इता णकारादिना इत्संज्ञकेन सह समध्यो ग्राह्यो भवति । अण इत्युक्ते अकार-उकार-इकारा गृह्येरन्, णकारादीनां प्रत्याहारार्थमुच्चारणम् । एवमन्ये च प्रत्याहाराः प्रयोगे द्रष्टव्याः । यथा अण्, इण्, अक्, इक्, उक्, ऋक्, एङ्, अच्, इच्, एच्, ऐच् इत्यमी एकादश । अपरे च नाम्नोपदिष्टा द्वादश ।

२. अचोऽन्ये हल् ।

अचोऽन्ये वर्णा हल् संज्ञकाः भवन्ति, कादयो हन्ताः ।

---

१. अन्ते भवोऽन्त्यश्चरमस्तेन, ण् क् ङ्, च् रूपेण । यथा 'अण्' इत्युक्ते अन्त्यो णकारः 'अक्' इत्यन्त्यः ककारः । एवामण् इक् प्रभृतिषु ।

(१) अ इ उ ण्, ऋ लृक्, एओङ्, ऐऔच् । इति स्वरवर्णानामेकादश संज्ञाः । सङ्केतोनोक्ताः । तत्र प्रथमं तावत् अण् संज्ञा कथ्यते । अइउण्, णकाराश्चिह्नार्थः । अर्थात् संक्षेपेण विभागबोधकश्चिन्हविशेष, नत्वन्यत् किमपि कार्य्यं साधयति । यथात्र णकारश्चिन्हार्थस्तथा परत्रापि क्-ङ्-चाः, एतेऽपि चिन्हार्थाः) अ-आ-इ-ई उ-ऊ इत्यण् संज्ञा ।

(२) इ उ ण् णश्चिह्नार्थः इ-ई-उ ऊ, एते इण् सज्ञकाः ।

(३) अ-इ-उ-ण ऋ-ॠ लृक् । णकौ चिन्हार्थौ । अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-लृ लॄ-इत्यक् संज्ञा ।

(४) इउण्, ऋलृक् । णकौ चिन्हार्थौ इ-ई-उ-ऊ-ऋ-ॠ-लृ-लॄ इतीक् संज्ञा ।

(५) उण्, ऋ लृक् । णकौ चिन्हार्थौ उ-ऊ-ऋ-ॠ-लृ-लॄ इत्युक् संज्ञा ।

(६) ऋ-लृक्—क् चिन्हार्थः, ऋ, ॠ, लृ, लॄ इति ऋक् संज्ञा ।

(७) एओङ्—ङ् चिन्हार्थः ए ओ इत्येङ् संज्ञा ।

(८) अ इ उण्, ऋ लृक्, एओङ्, ऐऔच्—ण-क-ङचिन्हार्थाः, अ आ इ ई उ ऊ ऋ ॠ लृ लॄ ए ऐ ओ औ इत्यच् संज्ञा ।

(९) इ, उ, ण्, ऋ, लृक्, एओङ्, ऐऔच्—ण क ङ चाश्चिन्हार्थाः, इ, ई, उ, ऊ, ऋ, ॠ, लृ, लॄ, ए, ऐ, ओ, औ इतीच् सज्ञा ।

(१०) एओङ्, ऐऔच् ङचौ चिन्हार्थौ, ए ओ ऐ औ इत्येचः संज्ञा ।

(११) ऐ औच् चकार चिन्हार्थः, ऐ औ इत्यैच् संज्ञा ।

२. अच्भिन्नवर्णा अल् संज्ञकाः, क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स ह :—

३. **खयादिद्वयं वर्गस्य ।**

क-च-ट-त-पादीनां पञ्चकानां वर्गसंज्ञा प्रतीतैव । तस्य आदि वर्णद्वयं खय् संज्ञः स्यात् । क, ख, चछादि ।

४. **तृतीयो जश् ।**

वर्गस्य तृतीयो वर्णो जश् संज्ञः स्यात् । ग, ज, ड, द, ब ।

५. **तुर्य्यो झष् ।**

वर्गस्य चतुर्थो वर्णो झष्-संज्ञः स्यात् । घ, झ, ढ, ध, भ ।

६. **ङम् पञ्चमः ।**

वर्गस्य पञ्चमो वर्णो ङम् संज्ञो भवति । ङ, ञ, ण, न, म ।

७. **झय् वर्गो अङम् ।**

ङम् हीनो वर्गो झष् संज्ञो भवति । क ख ग घ, च छ ज झादि ।

८. **यवरलो यण् ।**

एते यण् संज्ञका भवन्ति ।

९. **शषसाः शर् ।**

एते शर् संज्ञका स्युः ।

१०. **खर् खय्-शरौ ।**

वर्गादिद्वयं, शषसाश्च खय् संज्ञकाः स्युः ।

---

३. क ख, च छ, ट ठ, त थ, प फ एषां खय् संज्ञा भवति ।

४. ग ज ड द ब; एतेषां जश् संज्ञा भवति ।

५. घ झ ढ ध भाः (झष्) ।

६. ङ ञ ण न माः (ङम्) ।

७. क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध न, प फ ब भाः (झय्) ।

८. ननु वर्णसमाम्नायक्रमसिद्धौ रेफो वकारपूर्व्वस्यात् कथमत्र तस्य परत्वमुच्यते ! शकारः स्वङ्कृतासिद्धयर्थं च्युतक्रमेण पठितवान्, तथाहि इको यणचीत्यादिविधौ ऋकारस्य स्थाने रेफः प्रवर्त्तते न वन्येति, एतेन प्रयोजनमप्युक्तम् । य व र लाः (यण्) ।

९. शषसाः (शर्) ।

१०. क ख, च छ, ट ठ, त थ, प फ, श ष साः (खर्) ।

११. खरुज्झितो हल् हश् ।

खर्परिहीनो हल् हश् संज्ञः स्यात् . गघङ इत्यादि ।

१२. ङम् यण् हीनो झल् ।

ङम्यण् हीनो हल् झल् संज्ञः स्यात् ।

१३. अशर् हो यय् ।

शर्-हकार वर्जितो हल् यय् संज्ञः स्यात्, एते प्रत्याहाराः प्रयोगे लक्षणीयाः ।

१४. अं ङमोऽनुनासिका ।

एते अनुनासिकसंज्ञाः स्युः, मुखसहितया नासिकयोच्चार्यमाणत्वात् ।

१५. वर्ग्यस्वरौ स्वजातीयैः सवर्णौः ।

वर्ग्यः ककारादिवर्णः स्वरोऽकारादि स्तौ सजातीयैः सह सवर्णसंज्ञकौ भवतः । वर्ग्यो वर्ग्येण सवर्णः स्वर-स्वरेण समान प्रकारेण । दण्डाग्रम्, मधूपमम्, गम्लृकारः— अकः सवर्णे दीर्घः । ऋलृवर्णयोश्च सावर्ण्यं वक्तव्यम् । होतृ = लृकारः होतॄकारः । पूर्वाको दीर्घत्वे ऋकार एव । अष्टौ स्थानानि वर्णानामुरः कण्ठ शिरस्तथा । जिह्वा-मूलष्च दन्ताश्च नाशिकोष्ठञ्च तालु च । कस्य पुनः किं स्थानम् ? अकुहविसर्जनीयानां कण्ठः । इ चु यशानां तालु; ऋटुरषाणां मूर्द्धा; लृ तुलसानां तालु; ओदौतः कण्ठोष्ठम्; वकारस्य दन्तोष्ठम्; जिह्वामूलस्य जिह्वामूलीयकः इति जिह्वामूलीयः, अनुस्वारस्य नासिका स्थानम् । गजडदबास्तु कण्ठोरस्याः । पाठ्ययोगे ह्रस्वदीर्घादयः, स्वधर्मास्तु एकमात्रो भवेद् ह्रस्वोः, द्विमात्रो दीर्घ उच्चयते । त्रिमात्रस्तु प्लुतो विज्ञेयः व्यञ्जन-ञ्चार्धमात्रिकम् । सन्ध्यक्षराणां ह्रस्वा न सन्ति । ए ओ ऐ औ सन्ध्यक्षराणि ।

---

११. गघङ, जझञ, डढण, दधन, बभम, यवरलहाः (हश्) ।

१२. क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ व भ, श ष स हाः (झल्)।

१३. श ष स र भिन्ना वर्णाः (यय्) ।

१४. ँ ङ ञ ण न माः (अनुनासिकाः) ।

१५. एकस्थानोच्चार्य माणेन स्वरवर्णेन सहवर्ग्य वर्णस्य, तथा एकस्थानोच्चार्यमाणेन स्वरवर्णेन सह स्वरवर्णस्य सवर्णसंज्ञा भवति । यथा अकारेण आकारस्य, कवर्गेण कवर्गस्य, पवर्गेण सह पर्गस्येत्यादि । दण्ड + अग्रम् दण्ड इत्यस्य अकारेण अग्रम् इत्यकारस्य सवर्णता । दधीदमित्यादावप्येवं ज्ञातव्यम् । ऋ लृ वर्ग्यांकौ सजातीयैः सवर्णावित्युक्ते सिद्धे किमनेन ? सत्यम्, भङ्ग्या अकारादीनां स्वरसंज्ञाज्ञापनार्थं स्वर इत्युक्तम् । स्वरप्रयोजनञ्च रषृभ्यो णोनः स्वरः इति सूत्रे ।

१६. **ह्रस्वो लघुः ।**

ह्रस्व स्वरो लघु संज्ञः स्यात् । अ इ उ ऋ ऌ ।

१७. **दीर्घो गुरुः ।**

दीर्घ स्वरो गुरुः संज्ञः स्यात् । आ ई ऊ ॠ ॡ ।

१८. **ह्रस्वश्च संयोगे ।**

संयोगे परे ह्रस्व स्वरश्च गुरुसंज्ञो भवति, न लघुः । तेन अततक्षदि त्यत्रालघू-परत्वात् सन्वद्भावो नास्ति । तथा विसर्गानुस्वारपरोऽपि, "कः किं करोति ।"

१९. **उदितह्रस्वश्च सवर्णेनाप्रत्ययोऽतत्परः ।**

प्रयोगे उदितवर्णो ह्रस्वश्च गृह्यमाणसवर्णे सह ग्राह्यो भवति । उदित्—कु चु टु तु पु । चो कुः । ह्रस्वः –अ इ उ ऋ । ऌ—'आदिको गुणः' देवेन्द्रः खट्वेहा । अप्रत्यय इति किम् । बुभूषुः, आगमोऽप्यत्र प्रतीयमानत्वात् स्वरूपेण गृह्यते, इट् णौ षूः, अर्पयति । अत पर इति किम् ? ।त त्रैस् वृक्षैः । नेह खट्वाभिः ।

२०. **हलो लग्नाः संयोगे ।**

संलग्नाः हलः संयोगसंज्ञका भवन्ति । उक्षाञ्चकारः, गुर्व्विजादेनृच्छोर्णो-रित्याम् ।

---

१६. अ इ उ ऋ ऌ एते ह्रस्वसंज्ञकाः । (ह्रस्वस्वराः)

१७. ननु ह्रस्वो लघुरित्युक्ते प्रतियोगित्वाद् दीर्घो गुरुरिति गम्यते ? तथा ह्रस्व-दीर्घो, लघु-गुरु एवं कृतेऽपि सिद्धिः स्यात्, तत् किं पृथग्योगेन ? सत्यम्, सर्वं मन्दधियां सुखप्रातिपत्यर्थम् । आ ई ऊ ॠ ॡ इति दीर्घस्वराणां गुरुरिति संज्ञा ।

१८. ननु कारकं समासञ्च परित्यज्य संज्ञान्तरबाधां न करोतीत्युत्सर्गः, करोति चेत् सकर्त्तेत्यादौ हलि विसर्गलोपादिर्नस्यात् कादेः खयत्वात् ?
सत्यमस्त्येवम्, ह्रस्वग्रहणादेवाबाधकत्वं प्रतीयते । इतरथा ह्रस्वो लघुः, संयोगे गुरुः, दीर्घश्चेति कृतेऽपीष्ठसिद्धिः किमनेनेति ? सन्वद्भावात् प्राङ्णौ च ङीत्यादेर्विशेषः । संयुक्तहलवर्णस्य पूर्व्ववर्त्ती ह्रस्वस्वरः, ः ँ (विसर्गानुस्वार-पूर्व्ववर्ती ह्रस्वस्वरश्च गुरुसंज्ञकः) ।

२०. अत्र् बहुवचनमविवक्षितम्, तेन हलौ चेदनन्तरौ तदापि संयोगाभाववतीत्या-शङ्क्यमान उदाहरति 'उक्षाञ्चकार' इति । संयुक्त हलः, हलवर्णाः संयोगः (संयोगः संज्ञकः) ।

२१. **वृद्धिरादैजारालोऽक ऐजेचश्च ।**

आत् ऐ औ आर् आल् इत्येते वृद्धिसंज्ञकाः भवन्ति । समसंख्यानामुद्देशिनामनुदेशो यथाक्रमम्, इत्यकः स्थाने यथाक्रमं भवन्ति । ऐजेचश्चेति परिभाषिता वक्ष्यति । अदुपधेचोर्णितीति वृद्धिः । पाचयति, जापयति, भावयति, कावयति, णिति वृद्धिरचामादे, आल्कारम्, ऐजेश्चेति स्थाने सदृशतमत्वात्, एदेतोरैः, ओदौतोरौः स्यात्, वृद्धिरेजूठः, तवैषा, जायैहत, तवौदनं, वृक्षौ ।

---

२१. आदैजाराल इति द्वन्द्वः । ननु कार्य्यिनिमित्तं कार्य्यमित्येष निर्देशक्रमः (परि० ७१) इति नियमादक आदैजारालो वृद्धिरिति वक्तव्यमुचितम्, तत् कथं तदविपरीतं कृतम् ? सत्यम्, व्युत्क्रमनिर्द्देशादाकाराद् योऽनादिष्टोऽपि वृद्धि संज्ञकाः । तेनाचार्य्यीय इत्यादौ ईयः (५-३-१५) इतीयो भवतीत्याह, आत् ऐ औ इत्यादीति । अथाकः स्थाने आदादयो वृद्धयो भवन्तः क्रमेण स्युः अन्यथा प्रत्येकसम्बन्धो न वेत्यपेक्षायां परिभाषायामाह समसंख्यानामित्यादि । यथाक्रमं द्विविधम्, शब्दकृतमर्थकृतञ्च, इह तूभयम् अत्रवचनमात्रं । ज्ञापकञ्चास्या लट्लृटोरस्यादौ शतृ शानश्चेति पृथग् विभक्तिनिर्देशत्वे यत्र क्वचन क्रमो नेष्यते तत्र यत्नान्तरं किमप्यास्थेयम् । यथा णकेनोर्भविष्य.-धर्मण्योरिति । इति शब्दो हेतौ, अथ यत्र सूत्रे स्थानिना निर्दिष्टास्तत्र कथं वृद्धिः स्यादित्याह परिभाषितेति । एतेनैतदुक्तं भवति, अनिर्दिष्टस्थानिकवृद्धिश्च एव भवतीति । तेनैतस्य सूत्रस्य संज्ञात्वं परिभाषात्वञ्चेत्युभयात्मकत्वम्, सुबाद्याः प्रत्ययाः पर इतिवत् । अतएव पाणिनीयशब्दस्मृतौ वृद्धिरादैच्, अदेङ् गुण इति सूत्रद्वयमभिधाय इकोगुणवृद्धी इति प्रणिनाय । अथ वृद्धिरादैजाराल इत्युक्तेऽप्यानिर्दिष्टस्थानिक वृद्धिश्च एव भविष्यति स्थानान्तरतुल्यत्वात् तत् किमगेचोर्ग्रहणेन ? नन्वनिर्दिष्टिका वृद्धिश्च ऋकारलृकारयोमूर्द्धन्य.दन्त्योरारालौ कण्ठ्यमूर्द्धन्यौ कण्ठयदन्त्यौ कथं भवेताम् स्थानान्तरतम्याभावदिति वक्तव्यम्, यत एच इग ह्रस्वत्वे इत्यत्र अन्त्यान्तरतम्यापि स्थानान्तर्यं वक्ष्यामः । तद्वदत्रापि भविष्यति ? सत्यम्, मन्दधियां सुखप्रतिपत्यर्थमेव । एवं वक्षमाण (वक्ष्यमाण) लक्षणेऽपि ज्ञेयम् वक्ष्यति, अदुपधेचोर्णितीति अनेन वक्ष्यमाणोदाहरणेषु वृद्धिर्विधीयते इति पुरस्कृत्य सम्बद्धनीयम्, ऐजेचश्चेति । अथ कथं यथाक्रमं वृद्धिः ? समसंख्यत्वाभावादित्याह स्थाने सहशतमत्वादिति तेन कण्ठतालव्यकण्ठोष्ठयत्वेन ऐचः समसंख्यात्वमिति वृद्धिरेजूठ इति सूत्रम् । तेन वक्ष्यमाणोदाहरणेषु वृद्धिरित्यर्थः ।

आ ऐ औ आर् आल् एते स्वत एव वृद्धिसंज्ञका वर्णा अकः स्थाने यथाक्रममादिष्टा अपि तथा ए ओ औ औ स्थाने आदिष्टौ ऐ औ इत्येतेऽपि सर्वे वर्णा वृद्धिः संज्ञकाः ।

२२. **एङरलो गुण इकः ।**

ए ओ अर् अल् इत्येते गुणसंज्ञका इकः स्थाने यथाक्रमं भवन्ति । आदि को गुणः— देवेन्द्रः, चन्द्रोपमः, अर्धर्च्चः, तवल्कारः । ह्रस्वस्य गुणः, हे सखे, हे रायो, हे पितः ।

२३. **दाधा-घुरप् ।**

पर्वज्जितो दाधाश्च घु संज्ञकः स्यात् । दा-दाञ् दाने, दो देङः दोददेधाः दत्तम् । धा-धाङ्, धेटः कि, विधिः, णत्वं प्रणिधिः । अपिदिति किम् ? दाप् दातं धान्यम्, दैप् अवदातं वस्त्रम् ।

२४. **कति-बहु-गण-तावदादि संख्या ।**

एते सख्या संज्ञका स्युः । कतिधा, बहुकृत्वः, गणशः, तावत्कृत्वः, यावत्कम् एतावत्कम् ।

२५. **स्वरादि-चादि-वदादि-तद्धित-क्त्वा-मान्त-कृदव्ययम् ।**

स्वः शब्दादयश्चादयश्च वदादितद्धिताश्च क्त्वा, मान्तकृतश्च अव्ययसंज्ञकाः स्युः । स्वः उच्चकैः, सुब्लुक्, अक् च । स्वर्—प्रातर्, उच्चैस्, नीचैस्, दिवा, बहिस्, मृषा, हे, है, अद्धा, कम्, शश्, शुभम्, स्वस्ति, अस्ति, अभीक्षणमित्याद्याः स्वरादयः, चादयः खल्वपि, याति च वाति वा स्वरादयो वा चकाश्चादयो द्योतका इति भेदः । वदादयस्तु देववत्, बहुशः । क्त्वा मान्तकृतश्च, कृत्वा, कर्त्तुम्, उच्चैकारम् ।

२६. **निपाताश्चादयोऽसत्त्वे ।**

अद्रव्ये वर्त्तमानाश्चादयो निपातसंज्ञकाः स्युः । च, वा, वै, अमा, स्वाहा, स्वधा, ओं, अ, आ, इ ई, उ, ऊ, पशु, तु, अद्धा, अहो, आहा, उताहो, कम्, शम्, शुभम्, स्वस्ति, अस्ति, मन्ये, असि, ब्रूहि, विभाषा, अन्यतरस्याम्, अभीक्षणम्, नञ्-नो, अह, आह, इति, इ, इत्यादि । आकृतिगणोऽयम् । अद्रव्य इति किम् ? स्वाहा अग्नायी ।

---

२२. अत्रापि योगं विवक्षुः संज्ञात्वं परिभाषात्वञ्च पूर्ववद्दर्शयन्नाह ए ओ अर् अल् इति—अकः स्थाने आदिष्टा अपि गुणसंज्ञका वर्णाः ।

२३. दा दाञ् दाने दो देङ्, धा, धेट् एतेषां धातूनां घुसंज्ञा भवति ।

२४. कति-वहु-गण-तावत्-यावत्-एतावत्-प्रभृतीनां संख्या संज्ञा स्तात् ।

२५. स्वर् आदिर्यस्या सः तथा च आदिर्यस्य, वत्मादिर्यस्य सः वदादिश्चासौ तन्तेद्धितश्चेति कर्मधारयः । मोऽन्ते यस्य स मान्तः, मान्तश्चासौ कृच्चेति कर्म-धारयः, ततः समाहारे द्वन्द्वः । स्वर प्रभृति, च प्रभृति, वति प्रभृतितद्धित प्रत्ययान्त-क्यान्त-मकारोन्त-कृत्-प्रत्ययान्त-शब्दानांमव्यय संज्ञास्यात् ।

२६. उच्चावचेष्वर्थेषु निपतन्तीति निपाताः । तत्र केऽप्येषां द्योतकाः केऽपि वाचका केऽप्यनर्थकाः । आगमा इव केऽपि स्युः संभूयार्थस्य वाचकाः । वाचकाः शश्वदादयः, अनर्थका हुंफडादयः । द्रव्येतरवाचि चकाराद्यव्ययानां निपात-संज्ञा च ।

२७. **प्रादुपसर्गः प्राग्धातोः ।**

प्रादिर्निपात उपसर्गश्च धातोः प्राक् स्यात् । प्रणमति, परिपीतः । प्र परा अप सम् अनु अव् निर् दुर् अभि व्यधि सुदति नि प्रति पर्यपयः । उप आङिति विंशतिरेषः सखे उपसर्गविधिः कथितः कविना । अन्तशब्दश्च णत्वे धाञो डाप् किविधौ चोपसर्गः, अन्तर्पयति, अन्तर्द्धा, अन्तर्द्धिः ।

२८. **मिदचोऽन्त्यात् परः ।**

अचां मध्ये अन्त्यादच परो मित्संज्ञक स्यात् । पयांसि सिञ्चति ।

२९. **उपधोपान्त्यः ।**

उपान्त्यो वर्ण उपधोच्यते । पाचयति ।

३०. **अचोऽन्त्यादि टिः ।**

अचां सन्निविष्टानामन्त्यो योऽच् तदादि टि संज्ञकः स्यात् । पटदच्छदः, टेर्ङिति, पटपटाकृत्य ।

---

२७. इह तावत् प्रादेर्निपातत्वमनूद्य उपसर्गत्वं विधीयते । उप समीपे सृज्यते धातोरिति कर्म्मणि घण्, उपसर्गः, आदिरिहावयवे । अतस्तद्गुणोऽयम् व्याख्यानात् उपसर्गसंज्ञकश्चेति चकारेण संज्ञा-संज्ञान्तरञ्च न बाधत इति गम्यते । धातो प्राग् भवतीति परिभाष्यते, तेन धात्वर्थस्य मुख्यः (साक्षात्) सम्बन्धोऽत्र गृह्यते, तथा प्रगतः, एजकः, प्रैजकः इत्यादौ कर्त्तविशेषणस्यापि धातो प्राक् प्रशब्दस्य सम्बन्धः अत एजति प्रत्युपसर्गत्वाभावान्नवर्णलोपः । धातोः पूर्ववर्त्ति-प-परादीनानुपसर्गसंज्ञा निपातसज्ञा च भवतीत्यर्थः । पर्य-पय इत्यादावपिशब्दस्तत्र विभक्ति स्थितिश्चेतोच्छन्दोऽनुरोधात्, उपसर्ग प्रतिरूपकशब्दो वा । यथा अपिना सूच्यत इत्यादि ।

२८. अन्तेऽवसाने भावोऽन्त्यः दिगादेर्यः । म इत् यस्य स मित्, सानुबन्धः प्रत्ययोऽन्त्यात् स्वरात् परो भवतीत्यर्थः । सिञ्चतीत्यत्राद्यन्तवदेकम् (परि० २९) इत्येतस्येकारस्योभयत्वम् । बहूनामचां मध्येऽन्तस्थितादचः परं मकारेत् प्रत्ययागमादयो भवन्ति, अच इति निर्द्धारणे षष्ठी । नृपतौ च राम इतिवदिति केचित् ।

२९. अन्तस्य वर्णस्य समीपे भव उपान्त्यः, उपधीयत आधीयत इति धा+डाण् । सन्निविष्टानां वर्णानामन्त्याद् वर्णात् पूर्व उपधोच्यते ।

३०. बहूनामचामन्तस्थितमचमारम्य शेषभागस्य टिसंज्ञा स्यात् । अन्त्य आदिर्यस्य, न पुनरन्त्यञ्च वदादि चेत्यव्याप्तेः । अच इत्यवयवावयविसम्बन्धे षष्ठी । सन्निविष्टामेकप्रयोगमिलितानाम् ।

३१. विधये विशेषणमन्त्यमुत्तरेत्वाद्यञ्च ।

विध्यर्थं यद् विशेषणं तद् विशेषणवतोऽन्त्यं बोद्धव्यम् । परे पुनः क्वचिद्याञ्च अद्‌त्राह्वादेरिण्, अदन्तात्-दाक्षिः, ऋतोरी—चेक्रीयते । आद्यञ्च परे, आदिको गुणः क्वचिदन्त्यञ्च, आतः प्रादेः कः—सुस्थः ।

३२. स्थाने सदृशतमोऽव्यक्तयोगे ।

अव्यक्तसम्बन्धे सति स्थाने सदृशतमः आदेशः स्यात् । यथा एजेचश्चेति ए, ओ, ऐ, औ स्थाने ऐ औ भवतः । तत्राव्यक्तयोगे सदृशतमत्वात् एदैतोः कण्ठतालव्ययोः स्थाने ऐर्भवति, ओदौतोः कण्ठोष्ठ्ययोः स्थाने और्भवति । तवैषा, जायैहतः, तवौदनः, वृक्षौ । व्यक्तयोगे असदृशतमोऽपि स्यात् । एचः पाठेऽशित्यात् ग्लै-ग्लाता, दा-दाता ।

३३. न लुब्लुका लुप्ते प्रत्यये तल्लक्षणं कार्यमसङ्गस्य ।

लुब्लुक् शब्दाभ्यां लुप्ते प्रत्यये तत्प्रत्ययलक्षण कार्य्यं न भवति । बङ्गा जनपदस्तेषां निवास इत्यण्, जनपदवरणादिभ्यो लुप्, णिति वृद्धाभावः लुपि युवतवत्वात् बहुत्वं, त्वत् यत् स्वमोर्लुकि टेरन्न भवति । अङ्गस्येति किम् ? पञ्च, साम, पयः, अत्र समुदायस्य सुब्लुक्-लक्षणं पदत्वं भवत्येव, न लोपविसर्गौ तु पदत्वलक्षणौ, न सुपीति विहितौ । लुब्लुका लुप्ते इति निषेधात् प्रत्ययलोपे प्रत्ययलक्षणं कार्य्यं भवत्येव; अग्निचित्, क्विबो लोपे ह्रस्वात् तुक्विधिः किति (कृति) ।

---

२१. विधिनिमित्तं यद् विशेषण तदेवान्तीभूत ग्राह्यम् । येन विधिस्तदन्तस्येत्यनुयायित्वात् । ननु सर्व्वत्र तद्विशेषणादुत्तरे भविष्यति किमनेन सूत्रेण ? सत्यम् । नष्टलोपोडङ्यणोरित्यत्र नोपधाया । इत्यत्र च नशब्दस्य नान्तलाभार्थमिदम् एवमसयोगादल्लिट्किदित्यादौ चान्तप्रयोजनार्थम् । यद्वा उत्तरे त्वाद्यञ्चेत्यर्थं सूत्रमिति वा ।

३२. यत्र सम्बन्धोऽव्यक्तः सन्देहयुक्तः स्यात्तत्र येन सह यस्यात्यन्तसादृश्यं तस्य स्थाने स एव भवति ।

३३. ननु सुब्लुकि प्रत्यये तल्लक्षणां कार्यमङ्गस्येति कृते सिद्ध्यति किं लुप्तग्रहणेन ? सत्यम्, उद्धृतत्वात् क्वचिदङ्गिकार्यं न भवति । यथा किमिति न किम, कादेशः ।

३४. विप्रतिषेधे परं कार्य्यम् ।

तुल्यबलविरोधे परं यत् कार्यं तद्भवति । ऊठः, खल्वपि, द्यौतः, आदिको गुणः, इति गुणे प्राप्ते परत्वात् वृद्धिर्जूठ इति वृद्धिः ।

३५. इष्टसिद्धये प्रायः प्रक्लृप्तिः ।

इष्टार्थसिद्धयै प्रायो बाहुल्येन प्रक्लृप्तिः प्रकल्पनं कार्यं भवति । क्वचिदेकमाद्यन्तवत् । द्विरोद्येकाच् - इयाय अत्रादिवत्त्वम् । यदणन्तादेरात एच्च, अध्येयम्, अत्रान्तरत्वम् । आदेशः स्थानिवत्त्वात्, अस्ति ब्रुवोर्भूवचौ, भवितव्यं, वक्ता, स्थानिवत्त्वात् धातोरिति तव्यादयः । क्वचित्तु स्यात्—दि उत् सौ त्वौत्, द्यौः - अत्र हल् इति न सुलोपः ।

सूत्रे षष्ठ्यन्ते ततः स्थाते पञ्चम्यां तत उत्तरे ।
सप्तम्याञ्च परे तस्मिन् गम्ये चोपपदे क्वचित् ॥

सूत्रे षष्ठ्यां सत्यां षष्ठान्तस्यैव (षष्ठ्यन्तस्यैव) स्थाने तत्कार्यं भवति । चक्षिङः ख्याञ् व्याख्याता । पञ्चम्यां सत्याम्, तत उत्तरे । पदात् त्वां मां त्वा मा वा । पातु त्वा, पातु मा । सप्तम्या सत्यां, तदन्ते परे पूर्वस्य कार्य्यं "इको यणचि" दध्यत्र, गम्ये च, क्षय्यजय्यौ शक्यार्थे, उपपदे च उदिग्रहः, उद्ग्राहः ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मव्याकरणे
प्रथमाध्यायस्य प्रथमः पादः

—०—

३४. तुल्यं बलं ययोस्तयोर्विधे (विप्रतिषेधे) परं कार्य्यं भवतीत्यर्थः । ननु परमित्युक्त सिद्धे किं कार्यमित्युक्तम् ? गोद इत्यत्र क एव ।

३५. इष्टपदं साधुपदं तत्सिद्धयै तन्निष्पत्त्यै कल्पना विधातव्या ।

इति सुपद्म मकरन्दे प्रथमबिन्दुलेशः ।

द्वितीयः पादः

अथ सन्धिप्रकरणम्

अच्-सन्धिः

१. **अकः पूर्वपराचोः प्राग्यणः ।**

यणादेशात् प्राक् पूर्वपरयोरचोरेकादेशो वक्तव्यः ।

२. **अकः सवर्णे दीर्घः ।**

सवर्णे परतेऽकः स्थाने पूर्वपराचोरेकादेशो दीर्घो भवति । दण्डाग्रम्, दधीदम्, मधूपमम्, पितॄणम्, गम्लॄकारः, होतृ+प्रकारः, होतॄकारः । पूर्वाको दीर्घत्वे, ऋकार एव (होल्ललकारा, इति पाणिनिः) ।

---

१. अथ सन्धेः प्रकरणं प्रस्तौति । यप इति (२/२/३५) इति पञ्चमी । नन्विह वक्ष्यमाणेषु योगेषु सप्तम्यादि निर्देशात् पूर्व्वपरयोरिति प्राप्यते । अकः सवर्ण इत्यादि निर्देशादचोरिति च, तथा विधिमनन्तरेणाप्यधिकाराणां सम्भवादिष्टविषयत्वाच्च, प्राग्यण इति तत् किमेतान्युपात्तानीति ? सत्यम् व्युत्पत्स्यमानानां संविज्ञानार्थं सिद्धार्थव्याख्यानं विधीयते, अस्पष्टार्थेषु तत् तत्तद्विषयेषु ते मा प्रतिपद्येरन्निति अथ कथमेतेषु वक्ष्यमाणेषु केषुचित् तृतीया सहार्थिका न विहिता ? विहितायान्तु तस्यामयं योगोऽप्यकृतः स्यात् ? नैवम्, यथा देवदत्तः पुत्रेण सह निर्द्धायतामित्युक्ते पुत्राभावे केवलोऽपि देवदत्तो निर्द्धायिते लोके तद्वद् इहापि क्वचिदकारे लोपेऽपि दीर्घः प्रसज्जेतीति प्रतीयते मन्दधीभिरिति । अन्ये तु सा गता इत्यादौ बहुमात्रत्वात् प्लुतव्यपदेशोऽपि दीर्घव्यवहितेऽपि दीर्घः प्राप्नोति औपश्लेषिकलक्षण सप्तम्याभावादिति । किञ्च एक इत्युक्ते दीर्घादेरद्वितीयत्वादेवैकत्वे सिद्धेऽप्येकोपादानं कालविप्रकर्षबाधनार्थम्, तेन द्वयो पूर्वपरयोरेक एव दीर्घादिः प्रवर्त्तत न तु दण्डाग्रमित्यादि विप्रकर्ष इति ।

२. ननु सवर्णे दीर्घ इत्युक्ते येषां सावर्ण्यसम्भवस्तेषामेव दीर्घो नान्यस्य, तत् कथमुक्तमक इति ? न च वक्तव्यम् सन्ध्यक्षरयोरपि दीर्घः कथं न स्यादिति सवर्णविधौ सन्ध्यक्षराणां सावर्ण्यप्रयोजनाभावात् । स्वरग्रहणं सुखार्थमेवेत्युक्तत्वात् विधय इति ज्ञापकाच्च, तर्हि कथमग्नय इति प्रत्युदाहृतं वृत्तिकृता नैव तदवक्रमतीनां सुखप्रतिपत्त्यर्थम् । सत्यमेतदन्तरेण सवर्णे दीर्घे क्रियमाणे

३. आदि को गुणः ।

अवर्णान्तादुत्तरस्य इकः स्थाने पूर्वपराचोरेकादेशो गुणो भवति । सुखेन, मालेह, देवोपमः, अर्द्धर्चः, तवल्कारः ।

४. वृद्धिरेजूठः ।

आदित्येव, अवर्णान्तादुत्तरस्य एचः ऊठश्च पूर्व्वपराचोरेकादेशो वृद्धिर्भवति । तवैषा, जायैहत, तवौदनः, वृक्षौ, सौपगवी, ऊठ , खल्वपि धौतः ।

५. स्वादीरेरिणोः ।

स्वशब्दादीरेरिणोरिकः स्थाने गुणापवादो वृद्धिः स्यात् । स्वैरम्, स्वैरी, स्वैरिणी । नामिनादिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति इरिण्याश्च सिद्धिः ।

संकेतितं सवर्णमपहाय व्युत्पत्तिमाश्रित्यानुस्वारस्य परसवर्णः (२/२/५०) इति, वर्णकक्ष इत्यत्रापि दीर्घः स्यात् । सम्भाव्यते तदेवैतज्ज्ञापयति क्वचित् व्युत्पत्तिरपि गृह्यत इति । नन्वेको दीर्घ इत्युक्तेऽपि पारिशेष्यात् सवर्ण एव सम्भवति, तत् किं सवर्ण इत्यनेन ? न च वक्तव्यम्, सवर्णाभावे दधि अत्रे-त्यत्रासवर्णेऽपि दीर्घः स्यादिति यणादेशस्य सन्धिनिषेधस्य च परत्वात्, न च वक्तव्यम्, क्वचिन्निमित्ताभावेऽपि भविष्यति । एकादेशस्याधिकृतत्वादुभयत्र सम्भव एव, तत् सम्भवात्, सत्यमेवञ्चेत् प्रतिपत्तिगौरवनिरासार्थमेव स्वीकरणीय इति । इहैव ऋतो रलावृदलृतोः, ऋकारलृकारयोः परयोर्यथा-संख्यमृतोरलौ भवतः । पितॄणं होत्लृकारः । कश्चिदरलावादिश्य दीर्घमाचष्टे, पितॄक्षः, होतॄलृकार इति सावर्ण्यदीर्घः । पूर्व्वाको दीर्घत्वे ऋकार एवेत्यनन्तरं दीर्घलृकारस्याप्रयुक्तत्वादिति शेषः । दण्ड + अग्रम्, दधि + इदम्, मधु + उपमम् । पितृ + ऋणम्, गम्लृ + लृकारः, इति पदच्छेदः ।

३. आद्गुण इति कृते सिद्धे इक इति ग्रहणं मन्दधियां सुखप्रतिपत्त्यर्थम् । सुख + इन, माला + ईहः, देव + उपमः, अर्द्ध + ऋचः, तव + लृकारः इतिपदच्छेदः ।

४. इह कार्य्यिणा हन्यत कार्य्यी कार्य्यं कार्य्येण हन्यते ।
निमित्तन्तु निमित्तेन तच्छेशपमनुवर्त्तते ।। इति न्यायात्तु निमित्त-त्वेनादित्यनुवर्त्तत इत्यत आह आदित्येवेति । तव + एषा, जाया + ऐहत, तव + ओदनः, वृक्ष + औ, सा + औपगवी, धा + औतः । इति पदच्छेद ।

५. इह खलु स्वं रूपं (परि० ३५) इति न्यायात् स्वरूपमेव गृह्यते नार्थ इत्याह स्वशब्दादित्यादि, उत्सर्गापवादयोः (परि० ४८) इति दर्शयन्नाह गुणापवाद इति । स्व + ईरम्, स्व + ईरी, स्व-ईरिणी ।

६. **ऋण-प्र-वत्सर-वत्सतर-दश-वसन-कम्बालादृणस्य ।**

ऋणादेरुत्तरस्य ऋणस्य ऋतो वृद्धिः स्यात् । ऋणार्णम्, प्रार्णम्, वत्सरार्णम्, दशार्णम्, वसनार्णम्, कम्बलार्णम् ।

७. **ऋतस्य तृतीयासमासे ।**

तृतीयासमासे अवर्णान्तादुत्तरस्य ऋतस्य ऋतो वृद्धिः स्यात् । शीतेन ऋतः शीतार्त्तः, क्षुधया-ऋतः-क्षुधार्त्तः, तृतीया समास इति किम् ? परमश्चासौ ऋतश्चेति परमर्तः ।

८. **प्रादूढोढ्येषैष्याणाम् ।**

प्रादेरामूढादीनां वृद्धिः स्यात् । प्रौढः, प्रौढिः प्रैषः, प्रैष्यः ।

९, **अक्षादूहिन्याः ।**

वृद्धि स्यात् । अक्षौहिणी सेना. पूर्वपदात् संज्ञायामग इति णत्वम् ।

१०, **ऋणादिधातोरुपसर्गात् ।**

प्रादेः परस्य ऋणादेर्धातोर्ऋको वृद्धिः स्यात् । प्रार्च्छति; आदित्येव अन्वृच्छति ।

---

६. ऋणस्य ऋणम्—षष्ठी समासः—ऋण + ऋणम् । प्र + ऋणम्, वत्सरे वत्सरे ऋणम्, वत्सर + ऋणम् । वत्सतरे वत्सतरे ऋणम्—वत्सतर + ऋणम् । दशानामृणम्—दश + ऋणम् । ऋणशब्दो जले दुर्गभूमौ च । तेन दश ऋणानि यस्य यस्यां वा दशार्णो देश दशार्णा नदी च ।

७. शीतेन ऋतः—शीत + ऋतः, क्षुधा + ऋतः, परम + ऋतः ।
ऋतोऽत्र—क्रीड़ायां गतौ च, तेन अश्वेन ऋतो गतोऽश्वार्त्तः । अत्र ऋति (१/२/३९) इति विसन्धिर्नेष्यते इति प्राञ्चः ।

८. अत्रोढोढ्योर्गुणापवादिका वृद्धिरितरयोस्त्वर्णलोपापवादिकेति । प्रादिति किम् ? उपेषाः, उपेष्यः । प्र + ऊढ, प्र + ऊढि, प्र + एषः, प्र + एष्यः ।

९. कृतणत्व निर्देशः संज्ञायामेव वृद्ध्यर्थस्तेनाक्षाणामूहिनी अक्षौहिणी स्त्रीत्य-संज्ञायां णत्वाभावे वृद्ध्यभाव इति फलितम् । अक्ष + ऊहिनी ।

१० ऋक् आदिरवयवो यस्य तद्गुणसंविज्ञानो बहुव्रीहिस्ततः कर्म्मधारयः । ऋता वाङो वेति वचनमाचक्षाणाः केचिदर्त्तिरार्त्तिश्चेति पदद्वयम्. अन्ये त्वाङ् पूर्व्वादर्त्तेः क्तिनि आर्त्तिरिति साधयन्ति । धातोरिति किम् ? प्रर्षभं वनम् । उपसर्गादिति किम् ? प्रगता ऋचका यस्माद्देशात् स प्रर्चकोदेशः । प्र + ऋच्छति, परा + ऋच्छति, उप + ऋच्छति ।

११. **वा सुप एङादेश्च ।**

प्रादेः परस्य ऋगादेरेङादेश्च सुबन्तस्य धातोः वृद्धिर्वा स्यात् । प्रार्षभीयति, प्रर्षभीयति, उपाल्कारीयति; एङादेः—उपैकीयति, उपेकीयति प्रौषधीयतिः प्रोषधीयति ।

१२. **इको यणचि**

इकः स्थाने अचि परे यथाक्रमं यणादेशो भवति । (अकः पूर्वपराचोरिति निवृत्तम्) दध्यत्र, मध्विदम्, पित्रर्थः, लाकृतिः ।

१३. **एचोऽयवायावो वान्तो यि प्रत्यये ।**

एचः स्थाने अचि परे यथासंख्यम् अय्, अव्, आय्, आव् । इत्येते आदेशा भवन्ति, यादौ प्रत्यये च वान्तः अव् आव् च स्यात् । अग्नये, वायवे, राये, नावे, यि च् गव्यति, भाव्यम । प्रत्यय इति किम् ? गोयानम् । धातोर्तन्निमित्तस्य—लूयमानस्यापत्यम्—लौयमानिः पुत्रः, नायं प्रत्ययनिमित्तं औत् ।

१४. **गोरदन्तोऽवो वान्ते ।**

पदान्ते वर्त्तमानस्य गोरचि परे ओतोऽदन्तावो वा स्यात् । गवेश्वरः, गवीश्वरः, गवाजिनं, गोऽजिनम्, अन्तः इति किम् ? गवि ।

---

११. प्र + ऋषभीयति, उप + लृकारीयति, उप + एकीयति, प्र + ओषधीयति ।

१२: पदयोः सन्धिर्विवक्षिता न समासान्तरङ्गयोः (परि० ८४) इति मतमाश्रित्य यणचीत्युक्तम्, अतएव वक्ष्यति सैवान्यत्र विभाष्येति । अद्येहाचीत्यसवर्ण इति ध्येयम्, सवर्णे दीर्घस्य बाधकत्वात् इत्यभिप्रायेणासवर्ण एवोदाहृतम् । तथा चोक्तम्—इकोयण्णसवर्णाचि-विज्ञेयं तत्त्वकोविदैः । नैव वैसर्गिकोऽकारस्यात्र वत्त्वं विधीयते । दधि + अत्र, मधू + इदम्, पितृ + अर्थः, लृ + आकृतिः । इति विश्लेषः ।

१३. इह धातुपदेन नाम धातुव्यतिरिक्तधात्वेऽच्विवक्षितः । य प्रत्ययनिमित्त कस्य धात्वेचोवान्तादेशो न स्यात् । ततश्च लूयमानशब्दादिभि वृद्धौ सत्यामवादेशो मा भूदिति । अग्ने + ए, वायो + ए, रै + ए, नौ + ए, गो + यति, भो + यम् ।

१४. गो + ईश्वरः, गो + अजिनम, गो + इ । ननु गोरवोवान्ते इत्यनेन सिद्धे यदन्त विशेषणं तत्सुखप्रतिपत्त्यर्थमेव, इह खल्वभिधानात् कार्य्यनिमित्तयोः समास एवायं विधिः अन्यथा हे चित्र गोऽजिनधनं पश्येत्यत्रापि स्यादिति ।

१५. **गवाक्ष-गवेन्द्रौ नित्यम् ।**

एतौ नित्यं स्याताम्, गवाक्षः गवेन्द्रः ।

१६. **गव्यूति क्रोशयुगे ।**

निपात्येते । अन्यत्र गोयूतिः ।

१७. **क्षय्य-जय्यौ शक्यार्थे ।**

शक्यार्थे गम्ये एतौ निपात्येते, क्षेतुं शक्यः क्षय्यः, जेतुं शक्यः जय्यः । अन्यत्र क्षेयं प्रापम्, जेयं मनः ।

१८. **क्रय्यस्तदर्थे ।**

क्रय्यार्थप्रसारिते द्रव्ये क्रय्यो निपात्यते ।

१९, **पदान्ते ।**

अधिकारोऽयम् ।

२०. **एङोऽतो लोपः ।**

पदान्ते वर्त्तमानादेङः परास्यातो लोपः स्यात् । तेऽत्र, कोऽत्र, पदान्त इति किम् ? नयनम्, लवणम् ।

---

१५. गो + अक्षः, गो + इन्द्रः । अत्र नित्यपदं प्रतिपत्तिगौरवनिरसार्थम् । अक्षेन्द्रयोर्नित्यमिति कृते सिद्धे यत् सिद्धपदं प्रयुक्तं तदक्षे संज्ञार्थज्ञापनार्थम्, तेनान्यत्र गोऽक्षं प्रागुक्तविभाषापि बाध्यते ।

१९. अत्र कथमत्र सप्तम्यन्तमनुक्रियते प्रथमान्तमेव क्रियताम्, सत्यम्, प्रथमान्ताद् वक्ष्यमाणलक्षणार्थासङ्गतेरिति चेदर्थवशाद् विभक्तिविपरिणामो भविष्यति ? मैवम्, तदपि गौरवपराहतम्, तर्हि साक्षात् सप्तम्यन्तमिति । यद्येवमधिकृतत्वात् कथन्न प्रथमा ? तेन पदान्तमिति सप्तम्यन्तमनुक्तसम्पदम्, पदान्त इत्यधिक्रियते इत्यर्थादधिकारसूत्रमिदमिति दर्शयन्नाहाधिकारोऽयमिति । कार्य्यकार्य्यिनिमित्तानां पदानां यदूदीरणम् । वक्ष्यमाणार्थं संक्षेपादधिकारः स उच्यते ।

२०. ते + अत्र, कः + अत्र, अत्र (१/३/१७) इतिविसर्गस्य उः (१/२/२३) इति गुणे को + अत्रेति सिद्धेऽकारलोपः । ने + अनम्, लो + अनम् ।

२१. **ङसिङसोश्च ।**

अपदान्तार्थं वचनम् । एङः परस्य ङसिङसोरतो लोपः स्यात् । अग्नेः, धेनोः ।

२२. **अदेत्यपदान्तस्याजसि ।**

अति एति च परेऽपदान्तस्यातो लोपः स्यात् । यजन्ते, यजेः, लवणस्यति । अत इत्येव यन्ति । अजसीति किम् ? देवाः, विप्राः ।

२३. **धात्वेङि प्रादेरवर्णस्यानिणेधोः ।**

धातोरेङि परे प्रादेरवर्णस्य लोपः स्यात् । प्रेजति, परोखति, अनिणेधोरिति किम् ? प्रैति, प्रैधते, एङीति किम् ? उपेहि । इङिकोर्नित्यमधियोगः । अध्येति, अध्येता ।

२४. **शकादेरन्ध्वादौ ।**

अन्ध्वादौ परे शकादेरवर्णस्य लोपः स्यात् । शकन्धुः, कुलटा, शुद्धोदनः, समन्तरम्, समशनम्, अर्द्धशनम्, हलीषा, लाङ्गलीषा । सीमन्तः केशेषु, सीमान्तोऽन्यत्र ।

---

२१. अग्ने + अम्, धेनो + अम्, अत्रैक पदत्वादिकारौकारयोर्न पदान्तम् ।

२२. यज + अन्त, यज + ए, लवण + अस्यति । देव + अम्, विप्र + अम् ।

२३. प्र + एजति, एज् + लट् + तिप् । परा + ओखति, उख वा, ओखृ + लट् + तिप् । प्र + एति, प्र + इण् + लट् + तिप् । प्र + एधते । प्र + एध + लट् + ते । उप + इहि । इण् + लोट् + हि । अधि + एता । अधि + इङ् = लुट् ता । अधि + एति । अत्र धातोरेङिति षष्ठी-समासः, न कर्म्मधारयः । प्रगतः एजकः, प्रैजकः, प्रगता ओणकः, प्रौणक इत्यत्रोपसर्गत्वाभावान्नाकारलोपः (१/१/२१) ।

२४. उभयत्रादिशब्दो व्यवस्थावाची । अन्ध्वादावित्यत्रौपश्लेषिकी सप्तमी, तेन निमित्ताव्यवहितावर्णस्य लोपो, न व्यवहितस्य । शक + अन्धुः, कुल + अटा । शुद्ध + ओदनः । शौद्धोदनिश्च । सम + अनन्तरम् । सम + अशनम्, भाष्ये सम् शब्देन समासः कृतः । अर्द्ध + अशनम् । हल + ईषा, लाङ्गल + ईषा । सीम + अन्तः । गन्धर्वः, कुम्भः समर्थः इत्यन्योदाहरणानि ।

२५. **ओमाङोश्च ।**

ओमि आङि च परे अवर्णस्य लोपः स्यात् । कोमिति, सोमिति. आ+ऊढ़ा ओढ़ा, अद्योढ़ा, आ+इहि=एहि, उपेहि ।

२६. **एवे चान्नियोगे ।**

एवे परेऽवर्णस्य लोपः स्यात् । अद्येव-इहेव, नियोगे तु—अद्यैव गच्छ, इहैव तिष्ठ ।

२७. **ओत्वोष्ठयोर्वा समासे ।**

अनयोः परयोः समासेऽवर्णस्य लोपो वा स्यात्, स्थूलोतुः, स्थूलौतुः, बिम्बोष्ठी, बिम्बौष्ठी । समास इति किम् ? तवौष्ठः पीतः, ममौष्ठो रक्तः ।

२८. **न सन्धिविसर्ग-य-व-लोपे ।**

अचीत्येव, पदान्ते विसर्गादिलोपे कृतेऽचि पुनः सन्धिर्नभवति । क एषः, अस्मा इदम्, अमा इन्द्रः ।

२९. **सैष इति पादपूरणे ।**

सैष इत्यपि भवति श्लोकस्य पादपूरणञ्चेत् । सैष दाशरथी रामः, सैष राजा युधिष्ठिरः, सैष विप्रो दयाशीलः, सैष त्यागी विवर्त्तितः ।

---

२५. आङित्यादिष्टाकारे परे एवावर्ण लोपः स्यादित्याह, आ+ऊढ़ा=ओढ़ा इत्यादीति । कथ तामुपैहीत्यत्राकारलोपो न स्यात् ? मैवम्, अत्राङ् शब्द उपसर्ग एवेष्टः, तत्र तूपसर्गप्रतिरूपक आङित्यदोषः । क+ओमिति, सा+ओमिति । अद्य+उढ़ा, उप+एहि ।

२६. अद्य+एव, इह+एव । नियोगोऽवधारणं प्रवर्त्तते, तेन सादृश्यसम्भावनयोर्विधिरयम्, चर्म्मेव रज्जुः, शालेव शाखा ।

२७. स्थूल+ओतुः, बिम्ब+ओष्ठी । अत्र ओत्वोष्ठाभ्यां समास एव विधिरयम्, तेन वृषलपुत्त्रौष्ठव्रणः । अनौष्ठ इति परत्वादनादेश न स्यात् ।

२८. सन्धानं सन्धिः, उत्कृष्टो वर्णानां सन्निकर्ष उच्यते, तद् विषयकमपि सवर्णनिमित्तकदीर्घादिकमपि सन्धिरूपचारात्, तेनायमर्थः सम्पद्यते विसर्गादिलोपे दीर्घादिकं न भवति । कः+एषः, अस्मै+इदम्, असौ+इन्द्रः ।

२९. सः+एष । स एषः । एषैष इत्येवमपि प्रयोगोऽस्ति ।

३०. **ईदूदेतो द्विवचनस्य ।**

ई, ऊ, एकारान्तस्य द्विवचनस्याचि परे सन्धिर्न भवति । अग्नी इमौ, वायू अत्र, खट्वे इह, पचेते इति । 'मणीवादेर्वा', मणीव मणी + इव, दम्पतीव—दम्पती + इव । रोदसीव – रोदसी + इव ।

३१. **अदसो मात् ।**

अदसो मकारात् परयोः ईदूतोर्न सन्धिः, एदत्र न सम्भवति । अमी अत्र, अमू आनय । मादिति किम् ? अमुकेऽत्र, कथम् "अम्यत्र प्रतिभाति मे" ? अमी रोगीति नायमदसः ।

३२. **एकस्याचोऽनाङोऽव्ययस्य ।**

अव्ययस्याङ् वर्जितस्यैकाचो न सन्धिः । अ अवेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, "वाक्यस्मरणयोरकिदाङारोऽस्ति"—आ एवं मन्ये ? आ एवं किलेतत्, अनाङ् इति किम्? ईषदर्थे, क्रियाप्रोगे मर्यादायामभिविधावाङ्—आ उष्णम् ओष्णम्, आ + इहि एहि, आ + अङ्कात् = आङ्कात्, आ + अर्य्येभ्यः = आर्य्येभ्यः ।

---

३०. अग्नी इमौ, वायु + अत्र, खट्वे + इह, पचेते + इति । अत्राग्नी वायू खट्वे इति प्रथमाद्विवचनान्तानि । पचेते + इति, पच् + लट् आत्मनेपदप्रथमपुरुष-द्विवचनान्तम् । ननु ह्रस्वग्रहणे न तु दीर्घग्रहणे तत्कथमत्र तपरत्वम् ? य्वोरित्येवास्तु मैवम् ह्रस्वप्रवृत्तिः स्यात् । अधुक्षवहीत्यादौ सन्धिराशङ्कनीयः स्यादिति च । केचित्तु मणी भार्य्यापती चैव दम्पती जम्पती तथा । रोदसी वाससी चैव इवे जायापती तथेति पठन्ति । अन्येच पेचुषी विदुषी प्रभृतीनीति ।

३२. अथानाङ इत्यत्र ङानुबन्धकरणात् निरनुबन्धस्य आकारस्य सन्ध्यभाव इत्यत आह वाक्यस्मरणयोरित्यादि, वाक्य स्मरणयोरित्युक्तं तस्यायमभिप्रायः, पूर्व-प्रयुक्तो वाक्यार्थो वाक्यम्, पूर्वप्रकान्तस्य वाक्यस्य विपरीतकरण स्मरणं, तथाहि आ एवं मन्यसे इत्यत्र नैवम् त्वया प्राङ्मतं साम्प्रतं किं त्वमेवं मन्यस इत्यत्रः । आङ्कादिति यद्यप्याङ्शब्दोऽनिवृतिबहुवचनान्तस्तथाप्यङ्गैकदेशवाचि-त्वादेकवचनम् यथा, कलिङ्गं जगामेति, इह आङ्कादाङ्गं पयः, शीतं आर्य्येभ्यो वैदिको विधिरित्यध्याहार्यम्, अव्ययस्येति किम् ? ईयतुः, उषतुः, आटतुः ।

३३. **ओतः ।**

ओदन्ताव्ययस्य न सन्धिः । नो इह, अहो अहम्, उताहो इति ।

३४. **वा सम्बुद्धावितौ ।**

इतौ परे सम्बुद्धावोदन्तस्य वा न सन्धिः । वायो इति वायविति, भानो इति भानविति । इताविति किम् ? वायवायाहि ।

३५. **ऊञा ऊँ च ।**

ऊञ इतौ परे वा न सन्धिः, तस्य च ऊँ त्रा स्यात् । ऊ इति विति वा, ऊँ इति च ।

३६. **दूराद् आह्वाहने ।**

न सन्धिर्वा । भो विप्र आगच्छ, भो विप्रागच्छ वा ।

---

३३. अनेकाजर्थं पृथग्वचनमिति दर्शयति, अहोऽहमिति । आद्यवदेकमिति न्यायात् औ इति प्राक्तनेनैव सिद्धिरित्याहुः परे, ननु नोऽत्रेत्यादौ ओदन्तस्य निषिद्धे सन्धौ कथमकारलोपो न स्यात् । सत्यम् अचीत्यनुवर्त्तमाने तस्मिन्निषिध्यमानः सन्धिस्तत्सहित एव निषिध्यते, अन्ये तु ओकारसम्बन्धी सन्धिः प्रतिषिध्यत इत्याहुः । अव्यार्थस्येति किम् ? पटविह ।

३५. ञानुबन्धस्तन्त्रान्तरप्रसिद्धयानिपातग्रहणार्थः, आदेशस्तु दीर्घः सानुनासिकश्च । ननु अह, उ, अहो इत्यादावयमादेशः कथं न स्यात् । नैवं उकारस्थ श्रुतत्वात् यत्र एव स्थानी तत्रैवादेशः; यत्र तु तदन्यस्तत्र न स्यात् । अतएव इताबुञोऽनुनासिको दीर्घश्चेति तन्त्रान्तरे दीर्घकरणं समानस्थान्यर्थम्, प्रकृते तु प्राक्तने न प्रकृतिरेव, परनिमितादेशः पूर्वस्मिन् स एवेति न्यायात् । अन्ये तु सामान्यनिमित्तमाश्रित्य "जित्वा वयं नेष्यति चाद्यः गावः" इति प्रयुङ्क्ते । अत्र वर्गाद्वः स्वरे स्वरदिति पचन्नवीहते, पचन्नु ईहते, किग्वीहसे, किमु ईहसे इत्यादि सिद्धियर्थः केचन कातन्त्राः पठन्ति ।

३६. यतो यत्र प्राकृत प्रयत्नजो ध्वानिव्याहतो न सञ्चरति तत्तदेव दूरं तं दूरदेशं प्राप्य यदाह्वानं तस्मिन् गम्ये, अर्थादामन्त्रे तस्य अचि सन्धिर्न विधीयते । इह पुनरूञः कार्यित्वं नावसीयते, विधि वै यर्थ्यापत्तेः । ननु कार्य्यिणो हन्यते कर्ष्यीत्यादि नियमादितिशब्दः कथं निमित्तेन नानुवर्त्तते ? वर्त्तते चेतन्मात्रेणानिष्ठापत्तिः ? सत्यम् दूरादाह्वानस्यापि सम्बुद्धिविषयत्वात् पुनरुक्तत्वापत्तेः, सामान्यमचीत्येव निमित्तमनुवर्त्तत इति । वा शब्दस्तु पक्षान्तरद्योतकः ।

३७. ईदूद्यसन्धिः प्रगृह्यम् ।

ईदूदीनां येषां सन्धिर्न विहितस्ते प्रगृह्यसंज्ञकाः प्रयोगे द्रष्टव्याः ।

३८. गोरति ।

गोशब्दस्याति परे सन्धिर्न भवति वा । गो अग्रम्, गवाग्रम्, गोऽग्रम् ।

३९ इकोऽसवर्णे ह्रस्वश्च ।

पदान्तेऽसवर्णेऽचि परे इको वा न सन्धिः, दीर्घस्य च ह्रस्वः स्यात् । दधि अत्र नदि अत्र, वधु ऋतुः । ऋत्यृवर्णावर्णयोश्च । पितृ ऋणम्, हिम ऋतुः, खड्ड ऋष्यः, पक्षे यथा प्राप्तञ्च, दध्यत्र, वध्वृतुरित्यादि, इक इति किम् ? वृक्षे ऋक्षः, वृक्ष्यृक्षः ।

४०. यणा व्यवधानं व्याडिगालवयोः ।

अनयोर्मतेन इको यणा व्यवधीयते । दधि यत्र, मधु यत्र, भूवादिः ।

इत्यच्-सन्धिप्रकरणम्

---

३७. ईदूद्यसन्धिरिति प्रथमैकवचनं पदम्, प्रगृह्यते विप्रकृष्यते इदमिति प्रगृह्यम्, पदार्थैक्यपरिसंहिता । ईदूदयः प्रगृह्या इति स्फोटयन्नाह ईदूदीनामित्यादि । अत्र विसन्धियोग्यतामाश्रित्य।प्रगृह्यत्वं यथोदाहरिष्यते अग्नी वायू इति ।

३८. इह पदान्तस्याधिकृतत्वात् । गोशब्दस्यापि पदान्तस्य सन्ध्यभावो विधीयते । स पुनः समास एव सम्भवति, तेन सन्धीयमानसमासे विधिरयम् । तेन हे चित्रगोऽजिनधनं पश्येत्यत्र निषेधो न स्यात् । गोरिति किम् ? द्योऽर्द्धम् । अपदान्ते तु राजगवः, अनति तु, गवासनम् ।

३९. दीर्घस्य च ह्रस्वः स्यादिति वेति शेषः । नदी यत्र नद्यत्र नदि अत्र । नित्यसमासादन्यत्रायं विधिरित्यभिधानात्, तेन कुट्यर्थ इत्यादौ प्रतिषेधो न स्यात् । न च वाच्यम् सवर्णे दीर्घस्य नित्यविहितत्वादसवर्णे विधिरयं पर्यवस्यति, किमसवर्ण इत्यनेति विप्रतिषेधे परस्य बलीयत्वात्, न च वक्तव्यम्, वक्ष्यमाणसूत्रे ऋवर्णे ऋवर्णस्य विहितत्वात् प्राप्य इति तस्यावश्यवाच्यत्वात् । नित्या धातूपसर्गयोरिति वक्ष्यते, तेन अध्योनति, पर्योणति, प्राच्छंति, उपाच्छंति । द्वितीयं सूत्रं व्याचष्टे, ऋति ऋवर्णस्यावर्णस्य चेति सन्धिर्वा न स्यादित्युपस्कार्यम् । एवमुक्तवति देव ऋषीन्द्रे तावदेव ऋषिरिन्द्रदिदृक्षुः उच्चारितरुचिर ऋचामित्यादि । पदान्त इति किम् ? नद्यौ, वध्वौ पितॄन् । असवर्ण इति किम् ? वारि । हिते, मधु ऊर्द्धम् यथेगन्तत्वाभावात् वृक्ष्यृक्षः, तथा ममेष्टि, सकल्येऽन्ते इत्यादि ।

अथ हल्-सन्धिः

४१. **मोऽनुस्वारो हलि ।**

पदान्ते हलि परे मकारस्यानुस्वारो भवति । देवं पश्य, पंभ्याम् ।

४२. **नश्चापदान्ते झलि ।**

अपदान्ते झलि परे नस्य मस्य चानुस्वारो भवति । पयांसि, यशांसि, सिञ्चति, आक्रंस्यते । झलीति किम्? हन्यते, रम्यते ।

४३. **मो ह्रे म-न-य-व-ल-परे म-न-यँ-वँ-लँ वा ।**

हकारो म-न-य-व-ल परे मस्य म, न, यँ, वँ, लँ, इत्येते वा स्युः । 'किम्ह्मलयति किम्ह्मलयति, किन्ह्नुते, किंह्नुते, कियँह्यः, किंह्यः, किवँह्वलयति, किंह्वलयति, किलँह्लादयति, किंह्लादयति ।

४४. **सम्राट् ।**

क्विबन्तराजि परे सम् इति मस्या मकारोऽत्र निपात्यते । सम्राट्-राजसूययाजी, सर्व्वभूमीश्वरः सम्राजो सम्राजः ।

---

४३. किम्+ह्मलयति, किम्+ह्नुते, किम्+ह्यः, किम्+ह्वलयति, किम्+ह्लादयति । अनुस्वारापवादकप्रकरणमाह, मश्च नश्च यश्च वश्च लश्च मनयवलाः, ते परे यस्मात् तस्मिन् हकार इत्यर्थः । इह विशेषणैः सह कार्याणां यथा क्रमता न दुष्यति प्रयोगाणां प्रवक्ताधीनवृत्तित्वात् अपिच स्वाभावात् यवलाः सानुनासिका निरनुनासिकाश्च प्रयुज्यन्ते, अत एव सानुनासिका प्रयुक्ताः (मपरे हे मस्य स्थाने म्, नपरे हकारे न्, यपरे यँ, वपरे वँ, लपरे लँ इति क्रमः) अथ हे मनयवल इत्युक्तेऽपि तेषां सप्तमीबलात् परत्वं गम्यते किं परग्रहणेन ? नैतदस्ति कदाचिद् विपर्य्यायः सम्भाव्यते । ततश्च, किं महदित्यादाविव स्यात् ।

४४. अथेह मोराजि समः क्वाविति विशेषबोधार्थं वक्तव्यं निपातनस्येष्टविषयत्वादित्याह, क्विबन्ते राजि पर इति, तेन सरेजे, रांजीति किम् ? संयत् । सम्राडिति संराजतीति क्विप् ततः पदान्ते व्रश्चादित्वात् षत्वे हकारः, अपि च निपातत्वादर्थविशेष एवानुस्वाराभाव इत्याह यो राजसूययाजीत्यादि । तथा चामरसिंहः—"येनेष्टं राजसूयेन मण्डलस्येश्वरश्च च । शास्तियश्चाज्ञया राज्ञः स सम्राडिति" यैः पुनस्तल्लक्षणं कृतम्, तेषामर्थविशेषविधये शरणमभिधानमेव ।

४५. कृत्येऽवश्यमो मस्य लुग्भवति ।

अवश्यकार्य्यम्, अवश्यकर्त्तव्यम्, यदृच्छादयश्चेति समासः ।

४६. तुंसमोर्म्मनसि कामे च ।

तुम् समोर्मस्य तुक् स्यात्, मनः कामयो; परतः, कर्त्तुमनाः, कर्त्तुकामः, समनाः, सकामः, समासः इत्येव—कर्त्तुं मनः ।

४७. समो वा ततहितयोः ।

अनयोर्वा समो मस्य लुक् स्यात् । सततम्, सन्ततम्, सहितम्, संहितम् ।

४८. अतो मांसस्य पाकपचनयोः ।

अनयो परतो मांसस्यातो लुग्वा स्यात् । मांस्पाकः, मांसपाकः, मांस्पचनम्, मांसपचनम् ।

४९. अणोऽप्रगृह्यस्यानुनासिकः ।

पदान्तेऽप्रगृह्यणोऽनुनासिको वा स्यात् । कर्म्मँ कर्म्मँ, दधिँ दधि, मधुँ मधु, पचतिँ पचति, अप्रगृह्यस्येति किम् ?—अग्नी, वायू ।

---

४५. तव्यानीय-यत्-णत्-क्यप् केलिमाः कृत्याः, कृत्याः प्राङ्ण्का (४।१।८) । वित्यनेन सङ्केतिताः, तदन्तेष्वेवावश्यमो मस्य लुक् श्रुतत्वात् । अथ यदृच्छादीनां नित्यसमासत्वात् वाक्यमेव न सम्भवति, किं समासग्रहणेन ? सत्यमतएव ज्ञापकात् क्वचिद् विकल्प इत्यनुमीयते, तथा च सम्बन्धानुभावात् अवश्यमेषणीयश्च लिङ्गित इति भट्टवार्तिकम् । एवं अवश्यकरणीयम्, अवश्यचेयम्, अवश्यकृत्यम्, अवश्यपचेलिमाः माषाः, अवश्यगेयो बटुः । कृत्य इति किम् ? अवश्यङ्कारी । (अवश्यम्+कार्य्यम्, कर्त्तव्यम्)

४६. कर्त्तुं+मनाः, कर्त्तुम्+कामः, सम्+मनाः, सम्+कामः । अथ यदृच्छादेनित्यत्वात् समासग्रहणं परसूत्रार्थमित्येके, तदसदिति दर्शयन्नाह, समास इत्येवेति ।

४७. सम्+ततम्, सम्+हितम्, सम्+तन्, सम्+धा=क्तः ।

४८. पचेर्घणि पाकः, मांसस्य पाको मांसपाकः, अत्र कृते मांसस्यातो लोपे सस्य विसर्गः कस्कादित्वात् पुनः सत्वमित्येके, असिद्धं बहिरङ्गमन्तरङ्गे परि० ४५) इति न्यायाद्विसर्ग एव भवतीत्यन्ये । अथ मांसं पचतीत्यणिणे कृते न्यङ्क्वादित्वात् कुत्वे मांसपाक इति स्यात्, तत्र लोपः कथन्न स्यात् ? सत्यम् पचनेन भावल्युडन्तेनैव साहचर्यादणप्रत्ययान्तरस्य कर्त्तृवाचकस्य पचेर्न भवतीति । मांस+पाकः, मांस+पचनम् । इति विश्लेषः ।

४९. इह यद्यपि यच्छेषमनुवर्त्तत इति न्यायात् प्राक्तनसूत्रस्थं निमित्तमिवानुवर्त्तयितुं शक्यते तथापि लुकसहचरितस्य तन्निवृत्तौ निवृत्तिस्ते नावसानस्यैव निमित्तत्वम्, अत एवावसान इत्येवेति काशिकावृत्तौ वामनः । तर्हि विकल्पः कथं न निवर्त्तत इति चेत् । नैवम् तस्य स्वरधर्मत्वात् अन्यथा सिद्धिर्धर्म्मिणो युक्तेति । किञ्च व्यापकवचनमुत्तरार्थमेव । अकारोदाहरणं कर्म्मँ कार्येति पुरुषोत्तमेन भाषावृत्तौ दर्शितम् । किञ्च भाषायां नानुनासिकस्वरसन्धिर्नास्तीत्यनुन्यासः । अण इति किम् ? कर्त्तकुलम् । अनुनासिकोऽत्र नादबिन्दुः ।

५०. **अनुस्वारस्य ययि परसवर्णो नित्यन्त्वनन्तस्य ।**

पदान्ते ययि परेऽनुस्वारस्य परसवर्णोऽनुनासिको स्यात् । त्वङ्कथञ्चित्रम्पक्षङ्क-, डूयन्तमवधीः, त्वं कथं चित्रं पक्षं कण्डूयन्तमवधीः, यवलले यँ वं लँ वा । संय्यँन्ता, संयन्ता, संवँवत्सरः, संवत्सरः, यलँ्लोकम्, यंलोकम् । अपदान्तस्य तु नित्यम्, शङ्किता पञ्चति, कुन्तिता, कुन्तति, लिम्पति, ययि परसवर्ण इति किम् ? शंसति, संहति ।

५१. **ङणाभ्यां कुटु शरि ।**

शरि परे ङणाभ्यामुत्तरे यथा क्रमं कुटु वा स्याताम् । प्राङ्क्शेते, प्राङ्शेते, प्राङ्क्शम्भुः, प्राङ्शम्भुः, प्राङ्क् साधुः प्राङ्साधु । लुङ् लङ-लृङ सु लुङ्लङ्लृक्षु, सुगन्ट् शेते, सुगण्शेते, सुगन्ट साधुः, सुगण्साधुः इत्यादि । (सुगण्ठ् साधुरिति च पाणिनिः)

---

५०. त्वम्+कथम्+चित्रम्+पक्षम्+कण्डूयन्तम् । सम्+यन्ता, सम्+वत्सरः, अत्र (१।२।४१) इति मस्थानेऽनुस्बारस्ततो ङ आदि कार्य्यम् । ननु स्वं रूपं शब्दस्याशब्दसंज्ञा (परि० ३५) इति नियमात् सवर्णसंज्ञैव ग्रहीतुं युज्यते सा तु वर्ग्याणामेव न तु तदन्येषां हलां तत् कथं परसवर्णानुनासिको गृह्यते ? मैवम् सवर्णसंज्ञाव्याख्यावसरे सान्वया सा प्रतिपादिता, अत्रापि यय् ग्रहणात्तदधिकमपि विषयीकरोति, यद्येवं ययि सवर्णोऽनुनासिको जायमानस्येव श्रुतत्वात् भविष्यति, किं परेणेति ? सत्यम् पूर्वस्य परस्य वेति सन्देहे परग्रहणं तन्नियमार्थम् । तर्हि यवलां सवर्णानुनासिकाभावात् तत्समस्थानवर्गपञ्चमाः किं न गृह्यन्ते ? मैवम्, रेफवर्जितानां तेषां द्वैरुप्यं, सानुनासिक-निरनुनासिकत्व भेदेन स्मृतौ समर्थितं, तेनानुस्वारस्य ययि पर सवर्ण आन्तरतम्यात् नानुनासिकः स्यात् आनुनासिकादेशस्य यकारादेरानुनासिक्यं भाष्यादौ समर्थितम् । यत्पुनरन्तस्थानामानुनासिक्यं हि छान्दसमिति वार्त्तिकम्, तदान्तरतम्य विधेरन्यत्र ध्येयम् । सर्वमेतन्मनसि कृत्वा यवले यँ वँ लँ वेति । रेफे त्वनभिधानाद् वा नुस्वारस्यानुनासिकः स्यात्, अपदान्तस्य तु नित्यमिति । इह तु शब्दो वाक्यभेदे, अतः परमनुस्वारस्यानुनासिकः स्यादिति तात्पर्यम् परिष्कार्यम् । ययीत्यनन्तरं परसवर्ण इति स्पष्टार्थम् । शंसतीति शन्सु स्तुतौ, संहतिरिति संपूर्वाद्ध्यन्तेः क्तिन् ।

५१. ङश्च णश्च ङणौ, अनयोरकार उच्चारणार्थः । कु टु इत्यनयोरपि उकारौ उच्चारणार्थौ, आगमत्वेऽपि सवर्णग्राहकत्वं नास्तीति प्रतिपादितं, प्राङ् इत्थमत्र विचार्य्यते, प्राञ्चतीति क्विन्, ततोऽनुषङ्गलोपे नुम्—नकारस्य पदान्तस्य

५२. ह्रस्वान्ङणनामचि नित्यं द्वे असमासे ।

ह्रस्वात्परयो ङणनामचि परे नित्यं द्वे स्याताम् । कुङ्ङास्ते, सुगण्णीशः, पचन्नस्ति, समासे तु—तिङन्तः, केचिदत्र भवत्यपि, आरण्णन्त इति । ह्रस्वादिति किम् ? प्राणन्ति ।

५३. षष्ठोऽसो धेऽप्यथटि ।

अश्रुतसकारस्य पदान्ते, धकारे च परे षस्य ट स्यात् । षट्, मूलवृट्, रज्जुसृट्, प्रभूढ़तर । धकारे च द्विङ्ढि, आचड्ढ्वे । अस इति किम्—वपुष्टः । अथटीति किम् ? षष्ठः ।

ङ्कारः । ततः प्राङ्शेत इति स्थिते क्वागमे सन्निपातलक्षणत्वात् कथं शकारस्य न छकारः ? नैवम् वर्णग्रहणे निमित्तत्वात्, अतः ककारो निवर्त्तते, प्रत्युत् शकारं व्याहन्ति सामर्थ्यात्, अत एव लुङ् लङ् लृङ्क्षु इत्यत्र षत्वम् । सुष्ठु गणयतीति क्विपि सुगण् साधुरिति स्थिते ट्वागमे नटाभ्यां से (१।२।६५) इति तुक्, इह च टिदागमः परवदिति न्यायात् तदन्यस्य पूर्वभागित्वे पदान्तत्वात् "न पदान्ताट्टोः (१।२।६३) इत्यादिना टुत्वं निषिध्येत, एवं (अध्यङ्क्शस्त्रभृतां राम) इति भट्टौ ।

५२. क्रुङ्+अस्ति, सुगण+ईशः, पचन्+अस्ति । तिङ्+अन्त-, आवन्+अन्तः । एक मात्रो वर्णह्रस्व उच्यते, तस्मादित्यर्थः । द्वे इति नपुंसके प्रथमाद्विवचनान्तं पदम् । ननु द्विशब्दस्य धर्मिवृत्तित्वात् वैयधिकरण्येन निर्द्देशो विरुद्धः, उक्तं हि भाष्यकारैः—आदेशभ्य संख्या सख्येय इति, सत्यम् समानाधिकरणनिर्द्देश प्रायिकमनुरुध्य भाष्यकारास्तद्व्यपदिशन्ति स्म क्वचन क्वचन धर्मवृत्त्यौरपि द्वयेकयोर्द्विवचनैकवचने इति, निर्देशात् तद्वदत्रापि । क्रुङ्ङास्त इति क्रुञ्चतीति क्विन्, सुगण्णिति साधितमेव । पचतेः शतरि पुंसि प्रथमैकवचने रुपम् । अथ कथं स्वरूपप्रत्ययो नेष्टः ? सन्नतान्न सनिष्यते इति भट्टवार्त्तिके द्वित्वं नास्ति, तथा आरण्णन्तोत्तरपदः सन्नादिक्रुत्तद्धितसमासजैरित्यत्र समासे तु द्वित्वमेवास्ति ? सत्यं ओतोयिन्वायीश्वरवदिति निर्द्देशात् शिष्टप्रयोगेष्वन्वयव्यतिरेकाभ्यां विधिरिष्यते । स्वमते तु नञा निर्दिष्टमनित्यमिति क्वचिदत्र भवत्यपीति ।

५३. ननु षष्ठ इत्युक्ते धकारस्य कः प्रसङ्गः ? धेनास इत्युच्यत इत्याश्रुतसकारस्येति । किं यत्र कदाचन विधिबलात् मूर्द्धन्यो भवेत्तत्र प्राक् दन्त्यश्रुतेर्नस्यात्, अत एव वर्ण विधौ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रह्यणम्, न तु लाक्षणिकस्येति परिभाषानित्येति, तेनात्र वाक्यत्रयम्, पदान्तस्य यस्य टः । धेऽपीत्यनेनोपदान्तस्य धकारे परेऽपि भवति, अनुवर्त्तिनीं विभक्तिमाश्रित्य पदान्त थट्प्रत्यये न स्यादिति । —"श्रुतं तपसि वेदे च दन्त्यवर्णेऽपि त श्रुतिमिति कोषः" ।

५४. झयस्तृतीयो झषि च ।

पदान्ते झषि च परे झयस्तृतीयो भवति । वागिह, वाग्भ्याम्, अजन्तः, षड्-गच्छन्ति, तद्याति, अब्जातम् । झषि च झष्ग्रहणमपदान्तार्थम्, तेन दोग्धि, लब्धम् ।

५५ पञ्चमो वानुनासिके नित्यन्तु प्रत्यये ।

पदान्तेऽनुनासिके च परे झयः पञ्चमो वा स्यात् । वाङ्ङ्कारः, वाग्ङ्कार, वाङ्ज्ञः, वाग्ज , वाङ्नः, वाग्नः. वाङ्गमे, वाग्मे । एवम् अञ्ज्ञः, अज्ज्ञः, षण्णः, षड्नः, तण्णः तद्नः, अम्भः, अब्मः । नित्यन्तु प्रत्यये—वाङ्मयः, तन्मात्रम्, अञ्ज्मात्रम् षण्णाम् ।

५६. खरि प्रथमोऽपदान्ते च ।

खरि परे झयः प्रथमो भवति अपदान्ते च । तत् कुरुते, तच्छिनोति, तच्छिन्नम् । अपदान्ते च—भेत्ता, युयुत्सते, आरिप्सते ।

---

५४. वाक्+इह, वाक्+भ्याम्, अच्+अन्तः, षट्+गच्छन्ति, तत्+याति, अप्+जातम् । दोक्+धि, लभ्+ध्वम् । इह तृतीयविधौ पदान्तस्यैव निमित्तता स्थानान्तर्यादेवायं विधिर्वक्ष्यमाणश्च भवेत्, जश् तृतीययोः पर्यायत्वात् प्रयोक्तुरिच्छैव प्रयोजिका । अथ सर्व्वत्र पदान्तस्यैव निमित्तत्वात् । किं व्रणकण्डूयनेन ? झषीत्यनेनेत्याह झषि चेति पृथग् वाक्यत्वादेवास्य लक्षणस्यपदान्त विषयत्वं गम्यते । दोग्धीति दुहरदादे रुभयपदिनो लट् ।

५५. वाक्+ङकारः वाक्+ज्ञः—नः मे । अच्+ज्ञः, षट्+नः, तत्+नः, अप्+मः, वाक्+मयः । अच्+मात्रम्, षट्+नाम् । अत्रानुनासिकपदेन ङमुच्यते तदन्यस्य [स्वररेफेतरान्तःस्थाधर्मत्वात् निमित्तेन सहार्थकृतयथाक्रममणि नेष्यते भिन्नशब्दात्, अन्यथा पञ्चमे पञ्चम इति विदध्यात् । वाङ् न इति वाक्शब्दादस्माकमित्यस्य नसादेशः । अञ्ज् मात्रमिति अत्राच् शब्देन अच् संख्योच्यते तदेव परिमाणमस्येति माने (५।४।११६) इति मात्रट्, स्वार्थे मात्र इत्यन्ये ।

५६. अत्राप्यदान्ते चेत्यनेन पूर्ववाक्यस्य पदान्तविषयत्वं गम्यते इत्यापदान्ते चेत्यादि, अपदान्ते च खरि झयः प्रथमो भवतीति शेषः भेत्तेति भिदेरौधादिकस्योभय-पदिनो लुटि तृणि च रूपम् । युयुत्सत इति युधेर्द्दैवादिकस्यात्मनेपदिनः सनि पूर्ववत्सनः (३।१।१०८) इत्यात्मनेपदम् : आरिप्सत् इति आङ् पूर्वपूर्व्वरभते-र्भौवादिकस्यात्मनेपदिनः सनि रभलभशकपसपदामिति प्रकृत्यकारस्येत् द्विर्लुक् च पूर्व्ववत्तङ् ।

५७. **वावसाने द्वित्वञ्च ।**

विरामे झयः प्रथमो वा स्यात्, द्वित्वञ्च बा । वाक्, वाग्, वाक्क् वाग्ग् ।

५८. **पूर्वस्य तुर्य्यो हः ।**

पूर्वस्य झयसम्बन्धिनो हकारस्य स्थाने तुर्य्यो वा स्यात् । वाग्धीनः, वाग्हीनः, अज्झीनः, अज्हीनः, षड्ढलानि, षड्हलानि, तद्धितम् तद्हितम्, अब्भीनः, अब्हीन :

५९. **शश्छोऽश्च्युतेः ।**

पदान्ते झयसम्बन्धिनः शकारस्य छो स्यात् । वाक्छूरः, वाक्शूरः, अच्छोकः, अच्श्लोकः, षठ्छ्यामा, षट्श्यामा, अपच्छ्रमी, अपश्रमी । व्यवस्थितविभाषया शसि नित्यम्, यावच्छः । अश्च्युतेरिति किम् ? वाक्श्च्योतति ।

६०. **तोर्लो लेः ।**

तवर्गस्य ले परे लकारो वा स्यात् । तल्लेखः, तद्लेखः, भवाल्लुब्ध, भवान् लुब्धः ।

---

५७. विरामोऽवसानमिति पूर्वाचार्यसंज्ञा, यद्वा लोकप्रसिद्धोऽवसानशब्दः समाप्तिमभिधत्त इत्याह विराम इति, पदविरताविल्यर्थः । पक्षे तृतीयः सिद्धः एवः । वाशब्दस्य काकाक्षिवदुभयत्रान्वयः । वागिति वक्तेः कर्म्मणि "वचादेर्णिः (४।१।११२) इति णिः, इतो लोप इति तल्लोपे वृद्धिः ।

५८. झयः सम्बन्धिनः इति, अत्र सन्निधानलक्षणः सम्बन्धः तुर्य्य इति साधितमेव । वाग्धीनः इति ओहाक् त्यागे कर्म्मणि क्तन्तस्य (क्तान्तस्य) रत्वादिसूयत्याद्योतितं (४।२।१४७) इति णकारः, घुमास्था (३।३।११९) इत्यात ईकारः वाचा हीन इति विग्रहे कर्तृकरणे (४।३।२८) इति समासः ।

५९. लङ्म्परस्य शस्य छत्त्वं नेच्छन्ति कातन्त्राः, तदिह न प्रमाणं सामान्यत्वादिति दर्शयति अच्श्लोक इति । अप्च्छमीति श्राम्यतेर्घिनुणि न जनवधमान्ते- (३।४।८८) त्यादिना वृद्धिनिषेधः । व्यवस्थिविभाषयेति अव्ययानामनेकार्थत्वात् त्वेष्टसिद्धि साधनभूता विभाषा व्यवस्थितविभाषयेति यावच्छ इति संख्यैक्यार्थात् (५।४।३२२) इति शस् । वाक्श्च्योततीति श्च्युतिर् आसेचने इत्यस्य भौवादिकस्य रूपम् ।

६०. अत्र तवर्गस्य प्रवर्त्तनमानो लकारो निरनुनासिकस्येवेति संप्रदायः । नकारस्यानुनासिकस्य सानुनासिक एव लकारः प्रवर्त्तत आन्तरतम्यादिति कातन्त्राः । तेन भवांल्लुब्धः इत्यपि भवति ।

६१. **चुना चुः ।**

चुना चवर्गेण योगे तवर्गस्य चवर्गो वा भवति । तच्चिनोति, तत् चिनोति; तच्छिन्नम्, तत्च्छिन्नम्, तज्जितम्, तद्जितम्; तज्झङ्कारः, तद्झाकारः, तञ्झाकारः, एषाञ्चिनोति, एषान्चिनोति । चुनेति तृतीयानिर्द्देशात् परस्याप्येकपदे नित्यम्, व्यवस्थितविभाषया, यदाहुः—

संहितैकपदे नित्या, नित्याधातूपसर्गयोः ।
सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया ।।

परः सन्निकर्षः संहितोच्यते, तेन राज्ञः, यज्ञः, याञ्चा, प्रियपञ्चमः ।

६२ **टुना षाच्च टुः ।**

टुना टवर्गेण योगे षकारादुत्तस्य च तवर्गस्य टवर्गो वा स्यात् । तट्टीकते, तत्टीकते, तठ्ठकारः, तत्ठकारः, उड्डीनम्, उद्डीनम्, वादयण्ढक्काम्, वादयन् ढक्काम्, लिखण्णकारम्, लिखन् णकारम् । टुनेति तृतीया निर्द्देशात् परस्याप्येकपदे नित्यम्—बम्भण्टि, ईट्टे, गूढम्, षात् खल्वापि, यष्टा, अच्योष्टाः ।

---

६१. अनन्तरत्वात् कार्यित्वेन तोरित्यनुवर्त्तते एवेत्याह तवर्गस्येति । अथेह योगो वर्णान्तरव्यवहितसमीपलक्षणः, स तु पूर्वपराविशेषार्थ इति चुनेति करणतृतीयया ज्ञाप्यते, अन्यथा चौचुरिति कृतं स्यादित्याह चुनेतितृतीया निर्द्देशादिति । अथ यद्यपि गङ्गास्रोतो न्यायाद् विभाषानुवर्त्तमानैव तथापि तस्य व्यवस्थितत्वादेकस्मिन् पदे सुबन्ततिङन्तरूपे नित्यः सन्धिरिति भाष्यकारमतमनुसृत्य निश्चिनोति यदाहुरिति पूर्वसूरय इति शेषः । एकपदे संहिता सन्धीयमानयोर्द्वयोः स्वसन्निकर्षः निरतिशयमान्तर्यं अर्द्धमात्राकालमात्रेणाव्यवाय इति यावत् । एतदेव वक्ष्यति परः सन्निकर्ष संहितोच्यत इति, उपचारान्तत्कार्यमपि संहिता, सा तु नित्यैवेति प्रकृतोपयोगि, अपरन्तु प्रामादिकम्, तद्यथा नित्या धातूपसर्गयोरिति, धातुश्च उपसर्गश्च धातूपसर्गौ तयोरुपसर्गे सहेति शेषः । तथा च श्रीपतिसूत्रम्, धातूपसर्गयोस्तूपसर्गैर्वेति, यथा—अधीते, व्याजहार, व्युदस्यति । तृतीयपदन्तु प्रायिकमेव, यथा आदिरितान्त्येन समध्य इति सैव संहिता अन्यत्र शेषेषु ।

६२. तत्+टीकते, तत्+ठकारः, उत्+डीनम्, वादयन्+ढक्काम् । अमुष्यां द्विसूत्र्यां विकल्पविधिर्भाष्यदि विरुद्ध इत्युपेक्षितः शिष्टैः ।

६३. **न पदान्ताट्टोरनवतिनगरीणाम् ।**

पदान्त टवर्गान्त् टुत्वं नास्ति । षट्तारा:, मधुलिट् तरति । अनवत्यादेरिति किम् षण्णवति:, षण्णगरी, णण्णाम् ।

६४. **शे तनोश्चञौ नस्तुक् च ।**

शे परे तकारनकारयोश्चञौ वा स्याताम्, पक्षे नान्ताचुक् च । तच्शेते, तच्छेते, तत्शेते, भवान् शेते, तुक्-भवाञ्च्छेते, चुत्वे न ञकार: । (भवाञ् शेते, भवाञ्छेते इति केचित्)

६५. **न टाभ्यां से ।**

आभ्यां से परे तुग्वा स्यात् । भवान्त्साधु:, भवान्साधु:, षट्त्साये, षट्साये । न थर्परे । भवान्स्थात् ।

६६. **छो ऽचो द्वि: ।**

अच उत्तरश्छकारो द्विर्भवति । वेति निर्वृत्तम् परस्मिन् वा ग्रहणात् । सच्छात्र: तरुच्छायाम् गच्छति ।

---

६३. षट्+तारा:, मधुलिट्+तरति । षट्+नवति, षट्+नगरी, षट्+नाम्, पक्षे षड्नवतिरित्यादि । मधुलिटतर इति मकरन्दाभिप्रेत: पाठ: । षण्णगरीति समाहारस्ततो ङी ।

६४. तत्+शेते, भवान्+शेते, अत्र तस्य च:, नस्य ञ इति यथाक्रमम् । तच्छेतेऽस्य विकल्पपक्षे शश्छ: (१।२।५६) इत्यस्य प्रवृत्ति: । भवाञ्छेते इति इति शश्छ इति चुत्वे कृते चुना चु (१।५।५१) इति तनोश्चञौ, तदभावपक्षेऽनेन तुक्— तकारस्य चकारस्ततश्चुत्वमेतदेव विवृणोति, चुत्वे नञाकार: । अस्यार्थ:, तस्य चुत्वे सति नकारश्चुना चुरित्यनेनेति शेष: । अत्र तुक: कित्त्वं परप्रसिद्धयर्थम् । अत्र पाणिनेरुदाहरणानि-सञ्च्छम्भु: सञ्छम्भु:, सञ्च्शम्भु: सञ्शम्भूरिति ।

६५. अत्र पञ्चमीबलात्, अनन्तरत्वाच्च तुगेवावसीयते न चञावित्याह तुगिति ।

६६. अत्राच इत्यत्र (२।२।३५) इति पञ्चमी । अथ वावसाने (१।२।५७) इत्यतो वात्र न स्मर्यते, उभयोर्विभाषयो: (परि० ७८) इति न्यायात् आह-वेति निवृत्तम् । स:+छात्र: (२।३।२५) इति विसर्गलोपे सन्धिप्रतिषेधो मा भूत, तत्राचीत्यनुवर्त्तमानात् परत्वाद् वा । तरु+छायाम् । तरोश्छाया, न तु तरूणां छाया, तथात्वे इति क्लीबत्वं स्यात् । गच्छतीति स्थादे: (३।३।३१) इत्यत्र गमसदेति गणसूत्रात् लादेशो द्वित्वम् । ननु च स्वसन्निकर्षाधिकारे प्रकरणमिदमधीतं प्राचीनै:, नवीनेनापि कातन्त्रपरिशिष्टकृता, तत्कथं संहिताधिकारो न विहित: ? सत्यम्, संहितायामिति सूत्रात्तत्रैवायं विधिरिति भाष्यम्, तेनाभिधानाश्रयणमेवात्र शरणमित्यतो हे छात्र छत्रं पश्यत्यादौ न स्यात् ।

६७. पदान्तदीर्घादनाङ् माङो वा ।

पूर्वेण नित्ये प्राप्ते विकल्प आरभ्यते, पदान्त—दीर्घाच्छकारो द्विर्वा स्यात् । कुटीच्छाया, कुटीछाया, आङस्तु माङस्तु नित्यं पूर्वेणैव—आच्छादयति, माच्छादयति ।

६८. ह्राभ्यां यय् ।

अच उत्तराभ्यां हराभ्यां परो यय् द्विर्वा स्यात् । ब्रह्म्मा, ब्रह्मा, अर्क्कः, अर्कः, कुर्म्मः, कुर्मः, कार्य्यम्, कार्यम्, दुर्ल्लभः, दुर्लभः । ययिति किम् ? ददर्श, मर्षति, अर्हति ।

६९. अनचि ह्रस्वहलो हलर्हः ।

ह्रस्वाद्फलश्चोत्तरो रेफ हकार वर्ज्जितोऽनच् परो हल् द्विर्व्वा स्यात् । द्वित्व-विधौ यणादेशो न स्थानिवत् –दद्ध्यत्र, विग्घ्नः, विघ्नः, उग्ग्रः, उग्रः, पुत्त्रः, पुत्रः, दृश्श्यः, दृश्यः, शिष्ष्यः, शिष्यः । हलपरस्तु-दर्शश्यते, दर्श्यते, ईर्ष्य्या, ईर्ष्या, मत्स्स्यः, मत्स्यः, (इन्द्रः) इन्द्द्र, इन्द्रः, राष्ट्रम्, (राष्ष्ट्रम्) राष्ट्रम् । अनचीति किम् ? ददर्श । अर्ह इति किम् ? वर्षा, ब्रह्मा । ह्रस्वादिति किम् ? दात्रम्, नेत्रम् ।

७०. शरः खय् ।

शर परः खय् द्विर्व्वा स्यात् । स्थ्थाली, स्थाली ।

---

६७. कुटी + छाया । आ + छादयति, मा + छादयति । रैछायाणौ—छयित्यत्र कथं द्वित्वविकल्पः, सन्ध्यक्षराणां दीर्घत्वाभावात् ? मैवम्, सन्ध्यक्षराणि दीर्घाणीति मते भविष्यति । अतएव सन्ध्यक्षराणां ह्रस्वनियमः । सत्यम्, ग्रन्थकृतापि भङ्ग्यैषां दीर्घत्वमङ्गीकृतम् । अन्येस्तु गुरोः सामर्थ्य वेति सूत्रयित्वा तिष्ठतु कन्या छात्रत्वमधीष्वेत्युदाहृतम् । पदान्त इति किम् ? ह्लीच्छति, चोच्छुप्यते इत्यादौ नित्य द्विर्भावः ।

६८. अत्र संहितैकपदे नित्येति नित्यद्विर्भावो भाष्यादीनां मतेन जिह्वामूलीयोपाध्मा-नीयः-विसर्गाणां द्वित्वमिच्छन्ति केचिद् भाष्यस्थितेः, पयः + कामः । पयस्कामः । पयः⌒पीतम् पय⌒पीतम्, उरः केण उरः⌒केणेत्युदाह-रन्ति च ।

६९. ह्रस्व हल इति समाहारे द्वन्द्वः, अर्ह इति समाहारे द्वन्द्वगर्भो बहुव्रीहिः । अन्यथार्होऽर्हमिति स्यात् ।

७०. चकारस्तूक्त समुच्चयार्थः, न केवलं शरः खय्, खयः शर् च द्विर्व्वा स्यादित्यर्थः ।

७१. खय: शर् च ।

वत्स्स:, वत्स: क्ष्षीरम्, क्षीरम् ।

७२. यणो वर्ग्यश्च ।

उल्क्का, उल्का, वल्म्मीकम्, वल्मीकम् ।

७३. वर्ग्याद् यण् च ।

दध्य्यत्र, दध्यत्र, मध्व्वत्र, मध्वत्र ।

७४. वर्गादे: शरि द्वितीय: ।

वर्गादे: शरि द्वितीयो वा स्यात् । ख्शीरम्, क्षीरम्, वाख्शेते, वाक्शेते, भवथ्सु, भवत्सु, अफ्सु, अप्सु ।

७५. ढ्लोपो ढ्रो: पूर्वस्याणो दीर्घश्च ।

द्वित्वसाहचर्य्याद् वेति निवृत्तम् । ढकाररेफयो: परयोर्यथाक्रमं ढकाररेफयोर्लोप: स्यात् । पूर्वस्याणो दीर्घश्च । लोढ़म्, गूढ़म्, नीरक्तम्, महारम्यम्, हे कर्त्ता राजसे ।

७६. उद: स्थास्तम्भो: सस्य लुक् ।

उद: परयो: स्थास्थम्भो: सस्य लुक् स्यात् । उत्थाता, उत्तम्भिता ।

७७. ते: त्से ।

त्से परे तकारस्य लुग्भवति । तत्सरु: ।

७८. हलो यवोर्य वा ।

हल: परयोर्यवोयपरे लुग्वा स्यात् । आस्ये भव आस्यम्, आस्याम् वा, साध्व्रीनामुदय:, साध्युदय:, साध्व्युदयो वा ।

---

७५. ढश्चरश्चेति ढ्र, तयोर्लोप: । द्वित्वसाहचर्य्यादित्यादेरयमभिप्राय:, द्विर्भावे द्वितीये चोभयत्र द्वित्वं पुरस्कृत्य विकल्प: प्रवर्त्तेऽत: सन्नियोगशिष्टानामेकापायेऽन्यतरस्यापाय इति वा शब्दो नानुवर्त्तत इति । इह प्रधानाशिष्टतया नित्यो लोपोऽन्वाचयशिष्टतया दीर्घो यथा सम्भवमिति, तेन उच्चैरौतीत्यादय: सिद्धा: । अण् इति किम् ? विवृढ़, दृढ़: ।

७६. उत् + स्थाता, उत् + स्तम्भिता । उत्तम्भितेति, अनचि (१/२/६६) इति द्वित्वे त—त्रयोऽपि । केचिदुद: स्कन्देरिति लक्षयित्वा उत्कन्दक इत्युदाहरन्ति ।

७७. तान्तस्येति शेष: । त्स इति रूपमात्रस्य ग्रहणम् । तेन बृहत्सरति । त्सर + उ:, त्सरु:, खड्ग्यादिमुष्टि: ।

७९. **झयो झयि सवेंण ।**

सर्वेण झयि परे हल: परस्य झयो लुग्वा स्यात् । छिन्त:, छिनुत्त:, प्रत्तम्, प्रत्तम्, शिन्ढि, शिण्ढ्ढ्, बन्धुम्, बन्न्धुम् ! झयीति किम् ? प्रियपञ्ञ्च: । से च सस्तलोपो वक्तव्य:-यस्यस्ति स्वप्ने—संस्सि ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मव्याकरणे
प्रथमाध्यायस्य द्वितीय: पाद: ।

—०—

---

७८. आस्य+यत् । साधोरी लक्ष्मीस्तस्या उदय: साध्युदय: । हर्य्यते, हर्यते । हल इति किम् ? शय्यते, य इति किम् ? दजि+अत्र=दध्यत्र ।

७९. छिन्त्त इत्यत्र द्वौ तकारौ क्रमजस्तृतीयस्तत्र मध्यमस्य मध्यमयोर्वा लोप: । प्रत्तमित्यत्र चत्वारस्तकारा: । अच उपसर्गात्त खरि (१/२/५६) इति दकारस्य तकार:, द्वित्वम्, एतावत्त्रयस्तकारा:, द्वादेशौ, एक: प्रत्ययावयव: अनचि चेति द्वित्वे क्रमजश्चतुष्टय इति काशिका । मरुत्त इत्यत्र पञ्चतकारा:, तत्रैकस्य द्वयोस्त्रयाणां वा लोप: । झय इति किम् ? शार्ङ्ग्म्, शार्ङ्ग्निक: । हल इति किम् ? वेत्ता । सवर्ण इति किम् ? तर्प्ता त्रप्तम् । स चेति पृषोदरादित्वात्, यस्यस्ति स्वप्ने इत्यस्य लट् सिपि रूपम् ।

इति द्वितीयो बिन्दुलेश: ।

तृतीयः पादः

१. रुसोः पदान्ते विसर्ज्जनीयः ।

पदान्ते रो रेफस्य, सकारस्य च विसर्गो भवति। अभिनः, अरुणः, यशः, करः, निनीः । अतः पदान्ताधिकारः ।

२. महन् सजुष्-प्रतिदीव्नां न षोः ।

परान्ते अहरादेर्नषो विसर्गो भवति । अहः । सहजुषेः क्विप्, सनः सजूषाशिषीश्चेति दीर्घत्वम्, सजूस्तापसः, सजूरत्यव्ययञ्चास्ति प्रतिदिवाः ।

३. रः खरवसानयोरसुपि । ।

पदान्ते खरि अवसाने च रेफस्य विसर्गो भवति । पुनः कृतम्, गाः. धूः । खरीति किम् ? पुनर्याति । असुपीति किम् ? गीर्षु, धूर्षु ।

४. विसर्जनीयस्य ।

अधिकारोऽयम् ।

---

१. ननुरूप्रभृतीनां समासे, दारूपप्रभृती नामसमासे च रूकारस्य पदान्तत्वे विसर्ज्जनीयः कन्नर्थंस्यादित्यत आह रो रेफस्येत्याशयः, तत्र दधोरुः (३/३/३४) इत्तत्र रोरुकारकरणमेतद्विशेणार्थमेव । तरु प्रभृतेस्तु न तथेति । विसृज्यते विरभ्हत इति वि+सृज् कर्म्मण्यनीय कर्म्मप्रत्येयोपलक्षणार्थः, तेन विसृष्टो विसर्गोऽपि भवतीत्याह विसर्गो भवतीति । संज्ञा तु प्रसिद्धैवात्र गृह्यते ।

२. अहन् इत्यस्य नस्य विसर्गः । सजुष् इति यस्य, प्रतिदिवन् इत्यत्रापि नस्य विसर्गः ।

३. एकापीयं सप्तमी अर्थंवशाद् द्विविधा भिद्यते, खरि परे अवसान विशेषे चेति । गृ धृ । चिप्, ऋतः (३/४/१५) इतीर्, वः प्राग्दीर्घः (२/३/१०१) इति दीर्घः । धूर्वा+क्विप्, वाच्, छ्व्रोर्लोपः ।(२/३/९०१) दीर्घश्च ।

४. षष्ठयन्तानुकरण—षष्ठ्यर्थप्रतिपादकं लुप्तप्रथमैकवचनम् ।

५. क × पौ ⌒च कख फफेऽशर्युक्ते ।

कपावुच्चारणार्थौ, विसर्गस्य सदृशतमत्वात् कखयोर्जिह्वामूलीयः, पफयोरुपध्मानीयश्च भवति । चकारात्पक्षे विसर्ग एवावतिष्ठते । क × कविः, कः कवि, क × खलः, कः खलः । क ⌒ परः कः पर, क ⌒ फली, कः फली । अशर्युक्त इति किम् ? कः क्षीरी, कः प्साति ।

६. निरदुर्बहिः प्रादुराविश्चतुरां षः ।

एषां विसर्गस्य कादौ परे क प ⌒ योरपवादः षः स्यात् । निष्कुलम्, दुष्कुलम्, बहिष्कृतम्, प्रादुष्करोति, आविष्करोति, चतुष्काण्डम्, निष्फलम् चतुष्पुत्राः ।

७. इजद्भ्यां वसौ पाश-कल्प-क-काम्येषु प्रत्ययेत्वनव्ययस्य ।

पाशादिषु प्रत्ययेष्वनव्ययस्य विसर्गस्य इजन्तात् षो भवति, अतश्च सो दन्त्यः,: धनुष्पाशम्, ज्योतिष्कल्पम्, धानुष्कः, दोर्भ्यां तरति दौष्कः, ज्योतिष्काम्यति, अतश्च सो दन्त्यः, रक्षस्पाशम्, तमस्कल्पम् । अनव्ययस्येति किम् ? प्रातःकल्पम्, मिथ काम्यति, पुनः काम्यति । आकस्कादेरिजद्भ्यां षसावित्यनुवर्त्तिष्येते ।

८. न काम्ये नरयोः ।

नकाररेफयोर्विसर्गस्य काम्ये पर षसौ न भवतः । अहः काम्यति, गीः काम्यति ।

---

५. इह कपयोर्जिह्वामूलीयोपाध्मानीययोः सूत्रे उच्चारणात्तथाभूतावेतावादेशौ विधीयेते इति कस्यचिद् भ्रान्तिः स्यात्तन्निराकुर्वन्नाह क—पावुच्चारणार्थाविति । ताभ्यां विना तदुच्चारणशक्यत्वादिति भावः । तौ कीदृशावादेशावित्याहकखयोर्जिह्वामूलीयः, पफयोरुपध्मानीयश्चेति । ननु क-ख-प-फेति चतुष्टयं निमित्तम्, कस्मिन् परे किं स्यादित्याह सदृशतमत्वादित्यमर्थः (एकस्थानोच्चार्यमाणत्वात्) उ-पू-पाध्मानीयानामोष्ठ इत्युपदिष्टत्वात्, स्थाने सदृशतमः (१/१/३२) इति परिभाषया पफयोरोष्ठ्ययोरोष्ठ्य उपाध्मानीयः प्रवर्त्तते । ततः शिष्टे पुनः शिष्टमिति । इह सूत्रे चकारो विसर्गानुकर्षणार्थ इति दर्शयन्नाह चकारादित्यादि । एवकाराद्विसर्गोऽपि तिष्ठतीत्यर्थः ।

६. निः + कुलम्, दुः + कुलम्, बहिः + कृतम्, प्रादुः + करोति, आविः + करोति, चतु + काण्डम्, निः + फलम्, चतुः + पुत्राः । क × प⌒योरपवादः इति तेनवक्ष्यमाणाष्ठसूत्र्यां कख-प-फस्य निमित्त्वमिति ।

७. यथाक्रमं दर्शयति, अतश्च सो दन्त्य इति । सो दन्त्य इत्यत्र क्वचिद्वा (१/३/२५) इति लिखनाद्विसर्गस्योत्वम् ।
धनुः + पाशम्, ज्योतिः + कल्पम्, धानुः + कः, दौः + कः, ज्योतिः + काम्यति, रक्षः + पाशः, तमः + कल्पम् ।

८. काम्ये परे नरस्थानजातस्य विसर्गस्य षसौ न भवतः । अहन् इत्यस्य नस्य विसर्गः, गीरित्यस्य च रस्य विसर्गः । काम्य इति नियमान्नेह धनुष्कल्पम्, धूष्पापः । अनयोरिति किम् ? पयस्काम्यति ।

९. नमः पुरसो कृञि समासे वा च तिङि ।

अनयोः कृञि समासे विसर्गस्य सः स्यात् । नमस्कृत्य, पुरस्कारः । समास इति किम् ? नमः कृत्वा गतः । वा च तिङि—नमस्कुरु, नमः कुरु ।

१०. तिरसश्चासमासेऽपि ।

तिरसः कृञि सर्व्वत्र विसर्गस्य सो वा स्यात् । तिरस्कृत्य, तिरः कृत्यः, व्यवस्थितविभाषया नित्यम्—तिरस्कारः ।

११. द्वित्रिचतुरां कृत्वोऽर्थे ।

एषां कृत्वोऽर्थवृत्तीनां विसर्गस्य क-ख-प फे षो वा स्यात् । दिष्कुरु, द्विः कुरु, त्रिष्पच, त्रिः पच, चतुष्पीतम्, चतुः पीतम् ।, कृत्वोऽर्थ इति किम् ? चतुष्पार्श्वम्, नित्यम् पूर्वेणैव ।

१२. इसुसोरपेक्षायाम् ।

इसुसोर्विसर्गस्य षो वा स्यात् । सर्पिष्पिब, सर्पिः पिब; यजुष्कुरु, यजुः कुरु । अपेक्षायामिति किम् ? तिष्ठतु सर्पिः पिबोदकम् ।

१३. समासेऽनुत्तरपदस्थयोर्नित्यम् ।

इसुसोः समासे नित्यं विसर्गस्य षः स्यात् । सर्पिष्कुण्डम्, यजुष्पाठः, । अनुत्तरपदस्थयोरिति किम् ? महासर्पिकुण्डम् ।

---

९. नमः+कृत्य, पुरः+कार इति विश्लेषः । अत्र कृञिति कृञ् धातु निष्पन्ने पदे परत इत्यर्थः ।

१०. चकारो विभाषानुकर्षणार्थः । अपिशब्दात् समासेऽपीत्याह सर्व्वत्रेति । (१/२/५९) ।

११. ननु च द्वित्रिशब्दौ सुच् प्रत्ययान्तौ कृत्वोऽर्थ एव वर्त्तते, तत् साहचर्याच्चतुः शब्दोऽपि तत्सदृश एव ग्रहीष्यते, तत् किं कृत्वोऽर्दग्रह्णम् ? ज्ञापनार्थमेतत् अनेन ज्ञाप्यते क्वचित् सहचरितासहचरितयोरित्येष नाऽऽश्रीयते, तेन दीधीवेवीटामित्यत्र धातुसाहचर्यादि गतावित्यस्य ग्रहणम्, (न) भवतीति वदता न्यासकृता समुक्तः पाठोऽत्राङ्गीकृतः । इत्थं द्विस्त्रिश्चतुःकृत्वोऽर्थः इति जल्पता क्रमदीश्वरेणापि, अतस्तन्मतानुसारिभिरन्यैरप्यतस् एवात्र वाच्यः ।

१२. इहेसुसौ प्रत्ययौ सृपेर्वचादिभ्यः इसिसर्पिः यजरेत्यादिभ्यः इसिसर्पिः यरजेत्यादिभ्यः उस्, यजुः । अपेक्षायामिति क्रियाचिह्नसप्तमी । तेनान्यत्र पस्य वृक्षांस्तर नदीमित्यादि सिद्धयति । कार्यनिमित्तयोरन्योऽन्याभिसम्बन्धोऽपेक्षा, अन्वय-बोध-योग्याकांक्षेति यावत् ।

१३. महासर्पिः कुण्डमिति सन्महत् (४/३/५८ वा०) इति कर्मधारयं कृत्वा पुनः षष्ठीसमासः । समासे परपदमुत्तरपदम् सर्वान्तमुत्तरपदमित्यपि यदुक्तम् तत् सर्वं समास एव ज्ञेयम् ।

१४. **असः कृ-कमि-कंस-कुम्भ-कुशा-कर्णीपात्रेष्वनव्ययस्य ।**

असन्तस्य समासे कृ आदौ परे नित्यं विसर्गस्य सः स्यात् । **अयस्कारः**, यशस्कारः, अयस्कामः अयस्कंसः, अयस्कुम्भः, अयस्कुशा, अयस्कर्णी, अयस्पात्री । अनव्ययस्येति किम् ? अधः कारः, नोत्तरपदस्थस्य, सर्वायः कारः ।

१५. **अधः शिरसोः पदे ।**

अनयोः पदे परतो विसर्गस्य सः स्यात् । अधस्पदम्, शिरस्पदम् ।

१६. **कस्कादिषु च ।**

अनुकरणात्वाद् दीर्घः । एषु यथायोग्यं षसौ भवतः । कौतस्कुत, कुतः कुतः आगत इत्यण् कौतस्कुतः, अहस्कर, तमस्काण्डम्, मेदस्पिण्डम्, वाचस्पतिः, गीष्पतिः, भ्रातुष्पुत्रः । क ख प फ इति निर्वृत्तम् ।

१७. **अतो हशतो रुः ।**

हशि, अति च परे, अतः परस्य विसर्गस्य उर्भवति, को गतः, कोऽत्र । हश-तोरिति किम् ? कः कान्तः कः आगत । अत इति किम् ? देवा अत्र ।

---

१४. अयः+कारः, यशः+कारः, अयः+कामः, अयः+कंस, अयः+कुम्भः, अयः+कुशा, अयः+कुशा, अयः+कर्णी, अयः+पात्री, इति पदच्छेदः अयस्+कृ+अण्, कम्+णिङ्+अच्, णिङभावपक्षे घण् वा णः । अयसो विकारः कंस, पानपात्रम्, शाकपार्थिवादित्वात् (४/४/५८ वा०) षष्ठी (4/७/७७) इति वा समासः ।

१५. पद इति पद शब्द इत्यर्थः । अत्र पद इति स्वरूपस्यग्रहणं न पारिभाषिकस्य । यदि तस्यैव ग्रहणं स्यात्तदासमासाधिकारादेव तस्य लक्षणत्वात् पदग्रहण-मनर्थकमेवापद्यते व्यावृत्तेरभावात् । प्रथमस्य यदृच्छादित्वात्, द्वितीयस्य षष्ठीति समासः ।

१६. कः+कः, कोतः+कुतः, अहः+करः, तमः+काण्डम्, मेदः+पिण्डम्, वाचः+पतिः, गीः+पतिः, भ्रातुः+पुत्र । ननु किम् शब्दस्य पुंसि प्रथमैक-वचने क इति पद, तत् पुनरिह वीप्सितम् । तेन बहुव्रीहौ विसर्गलोपे कथं दीर्घत्वप्राप्तिरित्याह अनुकरणत्वाद्दीर्घः इति । यथायोगमिति, इह परो यो विसर्गस्तस्य मूर्द्धन्यः यः, अन्यस्य तु दन्त्य स इत्यर्थः । अहन्+कृञ्=टः, तमः काण्डमिव तमसां काण्डमितिवा, मेदसः पिण्डम्, वाचः पति, गिरःपति ।

१७. कः गतः, कः+अत्र । अत इत्यत्र अन्यार्था (२/२/३५) इति पञ्चमी । हश् च अच्चतयोः । नन्विह रेफाद्यादेशः कथं नानुमन्यते ? मैवं मैस्था, अतो हश-तोरित्येव निर्देशात् रुरतो दृशतोरित्यकरणाच्च, कोऽत्रेत्यत्रोत्वे सति नकारो नानुवर्त्तते तस्य बहिरङ्गत्वात्, एकपदाश्रितत्वादन्तरङ्गत्वं गुणस्य ।

१८. इचो रोऽज्झसोः शोः ।

अचि हशि च परे इजन्ताद्विसर्गस्य रो भवति । कविरत्र, कैरिह, वधूर्याति । अज्झशोरिति किम् ? हरिः पातु वः ।

१९. अह्नो लुकि सुपोऽरूप-रात्रि-रथन्तरे ।

उत्वाद्यपवादोऽयम् । अचि, हशि च परे, सुब्लुकि सति अह्नो विसर्गस्य रो भवति । अहरत्र, अहर्मूलम्, अहरिदम्, अहर्याति । सुब्लुकीति किम् ? अहोभ्याम्, अहोभिः, अरूपादिष्विति किम् ? अहो रूपम्, गतमहो रात्रिरागता, अहोरथन्तरं साम, कथमहोरात्रः ? एकदेशविकृतमन्यवद्भवतीति, "क्ये पदत्वात्" अहर्य्यति अहर्य्यते, लुकीति किम् ? दीर्घाहा निदाघः, हे दीर्घाहो वा, अत्र हल् इति सुलोपः ।

२०. उषर्बुधोऽग्नौ नार्पतादयो वृद्धौ ।

निपातानान्नोत्वविसर्गौ । चतुर्थ इति निपातनात् ।

---

१८. कविः+अत्र, कैः+इह, वधू+यतिः र इत्यस्याकार उच्चारणार्थः ।

१९. अहः+अत्र, अहः+मूलम्, अहः+इदम्, अहः+याति, अहः+रूपम्, अहः+रात्रिः, अहः+रथन्तरम्, अहः+रात्र,, अहः+यति, अहः+यते, दीर्घाहा × निदाधः, दीर्घाहः वा, इति विश्लेषः । नन्विह लुकीत्युक्ते परेषामसम्भवात् सुप एव लुग्वक्तव्यः, किं पुनः सुप इत्यनेन ? सत्यम् प्रतिपत्तिगौरवनिरासार्थं सुब्लुकीत्येत्र विशिष्टव्यतिरेकः । अह्नो+रूपम्, अह्नो रथन्तरमिति षष्ठीसमासः असमासो वा । कथमित्यादि-कथंम् ? पुनारात्रिशब्दे पर उच्चार्यमाणो निषेधो रात्र शब्दपरे भविष्यतीत्यर्थः, अहश्च रात्रिश्चेति समाहारः द्वन्द्वः, रात्रे (५/१/९२) इत्यत् समासान्तः, पुंस्यह्नः (४/३/१०६) इति पुंस्त्वम् । अत्र स्थानिवद्भावादिति सिद्धान्तितम्, इहाहोरात्रिञ्च शोभत इत्यपीच्छन्ति भाव्यत्वेनानुचिन्तितम् । एष्वेति शाकटायनीये त्रिमुनिमते च तस्मादहाराजत इति रत्वम् । चान्द्रे तु रेफमात्रे निषेधः । तथा यातः शनैः कृत्स्नमहो रथेनेति प्रत्युदाहृतम् ।

२०. उपस्+बुध+कः, उषः+बुधः । अग्नेरन्यार्थे उषोबुधः । नाः+पतिः । रः खरः (१/३/३) इत्यस्यापवादोऽयम् । नार्कपाल, नार्कट नार्पतादयः । इह हि वृद्धे बहिरङ्गत्वादेद विसर्गस्याप्राप्तिरिति न्यासकृतः । वृद्धाविति किम् ? नाः पतिः, नारमाचक्षाणो नास्तस्य पतिरित्यर्थः । चतुः+थः । चतुर्+पूरणार्थे, षट्कति (५/४/१३२) इति थट् । विसर्गाभावो निपातनाच्चतुर्थीति ज्ञापनादित्यर्थः ।

२१. अहरादेर्व्वा पत्यादिषु ।

एषां पत्यादिषु परतो विसर्गस्य रो वा भवति । अहर्पतिः, अहस्पति, गीर्पतिः, गीष्पतिः ।

२२. भो-भगो-अघो अवर्णेभ्योऽचि लोपो वा ।

अचि परे भोः प्रभृतेर्विसर्गस्य लघुप्रयत्नतरो यो भवति लोपो वा । भोयत्र भो अत्र; भगोयागच्छ भगो आगच्छ; अघोयेहि, अघो एहि । अवर्णान्तां कयास्ते, क आस्ते, देवायिह देवा इह । कथं देवोऽत्रेति ? निरवकाशा हि विधयः सावकाशान् विधीन् बाधन्त इत्युत्वं भवति ।

२३. व्योश्च ।

क्वचिदेकदेशोऽप्यनुवर्त्तते इति । वदान्तेऽचि परे वकार-यकारयोर्लोपो वा भवति । ट इदम्, वटविदम्, द्वा आनय, द्वावानय; त आहुः, तयाहुः, तस्मा इदम्, तस्मायिदम् । इह वृक्षवृश्चमाचष्टे णौ विच् टिलोपः, वृक्ष आयाहि, वृक्षवायाहि ।

---

२१. अहः+पतिः, गीः+पतिः । अह⌣पतिः, गीः⌣पतिः, धूर्पतिः, धू⌣पतिः । धूष्पतिरिति प्रत्येकं पत्यादेः रूपत्रयमुदाहृतमन्यैः । कस्कादित्वादेषु दन्त्य-मूर्द्धन्यौ वा । आदिशब्दात् भुवर्लोकः, धूर्पुत्रो वा । स्वर्पतिः, स्वः पतिरित्यपि केचित् ।

२२. अत्र वाशब्दस्य विकल्पार्थत्वे रूपत्रयापत्तिः, अतः समुच्चयार्थोऽयं वा शब्दः एषां विसर्गलोपश्च भवतीत्यर्थः । लघु प्रयत्नतरमुच्चारणे स्थानकरणयोः शैथिल्यम्, तदिह स्वभावादवर्णाथ ईषत्पृष्टतरश्च, (अन्तस्थोयः) तेन रूपत्रयम्, सन्निपाते पुनरवर्णादीषत्स्पृष्टतर एव, तेन रूपत्रयम्. तन्न देवायु परवु पटायु तथा व्योर्लघुप्रयत्नतरः शाकटायनस्य (८/३/१८) लोपः शाकल्यस्य (८/३/१९) ओतो गार्ग्यस्य (८/३/२०) इति पाणिनीसूत्राणि । एतदुक्तं भवति, यथा चायम यत्नसाध्य ईषत्स्पृष्टस्तथेषत्स्पृष्टतरोऽपि । अयं स्वरात् सौराष्ट्र एव दृश्यते सर्व्वादेश इति । देवोऽत्रेति तदितरविषयाविषयत्वं निरवकाशत्वम् । उक्तविधेरकारमन्तरेणाश्चः अनिमित्तमन्यन्नास्ति, अस्य तु विधेः सर्व्वाजेव निमित्तमिति सावकाशत्वम्, तेन लोपयकारौ न स्याताम् ।

२३. नन्वेकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निर्वृत्तिरति न्यायाद् भोः प्रभृतेरेवानुवृत्तिरुचिता तत् कथमवर्ण एवानुवर्त्तत इत्याह क्वचिदित्यादि । यावत् सम्भवस्तावद् विधिः (६९ परि०) इति न्यायमूलमिदम्, भोः प्रभृतेरुत्तरौ व्यौ न स्याताम्, कथन्तयोर्लोपः कार्य्यः ? यत् पुनरस्ति यकारस्तस्य सम्भवस्तस्य लोपे तद्विधे वैयर्थापत्तेः ? अतः परसवर्णोऽनुवर्त्तत इत्युपस्कार्यम् । अनन्तरस्यविधिः प्रतिषेधो वा (२५ परि०) इति लोप एवानुवर्त्तते नान्यः - मण्डूकप्लुत्या पूर्वतरविधेर्वाशब्दः संगच्छते परसूत्रे नित्यग्रहणार्थम् इत्यादि । अश्वयुजमाचक्षाण इति वाक्ये पूर्व्ववर्णादौ कृते अश्व आयातीत्यादि ।

२४. **हशि नित्यम् ।**

हशि परे भोप्रभृतेर्विसर्गस्य व्योश्च नित्यं लोपः स्यात् । भो गच्छ, भगो गच्छ, अघो याहि, देवा गच्छति । व्योश्च—वृक्ष याति । देवो यातीति उत्वविधेर्निरवकाशत्वात् । हशीति किम् ? भोः पाहि, वृक्षव्करोति । व्योरिति निवृत्तम् ।

२५. **तदेतरोः सोरकोरन ञ् समासे हलि ।**

एतयोरककारयोः सोः सम्बन्धिनो विसर्गस्य हलि परे लोपः स्यात् । स कर्त्ता, एष याति । क्वचिद् वेत्येके "सो वा भवेत्" "एषो हनुमान्"। अकोरिति किम् ? सको राजा, एषको याति; अनञ्-समास इति किम् ? असो वा, अनेषो वा, हलीति किम् ? सोऽयम् ।

२६. **वा शरि खर्परे ।**

खर्परे शरि परतो विसर्गस्य लोपो व स्यात् । कश्च्योतति, कःश्च्योतति, कःष्ठीवति, कस्तम्भः, कः स्तम्भः । खर्पर इमि किम् ? कः स्वरः ।

२७. **शरि शर् ।**

शरि परे विसर्गस्य सदृशतमः शर् वा स्यात् । कश्शेते, कः शेते; कश्शम्भुः' कः शम्भुः; कस्साधुः, कः साधुः ।

२८, **च छे शः. सोऽप्यनन्तस्य ।**

चछयोः परतो विसर्गस्य सो वा स्यात् । कश्चरति, कः चरति; कश्छात्रः, कः छात्रः । "अपदान्तस्य सस्य च नित्यमेकपदे" वृश्चति ।

२९. **टेठे षः ।**

टे-ठे परतो विसर्गस्य षोवा स्यात् । कष्टीकते, कः टीकते; कष्ठकारः, कः ठकारः ।

---

२४. विशेषातिदिष्टः प्रकृतं न बाधत (२७ परि०) इति न्यायाद् विसृष्टोऽपि कार्यत्वेनादधार्य्यत इत्याह विसर्गस्येति ।

२५. इह विप्रतिषेधे (१/१/३४) इति जिह्वामूलीयो न भवतीति सूचयतीति न च वाच्यम्, निरवकाशत्वात् स एव न्यायो न्याय इति । तदेतद् विषयत्वेनास्यापि तथात्वात् । क्वचिदित्यादि शिष्टप्रयोगार्थम् । तदेतदोरिति किम् ? सो वर्णः, सोऽत्रः दन्तसकार एव ननु तद् शब्द निष्पन्नः, इष्+अच एषः, एषो वर्त्तते । सोरिति किम् ? तैर्गतम् ।

२६. खरपरो यस्मादिति बहुव्रीहिर्न तत्पुरुषः अन्वयापत्ते., न वाच्यम् खरीत्युक्तेऽप्यीष्टलाभोपपत्तेः, किङ्कार्यं परग्रहणेनेति ? विपर्य्योऽपि स्यात्, यःस्तोत्रख्यातवीर्य इति दशरथस्फुट-वीर्य्यलक्ष्मीः, तातं स्वस्थं शृणोमि, तर्हि कथं प्रत्याख्यातमाचार्यैः ।

२७. इह समसंख्यानानुदेशिनामनुदेशो यथाक्रमम् (१/१/२१) इत्यत्रोद्देशित्वं तत्तद विधिविषयत्वमित्युक्तमतोऽर्थकृतं यथाक्रममिदमतोऽपिस्थाने सदृशतमोऽव्यक्तयोगे (१/१/३२) इति विधेरविषयत्वात् पूर्व्वोक्तस्यैव तात्पर्यमिदमुक्तवान् सदृशतम इति ।

२८. ननु पदान्तसकारो विसर्ज्जनीय एवापद्यते, ततः कथमन्तस्येत्युक्तम् ? सत्यम्, सुखप्रतिपत्त्यर्थमेव मन्दबुद्धीनाम् । नित्यमेकपदे, सहितैकपदे नित्यतास्यैव

२९. स्वरसः । टीकत इति टीकृ गतौ भूवादावात्मनेपदी ।

३०. तथे सोऽसपरे ।

त-थे परतो विसर्गस्य सो वा स्यात् । कस्तपस्वी कः तपस्वी । कस्थकारः, कःथकारः असपर इति किम् ? कत्सरुः ।

३१. नश्चामस्य चादौ तथैवातुकि ।

चे-छे टे-ठे, तथे परतोऽमस्य नस्य च तथैव श-ष-सा भवन्ति । भवांश्चरति, भवांश्छादयति, भवांष्टीकते, भवांष्ठकारः, भवांस्त्यागी, भवास्थुडति, अमस्येति किम् ? प्रशान् चिनोति । अतुकीति किम् ? भवाञ्च्छेदते । अपसर इत्येव-भवांन्त्सरुः ।

३२. कानि कानः सः ।

कानि परे कानितस्य नकारस्य सः स्यात् । स्थानित्वात् सस्य विसर्गो नेष्यते । कांस्कान् ।

३३. पेनॄ नः ।

पकारे परे 'नॄ न्' इत्यस्य नस्य सः स्यात् । नॄंस्पाहि ।

३४. मः सुटि ।

सुटि परे समो मस्य सः स्यात् । संस्कर्त्ता "सुटि सलोपो वा"—संस्कर्त्ता ।

३५. पुमः खयखर्परे चुट्वोस्तु शषौ ।

खरि परे पुमो मस्य सः स्यात् । च छे, ट ठे तु, शषो भवतः । अनेनात्र प्रकरणे विसर्गस्याकरणं प्रत्येतव्यम् । पुंस्कामा, पुंस्त्वम्, पुंश्च ा प्रष्टीकः । अखर्पर इति किम् पुंक्षीरम् । खयीति किम् ? पुंशरः ।

---

३०. सः परो यस्मात् स तथा, ततो नञ् समासः ।

३१. च समुच्चये, य केवल विसर्गस्य नस्यापीत्यर्थः । अमस्येति अविद्यमानो मः, प्रकृतित्वेम यस्य स तथा । तथैवेत्यख्यन्तनव्ययम्, सादृश्यार्थे यथैव रामेण हतो दशास्य तथैव शत्रून् विनिहातयामीतिवत् । प्र+शम्=क्विप् (२/३/८८) इति दीर्घः, (२/३/१००) इति मस्य न् ।

३२. द्वितीया बहुवचनान्तं पदं । द्विरुक्तमध्याहार्य्यम्, तेन वृषान् कोन्नेष्यसि ग्राममित्यत्र न स्यात् । कानाम्रेडिते (८/३/१२) पा०) कानोऽभ्यासस्येति श्रीपतिः । ननु नस्य से कृते विसर्गः कथं न स्यादित्याह स्थामिवत्वादित्यादि । कांस्कान् । कांस्कानिति, द्वैरुप्यम् ।

३५. पुम इति पुंसः सकारादवशिष्टो योभागस्तस्यायं निर्द्देशः, सकारस्य संयोगान्ते लोपे कृते तस्यैव कार्यत्वात् । अखर्पर इति बहुव्रीहिगर्भो नञ् तत्पुरुषः । तु वाक्यभेदे सामान्यतः खयि प्राप्ते च छ ट ठ योः श ष्यौ भवत इति विद्यते । इदमेव विसर्गाभावं प्रति ज्ञापकमूरी कुर्व्वन्नाह, अनेनात्रेति । अन्यथा विसर्गस्य चछटठेषु शषौ सिद्धावेव । यदुभयोर्विकल्पित्वान्नित्यार्थेऽयं भविष्यतीति चोदयन्ति तन्न श्रद्धेयम् । व्यवस्थितविभाषया नित्यत्वं स्यात् ।

३६. **अत्र नमः प्रागनुनासिकोऽनुस्वारो वा ।**

अत्र सादि प्रकरणे नकारमकाराभ्यां प्रागनुनासिकोऽनुस्वारो वा भवति । भवाँश्चरति, भवांश्चरति, पुँस्कामा, पुंस्कामा । पदान्त इति निवृत्तम् ।

अथ षत्वप्रकरणम्

३७. **इच्-कुरो नुम्विसर्गव्यवायेऽपि सः षः प्रत्ययादेश-शासि-घसि-वसामपदान्त-साताम् ।**

इच् क-वर्ग-रेफयोः परस्य प्रत्ययादीनां सकारस्य षो भवति । अग्निषु, वायुषु, पितृषु, गोषु, वाक्षु क्रुङ्क्षु, वार्षु । "ल्व्याच्च" ल्व्यात्-ल्, व्, य्-हल्षु, वृक्षव्षु, खयषु । आदेशस्य—सिषेच, सुष्वाप । अचतवर्गपराः सादयः षोपदेशाः, स्वि, स्विदि, स्वदि, स्वञ्जि, स्वपयश्च, सृशि, सृजि स्पृपि, स्त्या, सेक्, सृ, वर्ज्जमिति । तथा च सूच-सूत्र-स्तन संग्राम साम सभाज स्तेन स्तोमानामषोपदेशत्वम् । शासि घसि वसां-शिष्टम् जक्षुः, उषितम् । नुमादिव्यवायेऽपि—सर्पींषि, सर्पिःषु । परत्वात् षत्वे कृते विसर्गस्य "शरि शर" सर्पिष्षु । नेह निस्से । अपदाद्यन्त साता मिति किम् ? पदादेः-दधिसेकः, यंतिसे, पदान्तस्य—असिस्तर । सात्—अग्निसात् । इच् कुर इति किम् ? दास्यति, श्रेयांसि, पयःसु । टाश्चापदान्ते सः ष इति वक्तव्यम् । रारट्षि, पाणिनीये टुत्वं रारट्टि ।

---

३६. भवान्+चरति । अत्रेति ग्रहणं नकारमकारादेशाभ्यां सहानयोर्यौगपद्यप्रतीत्यर्थम् । अन्यथा यत्रैव न-मयो कार्य्यं तत्रैवेतौ प्रवर्तेतामित्याशङ्क्यते । वाऽत्र समुच्चये । पदान्त इति निवृत्तमित्यधिकारस्येष्टविषयत्वादिति शेषः ।

३७. इच्च कुरश्च रचेति समाहारे द्वन्द्वः व्यवाये नुम्-विसर्गाभ्यां निमित्तस्य व्यवधाने कृतेऽपि । अपिशब्दादव्यवहिते कार्य्यं व्यवहिते नेष्टमिति गम्यते । अथेहादेशत्वादेष घसे षत्वं सिध्यति तत् किं घसि ग्रहणेन ? न च वक्तव्यम्, घस्लृ अदन इत्यस्य भविष्यति तस्य मरग्विषय एवं प्रयोग नियमात्, इतरथा लिटि वेत्यनर्थकं स्यात्, समानार्थयोरत्तिघसत्योरुभयरूपसिद्धेः, नैतदस्ति आदिश्यत इत्यादेशः सकार एवादिश्यते तत्रैव षत्वम्, यत्रान्येन सहादेशस्तत्र न स्यात् । यथा राजपत्न्यासितस्रः । अपरे तु समस्तादेशानां शासि-घस्योरेव सःष इति नियमार्थमिदं ग्रहणमिति व्यचक्ष्यते । वार् जलम्, ल्वाच्चेत्यपरो योगः । अन्ये तु अन्तस्थाद् य-व-लकारादपि षत्वमीयुः । यथा मूलव्षु । तत्रोप्युपलक्षण-व्याख्यानात्तदिष्यते । इदानीं केषां धातूनामादेशः सकार सम्भवतीति दर्शयन्नाहाच्तवर्गेत्यादि । अच्च तवर्ग परत्वं धातोरेव प्रसज्जते, न तु तस्य । तथापि सविशेषणे—(2 परि०) इति न्यायाद् विशेषणस्यैवाच्-तवर्ग परत्वमन्वीयते ।

३८. **स्तौतिण्योरेव सनः षत्वेऽभ्यासादसहस्वदस्विदाम् ।**

सनः षत्वे सति स्तौतेर्ण्यन्तानाञ्च अभ्यासादिचः परस्य (सस्य) षत्वं स्यात् । तुष्टूषति, ण्यन्तान्तं-सिषेवयिषति, सिष्वञ्जयिषति । असहादेरिति किम् ? सिसाहयिषति, सिस्वादयिषति, सिस्वेदयिषति । नियमः किम् ? सिसिक्षति सुसूषते । षत्व इति किम् ? इह नियमो मा भूत, सुषुप्सति, तिष्ठासति ।

३९. **ह्रस्वात्तसि तालितद्धितयोरतिङः ।**

पदान्तार्थं वचनम् । तसौ तादितद्धिते च परे ह्रस्वात् परस्त सस्य षत्वं स्यात् । सर्पिष्टः । वपुष्टः । ह्रस्वादिति किम् ? गीस्तः धूस्तः, अतिङ इति किम् ? भिन्द्युस्तराम् ।

४०. **निसस्तपतौ सकृत्सेवने ।**

तपतौ परे निसः षत्वं स्यात् । सकृत्सेवनञ्चेत् । निष्टपति सुवर्णम्, निष्टापः । सकृत्सेवन इति किम् ? निस्तपति सुवर्णं स्वर्णकारः, पुनः पुनर्धमतीत्यर्थः ।

४१. **अम्बादेः स्थस्य ।**

पदाद्यर्थोऽयमारम्भः । अम्बादेः परस्य स्थस्य षत्वं स्यात् । अम्बष्ठः, आम्बष्ठः गोष्ठम्, गोष्ठः । संज्ञायामेव, अन्यत्र गोस्थः । भूमिष्ठः, सव्यष्ठः, अपष्ठः । अम्ब, आम्ब, गो, भूमि, सत्य, अप, द्वि, त्र, कु, शेकु शङ्कु, अङ्कु, मञ्जि, पुञ्जि, परमे, बहिः, दिवि, अग्नि । प्रष्ठोऽग्रगामिनि स्थग्रहणान्नेह—गोस्थानम् । इतः पदादौ विधिः ।

४२. **वि-कु-शमी-परिभ्यः स्थलस्य ।**

एभ्यः स्थलस्य षत्वंस्यात् । विष्ठलम् कुष्ठलम्; शमीशब्दस्य संज्ञायां ह्रस्वः, शमिष्ठलम्, परिष्ठलम् ।

---

३८. एवकारोऽत्र नियमार्थः, सनः षत्वे सति स्तौतेणिजिन्तस्यैव च षत्वं नान्यस्येति नियमः । एव शब्दो हि द्विविधः, क्वचिदन्ययोगव्यवच्छेदकः यथा—पार्थ एवं धनुर्धरः, क्वचित् स्वयोगव्यवस्थापकः, यथा—शंखः पाण्डुरः एव । अत्रान्ययोगव्यवच्छेदको यद्यपि, तथापि सिद्धे सत्यारम्भो नियमाय (११ परि०) स्पष्टीकर्त्तुमयमेव शब्द प्रयोगः इष्टविषयत्वादवधारणस्य, अन्यथा स्तौतिणोः सन्येवेत्यवधारणं स्यात् । ततश्च तुष्टावेत्यत्र षत्वाभावः स्यात् । अभ्यासादिति किम् ? अभिषिषक्षतीह भवत्येव ।

३९. त्व-ता-तर-तम-प्रभृतय स्तादितद्धिताः ।

४०. सेवनं करणम् । तपताविति किम् ? निस्तक्ष्यति ।

४१. स्थस्येति स्वरूपस्यैव ग्रहणं, नतु स्थाधातो निष्पन्नमात्र-स्येति । अम्बवे तिष्ठतीति वाक्यम् । आम्बष्ठः स्वार्थेऽण् ।

४२. वीणां पक्षिणां स्थलम्, कौ पृथिव्यां कोर्व्वा । स्थलमिति वाक्यम् ।

४३. **कपिष्ठलो गोत्रे ।**
कपिष्ठलः स्यात् । गोत्रमादि पुरुषश्चेत् ।

४४. **निनदीभ्यां स्नातेः कौशले ।**
आभ्यां स्नातेः कौशले गम्ये षत्वं स्यात् । कार्य्ये निष्णातः, नदीष्णः, नदीञ्च इत्यर्थः ।

४५. **प्रतिष्णातं सूत्रे ।**
प्रतिष्णातं स्यात् सूत्रञ्चेत् ।

४६. **मातृपितृभ्यां स्वसुः । षष्ठयलुकि वा ।**
आभ्यां स्वसुः षत्वं स्यात् । मातृष्वसा, पितृष्वसा । षष्ठ्यलुकिवा,—मातुः स्वसा, मातुः ष्वसा ; पितुःष्वसा, पितुः स्वसा ।

४७. **सुविनिर्दुर्भ्यः सुपिसूतिसमानाम् ।**
एभ्यः सुप्यादेः षत्वं सूयात । सुषुप्तः, विषुप्तः, निःषूति, दुःषमम् । सुपीति निदशः किम् ? सुस्वपिति ।

४८. **विष्टारश्छन्दसि ।**
विष्टारः पंक्तिनामचछन्दः ।

४९. **अभिनिष्ठानो वर्णे ।**
स्यात् । स्तनतेर्रभिनिष्ठानो विसर्गाख्यो वर्णः ।

---

४३. कपिरिव स्थलः। लोके हि ये पुरुषा अपत्यसन्ततिप्रर्वातितारो यत्पूर्व्विकापत्य सन्ततिर्भवति ते गोत्रशब्देनाभिधीयन्त इत्याह गोत्रमादिपुरुष इति । गोत्र इति किम् ? कपिस्थल गिरिः ।

४४. कौशलं नैपुण्यम् । इह यद्यपि निनदीभ्यां स्नातेरेव षत्वं विधीयते, तथापि शिष्ट-प्रयोग एव शरणम् । तथाहि चारकर्म्मणि निष्णातः, आतिथ्यनिष्णाः, ततो-नदीष्णावित्यादि भट्टी ।

४५. प्रतिज्ञातं सुविशुद्धितमित्यर्थः । सूत्र इति किम् ? प्रतिस्नातं शिरः ।

४६. स्वपेः कृत्ययेत्यस्य ग्रहणम्, नतु, स्वपेः तथाहि, "सुपेः षत्वं स्वपेर्माभूत विषु-स्वापेति केचनेत्यादि" । सूतिरपत्यम् । दुर्निन्दिता समा यस्मिन् इति वाक्यम् क्तिष्ठद्ग्वादित्वात् समासः शोभनः समः सुसमो ग्रन्थः । सुषमादौ तु तत्पुरुषः ।

४८. छन्दसोऽन्यत्र विस्तारः पटस्य ।

४९. अत्रादिष्ठत्वात् पदादित्वाच्च षत्वेऽप्राप्ते वचनमिदम् । स्तन्+घण्, भूवादेर्न तु चुरादेरदन्ताद् घण् अभिनिस्समस्तपूर्वस्य न तु व्यस्तस्य (केवलमभिपूर्वस्य वा, केवलं निस्पूर्वस्यापि) यद्यप्यत्र वर्णपदेनसामान्यवर्ण एवोच्यते तथापि काशिका कर्त्तृ-गौरवयान्त्रतः (१)प्राह विसर्गाख्य इति । वर्ण इति किम्; अभिनिस्तानो गर्भिण्याः ।

तृतीयः पादः

५०. **विष्ठरो वृक्षासनयोः ।**
स्तृञो निपात्यते । वृक्षासने—विष्ठरो ।

५१. **समासेऽङ्गुलेः सङ्गुस्य ।**
षत्वं स्यात् । अङ्गुलिषङ्गो यवागूः । वाक्ये तु, अङ्गुलेः सङ्गं पश्य ।

५२. **अग्निष्टुदायुष्टोमाग्नीष्नीष्टोम; ज्योयिष्टोमाग्नीषोम - भीरुष्ठान - गविष्ठिर-युधिष्ठिराः ।**
अष्टौ निपात्यन्ते । अग्निष्टुत् क्विबन्तः ।

५३. **सुषामादिषु ।**

एषु षत्वं स्यात् । सुषामा, दुःषामा, सुषन्धिः, दुःषन्धिः, दुन्दुभिषेवणम्, परमेष्ठी, हरिषेणः, सुष्ठुः, दुष्ठुः दिविषदित्यादि ।

५४. **तुरादेः साढ़ः ।**

सहेः, साढ़्भूतस्य षत्व स्यात् तुराषाट्, जनाषाट्; साढ़ इति किम् ? तुरासाहो ।

---

५१. अङ्गुले सङ्गो यस्यां सा तथा । पक्षेऽङ्गुलिषङ्गश्च । वाक्ये त्विति तु शब्दो भेदे, वाक्ये न स्यादित्यर्थः । क्वचिद् वाक्येऽपीति पाठः ।

५२. समास इत्यनुवर्त्तते । आयुषां स्तोम समूहो यत्र सः यज्ञ इत्यर्थः । अग्नीनां, ज्योतिषां स्तोमोऽत्रेत्यादि वक्तव्यम् । अग्निश्च सोमश्च इत ईदग्नेः (४/४/२०) इति दीर्घ निपातनस्येष्टविषयत्वात्तत्रैवायं विधिरिति । इह न स्यात्, अग्निश्च इश्च सोमश्च अग्नीसोमाः, अन्यत्राग्नीसोमो बुधभेदे । भीरोः स्थानम्, गवि वाचि स्थिरः, गोशब्दादस्मादेव निपातनात् सप्तम्या अलुक । युधि युद्धे स्थिरः । एतयोः संज्ञायामेव स्थिरस्य षत्वमित्यन्ये । समास इति किम् ? अग्निस्तुतं शृणोति, आयुस्तोमं वाञ्छतीत्यादि ।

५३. सुषामादौ स्वादेर्निमित्तात् सामादेः षत्वमित्यर्थः । शोमनं साम यस्य स सुषामा ब्राह्मणः, एवं निःषामा दुःषामा, निःषेधः, दुःषेधः इह न सोः पूजायामिति निषेध-बाधनार्थः । सूपसर्गपाठो निर्दुःशब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोऽयं सेधतेश्च सेधतर्गगताविति निषेधबाधनार्थः, परमेष्ठीति परमेस्थःकिन्, सप्तम्या अलुक । सु+स्था+कुः । सुष्ठुः दुर्+स्था+कुः, दुष्ठुः । एवं सव्येष्ठः । सव्येष्ठी । तथाच "स्था-स्थिनस्थूणामिति वक्तव्यमिति काशिका । हरिषेण इति प्रत्येकं नाम्नीति । ज्ञेयं तेन वायुषेणः भानुषेण इत्यादि । एतीति किम् ? त्रिस्रोता नाम्नीति । पृथ्वी सेना यस्य पृथुषेण । अक इति किम् ? विष्वकसेनः, एवमितो नक्षत्राद् वा इत्यवधेयम्, रोहणीषेणः, भरणीषेणः, रोहणीसेनः, भरणिसेनः मतभेदात् । दिवि+सद्=क्विप, सप्तम्याः (४/४/८) इत्यलुगिति । द्युषत् गोषाः, मृषाः, नौषेचिका, प्रतिष्णिका, इत्यत्र सुषामादेरायः ।

५५. **आसेवादड्व्यवायेऽपि ।**

सेवपर्यन्तं अड्व्यवधाने षत्वं वक्तव्म् । अभिषुणेति, अभ्यषुणात् ।

५६. **स्थादेरभ्यासव्यवाये चाभ्यासस्य च ।**

स्था-सेनय-प्रभृतेरासेवाद्ड्व्यवाये चाभ्यासस्य च षत्वं वक्तव्यम् । इजन्ताभ्यासादेश-सकारस्य षत्वे सिद्धेऽपि नियमोऽनिजन्तादपि यथा स्यात् । परितष्ठौ अभिषिषेणयिषति ।

५७. **उपसर्गात् सुवति-सुनोति-सो-स्तु-स्तुभ-स्था-सेनय-सञ्ज-स्वञ्जाम् ।**

प्रादिस्थानिमित्तादेषां षत्व स्यात्, परिषुवति, पर्य्यषुवत्, अभिषुणोति, अभ्यषुणोत्, परिष्यति, परिष्टौति, पारिष्टौभते, अधितष्ठौ, सेनया अभिमुखं याति अभिषेणयति, अभिजयति, परिष्वजते । इच् कुरइत्येव प्रसुवति, प्रस्तौति ।

५८. **सेधतेरगतौ ।**

प्रादिस्थनिमित्तात् सेधतेः षत्वं स्यात् । निषेधति । अडभ्यासव्यवधानेऽपि—न्यषेधत्, निषिषेध । अगताविति किम् ? अनुसेधति गां गोपः । शया निर्देशान्नेह—निसिध्यति ।

५९. **सिचेरयङि ।**

प्रादेः सिचेः षत्वं स्यात् । अभिषिञ्चति, अभिषिञ्चति । अयङीति किम् परिसेसिच्यते, प्रसज्यप्रतिषेधोऽयम्, तेन उभयसकारस्यैव निषेधः, अप्रादेश्च न सेसिच्यते ।

---

५५. सेवादिति सेवोऽदन्तोऽनुक्तक्रियते, सेवतेरित्यत्र सेनयवत् शतिलोपश्छान्दसः, तथाच पठन्ति—छन्दोवत् सूत्राणि कवयःकुर्व्वन्तीति । ६४ सूत्रपर्यन्तमस्य विषयः ? इजन्ता इत्यादेः परं नियमो विधि, अषोपदेशस्य सस्य षत्वर्थञ्चात आह अनिजन्तादपि यथास्यादिति, अभ्यासस्येति वचनन्तु नियमार्थम्, स्थादिष्वेवाभ्यासव्यवाये सकारस्यः षत्वम्, नान्यत्र, अभिसुषुवति परिसिषासति ।

५६. प्रादिस्थनिमित्तादिति, एतेनोपसर्गस्य मूर्द्धन्यनिमित्ते तात्स्थ्यादुपचारेणोपसर्गशब्दो वर्त्तत इति दर्शयति ।

५७. भवति हि तात्स्थ्यात् तच्चिन्त्यम् । यथा मञ्चाः क्रोशन्तीति । उपसर्गादिति किम् ? दधि सिञ्चति । निर्गताः सेचका यस्मात् स निःसेचको देशः । नायं सिचेरुपसर्गः, धात्वन्तरं प्रति क्रियायोगत्वात् । अभिसावकीयति, परिसावकीयति अत्रापि सुनोतिं प्रतिक्रियायोगः, किन्तर्हि ? सावकीयतिं प्रति ।

५८. सेधतिरत्र भौवादिको नतु सिध्यतीति दैवादिकः ।

५९. प्रसज्यप्रतिषेधोऽयमिति, ननु प्रसज्य-पर्य्युदासभेदात् नञ् तावद् द्विविधम्, तथाहि, अप्रधानं विधेर्यत्र पर्य्युदासे-प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् । प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्य्युदासः स विज्ञेयो यत्रोत्तरे पदेन नञ् । तत्र प्रसज्यनञः क्रियान्वयित्वात् सापेक्षत्वम्, कथन्तेन समासः ? न च वक्तव्यम् । सापेक्षतायामपि समासस्य दृष्टत्वादिहापि भविष्यति

६०. **सवेरप्रतेः ।**

प्रादेः सदेः षत्वं स्यात । निषीदति, न्यषीदत् । अप्रतेरिति किम् ? प्रतिसीदति ।

६१. **स्तम्भेरुपाच्चाचङि ।**

स्तम्भेरिजन्तात् प्रादेरुपाच्च षत्वं स्यात् । विष्टम्नाति, विष्टम्भः, उपष्टम्भः । अचङीति किम् ? व्यस्तम्भत् ।

६२. **अवात् सामीप्यालम्बनयोः ।**

अवात् स्तम्भेः षत्वं स्यात् । सामीप्ये —अवष्टभ्या सेना; आलम्बने—अवष्टभ्य दण्डं स्थितः, नान्यत्र, अवस्तब्धः शीतेन ।

६३. **व्यवात् स्वनो भोजने ।**

आभ्यां स्वनः षत्वं स्यात् । विष्वणति भक्तम्, अवषस्वाण । भोजन इति किम् ? विस्वनति ढक्का ।

६४. **निविपरिभ्यः सेव-सित-सय-सिवु-सह-सुटामसोढः ।**

न्यादेः सेवादीनां षत्वं स्यात् । निषेवते, निषेवणम्, व्यषेवत, परिषिषेवे । आ

तस्य नियतत्वात् । तथा चोक्तम्—प्रतियोगिपदादन्यत् यदन्यं कारदकापि । अपेर्बहुलवाचित्वाद् वृत्तिस्तत्र तु नेष्यत इति । तेन नित्यकारकाभ्यामन्येना पेक्षितेन समासो विहन्यत इति ? सत्यम्, अभिधानात क्वचित्प्रसज्यनञापि समासः यथा असूर्य्यंपश्या राजदाराः, घञ्भावकारकयोरकर्त्तरीत्यादि । अथेह प्रसज्य-नञो निषेधप्रधान्यादुपसर्गस्थ निमित्तादभ्यासस्थ निमित्ताद्वा येन येन षत्व विधीयते तत्तदेवानेन निषिध्यते, पदादिषत्वप्रकरणे निषिद्धोऽपि तथैव भवितु-मर्हति, कथन्तद् विपरीतत्वम् ? सत्यमायुष्मन् ! भद्रमुक्तम्, नञस्तथैव वैभवं को नाम व्याहन्तुमीशः ? अतएव प्रादेश्च नेति वक्ष्यति ।

६०. सदः भौवादिकात् सीदादेशे रूपम् ।

६१. स्तन्भुः सौत्रो धातुः स चेत् सोपदेशस्तदा पदादौ षत्वम्, अथ तदन्यस्तदा विधि-मात्रम् । उपादित्यपाणिनीयम् । इजन्तादित्युपलक्षणम् । तेन निर्पूर्व्वस्य निष्टब्धश्चात्र इति ।

६२. अवादौर्जित्वे इति चान्द्राः श्रीपतिश्च । मल्लोऽरमवष्टभ्नाति उर्ज्जयतीत्यर्थः । अवष्टभ्यतेऽनेनावष्टम्भः सुवर्णम् । रघोरवष्टम्भमयेनेत्यार्षञ्चैतत् सुषामादौ द्रष्टव्यम् ।

६३. स्वनिरिह सशब्दभोजनार्थे । ढक्का विस्वनीति विरौतीत्यर्थः । क्रोष्टा डिम्बं विष्वणत्यस्वनच्चेति माघः ।

६४. सेवृ सेवने भू आ० । बन्धने षिञ् + क्तः, षिञ् + अप्, सयः, सिव + दि० प०

सेवादिति निवृत्तम् । सितः—परिषितः; सय---विषयः; सिवु---निषीव्यति; सह---बिषहते । अतो नाभ्यासस्य, अभ्यासादिचः परस्य षत्वं सिद्धमेव; परे सुट् सम्भवति—परिष्कुरु, परिष्कारः; असोढ़ इति हलन्तानुकरणत्वात् सोढ़रूपस्यैव निषेधः तेन—विसोढम्, परिसोढ़ ।

६५. **न्योदः सिवादि-स्तु-स्वञ्जां वाऽड्व्यवाये ।**

नि-वि-परिभ्यः सिवु-सह-सुट्-स्तु-स्वञ्जां अड्व्यवाये षत्वं वा स्यात् । न्यषीव्यत्, न्यसीव्यत्, व्यषहत व्यसहत, पर्यष्करोत् पर्य्यस्करोत्, न्यष्टौत्, न्यस्तौत्, पर्य्यष्वजत, पर्य्यस्वजत ।

६६. **परेः स्कन्देर्व्वेरनिष्ठायाम् ।**

आभ्यां स्कन्देः षत्वं वा स्यात् । परिष्कन्दति, परिस्कन्दति, वेरनिष्ठायामिति किम् ? विस्कन्नम्, विस्कन्नवान्, इह भवत्येव—परिष्कन्नम् ।

६७. **स्फुरस्फुलोर्निर्निविभ्यः ।**

एभ्योऽनयोः षत्वं वा स्यात् । निष्फुलति, निःस्फुरति, निःष्फुरति, विष्फुलति, विस्फुलति ।

६८. **स्यन्देर्व्वानुपर्य्यभिनिभ्योऽप्राणिषु ।**

एभ्यः स्यन्देः षत्वं वा स्यात्, विष्यन्दते, विस्यन्दते तैलम् । अप्राणिष्विति किम् ? परिस्यन्दते मत्स्यः ।

६९. **वे स्कन्भेर्नित्यम् ।**

अस्य नित्यं षत्वं स्यात् । विष्कभ्नाति, विष्कम्भः ।

७०. **प्रादुरुपसर्गाभ्यामस्तेर्योऽचोः ।**

आभ्यां यकारेऽचि परे अस्तेः षत्वं स्यात् । यि—प्रादुष्यात् अभिष्यात् ।

सह मर्षणे—सम्पर्य्युपादिति सुट् । अतो नाभ्यासस्येति सेवाभिविधिकत्वात्तदधिकारस्य परेः सुट् सम्भवतीति, तेन परेव सुटः षत्वं नान्यस्मात्तेन विस्किरः इति पारष्करादि निपातनादेव मूर्द्धन्य । असोढ़ इति, यत्रोकारढकारौ प्राप्नुत स्तत्रैव निषिध्यते ।

६५. सिवादीत्यादिशब्दात् सह-सुटौ गृह्येते । स्तु-स्वञ्जोः विभाषा ।

६६. स्कन्दिर (भ्वा० प०), इह भवत्येव, पृथग्योगविभागाद् विपूर्वस्यैव स्कन्दते निष्ठायान्न स्यात् । तेन परिष्कण्णमिति षत्वं स्यादेव, इह परिस्कन्दः प्राच्यभरते ष्विति स्कन्देरनिष्ठायां षत्वाभावो निपात्यते अपाणिनीयैः । प्रयुक्तञ्च भट्टिना, मेघनाथः, परिस्कन्दन्तमाश्वरिम् । अबध्नादपरिस्कन्दं ब्रह्मपाशेन विस्फुरन्निति न लक्षितं कस्य चिदाहृतत्वात् ।

७० अनुपसर्गत्वात् प्रादुः शब्दस्य पृथङ् निर्देशः । तस्य कृभ्वास्तिष्वेव प्रयोगात् । तत्साहचर्य्यादुपसर्गादप्यस्तेरेवाऽचोः षत्वं भविष्यति किमस्तेरिति ? न वाच्यम्, अनु-सूतेः क्विप् अनुसूः तस्य शुभ्रादित्वाट्टेयण् । आनुसेयः, अतो

अचि—प्रादुःषन्ति, अभिषन्ति । याऽचोरिति किम् ? परिस्तः । इच् कुर इत्येव, प्रस्यात् ।

७१. न सोः पूजायाम् ।

येषां सु-शब्दात् षत्वमुक्तम् तेषां पूजार्थे षत्वं नास्ति । सुसिक्तं सुस्तुतं त्वया ।

७२. अतेरतिप्रवृत्तौ ।

अतेः पूजायामतिक्रमणे च षत्वं नास्ति । अतिसिक्तं त्वया ।

७३. अपेः स्तोकार्थ-सम्भावनाऽन्वसर्ग-गर्हा-समुच्चयेषु ।

एष्वर्थेषु वर्त्तमानादपिशब्दात् परस्य षत्वं नास्ति । सर्पिषोऽपि स्यात् । सम्भावना योग्यता; अपि स्यात् पर्व्वते हरिः; अन्वसर्गः कामचाराऽभ्यनुज्ञा, अपिसिञ्च, अपि स्तुहि च, गर्हायां, अपि सिञ्चेत् पलाण्डुं विप्रः, अपि स्तुयात् वृषलम्ः समुच्चये अपिसिञ्च, अपि स्तुहि च ।

७४. प्रतिपर्य्यन्वभिभ्यो द्वितीयार्थेभ्यः ।

एभ्यो द्वितीयार्थवृत्तिभ्यः परस्य धातोरुक्तं षत्वं नास्ति । वृषलं प्रति स्थीयते,

---

मन्दधीः शङ्कते । इह प्रादुःष्यादित्यतः प्राक् षकार इत्यवधार्य्यम् । प्रस्यादित्यतः परम् प्रादुरासीदित्युदाहार्य्यम् ।

७१. सोरिति सूपसर्गादित्यर्थः, पूजेह धात्वर्थस्तुतिः । पूजायामिति किम् ? सुषेकः ।

७३. सर्पिषोऽपिस्यादित्यत्र स्तोकार्थेऽपिः । प्रादुरुपसर्गाभ्याम् (१/३/७०) इति प्राप्तं षत्वं निषिद्ध्यते । अपिस्यात् पर्व्वते हरिरिति योग्यतार्थेऽपिः, हरिरिन्द्र पर्व्वतं छिन्द्यादिति सम्भाव्यते, (१/३/७०) इति प्राप्त षत्वं निषिध्यते । कामचाराऽभ्नुज्ञा यथेष्टानुमतिः, अपिसिञ्च, अपिस्तुहिच, सिचेः (१/३/५६) उपसर्गात् (१/३/५७) इत्याभ्यां प्राप्तं निषिध्यते, इह धात्वर्थोऽनुमन्यते । अपि सिञ्चेत् पलाण्डुमित्यत्र धात्वर्थः कुत्स्यते । समुच्चय एकत्रानेक प्रचयः ।

७४. येष्वर्थेषु द्वितीया विधीयते त एव द्वितीयार्थाः लक्षणादयः, तेष्वर्थेषु प्रत्यादेर्वृत्तिविषयतया न पुनर्वाचकततया, तेषां द्योतकादित्वादित्यभिप्रायः । वृक्षं प्रतीति वृक्षोपलक्षणम्, तिष्ठतीति विद्युल्लक्षया । वृक्षं प्राप्य विद्युता स्थीयत- इति प्राप्तक्रियाजनितो लक्ष्य-लक्षणसम्बन्धो द्योत्यते प्रतिना, प्रथमतृतीययोरुदाहरणयोरुपसर्गात् (१/३/५७) इति प्राप्ते निषेधः । वृक्षं वृक्षंमिति सेचनक्रियां प्रति साध्य-साधनलक्षणणसम्बन्धो द्योत्यते परिणा, पदमाभीक्ष्ये (३/४/७४) इति वीप्सार्थे द्वित्वम् । तमनुस्तौतीति स्तुतिक्रियां प्रति साध्य-साधन लक्षणसम्बन्धो द्योत्यतेऽनुना "एषु लक्षण वीप्सेत्थं (२/२/१५) इति द्वितीया । मामभिस्यादत्र सत्तां प्रति साध्यसाधनलक्षण-सम्बन्धोऽभिना द्योत्यते,

वृक्षं वृक्षं परिसिञ्चति, तमनुस्तौति; मामभिस्यात् ।

७५. **सुञः स्यसनोः ।**

अनयोः सुञः षत्वं नास्ति । अभिसोष्यते, सनः क्विप्—अतिसुसुः ।

७६. **सिवुसहोश्चङि ।**

अनयोश्चाङि षत्वं नास्ति । पर्य्यसीसिवत्, व्यसीसहत् ।

७७. **सदि-स्वञ्जोः परस्य लिटि ।**

अनयोर्लिटि परस्य षत्वं नास्ति । विषसाद, परिषस्वजे ।

७८. **सुस्थादिषु च ।**

एषु षत्वं नास्ति । सुस्थः, दुःस्थः, प्रतिस्तब्धः, निस्तब्धः, परिस्थितम् ।

इति श्री पदमनाभदत्तकृतौ सुपद्मे व्याकरणे
प्रथमोऽध्यायस्य तृतीयः पादः

———

अभिना (२/२/१६) इति द्वितीया । अत्र केचन कातन्त्राः कर्म्मप्रवचनीयानां साक्षाद्धातुयोगो नास्तीत्यनुपसर्गता सिद्धैव, किन्तन्निमित्तकषत्वनिषेधलक्षणेति वदन्ति ।

७५. ननु स्तौति-ण्योः (१/६/३८) इति नियमात् सनि सुञः षत्वं न स्यादेव, किं सनि निषेधवचनेव्याह-सनः क्विबिति । अत्र सनः षत्व इति नियमात् क्विपि तन्नास्तीति प्रप्ते निषेधः क्रियते इति भावः

७८. एवं सुस्थितिः दुःस्थितिः प्रतिस्तब्धः । निप्रतिभ्यां स्तब्धस्येति श्रीपतिसूत्रात् । निपूर्व्वस्य निष्टब्ध इत्युक्तं प्राक् । यतः पुनः प्राङ् नाकमधितस्थुषीति रघौ तदत्र वा पठ्यते । उपसर्गप्रतिरूपको अधिशब्दः । अविहितनिषेधोऽत्रैव द्रष्टव्यः ।

इति तृतीयो बिन्दुलेशः ।

———

चतुर्थः पादः

णत्व-प्रकरणम्

१. **रषृभ्यो नो णः स्वर-कु पु-य-व हान्तरेऽप्यनन्तो नवर्ज्जमतुस्थः।**

र-ष्-ऋ-वर्णेभ्यः परः समानपदस्थो नकारो णो भवति। स्वरकवर्गादिव्यवधानेऽपि तीर्णम्, पुष्णाति, पितृणाम्। स्वरादव्यवधानेऽपि—करणम्, भीषणम्। स्वर-धर्मत्वात् विसर्गानुस्वारौ च स्वरौ—उरः केण, इत्यत्र एकाचीति णत्वम्। बृंहणम्। कु—अर्केण, मूर्खेण, गर्गेण, अर्घ्येण, शृंगेण। पु—दर्पेण, रेफेण, सर्व्वेण, दर्भेण, धर्म्मेण। य—कार्य्येण, सूर्य्येण। व—कुर्व्वाणः, ह—बर्हेण। अनन्त इति किम्! विप्रान् अतुस्थ इति किम्? कृन्तति, रुन्धन्, कुर्व्वन्ति। नवर्ज्जमिति किम्? नकारस्थो नो ण भवत्येव। क्षुण्णः, टुत्वे परनकारस्य णत्वम्।

२. **पूर्व्वपदात्संज्ञायामगः।**

पूर्वपदस्थ रषृभ्यो नो णः स्यात्। नारायणः। सूर्पणखा। संज्ञायामिति किम्? दीर्घनयना। अग इति किम्? ऋगयनम्। स्वरादिव्यवाय इत्येव, अर्द्धनसः। अतः पूर्व्वपदाद् विधिः।

३ **वनस्याग्रे-शारिका-मिश्रका-सिध्रका कोटरा-पुरगाभ्यः।**

एभ्यः संज्ञायां वनस्य नो णः स्यात्। अग्रेवणम्, शारिकावणम्, सिध्रकावणम्, कोटरावणम्, पुरगावणम्, इत्यादि। नियमः किम्? इन्द्रवनम्।

---

१. पुष्णातीत्यत्र टुना (१/२/६२) इति टुत्वेऽपि मूर्द्धन्यत्वम् स्यात्, किमनेनोदा-हरणेन? मैवम्, निरकाशत्वात् परत्वाच्चास्यैव विषयो नान्यस्येत्यदोषः। ह्रस्व ऋकारोदाहरणम् ऋणमिति। विसर्गानुस्वारयोः स्वधर्म्मता (१/१/१५) सूत्रटी-कायामुक्ता। स्वर एव धर्म आश्रयो यस्य तस्य भावस्तस्मात्। अतुस्थ इति, तौ तवर्गे तिष्ठतीति स्था+कः, ततो नञ् समासः नवर्ज्जमिति नकारव्यतिरिक्त-तवर्गस्थितो नो णो न स्यात्, एतदेव विवरिष्यति नकारस्थो नो णो भवत्येवेति बृंदृष्टेन नुचि च बृहणम्।

२. तात्स्थ्यलक्षणया तत्स्थनिमित्तमनेनोच्यत इत्याह पूर्वपदस्थरषृभ्य इति। शूर्प इति। (इव) नखमस्याः, दीर्घेनयने यस्या सा, ऋचामयन प्राप्तिर्यस्य ऋगयनं सुकृतं, अर्द्ध नासिका, यस्य।

३. वनस्याग्रे इति वाक्यम्। नैयायिकास्त्वत्राग्रे शब्दोऽधिकरण-प्रधानोऽव्ययस्तेन सह वा "अग्रे पारे मध्येऽन्तः" इत्यव्ययीभाव इति श्रीपतिराह। शारिकाधिष्ठितं वनम्, मध्यमपदलोपी समासः। मिश्रका वेश्याविशेषस्तदलकृतं वनं मिश्रकावणमित्यादौ

४.　**प्र-निरन्तः शरकार्ष्याऽऽम्रखदिरेक्षु-प्लक्ष-पीयूक्षाभ्योऽसंज्ञायाञ्च ।**

प्रादेः संज्ञायाञ्चासंज्ञायाञ्च वनस्य नो णः स्यात् । प्रवणम्, निर्वणम्, अन्तर्वणम्, शरवणम्, कार्ष्यवणम् । आम्रवणम्, खदिरवणम्, इक्षुवणम्, इत्यादि ।

५.　**वा वृक्षौषधिभ्योऽत्र्यधिकाचोऽतिरिकादेः ।**

वृक्षौषधिस्थनिमित्ताद् वनस्य नो णो वा स्यात् । शिरीषवणम्: गन्तारीवणम्, गन्तारीवनम् । ओषधेः—दूर्व्वावणम्, दूर्व्वावनम् । अत्र्यधिकाच इति किम् ? देवदारुवनम् । अतिरिकादेरिति किम् ? तिरिकावनम् । तिरिका, मिरिका, इरिका, हरिद्रा, तिमिरा, बिदारी, कर्म्माटः । स्वरादिऽव्यवाय इत्येव, शू(सू)रणवनम् ।

६.　**अह्नस्यापदन्तात् ।**

अदन्तस्थ निमित्तादह्नस्य नो णः स्यात् । पूर्व्वाह्णः पराह्णः । अदन्तादिति किम् ? निरह्नः ।

संज्ञायां णत्वं दीर्घश्च, तथापि सूत्रे दीर्घनिर्देश मन्दधियां सुखार्थः । नन्दनं कन्दसारं स्यात् मिश्रकावणमित्यपीति त्रिकाण्डशेषः । देवोद्यानानि वैभ्राजं मिश्रकं सिघ्रकावणमिति च । कोटरावणम्, पुरगावणमित्यत्र यथारुढ़ि संज्ञायाम् (४/४/४५) इति दीर्घः । अथपूर्व्वेणैवात्र सिद्धे णत्वे किमनेनेत्याह नियमः किमितं । एभ्य एव वनस्य णत्वं नान्येभ्यो, तेनेह न भवति शतपत्रवनम्, शतधारवनम् ।

४.　प्रादिभ्य परस्य वनस्य णत्वं, पूर्वस्य नियमत्वात् संज्ञायामप्राप्तमनेन विधीयते । असंज्ञायान्तु शरेक्षुशब्दावौषधिवचनौ ताम्यामन्ये वृक्षाः, तेन परेण विभाषितमनेन नित्यं विधीयते, उभयथापि विधिरयम् । प्रकृष्टं प्रगतं वा वनम् । निर्गतं वनं वनान्निर्गतं वा निर्वणम् । वनस्यान्तरवणम् (४-३/४) इति विभक्त्यर्थेऽव्ययीभाव इति काशिका । तन्मते वणमध्य इत्यर्थः । शराणां वनं, कार्ष्याणां वनं, आम्राणां, खदिराणां इक्षूणां, पीयूक्षाणां वनमिति षष्ठीसमासः ।

५.　निमित्तस्यात्र बहुत्वाद्व्यक्तिबहुत्वाद् वा बहुवचनम् । अत्र्यधिकाच इति त्रयाणामधिकस्त्र्यधिकस्तादशोऽच् यस्य तस्मादोषधिवृक्षाण्णत्वं स्यादित्यर्थः । जात्यपेक्षयैकत्वम्, तेन द्वित्रिस्वरेभ्यः ओषधिवृक्षेभ्य इति तात्पर्यम् । अत्र वृक्षवनस्पत्योरभेदतया प्लक्षवणमित्यत्रानेन विकल्पे प्राप्ते नित्यविधिरिति दूर्व्वावनमित्यत्र कातन्त्रपरिशिष्टकृता णत्वं न मन्यते, इदमोषीधत्वं नास्तीति प्रत्युदाह्रियते च । विदारीवनमिति प्रत्युदाहृत वर्द्धमानमिश्रैः । जिनेन्द्रबुद्धि दुर्ग-वामनादेरसम्मततत्वादभिषुक्तैरनुध्येयमिति । षष्ठी समासः सर्व्वत्रकार्य्यः ।

६.　दीर्घाह्नी, दीर्घहानावित्यादौ न स्यात्: । तपरकरणात् पराजितोऽह्नः इतिजिनेन्द्रः । पूर्वञ्च तदहश्चेति, परञ्च तदहश्चेति वाक्यम् ।

७. **वयसि त्रिचतुर्भ्यां हायनस्य ।**

वयसि गम्ये आभ्यां हायनस्य नो णः स्यात् । त्रिहायनो वत्सः, चतुर्हायणो गौः । वयसीति किम् ? त्रिहायनी शाला ।

८. **अयनस्य परादेरन्तरस्त्वदेशे ।**

परादेरयनस्य नो णः स्यात् । परायणम् पारायणम् । उत्तरायणम्, अन्तरयणम् । अदेश इति किम् ? अन्तरयनो देशः ।

९. **नियोऽग्रग्रामात् ।**

आभ्यां नियो णत्वं स्यात् । अग्रणीः, ग्रामणीः ।

१०. **वाहनस्याहितबाह्यात् ।**

अस्माद् वाहनस्य णत्वं स्यात् । दर्भवाहनो नरः, इक्षुवाहणो गौः । आहितष्बाह्यादिति किम् ? इन्द्रसम्बन्धिवाहनं इन्द्रवाहनम् । आहितादिन्द्रवाहणमेव ।

११. **पानस्य देशे ।**

पूर्व्वपदस्थनिमित्तात् देशे गम्ये पानस्य नो णः स्यात् । सुरापाणाः प्राच्याः; सौवीरपाणाः बाह्लीकाः कषायपाणाः गान्धाराः, देश इति किम् ? सुरापानो नरः ।

---

७. यत्त्विह पूर्व्वहायनादय इति केनचिल्लक्षितं तत् स्त्री-प्रकरणे क्रुञ्चादिगणे अदन्तं कृतणत्वं वक्ष्यते ।

८. परमयनं, परायणम्, आसक्तम् । अन्येषां इति दीर्घः । पारायणं साकल्यवचनम् ।

९. नियइति क्विबन्तस्य ग्रहणम् । अग्रे नीयते गणमत इति अनयोः किम् ? पूर्व्वनीः । क्विबन्तस्ये किम् ? ग्रामनीतः ।

१०. उह्यते येन तद्वाहनम् । निपातनादुपधादीर्घः, वहतीति वाहनमिति बा । आहितशब्देन वाहने यदारोपितन्तदुच्यते । अत्र क्तप्रत्ययस्यातीतवाचकत्वमविवक्षितं, तेनारोप्यमाणमपि, तेन यदा वाहनेनारोपितं भूमौ तदर्थं केवलमुपकल्पितं तदपि भवत्येवेति काशिका । उह्यते यत्तद्वाह्यम्, कर्म्मणि ण्यत् ततः कर्म्मधारयः । दर्भ उह्यते इक्षुरुह्यते येनेत्यर्थः । दूरादपावर्त्तितभारवाहणो इत्यत्राहितपदेन योग्यतापक्षो निरस्तः, सः पुनः सुखार्थ एव एकेनैव तदर्थप्रतिपादनात् ।

११. सुरापाणाः प्राच्या इति, पीयते यत्तत् पानम् (४/२/८४) इति कर्म्मणि टनः, सुरा पानं येषामिति बहुव्रीहि समासः । ननु च सुरापाणादयः शब्दाः प्राच्यादिदेशविशेषणीभूताः सन्तो मनुष्ये वर्त्तन्ते तत् कथं देशे वाच्ये णत्वमुच्यते ? उच्यते देशसम्बन्धद्वारेण चेन्मनुष्ये प्रवृत्ता एतावता देशपदेनाभिधीयते । यत्र तु तथा नास्ति तत्र णत्वं न स्यादित्याह सुरापानो नर इति नात्र देशसम्बन्धेन शब्दप्रवृत्तिः ।

१२. **वा भावकरणयोः ।**

अनयोः पानस्य णत्वं वा स्यात् । सुरापाणं वर्त्तते, सुरापानं वा । पीयूषपाणं वर्त्तते पीयूषपानं वा । करणे-पीयतेऽनेनेति पानः । क्षीरपाणः कंसः क्षीरपानो वा ।

१३. **गिरिनद्यादीनाञ्च ।**

एषां णत्वं वा स्यात् । गिरिणदी गिरिनदी । स्वर्णदी, स्वर्नदी । चक्रणदी, चक्रनदी । चक्रणितम्बा, चक्रनितम्बा ।

१४. **प्रातिपादिकान्त-नुम्-विभक्तीनामयुवादेः ।**

एषां णत्वं ला स्यात् । प्रातिपदिकान्तस्य—व्रीहिवापिणौ, व्रीहिवापिनौ । नुमः माषवापाणि, माषवापानि । विभक्तेः— तन्त्रवायेण, तन्त्रवायेन । अयुवादेरिति किम् ? विप्रयूना, प्रपक्वेन, अग्रगामिनौ, शास्त्रवाक्यानि, छात्रगोमिना । स्वरादित्र्यवाय इत्येव गर्दभवाहिनौ,

---

१२. अनयोर्भावकरणयोर्विहितो यष्टनस्तदन्तस्य पानस्येत्यर्थः । सुरापाणं वर्त्तत इति पीतिपानं, सुरायाः पानं सुरापाणं कर्म्मषष्ठी समासः, भावे (४/२/२/८६) इति क्लीबत्वम्, इतः परं भाव इत्यध्याहार्यम् । क्षीरपाणः कंस इत्यत्र कृदन्तस्य वाच्यलिङ्गता, गुण-द्रव्य-क्रिया-योगोपाधिभिः परागामिन इति न्यायात्, 'पीयतेऽनेनेति पानः, इतः परं क्षीरस्य पान इति पूरणीयम् ।

१३. यद्यपि पूर्व्वसूत्रे प्रथमान्तो नशब्दस्यापि षष्ठयन्तयात्र विपरिणम्यते, एतेनैतदुक्तं भवति गिर्यादेर्निमित्तात् णत्वं स्यात्, इहारब्धक्रमेण प्रतीयते, एषां नो णो स्यादिति ।

१४. अत्र द्वन्द्व समासे घ्यन्तस्याल्पाचः प्राङ् निपातो यद्यपि विहितस्तथापि व्यतिक्रमनिर्देशो ज्ञापयति प्राङ् निपातविधयो व्यभिचारिण इति अतस्तत्रैव व्यभिचारं वक्ष्यति । तथाहि प्रातिपदिकान्तनुम् विभक्तिषु चेति (पा० सू० ८/४/११) एषामिति, अतञ्चायञ्चेयञ्चेति वाक्ये पुमान् (४/३/९०) इत्येकशेषे इमे, ततः सम्बन्ध-विवक्षयैषामिति । यद्वा पूर्व्वपदादित्यनुवर्त्तते प्रातिपदिकान्तस्येत्यन्तशब्दोऽवयववाची । व्रीहिवापिणाविति शीलाभीक्ष्ण्ये (४/१/७३) इति णिन् । मासवापाणीति कर्म्मणोऽन् । तन्त्रवायेणेति तन्त्र + वा = ह् वावामः (४/१/१२२) इति क बाधकोऽण् । ननु गर्गभगिनीत्यत्र कथं णत्वं न स्यात् । णकारस्य प्रादिपदिकान्तत्वाभावात् । यदा तु गर्गाणां भगो गर्गभगः, सोऽस्यास्तीति गर्गभगिणी स्त्रियाम्, तदा मातृभोगिणवत् रषृभ्य इति णत्वेन वाच्यम् । यद्येवं माषवापाणीत्यत्र नस्य प्रातिपदिकान्तत्वाभावात् णत्वविकल्पो न स्यादिति चेन्नैवम् । स्त्रीप्रत्ययात् प्रागेव वापिन् शब्देन समासः ततः स्त्रीप्रत्ययः वस्त्रक्रीतीतिवत् । वक्ष्यति चेदम्, समासवचनं प्राक् सुबुत्पत्तेरिति, तत्रेयं व्याख्यासगतिः कारकोपपदानां कृद्भिः सह समासवचनं सुबुत्पत्तेः प्रागिति, नच वक्तव्यम्, सुपि सति तदन्तस्य पदत्वम्, तदभावात् कथमुत्तर-

१५. **एकाचि कुमतिचोत्तरपदे नित्यम् ।**

एकाच्युत्तरपदे कवर्गवति च प्रातिपदिकान्तादीनां तेषां नित्यं नो णः स्यात्, । एकाचि—वृत्रहणौ, क्षीरपाणि, क्षीरपेण । कुमति—पुष्पयोगिणौ, सर्वाङ्गाणि, नगरकाकेण, दक्षमखेण, वर्षभोग्येण । अयुवादेरित्येव, अग्रगामिनौ ।

१६. **उपसर्गान्नोपदेशहिनुमीनानिपाम् ।**

उपसर्गस्थ निमित्तादेषां णत्वं स्यात् । सर्वे नादयो णोपदेशाः—प्रणमति, वृति, नर्द्धि, नक्कि, नन्दि नटि, नाथृ (नाधृ), नृ—वर्ज्जम् । प्रणमति, परिनिणीषति, प्रणायकाः । नान्यार्थे प्रगतो नायको यस्मात् स प्रणायको देशः । णोपदेश इति किम् ? प्रनर्द्दति । हिनु—प्रहिणोति । मीना —प्रमीणाति । आनिप्—प्रवपाणि । स्वरादिव्यवाय इत्येव—प्रददानि ।

पदत्वमिहेति ? तत्र रूढ्याश्रयणात् । उक्तञ्च, न मासे परपदमुत्तरपदम्, तदन्यत् पूर्व्वपदमिति, स्वयञ्च वक्ष्यति सर्वान्तिमुत्तरपदमिति । अथोत्तरपदत्वात्प्रातिपदिकान्तत्वेन नुमोऽपि णत्व सिध्यति किं नुम्ग्रहणेनेति । ? मैवम् समुदायभक्तत्वात् नुम् उत्तरपदस्यान्तो न भवति, नापि विभक्तिग्रहणेन गृहयते तस्याटष्टकारकरणात्, (टकारस्य कारणात्) टिदनुबन्धादन्यस्य परभवत्वं नास्ति, आगमाः (परि० २१) इति न्यायात् । विप्रश्चासौ युवा चेति समासः । प्र+पच्=क्तःक्तेन प्रपक्वेन । अग्र+गम्=भविष्यति (४/१/८३) इति णिन् वच्+णत्=वाक्यम्, शास्त्रस्य वाक्यानि । गावो विद्यन्ते ऽस्येति गोमी, तदेव शीलमस्य छत्रादिभ्यो णः (५/३/२५१) इति णश्छात्रस्ततः कर्म्मधारयः ।

१५. समासान्तभूतस्य पदस्योत्तरपदमिति रूढ़ि यद्यप्येकाचां कुमताञ्च नित्यमिति सूत्रिते ऽपि सर्व्वमुपपद्यते तथापि विशेषणविशेष्यतयान्वयं प्रतिपादयितुमुत्तरपदमिति गृहयते सुखार्थम् । तेषामिति पूर्व्वपदव्याख्येयम् । व्रत्रहणाविति वृत्र+हन्=क्विप्, ईन्—हन् (२/३/८७) इति नियमान्न दीर्घः, तस्मादेव सूत्रात् । ङमः (२/३/८८) इति दीर्घो न स्यात् । क्षीरं पिबतीति कः । नित्यमपि माभूदित्युवादेरित्यधिक्रियते ।

१६. हिनुश्च मीनश्च आनिप्चेति द्वन्द्वः । णोपदेशो मूर्द्धन्यणकारादित्वोपदिष्टः । मिनोतरोऽस्तिलोपच्छान्दसः छन्दोवत् कवयः सूत्राणि कुर्व्वन्तीति वृद्धानुशासनस्मरणात् । आनिप् तु लोटः परस्मैपदोत्तमपुरूषैकवचनम् । अत्रोपसर्गस्थनिमित्तं लक्ष्यते, इत्याहोपसर्गस्थनिमित्तादिति । अधुना शिष्यान् शिक्षयिष्यन् विवृणोति सर्व्वं इति । नृती—दिवा०, टुनदि —भ्वादि०, नर्द्द कुत्सिते, नक्क धक्क नाशने, नट्—अवस्कन्दने चुरादि०, नाथृ—भ्वादि०, नृ-नये क्रयादि० नान्यार्थ इति । इह यत् क्रियाद्योतकाः प्रादयस्तान् प्रत्युपसर्गा इति न्यायादुपसर्गाभावात् णत्वं नास्ति । उपसर्गादिति किम् ? वृक्षं परिनयति, प्रनायको राजन्यः,

१७. नसश्च ।

प्रादिस्थनिमित्तान्नसो णत्वं स्यात् । प्रणसं मुखम् ।

१८. अनितेरन्तश्च ।

प्रादेरनो णत्वं स्यात् । प्राणिति । अन्तश्च—हे प्राण् ।

१९. उभौ द्विरुक्तस्य ।

द्विरुक्तस्यानितेरुभौ नकारौ णौ स्याताम् । प्रणिणिषति,

नामोपनिपातिनो नोपसर्गत्वादिति श्रीपतिः, न धात्वन्तरोपसर्गे, प्रगत इत्यादि, हिनोतिमीना त्योर्विकृतमपि गृह्यतेऽजादेशस्य स्थानिवत्त्वादेशविकृतम् (परि० ३) इति न्यायाच्च प्रहिण्वन्ति, प्रमीणीतः ।

१७. प्रादेर्नासिकाया नस् चेति (५/१/२९) वक्ष्यति तस्यैवेदं रूपम् न तु नसतेः पुनरुक्तत्वात् । ननूपसर्गण्णत्वं विधीयते प्राद्युपसर्गः प्राग्धातोरिति नियमस्तत् कथमत्रणत्वप्रसंग उपसर्गाभावात् ? सत्यम् क्रियाद्योतक उपसर्गः, क्रिया क्वचित्प्रत्यक्षा, क्वचित् तिरोहिता तत्रोभयक्रियासत्वे यत् क्रियाद्योतकाः प्रादयस्तान् प्रत्युपसर्गा इत्युक्तम् । अत्र तु गम्यमान क्रियाद्योतकत्वमेव सुबन्तात् प्रागुपसर्गस्य तत्स्मारकत्वेनात्राप्युसर्गत्वमिति । न च वक्तव्यम्, कथमेतेषु प्रादे प्राचीनस्थायित्वम्, सुबन्तात् प्रथमा, पूर्व्वं समास इति लक्षणात् । यद्वोपसर्गप्रतिरूपकमेवात्रोपसर्ग उच्यते, यथा—द्व्यन्तरुपसात्- (४/४/८८) इत्यादौ । प्रणमति प्रगता नासिका यस्मात्तथा, एवं दुर्णस निर्णसादयः ।

१८. अन प्राणने रुदादे (३/३/२७) इतीट् अन्तश्चेत्यनन्त इत्यस्यापवादोऽयम् । प्र+अन+क्विप्, (२/३/१०४) इति निषेधः । एवं हे पर्य्याण् । केचिदिह परे प्रतिषेधमिच्छन्ति पर्य्यानिति श्रीपतिः ।

१९. इह वृत्तौ प्रादिस्थनिमित्तादिति परिष्कृत्येह कृते द्विर्वचने तद्व्यवधाने तदितरस्य णत्वं न स्यादिति सूत्रमारभ्यते । ननु पूर्व्वनकारस्य पूर्व्वेणैव सिद्धे तदितरस्य द्विरुक्तस्यान्तसामर्थ्याणत्वम्भविष्यति किमुभावित्यनेन ? सत्यम् । द्विरुक्तस्य सूत्रमपवादकं सम्भाव्यते, यथादिको गुण इत्युत्सर्गः, ऊठो वृद्धिस्तूदपबधिका, ततस्तु साभ्यासे परस्यैव स्यादिति । अथानितेनकारोभयं द्विरुक्तिमन्तरेणासम्भवाद्विरुक्तस्येत्यर्थाल्लभ्यते तत् द्विरुक्तस्येति सत्यम्, सुखार्थमेव मन्दधियाम् । एवं प्रणिणत् । अथ कृतणत्वस्य द्विर्वचनेऽपीष्टलाभः किमनेन ? मैवं मंस्थाः, प्रणिनाय, प्रणीनीयतीत्यादिष्वपि णत्व प्रसङ्ग स्यात् ।

२०. **निस-निक्ष-निन्दाम् ।**

एषां णत्वं वा स्यात् । प्रणिंस्ते, प्रनिंस्ते । प्रणिक्षति प्रनिक्षति । प्रणिन्दति, प्रनिन्दति ।

२१. **हन्तेरतोऽन्तरस्त्वदेशे ।**

प्रादेर्हनोऽतो णत्वं स्यात् । प्रहणनं, प्ररिहण्यते । अन्तरस्त्वदेशे—अन्तर्हणनम् । देशेतु अन्तर्हनो देशः । अत इति किम् ? प्रघ्नन्ति, प्राघानि । अतुस्थ इत्येव—अन्तर्हन्ता ।

२२. **वमोर्वा ।**

व-मयोः परयोः हन्तेर्णत्वं वा स्यात् । प्रहण्वः, प्रहन्वः । प्रहण्मः, प्रहन्मः ।

२३. **कृतोऽचोऽभा-भू-पू-कपि-गमि-प्यायि-वेपाम् ।**

उपसर्गाद भादेरन्यधातूनां कृतो नः अचः परो णः स्यात् । अन, माना, अनीय, नीन् [नि, णिन्, इन्] निष्ठादेशेषु सम्भवः । प्रयाणम्, निर्यायमाणम्, प्रघाणीयम्, परिहणि, प्रधयिणौ, प्रहीणः । अच इति किम् ? प्रमग्नः । उपसर्गादित्येव—नरयानम् । स्वरादिव्यवाय इत्येव—प्रदानम् । अभादीनामिति किम् ? प्रभानम्, प्रभवनम्; प्रपवनम्, प्रकमनीयम्, प्रगमनीयम्, प्रप्यायनम् प्रवेपनम् । कृत इति किम् ? लोट्—प्रभाणि, इह भवत्येव ।

---

२०. इह वृत्तौ प्रादिस्थनिमित्तादिति परिष्कार्यम् इत्थं परतः परतो ज्ञेयम् । णोपदेशस्त्वमेषां वैचित्र्यार्थम् । धातुपारायणे तु कृत्येषां वा णत्वमपरत्र नित्यमिति व्याख्यातमेतदर्थमेषां णोपदेशत्वमतएव निसनिंक्षनिन्दां वा कृतीति श्रीपतिसूत्रम् ।

२१ हन्तेरित्यवयवयविसम्बन्धे षष्ठी । अत इति नकार न पुनरुपसर्गस्य व्याख्यानात् । अन्तरस्त्वदेशे इत्यन्तः शब्दश्च णत्वे इत्युपसर्गसंज्ञा कृता । तु वाक्यभेदे । सामान्यतः प्रसक्तावन्तरेण णत्वनियम्यते ।

२२. प्र+इन=लट् वस् मस् च । हन्तेर्नस्यैव णत्वं विकल्प्येते ।

२३. अच इति नकारविशेषणम्, न तु कृतः, व्याख्यानात् । इदानीं कृतां येषां नकाराणत्वम्भवति तान्दर्शयितुमाह । —अनेनेत्यादि=नन्द्यादेरनः । टनःकर्त्तरि रच । ल्यासश्रन्थादेरनः । इत्यभिविहितः खलर्थश्च । मान इति शान—कानयोरुपलक्षकः । यावत् सम्भवस्तावद् विधिः (परि० ६९) इति मकारः शानपक्षे, क्वचन तव्यानीयाविति विहितोऽनीयः । ग्ला, म्ना, ज्या, हाभ्यो निरिति निः । इदमुपलक्षणम्, तेन अनिरपि, यथा अप्रयाणिस्ते जन्मलाभः, इनिति निणिनोर्ग्रणम्, शीलाभीक्ष्ये—आवश्यकाधमर्णयोरित्यादिभिर्विहितः । रल्वादिविहितो निष्ठा नः । प्रवपनमिति पृञ्, नतु पूङ् धातुः ।

२४. णेर्वा ।

ण्यन्तात् कृतो नः, अचः परो णो वा स्यात् । प्रयापणम्, प्रयापनम् । प्रहापणीयम्, प्रहापनीयम् । अभादीनामित्येव—प्रभापनम् प्रभावनम् ।

२५. नोपधादिजादेरेव ।

इजादेरेव नोपान्ताद्धातो नोऽचो णः स्यात् । इन्ख—प्रेङ्खनम् । उन्भ—प्रोम्भणम् । इजादेरेवेति किम् ? प्रमङ्गनम् । कथं प्राङ्गणम् ? पृशादेरादिसिद्धेः ।

२६. हलादेरिजुपधाद् वा ।

इजुपान्ताद् हलादेर्धातोः कृतो नोऽचो णो वा स्यात् । प्रकोपणम्, प्रकोपनम् । निर्गूहणम्, निर्गुहनम् । हलादेरिति किम् ? निरूहनम् । इजुपधादिति किम् ? प्रवहणम्—नित्यं पूर्वेणैव ।

२७. णे-गद-नद-पत-पद-वहि-वपि-हन्ति-द्राति-घु-मा-या-शह-(शो) सो-चिञि-दिहि-वाति-प्सातिस्वङ्ङ्-व्यवायेऽपि, ।

एषु धातुषु परेषु उपसर्गादुत्तरस्य नेर्णत्वं स्यात् , प्रणिगदति, प्रण्यगदत्,

---

२४. भादेरन्यस्माण्ण्यन्ताद् धातोः कृतो नो णो वा स्यादित्येवं प्रकटयन्नाहाभादीनामित्यादि । प्र+भा=णिच्, प्वागभात् टनः प्रभापनमित्यादौ क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्तत इति टनः स्यात् । यद्वा सरूपोऽस्त्रियामित्यत्र बाहुल्यात् क्वचिदरूपोऽपि बाधकः स्यात् । णेरिति विहितविशेषणा पञ्चमी, तेन प्रयाप्यमाणमित्यत्र य व्यवधानेऽपि णत्वं स्यात्, नन्वन्तरङ्गसामर्थ्यादेव विकल्पो भविष्यति किं वेत्यनेन ? मैवम्, विपर्य्योऽपि सम्भाव्यते । अयं नित्यः, पूर्व्वो विधिर्विकल्पित; इति ज्ञापनार्थम् ।

२५. एव शब्दो यद्यपन्ययोगव्यवच्छेदकः स्वयोग्यताव्यवस्थापकश्च दृष्टस्तथाप्यत्रान्ययोगव्यवच्छेदक योग्यत्वात् । ननु सिद्धे सत्यारम्भो नियमार्थ (परि० ७७) इति न्यायादेवशब्दभावेऽपि, पूर्व्वहन् (२/३/३६) इतिवन्नियमो लभ्यते, तत् किमेवग्रहणेन ? सत्यम्, तत्स्पष्टीकारक एवशब्दः, इत्थमन्यत्रापि वेद्यम् । नन्विह नोपधत्वं क्वचित् सम्भवति क्वचिदाहार्यम् यावत्सम्भवस्तावाद् विधिः (परि० ६९) इति न्यायात्, ततश्च यत्र कवर्गपञ्चमत्वं पवर्गपञ्चमत्वं वा नकारः प्राप्नोति इत्येवायं योगो नियमत्वादन्यथा विधित्वापत्तेः । न च वक्तव्यमिष्टापत्तिरिति व्याप्तेर्नन्यायादित्याह स्वरादिव्यवाय इत्येवेति । अथानिजादित्वात् कथमङ्गतेःकृन्नोणत्वमित्याह कथं प्राङ्गणमिति, सिद्धान्तयति पृषोदरादिसिद्धेः, अत्र वर्णविकारस्य सिद्धे मूर्द्धन्यणकारस्य सिद्धिरित्यर्थ; । आ अङ्गन्ति जना अत्रेत्यंगनम्, अत एवादेङ्गेरणश्चेति श्रीभोजः । शबरस्वामी तु दन्त्यान्तं पठति ।

२६. इच् उपधा यस्य इजुपधस्तस्मात् ।

२७. अड्व्यवायेऽपीति, अथटिदागमः परवदिति न्यायादरो धातुग्रहणेनैव ग्रहणम्, ततः

प्रणिद्राति । घु-प्रणिददाति, प्रणिदधाति । मा-माङ्-मेङ्गम्-मा-प्रणिमाति, प्रणिमिमीते, प्रणिमयते । दिह्-प्रणिदेग्धि । प्रणिप्साति ।

२८. **शेषे वाऽकथादावषान्ते च पाठे ।**

शेषे कथादिषान्तवर्ज्जिते धातौ परे नेर्णत्वं वा स्यात् । प्रणिपचति, प्रनिपचति शेष इति किम् ? प्रणिननाद, अकथादाविति किम् ? प्रनिकर्त्ता, प्रनिचखाद, अषान्त इति किम् ? प्रनिपिनष्टि । पाठे षान्तस्य निषेधादिह भवति—प्रणिवष्टि ।

२९. **निर्विण्णः ।**

कृन्नो णत्वं निपात्यते

३०. **नशेर्नषत्वे ।**

नशेः णत्वे णत्वं नास्ति । प्रनष्टः । षत्व इति किम् ? प्रणाशः ।

३१. **षात् पदान्तात् ।**

पनान्तषकाराण्णत्वं नास्ति, निष्पानम्, दुस्पानम्, दुःखेन ।

३२. **अनाङ् पदव्यवायेऽपि ।**

आङोऽन्यपदस्य व्यवधाने णत्वं नास्ति, रोषभीममुखेन, प्रविषानम्, प्राह्वयानम्, अनाङ् इति किम् ? पर्य्याह्णम्, निराणद्धम् ।

किमनेन ? मैवम् ?, तत्र परशब्देन प्रत्ययोऽभिधीयते, न पुनः परमात्रम्, तेन व्यवधानेऽपि णत्वविधिर्विधीयते, इति कातन्त्रस्तु । अड्धात्वादेरित्यादिग्रहणाद-वयवत्वं मन्वाना मैवं विदधति, स्यतीतिशतिरन्तं निर्दिशन्ति च । चर्करीतान्तेन, णत्वाभावात् प्रणिसास्यतीत्यादौ, अन्यत्र भवत्येव प्राणिजागदितीत्यादे, चन्द्रगोमी तु सोऽइत्येव निरदिक्षत् । एष्वित किम् ? प्रणिभवति ।

२८. अत्राप्युपसर्गादिति वर्त्तते । पाठग्रहणाद् भूतपूर्वेष्वपि व्यावृत्तिः प्राणिचकारे-त्यादावेतन्मनसि कृत्योदाहरन्नाह प्रणिचखादेति ।

२९. निर् पूर्व्वात् विद्यते विद्यत्तेर्विन्दतेर्वा क्ते रूपम् ।

३०. प्रनष्ट इति रधादेर्वेट्त्वान्निष्टायामनिट् । ननु षत्वे सति णत्वं निषिध्यते, यत्र शकारस्ययैवादेशान्तरं क्रियते तत्र कथं न स्यात् ? सत्यम्, भूतपूर्वस्तदुपचारः (परि ६५) इति न्यायातत्रापि निषेधः स्यात्: । यथा प्रनङ्क्ष्येति ।

३१. निरपूर्व्वस्य पिबतेः पातेर्व्वा रूपम् । दुःखेनेत्यकाचीति प्राप्ते निषेधः । पदे अन्तः पदान्तोऽयमिति सप्तमीसमासोऽयम्, तेनेह न । नणत्वनिषेध—सुसर्पिष्केण ।

३२. न आङ् अनाङ्, तच्च तत् पदञ्चेति कर्म्मधारयः, तेन व्यवहिते सतीत्यर्थः । एतदेव विवृणोति आङोऽन्येत्यादि । रोषेण भीमं मुखं यस्य स तथा । एकाचीती णत्वे प्राप्ते निषेधः । प्रावयानमित्यत्र कृतोऽच इत्यस्य विषयः । पर्य्याणद्धमिति

३३. क्षुम्नादिषु च ।

एषु णत्वं नास्ति । क्षुभ्नाति, नरीनृत्यते, नर्नृत्तः, नरीनर्त्तिः, तृप्नोति । नृनसनः कश्चित्, दुर्नषः, दुर्नीतम्, हरिनन्दनः, हरिनन्दी, बह्मघ्नः, दौर्मागिनेय पुनर्नवा । आकृति-गणोऽयम् ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मद्‌मव्याकरणे
सन्धिनामोऽयं प्रथमोऽध्यायः सम्पूर्णः ।

———

पर्य्याम्यां नहेरुपसर्गादित्यादिना प्राप्तिः । अत्रः पदव्यवाये इति श्रीपतिः तेनाद्रंगोमयेण शुष्क गोमयेणेत्यादौ निषेधो न स्यात् । चान्द्रे तु तस्य प्रत्याख्यातत्वादनेनापि प्रत्याख्यातम् ।

३३. क्षुम्ना इत्येवमादिषु यो नकारस्तस्य णत्वन्नास्ति, अत्र श्नानिर्द्देशात् । अथ क्षोभाणांपतिरिव कर्त्तारमविरलक्षोभाणामित्यत्र णत्वं स्यादेव, न च वाच्यम्, तत्र यमकभंग इति । यमकादौ भवेदैक्यन्तुरतुलयोरलयोस्तथा । नणयोर्नमयोश्चान्ते सविसर्गाविसर्गयोः । सबिन्दुकोऽबिन्दुकयोः स्यादभेप्रकल्पनम् । इत्यलङ्कारपारिजातदर्शनात् । एवं क्षुभ्नीत क्षुभनन्ति । नृनसन इति कस्यापि नामधेयम्, तेन पूर्व्वपदात् (१/४/२) इत्यस्य विषयः । एवं सर्वनाम-त्रिनयनादय दुर्नय इत्यत्र उपसर्गाण्णोपदेशः । (१/४/१६) इत्यस्यविषयः । हरिनन्दन इत्यादि नट-नन्दि-नन्दन-चारन - नर्त्तन-नृत्य-गहन.नदन-विशेषन-निवासास्त्वन् पादीन्युत्तरपदानि संज्ञायां प्रयोजयन्ति । आकृतोऽयमिति । अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः तेन नरवाहन, स्वर्भानु, श्रीधन, सुरनद्यादयः । लृवर्णव्यवधानेऽपि णत्वनिषेधो द्रष्टव्य; यथा प्रक्लृप्यमानम् ।

इति प्रथम पादे चतुर्थो बिन्दुलेशः

———

द्वितीयोऽध्यायः

प्रथमः पादः

१. **कारके ।**

अधिकारोऽयम् । क्रियानिमित्तं कारकम्, कर्त्रादि; कारकशब्दोऽत्र निमित्त-पर्याय इति । अतः परं यद् वक्ष्यति तत्कारकविषये वेदितव्यम् ।

२. **स्वतन्त्र तत्प्रयोजको कर्त्ता ।**

क्रियायां साध्यायां कारके प्रधानभूतो योऽर्थ, स च तत्प्रयोजकश्च कर्त्तेत्युच्यते । यथा देवदत्तः काष्ठैः स्थाल्यामोदनं पचति, तेनान्यः पाचयति :—

प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः ।
अप्रयुक्तः प्रयुक्तेः वा स कर्त्ता नाम कारकम् ॥
निवृत्तौ देवदत्तः कटं न करोति, अप्रयुक्तः कटं करोति चैत्रः ।

३. **क्रियाव्याप्यं कर्म ।**

कर्त्तुः क्रियया यद्व्याप्यते तत् कारकं कर्मसंज्ञं भवति । तच्च त्रिविधम् !—

(१) निर्व्वर्त्त्यम् ।

(२) विकार्य्यम् ।

(३) प्राप्यञ्च ।

तत्र निर्व्वर्त्यमुत्पाद्यं, कटं करोति देवदत्तः । विकार्य्यमवस्थान्तरं नेयम्, ग्रामं गच्छति, इदमपि प्राप्यम्—कुञ्जं त्यजति कोकिलः, कुञ्जत्यागं प्राप्नोति ।

---

१. कर्त्र्यादि षट्कान्यसमबद्धेन क्रियान्वयित्वं कारकत्वम् ।

२. फलानुकूलव्यापाराश्रयत्वं स्वतन्त्रत्वम् । फलञ्च क्रियानिष्पत्तिः । स्व आत्मा तन्त्रः प्रधानं यस्य स स्वतन्त्रः । क्रियानुकूलकृतिमत्त्वं कर्तृत्वमिति नैयायिकाः । यः क्रियां सम्पादयति, येन च क्रियां सम्पादयतीत्युभावेव कर्त्तारौ भवतः इत्यर्थः ।

३. परसमवेतक्रियाजन्यफलशालित्वं कर्म्मत्वम् । बलवद् निष्ठाननुबन्धीष्टसाधन-ताज्ञानजन्येच्छाविषयत्वमनीप्सितत्वम् अथाकर्म्मका-धातवः कथ्यन्ते "सत्ता-बुद्धि-विशुद्धि-वृद्धि-शयेन स्थाना हसने भासने लज्जा जीवन रोदने च हनने वृत्यो विनाशे क्षुधि । त्रास-स्यन्द-निवास-शोष-मरण-स्पर्द्धाविहारेष्वपि, ज्ञानो धातुरकर्म्मकः क्षय मदोद्वेगप्रकम्पेष्वपि" । सत्ता, लज्जा, स्थिति जागरण, वृद्धिक्षय भय जीवितमरणम् । शयन क्रीड़ा रुचि दीप्त्यार्था नैते धातवः कर्म्मणि उक्ताः । यत् क्रियते तत् कर्म्म, तच्च निर्व्वर्त्य विकार्य्य प्राप्य, ईप्सिताऽनीप्सितेतरभेदेन ।

मितरच्च । ईप्सितमुक्तम्, अनीप्सितं तु—विषं भक्षयति क्रुद्धः, इतरत्तु ग्रामं गच्छन् वृक्षमूलमुपसर्पति। सकर्मकाद् धातोर्भावेऽपि हि प्रत्यये क्रियाव्याप्तिरस्ति— सभां वा न प्रवेष्टव्यम् । कृतपूर्व्वी कटम् । इहापि भवति—मासमास्ते, ओदनपाकं शेते, क्रोशं स्वपिति, कलिङ्गं वसति—

यदाहुः—कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्व्वैरकर्मकैर्योगे कर्म्मत्वमुपजायते ।।

इह दुहादयो द्विकर्म्मकाः तत्रोपयोगकर्म्मप्रधानम्, तन्निमित्तमप्रधानम्;—तद् यथा—गां दोग्धि पयो गोपः, पौरवं गां याचते विप्रः, व्रजमवरूणद्धि गां गोपः, मैत्रं पन्थानं पृच्छति, पौरवं गां भिक्षते, वृक्षमवचिनोति फलानि दारकः, शिष्यं धर्म्मं ब्रूते, शास्त्रं शिष्यमनुशास्ति, चैत्रं शतं जयति, गर्गान् शतं दण्डयति, देवं वरं वृणुते, दधि मथ्नाति घृतं गोपः, नृपं मन्त्रं वदति—दुहि, याचि, रुधि, प्रच्छि, भिक्ष, चिञो, ब्रुवि, शासि, जि, दण्डि, वृ, मन्थि, वदः । इति चोभयकर्म दुहादि विदुः, कृषि नी वहि हृ प्रभृतीति परम् । कृष्यादीनि दुहादेरन्यानि धातुरूपाणि द्विकर्म्मकाणि भवन्ति । कर्षति शाखां ग्रामम्, अजां ग्रामं नयति, भारं ग्रामं वहति, कन्यां ग्रामं हरति ।

४. **गति बुद्ध्याहारशब्दार्थाकर्म्मकाणामनीखाद्यादिह्वाशब्दायक्रन्दां प्रयोज्यः ।**

अर्थशब्दः प्रत्येकमभिसम्बध्यते—गत्यर्थः बुद्ध्यर्थः आहारार्थः शब्दार्थः अकर्म्मक इत्येषां धातूनां प्रयोज्यकर्त्ता कर्म्मस्यात् । चैत्रो ग्रामं गच्छति गमयति ग्रामं चैत्रं मैत्रः, यापयति चैत्रं ग्रामं, बोधयति शिष्यं धर्म्मम्, वेदयति बटुं वेदम्, भोजयति पुत्रं भक्तम् । शब्दार्थानां शब्दात्मकक्रियाणां—अध्यापयति वटुं वेदम्, पाठयति पुत्रं सूत्रम्, श्रावयति गीतं रसिकम्, । अकर्मकाणां—आसयति मित्रम्, शाययति पतिम् । एषां किमं ? पाचयत्योदनं यज्ञदत्तेन देवदत्तः । अन्यादेरिति किम् ? नायति भारं दासेन साधुः, खादयति भक्तं पुत्रेण माता, आदयत्यन्नं पुत्रेण माता । यदा तु प्रयोजकं कश्चिदपरः प्रयुङ्क्ते, तदा तस्य कर्मत्वं न भवति, न ह्यसौगत्यर्थादीनां कर्त्ता, किन्तर्हि ? ण्यन्तस्य । तद्यथा गमयति ग्रामं चैत्रं मैत्रेण देवदत्तः । अथ प्रयोजकक्रियाव्याप्त्यैव प्रयोजकस्य कर्म्मत्व सिद्धेवचनमिदं नियमार्थम्, गत्यर्थादीनां प्रयोज्यः कर्त्ता कर्म्मैव भवति, अन्येषां विवक्षावशात् कर्तृत्वं कर्म्मत्वञ्च । तेन पाचयत्योदनं सूपकारेण सूपकारं वा देवदत्त (देवदन्तमि) इत्याद्यपि भवतीत्याहुः ।

५. **वहेः सनियन्तृकः ।**

वहे सनियन्तृकः प्रयोज्यःकर्त्ता कर्म्म भवति । वाहयति यवान् वृषभान्; सनियन्तृक इति किम् ? वाहयति भारं दासेन साधुः ।

६. **भक्षेर्हिंसायाम् ।**

हिंसायां भक्षे प्रयोज्यः कर्त्ता कर्म्म भवति । भक्षयति शस्यं वृषभान् रक्षकः, हिंसायामिति किम् ? भक्षयति पिण्डं पुत्रेण माता ।

७. **हृकुञ्-लभां वा ।**

एषामाहारार्थऽकर्म्मक-गत्यर्थकत्वे सिद्धेऽपि प्रयोज्यः कर्त्ता कर्म्म भवति वा । हारयति भारं दासं देवदत्तः दासेन वा, अभ्यवहारयति पिन्डं पुत्रं माता, पुत्रेण वा कारयति कटं भृत्यम् भृत्येन वा, विकारयति काकं वेश्या, कामुकेन वा । पद्मनि विकाशं लम्भयति भानुः परस्मैर्वा ।

८. **दृश्यभिवाद्योरात्मनेपदे ।**

अनयोस्तङि प्रयोज्यकर्त्ता कर्म्म वा स्यात् । दर्शयते नृप भृत्यान् भृत्यैर्वा । अभिवादयते गुरुं पुत्रं पुत्रेण वा । तङि नियमादन्यत्र दृशेर्बुद्ध्यर्थत्वान्नित्यं कर्म्मत्वमिति जिन्नेद्रबुद्धिपादाः । दर्शयते भृत्यं राजानम् । नेह अभिवादयति गुरुं पुत्रेण ।

९. **साधकतमं करणम् ।**

क्रियासिद्धौ यत्प्रकृष्टमुपकरणं तत् साधकतमं करणसंज्ञं भवति । दात्रेण धान्यं लुनाति, अश्वेन याति ।

१०. **दिवः कर्म्म वा ।**

दिवः साधकतमं कर्म वा स्यात् । अक्षान् अक्षैर्वा दीव्यति ।

११. **परिक्रयो वा सम्प्रदानम् ।**

परिक्रयो नात्यन्तिकः क्रयस्तेन वेतनादिना नियतकालस्वाकारे साधकतमं सम्प्रदानसंज्ञां भवति । शताय परिक्रीतोऽनुब्रूहि, शतेन वा ।

१२. **प्रदानाभिसम्बध्यमानं सम्प्रदानम् ।**

प्रदानमात्यन्तिकदानम्, तेन यमभिसम्बध्यते तत्कारकं सम्प्रदानसंज्ञं भवति विप्राय गां ददाति, गुरवे धनं निर्यातयति, शत्रवे भयं ददाति ; प्रदानमिति किम् ? रजकस्य वस्त्रं ददाति ।

१३. **रुच्यर्थे रुचिमान् ।**

रुच्यर्थधातुभिर्योगे रुचिमान् योऽर्थः स सम्प्रदानम्भवति । पोताय रोचते मोदकः, पोताय स्वदते मोदकः ।

१४. **श्लाघ-ह्नुङ्-स्था-शपां-ज्ञीपस्यमानः ।**

एषां प्रयोगे बोधयितुमिष्टो यः स सम्प्रदानं भवति । नृपाय श्लाघते बन्दी, पुत्रायऽपह्नुते वणिक्, छात्राय तिष्ठते कन्या, प्रियायै शपते पतिः ।

१५. **स्पृहि-धार्य्योरभीष्टधनिकौ ।**

स्पृहेः प्रयोगे इप्सितो योऽर्थः, धारेश्च यो उत्तमर्ण, स सम्प्रदानम्भवति, धनाय स्पृहयति, साधवे शतं धारयति ।

१६. **क्रुधद्रुहेर्ष्यासूयार्थैः कोपस्थानम् ।**

क्रोधोऽमर्षः, द्रोहोऽपकारः, ईर्ष्या-अक्षमा, असूया-गुणेऽपि दोषाविष्कारः-क्रोधाद्यर्थैः योगे कोपस्थानं सम्प्रदानम्भति । पुत्राय क्रुध्यति, नृपाय द्रुह्यति, सपत्न्यै ईर्ष्यति, मैत्राय असूयति, क्रोपस्थानमिति किम् ? भार्य्यामीर्ष्यति एनामन्यो माद्राक्षीदिति ।

१७. **क्रुध-द्रुहोः प्रादेः कर्म्म ।**

प्रादिपूर्व्वयोः क्रुधद्रुहयोः प्रयोगे कोपस्थानं कर्म्म भवति । मैत्रं संक्रुध्यति, चैत्रं संद्रुह्यति ।

१८. **राधीक्षोर्यस्य विप्रश्नः ।**

राधरीक्षेश्च प्रयोगे यस्य विविधिप्रश्नः स सम्प्रदानम्भवति । पुत्राय राध्यति, विप्राय ईक्षते, नैमित्तिकः विविधप्रश्नेन तस्य दैवं पर्य्यालोचयतीत्यर्थः ।

१९. **अनुप्रतिगृणाङ् प्रतिश्रुवोः पूर्व्वस्य कर्त्ता ।**

अनुप्रतिपूर्व्वस्य गृणातेः आङ्-प्रति-पूर्वस्य श्रुवश्च प्रयोगे पूर्व्वक्रियायाः कर्त्ता सम्प्रदानम्भवति । क्षेत्रेऽनुगृणाति, पोत्रे प्रतिगृणाति, तं प्रथमं शंसन्तं कोऽपि जनः प्रोत्साहयति; विप्राय गामाश्रृणोति, विप्राय गां प्रतिश्रृणोति, विप्रेण याच्यमानोऽङ्गीकरोतीत्यर्थः ।

२०. **अवधिरपायादिष्वपादानम् ।**

अपायादिषु साध्येषु यदवधिभूतम्, तत् कारकमपादानसंज्ञम्भवति । अपायः संश्लेषपूर्व्वको विश्लेषः । ग्रामादागतः, रथात् पतितः । वारणे—यवेभ्यो तां वारयति. शिक्षायां—उपाध्यायादधीते, ततः श्रृणोति । आशिक्षायां—नटस्य श्रृणोति । प्रतिग्रहे—पौरवाद् गां गृह्णाति । त्राणे—चौरात्त्रायते रक्षतीत्यर्थः । भये—पौरवाद् बिभेति । अन्तर्धौ—उपाध्यायादन्तर्धत्ते निलीयत इत्यर्थः । प्रभवने हिमवतो गङ्गा प्रभवति । जनने—गोमयाद् वृश्चिको जायते । पराजये—रणात् पराजयते । प्रमादे—अधर्म्मात् प्रमाद्यति । जुगुप्सायाम्—अधर्म्माज्जुगुप्सते । विरामे अधर्माद् विरमति । आधिक्ये—शुक्लात् शुक्लः, काकात् काकः ।

२१. **आधारोऽधिकरणम् ।**

आश्रयोऽधिकरणसंज्ञः स्यात् । स च सामीप्यको वैषयिक आभिव्यापक एव च । औपश्लेषिक इत्येवं स्यादाधारश्चतुर्विधः । गङ्गायां घोषः, प्रतिवसति वने सिंहः, तिलेषु तैलम्, कटे आस्ते विप्रः ।

२२. **अधिशीङ्स्थासां कर्म्म ।**

एषामाधारः कर्म्म स्यात् । स्थलीमधिशेते, गिरिमधितिष्ठति, ग्राममध्यास्ते ।

२३. **उपान्वध्याङ्वसो निवासे ।**

उपादेरेवाधारः कर्म्म स्यात् । ग्राममुपवसति पर्वतमुपवसति, गिरिमधिवसति, पल्लीमावसति । निवास इति किम् ? ग्रामे उपवसति भोजन निवृत्ति करोतीत्यर्थः । कथमेकादशीमुपवसति निरम्बुभक्षाः उपादनिवासार्थे वसः सकर्मकत्वात् ।

२४. **अभिनिविशो वा ।**

अस्याधारः कर्म्म स्याद् वा । ग्राममभिनिविशते, या या संज्ञा यस्मिन् अभिनिविशते यं यं वा ।

"भवन्ति हि विवक्षातः कारकाणि यथा तथा ।
एकत्र कारकद्वैधे परमेकं प्रवर्त्तते ॥"

गोभ्यो दोग्धि पयः, गोषु दोग्धि पयः । कारकद्वैधे—विप्राय गां दत्त्वा गृह्णाति आरुह्य तिष्ठति गिरिम् । गृहं प्रविश्य निः सरति, अस्त्येष घटः, पश्येत्यादि ।

२५. **उक्तं तिङादिर्निर्दिष्टम् ।**

तिङ्-कृत्-तद्धिते-समासैर्यन्निर्दिष्टं कारके तदुक्तमुच्यते । कृत्तद्धितसमासास्तु सत्ता मात्रे हि वाचकाः । व्यतिरेके तु कर्म्मादावनुक्तास्ते भवन्ति हि । कटं करोति देवदत्तः, कटं क्रियते देवदत्तेन, कृतः कटो दासेन, शतेन क्रीतः शत्योऽश्वः शतिकोऽश्वः, प्राप्तोदको ग्रामः ।

२६. **मुख्यं कर्म्म द्विकर्म्मणाम् ।**

द्विकर्मणां धातूनां तिङादिभिर्मुख्यं कर्मोक्तं भवति । नीयते अजा ग्रामं दासेन, नेतव्या अजा ग्रामम्, हृतो भारो ग्रामम्, कर्ष्टव्या शाखा ग्रामम् ।

२७. **अप्रधानं दुहादीनाम् ।**

दुहादीनां द्विकर्म्मकाणां धातूनां तिङादिभिरप्रश्नां कर्म्मोक्तम्भवति । दुह्यते गोः क्षीरं गोपेन, याच्यते वरं देवो देवदत्तेन, देवासुरैरमृतमम्बुनिधिर्ममन्थे, जितो मैत्रः शतम्, गर्गाः शतं दण्डनीयाः ।

२८. **ण्यन्तकर्त्ता च कर्म्मवत् ।**

ण्यन्ते यत् कर्त्ता कर्म्मभूतस्तत् तिङादिभिरुक्तम्भवति । गमयति ग्रामं विप्रं देवदत्तः, गम्यते विप्रो ग्रामं देवदत्तेन, बोध्यते शिष्यो धर्म्मम्, भोज्यते विप्रो भक्तम्, पाठ्यते पुत्रः सूत्रम, आस्यते विप्रो मासम् । चकारात् क्वचित् प्रतिषेधविषयेऽपि कृतः प्रयोगे कर्म्मत्वेनोच्यते, तेन देवदत्तेन त्वं पूगं खाद्यमानो वाच्यसे, भक्तं खादयितव्योऽसीत्यादि ।

२९. प्रायो निपातेन ।

कर्म्मनिपातेन क्वचिदुक्तं भवति । हरिरित्याह, विषवृक्षोऽपिसंवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ।

३०. तिङास्त्रिशः प्रथममध्यमोत्तमाः ।

तिङां त्रीणि त्रीणि पदानि प्रथमपुरुष-मध्यमपुरुष-उत्तमपुरुषसंज्ञकानि भवन्ति । तिप्, तस्, अन्तीति प्रथमः, सिप् थस् थ इति मध्यमः, मिप्, वस्, मस्, इत्युत्तमः । आत्मनेपदे—ते, आते, अन्ते इति प्रथमः । एवं लिडादौ प्रतिपत्तव्यम् ।

३१. नाम्नि प्रथमः ।

नाम्नि वाच्ये प्रथमः पुरुषो भवति । सः पचति, तौ पचतः, ते पचन्ति । स त्वया दृश्यते, ते त्वया दृश्यन्ते ।

३२. युष्मदि मध्यमः ।

युष्मदि वाच्वे मध्यमः पुरुषो भवति । त्वं पठसि, युवां पठथः, यूयं पठथ । मया त्वं दृश्यसे, युवां दृश्येथे, यूयं दृश्यध्वे । "गम्यमानेऽपि नित्यसम्बन्धात्" । पठसि, दृश्यसे ।

३३ अस्मद्युत्तमः ।

अस्मदि वाच्ये उत्तमः पुरुषो भवति । पचामि, आवां पचावः, वयं पचामः । त्वया अहं दृश्ये, आवां दृश्यावहे, वयं दृश्यामहे, गम्यमानेऽपि—पचामि, दृश्ये ।

३४. परिहासे मन्ययोगे तु मध्यमोमनस्मत्तोत्तमैकञ्च ।

परिहासावगतौ मन्यतेः प्रयोगे अस्मदि वाच्ये मध्यमः स्यात् मन्यतेश्च तत्र मध्यमे प्राप्ते उत्तमैकवचनं भवति । एहि मन्ये रथेन यास्यसि मातस्ते पिता ।

३५. सुप्तिङान्त्रिकमेक-द्वि-बहुष्वैक वचन-द्विवचन-बहुवचनमेकशो विभक्तिश्च ।

सुप्-तिङाम् त्रिभिस्त्रिभिर्विभक्तानां त्रिकमैकश एकवचन-द्विवचन-बहुवचन-संज्ञकं विभक्तिसंज्ञकश्च एक-द्वि-बहुष्वर्थेषु भवति। एक वक्तीत्येकवचनम्—सु, अमादि, तिप्-सिपादि च । एकस्मिन्नर्थे—एकवचन, स भाति, द्वयोर्द्विवचनम् औ तसादि, तौ भातः, बहुषु बहुवचनम्—जस् अन्तीत्यादि, ते भान्ति । एवं तं तौ तानीत्यादि । "प्रकृतिप्रत्ययौ प्रकृत्यर्थविशिष्टं प्रत्ययार्थं सह ब्रूतः"—एकः, द्वौ, बहव प्रकृत्यर्थः प्रत्ययार्थेनानूद्यते ।

३६. विंशत्यादेरेकत्वमनावृत्तौ ।

विंशत्यादेरनभ्यावृत्तौ संख्यायां संख्येये च एकवचनमेव स्यात् । संख्यायाम्—विंशतिः पुरुषाणाम्, शतं स्त्रीणाम्; संख्येये—विंशतिः पुरुषाः, शतं स्त्रियः । आवृत्तौ तुः—द्वे विंशति नराणाम्, तिस्रो विंशतय स्त्रीणाम्, संख्येये—द्वे विंशती नराः, तिस्रो

विंशतयः स्त्रियः । अष्टादशपर्यन्ता च संख्या संख्येया वर्त्तते, न संख्याने; यदाह भाष्यकारः—"आदशभ्यः संख्या संख्येये चेति" व्यभिचारश्च दृश्यते—लक्षणां पञ्च लेभे वररुचिरिति कालिदासः ।

३७. जात्यर्थे वैकस्मिन् बहुवचनमसंख्याप्रयोगे ।

जात्यर्थे गम्ये एकस्मिन्नर्थे बहुवचनं वा स्यात् । गौरयं शुक्लः, गाव इमे शुक्लाः, व्रीहिःसम्पन्नोऽयम्, व्रीहयोऽमी सम्पन्नः । असंख्याप्रयोग इति किम् ? एका गौः, एको यवः सम्पन्नः ।

३८. अस्मदोऽद्वयोश्चाविशेषणात् ।

अविद्यमान (नैसर्गिक) विशेषणादस्मद एकत्वे द्वित्वे बहुवचनं वा स्यात् । अहं ब्रवीमि, आवां ब्रूवः, वयं ब्रूमः । अविशेषणादिति किम् ? कविरहम्, आवां कवी इत्यर्थे वयं कवयः इति माभूत् ।

३९. युष्मदो गौरवे ।

यूयद एकत्वे द्वित्वे, गौरवे बहुवचनः वा स्यात् । त्वं गुरुः, युवां गुरुः, यूयं गुरवः ।

४०. भे फल्गुनीप्रोष्ठपदाभ्यो द्वित्वे ।

फल्गुनीभ्यां प्रोष्ठपदाभ्याञ्च नक्षत्रे द्वित्वे गम्ये बहुवचनं वा स्यात् । पूर्व्वे फल्गुन्यौ, पूर्व्वाफल्गुन्यः । पूर्वे प्रोष्ठपदे, पूर्व्वा प्रोष्ठपदाः ।

४१. एकादन्यार्थे ।

बहुवचनं वा स्यात् । एको वदति, एके वदन्ति ।

४२. नञः संख्यार्थे च ।

अनेके वदन्ति ।

४३. दारादेर्नित्यम् ।

एभ्यो नित्यं बहुवचनं स्यात् । दाराः, आपः, वर्षाः, जलौकस इत्यादि ।

४४. पुष्यार्थपुनर्वसूभ्यां भ द्वन्द्वे द्विवचनं बहुत्वे ।

पुष्य एकः, स च तदर्थश्च पुनर्वसू द्वौ, तेभ्यो नक्षत्रे द्वन्द्वे बहुत्वे प्राप्ते द्विवचनं स्यात् । उदितो पुष्यपुनर्वसू, तिष्यपुनर्वसू, सिद्धपुनर्वसू । बहुत्व इति किम् ? (समाहार इदम्) तिष्यपुनर्वसु ।

४५. तन्नोभयात् ।

तदिति द्विवचनं उभयशब्दान्नास्ति । उभयो मुनिः, उभये देवमनुष्याः ।

४६. लुपि युक्तवल्लिङ्गसंख्ये ।

लुपि—लुबर्थे, युक्तवत् प्रकृत्यर्थवत् लिङ्गवचने भवतः । बङ्गानां निवासो बङ्गा जनपदः, तेषां निवास इत्यण्, जनपदवरणादिभ्यो लुप्, पञ्चशालाः, पुण्ड्राः, कुरवः । हरीतक्यादिषु लिङ्गं न संख्या । हरीतक्यः फलानि । खलतिकादिषु संख्या न लिङ्गम् । खलतिकस्य गिरेरदूरभवानि खलतिकवनानि—अदूरभवश्चेत्यणो जनपदवरणादिभ्यो लुप् । समासे चोत्तरपदस्य बहुवचनविषयस्य युक्तवत् । मथुरापञ्चालाः । उत्तरपदस्येति किम् ? पञ्चालमथुरे ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मव्याकरणे
द्वितीयाध्यायस्य प्रथमः पादः

—०—

द्वितीयः पादः

(विभक्ति-प्रकरणम्)

१. **अधातुविभक्त्यर्थवत् प्रातिपदिकम् ।**

धातुविभक्तिवर्ज्जमर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति । विप्रः, कर्त्ता, कुम्भः, दाक्षिः, राजपुरुषः, पौर्वशालः, च, वा, वै, उच्चैः । यदृच्छाशब्दश्चार्थवान्—डित्थः, डवित्थः । अर्थवदिति किम् ? वनमिति प्रत्यक्षरमर्थवन्न भवति—तेन न लोपो न स्यात् । समुदायेनादन्तमर्थवदेव । अधातुविभक्तीति किम् ? लङ्—अहन्—न लोपो न स्यात्; कुम्भे, त्रिपुणी; क्लीबे प्रातिपदिकान्तस्य ह्रस्वो न स्यात् । (कृत्तद्धित-समासाश्च ।)

२. **सुबाद्याः प्रत्ययाः परे ।**

सुप्-सनादि-लडादि विकरण-कृत्-तद्धिताः प्रत्ययसंज्ञकाः प्रकृतेः परे भवन्तीति परिभाषिताः । कथं बहुतृणम् ? "सुपो बहुर्व्वा पूर्व्वे तु" इति विशेषवचनात् ।

३. **प्रातिपदिकात् ।**

अधिकारोऽयम् ।

४. **सु, औ, जस्; अम् औट्, शस्; टा, भ्याम् भिस्; ङे, भ्याम्, भ्यस्; ङसि, भ्याम्, भ्यस्; ङस्, ओस्, आम्; ङि, ओस्, सुप् ।**

एते स्वादयः प्रत्ययाः प्रातिपदिकात् परे भवन्ति । देवः, देवौ, देवाः; देवमित्यादि ।

५. **अर्थमात्रसम्बोधनयोः प्रथमा ।**

अर्थमात्रे—अव्यतिरिक्तप्रातिपदिकार्थे—सत्तामात्रे सम्बोधने च प्रथमा विभक्तिर्भवति । विप्रः, विप्रौ, विप्राः । लिङ्ग-परिमाण-संख्याश्च प्रातिपदिकार्था एव । स्त्री, पुमान्, नपुंसकम् । प्रस्थेन परिमिता व्रीहिः, प्रस्थः खारी, आढकः, एको द्वौ, बहवः । सम्बोधनभिमुखीकरणम्, तत्राधिक्ये च, हे विप्र ! हे विप्रौ, हे विप्राः । अचेतनेन तूपचारात्—हे घट ! यदाहुः—सर्व्वभावाश्चेतना साक्षाद्दर्शनस्याश्रयत्वात् । यथा मञ्चाः क्रोशन्ति, संक्रीडन्ति रथाः, कीचकाः स्वनन्तीत्यादि ।

६. **सम्बोधनैकवचनं सम्बुद्धिः ।**

अस्यैकवचनं सम्बुद्धिरुच्यते । हे भानो इति ।

७. **अनुक्ते ।**

अतोऽनभिहिते इत्यधिकारः ।

८. कर्म्मणि द्वितीया।

अनुक्ते कर्म्मणि द्वितीया विभक्तिर्भवति । तम्, तौ, तान् । अनुक्त इति किम् ? वृक्षौ दृश्यताम् ।

९. कालाध्वाभ्यामतिसंयोगे।

क्रियागुणद्रव्यैः साकल्येन सम्बद्धः अत्यन्तसंयोगः तत्र कालाध्वाभ्यां द्वितीया स्यात् । मासमधीते वेदम्, वर्षं कल्याणी, मास गुड़धानाः । अध्वनः—क्रोशमधीते वेदम्, योजनं कुटिला नदी, क्रोशं पर्वतः । अतिसंयोगे इति किम् ? मासस्य द्विरधीते, क्रोशस्यैकदेशे पर्वतः । यत्रान्तर्भूतक्रियान्तरं नास्ति तदर्थंवचनमिदम्, कलिङ्गं वसन्तीत्यादि प्राकृतमेव कर्म्म ।

१०. तृतीयापवर्गे ।

फलप्राप्तौ क्रियापरिसमाप्तिरपवर्गः । तत्र कालाध्वाभ्यामतिसंयोगे तृतीया स्यात् । मासेनाधीतो ग्रन्थः, क्रोशेनाधीतो वेदः । अपवर्ग इति किम् ? मासमधीतोऽनुवाको न चानेन गृहीत इति ।

११. सप्तमीपञ्चम्यावन्तरे ।

व्यवधानवृत्तिभ्यां कालाध्वाभ्यामेते स्याताम् । अद्य भुक्त्वा द्व्यहे भोक्ता द्व्यहो भोक्ता वा, इहस्थोऽयं धन्वी क्रोशे लक्ष्यं विध्यति, क्रोशाल्लक्ष्यं विध्यति वा ।

१२. पर्य्युभयसर्वाभितसा ।

पर्यादिभिस्तसन्तैर्युक्ताद् द्वितीया स्यात् । परितो ग्रामम्, अभितो ग्रामम् ।

१३. समया-निकषाऽन्तराऽन्तरेण हा-धिगधोऽधोऽध्यध्युपर्युपरिभिश्च ।

एभिर्युक्ताद् द्वितीया स्यात् । समया ग्रामम्, निकषा ग्रामम्, अन्तरा त्वाञ्च माञ्च कमण्डलुः, तव मम मध्ये इत्यर्थः । अन्तरेण पुरुषकारं किंचिन्न लभ्यते, हा देवदत्तम्, धिक्त्वाम्, अधोऽधोग्रामम्, उपर्युपरि ग्रामम् । न सम्बुद्धौ—हा राम, धिक् देवदत्त। चकारात्—यावच्चैत्रं शीतम्, बुभुक्षितं न प्रतिभाति किञ्चित्, अभिरामम्, राधिकामधिवचनजातम् ।

१४. उपेन हीने ।

हीने द्योत्ये उपेन युक्ताद् द्वितीया भवति । उपरामं धन्विनः रामाद् हीना इत्यर्थः ।

१५. लक्षणवीप्सेत्थम्भूताख्यानभागे प्रतिपरिभ्याम् । अनुना सह-हेतु-हीने च ।

चिह्नादौ गम्ये प्रत्ययादियुक्ताद् द्वितीया स्यात् । वृक्षं प्रति विद्योतते विद्युत् । वृक्षं परि वृक्षमनु । युगपद् व्याप्तुमिच्छा वीप्सा, गृहं गृहं प्रति गीतम्, गृहं गृहं परि, गृहं गृहमनु । कञ्चित् प्रकारापत्तिरित्थंभूताख्यानम्, मातरं प्रति साधुः, मातरं परि, मातरमनु । भागे—यन्मां प्रति स्यात्, यन्मां परि । यन्मामनु । अनुना सह-हेतु-हीने च—गङ्गामनु वसिता पुरी, तया सह बद्धेत्यर्थः, षिञ् बन्धने निष्ठा ।

वष्टिभागुरिवल्लोपमवाप्योरुपसर्गयोः । ततोऽवतंस-बहितः पिधान-पिहितादिकम् । हेतौ—कन्यामनु शोकः । हीने—अन्वर्ज्जुनं योद्धारः, ततो हीना इत्यर्थः ।

१६. अभिना त्रिषु लक्षणादिषु ।

लक्षणवीप्सेत्थंभूताख्याने अभिना युक्ताद् द्वितीया स्यात् । वृक्षमभिविद्योतते विद्युत्, वृक्षमभिसिञ्चति, मातरमभि साधुः । त्रिष्विति किम् ? भागे—यन्मामभिष्यात्—अद्वितीयार्थत्वात् षत्वञ्च ।

१७. कर्तृकरणयोस्तृतीया ।

अनुक्ते कर्त्तरि करणे च तृतीया स्यात् । विप्रेण पच्यते काष्ठैः ।

१८. सहार्थेनाप्रधाने ।

सहार्थेन युक्तात्तृतीया स्यात् । पुत्रेण सहागतः पिता, पुत्रेण सार्द्धं बन्धुरः, पुत्रेण सन् गोमान् । पितुरत्र क्रिया-गुण-द्रव्य-सम्बन्धी (यो) अर्थः सहार्थेनोच्यते । पुत्रस्य प्रतीयमानत्वादप्राधान्यम् । गम्ये च वृद्धो यूना ।

१६. येनाङ्गी विकृतः ।

येनेति सम्बन्धादङ्गमाक्षिप्यते । येनाङ्गेनाङ्गी विकृतो लक्ष्यते ततस्तृतीया स्यात् । अक्ष्णा काणः, पृष्ठेन कुब्जः, पादेन खञ्जः ।

२०. चिह्नप्रकृत्यादिभ्यः ।

चिह्नार्थात् प्रकृत्यादेश्च तृतीया स्यात् । अपि भवान् कमण्डलुना छात्रमद्राक्षीत् ? शिखया परिव्राजकमपश्यत् ? प्रकृत्यादेः—प्रकृत्याभिरूपः, मुखेन त्रिलोचनः, गोत्रेण गार्ग्यः, प्रायेण याज्ञिकः, समेन धावति, विषमेण धावति, द्विद्रोणेन धान्यं विक्रीणीते; पञ्चकेन पशुं विक्रीणीते ।

२१. संज्ञः कर्म्मणि वा ।

संजानाते कर्म्मणि तृतीया वा स्यात् । पित्रा संजानीते, पितरं वा; संज्ञ इति किम् ? स्वरेण पुत्रं जानाति ।

२२. हेतोः ।

फलसाधनयोग्यपदार्थो हेतुस्तस्मात् तृतीया स्यात् । धनेन कुलम्, विद्यया यशः, अन्नेन वसति । हेत्वधीनः कर्त्ता; कर्त्रधीनं करणमिति हेतुकरणयोर्भेदः ।

२३. ऋणादकर्त्तुः पञ्चमी ।

ऋणाद्धेतोः पञ्चमी स्यात् । शताद् बद्धः । अकर्त्तुरिति किम् ? शतेन प्रयोजकेन बन्धितः ।

२४. गुणादनद्यापो वा ।

गुणाद्धेतोः पञ्चमी वा स्यात् । जाड्याद् बद्धः, जाड्येन बद्धः । धूमादग्निः, उपलब्धेः सन्, उपलब्ध्या सन् । अनद्याप इति किम् ? मैत्र्या साधुः, प्रज्ञया धीरः ।

२५. षष्ठी हेतुप्रयोगे ।

हेतुशब्दप्रयोगे षष्ठी स्यात् । अन्नस्य हेतोर्व्वसति, "अल्पस्य हेतो बहु हातुमिच्छन्" ।

२६. सर्व्वाः सर्वनाम्नो हेत्वर्थैः ।

हेत्वर्थशब्दैर्योगे सर्व्वनाम्नः सर्व्वा विभक्तयो भवन्ति, हेत्वर्थेभ्योऽपि विशेषण-विशेष्यत्वात् । को हेतुरागमनं तव ? कं हेतुमागतः, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ । एवं निमित्त-कारण-प्रयोजनानाञ्च, किं निमित्तम्, केन निमित्तेन, द्वे कारणे, द्वयोः कारणयोः, भवत्सु कारणेषु सोढुं किं प्रयोजनमित्यादि ।

२७. सम्प्रदाने चतुर्थी ।

सम्प्रदानकारके चतुर्थी स्यात् । विप्राय गां ददाति, नारदाय रोचते कलहः, पुष्पेभ्यः स्पृहयति ।

२८. तादर्थ्ये ।

तस्मै इदं तदर्थम्, (तदर्थस्य भावः तादर्थम् तदर्थ्यभावे गम्ये चतुर्थीस्यात् । यूपाय दारुः, अश्वाय घासः, ।) रन्धनाय स्थाली, कुण्डलाय हिरण्यम्, भोजनाय धान्यम्, एधेभ्यो व्रजति, भूतये धावति, उच्चाराय कल्पते माघः । वाताय कपिलिका विद्युत्, वृष्टये चोन्मुखी विद्युत्, आतपाय लोहिनी विद्युत्, युद्धाय संनह्यते भटः, श्राद्धाय निगल्हते, पत्ये शेते । गत्यर्थानाञ्च तादर्थ्ये परिस्पन्दनगतौ । ग्रामाय गच्छति, रणाय प्रस्थितः, ग्रामाय गन्ता, उत्पथेन पथे गच्छति, नाह परिस्पन्दनगतौ—मनसा पाटलिपुत्रं गच्छति । क्व गच्छसीत्याधार विवक्षायाम् ! तादर्थ्ये इति किम् ? वनं याति, पन्थानं गच्छति, चान्द्रे च तादर्थ्ये सर्व्वमिदमुक्तम् ।

२९. शक्तार्थ-हित-नमः स्वस्ति-स्वाहा-स्वधा वषट्योगे ।

एभिर्योगे चतुर्थीस्यात् । शक्तो मल्लो मल्लाय, अलं मल्लो मल्लाय, समर्थो मल्लो मल्लाय ।' पर्याप्तः, प्रभुः समर्थश्च । हिताद्यैः खल्वपि रोगिणे हितमौषधंगरे, हितो धूमः, नमः शिवाय, नमश्चकार देवेभ्यः । कथं मुनित्रयं नमस्कृत्य— नमसः समासे कृत्परत्वेन क्रियात्मकत्वात् । स्वस्ति प्रजाभ्यः, स्वाहा अग्नये, स्वधा पितृभ्यः, वषडिन्द्राय ।

३०. मन्यकर्मण्यवज्ञार्थादनावादेर्वा ।

मन्यतेः कर्म्मणि अवज्ञार्थाच्चतुर्थी वा स्यात् । न त्वा तृणाय मन्ये, न त्वा तृणं मन्ये, न त्वा शुने मन्ये, न त्वा श्वानं मन्ये । श्यना निर्देशः किम् ? न त्वा तृणं मन्ये । अवज्ञार्थादिति किम् ? अश्मानं दृशदं मन्ये । अनावादेरिति किम् ? न त्वा नावं मन्ये । अन्न, काक, शुक, शृगाल, नावाद्याः ।

३१. अपादाने पञ्चमी ।

अपादानकारके पञ्चमी विभक्तिर्भवति । ग्रामादागच्छति—अध्ययानात् पराजयते । यब्लोपे कर्म्माधिकरणयोः, प्रासादमारुह्यति, प्रासादात् प्रेक्षते, आसने उपविशति, आसनात् प्रेक्षते । प्रश्नाख्यानयोः—कुतो भवान् ? पाटलिपुत्रात् । यतः कालाध्वनोर्मानं काले सप्तमी अध्वनः प्रथमा सप्तमी च । फाल्गुन्यश्चैत्री मासे, चम्पातः सोमतीर्थं पञ्चयोजनानि पञ्चयोजनेषु वा ।

३२. सीमाभिविध्योराङ् योगे ।

अनयोराङ्योगे पञ्चमी स्यात् । आ त्रिगर्त्तेभ्यो वृष्टो देवः, तदवधि तमभिव्याप्य वा ।

३३. अपपरिभ्यां वर्ज्जने ।

आभ्यां वर्ज्जनार्थे पञ्चमी स्यात् । अपत्रिगर्त्तेभ्यो वृष्टो देवः, परिपरित्रि-गर्त्तेभ्यो वृष्टो देवः, तान् वर्ज्जयित्वा इत्यर्थः—अत्र वर्ज्जने द्वित्वम् ।

३४. प्रतिनिधिप्रतिदानयोः प्रतिना ।

सदृशप्रत्यर्पणयोः प्रतिना युक्तात् पञ्चमी स्यात् । अभिमन्युरर्ज्जनतः प्रति, माषानस्मै तिलेभ्यः प्रतियच्छति ।

३५. अन्यार्थारादाजाहिबहिर्दिक्शब्देभ्यः ।

एभिर्योगे पञ्चमी स्यात् । अन्यो मैत्रात् । अन्य, इतर, विलक्षण, व्यतिरिक्त, भिन्नाद्या अन्यार्थाः । आराद् ग्रामात्, आच्—दक्षिणा ग्रामात्, आहि—दक्षिणाहि ग्रामात्, बहिस्—बहिर्ग्रामात्, दिक्शब्दः-पूर्व्वं ग्रामात्, प्राक् ग्रामात् । ऋते द्वितीया वा—ऋते पार्थम्, ऋते पार्थाद् वा ।

३६. पृथग्विनानानाभिस्तृतीया च ।

एभिर्योगे पञ्चमी, द्वितीया, तृतीया च भवति । पृथक चैत्रात्, पृथक चैत्रेण, विना वातात्, विना वातेन, नाना ग्रामेणेत्यादि ।

३७. करणे वा स्तोकाल्पकृच्छ्रे कतिपयादसत्त्वे ।

स्तोकादेरद्रव्ये वर्त्तमानात् करणे पञ्चमी स्याद् वा । स्तोकान्मुक्त, स्तोकेन मुक्तः, अल्पान्मुक्तः, अल्पेन मुक्तः । कृच्छ्रान्मुक्तः, कृच्छ्रेण मुक्तः । कतिपयान्मुक्तः, कतिपयेन मुक्तः । असत्त्व इति किम् ? स्तोकेन विषेण हतः ।

३८. दूरान्तिकार्थैः षष्ठी वा, तेभ्योऽपि सप्तमी-पञ्चमी-तृतीया-द्वितीयाः ।

दूरान्तिकार्थैश्च योगे षष्ठी वा स्यात्, पक्षे पञ्चमी च । तेभ्यो दूरान्तिकार्थे-भ्योऽपि सप्तम्यादयः स्युः । ग्रामस्य ग्रामाद् वा दूरे दूरात् दूरेण दूरं वा वसति, ग्रामस्य ग्रामाद् वा अन्तिके अन्तिकात् अन्तिकेन अन्तिकं वा वसति । एवं ग्रामस्य विप्रकृष्टे, ग्रामस्याभ्याशे वसति । असत्त्व इत्येव किम् ? दूरः पन्थाः ।

३९. सम्बन्धे षष्ठी ।

स्व-स्वाम्यादिसम्बन्धे षष्ठी विभक्तिर्भवति, स च सम्बन्धो द्विविधः, संयोगः समवायश्च । राज्ञः पुरुषः, पशोः पादः । क्रियासम्बन्धे—रजकस्य वस्त्रं ददाति, नाग्निस्तृप्यति काष्ठानाम्, नापगानां महोदधिः । नान्तकः सर्व्वभूतानां, न पुंसां वामलोचना ।

४०. अतसर्थैरञ्चैः न एनेन वा द्वितीया ।

अतसर्थैर्प्रत्ययैर्योगे षष्ठी स्यात् । अञ्चिसम्बन्धिनं वर्ज्जयित्वा । दक्षिणतो ग्रामस्य, पुरस्तात् ग्रामस्य । अनञ्चेरिति किम् ? प्राग्ग्रामात् । एनेन वा द्वितीया । दक्षिणेन गयां महाबोधिः, दक्षिणेन गयाया वा ।

४१. करणे ज्ञोऽज्ञाने ।

वेत्यव, अज्ञानार्थस्य ज्ञः करणे षष्ठी वा स्यात् । सर्पिषो जानीते, सर्पिषा वा, तेन प्रवर्त्तत इत्यर्थः ।

४२. स्मरणार्थेशदयां कर्म्मणि ।

एषां कर्म्मणि षष्ठी वा स्यात् । मातुः स्मरति, मातरं वा । पितुरध्येति पितरं वा । ईश-सर्पिष ईष्टे । दय—सर्पिषो दयते ।

४३. रुजार्थानां भावकर्त्तृकाणामज्वरिसन्ताप्योः ।

भावकर्त्तृकानां रुजार्थानां धातूनां कर्म्मणि षष्ठी वा स्यात् । चौरस्य रुजति रोगः, चौरस्याभयत्यामः, चौरं वा । भावकर्त्तृकाणामिति किम् ? नदी कूलं रुजति । अज्वरि सन्ताप्योरिति किम् ? चौरं जरयति ज्वरः । चौरं सन्तापयति सन्तापः ।

४४. जासि-निप्रहन-नाट-क्राथ पिषां हिंसायाम् ।

हिंसात्मकक्रियाणामेषां कर्म्मणि षष्ठी वा स्यात् । असुश्चौरादिकः, चौरस्योज्जासयति चौरं वा । नि, प्र, हन इति संघात-विपर्यस्तग्रहणम् । चौरस्य निप्रहन्ति, प्रणिहन्ति, प्रहन्ति, निहन्ति च । चौरस्योन्नाटयति, क्रथेर्घटादिर्निपातनादात्त्वम् । धैर्यस्योत्क्राथयति शोकः । विवेकस्य पिनष्टि कामः । हिंसायामिति किम् ? धानाः पिनष्टि ।

४५. व्यवहृ पणदिवां व्यवहारे ।

एषां व्यवहारे कर्म्मणि षष्ठी वा स्यात् । शतस्य व्यवहरति, शतं वा; सहस्रस्य पणते, शतस्य दीव्यति, सहस्रस्य प्रतिदीव्यन्ति ।

४६. कृत्वोऽर्थैः कालेऽधिकरणे ।

कृत्वोऽर्थप्रत्ययैर्योगे कालेऽधिकरणे षष्ठी वा स्यात् । पञ्चकृत्वो दिवसस्य भुङ्क्ते, दिवसे वा । द्विरह्न भुङ्क्ते द्विरह्नि वा । अधिकरण इति किम् ? द्विरह्ना भुङ्क्ते ।

४७. **कृतः कर्त्तृकर्म्मणोः ।**

कृतः प्रयोगे कर्त्तरि कर्म्मणि च षष्ठी स्यात् । वेति न निवृत्तं पुनः कर्म्मग्रहणात् । भवतः शायिका, भवतोऽग्रगामिका । कर्म्मणि—अपां स्रष्टा, पुरां भेत्ता । न कर्म्मणि कर्त्तृकृतो गतार्थस्य—वनं-गन्ता । न तद्धितप्रयोगे—कृतपूर्व्वी कटम्, भुक्तपूर्व्वी ओदनम् । अनुक्त इत्येव – शयिता देवदत्तः । अथास्य अनित्यता च दृश्यते, "तदर्हं धार्यैरामोदमुत्तमम्" इति भट्टिः ।

४८. **उभयप्राप्तेरनिकापोः कर्त्तरि वा ।**

उभयोः कर्त्तृकर्म्मणोः प्राप्तिर्यत्रैकस्मिन् कृति, तस्य प्रयोगे कर्त्तरि षष्ठी वा स्यात् । कर्म्मणि तु नित्यं पूर्व्वेणैव । आश्चर्यो गवां दोहोऽगोपालकेन, अगोपालकस्य वा, शब्दनामनुशासनमाचार्येण आचार्य्यस्य वा, विचित्रा सूत्रस्य कृतिः पाणिनिना पाणिनेर्वा । अनिकापोरिति किम् ? (इकण आपश्च न विकल्प इत्यर्थः) भेदिका तव काष्ठानाम्, चिकीर्षा रवेरलोकानाम् । कथं पाचयिता भक्तं चैत्रेण मैत्रः ? नात्रोभयप्राप्तिः, न उक्तं ण्यन्तस्य कर्म्म, णेः कर्त्ता मैत्रः, स चोक्त एव । ननु तृन्प्रत्ययान्तोऽयम्, तेन, न लौकिकतव्यनिष्ठाखलर्थतृणामित्यादिना षष्ठी निषेधः ।

४९. **क्तस्य वर्त्तमानाधारयोः वा भावे ।**

अत्र क्तस्य प्रयोगे षष्ठी स्यात् वक्ष्यमाणनिषेधापवादोऽयम् । वर्त्तमाने—सतां मतः, राज्ञां बुद्धः, सतां पूजितः; आधारे—इदमेषामासितं शयितं, पीतम्, गतमित्यादि । वा भावे—छात्रस्य हसितं छात्रेण वा, मयूरस्य नृत्यं, मयूरेण वा ।

५०. **कृतस्य नोभयप्राप्तेरन्यस्य तु कर्त्तरि वा ।**

उभयप्राप्तेः कृतस्य प्रयोगे उक्ता षष्ठी न भवति । दुह्या गौ क्षीरं गोपेन, नेया अजा ग्रामं भृत्येन, गमयितव्यो ग्रामं चैत्रो मैत्रेण, अन्यस्य तु कर्त्तरि वा, यत्रोभयप्राप्तिर्नास्ति—कर्त्तव्यः कटो मैत्रेण, मैत्रस्य वा, करणीयं कार्य्यं चैत्रेण, चैत्रस्य वा । कर्त्तरीति किम् ? कर्म्मणि तु नित्यं पूर्व्वेणैव—उपस्थानीयः शिष्यो गुरोः, गेयादयो बहुलमिति कर्त्तव्यनीयः । (करणीयः) ।

५१. **न लो-किनऽव्यय-निष्ठा-खलर्थ-तृणामुकस्याप्यकमेः द्विषः शतुर्व्वा ।**

पूर्वस्यापवादोऽयम् । लादेशानां उकारान्तदीनाञ्च कृतां प्रयोगे उक्ता षष्ठी न भवति । लः—कटं कुर्व्वाणः, ओदनं भुञ्जानः, सोमं पवमानः, विशेषं विद्वान्, अन्नं पेचिवान् । उः—कटं चिकीर्षुः, धनं गृध्नुः, कन्यामलंकरिष्णुः; किन्—भारं सासहिः, कटं चक्रिः । अव्ययं—कटं कृत्वा, सुखं प्राप्य, मधु पायं पायम्; निष्ठा—ओदनं भुक्तमनेन; खलर्थः--ईषत्पानः सोमो भवता; तृन्—कर्त्ता कटान्; उकस्यापि—परस्त्रीमभिलाषुकः, गङ्गां गामुकः । अकमेरिति किम् ? दास्याः कामुकः । द्विषः शतुर्व्वा—चौरं द्विषन्, चौरस्य द्विषन् ।

५२. णकेनोर्भविष्यदाधमर्ण्ययोः ।

अनयोरर्थयोर्णकेनोः प्रयोगे षष्ठी न भवति । भविष्यति—ओदनं भोजको व्रजति; ग्रामं गमी, ग्रामं गामी, आधमर्ण्ये—सहस्रंदायी । भविष्यदाधमर्ण्ययोरिति किम ? यवानां लावकः; अवश्यंकारी कटस्य । भविष्यति तुमर्थस्यैव णकस्य निषेधो नान्यस्य, तेन वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शकः ।

५३. तुल्यार्थैरतुलोपमाभ्यां तृतीया वा ।

तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी च । तुल्यश्चन्द्रेण तुल्यश्चन्द्रस्य वा, सदृशश्चन्द्रेण, सदृशश्चन्द्रस्य वेत्यादि । अतुलोपमाभ्यामिति किम् ? स्त्रीमुखस्य तुला पद्मम्, स्त्रीमुखस्योपमा शशी ।

५४. चतुर्थी वाशिष्यायुष्य-भद्र-कुशल-सुखार्थ-हितार्थैः ।

आशंसायाम् आयुष्याद्यर्थैर्योगे चतुर्थी वा स्यात् । पक्षे षष्ठी च । आयुष्यं ते भूयात्, तव वा, चिरं जीवितं राज्ञे भूयात्, राज्ञो वा, भद्रं मद्रं भूयात्तव वा, कुशलम्—निरामयं ते भूयात्, तव वा, सुखम्— शर्म ते भूयात्, तव वा; अर्थः—प्रयोजनं ते भूयात् तव वा; हितम्—पथ्यं ते भूयात्, तव वा ।

५५. अधिकरणे सप्तमी ।

अधिकरणकारके सप्तमी विभक्तिर्भवति । कटे आस्ते विप्रः । तिलेषु तैलम् ।

५६. निमित्तात्कर्मसंयोगे ।

कर्म्मणा संयोगे निमित्तात् सप्तमी भवति ।

"चर्म्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः ।।"

५७. कर्म्मणीनन्तक्तस्य ।

तद्धिते इनन्तक्तस्य प्रयोगे कर्म्मणि सप्तमी स्यात् । अधीती व्याकरणे, पठिती तन्त्रे, भावक्तान्तादिष्ठादिकृतपूर्व्वादेरिन् ।

५८. अधिनैश्वर्ये ।

ऐश्वर्ये गम्ये अधिना युक्तात् सप्तमी स्यात् । स्वस्वामिभ्याम्— अधिपाञ्चालेषु ब्रह्मदत्तः, अधिब्रह्मदत्तेषु पाञ्चालाः ।

५९. उपेन यस्मादधिकम् ।

उपेन योगे यस्मादधिकं विवक्ष्यते, ततः सप्तमी स्यात् । उपखार्य्यां द्रोणः ।

६०. साधुनिपुणाभ्यां प्रशस्ये ।

आभ्यां योगेऽत्रार्थे सप्तमी स्यात् । मातरि साधुः, पितरि निपुणः (प्रशस्य इति किम् ? साधुः भृत्योः राज्ञः)

६१. यस्य क्रिया क्रियाचिन्हम् ।

यस्य क्रिया अन्यस्य क्रियाचिन्हं भवति ततः सप्तमी स्यात् । गोषु दुह्यमानासु आगतः, दुग्धास्वागतः । अर्हानर्हयोश्च—द्विजेषु भुञ्जानेषु वृषला आसते, वृषलेषु भुञ्जानेषु द्विजा आसते । क्रियेति किम् ? यो जटाभिः स भुङ्क्ते । क्रियाचिन्हमिति किम् ? यो भुङ्क्ते स देवदत्तः ।

६२. षष्ठी चावज्ञायाम् ।

अनादरे गम्ये, यस्य क्रिया क्रियाचिन्हं भवति ततः षष्ठीसप्तम्यौ भवतः । रुदतः प्राव्राजीत्, रुदति वा; क्रोशतः प्राव्राजीत्; क्रोशति वा, रुदन्तं क्रोशन्तमवज्ञायेत्यर्थः ।

६३. स्वामीश्वराधिपति-दायाद-साक्षि-प्रतिभू-प्रसूतैश्च ।

स्वाम्याद्यैर्योगे षष्ठी-सप्तम्यौ स्याताम् । गवां स्वामी, गोषु स्वामी, गवामीश्वरः, गोष्वीश्वरः, गवामधिपति, गोष्वधिपतिरित्यादिः ।

६३. आयुक्तकुशलाभ्यां तात्पर्ये ।

तात्पर्ये गम्ये आभ्यां योगे षष्ठी-सप्तम्यौ भवतः, आयुक्तः कटकरणे कटकरणस्य वा । तात्पर्य इति किम् ? आयुक्तो गौः शकटे ।

६५. यतो निर्धारणम् ।

यतो जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्, ततः षष्ठी-सप्तम्यौ स्याताम् । नृणां (मध्ये) क्षत्रियः शूरतमः, नृषु वा; गवां मध्ये कृष्णा गौः सम्पन्ना क्षीरतमा, गोषु वा, अध्वगानां धावन्तः क्षीरतमाः, अध्वगेषु वा ।

६६. विभक्तात् सप्तमी ।

विभागयुक्तान्निर्धारणे तृतीया वा स्यात् पक्षे सप्तमी च । केशैः प्रसितः, केशेषु वा, केशैरुत्सुकः, केशेषु वा ।

६७. लुबन्तनक्षत्राच्च ।

अस्मात् तृतीयासप्तम्यौ भवतः । पुष्येण पायसमश्नीयात्, पुष्ये वा । लुबविशेषेऽणो लुप् । अधिकरण इत्येव, अद्य पुष्यः ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मव्याकरणे
द्वितीयाध्यायस्य द्वितीयः पादः

—०—

तृतीयः पादः

अथ सुबन्तप्रकरणम्

१. सुप्तिङन्तं पदम् ।

सुप्तिङावन्तौ यावत् तावत् पदसंज्ञं भवति । देवा क्षेमं दिशन्तु वः । अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वम् । तेन वाक्कलहः । समासे नोत्तरपदान्तविधौ । परमवाचौ, परमश्वलिहौ, परमगोदुहौ, परमदण्डिनौ । अत्र कुत्व-चत्व-घत्व-न-लोपाः न प्राप्ताः ।

२. नक्येऽङौ ।

अङि विषये क्यप्रत्यये परे नान्त एव पदसंज्ञः स्यात् । राजीयति, राजायते, पदत्वान्नलोपः । न इति किम् ? वाच्यति, तपस्यति, पुंस्यति, कुत्व-विसर्ग-सलोपाः न प्राप्ताः । अङाविति किम् ? राजनीवाचरति राजन्यति गुरौ ।

३. सुप्तद्धितेऽयचि ।

याद्यजादिवर्ज्जिते सुप्तद्धिते परे पूर्व्वं पदसंज्ञं भवति । राजा राजभ्याम्, राजत्वम्, अयचीति किम् ? साम्नि साधुः—सामान्यः राजानौ ।

---

१. सुप् च तिङ् च सुप्तिङौ, तौ अन्तौ अवयवौ यस्य तत् सुप्तिङन्तम् । वृत्तौ यावच्छब्दः व्याप्तिवचनः, इह तिङसाहचर्यात् सुप् पदेन प्रत्याहार एव गृह्यते न पुनः सप्तमीबहुवचनम्, न सम्बुद्धाविति ज्ञापकाद् वा अथ विधये विशेषणमन्त्यमिति न्यायात् अन्तरेणान्तशब्दं सुप्तिङन्तं लभ्यते किमन्तग्रहणेन ? मैवं वादी, पदसंज्ञायामन्तग्रहणं ज्ञापयति, अन्यत्र संज्ञाविधौ तदन्तविधिर्नास्तीति । तेन उदितौ घिरित्यत्र उकारेकारमात्रं घिसंज्ञकम्, न तु तदन्तत्वम् । अत एव द्वन्द्वे घ्यन्तमित्यादौ हरिहरावित्येवोदाहृतम् । देवा क्षेमं दिशन्तु व इति पदसंज्ञायां सत्यामिह कार्य्यत्रयम्, विसर्गानुस्वारवसादेशाः । नन्विहान्तशब्दोऽवयववचनः सतोरेव सुप्तिङोः पदावयवत्वं न त्वसतोस्तर्हि लुप्तयोस्तयोः कथं पदावयवत्वं येन पदसंज्ञाप्रसङ्ग इत्याह अनुवर्तिनीमित्यादि । अतएव ह्रस्वान् ङणनामचि नित्यं द्वे असमास इत्यत्र असमासग्रहणम्, वृषन्वसुवृषण्वस्वावित्यत्र नलोप निषेधश्चेत्याह समासे नेत्यादि, कुत्वचत्व-घत्वः नलोपा न प्राप्ता इति एषु यथासम्भवमिति शेषः ।

२. क्यशब्देन क्यच्-क्यङोरिह ग्रहणम् ।

३. सुप्तद्धित इति समाहारद्वन्द्वः उत्तरे त्वाद्यमिति न्यायात् याद्यजादीतिनायं प्रसज्य प्रतिषेधः, पर्युदासप्रतिषेध इत्याह वर्जित इति, सप्तम्याञ्च परे तदस्मिन्निति न्यायात् पूर्व्वमिति । रात्रेति पूर्वेणापि पदत्वे सिद्धे व्याप्त्यर्थमिह प्रयुक्तम् ।

४. न तसौ मत्वर्थे वति नभोऽङ्गिरो मनुषः ।

मत्वर्थप्रत्यये परे तान्त सान्तौ पदे न स्याताम् । मरुत्वाम्,—यशस्वी । वति नभ आदेश्च (पदत्वं न) नभ इव नभस्वत्, अङ्गिरस्वत्, मनुष्वत् ।

५. यचिभमसादिस्थाने ।

यादावजादौ च सुप्तद्धिते परे सादिस्थानवर्ज्जिते पूर्व्वं भसंज्ञं स्यात् । यि— गार्ग्यः । अचि—राज्ञः, भत्वादल्लोपः । असादि स्थान इति किम् ? राजानौ, सामानि ।

६. शिः सुट् चाक्लीबस्य सादिस्थानम् ।

जस्-शसोः शिः, अनपुंसकस्य सुट् च सादिस्थान संज्ञकौ भवतः । शि— कुण्डानि, सुट्—राजानौ, पुमान् पुमांसौ पुमांसः । सादिस्थाने दीर्घः, पुंसः पुमानसं च, अक्लीबस्य सुडिति किम् ? साम सामनी, दीर्घः ।

७. उदितौ घिः सख्यसमासपतिवर्ज्जम् ।

उदिदन्तौ घिसंज्ञकौ स्याताम् । वायुना, हरये अग्नेः, धेनोः, मतौ । सख्य-समासपतिवर्ज्जमिति किम् ? सख्या सख्ये, बहुसख्या, पत्या, पत्ये, पत्युः । समासे तु भवत्येव, श्रीपतिना, उमापतये ।

८. स्त्री स्त्रीषुचानियुवौ नदी ।

स्त्रीशब्दः स्त्रीलिङ्गागावीदूतौ च इयुवोरविषयौ नदीसंज्ञकौ भवतः । स्त्रीषु इत्यविभक्तिक निर्देशः । स्त्रियै, हे स्त्रि ! हे नदि ! हे वधु ! धीबन्धैः, यवाग्वैः । अवयवस्त्रीविषयत्वात् पुंस्ते (पुंस्त्वे) ऽपि (नदीत्वं) अतिलक्ष्म्यै विप्राय, बहुप्रेयस्यां विप्रे । क्ये-ववौ । नारीमिच्छतो नारीवदाचरतो वा, नार्य्यै विप्रस्य । अनियुवाविति किम् ? हे श्रीः, हे धीः ! हे भ्रूः ।

---

४. मरुत्वानित्यत्र पदत्वाभावात्तृतीयाभावः । मत्वर्थो यस्य स मत्वर्थः । तान्त-सान्ताविति अन्तर्भूत-तकारसकारावित्यर्थः ।

८. स्त्री यु इति स्त्रीयौ य्वौ स्त्रीषु, न पुनः स्त्रियां य्वौषु, पदान्तरद्योत्ये स्त्रीत्वेऽपि स्त्रीलिङ्गविषयताऽस्त्येव, कर्म्मधारये तु शब्दार्थस्त्रीत्व एव स्यादत आह,— स्त्रीलिङ्गादीदूतौ इति । इयस्थानत्वान्निषेधे प्राप्ते स्त्रीशब्दस्य नदीत्वं विधीयते । अथ यु इति किम् ? दीर्घेदूतौ ह्रस्वेदूतौ वेति सन्दिहानः निरस्य-न्नाह स्त्रीयु इत्यविभक्तिक निर्देश इति वक्ष्यमाण निषेधः । अथ वक्ष्यमाण-नियतस्त्रीविषयत्वादस्य विधेः सामान्यविषयत्वमिति भाष्यमतमाविष्कुर्व्वन्नाह-अवयवस्त्री विषयत्वात् पुंस्त्वेऽपीत्ययमर्थः । अतिलक्ष्मीशब्दस्य पुंवाचित्वेऽपि लक्ष्मीशब्दस्य स्त्रीवाचित्वान्नदीत्वमिति शेषः ।

९. **वाऽऽम्ङितोः मयूरावस्त्री, स्त्रीत्वे हि, ङिति ह्रस्वो च ।**

आमि ङिति च परे स्त्रीवर्ज्जं मयूरौ नदी संज्ञकौ वा भवतः । श्रियाम्, श्रीणाम्, भ्रुवाम्, भ्रूणाम्, श्रियै, श्रिये, भ्रुवै, भ्रुवे, श्रियाः श्रियः, श्रियां, श्रियि, भ्रुवाम्, भ्रुवि । ङिति ह्रस्वो च, वेरत्वादः, मत्यै, मतये, धेन्वै, धेनवे अस्त्रीति किम् ? नित्यं स्त्रियै । स्त्रीत्व एवेति किम् ? अतिश्रिये विप्राय, सुमतये ।

१०. **चिन्हार्थमित् ।**

चिन्हप्रयोजनमित् संज्ञं भवति । एतीति इत् । सन्यङोर्नकारङकारौ, चङश्च चकारङकारौचिन्हार्थौ क्विब्विचौ सर्व्वावित्यादि ।

११. **इतो लोपः ।**

इत्संज्ञकस्य लोपः स्यात् । बुभूषति, संवित् ।

१२. **सुपो लुगव्ययात् ।**

अव्ययात् परस्य सुपो लुक् स्यात् । स्वः, प्रातः, च वा, वै, विप्रवत्, कृत्वा, कर्त्तुम्, उच्चैकारम् ।

१३. **ऐकार्थ्ये च ।**

एकार्थीभावे गम्ये सुपो लुक् स्यात् । पुत्रीयति, हंसायते, राजपुरुषः, पौर्व्वशालः ।

---

९. पूर्वेण निषेधसिद्धावाम्ङितोर्विकल्पितनदीत्वं सेयुवोरभिधीयते ।

१०. सन्यङोर्नङावितौ । क्वि-विचोः सर्वाविति च आदिशब्दाज्जस्-औट्-शस्-टा, ङे-ङस्-ङि-सुपां ज, ट, श, ट, ङ, प, ङ, इतः । एवमन्येऽपि ।

११. किमितः प्रभृति लोपोऽधिक्रियते किंवा चिन्हार्थतो लोपः क्रियते । नाऽऽद्यः, सुपो लुगव्ययादिति वक्ष्यमाणत्वादित्याह इत्संज्ञकस्येति ।

१२. नन्वव्ययेभ्यो विधीयमाना विभक्तिर्लुप्यत एव ततस्तु कारकार्थप्रतीतिरसाधारणीभिर्ज्जन्यते किं भिन्नवाक्यतापक्षमाश्रित्य सुब्विधानेन ? सत्यम्, प्रथमैकवचनमव्ययादुत्पद्यते तदपि पदसंज्ञार्थमेव असाधारणीभिः क्रियाभिरेव कारकार्थप्रतीतिः, यथा स्वरारूढः स्वपततीत्यादि । यद्येवं सोर्लुगित्युच्यताम्, किं सुपो लुगित्यनेन ? साधूक्तम्, सुप इति ग्रहणं परार्थमपि । अन्ये तु भिन्नवाक्यतामाश्रित्य सामान्याव्ययेभ्यः सुप जनयित्वा लुम्पन्ति ।

१३. पदानाम्प्रत्ययैर्योगः (समासो यत्र वा भवेत्) परस्परसम्बद्धार्थानां योगश्चैकार्थ्यम्, वृत्तिश्च शब्दानां शक्तिवचित्र्यादैकार्थ्यमुपपद्यते । ऐकार्थ्यीभावमापन्नेषु पदेषु प्रत्ययेषु च, सुपो लुप्यन्त इत्यर्थः । अत उक्तमेकार्थीभाव इति ।

१४. सूत्रे बहुलम् ।

सूत्रे क्वचित् सुपो लुक् स्यात् ।

१५. अव्ययीभावादनतः ।

अव्ययीभावात् सुपो लुक् स्यात् । उपाग्नि. अधिस्त्रि । अनत इति किम् ? उपकुम्भम् ।

१६. अतोऽमपञ्चम्यास्तृतीयासप्तम्योश्च वा ।

अदन्तादव्ययीभावात् सुपोऽम् भवति । उपकुम्भम् । अपञ्चम्या इति किम् ? उपकुम्भादागतः । तृतीयासप्तम्योश्च वा, उपकुम्भेन्, उपकुम्भं वा, व्यवस्थितविभाषया श्रद्धा-नदी-समासे नित्यं सप्तम्याः, सुमद्रम्, उन्मत्तगङ्गं धेहि, अत इति किम् ? उपाग्निः ।

---

१४. बहुलशब्दार्थं विवृणोति क्वचिदिति । आदि शब्दात् त्वमहं सुना, जसा यूयं वयम्, वां नौ इत्यादि ।

१५. इह स्वरूपं शब्दस्य इति न्यायादव्ययीभावपदेनाव्ययीभावसमास उच्यते, अत एवानत इति विशेषणमुपन्यस्तम् । अत्र विधये विशेषणम् (१/१/३१) इति न्यायाददन्तेतरोऽव्ययीभावोऽत्र गृह्यते । कथं तर्हि बहूपाग्नि, बहूपवधुरिति ? सत्यम्, गौणमुख्ययो (परि० ८१) इति न्यायाद्बहुव्रीहेरन्यपदार्थप्रधानत्वादव्ययीभावार्थो गौणस्ततो न अतः परमोपाग्नीत्यादावुत्तरपदार्थप्रधानत्वात् कर्म्मधारयस्य स्यादेव, न त्वव्ययीभावस्य, पूर्व्वपदार्थवाचित्वात् तस्य चासत्त्वभूतत्वात् कारकत्वाभावात् कथन्ततो विभक्तिः ? सत्यम्, अग्नेः समीपमुपाग्नि इत्युपशब्दार्थो धर्म्ममात्रमत्र प्रधानम् । यद्यपि गुणभूतोत्तरपदार्थसापेक्षन्तस्य कारकत्वङ्क्रियानिमित्तत्वात् । यथा पञ्चपूलीमानयेत्यत्र समाहारप्रधानोऽपि गुणभूतसमाह्रियमाणपदार्थापेक्षस्यानयनक्रियासम्बन्धः, अन्यथानुपपत्तेरिति । अग्नेः समीपं, स्त्रीष्वधिकृते ओति विगृह्य, अव्ययं (४/३/४) इति समासः अव्ययीभावश्च (४/३/१०९) इति नपुंसकत्वम्, ह्रस्वो नपुंसके (४/३/१२८) इति ह्रस्वत्वञ्च ।

१६. कुम्भस्य समीपम् (4/3/4) इत्यव्ययीभावः । चकारो वाक्यभेद, श्रद्धा-नदी समासे नित्यं सप्तम्या इत्युपलक्षणम्, तेन वाश्यासमासेऽपि, तथा च पाणिनिः, श्रद्धा-नदी-समासे संख्यान्त्रयेभ्यो नित्यम्, श्रीपतिरपि श्रद्धार्थ नदीवंशयाव्ययीभावादसप्तम्या इत्यसूत्रयत् ।

१७. हलङ्याप: सुलोपो दीर्घात् ।

हलन्तादेः सुलोपः स्यात्, वाक्, नदी, माला । आप इति किम् ? तापादेरेकदेशस्यापकारस्य ग्रहणम् । करीषगन्ध्या देवता । हलङ्याप इति किम् ? धीः, लक्ष्मीः, शुभंया, दीर्घादिति किम् ? निर्त्राराणासिः (सी), धृतपालः ।

१८. एङ ह्रस्वात् सम्बुद्धेः ।

एङो ह्रस्वन्तश्च सुलोपः स्यात् । हे बाले ! हे वायो ! हे विप्र !

१९. ह्रस्वस्य गुणो वा तु क्लीबे ।

सम्बुद्धिः सम्बन्धिनो ह्रस्वान्तस्य गुणः स्यात् । हे कवे ! हे धेनो ! हे कर्त्तः ! वा तु क्लीबे ! हे वारे ! हे वारि ! हे कर्तृ ! रूपं हे नदि । ह्रस्वविधानसमर्थ्यात्र गुणः ।

२०. मातुर्मातोहर्हत्पुत्रार्थेऽकपि ।

अर्हत् पुत्रार्थे मातुः सम्बुद्धेर्मातः स्यात् । हे गार्गीमातः ! त्वं धन्योऽसि ! अकपीति किम् ? हे गार्गीमातुकः ।

---

१७. हल्ग्रहणमनर्थकम्, यतस्तद्युक्तस्य सो संयोगान्तत्वाल्लोपेन भाव्यम्, मैवम्, क्वचित् संयोगादिलोपोऽपि सम्भाव्येत । नन्वर्थवद् ग्रहणेनानर्थकस्य (परि० ७) इति न्यायादाबन्तादेव सुपोलुग् भविष्यति न यथा यावताबन्तात्, तत्कथमुक्तमपि इत्यादि ? सत्यम्, तत्र तत्र पकार करणसामर्थ्यात् । अन्यथा वैयर्थयः प्रसङ्गः ।

१८. (२/२/८) सूत्रं दृश्यम् ।

१९. सम्बन्धिन् इति सम्बन्धोऽत्र परयोगलक्षणस्वरूप एव । यावत्सम्भवस्तावद् विधिः (परि-८९) इति न्यायादकारस्य गुणो नास्तीति परिहरन्नुदाहरति हे कवे इत्यादि । हे वारीत्यतः प्राङ् नोदाहृतम् । ह्रस्वविधानसामर्थ्यादिति, अन्यथा ह्रस्वं परिहृत्य गुणमेव विदध्यात् ।

२०. अर्हतः पुत्रस्यार्थ इत्यनेन पूज्यपुत्रादन्यपदार्थ इत्युक्तम् । तेन पुत्रस्तुताविति तात्पर्यम् । अकपीत्यनेन समासान्तविधिरनित्य इति सूचितम् । बहुव्रीहिवत् च मातृकस्यः ऋदादेरत् । पुत्रस्तुतौ सम्बुद्धाविति श्रीपति । सम्बुद्धौ मातुर्मतिः पुत्रयोः अर्हत इति पुरुषोत्तमः । नद्यृतश्चेति रूपोऽपवाद इति च । मातुरित्यनेन कपोऽप्रसक्तौ यदकपीत्युक्तम् तत्रेदं प्रतीमः निरकाशत्वादपवादत्वाच्च प्रथमतो मातादेश एव प्रवर्त्तते, यदा तु कदाचित् परत्वमाश्रित्य कप् प्रवर्त्तते तदा न स्यादिति । किन्तु समुदायादेकदेशश्चिन्त्यः । पुत्र इति किम् ? गार्गीमातः कन्ये ! अर्हदिति किम् ? अरे दासीमातः ।

२१. ह्रस्वोऽम्बार्थः नदी-पुंश्चतुरनडुहाम् ।

सम्बुद्धेरेषां ह्रस्वः स्यात् । हे अम्ब ! हे अक्क ! हे अल्ल ! हे अत्त ! नद्यादेः—हे नदि ! हे लक्ष्मि ! हे वधु ! हे पुमन् ! हे प्रियचत्वः! हे अनड्वन्! भ्रुवश्चान्यपदार्थे ! हे सुभ्रु ! ड-ल-कवतीनामम्बार्थानां ह्रस्वनिषेधः । हे अम्बाडे । हे अम्बाले । हे अम्बिके । नदीति किम् । हे श्रीः ! हे भ्रूः ! हे धीः! ।

२२. एदापः ।

सम्बुद्धेराप एद् भवति । हे बाले ! हे माले !

२३. भवत्-भगवतघवतां वा वन उस् ।

एषां सम्बुद्धेर्व्वन स्थाने उस् वा स्यात् । हे भोः ! हे भवन् ! हे भगोः ! हे भगवन् ! हे अघोः ! हे अघवन् !

२४. उशनसः सो-नो वा लुग्वा च ।

उशनसः सम्बुद्धेः सस्य नो वा स्यात्, लुग्वा च । हे उशनन् ! हे उशन् ! हे उशनः !

२५. प्रचेतसो राजनि रो वा ।

सम्बुद्धेरस्य राजनि परे सो रो वा स्यात् । हे प्रचेतो राजन्, हे प्रचेतोराजन् । सम्बुद्धेरिति निवृत्तम् ।

---

२१. सम्बुद्धेरिति सम्बुद्धिसम्बन्धिनामित्यर्थः । अम्बा (र्थो) अर्थो येषान्ते तथा । अम्बार्था अम्बापर्य्याया इत्यर्थः । हे पुमन् अत्र यावत् सम्भवः (परि० ८९) इति न्यायात् पुमान्स् आदेशे कृते अकारस्य ह्रस्वत्वम् । अम्बार्थत्वनदीत्वभावाद् भ्रूशब्दस्य कथं ह्रस्वत्वमित्याह भ्रुव इति बहुव्रीहौ, क्वचित्तत्पुरुषे चास्य ह्रस्वत्वम् । इहाम्बा शब्दो द्विस्वरस्तत्साहचर्य्यादपरोऽप्यम्बार्थो गृह्यमाणो द्विस्वर एव गृह्यत इत्याह, ड-ल-कवतीनां बहुस्वराणामम्बार्थानां स्त्रीणां ह्रस्वो न स्यादिति। कथं तर्हि हा पितः सुभ्रू ! इति भट्टिः । प्रमाद एवायमिति बहवः । ह सुभ्रु ! इत्येवं युक्त एव पाठः ।

२२. एक वर्णो विधिरन्त एव प्रवर्त्तत इति न्यायात्, भोक्तुकामन्यायाद् वा प्रागुक्तन्यायात् हे कारीषगन्ध्य । हे देवते ! हे खल्ये ! इत्यादि ।

२३. इह वन् ग्रहणात् स्त्रीनपुंसकयोरुस् न स्यात् । डवत्वन्तोऽयं भवत् शब्दो न तु मत्वन्तः शत्रन्तो वा । अव्ययमपि भोः शब्दोऽस्ति । भगोः अघोः शब्दयोरप्यव्ययत्वञ्च तुग्रन्थ्यां व्यवस्थितम् ।

२४. उशनसः सः उशनसः, न इत्यकार उच्चारणार्थः । तस्यैव लुक् चोभयमेव विकल्प्यते रूपत्रयार्थम्, सान्तं नादन्तमदञ्चेति व्याघ्रभूतिः ।

२५. स इत्यनुवर्त्तत इत्याह स इति । सम्बुद्धिप्रकरणाद् राजन् शब्दोऽपि सम्बुद्धान्तो ग्राह्यः । तेन हे प्रचेतसो राजा स्त्रीत्येवं स्यात् । प्रकृष्टञ्चेतोऽस्येति प्रचेतस्, तत्सम्बोधने ।

२६. **अष्टन आद् वा सुपि ।**

सुपि अष्टनः सम्बन्धिनो नस्याद् वा स्यात् । अष्टौ, अष्ट वा, अष्टाभिः अष्टभिर्वा । अन्यार्थेऽपि – प्रियाष्टा, प्रियाष्टानौ, प्रियाष्टानः ।

२७. **जस्शसोरष्टाभ्य औः स्वार्थे ।**

कृतात्त्वादष्ट-शब्दात् जस्शसोरौ स्यात् । अष्टौ अष्टौ परमाष्टौ । स्वार्थे इति किम् ? प्रियाष्टाः विप्राः ।

२८. **डतिष्णन्तसंख्याभ्यो लुक् ।**

डतिप्रत्ययान्त—षकार-णकारान्ताभ्यः संख्याभ्यो जस्शसोर्लुक् स्यात् । कति सन्ति, कति पश्य, षट्, पञ्च, सप्त, नव, स्वार्थ इत्येव, प्रियकतयः, प्रियकतीन्, प्रियपञ्चानः, प्रियपञ्चञ्चः । (कति शब्दस्य नित्यबहुत्वम् ।)

२९. **अम्यतैकः पूर्व्वोऽक् ।**

अमि परे तस्य अता सह पूर्व्वोऽगेको भवति । देवम्, रमाम्, कविम्, नदीम्, धेनुम्, वधूम् ।

---

२६. इहानुकृतानुकरणयोर्भेदस्य विवक्षितत्वात् संख्यार्थो नास्तीत्येकवचनम् एकवर्णोविधिरन्त प्रवर्त्तत इति न्यायान्नकारस्याकारो भवति सूत्रत्वादनोऽकारो न लुप्यते इत्येके । अन्ये त्वष्टानां नः अष्टन इति समासमिच्छन्ति, तन्मतमाश्रित्याह अष्टनः सम्बन्धिनो नेष्यति । इह गौणमुख्ययोर्मुख्ये कार्य्यसम्प्रतिपत्तिः (परि० ८७) इति नाद्रियते स्वार्थ (इत्य) स्य वक्ष्यमाणत्वादित्याहान्यार्थेऽपीति । प्रिया अष्ट येषामिति विग्रहः इयान् विशेषः, आत्वपक्षे विसर्गान्त इति ।

२७. कथमष्टानुवृतिमपहायाष्टाभ्य इत्युक्ताम् ! पञ्चम्यर्थप्रतीत्यर्थम् विभक्ति विपरिणामस्य सत्त्वात् । उक्तञ्च धर्म्मिकल्पनातो धर्म्मकल्पनैव श्रेयसीति । उच्यते—भवेदेवं यदि कृतात्त्वोलभ्येतेत्याह कृतात्त्वमिति ।

२८. षश्च नश्च ष्णौ, टुना (१/२/६२) इति णत्वम्, तावन्तौ यस्याः सा ष्णान्ता, सा चासौ संख्या चेति कर्म्मधारयः डतिश्च ष्णान्तसंख्या चेति विधये विशेषणमन्त्यम् (१/२/३१) इति न्यायात् डत्यन्तो गृह्यत इत्याह डतिप्रत्ययान्त इति । अन्तग्रहणं स्पष्टार्थम् ।

२९. सप्तम्याञ्च परे तस्मिन्निति पूर्व्वो लभ्यत एव । किम्पूर्व्वंइत्यनेन ? सत्यम् । परसूत्रार्थम् तत्राव्यवहितपूर्व्वो दीर्घो यथा स्यादिति । नन्वेकोऽमतोलुगिति कृते सिध्यति, किङ्गुरुकल्पनेन ? स्पष्टार्थमिति ।

३०. शसि दीर्घः पुंसि तु सश्च नोऽगवादेः ।

शसि परे तस अता सहपूर्व्वोऽग्दीर्घो भवति । जायाः, नदीः, धेनूः, वधूः, मातॄः, पुंसि तु सश्च नः —विप्रान्, वायून्, पितॄन् । अगवादेरिति किम् ? गास्तुङ्गान्, अजाः, अग्रेगाः, उदधिक्राः । हाहास्तु वा । (हाहस्तु वेति क्वापि), हाहाः, हाहः, हाहान् वा ।

३१. नामि ।

नामादेशे नामि परे पूर्व्वोऽग्दीर्घो भवति । देवानाम्, बालानाम्, अग्नीनाम्, नारीणाम्, धेनूनाम्, पितॄणाम् । नामीति किम् ? कर्म्मणाम् ।

३२. नॄणाम् वा ।

नृशब्दस्य दीर्घो वा स्यात् । नॄणाम्, नृणाम् ।

३३. न तिसृचतस्रोः ।

अनयोर्नामि न दीर्घः स्यात् । तिसृणाम्, चतसृणाम् ।

३४. त्रिचतुरो स्त्रियां तिसृचतस्रोऽचि तु रान्तावनामि

स्त्रीलिङ्गे वर्त्तमानयोः त्रिचतुरोः स्थाने तिसृचतसृ इत्येतौ भवतः । तिसृभिः चतसृभिः । अचि तु—रान्तौ, तिस्रः, चतस्रः । आमि निषिद्धौ, तिसृनाम्, चतसृणाम्, स्त्रिया अन्यलिङ्गत्वे च प्रियास्तिस्रा यस्य स प्रियतिसा, प्रियचतसा, प्रियतिस्रौ, । नान्य लिङ्गस्य स्त्रीत्वे, स्त्रियाः त्रयो यस्याः सा प्रियत्रिः, प्रियचत्वाः स्त्री । (प्रियतिसृ, प्रियतिसृणी, प्रियतिसृणि, प्रियतिसम्, प्रियतिस्रा इत्यादि । आमि प्रियत्रयाणामिति विशेषः ।

---

३०. अगवादेरिति किम् ? नकारं निषिध्यति प्रत्यासन्तेः तुङ्गानिति विशेषणं पुंस्त्वप्रतिपत्त्यर्थम् ।

३४. अचि तु रान्तावित्यमोऽन्यस्मिन्निचितौ तिसृ-चतस्रौ रान्तावादिश्यते ? न च वाच्यम्, एको यणचीति सिद्धचति, किमनेनेति ? एतस्य बाधकबाधनार्थत्वात् । तेन रेफबाधकानि यानि ऋतोङ्योटोरित्यादीनि तानि न प्रवर्त्तन्ते । नन्वामः परत्वान्नित्यत्वाच्च नामादेशो भविष्यति ततोऽजादित्वाभावाद्रेफप्रवृतिर्न साधीयसी, तदा निषेधः किमवलम्ब्यताम् ? मैवम् नित्यादन्तरङ्गम् (परि० ५२) इतिन्यायादन्तरङ्गप्रकृत्याश्रितादेशः प्रत्यादेशं बाधितुमीष्टे, अथ तथाप्यनामीति मा वादीः,यदि षष्ठीबहुवचने परे रेफः प्रवर्त्तिष्यते तदा दीर्घः क्व समगंस्वयत यदा तिसृ-चतस्रोरिति दीर्घनिषेधो विधीयते? सत्यम्; नामीति वक्तव्ये यदनामीति समस्तं निर्दिष्टं तज्ज्ञापयति, नकारोपलक्षिते रेफान्तादेशो न प्रवर्त्तेत इति । तथाह्याम् तावन्नामादेशनकारोपलक्षितस्तेन॰

३५. **आमोनाम् रषनान्तसंख्याह्रस्वनद्यापस्त्रेस्त्रयश्च ।**

रेफ-षकार-नकारान्तसंख्याभ्यो ह्रस्वान्तात् नदीसंज्ञकादारन्ताच्च परस्यामो नामादेशो भवति । र-ष-नान्तसंख्याभ्यः स्त्रार्थ एव—चतुर्णाम्, षण्णाम् । पञ्चानाम् परम्पञ्चानाम् । नेह प्रियञ्चपञ्च्याम् । ह्रस्वात्—विप्राणाम्, कवीनाम्, वायुनाम्, तिसृनाम् । नद्यादेः—नदीनाम्, लक्ष्मीणाम्, भीरूणाम्, आपः—खट्वानाम् । त्रेस्त्रयश्च स्वार्थ एव—त्रयाणाम् । नान्यपदार्थे—प्रियत्रीणाम् । एभ्य एवेति किम् ? खलप्वाम्, ग्रामण्याम्, हाहाम् ।

३६. **टा नाऽस्त्रियामदो घेः ।**

अदसो घ्यन्ताच्च परष्टा ना स्यात् । अमुना, वायुना, मधुना । पूर्व्वविप्रतिषेधे नुम् न भवति । अस्त्रियामिति किम् ? अमुया रत्या ।

मन्येऽपि यो नुमागमो नकारोपलक्षितजातिप्रत्ययस्तस्मिन्नपि न प्रवर्त्तत । यथा प्रियतिसृणी कुले । यथा तु समासप्रकृतिः पुंन्नपुंसकयोर्वर्त्तते त्रि चतुरी च स्त्रियाम् तदापि तिसृचतस्रौ भवत एव । न शब्दाश्रये गौणमुख्यव्यवहार इत्याह स्त्रिया अन्यलिङ्गत्वे चेति । प्राक्, स्त्री त्रि-चतुरन्तस्य तिसृ-चतसृ इति सूत्रं विधाय प्रियतिसृ, प्रियत्रि, प्रियचतसृ, प्रियचतुःकुलमिति श्रीपतिः । स्वमते तु नित्यमेव । तथा भाष्यटीकाकृता लुकाङ्गकार्य्यन्निषिध्यते । स्वमोर्लुक्यङ्गकार्य्यत्वात्तेन तिसृचतसृ नित्यमित्युक्तम् । यदा पुनस्त्रिचतुरी पुंन्नपुंसकयोर्वर्त्तते समासप्रकृतिः स्त्रियान्तदैतौ न स्यातामत आह नान्यलिङ्गस्य स्त्रीत्व इति । स्त्रियामित्यस्य प्रत्युदाहरणविषयमिदम् ? एवं त्रयः त्रीणि, चत्वारश्चत्वारिः ।

३५. रश्च षश्च नश्चेति र-ष-णाः, तेऽन्तेषु यस्याः सा रषनान्ता, सा चासौ संख्या चेति कर्म्मधारयः । ततो द्वन्द्वः । ननु विधये विशेषणमन्त्यम् (१/१/३१) इति न्यायात् सिद्धे र ष नान्तेति किमन्तग्रहणेन ? मैवम्, सर्व्वत्र द्वन्द्वसमासशङ्कानिरासार्थम् । र-ष-नान्तसंख्याभ्यः स्वार्थं एवेत्यत्रायं न्यायः गौणमुख्ययोः (परि० ८७) इति । परमेत्यादिकर्म्मधारयस्योत्तरपदार्थप्रधानत्वात् त्रेस्त्रयोऽपि (परि० ८७) अयन्न्यायः ।

३६. मधुनेत्यत्र विप्रतिषेधे (१/१/३४) इत्यत्र क्वचित् पूर्व्वविप्रतिषेधेऽपीति व्याख्यातम् । तेन मधुशब्दात् परत्वात् प्राप्तेऽपि नुम् बाध्यते । अथोभयथापीष्टसिद्धेः किमनया कल्पनयेति ? मैवम्, रायमतिक्रान्तेन कुलेनेत्यत्रातिराणेत्य सिद्धेः ? न च वाच्यम्, सन्निपातलक्षणत्वान्न भवतीति तस्य (परिभाषायाः) अनित्यत्वात् । अन्ये तु अतिरिणेत्येव मन्यन्ते, तन्मते कल्पनेयं लघीयसीति ।

३७. अतष्टा-भिस-ङे-ङसि-ङसामिनैस्-याऽऽत्-स्या-अ-न-व-लोपे ।

अतः परेषां टादीनां स्थाने यथाक्रमं इन, ऐस्, य, आत्, स्य इत्येते स्युः । केन, कैः देवाय, देवात्, देवस्य । अत इति किम् ? खट्वया । अन-व-लोप इति किम् ? राजभिः, वृक्षव्— वृक्षभिः ।

३८. एद्भ्यस् साम्सुप्सु ।

अर्थवशाद् विभक्तिविपरिणामः । भ्यसादौ परे अतः स्थाने एद् भवति । केभ्यः केषाम्, केषु । अ-न-व लोप इत्येव—राजभ्यः, वृक्षव्-वृक्षभ्यः ।

३९. अयोसि । आपष्टाति च ।

ओसि परे अतोऽय् भवति । आपष्टासम्बन्धिन्याति (ओसि च) । विप्रयोः, खट्वयोः, खट्वया ।

४०. भ्याम् यि दीर्घः ।

भ्यामि यकारे च परे अतो दीर्घः स्यात् । देवाभ्याम्, देवाय, अ-न-व लोप इत्येव—राजभ्याम्, वृक्षव्—वृक्षभ्याम् ।

४१. इदुतोरौता ।

सुप् औता सह इदुतो दीर्घः स्यात् । पती, धेनू । तपरः किम् ? नद्यौ, धीबन्ध्वौ ।

४२. ङेरौरच्च घेः ।

इदुतो सम्बुद्धिनो ङेरौः स्यात् । सख्यौ, पत्यौ, अच्च घेः, कवौ, धेनौ ।

---

३७. ऐसातोः (ऽ) करणादतिजरसैरतिजरसादित्येके । स्वमते त्वकारलोपः स्यादेव (इत्यैसादि) कृतम् । नवोर्लोपः अत्र न वेत्युपलक्षणं, तेत कलातोऽपि न स्यात्, यथा अश्वयुजमाचक्षाणैरश्वभिः । एतेन लक्षणप्रतिपदोक्तयोः प्रति पदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्येत्यनित्यत्वं ख्यापितम् ।

३८. अत्र धार्म्मिकल्पनातोधर्म्मकल्पनैव-प्रेयसीति दर्शितम् । अथाकारादेदिति कृतेऽदेत्यपदान्तस्याजसीत्यकारलोपो भविष्यति किमनेनेति ? सत्यम् सन्निपातलक्षणो विधिः (परि० ४०) इत्यकारलोपप्राप्तेः ।

३९. इहाप्येदनुवर्त्तमाने यदन्तकरणन्तदुक्त (४०) परिभाषाविषयार्थम् । आपष्टेति च कृतेऽपि स्वेष्टसिद्धे यदादित्युक्तं तदपि सुखार्थमेव ।

४०. अत्रापि उपलक्षणत्वादश्वभ्याम् ।

४१. धीर्बन्धुर्यस्याः सा धीबन्धूः, ऊङूतं (५/२/५४) इत्यूङ् ।

४२. ङेरिति सप्तम्येकवचनस्य षष्ठयां रूपन्नतु चतुर्थ्येकवचनस्य, व्याख्यानतः (परि० ८८) इति न्यायात् ।

४३. जसि गुणः।

जसि परे इदुतोर्गुणो भवति। पतयः, धेनवः।

४४. ङिति घेरतसादौ।

ङिति परे घिसंज्ञकस्य गुणो भवति। अग्नये, धेनवे, वायोः। घेरिति किम्? धेन्वै, सख्ये, पत्ये। अतसादाविति किम्? कुतः, कुत्र, क्व, सुपीत्येव, पट्वी।

४५. ऋतो ङ्यौटोः।

ङि औटोः परयोर्ऋदन्तस्य गुणो भवति। पितरि, पितरौ, पितरः, पितरम्, पितरौ। एवं मातृ, भ्रातृ, दुहितृ, यातृ, जामातृ, नृ, ननन्दृ (ननान्दृ) देवृ। नानिजश्लिष्टस्यैकस्य, न ऋ—अनृम्।

४६. ऋता ङसिङसोरत उः।

ऋदन्तस्य ऋता सह ङसि ङसोरत् उर्भवति। पितुः, कर्त्तुः।

४७. ख्यत्याच्च।

खि, ति, ह्रस्वो च, खी, ती, दीर्घो च, अनयोर्यययोयणादेशः क्रियते, तयोः कृतणादेशयोरिदं ग्रहणम्। ख्यत्यात् परस्य ङसि ङसोरत् उर्भवति। सख्युः, पत्युः, सखायमिच्छति, सखेवाचरतीति क्यच् क्यङन्तात् क्विब् यलोपः—सखीः, सख्युः। एवं पतीः-पत्युः। नखमिच्छति नखीयति, नखीः-नख्युः। त्यग्रहणात्तादेशनोपधस्यापि, लुनीः—लुन्युः, धूनीः—धून्युः। इह कस्मान्न भवति जरत्याः। आकारव्यवधानात्, क्यप्रत्यये क्विबन्तस्यापि अवयवस्त्रीविषयत्वात् पुंस्त्वेऽपि नदीत्वमिति—जरत्याः पुंसः।

---

४३. अत्रापीदुतोरनुवृत्तिः।

४५. अनित्युक्तस्यैकस्य वर्णस्य गुणो न भवतीत्युदाहरन्नाह न ऋ इति, अत्रानुकृत ऋवर्णेन समासः। ऋशब्दोऽत्र वर्णवचनो मातृवचनो देवमातृवचनो वा। अनिजश्लिष्टस्येति किम्? नरौ, नरः।

४६. ऋतेति (२/२/१८) इति तृतीया। इहात इत्यस्यैक मात्रस्य प्रवर्त्तमान उकार एकमात्रः प्रवर्त्तते, न सवर्णसहितस्तावतैव सर्व्वाक्रान्तत्वात्। किञ्चाटेर्यथाच्कालं (२/४/२२) इत्यत्र यथाच्कालमितिवचनं ज्ञापयति आदेश स्वरूप एव प्रवर्त्तत इति। ऋतेति किम्? स्त्रः। ङसिङसोरुस् इति कृतेऽपीष्टसिद्धिः? सत्यम्, पितुः कृतमित्यादावुसन्तस्य विसर्गस्येसुसोः (१/३/१२)इतिषत्वा पत्तेः।

४७. खितीत्यनुकरणम् स्पष्टार्थम्। अथ कथमेतल्लभ्यते? सत्यम्, खितिभ्यामितिभ्यकरणादविशेषाच्चोभयग्रहणम्, सख्युर्यः (५/४/२७८) पत्युरगणादिपूर्व्वात्। (५/२/६८) इति निर्देशादकारद्वयमुच्चारणार्थमेवेति मनसिकृत्य विवृणोति। ततः क्विबित्यध्याहार्यम्।

४८. आ नद्या ङिति ।

ङिति परे नदीसंज्ञकादुत्तरे आकारागमऽस्यात् । नद्यै, लक्ष्म्यै, धेन्वाम्, धीबन्धाम् ।

४९. याऽऽपः ।

आबन्तात् ङिति याऽऽगमः स्यात् । बालायै ; बालायाः ।

५०. औच्छी नपुंसकाच्च ।

आपः, क्लीवाच्च औच्छी स्यात् (शकारश्चिह्नार्थः) बाले, वने, वारिणी, वपुषी । भत्वात्—विदुषी, कूले, सुमुखी, तिरश्ची ।

५१. ङेरामागमाऽनीभ्याम् ।

आगमाकारान्नियश्च ङेराम् स्यात् । नद्याम्, वध्वाम्, बालायाम्, तस्याम् । नी—सेनान्याम्, दिनप्रण्याम्, तिथिप्रण्याम् ।

५२. अचियुक्तश्नुधातुस्त्री भ्रुवामपदान्तेय्वोरियुवौ ।

अगुणवृद्धिविषयार्थं वचनम् । अचि परे संयुक्तश्नुप्रभृतीनां य्वोरिकार-उकारयोरियुवौ यथाक्रमं स्याताम् । आप्नुवन्ति, धातोः—अधीयाते, चिक्षियतुः, श्रियः, धियः, निधूवनम्, कुटादि, तुष्टुवुषे, अक्षद्युवः, स्त्रियै, भ्रुवै, युक्तश्नु-इति किम् ? सुन्वन्ति । अपदान्त इति किम् ? श्र्यर्थम्, भ्र्वर्थम् । परत्वाद् गुणवृद्धिभ्यां बाध्येते—चयनम्, चायकः, प्राप्नवानि । क्वचिन्नानुकरणे—अग्नौचेः ।

---

४८. आकारागम इति । आगमोऽनुपधातेन विकारश्चोपमर्द्दनत् । आदेशस्तु प्रसङ्गेन लोपः सर्व्वापकर्षणात् ।

४९. आप इति किम् ? शुभंये ।

५०. तकारो मुखसुखार्थः, चकारोऽनन्तरोक्तानुकर्षणार्थं इत्याह अप इति । शकारश्चिन्हार्थं इति परप्रसिद्ध्यर्थ एव, (२/३/७९) (२/३/१३७) इत्यादौ इङ्योरिति कृतेऽपि निस्तारः स्यात् ।

५१. इहापि ङेरिति सप्तम्येकवचनस्य षष्ठयां रूपं व्याख्यानात् । नन्वागमाकारस्तावत् सार्थक एव ग्रहीतुं युज्यतेनानर्थकः, ततश्च नद्यामित्यत्रामस्था न पुर्नबालयामिति । उक्तञ्च, अर्थवद्ग्रहणेनानर्थकस्य (प० ७) इति । मैवम् । षष्ठी चावज्ञायाम् (२/२/६२) इति निर्द्देशात्तस्याः परिभाषाया इह नित्यत्वमिति मनसिकृत्योदाहरति बालायां तस्यामिति, दिनप्रण्यामित्येकदेशविकृतम् (परि० ७) इति णत्वेऽपि ङेरामादिश्यते ।

५२. धातुशब्दोऽत्र सामान्येन गौणमुख्ययोर्वर्त्तते सुपोऽधिकृतत्वात् श्नुसाहचर्य्याच्च । स्त्यायतेर्ड्रट्—भ्रमिगमिभ्यां डुः (डुना) इत्यौणादिक सूत्राभ्यां स्त्रीभ्रूशब्दौ व्युत्पादितौ । इण इति वक्तव्ये यत् य्वोरित्युक्तम्, तत् सवर्णग्राहकं स्यान्न

५३. अभ्यासस्यासवर्णे ।

असवर्णे अचि परे अभ्यासस्य य्वोरियुवौ भवतः । इयाय, उवोष, असवर्णे इति किम् ? ऊषुः ।

५४. स्त्रिया वाऽम्शसोः ।

अमि शसि च परे स्त्रिया इय् वा स्यात् । स्त्रियम्, स्त्रियः, स्त्रीः ।

५५. न ह्विणोः सार्व्वधातुके ।

सार्व्वधातुके जुहोतेरिणश्च तौ न स्याताम् । जुह्वति, यन्ति, आयन्, । इण इति किम् ? इको—अधीयन्ति, 'ससीतयो राघवयोरधीयन्' इति भट्टिः । केचिदिह विकल्पयन्ते ।

५६. एरनेकाचोऽसंयुक्तधातोर्यः सवर्णेऽपि ।

असंयुक्तधातोरिकारस्य सवर्णेऽप्यसवर्णेऽप्यचि परे यः स्यात् । जिग्युः, निन्युः, निन्यिरे, निन्युषः, द्विरुक्त्यानेकाच्त्वम् । असंयुक्तेति किम् ? चिक्षिपुः । एर्न केवलस्य, ईयुः, अधीयिरे ।

वेति भ्रान्ति व्युदासार्थः क्वचिनानुकरण इति वदता ग्रन्थकृताऽनुकरणे सर्व्वमनित्यामित्योवेदितम् । अग्नौ च इत्यग्निचित् पदसाधने क्विब्विधायक-पाणिनीयं सूत्रम्, चिय इति माभूत तथा जेर्व्विपराभ्याम् ।

५३. इन्, उष्+लिट्=णलि वृद्धावायादेशेकृते द्विर्वचनं तत इय्, उवां अस्मादेव वचनात् सुबादेशः परनिमित्तकः पूर्व्वविधि प्रति स्थानिवदिति सावकाशको स्यादन्यथा कुत अस्यावकाश उपपद्यताम् ।

५४. शस्साहचर्य्यादमिति द्वितीयैकवचनं गृह्यते । प्राप्ते विभाषेयम् ।

५५. सार्व्वधातुक इति किम् ? जुहवतुः, ईयतुः ।

५६. संयोगोऽस्त्यस्मिन्निति संयुक्तः, अधिकरणे क्तः, नञ् समासः, ततः कर्म्मधारयः, असंयुक्त पार्श्वोधातुरसंयुक्तधातुः, तस्येकारस्येवर्णस्य यो विधीयते । पूर्व्वस्याप-वादः, सवर्णेऽपीत्यापिनासवर्णे इत्यनुकृष्यते, तेन सामान्येऽचीत्यर्थः । यद्यपीहान्य कार्य्यात् परा द्विरुक्तिरिति वक्ष्यति तथापि यावत्सम्भवः (परि० ६९) इति न्यायात् द्वित्वे कृते यः प्रवर्त्तत इत्याह द्विरुक्त्येति । इदं पुनरेकाच् संयुक्त विशेषणाभ्यां व्यज्येत अन्यथा लक्षणानुपपत्तेः । अतएव वक्ष्यति अत्र समासादेने-काच्त्वमिति यद्येवमिण् धातोर्द्विर्व्वचने कृते सन्धेः प्रागनेकाच्त्वे सति कथं यो न स्यादित्याह, एनेति, केवलस्य व्यञ्जनाश्रितस्य इधातोर्न स्यादयमाशयः । अत्राकृतेऽपि सन्धौ भाविनि भूतवदुपचारः (परि० ३३) इति न्यायादेकाच्त्वमेव इमिच्छन्ति इयः, एवं नियौ, लुवौ ।

५७. ओश्च वो नित्यसमासे क्विबन्तस्यासुधियः ।

क्विबन्तानां धातुनां इकार-उकारयोरचि य-वौ स्याताम् । सेनान्यम्. उन्न्यौ, तिथिप्रण्यः, प्रभ्र्यौ, प्रभ्यिवृकाद् बिभ्यतीति वाक्ये वृकभीस्तस्य ङौ वृकभ्यि, अत्र समासादेनेकाच्त्वम् । नित्यैकार्थ्यमात्रे च । मालीयति मालीः— माल्यः ओर्व्वः—खल्वम्, अङ्गदस्त्वम् । इह अमि शसि हि "वातप्रमी ह्वादेधातुवद् वा" वातप्रम्यम्, वातप्रमी" वा; हुह्वम्, हुहूम् वा; हुह्वः हुहून् वा । एवं लग्नहु, शकहु । नित्यसमास इति किम् ? परमनियौ श्रवणधिया, वृकाद्भीरिति विग्रहे वृकभीः, तस्य ङौ वृक्भियि । असुधिय इति किम् ? सुधियौ । धातोरित्येव, विगता ईर्यस्य सः वीः,तस्य ङौ वी । असंयुक्त इत्येव-यवक्रियौ कटप्रुवौ ।

५८. भुवो वर्षा-पुनर्-दृन् (दृन्भू) करकारकाराभ्यः ।

एभ्य एव भुव (ऊर्व्वः) ओर्व्वः स्यात् । वर्षाभ्वम्, पुनर्भ्वौ, दृन्भ्वौम्, करभ्वौ, कारभ्वम्, काराभ्वम् नियमः किम् ? प्रतिभुवौ, स्वयम्भुवा ।

५९. स्वमोर्लुक नपुंसके ।

क्लीबे स्वमोर्लुक स्यात् । दधि, मधु, कर्त्तृ, पयः अहः । ह्रस्वो नपुंसके प्रातिपदिकान्तस्य,—सुद्यु, अतिरि, आतनु ।

६०. अतोऽम् ।

क्लीबे अदान्तात् स्वमोरम् स्यात् । खम्, वनम्, सोमपम् ।

६१. डतरादिभ्यः पञ्चभ्यो डत्वनेकतरात् ।

डतर्-डतम् प्रत्ययान्त, इतर, अन्य, अन्यतर, एभ्यः क्लीबे स्वमोर्डतुः स्यात् । कतरत्, कतमम्, इतरत्, अन्यत्, अन्यतरत् । अनेकतरादिति किम् ? एकतरम् ।

६२. जस्-शसोः शिर्झलचोर्नुम् च ।

क्लीबे जस् शसोः स्थाने शिर्भवति तत्सन्नियोगे झलन्ताजन्तयोर्नुम् च । कर्म्माणि. चत्वारि, सुदिवि, झलचोर्नुम् च—जगन्ति, सदृंशि । सान्तस्य दीर्घः—वपूंषि, सानड्वांहि । न बहूर्ज्जो नुम् । रेफात् परस्य वेत्येके । बहूर्ज्जि, बहुरञ्जि, बहोरन्यत्र नुम् अत्युन्ज्जि, सुन्ज्जि, कुलानि । दधीनि कर्त्तृणि ।

---

५७. अत्र चकारेण एश्च य इत्यनुकृष्यते इत्याह, इकारोकारयोरिति । इह समासस्योपलक्षणत्वात् प्रस्तौति नित्यैकार्थ्यमात्रे चेति इह हीति, हि अवधारणे । इहैव य-व विधौ वातंप्रमातीति वाक्ये निपातनादौणादिक ईः, तस्य चतुष्पदवाचित्वात् द्विलिङ्गताऽप्राप्तौ विभाषा हुहूशब्दस्योत्पत्तिपक्षे उक्तञ्च, अमावातप्रमीं विद्धि शसा वातप्रमिनिति । ङौ वातप्रमी शेषं ग्रामण्या सदृश स्मृतमिति ।

६२. सदृंशीति समान इव दृश्यन्त इति वाक्ये समानान्यतदादेः (४/१/११७) इति क्विन्, (४/४/६२) इति समानस्य सादेशः ततो जस् व शस् स्थाने शिः, नुम्

६३. इकोऽनाम्यचि ।

क्लीबे इगन्तात् स्वाद्यचि परे नुम् स्यात् । दधिनी, वारिणी, मधूनि, कर्त्तॄनि, आमस्तु नामेव-वारीणाम् ।

६४. टाद्यचि भाषितपुंस्कं पुंवद् वा ।

अर्थाद्विभक्तिविपरिणामः । टाद्यचि परे भाषितपुंस्कमिगन्तं पुंवद् वा स्यात् । शुचये, शुचिने, शुचे, शुचिनः कुलस्य । भाषितपुंस्कमिति किम् ? मधुने ।

नकारस्यानुस्वारः दीर्घश्च । वपतेरत्यादिभ्य उस् इत्युस्, अत उक्तं सान्तस्य दीर्घ इति झलन्तत्वेन प्राप्ते निषेधमाह न बहूर्ज्जोनुमिति । बहूर्ज्जोः परयोर्जस् शसो शिः स्यात्, नुम् न स्यात् । वार्त्तिकोऽप्येवम्, शौ वा बहूर्ज्जोर्जः प्राङ् नुमिति मतमाविष्कुर्व्वन्नाह रेफात् परस्य वेत्येके, मस्जेरन्त्यात् पूर्व्वं नुममिच्छतिवत्न्ती प्रत्युदाहरति बहोरन्यत्रेति ।

६३. प्रकरणोपस्थापितस्य सुपोऽचीति विशेषणमित्याह स्वाद्यचीति ।

६४· पूर्व्वपक्षे एक इति पञ्चम्यन्तं तद् विशेषणं भाषितपुंस्कं कथं संगच्छतामित्याहार्थवशाद्विभक्तित्रिपरिणाम इति । अनुपपत्तिमतोह्यर्थाद् विभक्तिविपरिणमते यथार्थः संगच्छते, सैव प्रवर्त्तत इति भावः । टाद्यचीति कर्म्मधारयस्तत्पुरुषो वा । अथ पूर्वस्मादचीत्यनुवर्त्तमाने किमिहाज्ग्रहणेन ? चेन्नैवं मन्दधियां सुखप्रतिपत्त्यर्थम्, न च वाच्यम्, आमि पुंशब्दस्यैकत्वान्नित्यं कप् तत्र बहुलाधिकारात् । ननु केन पुनः पुमान् भावितः इति चेत् यस्य पुंवद्भावविधिरिष्यते तेनैव तस्य प्रत्यासन्नत्वात्, यदि येन केनचित् शब्देन भाषितपुंस्कमित्युच्यते तदा भाषितपुंस्कग्रहणम्मनर्थकं स्यात्, व्यावृत्तेरभावात् अथ बहुव्रीहिणा शब्दश्चेदुच्यते तदा मधुशब्दोऽपि पुंवद्भावं भजते । तथाहि मधुशब्दश्चैत्रादौ पुंसि, र सेतु नपुंसकम् । अथः भाषितः पुमान् यस्मिन्नर्थे स भाषितपुंस्कोऽर्थस्तद्योगाल्लिङ्गमपि वाच्यवाचकलक्षणसम्बन्धादुपचर्य्यते, ततश्च नपुंसके च वर्त्तमानः शुचित्वप्रवृत्तिमादाय वर्त्ततेऽतः शुचित्वलक्षणार्थोऽर्थो भाषितपुंस्क इति । तथा च भगवान् पाणिनिः—समानायामाकृताविति सूत्रितवान् । अस्यार्थः आक्रियेते जन्येते बुद्धिशब्दावनयेत्याकृतिः शब्दस्य प्रवृत्तिनिमित्तत्वम्, तस्यामभिन्नायां सत्याम्, पुंवद् विधीयते इति । इक इति किम् ? ग्रामणिभ्याङ् कुलाभ्याम् । ननु नुमो निवृत्तिरेव प्रयोजनमवसीयते किम्पुंवत्करणेन ? मैवम्, ग्रामण्यः कुलात्, ग्रामण्यां कुलानाम्, पुंवत्त्वे षत्वादिकम् । क्लीबे तु ग्रामणिनः कुलात् ग्रामणीनाङ्-कुलानामिति ।

६५. अस्थि-दधि-सक्थ्यक्ष्णामन्तोऽन् ।

टाद्यचि परे अस्थ्यादेरन्तोऽन् स्यात् । अस्थ्ना, प्रियास्थ्ना, दध्नः, सक्थ्नः, अक्षि । उत्तरप दस्य च, अतिदध्ना । उक्तं क्लीबे ।

६६. रायो वा हल्यतसि ।

हलादौ सुपि परे रायो रा भवति । राः, बहुराः, राभ्याम् । क्लीबेऽप्यसौ—अतिराभ्यां कुलाभ्याम् । हलीति किम् ? रायौ । अतसीति किम् ? रैतः ।

६७. वाऽऽचि जराया जरस् ।

अजादो सुपि जराया जरस् वा स्यात् । जरे जरसौ (जरसी), जराम्, जरसम् । अत्यादिप्रयोगे च । अतिजरम् अतिजरसम्, विप्रं कुलं वा । क्लीबे अम्भावे लुको विप्रतिषेधाज्जराजदेशे कृते पुनर्लुक् न भवति । सकृद् गतो विप्रतिषेधो यद्बाधितं तद्-बाधितमेव । इह जरसो विधेरत इति विहितः, सुबादेशविधिः पूर्वस्तथाहि अतिजरेण अतिजरसिन, अतिजरैः, अतिजरसैः अतिजरात् । अतिजरसात् । अचीति किम् ? अति-जराय, आमि त्वनियमः—अतिजराणाम्, अतिजरासाम् ।

---

६५. इहापीक इत्यनुवर्त्तते, अन्यथा अक्षिसक्थिभ्यां (५।१।११९) इत्यनेन समासान्ते कृते, एकदेशविकृतमनन्यवत् (परि० ३) इति न्यायात् प्रत्यक्षेण प्रियसक्थेनेत्य-त्रापि स्यात् ? अथ ग्रह्यवता प्रातिपदिकेन न तदन्तविधिरिष्टइत्यस्यानित्यत्वात् इह तदन्तविधिः प्रवर्त्तत इत्याह—उत्तरपदे दस्य चेति । केवलस्य त्वाद्यन्त-वदेकम् (परि० २८) इति न्यायात् । उक्तं क्लीब इति, तेन संज्ञायां क्लीबत्व-व्यभिचारात् पुंसि न स्यात् । यथास्थिना छात्रेण । एवं साहचर्यात् क्विनन्त-दधिशब्दस्य वाच्यलिङ्गत्वान्न स्यात् । यथ दधिना, द्विजेनेति तात्पर्य्यम् । इहानोऽकारस्य प्रयोजनं (४।३।१३७) सूत्रे द्रष्टव्यम्, यथा दध्नि दधनि ।

६६. इह तदन्तविधिरिष्यत एवेत्याह बहुरा इति । बहुरा रायो धनानि यस्य स तथा । अथैकदेशविकृतमनन्यवदिति न्यायादिहापि स्यादित्याह क्लीबेऽप्य-साविति, स्यसौ न स्यादित्यर्थः । अथ कथमेतदङ्गिकार्य्यत्वात् प्राप्नोत्येव, मैवम्, सुपोऽधिकृतत्वात् अचीत्यस्य वक्ष्यमाणत्वाद् हलि सुपि विधौ प्राप्ते हल्ग्रहणं तत् साक्षाद् हल्सुप्प्रतीत्यर्थम् तेनातिरि कुलम् । रायमतिक्रान्तानां ब्राह्मणकुलानामतिराणामित्यत्र परत्वान्नामीति दीर्घत्वं बाधित्वानेनात्त्वम्भव-तीति षष्ठीवरः ।

६७. अत्रापि तदन्तविधिरस्तीत्याहात्यादि प्रयोग इति । अतोऽमित्यत्राकारकरण प्रयोजनमाहतिजरसङ्कुलमिति, व्यक्तिपक्षमाश्रित्याह क्लीब इत्यादि । अय-मर्थः—व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणं भिद्यत इति न्यायात् पर्य्यायेण द्वावपि

६८. **आत् सुना-सखि-ऋदुशनः पुरदंशोऽनेहोऽन्तस्यासम्बुद्धौ ।**
सुना सह सख्यादेरन्तस्याद् भवति । सखा, कर्त्ता, उशना, पुरुदंशा, अनेहा । असम्बुद्धाविति किम् ? हे सखे ! हे पितः ! हे अनेहः ।

६९. **सखि-तृन्-तृच्-स्वसृ-नप्तृ नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄनां वृद्धिरौटि ।**
एषामौटि प्रत्याहारे वृद्धिः स्यात् । सखायौ, सखायः, सखायम्, सखायौ, कर्त्तारौ, स्वसारौ, नप्तारौ, नेष्टारौ, त्वष्टारौ, क्षत्तारौ, होतारौ, पोतारौ, प्रशास्तारौ । औटीति किम् ? सखीन् ।

७०. **गो-द्यवोः सुटि ।**
सुटि परे गो-द्यवोशंब्दर्योर्वृद्धिः स्यात् । गौः, हे गौः ! गावौ, गावः । द्यौः, हे द्यौः, द्यावौ, द्यावः । अयि तक्रकौण्डिन्यन्यायेन विशेषविधिना बाध्यते ।

७०. **आदोतोऽम्शसोः ।**
अमि शसि च परे ओत आत् स्यात्, गाम्, गाः, द्याम्, द्याः ।

(इत्यजन्तशब्दविवेकः)

विधी प्राप्तौ, यथा ब्राह्मणाभ्यामेकस्मिन् भाजने क्रमेण भुज्यते तत्र विप्रतिषेधे परमिति न्यायाद् विप्रतिषेधे परमेव—न पूर्व्वम्, न चैतेन पूर्व्ववाक्यस्यानर्थक्यमिति वाच्यम्, विप्रतिषेधसूत्रेण तस्यासत्त्वख्यापनात्, तदेव विवृणोति लुको विप्रतिषेधाद् अम्भावेन हेतुना पुनर्लुङ् न स्यात्, तथा सकृदित्यादि ।

६९. ननु सखि तृन्-तृच्-स्वसृणां वृद्धिर्विधीयताम् नप्त्रादयस्तृजन्ता एवोणादौ निपातितास्तेषाम्तृजन्तत्वेनैव वृद्धिः सेत्स्यतीति । शासिक्षदादेः संज्ञायास्तृजनिट् । मैवम्, द्विविधा हि शब्दा, व्युत्पन्ना अव्युत्पन्नाश्च तत्राव्युत्पन्नपक्षे विधिः व्युत्पत्तिपक्षे तु नियमः । संज्ञाशब्दानां मध्ये नप्त्रादीनामेव ग्रहणं यथा स्यात्, अन्यथा पित्रादिशब्दस्यापि व्युत्पत्तिपक्षे वृद्धिः प्रसज्यते ।

७०. द्युति-गमिभ्यां डोरित्युणादौ साधितावेतौ गौणमुख्ययोः इति मुख्यगोशब्दस्यायं विधिः, तेन चित्रगु-विमलद्युशब्दयोर्न स्यात् ।

७१. अम्-शसोर्व्वा इत्यकरणादेकवर्णविधिरन्त एव प्रवर्त्तत इति परिभाषा नाङ्गीकृता । किञ्च ओमित्यादन्तमात्रोपलक्षणम् मन्तव्यम् । महान् उः, महौः महावौ स्मृत उर्ष्येञ्ज स स्मृतौः । महां महाः, स्मृतां स्मृता इति श्रीपतिः ।

(अथहलन्ताः)

७२. **सादि स्थाने पुंसः पुमानस् ।**

अत पुसः पुमानस् स्यात् । सनुम्क आदेशोऽयम् । पुमान्, पुमांसौ, पुमांसः । पुमांसम्, पुमांसौ । अन्यार्थे सुटि स्त्रियां पुंसोऽपि ङीमिच्छन्ति, प्रियपुंसी, प्रियपुंस्यौ । शसादौ-प्रियपुंसः, प्रियपुंसा स्त्रियांम् । अकपीति किम् ? प्रियपुंस्का स्त्री ।

७३. **पथि-मथ्यृभुक्षामेरात्थो न्थ सौ तु नश्चात् ।**

एषां सादिस्थाने इकारस्याद् भवति । सौ तु नकारस्याऽऽत् तत्सन्नियोगे थकारस्य न्थादेशः । पन्थाः, पन्थानौ, पन्थानः । हे पन्थाः ! मन्थाः, सुमन्थाः, ऋभुक्षाणौ ।

७४. **चतुरनडुहोराम् हः सौ नुम् च ।**

सादिस्थाने अनयोराम् स्यात् । हान्तस्य सौ नुम् च । चत्वारः, अनड्वान्, अनड्वाहौ । अन्यार्थे च, प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः । प्रियानड्वान्, प्रियानड्वांहि । सादिस्थान इत्येव—प्रियानडुत् कुलम् ।

७५. **अनडुहः स्त्रियां वा ।**

स्त्रियामस्यां वा स्यात् । अनड्वाही, अनडुहीवा, गौरादि ।

७६. **उगिदचोर्नुम्धातोः ।**

अनयोः सादिस्थाने नुम् भवति । उगितः—श्रेयान्, विद्वान्, विद्वांसौ, उपेयिवान् महान्, महान्तौ, बृहन्, बृहन्तौ, पूषन् पूषन्तौ, भवन्-भवन्तौ । अञ्चेर्लुप्तनकारस्य—प्राङ्, प्राञ्चौ । अधातोरिति किम् ? उखास्रत्, पर्णध्वत् ।

७७. **युजेरसमासे ।**

युजेः सादिस्थाने नुम् स्यात् । युङ्, युञ्जौ, युञ्जः, युञ्जम् । असमास इति किम् ? अश्वयुक् ।

७८. **नाभ्यस्ताच्छतुः शौ तु वा ।**

द्विरुक्त-जक्षादिषट् के अभ्यस्तम्, तस्माच्छतुर्नुम् नास्ति । दरत्, जुह्वत्, जक्षत्, जाग्रत्, दरिद्रत्, चकासत्, शासत्, शासतौ । शौ तु वा—ददति-ददन्ति कुलानि, जक्षति-जक्षन्ति ।

---

७२. इह परत्वात् सम्बुद्धौ नस्याकारस्ततः स्थानिवद्भावान्न सुलोपइत्याह हे पन्था इति ।

७७. अत्र सूत्रे इकारनिर्द्देशाद् युजिर्योग इत्यस्यग्रहणम्, न तु युज् समाधावित्यस्य ।

७९. शप्-श्यन्भ्यां नुम् शीङ्योः ।

नियमार्थं वचनम् । शी-ङ्योः परयोः शम्-श्यन्भ्यामेव शतुर्नुम् स्यात् । पचन्ती, दीव्यन्ति कुले, पचन्ती दीव्यन्ती स्त्री ।

८०. शेषोऽणवर्णाद्वा ।

शप्-श्यन्भ्यामन्यस्मादवर्णात् शीङ्यो शतुर्नुम् वा स्यात् । तुदती—तुदन्ती कुले स्त्री वा । करिष्यती, करिष्यन्ती कुले स्त्री वा । याती—यान्ती कुले स्त्री वा । अवर्णादिति किम् ? नाभ्यस्तादित्यनुवृत्तेर्धातोरातोलुकोऽन्तरङ्गत्वाच्च, ददती, पुनती, रुन्धती, घ्नती ।

८१. तृज्वद् क्रोष्टुरसम्बुद्धौ ।

सादिस्थाने क्रोष्टुस्तृज्वत् स्यात् । क्रोष्टा, क्रोष्टारौ । असम्बुद्धाविति किम् ? हे क्रोष्टा ! स्त्रियाञ्च । तृज्वत् स्यात् । क्रोष्ट्री, क्रोष्ट्रीभिः ।

८२. तृतीयादिष्वनाम्यचि वा ।

आमवर्जिते टाद्यचि परे क्रोष्टुस्तृज्वत् वा स्याद् वा । क्रोष्ट्रा, क्रोष्टुना, क्रोष्टरि, क्रोष्टौ । अनामीति किम् ? क्रोष्टूनाम् ।

८३. सान्तमहतोर्दीर्घो नुमि ।

अनयोर्नुमि परे दीर्घः स्यात् । विद्वान्, विद्वांसौ । पयांसि रोचींषि, महान्, महान्तौ । नुमीति किम् ? वेधसौ । असम्बुद्धावित्येव, हे विद्वन् ! हे महन् ।

८४. नोपधायाः ।

सादिस्थाने नान्तस्य उपधायाः दीर्घः स्यात् । राजा, राजानौ, सामानि । नुमि कृतेऽजन्तस्यापि नान्तत्वम्—बहूवपानि तडागानि, मधूनि, कर्त्तॄणि । असम्बुद्धावित्येव—हे राजन् !

८५. अपः । आन्तो दो भि ।

अपः सादिस्थाने दीर्घः स्यात् । आपस्तिष्ठन्ति, स्वापः, स्वापौ, स्वापाः । उपधाया; इत्येव—बह्वम्पि, बह्वाम्पीत्येके । समासान्ते—बह्वपानि तड़ागानि । भादौ सुपि तस्यादन्तोदः स्यात् । अद्भिः, अद्भ्यः ।

८६. सावत्वसन्तस्याधातोः ।

सौ परेऽत्वसन्तस्यासन्तस्य चोपधाया दीर्घः स्यात् । कृतवान्, धनवान्, सुयशाः, सुमेधाः । अत्वसन्तस्येति किम् ? धनवती । न लुब्लुका लुप इति निषेधात्, सुयशः कुलम् । कथं यशांसि ? नुमि सान्तस्य विधेः । अधातोरिति किम् ? पिण्डं ग्रसते पिण्डग्रः । असम्बुद्धावित्येव, हे गोमन् ! हे चन्द्रमः !

---

८१. क्रोष्टुशब्दस्य तृज्वत् तृच् प्रत्ययान्तशब्दरूपं भवतीति ।

८३. नुमि कृते यः स्वरो लभ्यते तस्यैव दीर्घप्रत्यासन्नत्वात् मण्डूकगत्या सम्बुद्धौ निषेधः ।

८५. अत्राप् शब्दस्य बहुत्वेऽप्येकवचनत्वमनुकरणत्वात् ।

८७. **इन्-हन्-पूषार्य्यम्णां शौ च।**

नोपधाया इति प्राप्ति नियमार्थं वचनम्। एषां सुश्योरेव दीर्घः स्यात्। दण्डी, वृत्रहा, पूषा, अर्य्यमा, शौ च—बहुदण्डीनि, सुवृत्रहाण, सुपषणि, बह्वर्यमाणि। नान्यत्र, प्रोषितार्यमणं मेरोरन्धकारस्तटीमिवेति माघः। असम्बुद्धावित्येव—हे दण्डिन्।

८८. **ङमः-क्वि-झलोः क्ङिति, क्रमः क्ति वा।**

क्विबादीनां धातुराक्षिप्यते, क्वौ झलादौ क्ङिति च परे ङमन्तस्य धातोरुपधाया दीर्घः स्यात्। सत्यमान्, प्रशान्, प्रशामौ, प्रशामः। अपदत्वादत्र नकारो न भवति। तमू—प्रतान्, प्रतन्भ्याम्? इन्हन्निति निर्द्देशान्न हनः-ब्रह्महणौ। नेह परत्वात्मलोपेन संयत्। ऋभादेर्बहुलादिकारो उदधिक्रादयो निपातिताः। झलादौ दान्तः, शान्तवान्, शान्त्वा, शान्तिः। यङ्लुकि—शंशान्तः, क्रमः। क्ति वा-क्रस्तु क्रन्तु। झलीति किम्? क्रमित्वा, प्रक्रम्य। 'क्ङिति' इति किम्? गन्ता।

८९. **व ऊठ्।**

क्वौ झलि क्ङिति च वकारस्य ऊठ् स्यात्। अक्षद्युः, अक्षद्युवौ, पटस्युः, रक्तष्ठुः, नावयतेः (लावयतेः) क्विप्—नोः, लोः, झलि—द्युतम्, स्यूतम्। धावदिवो-र्यङ्लुकि—दाधौतः, देद्यूतः। क्ङितीत्येव, दाधाति, देदेति। अनुनासिके च क्तव्यम्। खव्-खौनति नैकस्य सुबन्तात् परस्य—वृक्षव्।

९०. **ज्वर-त्वर-श्रिव्य-विमवामुपान्त्येन।**

एषामुपान्त्येन सह वस्योठ् स्यात्। क्वौ झलि क्ङिति च। जुः, जुरौ, जूत्तिः। तु, तुरौ, तूर्त्तिः। स्रुः, स्रुवौ, स्रुतिः। ऊः, उरौ, ऊतिः। धनमवतीति धनौ, शाल्युः, मूः, मूतिः।

---

८६. अतुश्च अस् च तौ अत्वसौ, तावन्ते यस्य स तथा, तस्येति विग्रहः। सुष्ठु मेधा यस्य स तथा, तस्येति विग्रहः। सुष्ठु मेधा यस्य स सुमेधाः। नञ्-सुदुर-सिः (५/१/१३३) इत्यसिः समासान्तः। तेन लाक्षणिकस्यापि भवतीति दर्शितम्। धनवतीति ङीप्रत्ययान्तत्वादत्यन्तत्वम्, (न त्वत्वन्तत्वम्) नुमि सान्तस्य विधेरिति दीर्घस्य विधेर्विधानादित्यर्थः।

८८. इदमिवाचरित इदमति। राजेवाचरति राजानति। पन्था इवाचरति पथीनति, ऋभुक्षीणति। द्यौरिव देवतीति माधवः। अत्र ऊढि द्यवतीत्युचितम्। क इव ककति, चकाविति हरदत्तः। माधवस्तु चक्र इति रूपमाह। क्विबादिनाङमन्तो धातुरुच्यते हरिनाभावसम्बन्धात्, न तु शब्दः। अथ कथं संयमे दीर्घो न स्यात्? ङमन्तत्वाभावात्।

९०. अत्र ठकारो वृद्धिरजूठ इत्यस्यविशेषणार्थः। लुनातेर्ण्यन्तात् क्विप्—लौः, नावमाचष्टे इति नुवधातोर्वेति मिश्रः। अनुनासिकोऽत्र ङम् गृह्यते, वक्तव्यम्, व्याख्येयाभिधानादित्यर्थः।

९१. राच्छ्वोर्लोपः ।

क्वौ झलि क्ङिति च रेफाच्छ्वो लोपः स्यात् । मूर्च्छा, मूः, मुरौ, मूर्त्तिः, धुर्व्वी—धूः, धुरौ, धूर्त्तिः ।

९२. योऽयि हलि ।

यवर्ज्जिते हलादौ प्रत्यये यलोपः स्यात् । क्नूयी, क्नुतः, पूयी, पूतः । कण्डूयतेः क्विप् —कण्डुः कण्डूतिः, लो लूयते क्विप्—लोलुः, सखीयतेः, सखीः, सख्यौ, अतो लुकोऽस्थानिवत्त्वाद् हलि यलोपः । अयीति किम् ? शय्या ।

९३. वश्च बहुलम् ।

अनूठ-विषयार्थं वचनम् । अयिहलि वस्य लोपः स्यात् । दिदिवान्, दाधाति, देदेति । एतः क्वौ वलोपः । देवृ—देः, तेवृ—तेः, सेवृ—सेः सयौ । एत इति किम् ? अक्षद्युः वृक्षव् । अयीत्येव—दीव्यति ।

९४. पदान्तस्य ।

अधिकारोऽयम् ।

९५. दिव उत् सौ त्वौत् ।

दिव् शब्दस्य पदान्तस्य वस्य उत् स्यात् । सौ पुनरौद् भवति । द्युभ्याम्, द्युमयम्, द्युनाथः । सौ त्वौत् द्यौः । पदस्येति किम् ? दिवौ । केवलस्य ग्रहणान्नेह—अक्षद्युः ।

९६. कः क्विनन्तस्य नशोस्तु ङः । नशेर्व्वा ।

क्विनन्तस्य पदान्तस्य कः स्यात् । हृक्, मृक्, घृतस्पृक्, दृग्भ्याम् । नशोस्तु ङः, प्राङ्, कुङ् क्रुङ्भः । नशेर्व्वा नक्, नट्, पदस्येत्येव, दृशौ ।

९७. झषन्ताचाम् गडदवां द्वितीयः सधेवाश्च ।

(पदस्येत्येव) झषन्तोऽच् येषां तेषां ग-ड-द-वां स्थाने तद् द्वितीयो भवति । से (सि) ध्वे (ध्वि) च । ह्—निघुट्, अजोघोट्, घोक्ष्यति, अघुड्वम्, तुण्डि भयतेः क्विप्-तुण्डिप् । दुह्—गोधुक्, गोधुग्भ्याम्, अधोक्, घोक्षि, अदुग्धम् । गर्द्दभयतेः क्विप्—गर्द्दभ, बुध—तत्त्वभुत्, भोत्स्यति, अभुद्ध्वम् । दन्तौष्ठयत्वान्न वह-व्यध्-वृधाम्-वक्षाति, मृगावित्, विवृत्सति, अपाणिनीयाः (चान्द्राः) केचिदिह विकल्प्यन्ते ।

---

९२. इह सामान्यो हल्निमित्तम् । अतः परस्मिन् दाधातीत्युदाहरिष्यतीति । ननु कण्डूयतेः किम्, अत इत्यकारलोपे स्वरादेशः (परि० १४) इत्यकारस्य स्थानिवत्त्वे कथं यलोपः ? न च वाच्यम्, प्रत्ययलोपे प्रत्ययलक्षणमिति भविष्यति, न वर्णाश्रये प्रत्ययलोपलक्षणमिति निषेधात्, सत्यमुक्तम्, लक्षणानुरोधादेतस्या नित्यत्वमपीष्यते । हलीति किम् ? क्ष्मायिता क्नोयिता ।

९७. पदस्येत्यवयवावयविसम्बन्धे षष्ठी । अत्र श्रुतत्वात् द्वितीयपदेन झष उच्यते, न तु वर्गद्वितीय इति । अत्र क्विनन्त प्रसङ्गात् अविनाभावच्च धातुत्वमवसीयते । स्ध्वोश्चेत्यनेनापदान्तस्यापि द्वितीया विधीयते । तुण्डिभयतेरिति-

९८. **वसु-स्रन्सु-ध्वन्सु अनडुहां दः ।**

एषाम्पदानामन्तस्य दः स्यात् । विद्वत्, विद्वद्भ्याम्, विद्वन्मयम्, उखास्रत्, पर्णध्वत्, अनडुद्भ्याम् । एषामन्त्यस्येति किम् ? विद्वान् । पदस्येत्येन—विद्वांसौ ।

९९. **मो-नो धातोः क्वसौ च ।**

पदस्य धातोर्म्मो नः स्यात् । क्वसौ च । प्रशान्, प्रशान्भ्याम् । जगन्वान् । पदस्येत्येन, प्रशामौ । नेटि—जग्मिवान् ।

१००. **रः प्राग्दीर्घ इणो हलि वश्चातद्धितयेऽकुर्द्द सुँपाम् ।**

धातोः पदान्तरेफात् प्रागिणोदीर्घः स्यात् । गीः, गीस्तः, सुगीः कुलम्, धूः, धूर्भ्याम् । पूः पूर्भ्याम् । हलिवश्च, रश्च प्राक् हल्ग्रहणमपदान्तार्थम्—दीव्यति, प्रतिदीवनाम् विस्तीर्णम्, मूर्च्छति । अतद्धित य इति किम् ? दिव्यौ, घुर्य्यः । अकुर्, छुह सुपामिति किम् ? कुर्य्यात्, छुर्य्यात् । सुब्धातोः—चतुर् इच्छति चतुर्य्यति, दिव्यति । कथं री—रिर्य्यतुः ? यणादेशः स्थानिवदित्यहल्परत्वात् ।

भुण्डिर्याभिगुटकन्तद्योगात्तुण्डिभो वृद्धनाभिः, तमाचष्ट इति णिच् । ननु च वक्ष्यतीत्यादौ द्वितीयः कथन्न स्यादित्याह दन्त्योष्ठ्यत्वादित्याद्ययमर्थः । ग-ड-द-वर्गत्तृतीयानां साहचर्याद् वकारोऽपि वर्गतृतीय एव गृह्यते, नान्यः । वहादेर्वकारस्तु दन्त्यौष्ठ्यः, कथन्तद् द्वितीयो भवेत् ? यस्तु वर्ग्यो वकारः स तावत् स्पर्शकारिकायां धातुगणे च वर्ग्यप्रकरणे निरूपितोऽस्मत्कृतधातुकल्पलतायामनुसन्धेयः । ये पुनर्व्यंधेरभ्यासात् परस्य वर्ग्यत्वमिच्छन्ति तन्मते बिभ्यत्सतीति ।

९८. उत्सृष्टानुबन्धो वसुः, तेन क्वसु-श्वसु गृह्यते । विद्वानिति न हि नकारो वसोरन्तः, किन्तर्हि आगमः । पदस्येत्येवेत्यत्रान्तस्येत्यध्याहार्यम् ।

९९. धातोरिति किम् ? किम् ।

१००. ननु विधये (१/१/३१) इति न्यायाद् रेफान्तधातोः प्रागिणो दीर्घः प्राप्नोति, ततश्च द्वितीयलक्षणे हलि दीर्घो भवन् तदन्तस्यैव धातोर्युज्यते । तत् किं मूर्च्छति, धूर्व्वतीत्यादौ दीर्घः स्यात् ? सत्यमेतत्, इह तदन्तविशेषणन्नास्ति प्राक्शब्दोपादानात् अन्यथा रेफान्तधातोरिणा दीर्घ इति सिद्धे किमनेनेति । ननूब्जतीत्यत्र वः प्राक्दीर्घः कथन्न स्यात् ? मैवं वादीः, रेफस्यान्तस्थीयस्य साहचर्य्याद् वकारोऽपि तादृश एव गृह्यते, उब्जे बकारोऽपि वर्ग्य एव अतो न दीर्घः । ननु री गतिरेषणयोरित्यस्य क्रैयादिकस्य लिटि द्विर्वचने, एरनेकाच इति षत्वे कथन्न दीर्घ इत्याह कथमिति । न पदान्तेत्यादेः स्थानिवदादेशः (परि० १२) इत्यस्यापि नित्यत्वादिति भावः । तेनाभ्यासे न प्रतिषेध इति

१०१. सनः सजुषाशिषोश्च ।

पदान्तसनः प्राक् सजुषाशिषोश्च इणो दीर्घः स्यात् । पिपठीः, पिपठीर्भ्याम्, सजूः, आशीः ।

१०२ नस्य लोपोऽनुमः प्रातिपदिकान्तस्य ।

प्रातिपादिकान्तस्य पदान्तस्य नस्य लोपः स्यात् । कर्म्म, आत्मा, सुप्रेमा, राजत्वम्, राजपुरुषः । अनुम इति किम् ? राजवान् । प्रातिपदिकान्तस्येति किम् ? अहम् ।

१०३. न सम्बुद्धौ । वाक्लीबे ।

सम्बुद्धौ न लोपे नास्ति । हे राजन् । वा क्लीबे—हे कर्म्म । हे कर्म्मन् । वा

१०४. वृषण्वसुवृषण्वश्वौ ।

एतौ निपात्येते । वृष्णो वसु वृष्णवसु, वृषणोऽश्वः, वृषणश्वः ।

१०५. राजन्वान् सौराज्ये ।

सौराज्ये गम्ये राजन्वान् स्यात् । अन्यत्र, राजवान् ।

१०६. संयोगान्तस्य रात्तु स-दिपोः ।

संयोगान्तस्य पदान्तस्य लोपः स्यात् । गोमान्, प्राङ्, अरुणत्, मांसपिपक् । रात्तुस-दिपोरेव—कटं चिकीर्षति कटचिकीः, लङि—अबिभः । नान्यस्य—ऊर्ज्ज—ऊर्द्धं व, मृजेर्लङि—अमार्ट ।

१०७. स्कोर्निजाद्योर्झलि च ।

झलि पदान्तस्य संयोगान्तस्य च निजरूपेणादिस्थितयोः सकारककारयोर्लोपः स्यात् । मस्ज्-मग्नः, शीघ्रमक्, रक्ष-गोरट्, तक्ष-तष्टव्यम्, काष्टतट् । निजरूपेणादिस्थितयोरिति किम् ? मांसपिपक् ।

न च वक्तव्यमिति । अन्ये तु प्राक्तधातो दीर्घ निषेधात्तत्साहचर्यात् प्रक्तधातोरेव दीर्घो न द्विरुक्तस्येत्याहुः । धातोरिति किम् ? गुर्व्वीः । इण इति किम् ? अबिभः, कर्त्ता, भव्यम् । वश्चरश्चेति किम् ? बुध्यते, हलीति किम् ? किरति, लुवति ।

१०१. मित्रं शास्तीति शासः शिषादेशे कथन्न दीर्घः, आङ् पूर्वत्वाभावात् ? सत्यम्, सजुषाशिषोश्चेत्यत्रङ् पूर्व्व इत्युपलक्ष्यते । वार्तिककारस्तु आङ्येव शास्तेः क्विप् प्रमाणमित्याह तदेवात्र न्याय्यम् ।

१०६. अनन्तरौ हलौ संयोगस्तत्पदान्तस्य लोपो विधीयते ।

१०७. निजरूपेणादिस्थितयोरेकप्रयोगसंयोगत्वेनेत्यर्थः । निजाद्योरिति किम् ? वाक्स्थिता । झलीति किम् ? भृज्जते ।

१०८. **हो-ढो-दाहऽऽदेस्तु घः ।**

झलि पदान्तस्य हस्य ढः स्यात् । धातुपाठे दकारादेस्तु घकारः । **सोढा,** मधुलिट्, अलेट् । दान्तेस्तु घः—दोग्धा, गोधुक्, अधोक्, दह-दग्धा, ग्रामधक् ।

१०९. **द्रुह-मुह-स्नुह-स्निहां घढौ ।**

एषां झलि पदान्तस्य हस्य घढौ स्याताम् । द्रोग्धा, द्रोढा, मित्रध्रुक्, मित्रध्रुग्, मित्रध्रुट्, मित्रध्रुड् । (मित्राध्रुट्सु, मित्रध्रुट्त्सु) झषन्तसेस्तोध्रो वेत्येके । **मित्रध्रुक्तः,** मित्रध्रुग्धो वा, मित्रध्रुढः, मित्रध्रुढो (मित्रध्रुड्ढो) वा इत्यत्र पदान्तात् **टुत्वञ्च** मुग्धो, मूढः, स्तोग्धा, स्नोढाः स्निक्, स्निट् ।

११०. **नहो धः ।**

नहो हकारस्य धः स्यात् । नद्धा, उपानत् ।

१११. **आहस्तः ।**

आहो झलि हकारस्य तः स्यात् । आत्थ ।

११२. **व्रस्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-परिव्राज-छ-शां षः ।**

एषां झलि पदान्तस्य च षः स्यात् । व्रष्टा, वृक्षवृट्, भ्रष्टा, माषभृट्, **स्रष्टा,** राजसृट्, माष्टा, स्थानमृट्, यष्टा, देवेट्, राष्ट्र, भ्राष्टः, परिभ्राट, परिव्राट्, **छ-प्रष्टा,** शब्दप्राट्, श—प्रवेष्टा, विट् । व्रश्चेनिष्ठायां प्रतिषेधः । वृक्नम् । **श-चभ्यो कधातोः** सः श इति वक्तव्यम् । निशा, निश्शु, पक्षे निशासु, अच्—अच्शु, अच्सु । अधातोरिति किम् ? विट्सु ।

११३. **न विश्वसृजः ।**

अस्य षो न स्यात् । विश्वसृक् ।

११४. **छः शो वा सुबचि ।**

स्वाद्यचि परे छकारस्य शो वा स्यात् । शब्दप्राशौ, शब्दप्राछौ ।

११५. **ष-ढो-कः सेऽसुपि ।**

से षढोः कः स्यात् । पेक्ष्यति, लिलिक्षति, असुपीति किम् ? विट्सु ।

---

१०९. मित्रध्रुढो वेत्यत्रापादाने तसिः ततो न पदान्तादिति निषेधे प्राप्ते टुत्वमिच्छन्ति, तेन ढत्वेऽपि पदद्वयमिति ।

१११. झलि पदान्तस्येति सम्बन्धनीयम् ।

११२. ब्रुवः (३/२/८२) इत्याहादेशस्य ग्रहणम्, नान्यस्येत्याहात्थेति, न च **वक्तव्यम्,** आङ् पूर्व्व—शक इति हस्य पदान्तस्य प्रकृतत्वात् । वा० । **वक्तव्यम्** व्याख्येयम् । केचिदिच्छन्ति, केचिन्नेच्छन्ति, तन्मतमिहाश्रयणीयम् ।

११६. **चोः क्वऽनितः ।**

झलि पदान्तस्य चवर्गस्य कवर्गो यथाक्रमं भवति । वक्ता, वाक्, लङि— अवक् । वणिक्, भिषक् । नानुबन्धस्य अच् । पदस्येत्येव, वाचा, क्रुञ्चा ।

११७. **न्यङ्क्वादीनाञ्च ।**

झलि पदान्तस्येति निवृत्तम् । न्यङ्प्रभृतेः कुत्वं स्यात् । न्यङ्कु. भृगुः, मेघः । आणि श्वपाकादयः ।

११८. **सन्लिट्टोर्ज्जः चेर्व्वा ।**

अनयोर्जेः कुत्वं स्यात् । जिगायति, जिगाय, चिकीषति, चिचीषति । निश्काय, निश्चिचाय ।

११९. **चजोर्घिण्ण्यतोरक्वादि-वज-व्रजाजामनावश्यके ।**

घिति ण्यति च परे च जोः कुत्वं स्यात् । पाको रागी, पाक्यम्, भोग्यम्, अक्त्रादिव । जव्रजाजामिति किम् ? कुच-संकोच, कूज्ज्यंम्, खज्ज्र्यम्, गज्ज्र्यम्, वाजः, परिव्राज्यम्, समाजः । अनावश्यक इति किम् ? अवश्यपाच्यम् ।

१२०. **न वञ्चेर्गतौ ।**

कुत्वं नास्ति । वञ्च्यम् । गतौ किम् ? वङ्क्यं काष्ठम् ।

१२१. **भुज-न्युब्ज-रोमाञ्चाः करभुग्न-रोमहर्षेषु ।**

कराद्यर्थेषु-घणन्ता भुजादयो निपात्यन्ते ।

१२२. **प्रयाजानुयाजो यज्ञाङ्गे ।**

एतौ यज्ञाङ्गे स्याताम् ।

१२३. **ण्यति मुच-रुच-शुच-अर्च्च-याच-त्यजि-यत्रि-वृजीनाषु ।**

एषां धातुनां ण्यति कुत्यं नास्ति, प्रमोच्यम्, रोच्यम्, शोच्यम्, अर्च्च्यम्, याच्यम्, त्याज्यम्, याज्यम्, वर्ज्ज्यम् ।

१२४. **वचेरपदासंघाते ।**

वचेर्ण्यति कुत्वं नास्ति, वाच्यम् । पदसंघाते तु वाक्यम् ।

१२५. **प्रयोज्य-नियोज्यौ शक्ये, भोज्यं भक्ष्ये ।**

निपात्यन्ते । प्रयोक्तुं शक्यः प्रयोज्यः, नियोक्तुं शक्यः नियोज्यः । भोज्यं भक्ष्यम्, भोज्य ओदनः, अन्यत्र भोग्या स्त्री ।

---

११८. जि जये, जिज्री अभिभवे इत्युभयोरेव ग्रहणम् । जिनातेस्तु दीर्घकरणाल्लाक्षणिकत्वाद्वा न स्यात्, जिज्यतुः ननु कि कित् ज्ञाने इत्यस्य निश्चिकायति सिद्धे किमनेन ? सत्यम्, तस्य परस्मैपदित्वात् कर्त्तव्यात्मने पदेऽपि यथा स्यादित्यारम्भः ।

१२५. यज्ञाङ्गे किम् ? प्रयागः, अनुयागः । ओक उच्चः के । उचगुणे कत्वे निपात्यते, ओकः शकान्त-वृषलौ । इगुपधेति क्तः ।

१२६. हनो हो घो नणितार्नश्च तोऽचोऽनिण्णलोः ।

नकारे णिति च परे हनो हो घः स्यात् । तत्सन्नियोगेऽच उत्तरस्य नकारस्य तकारः । नकारे—घ्नन्ति, वृत्रघ्नः । णिति-घातः, घातकः । अनिण्णलोरिति किम् ? अत्र न स्तो माभूत्, अघानि, घानिषीष्ट, जघान ।

१२७. घोऽभ्यासाच्च ।

अभ्यासाच्च हनो हो घः स्यात् । जिघांसति, जङ्घन्यते ।

१२८. हेरचङि ।

हेरेभ्यासाद् घत्वं स्यात् । प्रजिघाय प्रजिघीषति । अचङीति किम् प्राजीहयत् ।

१२९. भस्य । (अधिकारोऽयम्)

१३० पादः पत् ।

भस्य कृतसामासान्तस्य पादः पत् स्यात् । द्विपदः पश्य द्विपदा, त्रिपदः,त्रिपदी वैयाघ्रपद्यः ।

१३१. वसोः साऽचो च उत् ।

उत्सृष्टानुबन्धस्य वसोरचा सह वस्य उत् स्यात् । उषुषः, वकारस्य निमित्तस्यापायादिटोऽप्यपायः । उपेयुषा, विदुषी, भस्येत्येव—विद्वत्सु ।

१३२. श्व-युव-मघोनां ङीवज्जमतद्धिते ।

भस्येषां वस्य उत् स्यात् । शुनः, शुना, यूनः, यूना; मघोने । अतद्धित इति किम् ? शुनो विकारः शौवं मांसम् : ङ्यां भवत्येव-शुनी । अतद्धित इति किम् । समासान्तविधेरनित्यत्वात्, अतिशुनी, प्रियमघोनी ।

१३३. वाह् ऊठ् ।

वाहः साचोवकारस्य ऊठ् स्यात् । प्रष्ठौही, शाल्यूही ।

१३४. अनोऽल्लोपोऽयिवि वमस्त्वसंयोगात् ।

अनन्तस्य भस्यातोलोपः स्यात् । राज्ञः, राज्ञि, तक्ष्णा, अह्वा निवृत्तं आह्निकम्, वमात् पुनरसंयोगात् परस्यातः-पीव्ना, हेम्ना । न संयोगात्, पर्व्वणा, आत्मना, चर्म्मणा । अयीति किम् ! सामन्यः, शीर्षण्यः ।

---

१२६. न् णितोरिति किम् ! क्लेशापहः । क्लेश + अप = हन् कः ।

१३१. इह साऽत इति वक्तव्ये यत् साऽच् इति निर्दिष्टम् तत् वक्ष्यमाण्यर्थम् ।

१३३. श्वेतवाह शब्दस्य प्रथमैकवचने श्वेतवाः, श्वेतवः इत्यादि केचित् ।

१३५. षपूर्वहन् धृतराज्ञमणि ।

सिद्धे सत्यारम्भो नियमार्थः । अणि एषामेवाल्लोपः स्यात् षः पूर्वस्य-औक्ष्णः, हन-भ्रौणघ्नः, धार्त्तराज्ञः । नान्यस्य-सामनः । (अणीति किम् ? ताक्ष्णयम्)

१३६. ङिश्योर्वा ।

अनयोरनन्तस्याल्लोपो वा स्यात् । राज्ञि, राजनि, दध्नि, दधनि । शी-साम्नी, सामनी ।

१३७. आतोधातोरनापोऽन्यस्य बहुलम् ।

तस्य धातोरातो लोपः स्यात् । सोमपः, संस्थः, संस्था । तापृ क्विप्-तातताः, तस्मै, तातते । धातोरन्यस्याप्वर्ज्जितस्यातो बहुलं लोपः स्यात् । हाहः. हाहा, हाहान् वा ।

१३८. पथ्यादेरिनः ।

पथि-मध्यृभुक्षां भस्येनो लोपः स्यात् । पथः, पथा, मथः, मथा, ऋभुक्षः, ऋभुक्षा ।

१३९. अचोऽतः प्रागदीर्घश्च ।

लुप्तनकारस्यञ्चेर्भस्यातो लोपः स्यात्, ततः पूर्वोऽदीर्घश्च । दधीचा, द्युचा, प्रतीची, तिरश्ची, सध्रीची, समीचीनम्, प्रतीच्यम्, तैरश्चम् । अच इति किम् ? पूजायान्नलोपो नास्ति-तिर्य्यञ्च ।

१४०. उद ईत् ।

उदः परस्याचोऽत ईत् स्यात् । उदीचा, उदीची, उदीच्यम् । भस्येति निर्वृत्तम् ।

---

१३६. पूषन् शब्दस्य सप्तम्येकवचने पूष्णि-पूषणि पूषि चेति बोपः । ककुद्दोषणि, अत्राल्लोपो न स्यादिति भाष्यम् ।

१३९. धातुत्वमत्र गौणम्, अत उक्तम्, क्विबादयोधातुत्वं जहति न वेति । एवं आ-शब्दस्य विधार्थस्य, ए देहि, अः पुत्रः स्मृते देहि, स्मृतः पुत्र इत इत्यादि ।

१४०. उद इति किम् ? निरश्च, चकारस्यान्वाचयशिष्टत्वादतो लोपः ।

१४१. विश्वग्देवसर्व्वनाम्नां टेरद्रव्यञ्चतौ ।

क्विनन्तेऽञ्चतौ परे विश्वगादेष्टेरद्रिः, स्यात् । विश्वगञ्चतीति विश्वद्रयङ्, विश्वद्रयञ्चौ, देवद्रयङ्, देवद्रयञ्चौ, त्वद्रयङ्, तद्रयङ्, अन्यद्रीचि । क्विनन्त इति किम् ? विश्वगञ्चनम् ।

१४२. अदसो दस्व मुर्व्वा द्रोऽपि वा ।

अञ्चतौ परे कृतकार्यस्यादसो दकारस्य मुर्व्वा स्यात् । द्रस्थाने वा । अदद्रयङ्, अमुद्रयङ्, अमुमुयङ् ।

१४३. सह-समोः सध्रि-समी ।

अनयोरञ्चतौ परे सध्रि-समी स्याताम् । महाञ्चति सध्र्यङ्, सध्र्यञ्चौ, सध्रीची, सध्रीच । समः सम्यङ्, सम्यञ्चौ, समीची, समीचीनम् ।

१४४. तिरसस्तिर्य्यलोपे ।

अञ्चतौ परे तिरस्तिरिः स्यात्, अतो लोपो न चेत् । तिर्यङ्, तिर्यञ्चौ । अलोप इति किम् ? तिरश्च पश्च ।

१४५. मघोनो वस्तुर्वा सौ तुश्च ।

मघवन्नकारस्य तुर्व्वास्यात् । मघवा, मघवानौ, मघवानः । पक्षे मघवन्, मघवन्तौ मघवन्तः । ङ्यां मघवती, माघवतम् । सौ तुश्च, मघवान् (मघवन्) वा ।

१४६. अणर्व्वस्त्रसावनञः ।

अर्व्वणो नकारस्य पुनर्विधानात् नित्यं तृः स्यात् असौ परे, अर्व्वन्तौ, अर्व्वन्तः । ङ्यां भवत्येव, अर्व्वती, असाविति किम् ? अर्व्वा, अनञ् इति किम् ? अनर्व्वाणौ ।

---

१४२. इह प्रथमं टेरद्रिरनन्तरमयं विधिः, न तु परत्वादयं प्रथमत इत्याह कृतकार्यस्येति । इदन्तु द्र आदेशकरणात् प्राप्यते, तेन अदद्रीच इति, सूत्रेण सिद्धः पुनर्वाग्रहणम् व्यवस्थित विकल्पार्थम् । तथा च व्याघ्रभूतिः—

"परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिदिच्छन्ति चोभयोः ।। इति ।

शसादौ अकारलोपे, अदद्रीचः अमुदद्रीचः, अदमुङ्ङैचः, अमुमुङ्ङैचः । टादौ—अदद्रीचा, अदमुङ्ङैचा, अमुमुङ्ङैचा, अदमुयग्भ्याम्, अमुमुयग्भ्यामित्यादि । एवमसन्धिप्रयोगे एव दृश्यतेऽतो मयापि तथा सन्धिवेशितः ।

१४४. प्रसक्तं हि प्रतिषिद्ध्यते इत्याह, अतो लोप इति । अतेति सिद्धे यदलोप इत्युक्तम्, तस्याभिप्रायः प्रागेवव्यञ्जितः, तीर्य्यञ्चेति ।

१४७. शसादौ वा दन्नस्-पन्मास हृन्नि-यू-यूषन्-दोषणः ।

शसादौ परे दन्तादेर्दतादयो वा स्युः। दन्तान् दतो वा, दन्ताभ्याम्, दद्भ्याम् वा, नासिकया नसा वा पादान् पदो वा, मासेन मासा वा, मासहृच्छब्दौ हलन्तौ च विद्येते। निशायां निशि वा। यूषेण यूष्णा वा, दोषा दोष्णा वा। यक्नादयो वैदिकत्वान्नोक्ताः।

इति पद्मनामदत्तकृतौ सुपद्मव्याकरणे
द्वितीयाध्यास्य तृतीयः पादः

———

१४७. दन्त-नासिका-पाद-मास-हृदय-निशा-यूष-दोषः दन्तादयः। यकृत् षकन्, शकृत्, शकन, असृक्, असन्, उदक्, उदन् इति नोक्ताः।

दोष् शब्दस्य नपुंसकत्वमत एव भाष्यात्-
तेन दक्षिणन्दोनिशाचर इति सङ्गच्छते।

———

चतुर्थः पादः

सुबन्तप्रकरणम्

१. सर्वादीनि सर्वनामानि स्वार्थेऽसंज्ञायाम् ।

सर्वप्रभृतीनि सर्व्वनामसंज्ञकानि भवन्ति । सर्वे, सर्वस्मै, सर्वस्मात् । सर्व, विश्व, उभ, उभय, डतम-प्रत्ययान्त, इतर, अन्य, अन्यतर, त्व, त्वत्, एतौ अन्यपर्यायौ, नेम, सम (अथ सर्वार्थः) सिम, पूर्व्व-परा-ह्वरदक्षिणोत्तरान्तपराहधर, स्व, अर, तद्, त्यद्, यद्, अदस्, इदम्, एतद्, एक द्वि युष्मद्, भवत्, किम् ? स्वार्थ इति किम् ? नान्य-पदार्थे—त्वत्पितृकः असर्वनामत्वादक् प्राक् टेर्न भवति । अज्ञातकुत्सितक्षेपेदिति क एव । असंज्ञायामिति किम् ? उत्तराः कुरवः, अतिविषार्थे (अतुसीति भाषा) विश्वायै ।

---

१. संज्ञात्वेन सर्वनामान्यभिधीयन्ते, कानि सर्व्वादीनि ? सर्व आदिर्येषाम्, तानि । व्यवस्थायामवयवे वा आदिशब्दः । तद्गुणसंविज्ञानोऽय बहुव्रीहिः सर्वत्रेति निदर्शनात् । इतरथा ह्युपलक्षणत्वात् सर्वशब्दस्य सर्वनामसंज्ञा न स्यात् । यथा—चित्रगुरानीयतामित्युक्ते चित्रगवोपलक्षितः पुरुष एवानीयते न तु चित्र-गौरिति । सर्व इत्यादौ इत्, स्मै, स्यातः कार्य्याणि । इदानीं पूर्वाचार्यै परिसंख्यातान्यनेनोच्यते । सर्वादिः, उभे, उभशब्दोऽयं द्विवचनान्तः, एकत्व-बहुत्वयोः सर्वनामकार्यस्य विहितत्वात् तद्योगे सर्वा विभक्तयः । प्रयोजनमूह-नीयम् । डतर—डतम प्रत्ययान्ताविति (५/४/२०१-२०२) इति सूत्राभ्यां विहितौ डतर-डतमौ तदन्ताः सर्वनामानि । तेन कतर यतर ततर एकतर कतम यतम ततम एकतमा गृह्यन्ते । अन्यतरेति—अन्यतमस्त्विह गणे पठ्यते, शिक्षायुर्वेदन्यासेषु अन्यतमस्मिन्निति दर्शनात् वार्त्तिकमतमेवाश्रयणीयम् । त्व त्वदिति त्वच्छब्दः कातन्त्रादौ न दृश्यते । नेम शब्दोऽर्द्धवाची, "नेमकाले-ऽवधौ गर्त्ते प्राकारे कैतहे (वे) ऽपि" च इति मेदिनी, अर्द्धे गर्त्ते च इति हेमचन्द्रः । समशब्दः सर्वार्थः काकाक्षिवत् सिमशब्दोऽपि सर्वार्थः । नान्यपदार्थ इति शब्दानामन्वयव्यतिरेकार्थविधायी स्वार्थः । यत्र तु समासादस्वार्थवृत्तिस्तत्र बहुव्राहिरवयवाश्रयोऽङ्गत्वात्, प्राप्तोऽपाक् प्रतिषिध्यते, तेन तत्पुरुषे त्वत्पुत्रो मत्पुत्र इत्यादयो भवन्ति । किञ्च सर्वेषां नामेति व्युत्पत्तिमाश्रित्य संज्ञोपसर्जयोः सर्वनामत्वम्, प्राञ्चः प्रतिहरन्ति । वर्द्धमानामश्रास्तु सर्वेषां नामेत्यन्वर्थ-प्रसिद्धिभ्यां संज्ञोपसर्जनीभूतानामेषां जगदादीनां व्यवच्छेद इत्याहुः । किञ्च तदन्तविधिना परमसर्वस्मैवत् अतिसर्वायेत्यादावपि न स्यात् । णत्वस्तु पूर्वपदात् (१/४/२) सर्वनामानीति नितापनान्न भवतीति न्यासः । एकशब्दः

२. **वा दिग्बहुव्रीहौ ।**

अन्यार्थं वचनम् । दिग्वाचिबहुव्रीहिसमासे सर्वनामसंज्ञा वा स्यात् । उत्तरपूर्वस्यै, उत्तरपूर्वायै ।

३. **न तृतीयार्थयोगे ।**

अत्र सा संज्ञा नास्ति । मासेन पूर्वाय, मासपूर्वाय ।

४. **द्वन्द्वे च ।**

अत्रापि सा संज्ञा नास्ति । पूर्वापराणाम्, कतरकतमानाम् ।

५. **वा जसि ।**

द्वन्द्वे जसि वा सर्वनामसंज्ञा स्यात् । कतरकतमे, कतरकतमाः ।

६. **प्रथम-चरम-तयाऽयाऽल्प-नेम-कतिपयद्धांश्च ।**

एते जसि वा सर्वनामसंज्ञाः स्युः । प्रथमे प्रथमाः । तय-अयौ प्रत्ययौ—द्वितये, द्वितयाः, द्वये, द्वयाः, अल्पे अल्पाः, कतिपये कतिपयाः । एवमन्ये च ।

७. **पूर्व-परापर-दक्षिणोत्तराऽपराऽधराणि व्यवस्थायाम् ।**

स्वार्थापेक्षोऽवधिनियमो व्यवस्था । तत्रैवेतानि जसि वा सर्वनामानि स्युः ।

संख्यार्थे एकवचनान्तः, अन्यत्र तु सर्ववचनान्तः । एकोऽल्पार्थे प्रधाने च प्रथमे केवले तथा साधारणे समानेऽपि संख्यायाञ्च प्रयुज्यते । इत्येकशब्दार्थः ।

२. दिग्वाची बहुव्रीहिरिति मध्यपदलोपी समासः ।

३. द्वन्द्व इति प्रथमार्थे सप्तमी । द्वन्द्वः सर्वनाम संज्ञो न भवतीत्यर्थ ।

६. अत्र जसि वेति नियमात् व्यथां द्वयेषामपि मेदिनीभृतामिति माघप्रयोगश्चिन्त्यः ।

७. अवधिर्मर्य्यादा, तस्य नियमो अवश्यम्भावः, अवधिनियमादभ्रंशः । स च कीदृश ? स्वार्थापेक्षः, पूर्व्वादीनां शब्दानां स्वार्थो दिग्देशकाललक्षणः, तमेपक्षते य स स्वार्थापेक्षः, पूर्व्वादिशब्दवाच्यानां दिगादीनामर्थानां यत्पूर्व्वादित्वम्, तन्नियोगतः वञ्चनावधिमपेक्ष्य भवति नत्वविधिनिरपेक्षम् तथाहि, यत् पूर्वदेशस्य पूर्ववत्वं तत् देशमविधिमपेक्ष्य वर्त्तते, परस्यापि यत् परत्वम्, तत्पर्वं देशमपेक्ष्य भवति तस्मात् पूर्व्वादिशब्दवाच्यापेक्षाणामवश्यं केनचिदवधिमा भाव्यम्, तत्र तस्यैवावधेयः पूर्वादिशब्दापेक्ष्योऽवधिभावः स नियमो व्यवस्था, तस्यां गम्यमानायां पूर्व्वादीनां शब्दानां स्वार्थ एग वर्त्तमानानामियं संज्ञा न वाच्यम्, योहि पूर्व्वादशब्दवाच्यादर्थादन्यस्यावधिभूतस्य नियमः स कथं पूर्वादशब्द वाच्यो भविष्यति ? पूर्व्वे पूर्व्वा इत्यत्र परस्मादवधोरिति गम्यते ? परे परा इत्यत्र पूर्वस्मादवधेरिति गम्यते । प्रवीणाः कुशलाः इत्यर्थः । अत्र प्रावीण्यमात्रेण

पूर्वे-पूर्व्वाः, परे पराः । व्यवस्थायामिति किम् ? दक्षिणाश्छात्राः प्रवीणा इत्यर्थः ।

८. **स्वमज्ञातिधनाख्यायाम् ।**

जसि स्वं सर्वनाम वा स्यात् । स्वे जनाः, स्वा वा । अज्ञातिधनाख्यायामिति किम् ? स्वाः ज्ञातयः, स्वा दीयन्ते ।

९. **अन्तरं बाह्यपरिधानयोः ।**

अत्रेदं जसि वा सर्वनाम स्यात् । ग्रामादन्तरे, अन्तराश्चाण्डालगृहा बाह्या इत्यर्थः । अन्तरे, अन्तराः शाटकाः परिधानीया इत्यर्थः । न पुरि सर्वनाम । अन्तरायां पुरि वसति ।

१०. **तीयो ङिति ।**

तीयप्रत्ययान्तो ङिति सर्वनाम वा स्यात् । द्वितीयस्मै, द्वितीयाय, तृतीयस्मात्, तृतीयाय ।

११. **सर्वनाम्नः ।**

अधिकारोऽयम् ।

१२. **अतो ङेः स्मै ।**

सर्वनाम्नोऽदन्तात् ङेः स्मै स्यात् । सर्वस्मै, तस्मै । अत इति किम् ? भवते ।

१३. **ङसि-ङ्यो स्मात् स्मिनौ ।**

अतोऽनयोरेतौ भवतः । सर्वस्मात्, सर्व्वस्मिन् ।

१४. **पूर्वादिनवकाद् वा ।**

एभ्यो ङसि-ङ्यो स्मात् स्मिनौ वा भवतः । पूर्वस्मात्, पूर्व्वात्, पूर्वस्मिन्, पूर्वे ।

निमित्तेनावधिनिरपेक्षएव दक्षिणशब्दो वर्त्तते इति व्यवस्था न गम्यते । एवं "पयः पूर्वैः स्व निश्वासं कवोष्णमुपभुज्यते" इत्युदाहृतम् ।

८. यत्र तु स्वशब्दस्तुल्याधिकरणः प्रयुज्यते न तु तत्पर्य्यायः, तत्र निषेधो मा भूत, तथा स्वे पुत्राः । न तु स्वा ज्ञातयः इत्यादौ स्वशब्दो न जातिमभिधत्ते तत्पर्य्यायित्वात्, उक्तञ्चः—

"पर्य्यायाणां प्रयोगो हि यौगपद्येन नेष्यते ।
पर्य्यायेणैव ते यस्माद् वदन्त्यर्थं न संहताः ॥

इति, मैवम्, पर्य्यायशब्दो हि यत्रानेकार्थः सन्दिग्धार्थौ वा तत्र तदभिव्यक्तये प्रयुज्यते । यथा—हरिः, सिंहः, पिकः, कोकिलः ।

१०. अत्र तीयान्तस्यैव सर्वनामता, न तु जानीयादिप्रत्ययान्तस्य ।

१३. सर्वनाम्न इति किम् ? अति सर्व्वात्, प्रियविश्वे । सर्वतो जयमन्विच्छेत् इति चिन्त्यः ।

पूर्व्वपर अपर दक्षिणोत्तराऽधर स्व-अन्तरा एते पूर्व्वादयः ।

१५. आदामः साम् ।

सर्वनाम्नोऽवर्णादामः साम् स्यात् । सर्वेषां, सर्वासाम्, केषाम्, कासाम् ।

१६. जस ईत् पुंसि ।

पुंसि सर्वनाम्नो जस ईत् स्यात् । सर्व्वे, विश्वे, ये ते । आदित्येव (आत् इत्येव)—भवन्तः ।

१७. सुपि ।

अधिकारोऽयम् ।

१८. स्त्रियां ङिति स्याट् प्राक् पुवच्च ।

स्त्रियां सर्व्वनाम्नः उत्तरे ङिति सुपि स्याडागमो भवति । प्राक् पुंवच्च सर्वस्यै, अमुष्याः । आत् इत्येव—भवत्यै ।

१९. तदादेराद्वेष्टेरत् ।

स्वादौ सुपि द्विपर्यंन्तस्य तदादेष्टेरत् (टेः अत्) स्यात् । सः, स्यः, ततः, तत्र । तद्, त्यद्, यद्, अदस्, इदम्, एतद्, एक द्वि । द्वेर्न तसि द्वितः । सुपीत्येव, लुकोऽन्तरङ्ग-त्वान्न लुब्लुका लुप्ते इति निषेधात्, तत्कुलम्, तत्पुत्रः । आ द्वेरिति किम् ? सर्वनाम्न इत्येव—प्रियतद्, अतितदौ ।

२०. सौ तः सः ।

सौ परे तदादेस्तस्य सः स्यात् । सः, परम सः, स्यः, एषकः, एषा ।

२१. अदसो दस्त सो रौश्च, के तु वा ।

सौ परे अदसो दस्य सः स्यात् । सोश्च औकारः, स्त्रीपुंसयोः सिंहावलोकि-तन्यायेन—असौ स्त्री, असौ पुमान्; के तु वा—असकौ, अमुका वा, असुकश्चेत्येके । लुकोऽन्तरङ्गत्वान्नेह—अदः कुलम् ।

---

१८. ननु पुंवच्चेत्युक्तेऽपि प्रागेव सम्भवति किं प्रागित्यनेन ? सत्यम्, मन्दधियां सुप्रतिपत्त्यर्थम् । सुपीति साक्षात् सुप्येव न तु लुप्ते तत्कार्यम् । इतरथा स्थानि-वद्भावादेव साहचर्यात् सुपीति लभ्यते किं सुपीत्यधिकृतेनः । तेव, अमुष्या, मुखमदोमुखम् ।

२०. त्यच्छब्दो भाषायामःयुक्त इत्येके । एषक इत्येकः प्रकृतिभक्तत्वात् व्यवधाय-कत्वम् । एषेति सावत्त्वे षत्वे च स्त्रियामाद् भवति । इतरथा तेन व्यवधाने (न) कथं यकारः प्रवर्त्ततामिति ? किञ्च हे सेत्यत्र सन्निपातलक्षणस्य वर्णग्रहणे निमित्तत्वात् सम्बुद्धेर्लोपः स्यात् ।

२२. **अटेर्यथाच् कालम् दादु, दोमः ।**

अष्टिर्यस्य तस्याटे-रदसो । दकारादुत्तरस्याचो यथाच् कालं ह्रस्व दीर्घानुरूपमुर्भवति । दस्य च मत्वं सुपि परतः—अमुना, अमु, अमूनि, इष्टसिद्धयै विधयो विध्यन्तरङ्गमपेक्षन्ते, अथवा यथाच् कालमिति वचनात्, अयादौ कृते, अमुया, अमुष्मै । अटेर्विधानात् दृगादौ च, अमूदृक्, अमूदृशः ।

२३. **एत ईद्बहुत्वे ।**

अदसो बहुवचनस्य एत ईद् भवति । दस्य च मत्वं सुपि परतः । अमी, अमीभिः । दादित्येव—अमुके ।

२४. **इदमदसोरकोर्भिस्यत एत् ।**

अककारयोरिदमदसोर्भिसि अत एत् स्यात् । एभिः, अमीभिः । अकोरिति किम् ? इमकैः । अत इति किम् ? आभिः ।

२५. **इदम इत्तसि होः ।**

तसौ हकारे च परे सकश्चास्येद् भवति । इतः, इह ।

---

२२. अष्टिर्यस्येति, अस्यार्थः, यस्यादसष्टेरवर्णो विधीयते तस्य दद्दाकारात् पर उवर्णो भवतीति । यथाच्कालमिति, कालः क्रियाविशेष, अचः काल उच्चारणक्रिया, तमनतिक्रम्य पदार्थानतिक्रमेऽव्ययीभावः, तेनायमर्थः सम्पद्यते, यद्यदसोदकारपरो ह्रस्वस्वरस्तदा ह्रस्व उकारः स्यात्, यदि पुनर्दीर्घस्वरस्तदा दीर्घोऽकारः इत्याह यथाच्कालं ह्रस्वदीर्घानुरूपमिति । द्वितीयं लक्षणं विवृणोति, दस्य चेति चकारोऽत्राध्याहर्त्तव्यः, सुपीति प्रायिकम् । ननु अमुयेत्यादौ परत्वादुत्वे कृते षत्वे चानिष्टरूपं स्यादित्याह इष्टार्थसिद्धा इति । नन्विष्टसिद्धिकल्पनया किमिह प्रत्याख्यातं न शक्यते ? किं वा विधातुं न प्रभूयत इत्याह, अथवेत्यमर्थः । अटेर्दादु दो म इत्युक्तेऽपि आन्तरतम्यात् सर्वं सिद्धयति, तथापि यत् यथाचकालमित्युक्तम्, तत् सावकाशोऽयं विधिरितिज्ञापनार्थम्, तेनान्यस्मिन्विधौ प्रवृत्ते (सति) पश्चादेष प्रवर्त्तत इति । यथा चान्यसिद्धावूदुतौ मा. दीर्घह्रस्वाचोरिति सूत्रम्, यथाचकालमित्यस्य स्वरसात् कृते कार्य्यजाते विधिरयं प्रवर्त्तते, ततश्च टेरदादेशः सिद्ध एव, किमटेरिति पुनरुक्तेन प्रयोजनमित्याहाटेर्विधानादित्यमर्थः । भत्रत्यक्षराधिक्यादर्थाधिक्यमिति वृद्धमतेप्टेरवर्णमात्रोत्पत्तावधिकृतमपि । गङ्गास्रोते वत् प्रवर्तमानमनपेक्ष्य सुपं विधिरयं निरवग्रहः प्राप्नोति ।

२६. **इयमयं स्त्रीपुंसयोः सुना ।**

इदमः सुना सह इयमयमौ स्याताम् । इयं स्त्री, अयं पुमान् ।

२७. **दो मः ।**

इदमः सुपि दस्य मः स्यात् । इमौ. इमे, इमम्, इमाम् ।

२८. **टौ सोरकोऽनः ।**

टौसोः परयोरिदमोऽनः स्यात् । अनेन, अनयोः । अक इति किम् ? इमकेन, इमकयोः ।

२९. **हल्यत् ।**

हलादौ सुपि परे इदमोऽद् भवति । आभ्याम, एभिः, अस्य, आसाम् । अक इत्येव—इमकाभ्याम्, इमकस्य ।

३०. **सकश्चान्वादेशे ।**

अन्वादेशे पूर्वोक्तस्यानुकथने इदमः सककारस्याद् भवति इति परतः । इमकाभ्यां रात्रिरधीताः, अथो आभ्यामहरप्यधीतम् ।

३१. **एनो द्वितीयाटौस्वेतदोऽपि ।**

द्वितीया-टा-ओस्सु परतः सकश्चान्वादेशे इदम् एतदोऽपि एनादेशो भवति । इमम्. इमकम्. एतम् या बोधव, अथ एनमध्यापय । अनेन इमकेन एतेन वा भुक्तम् अथैनेनाधीतमपि; अनेयोरिमकयोरेतयोर्व्वा धनम् अथैनयोर्ज्जनश्च ।

३२. **एनद् वा क्लीबे द्वितीयैकत्वे ।**

क्लीबे अन्वादेशे इदमतदोर्द्वितीयैकवचने एनद् वा स्यात् । इदम् एतद् वा कुम्भमानय, अथैनं प्रक्षालय ।

---

२६. ननु इदमो मः, षः सौ, इदोऽयः पुंसीति मुनिना सूत्रत्रयं कृतम्, इयकमयकमिति इतरथा सर्वादेशत्वात् किमः क इतिवत् साककस्यापीदम् एतावादेशौ स्याताम्मिति । सत्यमुक्तम्, सत्यपि सर्व्वादेशे पश्चादपीष्यते । सुनेति किम् ? अयं पुत्रोऽ अस्येतीदं पुत्रः ।

३०. आदिश्यत इत्यादेशः, दिशिरह कथनार्थः । यथा धर्म्मं दिदेश मोक्षायेति । अनुशब्दः पश्चादर्थे वर्त्तते, स च पूर्वकथितस्यैव भवतीत्याह, पूर्वोक्तस्येति, यत्र कर्म्मादितया किञ्चित् प्रतिपाद्य पुनरुच्यते, सोऽत्रान्वादेश इति श्रीपतिः । (कथितस्यानुकथनमन्वादेशस्तस्मिन्) सकश्चेति चकारोऽकं विशेषणमनुकर्षति तेन ककारसहित-रहितस्यैव भवति । अन्वादेश इति किम् ? इमकाभ्यामधीतं भुक्तञ्च ।

३२. इहापि व्यक्तव्ये यद् द्वितीयैकत्वे इत्युक्तम्, तस्यायमभिप्राय नपुंसके तस्यावश्यं लोपात्त्वात् परत्वाभाव इति । क्रमदीश्वरस्तु द्वितीया टौसन्तस्य समास

३३. **अदेतदस्त्रतसोरनन्वादेशेऽपि ।**

एतसोरन्वादेशेऽपि सकश्चैतदोऽद्भवति । अत्र, अतः ।

३४. **किमः कः ।**

किमः सुपि कः स्यात्, कः कौ के, केषु । सुपीत्येव, किम् ? तसादौ कुः । कुतः, कुत्र, क्व, कुह वेदे ।

३५. **युष्मदस्मदो रमौतोराम् दा ।**

अलिङ्गे युष्मदस्मदी, अनयोर्दकारेण सह अमौतोः स्थाने आम् भवति । त्वाम्, माम्, युवाम्, आवाम् । अत्यादिप्रयोगे च—अतित्वाम्, अतियुवाम्, अतिताम्, अत्यावाम् ।

३६. **शसश्चान् ।**

युष्मदस्मदोर्दकारेण सह शसः आन् भवति । युष्मान्, अस्मान् ।

३७. **चतुर्थ्यां भ्यसो भ्यम् ।**

अनयोर्दकारेण सह भ्यसो भ्याम् स्यात् । युष्मद्भ्याम्, अस्मद्भ्याम् ।

३८. **ङसिभ्यसोस्तिः ।**

अनयोर्दकारेण सह ङसिभ्यसोस्तिः स्यात् । इदनुबन्धः । त्वत्, मत्, युष्मत्, अस्मत् ।

इति सूत्रयन् एनं श्रित एनश्रित इत्युदाजहार । एनत्, एने, एनानि, इत्यादि रूपं भवतीति । समासे सत्यपि, एनत् पुत्रः एनत्कृतदित्यामि केचित् ।

३४. तदादेराद्वेष्टेरत् किमश्चेति कृते सिद्धे यत् किमः क इति सूत्रितम्, तत् आगमा यद्गुणीभूताः (परि० २१) इति न्यायात् सकोऽपि इति किम्कादेशार्थम् । केति कादेशे स्त्रियामपि सुपीत्येवेति, इहाङ्गिककार्यत्वान्न लुब्लुके इति निषेधो नास्तीति भावः ।

३५. सुपा त्वमादिर्युष्मदस्मदोऽहमादिश्च समः स्त्र्यादाविति केनचित् सूत्रितम् तदिह न व्यक्तव्यम् (वक्तव्यम्) इत्याह, अलिङ्गे युष्मदस्मदी इति शब्दरूपे इत्यर्थः । उक्तञ्च, "षटसंज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययमिति" अत्र युष्मदस्मदो-र्द्वैत्यवायवि सम्बन्धः, तेन परस्परासम्बन्धात् यथाक्रमभावोऽवसीयते अत्यादि-प्रयोगे चेति तद्वाक्य-वचनवच्छेषविभक्तावित्यादेशात्, एव सर्वत्र ।

३७. ननु ङसिभ्यसोस्तिरित्यत्र ङसिसाहचर्यात् पञ्चमीबहुवचनमेव भ्यस् गृह्यते, ततश्च भासोभ्यामित्युक्ते चतुर्थी-बहुवचनस्यैव भ्यस् भविष्यति, किं चतुर्थ्या-मिति पुनर्वचनेन् ? सत्यम्, प्रतिपत्तिरियं गरीयसीति ।

३९. **आम आकम्** ।

तयोर्दकारेण सह आम आकम् स्यात् । युष्माकम्, अस्माकम् ।

४०. **त्वमहं सुना** ।

तयोः स्थाने सुना सक त्वमहमौ स्याताम् । त्वम् अहम्, परमत्वम्, परमाहम् ।

४१. **जसा यूयं वयम्** ।

तयोर्जसा सह यूयं-वयमौ स्याताम् । यूयम्, वयम् ।

४२. **ङ्या तुभ्यं मह्यम्** ।

ङ्या चतुर्थ्येकवचने सह तयोस्तुभ्यं-मह्यमौ भवतः । तुभ्यम्, मह्यम् ।

४३. **तव-ममौ ङसा** ।

तयोर्ङसा सह तव-ममौ स्याताम् । तव, मम ।

४४. **दो योऽचि** ।

अचि परे तयो सम्भवतो दकारस्य यो भवति । तया, मया, युवयोः, आवयोः, त्वयि, मयि ।

४५. **भसोरात्** ।

भादौ सादौ च सुपि दकारस्याद् भवति । युवाभ्याम्, आवाभ्याम्, युष्माभिः, अस्माभिः, युष्मासु, अस्मासु ।

४६. **मपर्य्यन्तयोः** ।

अधिकारोऽयम् ।

---

३९. नन्वाम आकम् भवन्नमौतारामः षष्ठीबहुवचनस्य वा । अविशेषादुभयोर्वा स्यादिति सन्देहापगमार्थं यदन्येन सिद्धान्तितं तत् कथमाश्रियते ? मैवम्, आकम् दकारेण सह भवति न पुनस्तमन्तरेणामौतोरामेव दकारेण सहितो न पुनस्तत्राकमिति ।

४०. ननु त्वकमहकमित्यादौ सर्वनामत्वादकि कृते, कृतेऽप्यादेशे कथं पुनरक् सम्भवतीति ? मैवम्, कृतेऽप्यागमे पुनरगिष्यते सुपश्चानोसभादेरिति वा, न च वक्तव्यम् कथमत्र प्रकृति-प्रत्यय विभाग उभयोरादिष्टत्वादिति वृद्धमतस्मृतेः । तथाहि "युष्मदस्मद्भ्याम् ङसोऽस्, तवममौ ङसि, ङेः प्रथमयोरम्, त्वाहौ सौ, यूयवयौ जसि, तुभ्यमह्यौङ्षीति" भगवान् पाणिनिरसूत्रयत्, वक्ष्यति च त्वयकादौ एकत्राक् यथाशोभमिति (७१) ।

४४. इह पुनः सम्बन्धस्य विपर्य्यायः यावत्सम्भवः (परि० ६९) इत्यभिप्रायेणाह सम्भवत इति, अकि त्वयकामयकेत्यादि ।

४६. माभिविध्योस्तयोः कार्य्यमधिक्रियते न पुनरवर्णपर्यन्तयोः, अत आदेशस्यासर्वनामत्वेऽपि प्रकृतः सर्व्वनामत्वात् टेः प्रागक् भवतीति विवृणोति युवकाभावकामिति ।

४७. **युवावौ द्वित्वे ।**

तयोर्मपर्यन्तयोर्द्विवचने युवावौ स्याताम् । युवाम् । आवाम् । मपर्यन्तयोरिति किम् ? युवकाम्, आवकाम् । न तसि युवावौ । युष्मत्तः, अस्मत्तः ।

४८. **त्व-मावेकत्वे प्रत्ययोत्तरपदयोः ।**

तयोरकृतादेशयोर्मपर्यन्तयोरेकत्वाभिधाने त्व-मौ भवतः । प्रत्ययमात्रे उत्तरपदे च । त्वाम्, माम् त्वत्तो मत्तः, त्वदीयो मदीयः, क्यच्-त्वद्यति, मद्यति, क्यङ्-त्वद्यते, त्वं ग्रामणीरस्य त्वत्कः, मत्कं मतम् । उत्तरपदे च, त्वत्पुत्रो मत्पुत्रः । एकत्व इति किम् ? युष्मदीयोऽस्मत्पुत्रः ।

४९. **गौणयोऽत्र सु-जस्-ङे-ङसा त्वमहादिस्तत्पुरुषे ।**

तत्पुरुषे तयोरप्रधानयोश्च सुजसादिभिः सह यथोक्तं त्वमहमादिर्भवति । त्वामतिक्रान्तोऽतित्वम् अत्यहम् । त्वामतिक्रान्ता अति यूयम्, अति वयम् । त्वामतिक्रान्ताय अतितुभ्यम्, अतिमह्यम्, यद् वाच्यं तदुक्तं युष्मदस्मदोः । वर्ज्जयित्वा त्वमत्वञ्च मान्तलोपो विभाषयेति त्वामतिक्रान्तस्य अतितव, अतिमम । एवमनयोर्द्वित्व-बहुत्वयोश्च, युवामति क्रान्ता युष्मान् वा, अतित्वम्, युवामतिक्रान्ताः युष्मान् वा, अति यूयम् । युवामतिक्रान्ताय युष्मान् वा, अतितुभ्यम्, युवामतिक्रान्तस्य युष्मान् वा अतितव । एवमस्मदोऽपि ।

---

४८. त्व-मादेशयोः सामान्यत्वात्, त्वमहमादीनां विशेषत्वात्, उत्सर्गापवादयोः (परि० ४८)इति न्यायात्तु एव प्राप्नुवन्तीत्याह, अकृतादेशयोरिति । प्रत्ययमात्र इति मात्रटा विवृतत्वात् क्वचिल्लुप्तेऽपि प्रत्यये भवतीति । यथा त्वद् भवतीति ।

४९. अन्यार्थवृत्तिते सत्युपलक्षणार्थत्वं गौणत्वम् । अन्यार्थत्वेऽसर्वनामत्वाद् विधिबलादेव भवति । गौणयोरपि त्वमहमादिः, तेन स्वादिषु चतुर्षु, तद् वाक्यस्याप्राधान्यम्, भिन्नार्थस्यैव प्राधान्यमित्यवधेयम् । त्वमहमादिरिति निर्देशाद् यथोक्तमित्यवगम्यते । त्वामतिक्रान्ते इत्यर्थे अतित्वम्, एवं मामतिक्रान्ता अतिवयमित्यादि । तत्पुरुष इति किम् ? प्रियत्वत्पुरुषः, अन्ये तु तत्पुरुष इत्युपलक्षणम्, तेन गौणमात्रे स्यादेव । यथा प्रियस्त्वं युवां यूयं वा यस्य स प्रियत्वम्, त्वमाचक्षाण स्त्वमित्यादयः स्युरित्याहुः । अपिच इनन्तानाञ्च .. कातन्त्रे । संक्षिप्तसारेऽपि, ये ये विशेषा तेऽपि तत्र बहुलग्रहणात् समर्थनीयाः । तथाहि युष्मानाचक्षाण इति सुप्स्तत् करोति (७३/१/२४) इति णिच्, क्विप्, त्वम्, युवां, यूयम् । त्वाम्, युवाम् । शस्, भिस्, सुप्-सु मस्य लुक् स्यात् युषान् । टि-ङ्योस्तु मयोरलुक्-त्वा, युवाभ्याम्, युषाभिः । तुभ्यम्, युवाभ्याम् । भ्यमत्यो-

५०. तद् वाक्यवचनवच्छेषविभक्तौ ।

उपयुक्ताच्छेषे सु-जसादेरन्यात् विभक्तौ वाक्ये परस्परसम्बद्धार्थपदसमुदाये युष्मदस्मदोरत्यादिप्रयोगे च यद् वचनं भवति, तस्मिन् प्रकृतेर्यद्‌रूपं तादृशमेव तयोरन्यार्थेऽपि स्यात् । यदि वाक्ये तयोरेकवचनं तदान्यस्य एकत्वे द्वित्वे बहुत्वेऽपि द्विवचनवद्‌रूपम् । यदि तयोर्वाक्ये बहुवचनं तदाऽन्यस्य सर्व्ववचनेऽपि बहुवचनवद् रूपम् । उदाहरणानि—त्वामतिक्रान्तौ, अतित्वां विप्रौ, त्वामतिक्रान्तम् अतित्वाम्, त्वामतिक्रान्तान्, अतित्वान्, एवमतित्वया, अतित्वाभ्याम्, अतित्वाभिः, त्वामतिक्रान्तेभ्यः, अतित्वभ्यम्, त्वामतिक्रान्तात् अतित्वत्, त्वामतिक्रान्तेभ्यः अतित्वत् । एवमतित्वयोः, अतित्वाकम् । केचित् आम् आकमं नेच्छन्ति । तन्मतेन अतित्वयाम्; अतित्वयि, अतित्वयोः, अतित्वासु । एवमस्मदोऽपि । तद्‌द्वित्वे—युवामतिक्रान्तौ अति युवाम्, युवामतिक्रान्तमतियुवाम्, युवामतिक्रान्तान् अतियुवान्, युवामतिक्रान्तेन अतियुवया, एवमतियुवाभ्याम्, अतियुवाभिः, युवामतिक्रान्तेभ्योऽतियुवभ्यम्, युवामतिक्रान्तात् अतियुवत्; युवमतिक्रान्तेभ्योऽपि अतियुवत्, एवमतियुवयो , अतियुवाकम् । अन्येषां मतेन—अतियुवयाम्, अतियुवयि, अतियुवयोः, अतियुवासु । एवमस्मदोऽपि तद्‌बहुत्वे—युष्मानतिक्रान्तौ, अतियुष्माम्, अतिक्रान्तञ्च, अतियुष्माम्, अतियुष्मया, अतियुष्माभ्याम् अतियुष्माभिः । युष्मान् अतिक्रान्तेभ्योऽतियुष्मभ्यम्, ङसिभ्यसोस्तिः । अतिक्रान्तात्, अतियुष्मत्, अतिक्रान्तेभ्यश्च अतियुष्मत् । एवमतियुष्मयोः, अतियुष्माकम् । अन्येषां मतेन अतियुष्मयाम्, अति युष्मयोः, अतियुष्मासु । (एवं त्वामतिक्रान्ता स्त्री अतित्वम्, त्वामतिक्रान्ते स्त्रियौ अतित्वां स्त्रियौ इत्यादि । एष न सार्व्वत्रिक पाठः) स्वमोर्लुकि च क्लीबे । अतित्वत्, अतियुवत्, अतियुष्मत् कुलम् । एवमस्मदोऽपि ।

मस्य लुग्वा—युष्मभ्याम्, युषभ्याम् । त्वत्, युष्माभ्याम्, युष्मत्, युषत्, तव, युवयोः । आकमपि युष्मदस्मदोस्यर्मं लुग्वा, युष्माकम्, युषाकम्, युष्मामित्येके त्वि, थुवयोः, युषासु । केचित्, त्वमाद्यहमादी नेच्छन्ति, सु-जसोरम्, मस्य लुग्वा; युष्मम् । अम् टा भिस् ङि, सुप्सु लुङि्णत्यम्, यूयम्, युष्मा युष्वितिकातन्त्रम् । यृषाभिरम् शसाभ्यां स्यात् । युष्मान्. युषाभ्याम्, ङेरम्, मस्य लुग्वा, युष्मम्, युषम् । भ्यसोरम्, मस्य लुग्वा—युष्मत्, युषत्, युष्मभ्यां, युषभ्याम् । ङसोरत्, मस्य लुग्वा—युष्म, युष । ओसि मस्य यः—युष्योः । आकमि मस्य लुग्वा—युष्माकम्, युषाकम्, युषि, युष्योः युषासु । एवमस्मम्, असम् । अस्माम् असाम् । अस्या, अस्येति कातन्त्रम् । असाभिः, असाम्, अस्मान्, असान्,, असाभ्याम्, अस्मम्, असम्, अस्मत् अस । अस्म, अस्माकम्, असाकम् । असि,

५१. पदात् त्वां मां त्वा-मा वा ।

पादुत्तरौ त्वां इत्येतौ त्वा मा इति वा स्याताम् । **पातु त्वा, मातु मा ।** पदादिति किम् ? त्वां पातु ।

५२. ङे ङसन्तयोस्तु मे ।

ङे-ङसन्तयोर्युष्मदादोर्यथाक्रमं ते मयौ (ते, मे इत्येतौ) वा स्याताम् । दद्यात्ते, देहि मे । पुत्रस्ते. पुत्रे । मे । पदादित्येव—तुभ्यं दद्यात । कथं-जितं ते पुण्डरीकाक्ष ? त्वया मयेत्यर्थे ते मे इत्यव्ययौ तिष्ठतः ।

५३ षष्ठी-चतुर्थी-द्वितीयास्थयोर्द्वित्वे वां नौ, बहुत्वे वस्-नसौ ।

षष्ठाद्यन्तयोर्यथाक्रमं द्विवचने वां नौ, बहुवचने वस्-नसौ स्याताम् । **गावो वाम्, गावो नौ ।** धनं वां दीयते, धनं नौ दीयताम्; देवो वां पातु, देवो नौ रक्षतु । बहुत्वे—पुत्रो वः, पुत्रो नः; धनं वो दीयते, धनं नो देहि; पातु वो गिरिजा माता, पातु नः कमलालया । पदादित्येव युवयोर्ग्रामः ।

५४. नाऽऽमन्त्रितात्त्वामादयो तत्सामान्यवचनात् ।

सम्बोधनपदात्त्वामदयो न स्युः । **विप्र त्वां वन्दे, देव ! मां पाहि, विप्र तव स्वं,**

अस्योः, असासु । एकत्व-द्वित्वयोरप्रधानसमासवत् । सु जस् ङेभिरेकत्वे त्वम्, मम; ङसा त्वमौ—त्वामाचक्षाणः त्वम् । त्वाम्, त्वम्, त्वम्; त्वाम्, त्वाम्, त्वान्; त्वया त्वेनेति कातन्त्रम् । त्वामाम् त्वभिः, त्वम्, त्वाभ्याम् त्वत्, त्वाभ्याम्, त्वत्, त्व, त्वयोः, त्वाकन्, त्वयि, त्वयोः, त्वासु । मामाचक्षाणः मम्, माम्, मम्; माम्, माम्, मान्, मया मेनेति कातन्त्रम् । माभ्याम्, माभिः, मम्, मभ्यम् । मत्, माभ्याम्, मत् । म, मयोः, माकम्; मयि, मयोः, मासु । महाऽऽचक्षाणोऽऽहमिति कातन्त्रम् । युवामाचक्षाणः, त्वम्, युवाम्, यूयम् । युवाम्, युवाम्, युवान्, युवया, युवाभ्याम्, युवत् । तव-युवयोः युवाकम्, युवयि, युवयोः, युवासु । आवामाचक्षाणाः, अहम्, आवाम्, वयम्, आवाम्, आवाम्, आवान् । आवमा, आवाभ्याम्, आवाभिः । मह्यम् आवाभ्याम्, आवभ्यम् । आवत्. आवाभ्याम्, आवत् । मम, आवयोः, आवाकम् । आवयि, आवयोः, आवासु । अम्बादौ भू, युवामाख्यातुमिच्चति युयुष्मयिषति ।

५३. ननु षष्ठीचतुर्थीद्वितीयान्तयोरिति वक्तुमुचितम् किं स्थग्रहणेन ? मैवं वोचः, स्थग्रहणाद् श्रूयमाणविभक्तेर्माभूत् यथा—योऽग्रममस्मत्पुत्रः, अयमस्मच्छिष्यः । ननु नित्यं प्रथमादिष्वादेशो दृश्यन्ते न शिष्टानाम्, तच्चिन्त्यम्, यथा—गेये को नु विनीनौ वाम्, कस्य चेयं कृतिः कवेरिति कालिःदासः ।

५४. नामन्त्रितादित्युक्ते पदात् पदनिमित्तीभूतादामन्त्रितार्थे विहितात्त्वामादय एव न स्युः, निषेधस्यविध्युपजीवित्वात् न च वाच्यम्, अनन्तरस्य (परि० २६)

विप्र मम स्वमित्यादि । तत्सामान्यवचनात् विशेषणान्निषेधो नास्ति । छात्र वैयाकरण त्वाऽहं पृच्छामि, छात्र गुणिन् ते स्वमित्यादि । तत्सामान्येति किम्? छात्र जटिलक त्वां पृच्छामीत्यत्र निषेध एव, जटिलकश्छात्रः सामान्यो न भवति ।

५५. वाक्यादि पादाद्योः, च वा हा-ह-हैवपूर्वे च ।

वक्यादौ श्लोकस्य (सर्व) पादादौ च त्वामादयो न स्युः । ओदनं पच युवयोर्यथास्यात् । युष्माकं पालकः शम्भुरस्माकं पालको हरिः । च, वा, हा-ह-हैव पूर्वे च, स्वमिदं तव च, मम वा, मम ह स्वम्, ममाह पुत्रो ममैव पुत्रः । पूर्व इति किम्? पुत्रश्च ते स्वमित्यादि तत्परत्वाद् भवति ।

५६. दृश्यर्थं योगेऽनालोचने ।

दृश्यर्थयोगे त्वामादयो न स्युः अनालोचनञ्चेत् । विप्रस्तव देशं संदृश्यागतः, विप्रो मम वासमालोक्यागतः । अनालोचन इति किम्? साक्षान्निर्भालने निषेधो मा भूत्, विप्रस्त्वा पश्यति, विप्रो मा समीक्षते ।

इति न्यायात् त्वामावयो निषिद्धा भविष्यन्ति न पुनः सर्व्वे, निमित्तीभूतस्य पदस्य सर्वविषयकत्वान्निषेधोऽपि तथैव स्यात् किं वा त्वामादय इत्युक्तेन? सत्यम्, मन्दधियां सुखप्रतिपत्त्यर्थं प्रत्युदाहरति, तत्सामान्यवचनादित्यर्थः । तस्य सम्बोधितार्थस्य सामान्य साधारणं वक्तीति कर्त्तरि टनः, तद् विशेषणं समानाधिकरणम् । तथा च वर्धमानसूत्रम् "न सामान्यवचनं समानाधिकरणे" तेन देवदत्त चैत्र युवयोः स्वमित्यत्र निषेध एव । छात्र वैयाकरणेति यश्छात्रः शिष्यः स वैयाकरणोऽपि स्यादिति सामान्यम्, जटिलत्वन्तु न तथेति भावः ननु प्रागामन्त्रितमसत्त्वादिति पाणिनिसम्मतं श्रीपतिसूत्रम्, आमन्त्रितपदस्याविद्यमानत्वादेशार्थम्, तेनामन्त्रितात्त्वामादयो निषिध्यन्ते, तत्पूर्वपदात्तु विधिः स्यादेव । यथा—"उचितं वाचयामि देवि ते हरः स्वसारं देवि त्वा जनताश्रित्य तत्त्वतः । वेत्ति स्वसारं देवि त्वा योगेन क्षयिता शुभे" त्यादि भवतकस्तदतिदेशाभावात् कथन्ते साधवः स्युः? सत्यम्, नञा निर्दिष्टमनित्यमिति न्यायात् तेषां साधुत्वम् । यत्तु आदेशार्थः बहुत्वे वेति सूत्रयन् छात्राः कौमाराः अस्माकं स्वं वेत्युदाहृतवान् तदप्यभिधानात् । किञ्च धातुजं समानाधिकरणं सम्भवतीति भाष्यस्मृतेः, इहापि अनन्तादेकाधिकरणाद् व्यवस्थितविभाषयाभिधानाद वत्यादयो न भवन्तीति लक्ष्यते । गोमतां युष्माकं स्व, दण्डिनोर्युवयोः स्वम्, पांशुलस्य तव स्वम् । कृदन्ते त्वनिषेधः, पाचकानां वः स्वम्, ग्राहिणोर्वां स्वम् । दरिद्रस्य ते स्वम् । एवमस्मदोऽपि ।

५६. दर्शनं ज्ञानम्, आलोचनं चाक्षुषज्ञानम् । आलोच्य ज्ञात्वा । पश्यति निरूपयति । दृश्यर्थे इति किम्? ग्रामो वः सम्प्रधावयति । परस्परासम्बन्धेऽप्ययं निषेधः । भक्तस्तव रूपं ध्यायति ।

५७ पञ्चम्यास्तसिर्वा किंसर्वादिबहोरद्व्याादेः ।

द्व्यादिवर्ज्जितात् किमादेः पञ्चम्यास्तसिर्व्वा स्यात् । इदनुबन्द्ध एव । कस्मात्, काभ्याम्. केभ्यो वा, कुतो भवानवरोहति, सर्वतो हीयते, बहुतो हीनः । द्वयादेः सामान्य निषेधोऽयम्, विशेषेण भविष्यति ।

५८. सप्तम्यास्त्रः ।

किमादेः सप्तम्यास्त्रो वा स्यात् ? कुत्र, सर्व्वत्र, बहुत्र । अद्व्यादेरित्येव, द्वयोः, त्वयि, मयि ।

५९. किमोऽच्च

किमः सप्तम्या अच्च वा स्यात् । क्व, कुह वैदिके ।

६०. इदमो हः ।

इदमः सप्तम्या हो वा स्यात् । त्रापवादोऽयम् । इह ।

३१. अन्यासामपि दृश्यते ।

अन्यासामपि विभक्तीनां किमादेर्यथादर्शनं तसादयः स्युः । कः, कुतः, कुत्र, भवान्; अयमित इह भवान्; तं ततः तत्र दीर्घायुषां ब्रवीमि । केन, कुतः कुत्र भवता । अस्मिन्, इतः, इह भवति ।

६२. आद्यादिभ्यस्तसिः ।

सर्वनाम्न इति निवृत्तम् । एभ्यस्तसिर्वा स्यात् । आदौ, अःदितः, प्रथमतोऽन्ततो, मध्यतः, पार्श्वतो, मुखतः, अग्रतः, अर्थतः, कर्म्मतो, गुणतः, शरीरतश्च, कृशः, शब्दतो दुष्टः, स्वरतो वर्णतो वा ।

६३. प्रतियोगे पञ्चभ्याः ।

तसिर्वा स्यात् । यो नारायणतः प्रति ।

६४. अपादाने चाऽहीयरुहोः ।

हीयरुहोरप्रयोगेऽपादाने पञ्चम्यास्तसिर्वा स्यात् । ग्रामत आयाति, चौरतो बिभेति । द्व्यादेः— द्वितः, त्वेत्तो, मत्तः, युष्मत्तः, अस्मत्तः । अहीयरुहोरिति किम् ? स्वार्थाद् हीयते, द्वाभ्यां हीनः, स्वर्गादवरोहति । अपादान इति किम् ? द्वाभ्यामन्यः ।

६५. अतिग्रहोऽचलनाक्षेपेष्वकर्त्तरि तृतीयायाः ।

एष्वर्थेषु तृतीयायास्तसिर्वा स्यात् । वृत्ततोऽतिगृह्यते, चरित्रतो न चलति, व्यवहारतो निन्दितः, अकर्त्तरीति किम् ? मैत्रेणातिगृह्यते ।

६६. पाप-हाकोश्चयोगे ।

अनयोर्योगे तृतीयायास्तसिर्वा स्यात् । वृत्ततः पापम्, वृत्ततो हीनः ।

६७. षष्ठ्यास्तत्पक्षे ।

षष्ठ्यास्तसिर्वा स्यात् । देवा अर्जुनतोऽभवन् अर्जुनस्य पक्षे इत्यर्थः । आदित्याः कर्णतोऽभवन् ।

६८. रोगाच्चिकित्सायाम् ।

तसिर्वा स्यात् । हिक्कातः, प्रवाहिकातः, कुरु चिकित्सां तस्या इत्यर्थः ।

६९. अभितः परितोऽव्ययम् ।

इमौ निपात्येते ।

७०. सर्वनामाव्ययतिङामक् प्राक् रेः कुत्सानुकम्पाल्पोऽज्ञातनयेषु ।

कुत्सार्थेषु सर्वनामादेष्टेः प्राग्वा स्यात् । पापोऽस्कौ, हा सकस्त्वम्; अल्पे—नीचकैः । तिङन्तस्य—पचतकि, जल्पतकि, अज्ञाते—कोऽसकौ। जल्पतकि । नीतौ—गोपायकेद्धनायुषी, अथोच्चकैरासनतः पराध्यात् । अव्ययान्तस्य कस्य च दः । धिक्, धकित्, हिरुक्, हिरकुत् । तूष्णीमोमः काम् । तूष्णीकामासते विज्ञाः ।

७१. सुपश्चानोसभादेः ।

ओकार-सकार-भकारिदिवर्ज्जितस्य सुपष्टेः प्राग्वा स्यात् । त्वयका, मयका, त्वयकि, मयकि । अनोसभादेरिति किम्? आवकयोः, अस्मकासु, अस्मकाभिः । तुभ्यकमित्यपि । त्वयकादौ एकत्राक् यथाशोभम् ।

इति श्रीमद्पद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
द्वितीयोऽध्यायः सम्पूर्णः ।

---

७०. शीले को मलोपश्च, तूष्णीं शीलः, तूष्णीकः ।

७१. क्वचिदेकदेशोऽप्यनुवर्त्तत इति न्यायात् सर्वनाम्न इत्यनुवर्त्तते । तेन सर्वनाम्नः सुपष्टेः प्राग्वा स्यादित्यर्थः । अत्रापि कुत्सार्थोऽवगन्तव्यः । ननु सर्वनाम्नः सुपश्च प्रागकि सति त्वयकेत्यनिष्टं स्यादित्याह त्वयकादाविति । एकत्रेति सर्वनाम्नः प्राक्, रूपः प्राग्वा, इतरथा शेषोऽतिक्रमः स्यादिति । स्वाद्यका प्रकृत्यको बाधनमिष्यत इति भावः । अत्र युष्मदस्तदोर्विभक्तिरनोसभकारादेश्च वर्द्धमानसूत्रे युष्मदस्मद्भ्यामेव सुपष्टेः प्रागग्वा स्यादित्यभिध्येयमभियुक्तैः ।

तृतीयोऽध्यायः

प्रथमः पादः

"तिङन्त-सनादि-प्रकरणम्"

१. गुप्तिज्-किद्भ्यः सन् बहुलम् ।

गुपादिभ्यो धातुभ्यः सन्प्रत्ययो बहुलं भवति । गुपेर्निन्दायाम्—जुगुप्सतेऽधर्मम्, तङ् पूर्ववत् सनः । तिजः क्षमायाम्—तितिक्षतेऽपराधम्, कितो रोगनिर्णय-सन्देहयोः—चिकित्सत्यातुरं भिषक्, विचिकित्सति सन्देग्धीत्यर्थः । अन्यत्र यथाप्राप्तम्—गोपायति, तेजयति, सङ्केतयति ।

२. मान-वध.दान-शान एरी च ।

एभ्यः सन् बहुलं स्यात् । इकारस्य ईत्वञ्चाभ्यासे । मीमांसते, शास्त्रं विचारयतीत्यर्थः । वीभत्सते गजं, विकृतं करोतीत्यर्थः, दान-शानः स्वार्थे एव, दीदांसते दस्युः, शीशांसते शस्त्रम् । बहुलमित्येव मानयति, बाधयति, दानयति, शानयति, ।

---

१. इह तिज्-किद्भ्याम् भौवादिकाभ्यां साहचर्यात् गुप गोपनकुत्सनयोरिति निरनुबन्धो भौवादिक एव गृह्यते, न पुनर्गुप व्याकुलत्वे दैवादिकः, न वा गुपू रक्षण इति सानुबन्धः । यद् वा तयोर्निन्दार्थत्वाभावान्निन्दार्थस्य गुपेरेव ग्रहणम् । धातुत्वं तेषां क्रियाप्रतिपादकत्वादेवेत्याह धातुभ्य इति । ननु निर्दिष्टार्थत्वात् सन् प्रत्ययो भवन् प्रकृत्यर्थ एव भवितुमर्हति, ततश्च गोपनाद्यर्थेऽपि प्राप्तः स्यादित्याह गुपेर्निन्दायामिति । निन्दार्थे वर्त्तमानाद् गुपेः सन् भवति, निन्दार्थः स्वार्थकेनापि सना द्योत्यते तत्रैव तत्प्रतीतेः, अर्थेविशेष-नियमस्तु बहुलग्रहणादवसीयते । जुगुप्सत इत्यत्र कथमात्मनेपदम् ? यावता पूर्ववत्सन् इत्यसनन्तादिव सनन्तादात्मने पदं विधीयते, न च गुपादिभ्यः सनः प्रागात्मने पदं क्वापि दृष्टम्, ततः कथं तङ् पूर्ववत्सन इत्युक्तमिति । सत्यम्, गुपादिष्वनुदात्तोऽनुबन्धः कृतः, तस्मादनुदात्तङित इत्यात्मनेपदं भवति ? ननु कृतेऽप्यनुबन्धे सना व्यवहितत्वात्तत् कथमात्मनेपदं सम्भवति ? मैवम्, अनुबन्धकरणसामर्थ्याद् भविष्यति, एवं स्थितेऽपि यत्तङ् पूर्ववत् सन इत्युक्तम्, तदसनन्तानुदात्तानुबन्धादात्मनेपदयोग्यताभिप्रायेणेति ।

३. स्थानितुमो धातोरिच्छायाम् ।

इच्छार्थे गम्ये तुम्प्रत्ययमान्ताद् धातोः सन् बहुलं स्यात् कर्त्तुमिच्छतीति वाक्ये चिकीर्षति, दिव्—दुद्यूषति, इह श्वा मुमूर्षति, नदीकूलं पिपतिषति इत्युपमानात् । इच्छासनन्तान्न सन्—चिकीर्षितुमिच्छति । इह भवत्येव जुगुप्सिषते ।

---

३. स्थानशब्दो निवृत्तापकर्षे प्रसङ्गे च वर्त्तते, यथा श्लेष्मणः स्थाने त्रिकटुमोषधं प्रभुञ्जीत्, इह श्लेष्मनिवृत्तिरवगम्यते, गवां स्थाने अश्वा बध्यन्ताम्, गवामपकर्षोऽपसारणम्, दर्भानां स्थाने शरैरान्तरितव्यम्, दर्भानां प्रसङ्गः इत्यर्थः । इत्थमत्र स्थानशब्दस्यार्थत्रयमपि घटते । तथाहि, स्थानी निवृत्तिमान् तुम् यस्य तस्मात्, प्रवर्त्तमान एव निषिध्यते, नान्यः, तेनान्तर्भूततुमर्थादित्यर्थः । यद्वा स्थानी अपकर्षवान् तुम् यस्येति वाक्ये स एवार्थः । अपसारणमपि स्थितस्यैव सम्भवति, तेन तुममपसार्य्य सन् विधीयते । यद्वा स्थानी प्रसङ्गी तुम् यस्य तस्मात्, प्रसङ्गश्च योग्यस्यैव न त्वयोग्यस्य, योग्यत्वन्तु धात्वर्थतादर्थ्यादिवेत्याह तुम्प्रत्ययान्तादिति । तुम् प्रत्ययो भवितुं योग्यो यस्येत्यर्थः, बहुलग्रहणाद् विकल्पो लभ्यते, तेन पक्षे वाक्यमेवेति दर्शयन्नाह कर्त्तुमिच्छतीति । ननु धातुग्रहणं किमर्थम् ? यावता धात्वधिकार विहिते तुमर्थे विधीयमानः सन् धातोरेव भवितुमर्हति न त्वधातोः ततः क्यजादेबाधकस्य सत्त्वात् ? मैवम्, प्राचिकीर्षदित्यत्र सोपसर्गसमुदायाद् भवन् सन् सोपसर्गस्यैव विधीयते न उपसर्गात् प्रागपि सम्भाव्येत । ननूक्तमेव तुमन्तात् सन् विधीयते, तुम्विधिस्तु धातोर्न च तत्रोपसर्गप्रसङ्गोऽस्ति, येनेवं भवेत्, सत्यम्, मन्दधियां सुखप्रतिपत्त्यर्थमेव, इतरथा प्रकर्त्तुमैच्छदिति वाक्ये सनि विधीयमाने सोपसर्गस्यैव धातुत्वं प्रतिपद्येरन्निति बहुलानुवृत्त्या क्वचित्तुमर्थमन्तरेणापि सन् सम्भवति, यथा गुरुन् शुश्रूषति उपास्त इत्यर्थः । इच्छार्थसनः पुनः सन् न भवति, तथा चोक्तम् "मत्वर्थाच्छैषिकातुल्यो न मत्वर्थो न शैषिकः । न भावप्रत्ययो भावान्न सन्निच्छासनन्ततः ।" प्राग्विकारीया येऽर्थास्ते शेषास्तत्रभवः शैषिकाः, अध्यात्मादिभ्याष्टिकण् मत्वर्थाच्छैषिकार्थाच्च तुल्यः सरूपः मत्वर्थीयः शैषिकश्च न भवति । भावप्रत्ययात् सरूपो भावप्रत्ययो न भवति । यथा दण्डोऽस्यास्तीति दण्डिकः, एवं दण्डिकोऽस्यास्तीति दण्डिकवान् । शालायां भव इति शालीयः, शालीये भव इति पुनरीयो न स्यात् अहिच्छत्रे भव आहिच्छत्रस्तत्रभव आहिच्छत्रीयः । घटस्य भावः घटत्वम्, तस्य भाव इत्यर्थे त्वयं न स्यात् । एतत् सर्वं न्यायमूलम्, निष्पन्ना हि प्रकृतिः प्रत्ययविधेर्निमित्तं भवति, न च सरूपशैषिकमत्वर्थीयतावसन्प्रत्ययविधानकाले तत्तदन्ता प्रकृतिर्निष्पन्नाप्रकृतिरस्तीति तस्मादविद्यमानप्रकृतित्वादेव न स्यात् । जातौ पदार्थे त्वाभिन्ना अमी प्रत्यया इति भावः ।

४. स्वार्थकर्मणः काम्यः ।

इच्छायामेषितुरात्मार्थकर्म्मणः परे काम्यः स्यात् । दिवमिच्छति द्युकाम्यति, सत्पुत्रकाम्यति । स्वार्थ इति किम् ? राज्ञः पुत्रमिच्छति ।

५. क्यजमान्ताव्ययात् ।

इच्छायामेषितुरात्मार्थकर्म्मणः परे क्यच् स्यात् । आत्मनः पुत्रमिच्छति पुत्रीयति, दिव्यति क्येऽदत्वादुत्वं न भवति । गव्यति, रैयति । अमान्ताव्ययादिति किम् ? किमिच्छति, स्वरिच्छति ।

६. उपमानादाचारेऽधिकरणाच्च ।

उपमानात् कर्म्मणोऽधिकरणाच्च आचारेऽर्थे क्यज् बहुलं स्यात् । पुत्रमिवाचरति, पुत्रीयति भृत्यं, मात्रीयति परस्त्रियम्, प्रासाद इवाचरति—प्रासादीयति यः कुटयाम्, पर्यङ्कीयति मञ्चके । तस्य सन्तोषशीलस्य कुब्जिकाऽप्यप्सरायते ।

७. कर्त्तुः क्यङोजोऽप्सरनोश्चान्तलुक्पयसोऽपि वा ।

उपमानादाचारेऽर्थे कर्त्तुः क्यङ् बहुलं स्यात् । गरुड़ इवाचरति काकोऽपि गरुड़ायते, गव्यते गवयः, नाव्यते द्रोणी, भिषज्यते कश्चित् । ओजोप्सरसोश्चान्तलुक् । ओजायते । अप्सरायते । पयसोऽपि वा पयायते, पयस्यते ।

---

४. परस्मै इदं स्वार्थम्, कर्म्म क्रियाव्याप्यम्, स्वार्थञ्च तत् कर्म चेति स्वार्थकर्म, तच्चानुक्तमिह गृह्यते, स्वशब्दोऽत्र परप्रतियोगिवचनः । अन्तर्व्यापारपुरुषवचनत्वे तु विशेषणमनर्थकं व्यवच्छेद्याभावात् । इच्छाया आत्मगुणत्वात्, स्वार्थकर्म्मापि तत्संयोगिनः एव युज्यते इत्याह एषितुरिति । राज्ञ इत्यादि—ननु बहुलानुवृत्तेर्महान्तं पुत्रमिच्छतिवत् सापेक्षत्वादिहापि न भविष्यति किं पुनः प्रत्युदाहृतेन ? ततश्चाघमिच्छति, दुःखमिच्छति प्रत्युदाहर्त्तुं युक्तम्, न हि कश्चित् पामरोऽप्यात्मनो दुःखमिच्छतीति चेदत्रापि परस्येत्यवगम्यमानपदसापेक्षत्वमन्त्यस्येव, तर्हि यत्रार्थात् प्रकरणाद् वा अपेक्ष्य निर्ज्ञानं भवति तदा प्राप्नोतीति । कर्मेति किम् ? छात्रेणेच्छति ।

६. उपमीयते सादृश्यमानीयते येन तदुपमानम्, उपमीयते यत्तदुपमेयम् । उक्तञ्च प्रसिद्धसाधर्म्यादप्रसिद्धसाधनमुपमानम्, उपमानाभ्यां कर्माधिकरणाभ्यमाचारे क्यच् विधीयते । आचारः सदृशीकरणम् ।

७. उपमानादुक्तात् कर्त्तुः क्यङित्येक वाक्यम्, अत्राचारश्चेष्टेति रक्षितः । ओजसोऽप्यसरसोः क्यङन्तलोपश्चेति द्वितीयम् । समुच्चयार्थोऽयञ्चकारः । पयसः क्यङन्तलोपश्चेति तृतीयम्, क्यङः ङकारस्तङर्थः, ककारोऽगुणार्थः । "ओजसोऽप्सरसो नित्यमितरेषां विभाषया" इत्यनेन यशायते, यशस्यते, विद्वायते, विद्वस्यते, लोहिनीयति—ते इत्यादि पदसिद्धिश्च भवति ।

८. विप् च । गल्भ-क्लीब-होड़ात्तङ् च ।

उपमानात् कर्त्तुराचारे विप् च स्यात् । गल्भादेस्तङ् च । अश्व इव आचरति खरः । विधवति रविः, गोदुहति कश्चित्, गल्भते, क्लीबते विहोड़ते गल्भाञ्चक्रे ।

९. भृशादिभ्यश्च्व्यर्थे क्यङन्तहलो लोपश्च । लोहितादेर्डाचः क्यश्च ।

अभूततद्भावे भृशादिभ्यः क्यङ् स्यात् । अभृशो भृशो भवति भृशायते, शीघ्रायते, वेहत्-वेहायते, उम्मनायते इत्यादि । लोहितादेर्डाजन्ताच्च क्यश्च स्यात् । लोहितायति, लोहितायते, मन्दायति, मन्दायते । लोहित, हरित, नील पीत मन्द मद्र फेन निद्रा करुणा, घृणा, आकृतिगणोऽयम् । डाचः पट पटायते । कर्त्तुरित्येव । अभृशं भृशं करोति ।

१०. कष्टादेरविशेषणात्तस्मै क्रमणे ।

क्यङित्येव, कष्टाय क्रामतीत्यर्थः कष्टादेः क्यङ् स्यात् । कष्टायते, पापं चिकीर्षतीत्यर्थः । कष्ट, कक्ष, मद्र, कृच्छ्र, गहन, सत्र । अविशेषणादिति किम् ? कष्टाय तपसे क्रामति ।

११. सुखादिभ्यस्तद्वेदयतेः ।

तदनुभवतीत्यर्थे सुखादिभ्यः क्यङ् स्यात् । सुखं वेदयते सुखयते । सुख, दुःख, कृच्छ्र, गहन अलीक करुण ।

---

८. पानुबन्धस्तु बिल्वोपस्येति विशेषणार्थः । ननु गल्भ धाष्टर्ये, क्लीबृ अधाष्टर्ये, होड़ृ अनादरे, इत्यात्मनेपदिन एव पठ्यन्ते ततश्च गल्भत इत्यादय सिद्धेयुः किमनेनेति ? मैवम्, यदा गल्भादयोऽजन्ताः (अच् प्रत्ययान्ताः) तदा विबन्तेभ्योऽप्यात्मनेपदं भवत्विति वचनम्, अर्थ समानार्थत्वात् को विशेष इत्याह गल्भाञ्चक्रे इति ? अयमर्थः, तेभ्योऽलिडाम् न विहितः, प्रत्ययान्तेभ्यस्तु लिट् आम् भवत्विति ।

९. इह च्व्यर्थोऽभूततद्भावः, स पुनरवस्थितस्य धर्मिणः पूर्वधर्म्मन्निवृत्तौ धर्मान्तरापत्तिः, तत्र क्यङ् स्यादेव ।

१०. कष्टादिरविशिष्टः पापवृत्तिरेव । इह क्रमणं प्रवर्तनम्, तेन कष्टादेः पापवृत्तेस्तस्मै क्रमेण चतुर्थ्यान्तात् क्यङ् भवति । अत्र क्रमणमनार्जवलक्षणम् । अनृजूणां कर्म्म अनार्ज्जवम् । धातुनामनेकार्थत्वात्, अत्र क्रमि निषिद्धाचरणे वर्त्तते, तादृशं पापमाचरति, यथा जन्मान्तरेऽपि भारवहनादिकं करोतीति रक्षितादयः । यद्यपि (परि० २६) इति क्यङे नानुवर्तितुं युज्यते तथापि (परि० २७) इति क्यङेव प्रवर्त्तते इत्याह क्यङित्येवेति । कष्टाय क्रामति, जन्मान्तरनरकसाधनाय प्रवर्त्तते । तादर्थ्ये चतुर्थी । यदा तु कष्टादि विशेषणं तदा दुष्करार्थः ।

१२. वाष्पोष्म-फेन-धूमादुद्वमति ।

एभ्यस्तदुद्वमतीत्यर्थे क्यङ् स्यात् । वाष्पमुद्वमति वाष्पायते, ऊष्मायते, फेनायते, धूमायते ।

१३. रोमन्थाद् वर्त्तयति-हनुचलने ।

तद्वर्त्तयतीत्यर्थे अस्मात् क्यङ् स्यात्, हनुचलनञ्चेत् । रोमन्थं वर्त्तयति रोमन्थायते गोः ? हनुचलन इति किम् ? कीटो रोमन्थं वर्त्तयति ।

१४. शब्दादेः करोति ।

तत्करोति इत्यर्थे शब्दादे क्यङ् स्यात् । शब्दं करोति शब्दायते । शब्द, वैर, कलह अभ्र, अश्व, कण्व, मेङ, अटा, अट्टा, अटाटा, शीका, कोटा, पोटा, सो (मो) टा, प्रु (प्लु) ष्टा, सुदिन, दुर्दिन, नीहार ।

१५. नमस्तपोवरिवसः क्यच् । चित्रङ आश्चर्ये ।

तत्करोतीत्यर्थे नम आदेः क्यच् स्यात्, नमः करोतीति नमस्यति देवान्, तपस्यति, वरिवस्यति, गुरुं परिचरतीत्यर्थः । चित्रङ आश्चर्ये । चित्रीयते, हेममृगः, ङित्त्वात्तङ् ।

१६. कण्वादिभ्यो यक् ।

तत्करोतीत्यर्थे कण्वादिभ्यो यक् स्यात् । कण्डूञ—कण्डूयति, कण्डूयते, सुख अत इत्यतो लुक्, सुख—सुख्येयुः प्रकृतयो नृपम्, मृग—मृग्यन्तः पदवीम् । कण्डूञ्,

---

१४. (३/१/२४) सूत्र प्राप्तस्य णिचो बाधकमिदं सूत्रम् । वैरयतीत्यसाधु । सोऽपि इति न्यास; । क्वचित् (परि० ४६) इत्यूहनीयम् । एते शब्दादय सप्तदश । अटाटेति काशिकादौ न दृष्यते । ओव-वेगयुद्धोदकानीति चत्वार्यधिकानीति कातन्त्रे ।

१५. नम आदेस्तत् करोतीत्यर्थे विधीयमानः क्यच्, तत्तत्क्रियाविशेषणं बोधयति शब्द-शक्तिस्वभावात् । तथाहि नमस्यति देवानित्यत्र प्रणमतीति प्रतीयते । तपस्यति धर्म्मायते । वरिवः शब्दः परिचरणार्थः । ननु नमस्यतीत्यत्र नम. शब्दस्य सत्त्वात्तद्योगे कथं न चतुर्थी ? नैतदस्ति, अर्थवद्ग्रहणेन (परि० ७) इत्यर्थवतो नमः शब्दस्य तत्र ग्रहणात् सत्यपि चार्थवत्त्वे प्रत्ययर्थे गुणीभूतस्य पदान्तरेण सम्बन्धस्य कर्त्तुमशक्यत्वात्, यद्वोपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीया भविष्यति उपपदनिरपेक्षत्वात् कारकविभक्तेर्बलीयस्त्वम्, उपपदविभक्तेः पदान्तरे सापेक्षत्वात् दुर्बलत्वमिति ।

१६. इह कण्ड्वादयः किं धातवः ? उत नामानि ? तत्र धात्वाधिकारात् कण्ड्वादय धातव इति न्यासः, इतरथा वलगयतीत्यत्र दीर्घो न स्यात्, अधातुत्त्वात्तेषाम-

असूञ् (असु, अस्) मन्तु, वन्तु, हृणीङ् महीङ्, तिरस्, उरस्, सम्पन्न, गद्गद, एला, केला, खोला, लोट्, सुख, दुःख, मृगादि ।

१७. धातोरेकाचो हलादेस्त्वशुभरुचो भृशामीक्ष्ण्ये यङ् ।

१८. ऋ-सुच-सूत्रि-मूत्र्यटशूर्णुभ्यः ।

एभ्यो भृशाभीक्ष्ण्ये यङ् स्यात् । अरार्य्यते, सोसूच्येत, मोमूत्र्यते, अशाश्यते, प्रोर्णोनूयते ।

१९. गत्यर्थात, कौटिल्य एव ।

यङ् स्यात् । कुटिलं गच्छति जङ्गम्यते, चंक्रम्यते, द्रमु—द्रम्यते । न भृशामीक्ष्ण्ये, भृशं गच्छति ।

२०. लुप-सद-चर जभ-जप-दह-दन्शगॄभ्यो भावगर्हायाम् ।

एभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हितं लुभ्यति लोलूप्यते, चञ्चूर्य्यते, दंदंश्यते, निजेगिल्यते ।

सम्मतम्, तत्करोतीत्यधिकारे सूत्रितत्वादित्याह—तत्करोतीत्याद्यर्थः इति । कण्ड्वादौ ञकारः स्वरितः (३/१/११९) इति तङर्थं । ङकारस्तङ्मात्रार्थः । कण्डूशब्दस्य ह्रस्वापक्षेऽपि ह्रस्वस्य दीर्घः (३/३/३८) इति दीर्घः, अतस्तत्र अवगल्भयतीत्युदाहृतम् ।

१७. एकाजिति बहुव्रीहिर्न कर्म्मधारयः, धातुविशेषणानुपपत्तेः । भृशोऽत्यर्थः अतिशेष इति यावत् । आमीक्ष्ण्यं पौनः पुन्यम्, तेन प्रकृतिविशेषणत्वं तयोः । यङ् पुनस्तद्द्योतकः । क्रियागुणप्रधानभेदात् सर्वत्रैव द्विविधा, तथाह्यत्र प्रधानक्रिया विक्लेदनरूपा, गुणक्रिया च अधिश्रवणरूपा, तत्र यदा प्रधानक्रियां समाप्य क्रियान्तरव्यपेतां पुनस्तामेव विधत्ते तदा तस्याः पौनःपुन्यकवति, यदा पुनर्गुणक्रियांक्रियान्तरव्यपेता मुहुः समाचरणप्रधानक्रियामेकां निर्व्वाहयति, तदा तस्या अतिशयः सम्पद्यते, फलातिरेकोऽप्यतिशयः । तथाहि यो ज्वलन-फलमवाप्यापि ज्वलति स जाज्वल्यते, तथाच दुर्गः—पाकादीनां प्रधानक्रियाणां पौनः पुन्यम्, प्रधानक्रियोपकारकाणामधिश्रयणादीनाञ्च भृशता, फलातिरेको वेति । ननु अजत्यस्त्योरजादित्वात् यङ्प्राप्तौ तत्प्राप्त्यर्थं केनचित् सूत्रितम् । तदिह न वक्तव्यमित्याहाजेर्व्वीरिति । अयमर्थः—आर्धधातुक इत्यस्य विषय-सप्तमीत्वात् प्रथममजत्यस्तोर्व्वी भूभावे कृते हलादित्वमस्त्येवेति नानुपपत्तिः । शुम्भतेस्तु शोशुभ्यते इति । एकाच् हलादिर्योधातुस्तस्मादत्यर्थे पौनः पुन्ये च यङ् स्यात् । भृशं पुनः पुनर्व्वा पचति पापच्यते, जाज्वल्यते । अजेर्व्वीः—वेवीयते, अस्तेर्भूः—बोभूयते । एकाच् इति किम् ? भृशं जागर्त्ति । हलादेरिति किम् ? आमीक्ष्ण्यमीहते । अशुभरुचइति किम् ? भृशं शोभते, भृशं रोचते । (पौनः पुन्ये तु स्यादेव, रोरुच्यते, शोशुम्भ्यते) ।

२१. यङो लुग्बहुलं प्रकृतिवत् परस्मैपदी ।

बहुलं यङो लुक् स्यात्, स च लुगन्तः प्रकृतिवद् भवति, परस्मैपदी च : बोभोति, बोभवीति, बोभूवति, दंदग्धि । बाहुल्यादनिटत्वं नेष्यते । यदुक्तं पाणिनीये,

"तिपा शपानुबन्धेन निर्दिष्ट यद्गणेन च ।

यच्चैकाज्ग्रहणं किञ्चित् पञ्चैतानि न यङ्लुकि" इति । तथाहि आचार्याः—

"यङ्लुकीच्छन्ति सेटकत्वमनिटामपि ।
लुङि चैवाङःमिच्छन्ति लृदित्सु इरिदादिषु ।।"

दंदहिषति, दंदहिषीष्ट, बम्भन्ति, पास्पर्द्धि, सोसुपीति, चोञ्चशीति, न लघुपान्तेति न गुणः । बेभिदिता, बेभिदाञ्चकार, यङादिलुगार्द्धधातुकइति न गुणः । प्रकृतिवत्वात् कृताभ्यासविधेराद्यप्रकृतेर्व्वधादेशादिकार्यञ्च । अजं वधीत्, अदोदुहीत् । सेट्कत्वान्न क्सः, अवावपीत्, । जोह्वति । बाहुल्यान्नित्यमचि लुक्, लोलुवः, चक्षुर । नेह लोलूया ।

२२. चुरादिभ्यो णिच् ।

चुरादिभ्यः धातुभ्यः स्वार्थे णिच् स्यात् । चोरयति णाटयति ।

२३. प्रयोजके ।

प्रयोजके कर्त्तरि गम्ये धातोर्णिच् स्यात् । कुर्वन्तं प्रयुङ्क्ते — कारयति । हारयति ।

---

२२. अनिर्दिष्टार्थः स्वार्थे भवतीति न्यायात् स्वार्थे स्वस्या प्रकृतेरर्थे स्तेयाद्यर्थे भवतीत्याह स्वार्थ इति । णिचो णकारो (३४/८६) अस्य सूत्रस्य विशेषणार्थः । चकारः परप्रसिद्ध्यर्थः (२/१/२८) इत्यादौ चकारमवधीर्य्य प्रयोगात् ।

२३. ननु धातुभ्यो विधीयमानो णिच् धातुमेवाभिधत्ते । तत्कथं प्रयोजकलक्षणं स्यान्नैवञ्चेत् तत् कथमुक्तं प्रयोजक इति ? सत्यम् प्रयोजकपदेनेह तत् समवेतप्रेषणाध्येषण तत्सम्बन्धाचरणमर्थो लक्ष्यते, तथा चोक्तं—

'प्रेषणाध्येषणे कुर्व्वन्, तत्सम्बन्धानिवाचरन् ।
प्रयोजकोऽभवेत् कर्त्ता, क्रिया तस्य णिचोच्यते ।।

अत्र प्रेषणं भृत्यादेः क्वचिदर्थे नियोजनम्, आराध्यस्य सत्कार्यपूर्वकं नियोजनमध्येषणम् तत्सम्बन्धाचरणञ्च, क्रमेण यथाकार्यञ्च बहुलं— टिलोपादि । सूत्रं करोति सूत्रयति, पटुमाचष्टे पटयति, मातरं मातरयति, कुमारीं कुमारयति, अर्थापयति सत्यापयति । पाशं (विमुञ्चति) विमोचयति,

२४. **सुपस्तत्करोत्यादौ बहुलमिष्ठवच्च ।**

तत्करोति, तदाचष्टे इत्यदावर्थे सुबन्तान्निच् स्यात् । इष्ठवत् ।

विपाशयति । रूपं पश्यति रूपयति, निरूपयति । वीणया उपमायति उपवीणयति। तूलैरवकुष्णाति अवतूलयति । श्लोकैरूपस्तौति उपश्लोकयति । सेनया अभिमुखं याति अभिषेणयति। लोमान्यनुमार्ष्टि अनुलोमयति, त्वचं ग्रह्णाति त्वचयति । त्वचशब्दोऽदन्तः । एवं हलि-कलि-कृत-वर्णाः । अजहलत्, हलिर्बृहद् हलम् । वर्म्मणा संनह्यति संवर्म्मयति । चूर्णैरवध्वंस्ते अवचूर्णयति । मुण्डं करोति मुण्डयति । एवं मिश्रश्लक्षण-लवण-धवल-मलिन-पवित्रादि । व्रतात्तन्मात्र-भोजने निवर्त्तने च । पयो व्रतयति, वृषलान्नं व्रतयति, ततो निवर्त्तते । वस्त्रेण समाच्छादयति, संवस्त्रयति, तूस्तानि विहन्ति वितूस्तयति, तूस्तं धूलिः (क्लेशः) करणाद्धात्वर्थे । हस्तिना अतिक्रामति अतिहस्तयति । दात्रेण लुनाति दात्रयति । विन्मतोर्लुक् च । स्त्रग्विनमाचष्टे स्रजयति, स्रुग्वन्तं स्रुचयति । कृदन्तोपाख्याने कृल्लुक् प्रकृतिप्रत्यापत्तिः, प्रकृतिवच्च कारकम्, कंसवधमाचष्टे कंसं घातयति । एवं बलिं बन्धयति, राजानमागमयति । चित्रीकरणे । उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति सूर्योदगमनं सम्भावयतीत्यर्थः । नक्षत्रयोगज्ञाने च । पुण्ययोगं जानाति, पुण्येण योजयति चन्द्रम् । अन्यत्रापि, कर्त्तारमाचष्टे कारयति, पाकं करोति पाचयति । वादितवन्तं प्रयोजितवान् णेर्निच् क्तवतोर्लुक — अवीवदद् वीणां परिवादकेन । आशिषयतीत्यत्र प्रकृतेरकाच्त्वात् टिलोपाभावः । अग्निचिदादेस्तु टिलोपमिच्छन्ति । अग्निचयति गोनावौ गोनयति । प्रियादेः प्र-स्थ-स्फादापुः । प्रियमाचष्टे प्रापयति, स्थिरं स्थापयति, बहुलं बंहयति, बहु भूषयति । भावयतीत्येके । पृथु-प्रथगयति । स्थूलादेर्वा — स्थवादीच्छन्ति । स्थूलयति, स्थवयति, दूरयति, दवयति । श्येनादिभवान्यादीनां पुंवच्च । श्येनीमाचष्टे श्येतयति, एतीं एतयति, हरिणीं हरितयति, भवानीं भवयति, रूद्राणीं रुद्रयति इत्यादि, श्वेताश्वादेरश्वासिलुक् । श्वेताश्वमाचष्टे श्वेतयति अश्वतरं अश्वयति ।

२४. विधये (१/१/३१) इति न्यायात् सुबन्तं लभ्यत इत्याह सुबन्तादिति । तत्करोत्यादौ इत्यत्रादिशब्दः शिष्टप्रयोगानुसारार्थः । इष्ठवत् इव इष्ठवत्, तत्र यत्कार्यं टिलोपादि तदित्यर्थः । विपाशयतीत्यादौ व्याद्युपसर्गयुजामेव धातुत्वम्, ते तु यत्रादिविधौ पृथग् दृष्टव्याः । अनुकोषणमन्तः प्रकाशः । एवं "सीता हरणमाचष्टे" सीतां हारयति, वस्त्रं विवासयति "इत्यादि । विपूर्व्वो वसति-

२५. **पुच्छादेर्णिङ् ।**

एभ्यो णिङ् स्यात् । पुच्छमुत्क्षिपति उत्पुच्छयते व्याघ्रः भाण्डं समाचिनोति सम्भाण्डयते कुलालः, चीवरं सम्मार्जयति पिदधाति वा । सञ्चीवरयते भिक्षुः । अङ्गान्निरसने । हस्तं निरस्यति, हस्तयते, पादयते । अन्यत्र हस्तयति पदयति ।

२६. **गुपू-धूप-विच्छि-पणिपनेरायः ।**

एभ्य आयः स्यात् । गोपायति, धूपायति, विच्छायति, पणायति । पणेःस्तुत्यर्थे एवायः, पणायति, न व्यवहारे चेत्ये के । 'न चोपलेभे वणिजां पणाया' इति भट्टिः । कमेर्णिङ् । कामयते ।

रतिक्रमणे । चित्रीकरण इति चित्रीकरणे प्राप्त्यर्थे इति काशिकादर्शनाद् अत्रापि इत्याध्याहार्यम् । अस्यार्थः चित्रीकरणमाश्चर्यम् । एतच्च प्राप्त्यर्थविषयं प्राप्तिकृतं भवति तदा कृदन्ताण्णिच् स्यात्, लुगादिकञ्च पूर्ववत् । "तत्करोति" तदाचष्टे, तद् विमोचयति पश्यति उपगायति अवकुष्णाति उपस्तौति अभिमुखं याति ग्रह्णाति संनह्यति । अव उज्जयिन्या इत्यादि । उज्जयिन्या हि माहिष्मती दूरदेशे इत्यल्पीयसा कालेन प्राप्तत्वादित्याहाश्चर्य मिति । अत्रापि त्वरितमुज्जयिन्याः प्रस्थितो महिष्मतीं गच्छति येनास्य तत्र सूर्योदयो भवति । तेनैवन्येषां प्रतीतिः सूर्यमुद्गच्छन्तमयं प्रयुङ्क्ते । समागतोऽहमिदानी सूर्यमुद्गच्छन्निति हेत्वर्थ एवेण् प्रत्यय इति कातन्त्राः । नक्षत्रेण सहितो योगः, तस्य ज्ञाने निच् कृल्लुगादि कार्य्यम् । पुष्येणेति सहार्थे तृतीया । अत्र कातन्त्राः एवमसौ दैवज्ञः पुण्येण चन्द्रयोगं गणयति, तेनैव जनस्य प्रतीतिः, पुष्येण योजितोश्चन्द्रेऽनेनेति हेत्वर्थे इणिति जल्पन्ति, एतदेव प्राचीनैरुल्लिखितं नान्यदिति कटाक्षयभाहान्यत्रापीति । वादितवन्तं प्रयोजितवानिति युजेः स्वार्थे णिच्, णे निच्, क्तवतुलुक् इति ण्यन्तस्य कृदन्तस्य णिच्, क्तवतोर्लुक्, णौ सति कृतः क्तवतोर्लोपः वादयते णिचो लोप इत्यर्थः । आशिषयतीति प्रकृतेः शास्तेरेकाचत्वादिति इष्ठेमेयः स्वनेकाच इत्यत्रानेकाच् ग्रहणात् एकाचो न स्यादिति । एवं सम्यञ्चमाचष्टे सम्यचयति । अग्निचिदादेः प्रकृतेरेकाचत्वेऽपि प्रियादेः—प्रियेत्यादिना प्र-स्थ-ष्फ-ण्णिति अर्थादिरापुः । अन्येषामर्थादित्वं नास्तीति दर्शयन्नाह — बहुलमित्यादि ।

२६. ननु पणि-पानिभ्यामुदात्तानुबन्धाभ्यां केवलाभ्यामेवात्मनेपदं चरितार्थम् । आयान्ताभ्यां त्याभ्याभ्यां किं स्यात् ? सत्यम् । तत्र धान्वन्तरत्वात् कमेर्ङिणित्यत्र ङित्करणाच्च परस्मैपदमेव स्यात् । तथा च गुपू, धूप, विच्छ-पणि-पनेरायः । परस्मै चेति वासवतं सूत्रम्, धातु चन्द्रिकायां भट्टमल्लोपि तथा सूत्रितवान् ।

२७. **ऋतेर्घृणायामीयङ् ।**

ऋते सौत्रादीयङ् स्यात् । ऋतीयते ।

२८. **आयादय आर्द्धधातुके वा ।**

आर्द्धधातुके आयदयो वा स्युः । गोप्ता, गोपायिता, गुप्तिः, गोपायाकमिता, कामयिता, अर्त्तिता, ऋतीयिता ।

२९. **णौ पुरार्दत्तित-ह्री-व्ली-री-क्नूयी-क्ष्मायो गुणश्च ।**

३०. **शाच्छासा-ह्वा-व्या-वेपाभ्यो युः ।**

एभ्यो णौ युः स्यात् । निशाययति, विच्छाययति, व्यवसाययति, ह्वाययति, संव्याययति वाययति, पैपिबत्योः पाययति ।

३१. **आत इण्णित्कृतोः ।**

इणि णिति कृति च परे आदन्ताद् युः स्यात् । अवायि, वायः, वायकः, अदायिः, दायः, दायकः ।

३२. **णौ पातेलुः ।**

णौ पातेर्लुः स्यात् । पालयति ।

३३. **अर्थादेरापुः ।**

एभ्य आपुः स्यात् । अर्थापयति, सत्यापयति, वेदापयति । प्र-स्थ-स्फात् प्रापयति, स्थापयति, स्फाययति ।

---

२८ आर्धधातुकविषय इति, तेनाद्र्धधातुक इति विषयसप्तमीयं लक्ष्यते, आर्धधातुकस्य च विषयत्वं तद्विवक्षायां बुद्धिस्तस्य सम्भवति । अथ परसप्तम्यां सत्यामिष्टं न सिध्यति, न सिध्यत्येव तथापि आर्धधातुके परे आयादीनांमुत्पत्तिर्विकल्प्यते निवृत्तिर्वा पूर्वस्मिन् स्त्रियां क्तिन् आयानुत्पत्तौ गुप्तिरितीष्टत् सिद्धयति, उत्पत्तौ तु-लोपे गोपातिरित्यनिष्टं स्यात् । परस्मिस्तु आयप्रत्ययान्तात् ङापि निवृत्याभावपक्षे गोपायेतीष्ठं सिद्धयति, निवृत्तिपक्षे तु मोपेत्यनिष्टं स्यादिति । विषयसप्तभ्यां तूत्पत्तौ । विभाव्यमानायामुत्पत्स्यते । आर्धधातुकमिति तद् विवक्षायामादावेव विकल्पः । तत्रानुपत्तिपक्षे गुप्तिः, उत्पत्तिपक्ष ङाप्---गोपायति । तेन पूर्वैस्त्रिभिः सूत्रैः प्राप्तेष्वायादिषु विकल्पो विधीयते इति तथैवोदाहृताम् । आर्धधातुक इति किम् ? गोपायति क्षितिमिमाम् ।

२९. अत्रोदिद्वर्णो न सवर्णग्राहक इत्युक्तमेव एङरलो गुण इक इत्युक्तत्वात् गुणो भवन् इक एव भवतीत्याह इकोगुणश्चेति । न पुनर्वृद्धिरपवाद इति ।

३३. एकाजन्तोपलक्षणम्, तेन कमाचष्टे कापयति, वमाचष्टे वापयति । एकाजन्तादापूरित्य ये, बन्धापयति, कारापियति, वर्णापयति, शब्दापयतीति शिष्टप्रयोगदर्शनात् लिखापयति, लज्जापयतीत्यादि ।

३४. **क्रीङ्जीनामैयाप् । चेर्व्वा ।**

णावेषामैकार आप स्यात् । क्रापयति, इङ् अध्यापयति, जि-जापयति । चेर्व्वा । सञ्चाययति वा ।

३५. **वियश्च प्रजने ।**

णौ वी धातोरैयापरैराप् वा स्यात् । गर्भाधानञ्चेत् । पुरो वातो गाः प्रवापयति, प्रवाययति वा (प्रथमगर्भं ग्राह्यतीत्यर्थः)

३६. **धूञ् प्रीञो नुक् ।**

आभ्यां णौ नुक्स्यात्, धूनयति, प्रीणयति प्रीणनम् । अनुबन्धादन्यतो न भवति । धू-विधूनने, धावयति, प्री प्रीतौ, प्राययति ।

३७. **लीलाभ्यां वा नुक-लुकौ स्नेह द्रावणे ।**

३८. **स्फायो वोऽन्तः ।**

णौ स्फायोऽन्तो वो भवति । स्फावयति ।

३९. **शदेरगतौ तः ।**

णौ शदेरन्तस्तो भवति । फलानि शातयति । अगताविति किम् ? गाः शादयति ।

४०. **रूहे पो वा ।**

णौ रूहेरन्तः पो वा स्यात् । रोपयति, रोहयति वा ।

४१. **सिध्यतेरेदादपारलौकिके ।**

णौ सिध्यतेरेकार आद्भवति । ग्रामं साधयति, अपारलौकिक इति किम् ? स्वर्गं सेधयति ।

४२. **वै वाज धूनने ।**

णौ ओवै वाजः स्यात् । वाजयति पक्षौ । धूनन इति किम् ? प्रवापयति केशान् ।

४३. **स्फोरो वा स्फोरः ।**

स्फारो णो स्फारो वा स्यात् । विस्फारयति, विस्फोरयति वा । स्फोर इति किम् ? यङ्लुकि—पोस्फुरयति ।

---

३७. लीलीङोरकृतात्त्वकृतात्त्वयोरिदं ग्रहणम् । आभ्यां नुक्लुकौ वा स्याताम्, स्नेहद्रवीकरणे घृतं विलीनयति, विलाययति । तैलं विलालयति, विलाययति वा ।

४४. **दोषो दूषः**

दोषो णौ दुःषः स्यात् । दूषयति, दूषकः, अणौ च क्वचित् । दूषणं वा चित्तदूषणे । चित्तं दूषयति वा ।

४५. **क्यचीदस्य ।**

क्यचि परे अवर्णस्य ईद् भवति । राजीयति, मालीयति, अस्य इति किम् । विद्वस्यति ।

४६. **अशनायोदन्यधनाया बुभुक्षा-पिपासा-गर्द्धेषु ।**

क्यचि बुभुक्षाद्यर्थेऽशनादयो निपात्यन्ते । अशनायति गृध्नुः । अन्यत्र अशनयति, उदकयति, धनीयति ।

४७. **सुरसुर्व्वा लालसायां लवणादेः ।**

क्यचि स्पृहायां लवणादेः सुरसुर्व्वा स्यात् । लवणस्यति, दध्यस्यति, मधुस्यति, मध्वस्यति वा ।

४८. **वृषाश्वान्मैथुने ।**

आभ्यां मैथुने लालसायां सुरसुरर्व्वा स्यात् । वृषस्यति गौः, लक्ष्मणः सा वृषस्यन्ती, अश्वस्यति वडवा ।

४९. **भूवादि सनाद्यन्ता धातः ।**

भूवादयो दशगणपरिपठिताः, सनाद्यन्तश्च धातुसंज्ञका भवन्ति । धातुप्रदेशाः—धातोरित्येवमादयः ।

५०. **आत्मनेपदम् ।**

आत्मनेपदमधिक्रियते ।

---

४५. परसप्तमीयम् समानेभ्यः श्रुतो वर्णशब्दो यस्य वर्णस्य येन वर्णेन सह सवर्णसंज्ञा तयो समुदायं ब्रवीत्याह, अवर्णस्येति ।

४६. यद् यल्लक्षणेनाव्युत्पन्नं तत् सर्वं निपातनात् सिद्धिमिति न्यायात् अशनधनयोः क्यचीत्वाभावः, उदकस्यान्तोपधयोर्लोपः णौ च भवतः । इदन्तु प्रकृतिप्रत्वय-विभाग प्रदर्शनमात्रम् । वस्तुतस्तुबुभुक्षापिपासा भिकाङ्क्षार्था अमी धातवः सम्पद्यन्ते ।

४७. दधिस्यतीत्यादौ आगमाः (परि० २१) इति न्यायादनयोः प्रकृतिभक्तत्वे प्रत्यया-भावान्न षत्वम्। अत्र लालसापदेनाभ्यवजिहीर्षा लक्ष्यते । निर्हारार्थमतितृष्णा-यान्तु दधीयतीति भवतीति भाष्यटीका ।

४८. वृषशब्दोऽत्र वृषवचनो गर्भबीजधातुवचनश्चेति विजयमिश्रः शुक्रवचन इति क्रमदीश्वरः पद्मनाभश्च्, अश्वशब्दश्च चतुष्पाज्जाति विशेषवचनः पुंजाति-विशेष वचन इति केचित् ।

५०. पद्यते पदम्, आत्मार्थं पदमात्मनेपदम् । चतुर्थ्यलुक् ।

५१. **नोपसर्गाद् द्वितीयार्थात् ।**

उपसर्गात्तु नियमः । उपसर्गाद् यदात्मनेपदं विहितं तद् द्वितीयार्थान्न भवति । यथा परिक्रीडते, न तथा वृक्षं परिक्रीडति ।

५२. **अनुदात्त ङि.तः ।**

गणपाठे अनुदात्तेतो ये धातवस्तेभ्यो ङितश्चात्मनेपदं स्यात् । आस्ते, वर्द्धते, बोभूयते, हंसायते आसीनः ।

५३. **भावकर्म्मणोः ।**

धातोर्भावे कर्म्मणि चात्मनेपदं स्यात् । भूषते, भूयते, भूषमानम् । क्रियते, क्रियमाणः कटः ।

५४. **कर्त्तरि क्रियाविनिमये ।**

क्रियापरिवर्त्ते धातोः कर्त्तरि तङ् स्यात् । तङित्यात्-नेपदसंज्ञा । व्यतिभवते श्रीः पद्मानाम् । व्यतिभवमाना, व्यतिपुनते, व्यतिबोभूते, व्यतिबोभुवाते । अतः कर्त्तरि विधिः ।

---

५४. व्यतीहारशब्दार्थमाह, परिवर्त्त इति । तेन क्रियाव्यतीहारे इति क्रियापरिवर्त्तस्तस्मिन् वर्त्तमानाद्धातोस्तङ् भवति । एतेनैतदुक्तं भवति कर्म्मव्यतीहारविशिष्ट क्रियावचनोत्तङ् इति । ननु परिवर्त्तो नाम स्थिराणां वस्तूनां सम्भवति; क्रियास्तु क्षणध्वंसिन्यः, कथं तासां परिवर्त्तः स्यादिति ? सत्यम्, यदान्येन चिकीर्षितां क्रियामन्यो विधत्ते तेन च चिकीर्षितां पूर्वन्तदा क्रियाव्यतहािर इत्युच्यतो तेन परस्परापेक्षित क्रियोत्पत्तिः क्रियाव्यतिहार इति । व्यतिभवत इत्यैकस्य पद्मस्य निश्चितश्रीभवनक्रियायाः सजातीयां भवनक्रियामपरयपद्मश्रीः करोतीत्यर्थः इतिमतम् । एवं धर्मो अस्ति सत्यं तव राक्षसायमन्यो व्यतिस्ते तु ममापि धर्म इति । व्यतिपुनते पुन्यात्मान आत्मानम् । व्यतिवोभूते दिवसलक्ष्मीः । क्रियाविनिमय इति किम् ? विप्रस्य धान्यं व्यतिलुनन्ति कृषकाः । इह विप्रेण यत् संगृहीतं धान्यम्-पुनस्तल्लवनेन कृषकाः गृह्णन्तीत्यर्थः । तेनान्यसम्बन्धिनो धान्यस्थान्येन स्वीकाराद् भवति साधनव्यतिहारः । किञ्च यत्र क्रियाव्यतीहारार्थो न धातुस्तत्रात्मनेपदाभावः । यथा सम्वद्विनिमयेनोभौ दधतुर्भुवनद्वयमिति कालिदासः । हसादेराकृतिगणत्वादित्यन्ये ।

५५. न गति-हिंसा-शब्दार्थ-हसोऽन्यार्थोपपदाच्च ।

गत्याद्यर्थेभ्य हसश्चान्योन्यार्थोपपदाच्च क्रियाविनिमये तङ् न भवति । व्यतिगच्छन्ति, व्यतिघ्नन्ति, व्यतिजल्पन्ति, व्यतिहसन्ति । अन्योऽन्यस्यव्यतिलुनन्ति, इतरेतरस्य व्यतिगृह्णन्ति, परस्परस्य व्यतिषिञ्चन्ति । कथं व्यतिनयते, व्यतिवहते भारम् ? एतौ प्रापणवचनौ न गत्यर्थौ । एवं सम्प्रहरन्ते योद्धारः, हरति न हिंसार्थः ।

५६. नेर्व्विशः ।

निपूर्व्वाद् विशस्तङ् स्यात् । निविशते, निविशमानः, प्रादेर्नियमान्नेह, मधूनि विशन्ति भृङ्गाः ।

५७. क्रियो विपर्य्यवात् ।

एभ्यः क्रियस्तङ् स्यात् । विक्रीणीते, परिक्रीणीते, अवक्रीणानः ।

५८. जेर्विपराभ्याम् ।

आभ्यां जेस्तङ् स्यात् । विजयते, पराजयते । प्रादेर्नियमान्नेह—बहुविजयति वनम् ।

५९. आदाङोऽस्वाङ्गप्रसारणे ।

आङो दाजस्तङ् स्यात् अस्वाङ् प्रसारण ञ्चेत धनमादत्ते । अस्वाङ्-प्रसारण इति किम् ? व्याददाति मुखम्, नदी कूलं व्याददाति ।

६०. क्रीड़ोऽन्वाङ् परेः समश्चाकूजने ।

एभ्यः क्रीड़तेस्तङ् स्यात् । अनुक्रीड़ते, आक्रीड़ते, परिक्रीड़मानः, संक्रीड़ते । अकूजन इति किम् ? संक्रीड़न्ति शकटाः ।

६१. आगमेः क्षमायाम् ।

तङ् स्यात् । आगमयस्व तावत् ।

---

५५. प्रापणन्तु देशान्तरसंयोगः, कथं तर्हि प्रयोजककर्त्तुः कर्मत्वविधौ नीञोर्वर्ज्जनम् ? प्रापणार्थत्वादेवाप्राप्तेः ? मैवम् वादीः, प्राप्त्यर्थत्वात् प्राप्तेः; उक्तञ्च—सर्वे गत्यर्थाः प्राप्त्यर्था इति; इह तु प्रापणार्थः । प्रापयतेष्ठने प्रापणमित्युक्तं गणवृत्तौ । हरतिर्न हिंसार्थ इति किं तर्हि ? बोधनार्थः इति शेषः ।

५७. अकर्त्तृर्थे क्रियाफलार्थमिदम्, अन्यथा (३/१/११९) इति सिद्धेः किमनेन ?

६१. प्रतीक्षते प्रतीक्षायाञ्च स्युरागमयते तथा । अनुपालयतीत्येते प्रतिपालयतीति च । एते क्षमार्था इति भट्टमल्लः । क्षान्ताविति किम् ? आगमयति विद्यां विद्वान्, शिक्षत इत्यर्थः ।

६२. शपः शपथे ।

तङ् स्यात् । प्रियायै शपते कामुकः । शपथ इति किम् ? चौरं शपति ।

६३. नाथेराशिषि कर्म्म च षष्ठी वा ।

आशिषि नाथेस्तङ् स्यात् । तद्योगे कर्म्म च षष्ठीर्वा । सर्पिषो नाथते सर्पिर्व्वा । अशिषीति किम् ? राजानमुपनाथति ।

६४. हृग्नेर्गतिताच्छील्ये ।

अत्रार्थे हृञ्स्तङ् स्यात् । पैतृकमश्वा अनुहरन्ते । गतिग्रहणं किम् ? पितरमनुहरति रूपेण पोतः ।

६५. किरोऽपाच्चतुष्पाच्छकुनिष्वालेखने सुट् च ।

सुट् कात्पूर्व इति (नि) वक्ष्यते । आपाप् किरतेश्च तूश्चरणपक्षिविषये हर्ष-जीविकाकुलायकरणेष्वालेखनगम्ये तङ् स्यात् । कात्पूर्वः लुट् च । अपस्किरते भूमिं वृषभो हृष्टः, श्वा आश्रयार्थी, कुक्कुटो भक्ष्यार्थी च । नान्यत्र—गजोऽपकिरति जलम् ।

---

६२. शपथो मिथ्यानिरसनम्, वाचा शरीरस्पर्शनं वा ।

६४. गतिताच्छील्यम्, तत्स्वभावता, गत्यनुकरणमिति यावत् । अश्वानां पितृवद् गमनं स्वभावतः । गतिहृतप्रकारस्तुल्यार्था इति भट्टहरिः । सश्यशीलने तङ् विधीयते । जलधिमनुहरते सरः । एवं यदनुहरते तस्य कुमुदमिति व्याचष्टे । च गतीति किम् रूपानुहरणे मा भूत ।

६५. कॄ विक्षेपे इत्यस्मात् चतुश्चरणपक्षिविषयक हर्षजीविकाकुलायकरणविषया-लेखनवृत्तेस्तङ् स्यात् । आलेखनमाञ्चोडनम् । सः तावत्किरतेरर्थः । तन्निमित्तं हर्षजीविकाकुलायकरणञ्च तस्य फलम् । ननु अपाच्चतुष्पाच्छकुनिषु हृष्ट-भक्ष्य-निवासार्थालेखने गम्ये तङ् स्यादिति श्रीपतिसूत्रम् । अपात् किरश्चतुष्पात्-पक्षि-हर्षादौ सुट् च कृत्यापीति क्रमदीश्वरेण सूत्रितम् । तथा काशिकादावपि दृश्यते, इह तु हृष्टादिमन्तरेण कथं तदर्थोपलम्भः सम्भवति ? सत्यम्, हर्षादिविषयालेखनमिहालेखनं विवक्षितमभिधानात् । अन्ये तु किरोऽपाच्चतुष्पाच्छकुनिषु हर्ष-जीजिका-कुलायकरणेष्वालेखने सुट् चेति सूत्रं पठन्ति । नन्वात्मनेपदवत् सुट् किं किरतेः परो विधीयते इत्याह सुट् कात्पूर्व इति विवक्ष्यत इत्ययमर्थः सुट्कात्पूर्व इति । श्रुतेरिहाप्येतेष्वर्थेषु स एवा-नूद्यमानस्तथैव स्यात् । किञ्च कृत्यपि कर्त्रादिषु त्रिषु सुट् विधीयते नत्वात्मने-पदवत् कर्त्तव्याभिधानात् । यथा अपस्कीर्य गतः षण्डः, वृषो अपस्कीर्णवान् । हृष्ट इति किम् ? अपरिकरति श्वा निवासार्थी, बस्तुमालिखति । अपस्किरते कुक्कुटो भक्ष्यार्थी, किञ्च तण्डुलकणादिकं भोक्तुमालिखति नान्यत्रेति । चतुष्पाच्छकुनिष्विति किम् ? अपस्किरति जलं हृष्टो देवः । आलेखन इति किम् ? अपकिरति तृणानि श्वा निवासार्थी आस्तृणाति ।

६६. **आङि नुप्रच्छेः ।**

आङि उपपदे नुप्रच्छिभ्यां तङ् स्यात् । आनुते शिवा—आपृच्छस्व गुरुम् ।

६७. **स्थो विप्रावसमः ।**

एभ्यस्तिष्ठतेस्तङ् स्यात् । वितिष्ठते, अवतिष्ठमानः । संतिष्ठे संतिष्ठमानः ।

६८. **प्रकाशन-स्थेयाख्ययोश्च ।**

प्रकाशने स्थेयाख्यायाञ्च स्थस्तङ् स्यात् । छात्राय तिष्ठते कन्या, स्वाभिप्रायं प्रकाशयतीत्यर्थः । स्थेयो विवादपदनिर्णेता । "संशय्य कर्णादिषु तिष्ठते यः संशयं" कृत्वा तेषु निर्णयं करोतीत्यर्थः ।

६९. **आङः प्रतिज्ञायाम् ।**

आङः स्थस्तङ् स्यात् । शब्दं नित्यमातिष्ठते, प्रतिजानीते ।

७०. **उदोऽनूद्ध्वंचेष्टायाम् ।**

अत्र उदः स्थस्तङ् स्यात् । मुक्तावतिष्ठते जनः । अनूद्ध्वंचेष्टायामिति किम् ? पीठादुत्तिष्ठति ।

७१. **उपान्मन्त्रकरणे पूजासङ्गति-मैत्रीकरणपथिषु । वा लिप्सायाम् ।**

मन्त्रकरणे देवपूजादौ च गम्ये पथि कर्त्तरि च उपात् स्थस्तङ् स्यात् । गायत्र्या सूर्य्यमुपतिष्ठते, देवपूजादौ—विप्रोऽर्कमुपतिष्ठते । सङ्गतौ—गङ्गा समुद्रमुपतिष्ठते । मैत्रीकरणे—राजा राजानमुपतिष्ठते । पथि कर्त्तरि—अयं पन्थाः स्रुघ्नमुपतिष्ठते । वा लिप्सायाम् । अर्थी दातारमुपतिष्ठते, उपतिष्ठति वा ।

७२. **अकर्मकात् ।**

अकर्मकादुपात् स्थस्तङ् स्यात् । उपतिष्ठते भोजनकाले ।

---

६९. प्रतिज्ञा अभ्युपपत्तिः । मीमांसायां नित्यत्वाभ्युपगमात् शब्दो नित्य इति जानीते, परन्तु नित्यत्वे प्रमाणादिकं दर्शयितुं विस्मयतीत्यर्थः ।

७०. ऊर्द्ध्वचेष्टा ऊर्ध्वपरिस्पन्दः । ऊर्ध्वेति किम् ? आसनादुत्तिष्ठति । चेष्टायामिति किम् ? ग्रामाच्छतमुत्तिष्ठति, उत्पद्यत इत्यर्थः ।

७१. राजा राजानमुपतिष्ठते, दानमानादिना वशीकरोति, इदं दूरस्थस्यापि भवतीति सङ्गतेर्भेदः । दवीयानयं पन्थाः स्वर्लोकमुपतिष्ठते । पथः कर्त्तृत्व एव विवक्षितत्वात्, तेन पन्थानमुपतिष्ठति संयुनक्ति ।

७२. नास्त्यस्य कर्म्मेत्यकर्मकः (५/१/१५३) कप् । ननु धातोः क्रियावचनत्वात् सकर्मकत्वं न सम्भवति, क्रियैव सकर्मका, तत्राकर्मकादिति कथमुक्तम् ? सत्यम्, अकर्मकक्रियावचनो धातुरकर्मक इत्युच्यते, अभिधेयस्याभिधाने उपचारात् अकर्मकात् विधिस्त्रिसूत्र्याम् ।

७३. समो दृश्यर्त्ति-वेत्ति-स्वरति-श्रु-गम्लृ-ऋच्छि-प्रच्छः।

सम्पूर्वात् दृश्यादेरकर्मकात्तङ् स्यात्। सम्पद्यते, ऋधातोरङादेशे सम (मा) रन्त ममाभीष्टाः, संविद्रते, संस्वरते, संगच्छते, समृच्छते। अकर्मकादिति किम्? वादं संगच्छति।

७४. व्युत्तपाङ्-यम-हनः स्वाङ्गकर्मकाच्च।

व्युदस्तपेराङो यम-हनश्चाकर्मकात् स्वाङ्कर्मकाच्च—तङ् स्यात्। वितपते पृष्ठम्, आयच्छते पाणिम्, आहते स्वं वक्षः। नेह-उत्तपति सुवर्णं स्वर्णकारः।

७५. ह्वो नि-वि-समुपात्।

एभ्यो ह्वेञ्स्तङ् स्यात्। निह्वयते, विह्वयते, संह्वयते, उपह्वयते सखीम्।

७६. स्पर्द्धायामाङः।

पराभिभवेच्छायामाङो ह्वेञ्स्तङ् स्यात्। मल्लो मल्लमाह्वयते। अन्यत्र गामाह्वयति।

७७. अस्यत्यूहो वा प्रादेः।

प्रादेराभ्यां तङ् वा स्यात्। निरस्यते, निरस्यति. समूहमानः, समूहन्। (सहते-ति। निरस्यमानः, निरस्यन्)

७८. कृञो भर्त्सन-गन्धन-सेवन-साहस-प्रकथनोपयोगेषु।

एषु अर्थेषु कृञस्तङ् स्यात्। भर्त्सने—उत्कुरुते शत्रुम्, गन्धनं—हिंसार्थक-सूचनम्, उपाकुरुते। सेवने—राजनमुपकुरुते। साहसे—परदारानुपकुरुते, प्रकथने—देशान् प्रकुरुते, धर्म्मादौ विनियोगे—शतं प्रकुरुते।

७९. प्रतियत्ने कर्म्म च षष्ठी वा।

सतो गुणान्तराधाने कृञस्तङ् स्यात्। तत्कर्म्म च, षष्ठी वा। एधोदकस्यो-पस्कुरुते, एधोदकं वा। उपात् प्रतियत्ने सुट् च।

८०. अधेः प्रसहने।

प्रसहनमभिभवः पराजयो वा। तत्राधेः कृञस्तङ् स्यात्। तमधिचक्रे।

८१. वेः शब्दकर्म्मणोऽकर्म्मकाच्च।

वेः कृञः शब्दकर्म्मणोऽकर्म्मकाच्च तङ् स्यात्। क्रोष्टा विकुरुते स्वरान्। अकर्मकाच्च, विकुर्व्वते अश्वाः साधुदान्ताः।

---

७४. उत्तपते, दीप्यत इत्यर्थः। सङ्गमं स्वाङ्गम्। न तु अद्रवम् (५/२/४२) इति परिभाषितम्। आजघ्ने विषमविलोचनस्य वक्षः, इति भारविः, आहध्वं रघूत्तममिति भट्टिश्च, इत्यत्रात्मनेपदप्रयोगः प्रामादिक एव प्राप्येत्याद्यध्याहारो वेति विद्वांसः।

७५. ह्व इत्यत्र (२/३/१३७) इत्याकारलोपः।

८२. **नियो ज्ञानोपनयनोत्सञ्जनसम्माननविगणन भृतिव्ययेषु ।**

एष्वर्थेषु नियस्तङ् स्यात् । ज्ञाने—अर्थान्नयते धीरः, उपनयने—माणवकमुपनयते, उत्सङ्गीकरणे—बालकमुदानयते, सम्मानने—गुरुं विनयते, विगणनं ऋणादि-शोधनम्—मद्राः कारं विनयन्ते, भृतौ—कर्मकरानुपनयते, वेतनेनात्मसमीपीकरोति । व्यये—शतं विनयते ।

८३. **कर्त्तृस्थानङ्गकर्मकाद् वा ।**

कर्त्तृस्थमनङ्गं कर्म्म यस्य तस्मान्नियस्तङ् स्याद् वा । क्रोधं विनयते, विनयति वा, अपनयस्व मानिनि ! मानम् । कर्त्तृस्थेति किम् ? गुरोः कोपं विनयति ! अनङ्गेति किम् ? गडं विनयति ।

८४. **क्रमे स्फीतत्व-वृत्त्युत्साहेषु ।**

एष्वर्थेषु क्रमेस्तङ् स्यात् । प्राज्ञो शास्त्रे क्रमते । वृत्तिरप्रतिघातः, ऋच्यस्य क्रमते : बुद्धि र्युद्धाय क्रमते भटः ।

८५. **उपपराभ्याम् ।**

आभ्यां स्फीतत्वादौ गम्ये क्रमेस्तङ् स्यात् । शास्त्रमस्मिन्नुपक्रमते । (नेह विक्रामति राजा) ।

८६. **आङो ज्योतिरुद्गतौ ।**

ज्योतिरुद्गमने आङः क्रमेस्तङ् स्यात् । आक्रमते भानुः । ज्योतिरिति किम् ? आक्रामति धूमः हर्म्यतलात् । उद्गताविति किम् ? आक्रामति गिरिं रविः ।

८७. **वेः पादविक्षेपे ।**

अत्रार्थे वेः क्रमेस्तङ् स्यात् । साधु विक्रमते अश्वः । पादविक्षेप इति किम् ? विक्रामति राजा ।

८८. **प्रोपाभ्यामारम्भे ।**

आभ्यामारम्भे गम्ये क्रमेस्तङ् स्यात् । प्रक्रमते भोक्तुम्, उपक्रमते गन्तुम् ।

८९. **अप्रादेर्वा ।**

अप्रादेः क्रमेस्तङ् स्याद् वा । क्रमते, क्रामति वा ।

९०. **ज्ञो निह्नवे ।**

अपह्नवे स्यात् । शतमपजानीते ।

९१. **अकर्मकाच्च ।**

ज्ञस्तङ् स्यात् । सर्पिषो जानीते ।

---

८३. विगणय्य नयन्ति पौरुषमित्यत्र कथं नात्मनेपदम् ? सत्यम्, अपनयार्थस्य न स्यात् । अविवक्षितत्वात्, प्रापणार्थे तु स्यादेव ।

९१. सर्पिषो जानीते इति ज्ञानपूर्व्विकायां प्रवृत्तावमुष्याकर्मकता अत, एव(२/२/४१) इति करणे षष्ठी । सर्पिषा करणभूतेन प्रवर्त्तत इत्यर्थः ।

९२. **सम्प्रतिभ्यामस्मरणे ।**

आभ्यां ज्ञस्तङ् स्यात् । गां संजानीते, शतं प्रतिजानीते । अस्मरण इति किम्? मातुः संजानाति ।

९३. **वदो दीप्ति-यत्नोपमन्त्रण-ज्ञान-सान्त्वनविमतिषु ।**

एष्वर्थेषु वदस्तङ् स्यात् । वादते चार्व्वी, बुद्धिर्लोकायते, गेहे वदते, उपमन्त्रणं-रहस्युपचछन्दनम् कुलस्त्रीमुपवदते, ज्ञाने—अयमेकोवदते, सान्त्वने—शास्त्रानुपवदते, विविधमतौ-क्षेत्रे वदते ।

९४. **व्यक्तवाचां सहोक्तौ ।**

मनुष्याणां सहोच्चारणे वदस्तङ् स्यात् । सम्प्रवदन्ते विप्राः । व्यक्तवाचामिति किम्? वरतनु ! सम्प्रवदन्ति कुक्कुटाः ।

९५. **अनोरकर्मकात् ।**

अनुवदस्तङ् स्यात् । अनुवदते कठः कालापस्य । अकर्मकादिति किम्? पूर्वोक्तमनुवदति ।

९६. **वा विप्रलापे ।**

विरुद्धप्रलापात्मिकायां सहोक्तौ वदस्तङ् स्यात् । विप्रवदन्ते मौहूर्तिका, विप्रवदन्ति वा । सहोक्तावित्येव, क्रमेण वदन्ति छात्राः ।

९७. **अवाद् गिरः ।**

अवाद् गिरतेस्तङ् स्यात् । अवगिरते, गिर इति किम्? अवगृणाति ।

९८. **समः प्रतिज्ञायाम् ।**

अत्रार्थे समो गिरतेस्तङ् स्यात् । शब्दं नित्यं संगिरते ।

९९. **उदश्चर सकर्मकात् ।**

उदश्चरतेस्तङ् स्यात् । गेयमुच्चरते । सकर्मकादित्येन इति किम्? नाद उच्चरति ।

१००. **समस्तृतीयायुक्तात् ।**

तृतीयान्तेन युक्तात् सञ्चरतेस्तङ् स्यात् । रथेन सञ्चरते रविः ।

१०१. **दाणश्चाशिष्ट व्यवहारे सापि चतुर्थ्यर्थे ।**

अत्रार्थे समो दाणस्तृतीयान्तयुक्तात्तङ् स्यात् । सापि तृतीया चतुर्थ्यर्थे । दास्या मालां संयच्छते कामुकः ।

---

९५. अत्रानुशब्दस्य तुल्यार्थत्वेऽपि विवक्षया षष्ठीति सुधियः ।

९६. परस्पर विप्रतिषेधेन विरुद्धप्रलापो विप्रलापः, स एव आत्मा स्वभावो यस्याः सा तथा । व्यक्तवाचामित्येव, विप्रवदन्ति शकुन्ताः, नानारुतं कुर्वन्ति ।

१०२. उपाद् यमः स्वीकरणे ।

अत्रोपाद् यमस्तङ् स्यात् । कान्यमुपयच्छते, उपायंसत नासवम् ।

१०३. युजेः प्रादेरसंनिर्दुरोऽयज्ञपात्रे ।

यज्ञपात्रादन्यविषये प्रादेर्युजेस्तङ् स्यात्, प्रयुङ्क्ते, उपयुङ्क्ते, प्रयुञ्जानः असन्निर्दुर इति किम् ? संयुनक्ति । नेह यज्ञपात्राणि प्रयुनक्ति धीरः ।

१०४. समः क्ष्णुवः ।

संक्ष्णोतेस्तङ् स्यात् । संक्ष्णुते शस्त्रम् ।

१०५. भुजोऽपालने ।

पालनादन्यार्थे भुजस्तङ् स्यात् । ओदनं भुङ्क्ते; अनुभवे—सुखं भुञ्जानः । नेहः भुनक्ति पृथिवीं राजा, पालयतीयिर्थः ।

१०६. शदेः शिति ।

शदेः शिद्विषये तङ् स्यात् । शीयते शीयमानः । शितीति किम् ? शत्स्यति ।

---

१०२. ननु स्वीकरणमिह—पाणिग्रहणं गृह्यते, न स्वीकरणमात्रमिति जयादित्यः । शर्ववर्मादयोऽपि मन्यते (न्ते), तथैव भवन्तस्तथा मन्यन्ते न वेत्येति उपायंसत नासवमिति । स्वीकरणशब्देन पाणिग्रहणोक्तौ व्याख्यानमेव शरणम्, न तु रूढ़िः । तद्व्याख्यानं प्रत्यक्षस्मृतिविरुद्धं नाद्रियामहे । "तथाहि शस्त्राण्युपायंसत जित्वराणीति" स्वीकरणमात्रे भट्टिना प्रायोजि । उपायंस्त महास्त्राणि, उपायंसत नासवमिति च । अस्यार्थः काश्चित् मानिन्यः कोपात् प्रियै प्रकर्षेणानुनयेन दत्तमप्यासवं न स्वीकृतवत्यः । इह कस्मान्न भवति । स्वं शाटकान्तमुपयच्छतीति । अस्वं यदा स्वं करोति तदा भवतिव्यम् । यद्येवं स्वीकरण इति प्राप्नोति । विचित्रास्तद्धितवृत्तयः नातस्तद्धित उत्पद्यते ।

१०५. इह पालननिषेधाद् विप्रयोगन्यायेन भुज् पालनाभ्यवहारयोरित्यस्यैव ग्रहणम्, न पुनर्भुज् कौटिल्ये इत्यस्य भौवादिकस्येत्याह पालनादित्यादि । ननु भुजो भक्षे इति कृतेऽपि सिद्ध्यति किं कुटिलपथाश्रयणेनेत्यानुभव इति । तेन पालनेतरे येऽर्थास्तेषु कविजुष्टेषु तङ् स्यादित्यर्थः ।

१०६. शद्लृ शातने इति भौवादिक-तौदादिकयोर्ग्रहणमविशेषात् । ननु सार्वधातुके परे शपादिर्विधीयते, तस्मिन् सत्यामात्मनेपदं भवतीत्यन्योन्याश्रयः ? सत्यम्, भाविनि (परि० ३३) इति न्यायाद् भाविनोऽपि निमित्तत्वमनुसृत्याह शिद्विषय इति, शिद्विषयस्य त्रैकालिकत्वात् ।

१०७. मृङो लुङ्लोङोश्च ।

म्रियते शिद्विषये लुङ्लोङोश्च तङ् स्यात् । म्रियते, अमृत, मृषीष्ट । नियमः किम् ? ममार, मरिष्यति ।

१०८. पूर्ववत्सनः ।

असनन्तवत् सनन्ताङ् स्यात् । आस्ते—आसिसिषते, आक्रमते, आचिक्रंसते । नेह शिशत्सति, मुमूर्षति; नह्येतद् धातु मात्रं तङ् निमित्तं किन्तु शिदादि ।

१०९. स्मृ-दृशः ।

आभ्यां सनताभ्यां तङ् स्यात् । सुस्मूर्षते, दिदृक्षते ।

११०. श्रुवोऽनाङ् प्रतेः ।

आङ्-प्रति-हीनाच्छ्रणोतिः सनन्तात्तङ् स्यात् । शुश्रूषते गुरुम् । नेह-आशुश्रूषति, प्रतिशुश्रूषति ।

१११. अनेनोर्ज्ञः ।

अनुहीनात् ज्ञः सनन्तात्तङ् स्यात् । धर्म्मं जिज्ञासते । अनेनोरति किम् ? पुत्रमनुजिज्ञासति ।

११२. शकेर्जिज्ञासायाम् ।

जिज्ञासायां शकेस्तङ् स्यात् । विद्यासु शिक्षते ।

११३. आमः करोतेरामन्तवत् ।

आमन्तात् करोतेरामन्तवत्तङ् । ईहते—ईहाञ्चक्रे । करोतेरिति किम् ? ईहाम्बभूव ।

११४. णेरणिकर्म्मकर्त्तृत्वेऽनाध्याने ।

अस्वार्थोऽयमारम्भः । अण्यन्तस्य कर्म्मणः कर्तृत्वे ण्यन्त्यात्तङ् स्यात् । आरोहति गजं राजा, आरोहयते गजः स्वयमेव राजानम् । पश्यन्ति भृत्याः नृपम्, दर्शयते भृत्यान् नृपः। स्वयमेव । रुहिः कर्तृस्थक्रियो दृशिः कर्तृस्थभाव इति कर्म्मवद्भावाद् भिन्नविधिः अनाध्यान इति किम् ? स्मरति शिवं शैवः, स्मरत्येनं शिवः स्वयमेव ।

---

१०७. ङित्त्वादेवात्मने सिद्धे वचनमिदं नियमार्थम् । मरणार्थतौदादिकस्य मृङः लुङ्-लोङ्-लुङ् विषये शिद्विषये च तङ् स्यात् । यद्येवं विधेरपि तङ् भवति किं ङित्करणेन ? सत्यम्, स्वार्थमिति न्यासादयः । आत्मनेभाषात् (४/१/४२) इत्यस्य विशेषणार्थं वा ।

११४. अस्वार्थोऽयमारम्भः इति (३/६/१२४) णेरित्यनेन स्वार्थक्रियाफले आत्मनेपद विहितम्, इह तु तन्न भवतीत्यर्थः । अण्यन्तस्य यस्य धात्वर्थस्य कर्म्म, तस्यैव कर्त्तृत्वे सति अस्मरणार्थे वर्त्तमानात् ण्यन्ताद् धातोस्तङ् स्यात् ।

११५. भीस्म्योः प्रयोजकभये भीषभापौ स्मापश्च, कृति च।

भयमुपलक्षणम्। प्रयोजकाद्भये विस्मये च भीस्मिङोर्णेस्तङ् स्यात्। तयोश्च सादृश्यात् भियो भीषभापौ स्याताम्। स्मिङश्च स्मापादेशः, ते ह्यादेशाः कृति च मुण्डो भीषयते भीषणः, मुण्डो भापयते, भापकः, जटिलो विस्मापयते विस्मापकः। कृति चेति निर्देशात् कर्म्मण्यपि भीषाद्यादेशाः। भीष्यते। प्रयोजकेति किम्? काष्ठिकया भाययति, रूपेण विस्मापयति त्रिलोकीम्।

आरोहति गजं राजेति अण्यन्तस्य कर्म्मप्रदर्शनम्, आरोहयते गजः स्वयमेव राजानमित्युदाहरणम्। अत्राङ् पूर्वस्य रोहते द्वे क्रिये वाच्ये न्यग्भवनम्, न्यग्भावनम् च। तत्र न्यग्भवनस्य गजः कर्त्ता, न्यग्भावनस्य न्यग्भवन्तं गजं राजा न्यग्भावयतीत्यर्थः। यदा सुशिक्षितत्वात् सुविधेयत्वाच्च न्यग्भावनक्रियामत्यन्तमानुकूल्यं गजः प्रतिपद्यते, यदासौ गजो राजानं प्रति प्रयोजकत्वेन विवक्ष्यते, राजा तु प्रयोज्यत्वेन, गजो राजानं प्रयुङ्क्ते मामारोह इति। यद्यपि न्यग्भवनं कर्म्म समवेतम्, ततः कर्म्मस्थधात्वर्थत्वम्, तथापि न्यग्भावन क्रियायाः प्रधानायाः कर्त्तृक्रियात्वमिति ज्ञेयम्। एवं करेणुरारोहयते निषादिनम्। स सन्ततं दर्शयते गतस्मयः इति भारविः। ननु न्यग्भावनस्थायामपि कर्म्मस्थधात्वर्थे (२/२/१३९) इति कर्म्मवदभावादात्मनेपदं भवत्येव, किमनेनेत्याह रुहिरित्यादि। तेन कर्म्मवद्भावात्तङ् न स्यादिति भावः। स्मरयतीति घटादित्वान्न वृद्धिः। अणिकर्म्मकर्त्तृत्व इति किम्? आरोहयति हस्तिनो हस्तिपकं महामात्रः, अत्र हस्तिपकमारोहयमाणं हस्तिनं प्रयुङ्क्ते इति णिचि कृते यद्यपि हस्तिनः कर्म्मकर्त्तृत्वम्, तथापि हस्तिपकस्यारोहणक्रियायां कर्त्तृत्वमपि विद्यत एव, ततः पुनर्णिच्। अथ यद्यपि चुरादिणिजन्तस्य कर्म्मणः कर्त्तृत्वे गणयति गणं गोपालकः, गणयते गणः स्वयमेव गोपालकमित्यात्मनेपदं विनीतकार्त्तव्यादीनां मतम्, तथापि अणिकर्म्मकर्त्तृत्व इति विशेषणाच्चुरादिणिजन्तवादपि न भवतीति जयादित्यस्यापि मतम्।

११५. प्रयोजकात् भयमिति पञ्चमीसमासः। भयं त्रासः, अनिष्टपातशङ्का। ननु प्रयोजकभय इत्युक्ते स्मयत्यर्थो न विशेषितः स्यात् बिभेत्यर्थत्वाद् भयस्य, ततश्च रूपेण विस्मापयतीत्यत्रात्मनेपदं स्यादित्याह भयमुपलक्षणमिति। भयग्रहणमिह भीस्म्यर्थोपलक्षकम्, तेन ञिभी भये स्मिङ् ईषद्हसने इत्येतयोः प्रयोजककर्त्तृभयाश्चर्य्यो वर्त्तमानयोर्णेस्तङ् स्यात्। तयोर्भीस्म्योः सादृश्यात् भियो भीषभापौ भवतः, स्मिङश्च स्मापः वैशिष्ट्यात्। तथा च भीस्म्योः प्रयोजकाश्चर्य्ययोरात्मनेपदं भीर्वा भीषश्चेति वासवतं सूत्रम् अतएव भीष-भाप-स्मापास्तयोः

११६. गृधिवञ्च्योः प्रलम्भने ।

अनयोर्णेस्तङ् स्यात् । शिशुं गर्द्धयते, वञ्चयते । प्रलम्भन इति किम् ? श्वानं गर्द्धयति वञ्चयति ।

११७. लियो लाप् पूजापरिभवयोश्च ।

पूजापरिभवयोर्विसंवादे च, लियो णेस्तङ् स्यात् लापादेशश्च । जटाभिरालापयते, श्येनो वर्त्तिकामुल्लापयते, शिशुमुल्लापयते । नान्यत्र—कन्यामुल्लापयति । अत्र लियो वेति लादेशः ।

११८. मिथ्योपपदात् कृञोऽभ्यासे ।

अभ्यावृत्तौ मिथ्याशब्दप्रयोगे कृञो णेस्तङ् स्यात् । पदं मिथ्या कारयति । (अभ्यासे किम् ? सकृत् पदं मिथ्या कारयति) ।

११९. स्वरि-ञि.तः कर्त्तुः स्वार्थे क्रियाफले ।

क्रियाफले कर्त्तुः स्वार्थे गम्ये, गणपाठे प्रसिद्धात् स्वरितेतो धातोर्ञितश्च तङ् स्यात् । यजते, कुरुते । परार्थे यजति करोति ।

सादृश्यात् कृत्यप्यादिश्यन्ते । मुण्ड इति मुण्डगुणोपेतत्वात् मुण्ड इति, ननु कर्त्तर्यात्मने पदं विधीयते, तत्सहचरितादेशा अपि कर्त्तर्य्येव भवितुमर्हन्ति, तत् कथं भीष्यते इत्यादयः स्युः ? इत्याह कृति चेति, अयमर्थः कृतस्तावदविशिष्ट एव निर्दिष्टाः, तेष्वपि तेषां विधानेऽप्यविशिष्ट इति न च वक्तव्यम्, कर्त्तर्यात्मनेपद विधानात् कृत्यापभीषादयो भवन्तः कर्त्तृवाचिन्येव भविष्यन्तीतिङ्सङ्गतेरस्यापि कृतो विधानात् । प्रयोजकेति किमितिकरणात् भये न स्यात् । काष्ठिकयेति करणे तृतीया । कथन्तर्हि "विस्यापयन् विस्मितमात्मवृत्तौ" इति "मनुष्यवाचेति" करणादेव हि तत्र स्मयः, अन्यथा शानोऽपि स्यात् ? सत्यम् विस्भाययन्नित्येव पाठ इति साम्प्रदायिकाः । यद्वा मनुष्यवाक् प्रयोजककर्त्री विस्मापयते, तया सिद्धे यिस्मापयन्निति ण्यन्ताण्णौ शत्रेति व्याख्येयम् ।

११८. मिथ्या सदोषं पुनः पुनः कारयतीत्यर्थः । आत्मनेपदेनैव गतार्थत्वात् (३/४/९४) द्विर्वचनं न स्यात् । मिथ्येति किम् ? सत्यं कारयति यजुः ।

११९. स्वरितः स्वर विशेषः, स्वरितश्च ञश्च स्वरितञौ तावितौ यस्य तस्मात् । स पुनरशिक्षितशिष्याणां दुरवबोध इत्याह गणेति । कर्त्तुः स्वार्थः इति—ननु फलाकांक्षाकर्तृणां क्रिया प्रवर्त्तते नेतरेषाम्, ततश्च सर्वासामेव क्रियाणां फलं कर्त्रर्थमेव, तत्कथं कर्त्तुः स्वार्थक्रियाफल इत्युक्तम् ? सत्यम्, फलशब्दोऽत्र प्रधानं फलमभिधत्ते । यदर्थः क्रियारम्भस्तदेव फलं प्रधानम् । यथा यागे यजमानस्य स्वर्गप्राप्तिः, कर्म्मादिकरणे कारकस्योपवेशनादि । पाके भोक्तुस्तृप्तिः । तदर्थमेव तासां क्रियाणामारम्भः, दक्षिणार्थवेतनादिप्राप्तिस्तु न प्रधानं फलम् । परार्थे इति यजति ऋत्विक् कटं करोति वैतनिकः ।

१२०. **स्वार्थशब्दयोगे विभाषा।**

स्वार्थे क्रियाफले यदात्मनेपदं विहितं, तत् स्वार्थे शब्दयोगे वा स्यात्। स्वं कटं कुरुते, करोति वा। एवं वक्ष्यमाणेभ्योऽपि।

१२१. **अपाद् वदः।**

स्वार्थे तङ् स्यात्। धनार्थी न्यायमपवदते।

१२२. **यमः समुदाङोऽग्रन्थे।**

एभ्यो यमः स्वार्थे यङ् स्यात्। व्रीहीन् संयच्छते, भारमुद्यच्छते, वस्त्रमायच्छते। अग्रन्थ इति किम्? चिकित्सामुद्यच्छति।

१२३. **अप्रादेर्ज्ञः।**

स्वार्थे प्रादिरहितात् ज्ञस्तङ् स्यात्। गां जानीते। पदार्थे—गां जानाति।

१२४. **णेः।**

ण्यन्तात् स्वार्थे तङ् स्यात्। कारयते, धनार्थं पाठयते। पदार्थे—कारयति, पाठयति।

१२५. **अद-धे-पा-दमा-यमा-यस-परिमुह-रुचि नृति वद-वसः।**

वक्ष्यमाणनिषेधापवादोऽयमारम्भः। एभ्यो ण्यन्तेभ्यः स्वार्थे तङ् स्यात्। आदयते, धापयते, पाययते शत्रुम्, आयामयते, आयासयते, परिमोहयते, परिमोहयमानः, रोचयते, रोचयमानः। नर्त्तयते, वादयते, वासयते। अन्यत्र भिक्षां वासयति, दमयति गजम्, नर्त्तयति भुजमित्यादि।

१२६. **न निगरण-चलनार्थेङ्-बुध-युध-नश-जन-प्रु-द्रु-श्रु भ्य।**

स्वार्थे भक्षणादर्थे णेरिति प्राप्तं आत्मनेपदं न भवति। आशयति, भोजयति, चलयति, कम्पयति। इङ्—अध्यापयति, बोधयति, योधयति, नाशयति, जनयति, पावयति, द्रावयति, श्रावयति (निगारयति)।

१२७. **अणावकर्म्मकाच्चेतनकर्त्तृकात्।**

अण्यन्ते यश्चेतनकर्त्तृकोऽकर्म्मकस्ततोण्यन्तात् स्वार्थे तङ् न स्यात्। आस्ते विप्रः, आसयति विप्रम्। चेतनेति किम्? शाययते व्रीहीनातयः। अणाविति किम्? आरोहयते विप्रस्तं प्रयोजयति। कर्त्तरीत्येव, शाय्यते दयितो नार्य्यः।

---

१२२. कथं वृतगाङ्, यम-हनः (३/१/७४) इत्यनेन सिद्धे पुनर्ग्रहणम्? सकर्मकार्थम्, तत्र तु स्वाङ्गकर्मकादेव विहितम्।

१२३. अकर्म्मकाच्च (३/१/६१) इति प्राप्ते पुनर्ग्रहणं सकर्मकार्थम्। ततोऽनुजज्ञे गमनं सुतस्येति भट्टौ कर्मण्येव तङ्।

१२७. अण्यन्त इति चुरादि णिच् आत्मनेपदनिषेधात् प्रयोजकणिजन्तात् एवात्मनेपदं विधीयते इत्यवसीयते, विधिनिषेधयोः समानविषयतानियमात्। यथा

१२८. शेषात् कर्त्तरि परस्मैपदम् ।

आत्मनेपदहीनाद् धातोः कर्त्तरि परस्मैपदम्भवति । याति, प्रविशति, वर्द्धयति । पुनः कर्त्तृग्रहणं कर्म्मकर्त्तरि निरासार्थम्, विस्पष्टार्थञ्च । आत्मनेपदमिच्छन्ति परस्मैपदिनां क्वचित् । कदाचित् कुप्यते माता नोदरस्था हरीतकी । प्रियामुखं किम्पुरुषश्चुचुम्बे । परस्मैपदमप्याहुः क्वचिदेवात्मनेपदे । वलवद्बाधां राधां शिञ्जद्वलयः । तिङोऽपि तिङमिच्छन्ति । क्रियति पुरुषकारो, नानुवर्त्तयन्ति भाग्यानीति ।

विप्राः प्रवेश्यन्तामन्ये न इत्यत्र पर्य्युदस्तोऽपि विप्रो ज्ञायते । न पुनः विजातीयः क्षत्रियादिः । तेन प्रयोजकणिजेव पर्य्युदस्यते । ततश्च चौरादिकणिजन्तात् प्रयोजकणिचआत्मनेपदम्, प्राक् चित्तवत्कर्त्तकर्म्मत्वाद् भवत्येव । यथा चेतयते विप्रं शास्त्रं गुरुः । एवञ्च चेतयतेरात्मनेभाषादित्यनप्रत्यये चेतनश्चित्तवान् स कर्त्ता यस्य स तथा । तेनायमर्थः सम्पद्यते । प्रयोजकणिचः पूर्व्वं चेतनकर्त्तृकर्म्मकाद् धातोस्तण्यन्तादात्मनेपदं निषिध्यते । आस्त इत्यण्यन्तप्रदर्शनार्थम् । शोषयते इत्यस्वार्थक्रियाफलमप्यवसेयम् । आरोहयत इति, आरोहयत्युपवीतं विप्रं तत स्वयमेव विप्रः प्रयुङ्क्ते इत्यर्थः पूर्व्वणिचः कर्म्मकर्त्तृत्वविषयत्वादकर्मकत्वम् । ततः पुर्नणिच प्रत्युदाहृतौ न कश्चिद्विवादः । इह यदात्मनेपदं विहितं तत् कर्त्तृविषयमेवत्युदाहरन्नाह कर्त्तृरीत्येवेति ।

१२८. धातोरुत्तरे परस्मैपदस्य वक्ष्यमाणत्वाद् वचनमिदं नियमार्थमिति केचित् । इह यद्यपि तत्तदात्मनेपदनिमित्तोपहितादन्यः शेषस्तथानुबन्धोपसदोपपदेन धातुरेव विशिष्यते, नान्य इत्याहात्मनेपदहीनाद्धातोरिति । यातीत्यनुबन्धशेषस्य, प्रविशतीत्युसर्गशेषस्य, वर्द्धयतीत्यर्थशेषस्योदाहरणम् । 'सत्यङ्कारयति' इत्युपसर्गशेषस्य मृग्यम् । ननु शेषादित्यस्य धातुविशेषणत्वात् कर्म्मकर्त्तय्यर्थे कथं परस्मैपदं न स्यात् । न च वक्तव्यम्, कर्म्मवद्भावात्मनेपदं भविष्यतीति । तत्र हि तत्करणस्य स्वाश्रयत्वात् कर्त्तृविहतकार्य्यस्यापि सिद्धेरित्याह । अत्र कर्त्तृग्रहणात् शुद्धकर्त्तय्येव भवति । निरासार्थमिति परस्मैपदमिति शेषः । निरासोऽर्थः प्रयोजनमस्येति विग्रहः । यथा भिद्यते कुशूलः स्वयमेव अथ कर्म्मवद्भावविधौ कर्मस्थधात्वर्थ इति विशेषणात् कर्त्तृस्थधात्वर्थे कर्म्मकर्त्तृय्यपि परस्मैपदं दृश्यते । यथा गच्छति ग्रामः स्वयमेवेत्याह विस्पष्टार्थमिति । कर्त्तरि (३/१/५४) इत्यत्र कर्त्तरीत्यस्य व्यवहितत्वात् । ननु यद्यात्मनेपदं पदस्मैपदञ्च नियतविषयं तत् कथं व्यस्तं स्यादित्याह आत्मनेपदमित्यादि । कुप्यतिचुम्बत्योः परस्मैपदित्वात् । एवं संक्रमते रविः पृच्छते शोकदग्धः इत्याद्यपि मृग्यम् । परस्मैपदमित्यादि—वलिशिञ्ज्योरात्मनेपदित्वात् । एवं परिष्वजति पाञ्चाली मध्यमं पाण्डुनन्दनम् । प्रस्यन्दम् मदगन्धेति, स्फायनिर्मोक-सन्धिरित्यादि प्रयोगाः । अत्रोभयत्र क्वचिद्ग्रहणाच्छिष्टप्रयोगविषयमिदमिष्टम् । न पुनर्व्यवस्थितम् । तिङोऽपि तिङमिच्छन्ति, छान्दसमेतत् । अथ परस्मैपदमाहाष्टसूत्र्याम् ।

१२९. अनुपराभ्यां कृञः ।

आभ्यां कृञः सर्व्वत्र परस्मैपदं भवति । अनुकरोति । पराकरोति ।

१३०. परिप्र-वहः परि-मृषः ।

आभ्यां परस्मैपदं भवति । परिवहति, प्रवहति, परिमृष्यति, परिमृषति ।

१३१. क्षिपेरभिप्रत्यतिभ्यः ।

एभ्यः क्षिपेस्तत् स्यात् । अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति ।

१३२. रमो व्याङुपपरिभ्यः ।

एभ्यो रमस्तत् स्यात् । विरमति, आरमति, उपरमति, परिरमन्ति परिमन् ।

१३३. उपाद् कर्म काद् वा ।

अकर्मकादुपरमस्तद् वा स्यात् । भोजनादुपरमति, उपरमते वा ।

१३४. द्युतादेर्लुङि ।

लुङि द्युतादेः परस्मैपदं वा स्यात् । व्यद्युतत् व्यद्योतिष्ट, अलुटत्, अलोविष्ट । द्युतादयो द्वाविंशति ।

१३५. वृद्भ्यः स्यसनोः ।

स्ये सनि च परे वृतादेस्तत् वा स्यात् । वर्त्स्यति, वर्त्तिष्यते । सनि—विवृत्सति, विवर्त्तिषते । वृतु, वृधु, श्रृधु, स्यन्दू, क्लृपू (एते वृतादयः) ।

१३६. क्लृपो वुटि च ।

तद्वा स्यात् । कल्प्तासि, कल्पितासे । क्ल्प्स्यति, कल्पिष्यते । चिक्लृप्सति, चिकल्पिषते ।

१३७. सुट् कात् पूर्व्वोऽड्भ्यासव्यवाये च ।

द्वयमधिक्रियते ।

---

१३२. रमतेरनुदात्तेत्वादिद वचनम् । अथ (१३३) वक्ष्यमाणस्याकर्म्मविषयत्वात् सकर्म्मकत्वार्थमिहोपग्रहणमित्याह तमुपरमतीति । उपपूर्व्वो रमिर्विनाशे निवृत्तौ च वर्त्तते, उभयत्राकर्म्मकः, अन्तर्भावितण्यर्थः सकर्म्मक इतिण्यर्थोऽत्र गम्यत इति पुरुषोत्तमः । एतत् सन्दिग्धमूलमित्याभिधाय उपसंप्राप्तिपूर्विकायां वृत्तौ रमिर्वर्त्तते इति भागवृत्तिकृतोक्तम् ।

१३४. ननु परस्मैपद एवाङ्ऽविधानात् द्युतादेस्तस्मादेव ज्ञापकात् परस्मैपदं भावि, तत् किमनेनेति ? मैवं वादीः, ज्ञापकत्तावद्भवन्नित्यं स्यादिति सम्भाव्यते, तर्हि अनुदात्तानुबन्धो व्वर्थ इति चेन्न, आत्मनेभाषादष-दीप-दीक्ष-ङितो हलादेः (४/१/४२) इत्यनेनार्थः स्यात् ।

१३८. सम्पर्य्युपात् कृञः समवायभूषणे ।

समादेः कृञः कात्पूर्व्वं सुट् स्यात् । समवाये भूषणे च । संस्कृतम् । अडभ्यास-व्यवायेऽपि, समस्करोत् परिचस्कार, उपस्कुरु । समः साधनविषये च । संस्कारः ।

१३९. उपात् प्रतियत्न-वैकृतवाक्याध्याहारेषु ।

उपादेष्वर्थेषु कृञः सुट् स्यात् । गुणानामुपस्कुरुते, विकृते—उपस्कृतं भुङ्क्ते । गम्यमानवाक्यस्योपादाने—उपस्कृतं जल्पति नित्यमेव, कथं ततो निश्चिनुमः पदार्थान् ।

१४०. किरो लवने ।

उपकिरतेः कात् पूर्व्वः सुट् स्यात् । उपस्कीर्य लुनाति । लवन इति किम् ? उपकिरति पुष्पम् ।

१४१. प्रतेश्च हिंसायाम् ।

प्रतेरुपाच्च किरतेर्हिंसायां सुट् स्यात् । उरो विदारं प्रतिचस्करे नखैः । उपस्कीर्णो दस्युः ।

१४२. आश्चर्यमद्भुते ।

निपात्यते । (आचार्यमन्यत्र)

१४३. गोष्पदं सेवितासेवितप्रमाणेषु ।

निपात्यते । गोभिः सेविता, गोष्पदो देशः । असेविते-अगोष्पदं वनम्, प्रमाणे—गोष्पदपूरं वृष्टो देवः

१४४. आस्पदं कृत्यप्रतिष्ठयोः ।

स्यात् ।

---

१३८. अत्र सुट्-सकारस्य धात्ववयवत्वात् विसर्गाभावः । समवायो अत्र समूहः । संस्कृतम्, परिष्कृतम्, समूह इत्यर्थः । एवं सस्कृतमङ्गमङ्गनानाम्, परिष्कृतम् । भूषितमित्यर्थः । अथाधिकारमनुस्मरति, अडभ्यासव्यवाये चेति । अथ भूषणमित्युपलक्षणम्, इत्याह समः साधनविषये चेति साधनं कारणम् । तथाहि—संस्कारः स्मृतिकारकः, क्वचिदन्यत्रापि संस्कृतमनित्यम्, पदसंस्कारकं व्याकरणम्, सूपं लवणेन संस्करोति, प्रकर्षयतीत्यादयः ।

१३९. उत्कर्षाधानं प्रतियत्नः, स्वरूपान्यथात्वं विकृतिः, विकृतेः प्रज्ञादेरण् वैकृतम् । इह वाक्यपदं वाक्यैकदेशपदम्, गम्यमानस्य शब्दानुपात्तस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः, एष्वर्थेषूपात् कृञः कात् पूर्व्वः सुट् विधीयते ।

१४४. कृत्ये स्थाने चाभिधेये, आ समन्तात् पदं व्यवसायः स्थानं वा । आस्पदम् किम् ? आपदम् ।

१४५. परस्पराः क्रियासातत्ये ।

अपरस्पराः सार्था यान्ति, अविच्छेदेनेत्यर्थः ।

१४६. पारस्करादयोऽपि संज्ञायाम् ।

एते संज्ञायां साधवः स्युः । पारस्करो देशः । *कुस्तुम्बुरे च धन्याके । *अपस्करो रथाङ्गे । *अवस्करो वर्चस्के । *प्रतिष्कशोऽग्रग्राम्यादौ । प्रस्कन्नो-हरिश्चन्द्रश्च ऋषौ । *मस्करमस्करिणौ वेणुपरिव्राजकयोः । *कास्तीरमजस्तुन्दञ्च नगरे । *कारस्करो वृक्षे । रथस्पा नदी । किष्किन्धः पर्व्वतः । परः शताद्यास्ते येषां परा संख्या शताधिकात् । *तद्बृहतोस्तलोपेन । तस्करश्चौरः । बृहस्पतिः सुरगुरौ । वनस्पतिर्वृक्षे । *प्रायश्चित्तादयोऽप्यत्रैव द्रष्टव्याः ।

१४७. डलयोरलयोश्च व्यत्ययो बहुलम् ।

एषां द्वयोर्द्वयोश्च व्यत्ययो बहुलं भवति । चूडा, चूला, जडं जलम् । वडभी वलभी व्रीड़ा, व्रीला विडालः विलालः विरालश्च । रलयो खल्यपि-वादः वालः । मूरम्, मूलम्; रघुः लघुः, अरम्, अलम्, अङ्गुरिः अङ्गुलिः, कपिरिका, कपिलिका, रोमः लोमः, विरोचनम् विलोचनम्, भीरुः, भीलुः, कलम, कर्म्म । *कृप ऋश्च लृ सामर्थ्ये । कल्पते, क्लृप्तः । नान्यत्र—कृपा कृपणः । *ग्रो यङि । निजेगिल्यते नान्यत्र—गीर्य्यते ।

---

१४५. अपरे च परे चेति द्वन्द्वे सुट् निपात्यते । भाविक्रियानैरन्तर्य्ये उक्तोदाहरणे यानक्रियासातत्यम् । क्रियासातत्य इति किम् ? अपरस्पराः सकृल्लोकाः गच्छन्ति, सकृदेव गच्छन्तीत्यर्थः । अत्र द्वन्द्वे चेति सर्वनामसंज्ञानिषेधः ।

१४६. अन्यत्र कशां प्रतिगतः प्रतिकशोऽश्वः । यद्यपि कशेरेव कशा, तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थम्, तेन धात्वन्तरोपसर्गान्न । कुस्तुम्बुरुः, अत्र क्लीबत्वमतन्त्रम् ।

१४७. केचिदिह ग्र इति गिरतेर्गृणातेश्च सामान्येन ग्रहणमिच्छन्ति, अन्ये तु गिरतेरेव, क्रैयादिकस्य यङेव नास्ति, अनभिधानादित्याहुः, यङीति किम् ? गीर्य्यते । अयतौ—पलायते इत्यत्रैकदेशस्य दीर्घादेः स्थानिद्भावाद् धातूपसर्गयोर्विभागे सति दयतिग्रहणं रेफविशेषणं तेन व्यवहितोऽपि वचनप्रामाण्यादित्येक-व्यवधाने सति लत्वं भवति । तथा च पल्यते इत्यत्रापि । उपसर्गविशेषणे तु अयतिग्रहणें सिद्धमेवैतत् सर्व्वामिति वामनः । अप्रतेरिति किम् ? प्रत्ययते । अन्ये तु प्रादीनामयतौ रोलो निर्दुरोस्तु विभाषया । अतिव्यवहिते नेष्टं प्रतेः कैश्चिद् विचक्षणैरित्याहुः । तन्मते निरयणम्, दुरयणम्, दुलयणमिति ।

*अचि वा । गिरति, गिलति । गरो विषे गलः कण्ठे । *अयतौ प्रादेरप्रतेः । पलायते, प्लायते । प्रतेस्तु—प्रत्ययते । *परेर्व्वा घाङ्कयोः—परिघः पलिघः, पर्य्यङ्कः, पल्यङ्कः ।

क्वचित्प्रवृत्तिः, क्वचिदप्रवृत्तिः क्वचिद् विभाषान्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्व्विधं बाहुलकं वदन्ति ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
तृतीयाध्यायस्य प्रथमः पादः

परेण योगे च वक्तव्यम् । परियोगः, पलियोगः, इति काशिका, क्वचिदित्यादि अस्यार्थः—विधेः सूत्रस्य, विधानं प्रवृत्तिम् । बहुधा नानाप्रकारम् समीक्ष्य सम्यगालोच्य, बाहुलकं बहुलत्वम्, चतुर्व्विधम् वदन्ति सन्त इति शेषः । तद् यथा गलः कण्ठे गरो विषे । पांसुरम्, पांसुलम्, विरालः, विगलः, विलालः । सर्व्वोऽयं वर्णविकारप्रपञ्च इत्येके ।

इति सुपद्ममकरन्दे
नवमो बिन्दुः

तिङन्त-ङित्प्रकरणम्

द्वितीयः पादः ।

ङित्प्रकरणम्

१. ङिदपिल्लुङ्साव्र्वधातुके ।

अपिल्लुङ्साव्र्वधातुके ङिती भवतः । अतत अतथाः । कुरुतः, चिन्वन्ति । अपिदिति किम् ? करोति ।

२. व्यचेरणिदसि ।

व्यचेणिर्दसिभ्यामन्यप्रत्ययो ङिद् भवति । विचिना, विचितुम् । अणिदसिरिति किम् ? व्याचयति, असिः, उरुव्यचाः ।

३. असंयोगादिल्लिट् कित् ।

असंयोगान्तादधातोरपिल्लिट् किद् भवति । चक्रतुः, जहुवतुः, जेहुवुः, ऊचुः, दन्द्रुवुः, संविविये, आ एचत्त्वम्, न व्या-ज्याव्येञो लिड्यपोरिति यण इक्निषेधात् आतो लुगिट्-क्ङि दचोरित्याकारलुक् । असंयोगादिति किम् ? "बलिबबन्धे जलधिममन्थेः" अलिदिति किम् ? बिभेदिथ। आमादेशे लिटो न स्थानिवत्त्वम्, ओषाञ्चकार ।

४. मृड-मृद-गुध-कुश-क्लिश-वद-वसः क्त्वा ।

वक्ष्यमाणनिषेधापवादोऽयम् । मृडादेः सेट्, क्त्वा कत् स्यात् । मृदित्वा, मृडित्वा, गुधित्वा, कुशित्वा, क्लिशित्वा उषित्वा उषित्वा ।

५. ग्रह-रुद्-विद्-मुषः संश्च ।

एभ्यः सेट् क्त्वा संश्च कितौ स्याताम् । गृहीत्वा, जिघृक्षति रुदित्वा, रुरुदिषति, विदित्वा, विविदिषति । मुषित्वा, मुमुषति ।

६. इक उपान्ताच्च सन्नऽनिट् ।

इगन्तादिगुपान्ताच्च धातोरनिट् सन् कित् स्यात् । चिचीषति, चिकीर्षति । इगुपान्ताच्च बिभित्सति, बुभुत्सते । अनिडिति किम् ? शिशयिषते ।

७. उरिगुपधाच्च लोङ् सिचौ तङि ।

ऋकारान्तादिगुपधाच्च धातोरात्मनेपदे लोङ्सिचौ कितौ स्याताम् । कृषीष्ट, हृषीष्ट । अकृत, अहृत । तीर्षीष्ट अतीर्ष्ट, स्वयम् । इगुपधात्—भित्सीष्ट, भुत्सीष्ट । अभित्त । अबुद्ध । अनिडित्येव, वर्द्धिषीष्ट, अवर्धिष्ट ।

८. **स्थाघोः सिजादिच्च ।**

स्थाघ्वोस्तङि सिच् कित् स्यात् । आत् इच्च । उपास्थित, स्थुः—आदित, आधित, अधिषाताम् । इट्साहचर्यान्नेऽणि अधायिषाताम् ।

९. **न क्त्वा सेट् ।**

सेट् क्त्वा किन्न स्यात् । शयित्वा, देवित्वा, वर्त्तित्वा, वर्द्धित्वा, स्यन्दित्वा ।

१०. **ऋति-कृशि-मृषि-तृषि-वञ्चि-लुञ्च-नोपध-थ-फान्ताद् वा ।**

एभ्यः सेट् क्त्वा किद् वा न स्यात् । ऋतः सौत्रः—ऋतित्वा, अर्त्तित्वा । कृशित्वा, कर्शित्वा । मृषित्वा, मर्षित्वा । तृषित्वा, तर्षित्वा, वचित्वा, वञ्चित्वा । लुचित्वा, लुञ्चित्वा । नोपध-थ-फान्तात्—ग्रथित्वा, ग्रन्थित्वा । गुफित्वा, गुम्फित्वा ।

११. **हलादेर्व्युपधाद-व-यः संश्च ।**

उ इ वी उपधे यावत्तस्माद्व्युपधाद् धातोः वयन्तात् सेट् क्त्वा संश्च कितौ वा स्याताम् । द्युतित्वा, द्योतित्वा, दिद्युतिषते, दिद्योतिषते । लिखित्वा, लेखित्वा । लिलिखिषति, लिलेखिषति अ व-य इति किम् ? देवित्वा, क्नोयित्वा । हलादेरिति किम् ? एषित्वा, एषिषिषति । सेडित्येव, भुक्त्वा, बुभुक्षते ।

१२. **न निष्ठा-शी-पूङ्-स्विदि-मिदि क्ष्विदि ।**

एभ्यः सेट् निष्ठा किन्न स्यात् । शयितः, शयितवान्, पवितः, पवितवान् । प्रस्वेदितः, प्रस्वेदितवान् । प्रमेदितः, प्रमेदितवान् । प्रक्ष्वेदितः, प्रक्ष्वेदितवान् । प्रधर्षितः, प्रधर्षितवान् । स्विदादेरादितो भावारम्भयोरिति इट । उड्डयतेश्चाकित्त्वम् । उड्डयितः, नेह उड्डीनः ।

१३. **मृषः क्षान्तौ ।**

निष्ठा किन्न स्यात् । मर्षितः, मर्षितवान् । क्षान्ताविति किम् ? अपमृषितं ते वाक्यम् ।

१४. **उदुपधशब्विकरणाद् वा भावारम्भयोः ।**

उबुपधाच्छब्विकरणाद् धातोर्भावादिकर्म्मणोः सेट् निष्ठा किद् वा स्यात् । द्युतितं द्योतितमनेन । आरम्भे प्रद्युतितः, प्रद्योतितो भानुः, द्योतितमारब्धः इत्यर्थः । शब्विकरणादिति किम् ? निगुधितं ते वाक्यम् ।

१५. **धातोः ।**

आ कृत्परिसमाप्तेर्धातोः कार्य्यमधिक्रियते ।

---

८. ननु सिचः कित्करणमिहानर्थकम्, यत इत्करणवैयर्थापत्तिभीत्या गुणो न भविष्यतीति । तथाहि यं विधिं प्रति (परि० ६३) इति (बाध्यते) सत्यम्, आदित्करणमिह सिज्लुगर्थमवश्यकार्य्यम् । ततो गुणोऽनिवार्य्य वार्य्यते ।

१५. "स्वस्मिन् स्वस्मिन् सूत्रे फलशून्यत्वे सति परस्मिन् सूत्रे फलभागित्वमधिकारत्वम् ।" कार्य्य-कार्य्यिनिमित्तादिपदानां यदुदीरणम् वक्ष्यमाणार्थ-संक्षेपादधिकार स उच्यते ।

१६. **क्त-क्तवतू निष्ठा ।**

एतौ निष्ठासंज्ञकौ स्याताम् । भिन्न: भिन्नवान् ।

१७. **शिल्लिट् लोट्लिङ्लङ:सार्व्वधातुकम् ।**

अत्र धात्वधिकारे शिदादय प्रत्यया: सार्व्वधातुकसंज्ञा स्यु: । सार्व्वधातुकप्रदेशा: सार्व्वधातुके यगित्येवमादय: ।

१८. **शेषमलङार्द्धधातुकम् ।**

शिदादेदन्यच्छेषम्, तल्लङ्वर्ज्जितमार्द्धधातुकसंज्ञं स्यात् । अथ कालाधिकार: ।

१९. **वर्त्तमाने लट् ।**

अथ कालाधिकार:

आरब्धाया: क्रियाया आपरिसमाप्तेर्वर्त्तमान: काल: तत्र धातो: परे लट् प्रत्ययो भवति । भवति, अत्ति:, तिष्ठन्ति गिरय:, स्रवति नदी ।

---

१९. वर्त्तत इति समाख्याबलात् प्रस्तुतक्रियैव वर्त्तमानपदेनोच्यते । एकस्मिन्नपि चिकीर्षति वस्तूनि क्रियाभेदाश्रया: काला प्रवर्त्तन्ते । उक्तञ्च, "दग्धा च दहनीया च दह्यमाना च दृश्यते । वत्तिरेकाग्निसंयोगाद्वर्त्तमान: किमुच्यते" इति । तर्हि का गतिरित्याह आरब्धाया इत्यमर्थ: साधयितुं प्रस्तुता क्रिया यावता समाप्यते भावानेव वर्त्तमानो विवक्षित: । अथ साधनस्यातीत-वर्त्त-मानभविष्यत्वे प्रत्ययानुत्पत्त्यर्थं कालाधिकार: केनचिद् विहितोऽपि न विधीयते । तस्येहविवक्षित्वादित्याह काल इति । तेनायमर्थ: सम्पद्यते, वर्त्तमाने अतीते भविष्यति च धात्वर्थे वर्त्तमानाद् धातोर्लडादय, प्रत्यया: स्यु: । ननु नित्यो व्यापी काल:, स कथं वर्त्तमानादिरूप: सम्भवेत् ? सत्यं कालस्य वर्त्तमान-त्वादि: क्रियाद्वारक: । तथाहि मूर्तिमद्घटादिभि: काल: संयुज्यते, संयुक्तेषु तेषु क्रिया समवेता:, ततश्च संयुक्तसमवायेन क्रियागतौ वर्त्तमानत्वादि-व्यवहार: कालेऽप्युपचर्य्यते । तथा चोक्तम्—

"यथैकस्मिन् क्रियाभेदात्त्वक्षयाद् वर्षाख्याया प्रवर्त्तते ।
तथैकस्मिन् क्रियाभेदाद् ऋत्वाद्याख्या प्रवर्त्तते" ॥

तदुक्तं कातन्त्रे नित्यो व्यापि, सम्प्रति-भूत-भविष्यत्-क्रियाभेदात् आकाशकल्प एको द्रव्यस्थो भिद्यते काल:, इह मांसं न खादतीत्यादौ, इह कुमारा क्रीडन्ति, तिष्ठन्ति पर्वता:, कदागतोऽपि—एषोऽहमागच्छामि, बुभुक्षया निद्रया वा क्रीडितानां क्रीड़ावृत्त्या अप्यविरतता: बुद्धो श्व: प्रभृते: कालस्य वर्त्तमानत्वात् । "प्रवृत्तोपरतैश्चैव वृत्ताविरत एव च । नित्यप्रवृत्तिसामीप्यं वर्त्तमानश्चतु-विध:" । "इति केनचिल्लक्षितम् तन्नलक्षितव्यम् उक्तलक्षणत्वात्, अत एव नित्यप्रवृत्तावुदाहरति तिष्ठन्ति गिरय इति ।

द्वितीयः पादः

२०. भूते लुङ् ।

अतीते काले धातोर्लुङ् स्यात् । अभूत्, अगमत्, अघसत्, अजैषीत्, अचैषीत् ।

२१. अनद्यतने लङ् ।

अद्यतनहीने भूते लङ् स्यात् । षट् प्रहराद्‌र्ध्वमनद्यतनः कालः । आसीत्, अकरोत् ।

२२. लृडभिज्ञावचनेऽयदि ।

स्मरणोक्तौ भूतानद्यतनेऽर्थे लृट् स्यात् । स्मरसि काश्यां वत्स्यामः, सम्भविष्याव एकस्यामभिजानासि मातरि । अयदीति किम् ? यद्‌योगे मा भूत् । वयस्य ! जानासि यत् काश्यावसाम ।

२३. साकांक्ष्ये यदि वा ।

साकांक्ष्ये कर्त्तरि यदुपपदे अभिज्ञोक्तौ लृड् वा स्यात् । स्मरसि यन्मगधे वत्स्यामस्तत्र दुग्धं पास्यामः, स्मरसि यन्मगधेऽवसाम तत्र दुग्धमपिबाम । अयद् योगे अपीत्येके ।

२४. परोक्षे लिट् ।

भूतानद्यतने परोक्षे लिट् स्यात् । चकार, ववृधे । सुप्तोऽहं किल विललाप । मत्तोऽहं किं विचचार । लोकख्याते विवक्षातः परोक्षे चापरोक्षवत् । अहन् कंसं विष्णुः । न्यक्षिपच्चाङ्गदं यत्नात् । अभून्नृपः । "वितर्केऽद्यतने चाहुरनद्यतनवद् बुधाः" अद्यारुणद् वाटिकम् ।

---

२४. अक्षाणां (इन्द्रियाणां) परं परोक्षम् । पारस्करादिनिपातः । परोक्षमनिन्द्रियम् । यद्यपि क्रियाणां सर्व्वासां परोक्षत्वम्, तथापि साधनानां प्रत्यक्षत्वात्तत्साध्यान्त क्रियाणामुपचरितप्रत्यक्षत्वदयावृत्त्या परोक्षमित्युक्तम् । तेन भूतानद्यतन-परोक्षवृत्त्यर्थाद् धातोर्लडपवादको लिट् स्यात् । नन्विन्द्रियाविषयः परोक्षः कालः, आत्मसाध्या च क्रिया प्रत्यक्षा, तत्कथमस्मद् विषयको लिट् प्रवर्त्तता-मित्याह सुप्तोऽहमित्यादि । अत्र चित्तविक्षेपात् स्वयं कृतापि कर्त्रा नोपलक्ष्यते । केवलं फलबलादनुमीयते, अतस्तज्ज्ञानं मानसातिरिक्तेन्द्रिया प्रत्यक्षमेव । एवं "बहु जगदा पुरस्तात्तस्य मत्ता किलाहं चकर च बहु-चाटु-प्रौढ़योषिद्‌वदस्य" इति माघः । तथा "सुप्तो नभस्तः पतितं निरीक्षाञ्चक्रे विवस्वन्तमघः स्फुरन्तमिति" भट्टिः । स्वप्नजन्यज्ञानमपि जाग्रद्‌दशायामनु-मीयते । किञ्च मत्तेन मया विलेपेत्याद्यपि चित्तविक्षेपात् । उत्तमे चित्तविक्षेपे इति वासवत्सूत्रेऽप्युत्तमपदमुपलक्षणम् । वृत्तौ तु चित्ताविक्षेपादिति पुरस्कृत्य सम्बन्धनीयम् । तथा । चोक्तम्—

"कृतस्यास्मरणे कर्त्तुरत्यन्तापह्नवेऽपि च ।
दर्शनादेरभावे च त्रिषु विद्यात् परोक्षताम् ।।" इति ।

२५. अत्यन्तापह्नवे च ।

लिट् स्यात् । कपिथ्यां दृष्टोऽसि मया, नाहं कपित्थीं जगाम ।

२६. ह-शश्वतोर्लङ् च ।

हान्त-शश्वतोर्योगे लङ् लिट् च स्यात् । इति हाऽकरोत् । शश्वत्करोत्, चकार वा ।

२७. प्रश्ने चासन्नकाले ।

पञ्चवर्षाभ्यन्तरे प्रश्ने लङ् लिटौ स्याताम् । पृच्छामि त्वामगच्छच्चैत्रः जगाम वा ।

२८. लट् स्मेनापरोक्षे च ।

परोक्षे अपरोक्षे च भूतानद्यतनेऽर्थे स्मेन युक्ताल्लट् स्यात् । पचति स्म, करोति स्म ।

ननु अहन् कंसं विष्णुरित्यादौ प्रयोक्तुः परोक्षत्वेऽपि लिटोऽन्यप्रत्ययाः कथमभूवन्नित्याह लोकख्यात इत्यादि । लोकप्रसिद्धेऽपि परोक्षे विवक्षावशात् दर्शनयोग्यत्वात् परोक्षात् अविहिताः प्रत्ययाः स्युः अहन्निति लङ् । "न्यक्षिपच्चाङ्गदं यत्नात् काकुतस्थे तनयं प्रियम् । अभून्नृपो विधुस्सखः" इति भट्टिः । अन्ये तु पदसंस्कारक शास्त्रमिति कस्यापि दर्शनम्, वाक्यसंस्कारकमपि कस्यापि । तत्र पूर्व्वत्र पदानि संस्क्रियन्ते पश्चाद् वाक्यघटनेति निष्पन्नं च पदं वाक्यदशायां न निवर्त्तते निष्पन्नत्वात् इत्याहुः, तेनाभून्नृपः इत्यादयः साधवः स्युः । इत्थञ्च यानि विशेषणलक्षणानि तानि सुखार्थान्येव पदसंस्कारादेव तत्सिद्धेः । लोकख्यात इति किम् ? चकार कटं पामरः । विवक्षाबीजस्य कर्त्तुर्दर्शनयोग्यत्वस्याभावात् । "जघान कंसं किल वासुदेवः" तदानीं वक्तुरसत्त्वात् । परोक्ष इति किम् ? उदगाद्तीक्ष्ण दीधितिः । वितर्क इत्यादि वितर्के विस्मये विवक्षावशादद्यतने चानद्यतनवद् बुधाः वदन्ति । किं परोक्षं नाम ? परमक्षः परोक्षम् । अक्षि पुनः किम् ? अश्नोतेरयमौणादिकः करणसाधनः क्षिप्रत्ययः । अश्नुतेऽनेनेत्यक्षि । यद्येवं परोक्षमिति प्राप्नोति, नैष दोषः : "परोभावः परस्याक्ष परोक्षं लिटि दृश्यताम् ।" (पर शब्दस्याक्षशब्द उत्तरपदे परोभावो वक्तव्यः)" उत्त्वं वादे परादक्षणः सिद्धं वास्मिन्निपातनात् ।' इति ।

२५. अपह्नवोऽपलापः, यत्र कारणापह्नवपूर्व्वकः कार्य्यापह्नवः सोऽत्यन्तापह्नवः, तस्मिन् गम्ये भूतमात्रे वर्त्तमानाद् धातोर्लिट् स्यात् । आस्तां तावत्तद्देशे मद्दर्शनं तव किन्तु तद्देशे गमनमपि नाकार्य्यमित्यत्यन्तापह्नवः । कपित्थी देश विशेषः ।

२९. **ननुना प्रश्नोत्तरे न-नुभ्यां वा ।**

प्रश्नादुत्तरे ननुना युक्ताद् भूतमात्रे लट् स्यात् । अकार्षीः कटम् ? ननु करोमि । ननुभ्यां वा । अकार्षीः कटम् ? न करोमि, नाकार्षम् । न्वकार्षम् ।

३०. **परा लुङ चास्मे ।**

भूतानद्यतने युक्ताल्लुङ् लट् च वा स्यात्, अवात्सुरिह पुरा विप्राः, वसन्तीह पुरा मृगाः । पक्षे लङ्‌लिटौ—अवसन् पुरा, ऊषुः पुरा । अस्म इति किम् ? पुरा वसन्ति स्म । उक्तं भूते ।

३१. **भविष्यति लृट् ।**

भविष्यति काले लृट् स्यात् । करिष्यति, करिष्यन् ।

३२. **अनद्यतने लुट् ।**

भविष्यत्यनद्यतने लुट् स्यात् । श्वः कर्त्ता, परश्वो भोक्ता । आशङ्कायामद्यतने च लुट् स्यात् । "इयं ननु कदा गन्ता यैवं पादौ ददाति ते ।"

३३. **यावत्पुराभ्यां लट् ।**

आभ्यां निपाताभ्यां युक्ताद् भविष्यति लट् स्यात् । यावद् गच्छामि । पुरा गच्छामि ।

३४. **कदा-कर्ह्योर्व्वा ।**

कदा-कर्हि योगे भविष्यति लड् वा स्यात् । कदा कर्हि जयति, जेष्यति जेता वा ।

३५. **कि-कतर-कतमैर्लिप्सायाम् ।**

एतैर्योगे लिप्सायां लड् वा स्यात् । लब्धुकामः पृच्छति, कस्ते भिक्षां ददाति, दास्यति दाता वा । एवं कतर कतमश्च ।

३६. **वाञ्छितादन्यसिद्धौ च ।**

इप्सितादन्यसिद्धौ च गम्यमानायां लड् वा स्यात् । यो दध्योदनं ददाति स स्वर्गं गच्छतीति दातारं प्रोत्साहयति इत्यर्थः । पक्षे लुट्-लृटौ ।

---

२९. नन्विति परमताक्षेपादिषणापृष्टप्रतिवचनेष्विति, न इति प्रश्नप्रतिवचनवितर्केष्विति च वर्द्धमानः ।

३०. पुरा टा (२/३/१३१) इत्याकार लोपः । पुरेति भविष्यदासत्तिभूतविप्रकर्षयोरिति वर्द्धमानः । नन्वन्तरोक्तभूतसामान्यनिमित्तत्वात् कथं भूतानद्यतने इत्युक्तम् ? मैवं वादीः । भूतसामान्यनिमित्तत्वे लुङो निधानं निष्फलमेवोपपद्यते, इत्यत्र एवं विधेः भूतानद्यतन निमित्तत्वमुपपद्यत इत्याह भूतानद्यतन इति ।

३७. **लोडर्थलक्षणे च ।**

प्रैषादिलक्षणे वर्त्तमानाद् धातोर्लङ् वा स्यात् । गुरुश्चेदागच्छति आगमिष्यति आगन्ता वा, अर्थ त्वं छन्दोऽधीष्व । प्रैषोऽत्राध्ययनम्, तस्य लक्षणं गुर्व्वागमनमिति ।

३८. **ऊर्ध्वमौहूर्त्तिके लिङ् च ।**

मुहूर्त्तस्योपरि गुरुश्चेदागच्छेत् आगच्छति (आगमिष्यति आगन्ता) वा अथ त्वं छन्दोऽधीष्व । पक्षे लृट्-लुटौ ।

३९. **वर्त्तमानसमीप्ये वर्त्तमानवद् वा ।**

वर्त्तमानसमीप्ये भूते भविष्यति च वर्त्तमानवत् प्रत्ययो वा स्यात् । कदा त्वमागतोऽसि, अयमागच्छामि । पक्षे अद्यागमम्, आगतोऽस्मि । कदा त्वं यास्यसि ? एष गच्छामि, गमिष्यामि वा ।

४०. **आशंसायां भूतवच्च ।**

वाञ्छायां भविष्यति वर्त्तमानवद् भूतवच्च प्रत्ययो वा स्यात् । गुरुश्चेदागच्छति आगमदागतः आगमिष्यति आगन्ता वा, युक्ताश्छन्दोऽधीमहेऽध्यगीष्महि, अध्येष्यामहे ।

४१. **क्षिप्रार्थोपपदे लृट् ।**

आशंसायां क्रियार्थोपपदे लृट् स्यात् । गुरुश्चेत् क्षिप्रमागमिष्यति, त्वरितमध्येष्ये ।

४२. **लिङाशंसार्थैः ।**

आशंसार्थैर्योगे लिङ् स्यात् । उपाध्यायश्चेदागच्छेत् आशंसे युक्तश्छन्दोऽधीयीय । अवकल्पे शीघ्रमधीयीय ।

---

३९. वर्त्तमाने लट् (३/२/१९) इत्यारभ्य उणादयो बहुलम् (४/२/१) इति यावत् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्त्तमानसामीप्ये (धातुविशेषोपाधिना) भूते भविष्यति च वा स्युः । वर्त्तमानस्य सामीप्यम्, गुणवचनेनापि षष्ठी समासोऽत-एव ज्ञापकात् तत्सामीप्यमुभयत्र सम्भवतीत्याह भूते भविष्यति चेति । वर्त्तमान इव (५/४/२८७) इति वतिः । वर्त्तमाने प्रत्यया विहितास्त एव भवन्तीत्यर्थः । अयमागच्छामीत्यत्र अयमित्यनेन तदध्वक्लेशखिन्न इति प्रतीतिः । वर्त्तमानसामीप्य इति किम् ? कदागतोऽसि ? पूर्वेद्युरागच्छम् ।

४०. सामान्यातिदेशे विशेषानतिदेशस्तेन लिङ्लिटौ न ।

४३. **क्रियासातत्यसामीप्ययोर्यथाकालमद्यतने लुङ् लृटौ ।**

क्रियाप्रबन्धे कालानां सामीप्ये च यथाकालं भूत-भविष्यदनद्यतने च लुङ्लृटावेव स्याताम् । यावज्जीवमन्नमदात् दास्यति च । येयं पौर्णमास्यतिक्रान्तस्यां गुरुरग्नी नाधित, आगामिन्यामाधास्यते ।

४४. **सीमोक्तौ चावरे लृट् ।**

सीमोक्तौ सत्या अवरस्मिन् कालविभागे भविष्यदनद्यतने च लृट् स्यात् । योऽयमापाटलिपुत्राद् गन्तव्यः पन्थास्तस्य यद् अवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे ।

४५. **कालविभागे चानहोरात्राणाम् ।**

सीमोक्तौ अहोरात्रसम्बन्धिहीने अवरस्मिन् कालविभागे लृडेव स्यात् । आगामिवत्सरस्य यदवरं वैशाख्यास्तत्र गयां यास्यामः । अनहोरात्राणामिति किम् ? आगामिमासस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे ।

४६. **परस्मिन् वा ।**

परस्मिन् कालविभागे भविष्यनद्यतने लृङ् वा स्यात् । आगामिवर्षस्याग्रहायण्याः परस्मिन् धर्म्मं श्रोष्यामः, श्रोतास्मः ।

४७ **लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।**

भविष्यति भूते च क्रियातिपत्तिः सम्भवति । तत्र हेतुफलयोरत्यन्तलिङ्विषये लृङ् । यदि वर्षं सहस्रमजीविष्य तदा पुत्रपौत्रादीनद्रक्ष्यम् । "अमङ्क्ष्यद्वसुधा तोयं यदि त्वं नाधरिष्यथाः ।"

---

४३. ननु क्रिया सामीप्ये वक्तव्ये कथं कालानामीत्युक्तम् ? मैवं क्रियासामीप्यमपि सम्भवत्काल निरपेक्षं न स्यादित्युक्तम्, कालानामिति । यथाकालमिति भूतानद्यतने लुङ्, भविष्यत्यनद्यतने लृट्, सर्वलकारापवादोऽयमित्येव कारेण सूच्यते ।

४४. चकारोऽद्यतनमनुवर्त्तयति । लृटो योग्यतया तस्य भविष्यत्वमित्याह भविष्यदनतन इति । अवरशब्दोऽत्र तत्कृतविभागपरः कालस्य वक्ष्यमाणत्वात् । विभागमात्रमत्रावसेयम् ।

४७. क्रियाया अतिपत्तिः, कुतश्चिद्वैगुण्यादनभिनिष्पत्तिः, तस्यां गम्यमानायां लिङ्निमित्ते हेतु-हेतुमत्तादौ लृङ् विधीयते । ननु भविष्यति भूते चेति सूत्रितं मुनिना, कथमत्र तयोर्लोपः इत्याहु भविष्यतीत्यादि, तथैव तस्य स्वभावात् । अत्यन्तेति व्यभिचाररहित इत्यर्थः : हेतुफलयोरित्युपलक्षणम् । यद्यन्नार्थी पथिकोहृष्टोऽभविष्यत् तदा उताभोक्ष्यते, अप्यभोक्ष्यते । पूर्व्वं निपातोप पदैश्च सर्व्वैः सम्बन्धमाभाषयतीह धातुरिति मते

यद्यहं नाथ नायास्यं विनसा हतबान्धवा ।
नाज्ञास्यत्वमिदं सर्व्वं प्रमाद्यंश्चारदुर्बलः ॥ इति भट्टिः ।

४८. आशेषाद् भूते वा ।

शेषशब्दमभिव्याप्य क्रियातिपत्तौ भूते लृङ् विकल्पनीयः । ततः परं नित्यमेव ।

४९. लडपिजात्वोः सर्वत्र गर्हायाम् ।

अपि जात्वोर्योगे कालसामान्ये गर्हायां लट् स्यात् । अपि भवान् वृषलं याजयति, मन्त्रे जातु वदन्त्यज्ञाः । अलिङ्विषयत्वाल्लृङ् नास्ति ।

५०. कथमि लिङ् च वा ।

कथमि सति गर्हायां लिङ् लट् च वा स्यात् । सः कथं वृषलं याजयेत्, याजयति वा । पक्षे यथाविहितञ्च, कथं याजयिष्यति, कथमयीयजत् इत्यादि । क्रियातिपत्तौ भूते लृङ् वा । त्वमाशङ्किष्यथाः कथम्, भविष्यति नित्यमेव ।

५१. किं-कतर-कतमेषु लिङ्लृटौ ।

किमादिषु सत्सु गर्हायां सर्वलकारापवादौ लिङ्लृटौ स्याताम् । को नाम कतरो नाम कतमो नाम वृषलं याजयेत्, याजयिष्यति । क्रियातिपत्तौ अयाजयिष्यत् ।

५२. अश्रद्धामर्षयोश्च ।

अनवकॢप्तौ क्रोधे च लिङ्लृटौ स्याताम् । न श्रद्दधे, नावकल्पयामि स राजसूयं याजयेत्, याजयिष्यति । न मर्षयामि दुर्ज्जनः पूजां लभेत्, लप्स्यते ।

---

४९. गर्हायां गम्यमानायां सर्वापवादकः कालसामान्य इति अभिहितः वृषलयाजनं गर्हैव । ननु कथम् "अपि सिञ्चेः कृशानौ त्वं दर्पं मय्यपि योऽभिकः" इति गर्हायां षत्वनिषेधे लिङः सर्व्वापवाधकत्वादस्य, सत्यम्, पदसंस्काराद् विधौ लिङ् ।

५०. अयमपि सर्वकालापबाधको विधिः । "प्रकुर्याम् वयं देशे गर्हा तत्र कथं रतिमति । कथं नाम भवांस्तत्र नावैति हितमात्मनः" इति च भट्टिः । अत्र नाम कुत्सायाम्, अहितो वेदनमेव गर्हाप्रतिपादकम् । क्रियातिपत्ताविति भूते वेत्यधिकृतम् क्रियातिपत्तिश्चेद्-विवक्ष्यते तदा भूते लृङ् स्यात् । "काकुत्स्थ ! दयितां साध्वीं त्वमाशङ्किष्यथाः कथम्" इति भट्टिः । साध्वी नाशङ्क्या, तदाशङ्कनमेव गर्हा, कथं शब्दादेव क्रियातिपत्तिप्रतीतिः । तात्पर्यार्थमाह, भविष्यति नित्यमेवेति विशेषाश्रयणात् ।

५३. किं किलास्त्यर्थयोर्लृट् ।

अनयोर्योगेऽश्रद्धादौ लृडेव स्यात् । किं किल स भवान जाल्मं याजयिष्यति, न श्रद्दधे न क्षमे अस्ति, भवति विद्यते, बधिरो वेदमध्येष्यते ।

५४. यद्-यदि-यदा-जातुषु लिङ् ।

एषु सत्सु लिङेव स्यात् । अश्रद्धादौ— "नावकल्प्यमिदं ग्लायेत्, यत् कृच्छ्रेषु भवानपि ।" न मर्षयामि यदि याजयेत् । जातु प्रमुह्येत् पण्डितो जनः । क्रियातिपत्तौ— न सहेय यूयमयाजयिष्यत ।

५५. यच्चयत्रयोर्गर्हायाश्च ।

अनयोर्योगे अश्रद्धामर्षयोर्गर्हायाञ्च लिङेव स्यात् । यच्च यत्र भवान् सीदेत्, नावकल्पयामि, न मर्षयामि विगर्हे । क्रियातिपत्तौ—यच्चायमकरिष्यत् ।

५६. आश्चर्य्ये ।

यच्च यत्रयोर्योगेऽद्भुते लिङेव स्यात् । आश्चर्यं यच्च यत्र भवान् याजयेत् । क्रियातिपत्तौ—चित्रं यत्रायं वेदमगास्यत् ।

५७. शेषे लृडयदौ ।

यच्च-यत्राभ्यामन्यास्मिन्नाश्चर्ये लृडेव स्यात् । अद्भुतमन्धो नाम गिरिमधिरोक्ष्यति, बधिरो नाम वेदमध्येष्यते । अयदाविवि किम् ? चित्रं यदि स भुञ्जीत, आश्चर्यं यदि सोऽभोक्ष्यत ।

५८. उताप्योर्लिङ् बाढ़ार्थे ।

बाढ़ार्थयोरुताप्योर्योगे लिङ् स्यात् । उत कुर्य्यात्, अपि कुर्य्यात् । भूते वेति निवृत्तम् । अतो भूते भविष्यति च क्रियातिपत्तौ लृङ् नित्यम्, उताऽकरिष्यत् ।

५९. शक्तिसम्भावनेऽलमप्रयोगे ।

शक्ति सम्भावने लिङेव स्यात् । अपि शिरसा गिरिं भिन्द्यात् । लृङि अपि— शैलमभेत्स्यत् । नालम्प्रयोगे—अलं हस्तिनं हनिष्यति ।

---

५५. "यच्च यत्र भवांस्तिष्ठेत् तत्रान्यो रावणस्य न । यच्च यत्र भवान् सीदेत् महद्भिस्तत् विगर्हितम्" इति भट्टिः । अत्र पूर्वार्द्धमश्रद्धामर्षयोरुदाहरणम्, गर्हायामन्यत् । वृत्तौ तु नावकल्पयामीत्यादि त्रयेणार्थत्रयं स्पष्टीकृतम् ।

५८. बाढार्थ इति किम् ? उत दण्डः भविष्यति । अपिधास्यति पातालम् । इह प्रश्नाच्छादनयोरुतापी ।

५९. शक्तिः समर्थना, तत्सम्भावने गम्ये अलं शब्दाप्रयोगे लिङ् विधीयते । "हस्तपुटेन सप्तसमुद्रानपि पिबेत्, अपि स्थाणुं जयेद्रामः" इति भट्टिः । अत्र

६०. **वा धातौ सम्भावनार्थेऽयदि ।**

सम्भावनार्थधातावुपपदे लिङ् स्यात् वा । सम्भावयामि अवकल्पयामि भवान् भुञ्जीत, भोक्ष्यते वा । अयदीति किम् ? न श्रद्दधे यत्स भुञ्जीत । लृङि—श्रद्दधे अभोक्ष्यत भवान् ।

६१. **हेतुफलयोः ।**

अनयोर्वर्त्तमानाद्धातोर्लिङ् वा स्यात् । दक्षिणञ्चेत् यायात् शकटं पर्य्याभवेत् । पक्षे लट् । नेह वर्षतीति धावति, इति शब्देनैव हेतुसम्भावनमस्य द्योतनात् । लृङि—दक्षिणं चेदयास्यत् शकटं पर्याभविष्यत् ।

६२. **इच्छार्थाद् वर्त्तमाने ।**

इच्छार्थाद् धातो वर्त्तमाने लिङ् स्यात् । इच्छति, इच्छेत्, वष्टि, उच्चात् ।

सर्व्ववर्माचार्यः (शर्ववर्म्मा) पञ्चमीं प्रणीतवान् । तथाहि समर्थनाशिषोश्चेति सूत्रे परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना । पर्वतमुत्पाटयामि, समुद्रमपि शोषयामि । कश्चिदाह समुद्रः शोषयितुमशक्यः । शक्तोऽहं समुद्रमपि शोषयामीति दुर्गः प्राह । एतन्मते—

निर्य्यत्स्फुलिङ्गाकुलधूमराशिं
किं ब्रूहि भूमौ पिनषां भानुम् ।
अदन्त निष्पीडितशीतमिन्दुं
ष्ठीव्य शुष्केक्षुलतास्थिकम् ।। इति भट्टिः ।

अत्र संप्रश्ने यत् पञ्चमीति यः कश्चिदाचष्टे तदसत् । "वृद्धस्य राज्ञा सुभृतैर्भवद्भिः सम्भावनायाः सदृशं यदुक्तम्" इति प्रहस्तवाक्यखण्डने सम्भावनाशब्दस्य संवर्धनार्थत्वे स्वोक्तविरोधात् । शक्तिसम्भावन इति किम् ? विदेशस्थायी प्रायेण गमिष्यति अलमप्रयोग इति किम् ? अलं मल्लो हन्ति, मल्लं निहनिष्यति ।

६१. हेतु-हेतुमद्भावार्थयोरित्यर्थः । अत्र हेतु हेतुमद्भावो वाक्यादवगम्यते । अस्यापि भविष्यद्विषयत्वमाह पक्षे लृङिति । इति शब्देन हेतु-हेतुमद्भावद्योतनादित्यमर्थः । पूर्व्ववाक्यस्य हेतुत्वं बोधयन्निति शब्दः परवाक्यस्य हेतुमत्त्वं द्योतयति, अतो न धातो हेतुफलयोर्वृत्तिः कथं लिङ् प्रसज्यते (तु) वर्त्तमाने तु लडेव—कुञ्जरो हिनस्ति । नरः पुरा गच्छति ।

६३. **इच्छार्थे विधि संप्रश्न-प्रार्थने च लिङ्लोटौ ।**

इच्छार्थे धातौ सति विध्यादौ च गम्ये धातोर्लिङ्लोटावेव स्याताम् । कामये त्वं भुञ्जीथाः, इच्छामि त्वं भुञ्जीथाः, इच्छामि त्वं भुङ्क्ष्व । विधिरज्ञातज्ञापनम्, नियोगतः करणञ्च । तत्राज्ञातज्ञापनं विधिदृष्टार्थोऽदृष्टार्थश्च । कृषिं कुर्य्यात् करोतु वा । स्वर्गकामो यजेत्, यजतु वा । नियोगो बहुविधः अधीष्टिरामन्त्रणं प्रैषश्च । तत्र सत्कारपूर्वको नियोगोऽधीष्टिः, गुरो ! मामध्यापयेः, अध्यापय वा । यदृच्छा नियोग आमन्त्रणम्, यथारुचि भुञ्जीत्, भुङ्क्तां वा । दण्डपूर्वको नियोगः, प्रैष स्तत्र लोट-कृत्याश्च वक्ष्यन्ते । नियोगतः करणं निमन्त्रणम् । श्राद्धादौ इह भवान् भुञ्जीत्, भुंक्तां वा । सम्प्रश्नः सम्प्रधारणम्, किन्तु तर्कमधीयीय, किन्नु वेदमध्यायै । प्रार्थने—लभेय भिक्षाम्, लभै वा ।

६४. **कामप्रवेदनेऽकच्चिति ।**

इच्छाप्रकाशने तौ स्याताम् । इच्छा मे कामो मे शृणुयाद् भवान् शृणोतु वा । अकच्चितीति किम् ? कच्चिज्जीवति ते पिता ।

६५. **प्रैषानुज्ञा-प्राप्तकालेषु लोट्-कृत्याश्च ।**

एषु लोट् कृत्याश्च भवन्ति । पृथग्लोड्ग्रहणं कृत्यसमावेशार्थम् । ग्रामं गच्छ, त्वया गन्तव्यो ग्रामः । अनुमतौ—एवं कुरु । कटकरणे प्राप्तस्ते कालः, कटं कुरु, कटस्त्वया कार्य्यः ।

---

६३. अत्र विधिनिमन्त्रणामन्त्रणाऽधीष्ट-सम्प्रश्न-प्रार्थनेषु लिङ् लोट चेति सूत्रद्वयं मुनिप्रणीतम् । ननु विध्याद्यर्थत्वाद्धातूना कथं लिङ्लोटौ स्याताम्, उक्तार्थत्वात् ? सत्यम्, विध्यादेरज्ञातज्ञापनाद्यर्थत्वे धातुनां तदर्थत्वाभावात् कथमुक्तार्थता । यद्येवं तेभ्यो विध्यादित्याभ्यो नियतं तावेव स्ताम्, कथमन्ये सम्भवन्तु ? सत्यम्, तेषां तदर्थाप्रतिपादकत्वे लडादयः ! यथा धर्म्मं विधत्त इत्यादयः ।

६४. काम इच्छा, तस्य प्रवेदनं प्रकाशनम्, तस्मिन् गम्ये लिङ्लोटौ भवतः ।

६५. प्रैषः प्रागुक्तलक्षणः । कर्त्तुमिच्छतोऽनुमतिऽनुज्ञा, चिकीर्षिताया क्रियायाः अवसरः प्राप्तकालः । एष्वर्थेषु गम्येषु लोट्, कृत्याश्च विधीयन्ते । ननुपूर्व्वसूत्रादनुवर्त्तमानो लोट् किमिति पृथक् गृह्यते ? न च वाच्यम्, लिङ्प्यनुवर्त्तताम् । क्वचिदेकदेशोऽप्यनुवर्त्तते इति न्यायात् तस्यैवानुवृत्तिरित्याह पृथक्लोडिति । कृत्यानां समादेशः समानविषयोऽर्थः प्रयोजनमस्येति स तथा कथं कृत्यसमावेशार्थो विधिः क्रियते ? यतः कृत्याः (४/१/८) इति सूत्रेण प्रैषादर्थे तदितरस्मिन्नर्थे च कृत्या विहिताः ? मैवम्, स सामान्यविधिनिर्द्दिष्टार्थत्वात् । अयन्तु निर्दिष्टविषयत्वाद् विशेषविधिः । ततस्तु सामान्यवि-

६६. **लिङ् चोर्द्धमौहूर्त्तिके ।**

ऊर्ध्वमौहूर्त्तिकेऽर्थे प्रैषादौ गम्ये लिङ्-लोट्-कृत्याश्च भवन्ति । ऊर्ध्वं मुहूर्त्तात् त्वं कटं कुर्य्याः, कुरु च, त्वया कटः कर्तव्यः ।

६७. **स्मे लोट् ।**

ऊर्ध्वमौहूर्त्तिके स्मयोगे प्रैषादौ गम्ये लोडेव स्यात् । ऊर्ध्वं मूहुर्त्तात् कटं करोतु स्म भवान् ।

६८. **अधीष्टौ च ।**

अध्येषणायां स्मयोगे लोडे स्यात् । अङ्ग स्म विद्वन्मां पाठय ।

३९. **काल-समय-वेलासु लिङ् यदि ।**

कालादियोगे यदि सति लिङ् स्यात् । कालोऽयं यदि त्वं भुञ्जीथाः, समयोऽयं, वेलेयम्, कालो भोक्तुमिति तुम्भविष्यति ।

७०. **अर्ह-शक्तयोः कृत्य-तृचश्च ।**

अर्हार्थे शक्तौ च लिङ्-कृत्य-तृचश्चस्युः । भवान् कन्यामुद्वहेत्, यूना कन्या वोढव्या, युवा कन्याया उद्वोढा ।

७१. **आशिषि लोङ्-लोटौ ।**

एतौ स्याताम् । कल्याणं वः क्रियासु, चिरंजीव ।

७२. **माङि लुङ् ।**

माङि, उपपदे सति लुङेव स्यात् । मा साहसं कार्षीः, मोज्जिजग्रहः स्वपौरुषम् ।

धिरुत्सर्गे ? विशेषविधिरपवाद इत्युक्तेरुत्सर्गापवादयोः (परि० ४८)इति । तद्-विषयमन्तरेण ते प्रवर्त्तिष्यन्ते, अतः समावेशार्थमित्युक्तम् । अतएव लोडिव धातुमात्रादेव कृत्याः क्वचित् प्रवर्त्तन्ते, यथा ऋचस्तुताविंत्यतोऽपि दृश्यते । यथा"प्रानर्च्चुरर्च्यां जगदर्च्चनीयम्" इति भट्टिः ।

६९. काल-समय-वेलासूपपदेषु यदि सति धातोर्लिङेव विधीयते । ननु कालन्समय-वेलासु तुमुन् लिङ्यदीतिसूत्रितं मुनिना इच्छार्थेष्वेककर्त्तृकेषु तुमुन् इति नियम्य "काल-समय-वेलाशक्तयर्थेषु चेति शर्व्ववर्म्मणा" लुङ्-लिटोरिति क्रमदीश्वरेण च । अधिज्यमायुधं कर्त्तुं समयोऽयं रघोः" इति कालिदासः तत्कथं भवता न सूत्रितम् ? इति मनसि कृत्याह कालो भोक्तुमिति । तुम् तादर्थ्ये भावस्येत्यनेन तुम्भावी किमत्र सूत्रेणेति भावः । अन्यत्तत्रैव विशिष्य व्याख्यास्यामः ।

७२. कथं भवतु, मा भविष्यतीति ? नायं माङ्, किन्तु मा-शब्दः ।

७३. **स्मपरे लङ् च ।**

स्म परे माङि सति लुङ्लङौ स्याताम् । मा स्म द्राक्षीत्, मा स्म पश्यत् ।

७४. **धातुसम्बन्धे प्रत्ययाः ।**

धात्वर्थसम्बन्धे सति भिन्नकाला अपि प्रत्ययाः सिध्यन्ति । अग्निष्टोमयाजी पुत्रोऽस्य जनिता, "वनं गतः श्वो भवितेति रामः" इति भट्टिः । गोमानयमासीत् । "वसन् ददर्शावतरन्तमन्वरात्" इति माघः ।

७५. **क्रियासमभिहारे लोट्-लोटो हिस्वौ वा च त-ध्वमोर्यथाविध्यनु च ।**

क्रियासमभिहारे धातोः कालत्रयेऽपि लोट् स्यात् । लोटस्तु हिस्वौ भवतः तौ च ध्वं विषये वा । यथाविध्यनु च । यस्माद् धातोर्लोट् विहितस्तस्यैवानुप्रयोगश्च । लुनीहि लुनीहि इत्येवायं लुनाति, अलावीत्, लविष्यति, न छिनत्त्याद्यनुप्रयोगः । ईदृगसौ त्वरावान् यदन्यानपि प्रेरयन् तां क्रियां स्वयमेव करोति । एवं लुनीत लुनीत इत्येवायं लुनाति । अधीष्व-अधीष्व इत्येवायम् अधीते । अध्यैष्ट, अध्येष्यते, अधीध्वम्, अधीध्वमित्येवायमधीते । ध्वं-विषये स्वो वा । अधीष्व अधीष्वेति वा । एवं परस्मैपदात्मनेपदिनोः (सर्व्वकाले) सर्वलकारे सर्ववचनेऽप्युन्नयेम् ।

---

७४ धातुं सम्बन्धोऽर्थद्वारक एवेत्याह धातुसम्बन्ध इति, धातुसम्बन्धे विशेष्यविशेषणलक्षणे स्वकालत्यागेन भिन्नकाला अपि प्रत्ययास्तिङ्कृत्-तद्धित विशेष्यधात्वर्थकाले सिध्यन्ति साधवो भवन्ति । अग्निष्टोमेति (४/१/८०) भूतविहित-णिन्-जनितेत्यनेन सम्बन्धे भविष्यति साधुर्भवति । वनं गत इत्यादि । अत्र वनं गत इत्यस्य भूतविहितस्य श्वो भवितेत्यनेन सम्बन्धे भविष्यति साधुत्वम् । गोमानित्यादि गावो विद्यन्तेऽस्येति गोमान् इति वर्त्तमानविहितस्य मतोरासीदित्यस्य च सम्बन्धे भूते साधुत्वम् । "वसन् ददर्श" इति अत्र वर्त्तमानविहितस्य लटः शतुर्ददर्शेत्यनेन सम्बन्धे परोक्षातीते साधुत्वम् । एवं दौवारिकः संपत्स्यते प्रायः स्वाद्यन्तं त्याद्यन्तकालमनुसरति । यदा तु स्वाद्यन्तं त्याद्यन्तस्य विशेषणं स्यात्तदा तस्यापि वाक्यार्थापेक्षया विशेष्यकालानुप्रवेशः सम्पद्यते । यथा "साटोपमुर्व्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोऽमी । तान्येकदेशान्निभृतं पयोधेः सोऽन्तांसि मेघान् पिबतो ददर्श" इति माघः । अत्र यैः प्लावयिष्यन्त्यस्य भविष्यदर्थस्य ददर्शेति सम्बन्धाद् भूतार्थावगतिरित्येके । यथा श्रुतमेव साधु इत्यपरे । ननु अग्निष्टोमयाजी पुत्रोऽस्य जनितेत्यथन्तमेवेदं वाक्यम्, वाक्यादुपोद्धृत्य पदानि यथास्वं काले संस्क्रियन्ते संस्कृतानि च तानि वाक्यार्थान्वयानुरोधेन विशेष्यप्रधानस्य पदस्य सम्बन्धे स्वकालान्यत्वं भजन्त एव श्वो गमिष्यतीतिवत्, तत् किमनेन लक्षणेनेति ? सत्यम्; प्रतिपत्तिगौरवनिरासार्थमेव ।

७६. समुच्चये वा सामान्यवचनस्यानु च ।

क्रियासमुच्चये पूर्वलोड्विधिर्वा स्यात् । अत्र सामान्यवचनस्यानुप्रयोगश्च । **खमटोर्व्वीमट**, इत्येत्रायमटति, इमावटतः, ओदनं भुङ्क्ष्व, सक्तून् पिब, धानाः खाद इत्येवायमभ्यवहरति, अभ्यवहारस्त्रिषु समः। पक्षे यथाप्राप्तञ्च । एवं सर्व्वेषु वचनेषु (सर्वकालेषु) उन्नेयम् ।

समाप्तः कालाधिकारः ।

---

७५. क्रियायाः समभिहारः पौनः पुन्यं, भृशार्थश्च, तस्मिन् गम्ये । अनधिकृतविशेषगत्वात् सर्व्वकालेऽपि धातोः सर्व्वलकारापवादो लोट् स्यात् । तस्य चाष्टादशसु वचनेषु प्राप्तेषु परस्मैपदात्मनेपदयोर्योग्यत्वात् हिस्वावादिश्येते । तावपि हि-स्वौ तविषये ध्वंविषये च वा स्याताम् । ततश्च यस्माद् धातोर्लोड् विहितस्तस्यैवानुप्रयोगः । ततो लडाद्याः प्रत्ययास्ततोऽनुप्रयोगादर्थविशेषः प्रतीयते । अत्रानुशब्दः सहार्थः, तेन सह प्रयुज्यत इत्यर्थः तेन लुनाति देवदत्तो लुनीहि लुनीहीति प्रयोगः। यथाविधीति प्रत्युदाहरति न छिनत्त्यादीति । पौनःपुन्यार्थं सङ्गमयन्नाह अयमर्थ इति । इदृक त्वरावान् देवदत्तो यदपरान् लोकान् प्रयुञ्जानस्तां स्वोपदिष्टाँ क्रियां करोति । तथा लुनीहि लुनीहीति लुनति, लुनासि, लुनामि, तथा अलावीत्, अलावीः, अलविषम् तथा लविष्यति लविष्यसि लविष्यामि। एवमन्यत्र । यदा तु पौनःपुन्ये धातुवृत्तिस्तदा भृशार्थोऽयं विधिरबाधित एवं । यथा लोलूयमानो लोलूयष्वेति लोलूयते ।

७६. एकत्रानेकप्रचयः समुच्चयः मेलक इति यावत् । इह प्रकरणात् क्रियेति लभ्यते, तेन क्रियाणां क्रिययोर्वा समुच्चयः क्रियासमुच्चयः, तस्मिन् सति धातोः सर्वलकारापवादो लोट् स्याद् वा । अतो न द्विर्वचनम् । तस्य चाष्टादशसु वचनेषु प्राप्तेषु परस्मैपदात्मनेपदयोर्योग्यत्वात् हि स्वादिश्येते, तावपि तध्वंविषये वा स्याताम् । अत्र सजातीयो वा विजातीयो वा सामान्योऽनुप्रयुज्यते । यथा—

"खमट द्यामटाटोर्व्वीमित्यटन्तोऽतिपावनाः ।
यूयमापो विजानीत चित्तवृत्तिं शुभां मम् ।।" इति भट्टिः ।

अत्रैकस्या अटनक्रियायाः साधनभेदाद्भिन्नायाः समुच्चये सजातीयानुप्रयोगः । विजानीतेति प्रार्थनायां लोट् आत्मनेपदे—

"जगन्ति धत्स्व धत्स्वेति दधती त्वं वसुन्धरे ।
अवेहि मम चारित्र्यं नक्तन्दिवमविच्युतम् ।।

इति भट्टौ जगन्तीति बहुवचनात् साधनभेदाद् धारणं क्रियायाः समुच्चयः । एवमोदनं भुङ्क्ष्वेत्यादौ सजातीयानुप्रयोग इत्याह अभ्यवहारस्त्रिषु सम इति । विजातीयानुप्रयोगे तु भट्टिः—

७७. लः कर्त्तृकर्म्मभावेषु ।

लकाराः कर्त्तरि कर्म्मणि भावे च भवन्ति । भवति । क्रियते कटः, क्रियेते कटौ, क्रियन्ते कटाः । भावे—भूयते । एको हि भावः केवलो धात्वर्थः ।

७८. लट्-लृटोस्तिप्-तस् अन्ति, सिप् थस् थ, मिप् वस् मस् । ते आते अन्ते, से आथे ध्वे, ए वहे महे ।

लट्-लृटोः स्थानेऽमी तिबादयः स्युः । भाति, भातः, भान्ति । भासि, भाथः, भाथ । भामि, भावः, भामः । शेते, शयाते, शेरते । शेषे, शयाथे, शेध्वे । शये, शेवहे, शेमहे । लृटः—पास्यति, पास्यतः, पास्यन्ति । दास्यते, दास्येते, दास्यन्ते, इत्यादि ।

७९. लोटस्तुप् ताम् अन्तु, हि तम् त, आनिप् आवप् आमप् । ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐप् आवहैप्, आमहैप् ।

लोटः स्थानेऽमी तुबादयः स्युः । पातु, पाताम्, पान्तु । पाहि, पातम्, पात । पानि, पाव, पाम । दत्ताम्, ददाताम्. ददताम् । दत्स्व, ददाथाम्, दध्वम् । ददै, ददावहै, ददामहै ।

८०. लिटो णल् अतुस् उस् । थल् अथुस् अ । णल् व म । ए आते इरे । से आथे ध्वे । ए वहे महे ।

लिटः स्थानेऽमी णलादयः स्युः । पपौ, पपतुः, पपुः । पपिथ पपाथ, पपथुः, पप, पपौ, पपिव, पपिम । ददे, ददाते, ददिरे । ददिषे, ददाथे, ददिध्वे । ददे, ददिवहे, ददिमहे ।

"वसान संहर दीप्यस्व ध्वान्तं जहि नभोभ्रमः ।
इतीहमानस्तिग्मांशो वृत्तं ज्ञातुं घटस्व मे ।।

इत्यत्र भिन्नानां क्रियाणां समुच्चयः । सर्वास्वेव क्रियासु चेष्टाया अवस्थितेर्घटतेः क्रियासामान्यवाचिनोऽनुप्रयोगः । तङि तु –"स्वर्गे विद्यस्व भूव्यास्व भुजङ्गनिलये भव । एवं वसंस्त्वमाकाशं संबुध्यस्व कृताकृतम्" इति । तध्वमयोर्यथा— "खमट द्यामटाटोर्व्वी" मित्येवं यूयमटत् । पक्षे खमटत् द्यामटत उर्व्वीमटतेति यूथमटथ । यद्वाखमटथ द्यामटाथोर्व्वीमटथेति यूयमटथ च । छन्दोऽधीष्व, व्याकरणमधीष्व, निरुक्तमधीष्वेति यूयमधीध्वे । पक्षे छन्दोऽधीध्वम्, व्याकरणमधीध्वम् इति यूयमधीध्वे । छन्दोधीध्वे व्याकरणमधीध्वे निरुक्तमधीध्वे इति यूयमधीध्वे । एवमन्यत्र ।

७७. भावे भूयते । कथमत्र द्विवचनबहुवचने न स्तः ? इत्याह एको हि भाव इति । हि शब्दो हेतौ, भावस्यैकत्वादेकवचनमेव । कस्तावद्भाव इत्यपेक्षायामाह केवलो धात्वर्थ इति । केवलसत्तावचनः ।

८१. विदो लटो वाऽदितो नव ।

वेत्तेर्लट आदितो नव णलादयो वा स्युः । वेद, विदतुः, विदुः । वेत्थ, विदथुः विद । वेद विद्व विद्म । पक्षे वेत्तीत्यादि ।

८२. ब्रुवः पञ्चाऽऽहश्च ।

ब्रुवो लट् आदितः पञ्च णलादयो वा स्युः । ब्रुव आहोऽऽदेशश्च । आह, आहतुः, आहुः, आत्थ, आहथुः । पञ्चेति किम् ? ब्रूथ । पक्षे ब्रवीतीत्यादि ।

८३. लुटस्ता तारौ तारस् । तासि तास्थस् तास्थ । तास्मि तास्वस् तास्मस् । ता तारौ तारस् । तासे तासाथे ताध्वे । ताहे तास्वहे तास्महे ।

लुटः स्थानेऽमी तादयः स्युः । कर्त्ता, कर्त्तारौ, कर्त्तारः । कर्त्तासि, कर्त्तास्थः कर्त्तास्थ । कर्त्तास्मि कर्त्तास्वः कर्त्तास्मः । कर्त्तासे, कर्त्तासाथे, कर्त्ताध्वे । कर्त्ताहे, कर्त्तास्वहे, कर्त्तास्महे ।

८४. लुङ्-लृङ्-लृङां दिप् ताम् अन्, सिप् तम् त, अम् व म । त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ।

लुङ्-लङ्-लृङां स्थाने प्रत्येकं दिबादयः स्युः । दिप्सिपोरिकारपकारौ चिह्नार्थौ । अभूत्, अभूताम्, अभूवन् । अभूः, अभूतम्, अभूत । अभूवम्, अभूव, अभूम । अकृत, अकृषाताम् । अकृषत । अकृथाः अकृषाथाम्, अकृढ्वम् । अकृषि, अकृष्वहि, अकृष्महि । लङः खल्वपि, अभवत्, अभवताम्, अभवन् । अभवः, अभवतम्, अभवत । अभवम्, अभवाव, अभवाम । अवर्द्धत, अवर्द्धेताम् अवर्द्धन्त । अवर्द्धथाः इत्यादि । लृङ्—अभविष्यत्, अभविष्यताम्, अभविष्यन् । अवर्द्धिष्यत, अवर्द्धिष्येताम्, अवर्द्धिष्यन्त इत्यादि ।

८५. लिङो यात् यातम् युस् । यास् यातम् यात । याम् याव याम । ईत् ईयाताम् ईरन् । ईथास् ईयाथाम् ईध्वम् । ईय ईवहि ईमहि ।

लिङः स्थाने यादादयः स्युः । भवेत्, भवेताम्, भवेयुः । भवेः, भवेतम्, भवेत । भवेयम्, भवेव, भवेम । वर्द्धेत, वर्द्धेयाताम्, वर्द्धेरन् । वर्द्धेथाः वर्द्धेयाथाम्, वर्द्धेध्वम् । वर्द्धेय वर्द्धेवहि वर्द्धेमहि ।

८६. लोङो यात् यास्ताम् यासुस् । यास् यास्तम् यास्त । यासम् यास्व यास्म । सीष्ट सीयास्ताम् सीरन् । सीष्ठाम् सीयास्ताम् सीध्वम् । सीय सीवहि सीमहि । किच्चाद्यर्द्धम् ।

लोङः स्थानेऽमी यादादयः स्युः । आद्यर्द्धं कित्संज्ञं स्यात् । ङकारस्तिङिति प्रत्याहारार्थः । भूयात्, भूयास्ताम्, भूयासुः । भूयाः, भूयास्तम्, भूयास्त । भूयासम्, भूयास्व, भूयास्म । वर्द्धिषीष्ट, वर्द्धिषीयास्ताम्, वर्द्धिषीरन् । वर्द्धिषीष्ठाः वर्द्धिषीयास्ताम् वर्द्धिषीध्वम् । वर्द्धिषीय, वर्द्धिषीवहि, वर्द्धिषीमहि ।

८७. लस्तिङि पूर्व्वार्द्धं शतृक्वसू च परस्मैपदम् ।

तिङि विषये लादेशानां पूर्व्वार्द्धं नवकं, शतृक्वसू च परस्मैपदसंज्ञकाः स्युः । परस्मैपद प्रदेशाः—शेषात् कर्त्तरि परस्मैपदमित्यादयः ।

८८. परार्द्धमानश्चात्मने पदं तङ् च ।

ङिति विषये लादेशानां परार्द्धं, शानकानयोरानश्च, ते द्वे आत्मनेपदसंज्ञके भवतः, तङ् संज्ञके च ।

८९. लुङः सिजातोऽन्‌ः उस ।

सिजन्तादन्ताच्च लुङोऽन उसादिष्यते । अकाषुः, अस्थुः । सिजात इति किम्? अभूवन् ।

९०. लङोऽभ्यस्तविदो गुणश्चैकः ।

अभ्यस्तसंज्ञकादिविदश्च लङोऽन उस् स्यात् । इगन्तस्य गुणश्च । अजुहवुः, अदधुः, ऐयरुः, अजक्षुः, अजागरुः, अशासुः, विद—अविदुः अविदन्नित्येके ।

९१. अनभ्यस्ताद्विषो वा ।

अनभ्यस्योतो द्विषश्च लङोऽन उस् स्याद् वा । अयुः, अयान् वा । अद्विषुः, अद्विषन् वा ।

९२. उस्यातो लुक् ।

अन उसि परे आतो लुक् स्यात् । अदुः, अददुः ।

९३. अन्तोऽदभ्यस्तात् ।

अभ्यस्तात् परस्यान्तः स्थानेऽद्भवति । जुह्वति, बिभ्यति, जक्षतु, बोभूवतु ।

९४. तङ् यनतः ।

आत्मनेपदेऽनदन्तात् परस्यान्तस्थानेऽद्भवति । आघ्नते, व्यतिभाते, ददताम्, व्यक्रीणत, अकुर्व्वत, अवर्द्धिषत । अनत इति किम् ? च्यवन्ते ।

---

८७. ल इति षष्ठयेकवचनान्तं पदं, जातिकृतमेव वचनम्, सूत्रे लिङ्ग्वचनमतन्त्रमिति वा । नन्वत्र लकाराणां कथं विषयस्तिङ् व्याप्याव्यापकसम्बन्धे तत्सम्बन्धादिति । लपदेन लादेशो लक्षितस्ततोऽशीत्यधिकशतसंख्यानां लादेशानां त्यादीनां पूर्व्वार्द्धं नवतिसंख्याकं शतृक्वसू च लट्लिटादिष्टौ परस्मैपदमुच्यते । अत्र (४/४/६) इति चतुर्थ्यलुक्, अत एव ज्ञापकात् समासश्च । ननु यदि ल-शब्दलक्षितैः लादेशैरिष्टिसिद्धिः ? किमन्तर्गडुना तिङित्यनेन सत्यम्, विषय-विषयिभाव-तात्पर्यानुपपत्तेर्लक्षणबीजत्वख्यापनार्थं तिङित्युक्तम् ।

८९. सिजात इति समाहारद्वन्द्वः । ननु किमिहि सिचिर क्षरणे उत सिच्-विकरणः ? न सिजात इति तृतीयकरणात् विकरण एव, धातौ तु सन्धिर्नेष्यते प्राय इत्याह सिजन्तादिति । अथ सिच् साहचर्यादादन्तादपि लुङोऽन उस् भविष्यति किं लुङ् इत्यनेन ? सत्यम्, स्पष्टार्थमेव । ननु अस्थुरित्यादौ सिचो लुकि (१/१/३३) न लुब्लुका इति निषेधात् कथमन उस स्यात् ? मैवम्, तत्र सप्तमीनिर्देशात् पूर्व्वस्य तक्षलक्षणं निषिध्यते, न परस्येत्येके । स्वमते तु आदन्तादेव विधिः ।

९५. **शीङोरत् ।**

शीङः परस्यान्त स्थाने रद् भवति । शेरते, शेरताम्, अशेरत ।

९६. **वेत्तेर्वा ।**

तङि वेत्तेरन्तो रद् भवति वा । संविद्रते, संविदते, समविद्रत, समविदत ।

९७. **भुवो वुगचि लुङ्-लिटोः ।**

अनयोरचि भुवो वुक् स्यात् । अभूवन्, अभूवम्, बभूव । अस्थानित्त्वान्न लिडामि, बोभूवाञ्चकार ।

९८. **दीङो युग् लिटि ।**

लिडचि दीङो युक् स्यात् । उपदिदीये ।

९९. **आत औ णलः ।**

आदन्ताण्णल स्थाने और्भवति । ययौ, पपौ, ववौ ।

१००. **तुह्योस्तातङशिषि वा ।**

आशिषि विषये तु-हि स्थाने तातङ् वा स्यात् । करोतु, कुरुतात्, पुषाण, पुष्णीतात् ।

१०१. **जेस्त्वहन्त्वोऽन्त इत् ।**

जेर्लोटन्त्वोरऽन्त इत् स्यात् । जयति, जयन्ति ।

१०२. **अतो येद् यामियञ्च ।**

अतः परो लिङो या इत् स्यात्, याञ्च इयम् । भवेत्, भवेयम् । अत इति किम् ? पुनीयात् ।

१०३. **आदिदपित् ।**

अतः पर आकार इत् स्यात् । पचेते यजेताम् । अपिदिति किम् ? यजावहै, यजामहै । अत इत्येव व्यतिभाते ।

१०४. **अतो दीर्घो व-मि ।**

वकार-मकारयोः परतोऽतो दीर्घो भवति । भवामि, भवावः, भविष्यामि ।

---

९७. ककारोऽगुणार्थः । बभूवेति लिटो णलि कथमिह न वृद्धिः परत्वात् ? नैवम्, सावकाशनिरवकाशयोर्निरवकाशविधिर्बलवानिति न्यायादयमेव प्रवर्त्तते । बभूवुरित्यादौ असिद्ध (परि० ४२) इति न्यायाद् भवति । प्रत्युदाहरति न लिडामीति । आमि लिटोऽस्थानिवत्त्वात् । वेति नानुवृत्तम् ।

१०२. इह याम्-साहचर्यात् यादिति लिङोऽनुगृह्यत इत्याह लिङ इति ।

१०४. वमीति समाहारद्वन्द्वः । कथं पचमानः अपचमित्यादौ दीर्घो न स्यात् । सत्यम्, वकारस्य प्रत्ययादेः साहचर्यान्मकारोऽपि तथा गृह्यते, न त्वन्यः, यावत् सम्भवः (परि० ६९) इति न्यायात् करिष्यामि ।

१०५. **युस्येत् ।**

युसि परे अत एत् स्यात् । भवेयुः । दीव्येयुः । अत इत्येव । पुनीयुः ।

१०६. **प्रकृतीचः सीध्वं लुङ्-लिटां-धो ढो यण्हस्थेणि-टो वा च ।**

प्रकृतेरिचः परेषां सीध्वं लुङ्लिटां धस्य ढः स्यात् । च्योढ्वम्-कृषीढ्वम् । लुङ्—अच्योढ्वम् । लिट्—चकृढ्वे । यण् इकारस्थादिण् इटश्च विकल्पेन, यायिषीढ्वम्—यायिषीध्वम् वा । अकारिढ्वम्—अकारिध्वम् वा । अग्राहिढ्वम्, अग्राहिध्वं वा । इट्—लविषीढ्वम्, लविषीध्वं वा । दिदीयिढ्वे, दिदीयिध्वे वा । जगृहिढ्वे—जगृहिध्वे । इच इति किम् ? भित्सीध्वम् । यण्हस्थेति किम् ? आसिषीध्वम् ।

१०७. **दयाऽऽस्-काश्-अय्-अनेकाच्-प्रत्ययेभ्यो लिडाम् कृभ्वस्ति लिट् चानु ।**

दयादिभ्यः परस्य लिट आम् स्यात् । कृ-भ्वस्ति विहितो लिट् चानुप्रयुज्यते । दयाञ्चक्रे, आसाम्बभूव, दरिद्राञ्चकार, चुलुम्पाञ्चकार, चुलुम्पः सौत्रो धातुः । प्रत्ययान्तात्—चिकीर्षाम्बभूव, बोभूवाञ्चक्रे, कारयाम्बभूव । व्यवधानेऽपि दृश्यते, "तं पातयाम्प्रथममास पपात पश्चात् ।" पुत्रीयाञ्चकार, शब्दायाम्बभूव, कण्डूयामास, अनेकाच्त्वेन सिद्धे प्रत्ययग्रहणमेकाजर्थम्, विस्पष्टार्थञ्च । (तेन) विप—स्वाञ्चाकार ।

१०८. **गुर्व्विजादेरनृच्छोर्णोः ।**

गुरुरिच् आदिर्यावतः ततो लिट् आम् स्यात् । कृभ्वस्तिलिट् चानुप्रयुज्यते । ईहाञ्चक्रे, उम्भाञ्चकार, इन्धाम्बभूव । छन्दसि न लोपात्—समीधे । अनृच्छोर्णोरिति किम् ? आनर्च्छ, प्रोर्णुनाव । गुर्व्विजादेरिति किम् ? इत्येष ।

---

१०७. कृभ्वस्ति विहितो लिडिति मध्यमपदलोपी समासः । भाष्ये तु दरिद्रातेराम् विकल्पित, व्यवधानेऽपीति, पदान्तरव्यवधानेऽप्यनुप्रयोगः क्वचिदिष्यतेऽभिधानात् यथा, "तं पातयां प्रथममास पपात पश्चात् । संयोजयां विधिवदास समेतबन्धुः" कन्यामयेन कुमुदः "कुलभूषणेन" इति च रघुः । अयमसाध्वित्यन्ये ।

१०८. ततो धातोरित्यर्थः । न च वाच्यम् कथमुञ्झाञ्चकारेति नुमि सति धातुत्व विधानात् । समीध इति छान्दसम्, तेन इन्धो वेति न वक्तव्यम्, व्यवस्थितविभाषया गुर्व्विजादेरित्यस्य विधेरनित्यत्वात् । ईहे, ऋजिधातोरानृञ्ज इति च भवतीति धातुपारायणकारैरुक्तम् । "समीहे मर्त्तुमिति" भट्टौ च दृश्यते, तथापि सद्भिर्नाद्रियते । अनित्यत्वस्य भाष्यकृतोऽनङ्गीकृतेः । अनृच्छोर्णोरिति समाहारेऽपि सूत्रे लिङ्गवचनमतन्त्रम् (परि० ८०) इति पुंस्त्वम्) ।

१०९. उष-जागृ-विदो वा वेरगुणश्च।

एभ्यो लिट् आम् स्याद् वा। कृभ्वस्तिलिट् चानुप्रयोगः। ओषाञ्चकारः उवोष। जागरामास, जजागार। विदेरगुणश्च—विदाञ्चकार, विवेद।

११०. भी-हृ-भृ-हुवो द्विरत इच्च।

एभ्यो लिट् आम् वा स्याद्। कृभ्वस्ति लिट्चानुप्रयुज्यते। द्वित्वमत इच्च। बिभयाञ्चकार—बिभाय। जिह्रयाञ्चकार—जिह्राय। अत इच्च—बिभरामास—बभार। जुहुवाञ्चकार—जुहाव। एषां द्विरिति करणं खलु ज्ञापकम् अन्येषां लिडामि कृते द्वित्वं न भवतीति। आमादेशे कृते लिटो न स्थानिवत्त्वम्।

१११. विदाङ्करोत्विति लोटि वा।

विदे लोटि इति वा निपात्यते। इति शब्दः प्रकारार्थः, तेन सर्व्ववचनान्येव भवन्ति। विदाङ्करोतु, विदाङ्कुरुताम्, विदाङ्कुर्वन्तु, विदाङ्कुर्व्वित्यादि। पक्षे वेत्तु, वित्ताम्, विदन्तु।

११२. अथ धातोर्व्विकरणाः।

अधिकारोऽयम्।

११३. लृङ्-लृटोः स्यः।

लृङि लृटि च परे धातोः स्यः प्रत्ययः स्यात्। अभविष्यत्, भविष्यति।

११४. लुङि सिच्।

लुङि परे धातोः सिच् प्रत्यय स्यात्। अचैषीत् अकार्षीत्।

११५. स्पृश-मृष-कृष-तृप-दृपो वा।

एभ्यो लुङि सिच् स्याद् वा। अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्। अत्राप्सीत्, अतार्प्सीत्—अतृपत्। एवं सर्व्वत्र।

११६. गाति-स्था-घु-पिबति-भूभ्योऽतङि लुक्।

एभ्यः परस्मैपदे सिचो लुक् स्यात्। इणिकोर्गा, अगात्। अस्थात्। घु—अदात्, अधात्, अपात्, अभूत्। गातिपिबतीति किम्? गै-गाने—अगासीत्, पा-रक्षणे—अपासीत्। अतङीति किम्? अगायिषाताम्।

---

११०. कृद्भ्वस्ति लिट् चानुप्रयुज्यते। द्विष् (:) क्रियते, द्विरुक्तस्य इच्च विधीयते सान्निध्यात्। अत इति किम्? जुहुवाञ्चकार। ननु लिटि द्वित्वं विधास्यते, तत् किं पुनरत्र द्विरुच्यत इत्याह एषामित्यादि। द्विरितिकरणं द्विर्वचनविधानम्, अन्येषां लिडामि द्विवचनं नास्तीति बोधयति, नियमो वा, एषामेव लिडामि कृते द्विर्वचनं नान्येषाम्।

१११. विदाङ्करोतु प्रकाराणि पदानि श्रुतत्वाद्वेत्तेर्लोड्विषये विभाष्यन्ते।

११६. अर्थादविभक्तिपरिणामः (परि० ३२) इति न्यायात् प्रथमान्तोऽपि षष्ठ्यन्ततया विपरिणम्यते।

११७. घ्रा-धे-शाच्छासो वा ।

एभ्योऽतङि सिज्लुग् वा स्यात् । अघ्रात्—अघ्रासीत् । अधात्—अधासीत् । अशात्—अशासीत् । अच्छात् अच्छासीत् । असात्—असासीत् ।

११८. तनादेस्थासोरकृञ् ।

एभ्यस्तथासोः परयोः सिज्लुग्वा स्यात् अतत, अतथाः, अतनिष्ट, अतनिष्ठाः । सनु—असात, असनिष्ट । असाथाः, असनिष्ठाः । करोतेस्तु परेण नित्यमेव—अकृत, अकृथाः ।

११९. ह्रस्वझलो झलि लोपोऽनागमात् ।

ह्रस्वान्ताज्झलन्ताच्च झलि परे सिचो लोपः स्यात् । वेति निर्वृत्तम् । आहत । समस्कृथाः । झलः -अभित्त, अबुद्ध, अभैत्ताम्, अवात्ताम् । अपाक्ताम् । ह्रस्वेति किम् ? व्यजेष्ट । झल इति किम् ? सममंस्त । झलीति किम् ? आहसाताम् ? अनागमादिति किम् ? अकारिष्ठाः ।

१२०. इट-ईटि ।

ईटि परे इट उत्तरस्य सिचो लोपः स्यात् । व्यकारीत्, मा रोदीः अवादीत् ।

१२१. श-ष-ह-इगुपान्ताददृशोऽनिटः क्सः ।

श-ष-हान्तात् इगुपधाद् धातोर्लुङि क्सः स्यात् । सिचोऽपवादः । अदिक्षत्, अद्विक्षत्, अघुक्षत् । अदृश इति किम् ? अद्राक्षीत् । अनिट इति किम् ? अमोषीत् ।

१२२. श्लिष आलिङ्गने ।

श्लिषः क्सः स्यात् । अश्लिक्षत् कन्याम् । आलिङ्गन इति किम् ? समाश्लिषत् जतु च काष्ठञ्च ।

१२३. लुग्वा दुह-दिह-लिह-गुहां त-थ-धवेषु तङि ।

दुहादेस्त थ-धवेषु परतस्तङि क्सस्य लुग्वा स्यात् । अदुग्ध, अधुक्षत । अदिग्धाः, अधिक्षथाः । अलीढ्वम्, अलिक्षध्वम् । अगुह्वि, अघुक्षावहि । ईषत् पृष्टतरवकारोऽयं तेनाझल्परत्वात् ढत्वाभावः, दुहेश्च घत्वं नास्ति; अदुह्वहि, अधुक्षावहि ।

---

१२३. धार्म्मिकल्पनातो धर्म्मकल्पना लघीयसीति न्यायात् क्सः षष्ठ्यन्ततया विपरिणमते । ननु कथमगुहीतित्यादौ । होढो दादस्तु घः (२/३/१०८) इति हस्य ढो न स्यात् ? इत्याह ईषत्स्पृष्टतर इत्यादि दन्त्यौष्ठ्यवकारः, यो वः प्रत्ययसन्धिज इति न्यायात् ।

१२४. णि-श्रि-द्रु-स्तु-कमः-कर्त्तरि चङ ।

ण्यन्तादेर्लुङि कर्त्तरि चङ् स्यात् । णेः—अशिश्वयत्, अचीकरत् । श्रि—अशिश्रियत्, द्रु—अदुद्रवत्, असुस्रवत्, अचकमत । अकर्त्तरीति किम् ? अकारयिषातां कटौ तेन।

१२५. धेश्विभ्यां वा ।

धेटः श्वयतेश्च लुङि चङ् वा स्याद् । अदधत्—अधासीत्—अधात् । अशिश्वियत्—अश्वयीत्-अश्वत् । कर्त्तरीत्येव– अधिषातां गावौ वत्सेन ।

१२६. ऋ-सृ-शास्वह-सु-ख्यावचोऽङ् ।

एभ्यः कर्त्तरि लुङ्यङ् स्यात् । आरत्, समारन्त, असरत्, अशिषत्, आस्थत्, पर्य्यास्थत्, आख्यत्, अवोचत् ।

१२७. ह्वा-लिपि-सिचः, तङि वा ।

एभ्यो लुङि अङ् स्यात् । आह्वत्, अलिपत्, असिचत् । तङि वा । आह्वत—आह्वास्त । अलिपत-अलिप्त । असिचत-असिक्त ।

१२८. लृदिद्-द्युत्यादिपुषादिभ्योऽतङि ।

लृदितो द्युतादेः पुषादेश्च परस्मैपदे लुङि अङ् स्यात् । अगमत्, अशकत् । अघसत् । द्युतादेः—व्यद्युतत्, अश्वितत्, अपुषत्, अशुषत् । पुषादिर्दिवाद्यन्तर्गणः, तेनान्यत्र—अपोषीत् ।

---

१२६. शास्ति सहचरितावर्त्ति-सर्त्ती अविकरणौ । असु क्षेपणे, उकारेत, अस् भुविगतिदीप्त्यादानेषु इत्याभ्यां मा भूदिति विहितः । ख्या प्रकथने, चक्षिङ् ख्याञ् उभयोरिह ग्रहणम्, तत्र भाविनि (परि० ३३) इत्यस्य वक्ष्यमाणत्वात् । एवं वच भाषणे ब्रुवो वाचेर्द्वयोरनयोर्ग्रहणम् । अङः ङकारोऽगुणार्थः । अथ कातन्त्रैः पुषादिसूत्रे परस्मैपदग्रहणात् परस्मैपद एवआङ् भवितुमर्हति तत् कथं भट्टौ 'समारन्त ममाभीष्टा'' इति प्रयोगः ? मैवम्, अत्र विशेषात् । तर्हि कातन्त्रविरुद्धमिति चेन्नैवम्, अर्त्तेरात्मनेपदेऽप्यण् पक्षे वक्तव्य इति दुर्गटीकायामप्युक्तमित्याह समारन्त इति समोदृष्यर्त्ति (३/१७३) इत्यादिना तङ् । अथ पुषादित्वादङि सिद्धे किमित्यस्य ग्रहणेनेत्याह पर्य्यास्थन्तेति, (अस्त्यूहः ३/१/७७) इत्यात्मनेपदे कृतेऽपि यथास्यादिति भावः । भौवादिकाभ्यां तु सृगतौ ऋ-गति-प्रापणयोरित्याभ्यां सिच् स्यात् । आसार्षीत्, आर्षीत्, इहाविशेषित ऋ-स्रोर्ग्रहणमिति वासवताः । नैतच्चन्द्रस्य सम्मतम् ।

१२९. इरिज्जृ-श्वि-स्तम्भु-म्रुचु-म्लुचु-ग्लुञ्चो वा ।

इरिदादिभ्यो लुङ्यङ् वा स्यात् । अभिदत्, अभैत्सीत् । अजरत्-अजारीत् । अश्वत्-अश्वयीत्-अशिश्वियत् । अस्तभत्-अस्तम्भीत् । अम्रुचत्-अम्रोचीत् । अम्लुचत्-अम्लोचीत् । अग्रुचत्-अग्रोचीत् । अग्लुचत् अग्लुञ्चीत् (अग्लोचीत्) । केचिद् ग्लुञ्चेर्नलोपं नेच्छन्ति, तन्मते—अग्लुञ्चदिति ।

१३०. श्विवचोरङि श्ववोचौ ।

अनयोरङि श्व-वोचौस्याताम् । अश्वत्, अवोचत् ।

१३१. अस्यतेरस्थः ।

अस्यतेरङि अस्थः स्यात् । आस्थत् ।

१३२. पते पुम् ।

पतेरङि पुम् स्यात् । अपप्तत् ।

१३३. इण् ते पदः ।

लुङि तकारे परतः पद्यतेरुत्तरे कर्त्तरि इण् स्यात् । उदपादि शस्यम् । त इति किम् ? उपपत्साताम् ।

१३४. दीप-जन-बुध-पूरि-तायि-प्यायो वा ।

दीपादेर्लुङि त-भूते इण् वा स्यात् । क्रुद्धोऽदीपि-अदीपिष्ट । अजनि-अजनिष्ट । अबोधि-अबुद्ध । अपूरि-अपूरिष्ट । अतायि-अतायिष्ट । अप्यायि-अप्यायिष्ट ।

१३५. कर्म्मकर्त्तरि न रुध-तपोर्व्वा च दुहाचोः ।

वक्ष्यमाण इण् कर्म्मकर्त्तरि रुध-तपोर्नस्यात् । वा च दुहाचोः । अरुद्ध गौ स्वयमेव । अतप्त तपः स्वयमेव । दुहेरजन्तस्य च वा, अदुग्ध गौः स्वयमेव, अदोहि वा । अकृत कटः स्वयमेव, अकारि वा । अलविष्ट केदारः स्वयमेव अलावि वा । इह विकरणस्य निषेधो नागमस्येणः, अकारिषाताम् ।

१३६. णि-स्नु-णम-श्रन्थि-ग्रन्थि-ब्रू-किरादि-सनाऽऽत्मनेपदाऽकर्म्मकाणां न यगिणौ ।

ण्यन्तादेः कर्म्मकर्त्तरि यगिणौ न स्याताम् । अत्र पारिशेष्यात् कर्त्तरिविहित-विकरण एव । कारयते कट स्वयमेव (अचीकरत कटः स्वयमेव) । प्रस्नुते गौः स्वयमेव, प्रोस्नोष्ट स्वयम् । नमते दण्डः स्वयमेव, अनंस्त स्वयमेव । श्रन्थते माला स्वयमेव, अश्रन्थिष्ट स्वयम्, ग्रन्थते माला स्वयमेव अग्रन्थिष्ट स्वयम् । ब्रूते कथा स्वयमेव, अवोचत स्वयम् । किरते हस्ती स्वयमेव, अकीर्ष्ट स्वयमेव । सनन्तात्—चिकीर्षते कटः स्वयमेव, अचिकीर्ष्ट स्वयम् । तङधिकारे येऽकर्मकास्तेषाम्, विकुर्व्वते सैन्धवाः स्वयमेव, स्वयमश्वो व्यकृत । कथं चेतांसि विक्रियन्ते? व्यवस्थितविभाषानुवृत्तेः ।

---

१३०. इह श्वि वचोरदोतावितिसिद्धे यत् श्वोचावित्युक्तं तत्तु स्पष्टार्थम्, शासः शिसङ् हलोरनाङ् इतिवत् ।

१३६. णिच् परिशेषितः । ष्णु प्रस्रवणे, णम् प्रह्वत्वे, अयमन्तर्भूतण्यार्थो बोद्धव्यः, श्रन्थ मोचनप्रतिहर्षणयोः, ग्रन्थ सन्दर्भे क्र्यादिः, श्रन्थ-ग्रन्थ सन्दर्भे युजादौ, णिजभावपक्षे श्रवन्थि ग्रन्थि कौटिल्ये भूवादौ, द्वयोरप्यत्र ग्रहणमिति मैत्रेय-रक्षितः । ब्रूञ् व्यक्तायां वाचि । किरादय पञ्च, तद् यथा—कॄ विक्षेपे, गॄ

१३७. दुहेर्न यक् ।

दुहेर्यक् न स्तात् । दुग्धे गौः स्वयमेव, लङ्—अदुग्ध गौः स्वयमेव ।

१३८. कुषिरञ्जोर्यकि वा परस्मैपदम् ।

अनयोः कर्म्म कर्त्तरि यग्विषये परस्मैपदं वा स्यात् । कुष्यति पादः स्वयमेव, कुष्यते वा । रज्यति वस्त्रं स्वयमेव, रज्यते वा । स्वयमन्वरज्यदतुषारकरः ।

१३९. कर्म्मस्थ धात्वर्थे कर्म्मवत् कर्म्मकर्त्ता ।

कर्म्मस्थायां क्रियायां सत्यां कर्म्मणा तुल्यक्रियः कर्त्ता कर्म्मवद् भवति । इण्—यगात्मनेपदार्थम् । अपाच्योदनः स्वयमेव । भिद्यते कुशूलः स्वयमेव । कर्म्मस्थ इति किम् ? कर्त्तृस्थे मा भूत, गच्छति ग्रामः स्वयमेव । कथं कर्त्तृस्थे आरोहयते हस्ती हस्तिपकं स्वयमेव, विशेषविधानात्तङ् । क्वचित् दुहिपच्योः सकर्म्मकयोः कर्म्मवत् । दुग्धे गौ क्षीरं स्वयमेव । उदुम्बरो लोहितं फलं पच्यते । क्वचित् करणे तुल्यक्रियः कर्ता कर्म्मवत्, परिवारयति कण्टकैर्वृक्षं जनः, परिवारयन्ते वृक्षं कण्टकाः स्वयमेव ।

निगरणे, दृङ् अनादरे, धृङ् अनवस्थाने, प्रच्छ ज्ञीप्सायाम्, सनन्ताः—आत्मनेपदे अकर्म्मकाः आत्मनेपदनिमित्तमकर्म्मकत्वं येषामित्यर्थः । एषां कर्म्मवद् भावे यगिणौ न स्तः । तर्हि किं स्यादित्यपेक्षायामाह अत्रेति । अत्र वत्करणस्याश्रयार्थत्वम् वक्ष्यते कारयते कटः स्वयमेवेत्यन्तरं अचीकरत कटः स्वयमेवेति वाच्यम् । ब्रूते कथेति—अत्र ब्रवीतेः कर्त्तृस्थक्रियत्वेऽपि अन्तर्भावितण्यर्थत्वात् कर्म्मस्थक्रियत्वमिति ध्येयम् । अतएव ज्ञापकात् कर्त्तृस्थक्रियत्वेऽपि क्वचिदित्यन्ये । विकुर्व्वते सैन्धवा इत्यत्र (३/१/८१) इतितङ् विहितमतोऽयमात्मनेपदाकर्म्मकः । अत्र करणे वर्त्तमानः करोतिरन्तर्भूतण्यर्थः कर्म्मस्थक्रियः । ननु "प्रत्यर्थितभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने । विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।" इत्यत्र कथं विक्रियन्त इति । विकुर्व्वत इति भवितुमर्हतीति आह व्यवस्थितविभाषानुवृत्तेरिति, वा च दुहाचोरित्यत इति विशेषः ।

१३८. कुषि-रञ्जोः प्राचां श्यन् परस्मैपदञ्च । (पा० ३/१/९०) अनयोः कर्म्मकर्त्तरि न यक्, किन्तु श्यन् परस्मैपदञ्च । आत्मनेपदापवादः । यग्विषये तु नास्य प्रवृत्तिः । इति भट्टोजीदीक्षितः ।

१३९. क्रिया हि द्विविधा, काचित् कर्त्तृसमवायिनी, काचित् कर्म्मसमवायिनी, तत्र कर्म्मसमवायिन्यां क्रियायां सत्यां कर्म्मकर्त्ता कर्म्मवद् भवति । कर्म्मणातुल्यक्रियः कर्त्ता कर्म्मकर्त्ता, मध्यपदलोपी समासः । एकस्यामेव क्रियायां यस्य कर्म्मत्वमासीत् तत्रैव तस्य चेत कर्त्तृत्वं विवक्ष्यते तदा तस्य

कर्म्मत्वमतिदिश्यते । ननु च कथमेतं सम्भवति ? एकस्यामेव क्रियायां कर्मत्वं कर्त्तृत्वञ्च साध्यसाधनयोरत्यन्तभिन्नत्वात्, अत उच्यते यदा क्रियाकृतात्मसाध्याश्रयणादिलक्षणो व्यापारः सौकर्य्येण विवक्ष्यते कर्मण्यारोपिते नाहमेतन्निर्मामि किन्तर्हि स्वयमेवैतत् (तदानीं)निष्पादयतीति विवक्ष्यते तदैकस्यामपि कर्म्मकर्त्तृत्वयोस्तुल्यक्रियत्वमबाधितमेव स्यात् । उक्तञ्च—

"क्रियमाणस्तु यत् कर्म्म स्वयमेव प्रसिद्ध्यति ।
सुकरैः स्वैर्गुणैर्वृद्धाः कर्म्मकर्त्तेति तद् विदुः ।।" किञ्च
स्वव्यापारे हि कर्त्तृत्वं सर्वत्रैव वास्ति कारके ।
व्यापारभेदापेक्षायां करणत्वादिसम्भवः ।।" इति ।

नन्वेवं न सम्भवति शक्तिः कारकमिति दर्शने कर्म्मशक्तिकर्त्तृशक्त्योरत्यन्तभिन्नत्वात्तदयुक्तम्, शक्ति-शक्तिमतोर्भेदस्याविवक्षितत्वात् शक्त्याधारद्रव्यमेव कर्त्तृत्वंकर्म्मत्वमापद्यत इति । अथातिदेशसूत्रमिदं पञ्चानाम्, तेषां कोऽयमिति विचार्य्यते । तत्र नायं निमित्तातिदेशः कर्म्मणो निमित्तं क्रियाव्याप्यत्वम्, तत् कथं कथं कर्त्तर्य्येवातिदेष्टुं शक्यते । कर्त्तृ-ककर्म्मणोरत्यत्ताविरुद्धधर्मत्वात् । नापि रूपातिदेशः, अतिदिश्य कर्म्मणो रूपं तावन्न ज्ञायते योगादिकं तद्रूपमिति चेन्न स एव कार्य्यातिदेशः किमनेनेति ? नापि व्यपदेशातिदेशः, तस्य संज्ञारूपत्वात् । वत्करणमिह स्याश्रयार्थम्, तेन कर्म्मसंज्ञामनादृत्याकर्म्मकस्य कर्म्मकर्त्तुः कर्म्मकार्य्यं विधीयते, न तु तस्य कर्त्तृत्वमपनीतो अत एव कर्त्तरि भावाश्रयः प्रत्ययोऽपि भवत्येव । यथा—अभेदि कुशूलेन स्वयमेव, अत एव गौर्वाहीकवत् कर्म्मकर्त्ता कर्म्म इत्यतिदेशो न कृतः । अथ शास्त्रातिदेशोऽपि न युज्यते, यतः कर्म्मणो यच्छात्रं सार्व्वधातुके यगित्येवमादिकं कर्म्म कर्त्तुरतिदिश्यते इत्युक्तेऽपि वत्करणस्य स्वाश्रयार्थत्वात् परत्वात् शबादिप्रत्यया अपि प्राप्तप्रतिहस्ताः सम्भवेयुः, किन्तु कार्य्यातिदेश एवायम् । कर्म्मणि यानि विहितानि इण्यगात्मनेपदानि कर्म्मकर्त्तर्य्यतिदिश्न्ते इत्याह इण्यगात्मनेपदार्थमिति । अथ द्वितीयापि कर्म्मकार्य्यत्वात् कथं न प्राप्नोति ? मैवम्, तिङ्-प्रकरणात् धात्वधिकाराच्च तद्विहितं कार्य्यमेवातिदिश्यते, न प्रकारान्तरीयं कार्य्यमिति । अथवा क्रियाव्याप्यं कर्म्म कर्त्ता च कर्म्मेत्युक्त्वा यदत्र प्रकरण कर्म्मकार्य्यमतिदिष्टं तद्व्यतिरिक्तकर्म्मकार्य्यार्थमिति । अथ यस्यां क्रियायां यस्य कर्म्मत्वं तज्जातीयायां क्रियायां यदि तस्य कर्म्मत्वं तदा कर्म्मवद्भाव इति कुतः प्राप्तम् ? अत्रोच्यते एतच्च प्रत्ययासत्तेर्न्यायाल्लभ्यते । एकद्रव्यसमवायिनी हि क्रिया प्रत्यासन्ना, द्रव्यान्तरसमवेतौ तु विप्रकृष्टौ । तथा तस्मिन् धातौ कर्म्मत्वम्, तस्मिन्नैव कर्त्तृत्वं प्रत्यासन्नम्, एकत्र कर्म्मत्वमपरत्र

१४०. तपस्तपः कर्म्मकस्यैव ।

तपः कर्म्मकस्यैव तपः कर्त्ता कर्म्मवद् भवति । तप्यते तपस्तापसः । तपः कर्म्मकस्यैवेति किम् ? वितपति पृथ्वीं सविता ।

१४१. इण्-ते-लुङि भावकर्म्मणोः ।

तभूते लुङि भावकर्म्मणोर्द्धातोरिण् स्यात् । अभावि कटेन । अदोहि गौर्गोपेन ।

कर्त्तृत्वमिति तु विप्रकृष्टम् । अत एव भिद्यमानकुशूलः पात्राणि भिनत्तीत्यत्र न भवति । अत्रैकापि भेदनक्रिया नैकद्रव्यसमवेता । पचत्योदनम्, राध्यत्योदनः स्वयमेवेत्यत्रैकस्य कर्मत्वे कर्त्तृत्वेऽपि धातोरुभयोर्भिन्नत्वाद् विप्रकर्षः । तथाप्यन्योन्यमाश्लिष्यत श्लिष्यमाणगतया क्रियया स्वगतया च भिन्नत्वम् । तथा आत्मानं हन्ति आत्माऽत्रात्मनोऽन्तरात्मदेहभेदात् द्वैविध्यम् । अत्रात्मनो दुःखानुभवनमेव हननम् । न्यासकृतस्तु कर्म्मणा तुल्यक्रियः इत्यत्रापि गमकत्वात् समासः, कर्म्मणा तुल्यक्रियः सदृशक्रियः कर्त्ता कर्म्मवद् भवति, यद्वा तुल्यशब्दः सादृश्यवचनोऽयम्, सादृश्यञ्च किञ्चिद् भेदाधिष्ठानमित्यसाधारण एव कर्तृव्यापारो गृह्यते न तु साधारणः, तेन यस्मिन् कर्म्मणि कर्त्तृवस्थां प्रपन्नेऽपि तादृशी क्रियां लक्ष्यते, यादृशी कर्म्मावस्थायां स कर्त्ता कर्म्मवद् भवतीति, पचत्योदन देवदत्त इत्यत्र कारकान्तरव्यापारविसदृशो देवदत्तस्य कर्त्तुरिति न भवति कर्म्मवद्भाव इत्याहुः । कातन्त्रास्तु कर्म चासौ कर्त्ता चेति कर्म्मकर्त्ता इति कर्म्मधारयं समाचक्षते । उपपत्तिस्तु प्रागुक्तैव, गच्छति ग्रामः स्वयमिति सपरिस्पन्दनसाधनसाध्यत्वात् गमनं क्रिया । सा च गन्तरि देवदत्तादौ समवेता, न कर्म्मणि ग्रामादौ । विशेषविधानादिति णेरणि (३/१/११४) इति । कर्म्म कर्त्तेति किम् ? साध्वसिश्छिनत्ति, साधु स्थाली पचति । भाष्यमतमाविष्करोति क्वचिदित्यादि, द्विकर्म्मत्वाद् विद्यमाने कर्म्मणि कर्म्मवद्भावो विधीयते, क्वचिदित्यनेन शिष्टप्रयोगानुरोधः सूच्यते । क्षीरं मुच्यमाना गौः स्वयं मुञ्चतीत्यर्थः । एवं पचिरिहान्तर्भावितण्यर्थः, लोहितं फलं पच्यमान उदुम्बरः स्वयं पचतीत्यर्थः ।

१४०. तपः कर्म्मकस्यैवेत्यवकारो विस्पष्टार्थः । अवधानफलत्वात् सर्ववाक्यानामत्र कर्म्मणा तुल्यक्रिय इति नानुवर्त्तते क्रियाभेदात् । तथाहि तप्यत इति तप उपवासादि, तपनमर्ज्जनम्, तस्य वाचा समवेतत्वाद् भिन्नम्, अतो विध्यर्थमेवेतत् । तप्यत इत्यत्र कर्म्मवद्भावफलं यगात्मनेपदे ।

१४२. **न तपोऽनुतापे ।**

इण्णास्ति । आत्मनान्वतप्त पापेनकर्म्मणा ।

१४३. **इणस्तलुक् ।**

सामान्येन इणः परस्य लुङ्तकारस्य लुक् स्यात् । समपादि शस्यम् ।

१४४. **सार्व्वधातुके यक् ।**

भावकर्म्मणोः सार्व्वधातुके यक् स्यात् । भूयते, क्रियते कटः ।

१४५. **कर्त्तरि शपहनद्ह्वादि यङ्लुकः ।**

अदादि-जुहोत्यादि-यङ्लुगन्तादन्यस्माद् धातोः कर्त्तृवाचिनि सार्व्वधातुके परतः शप्प्रत्ययो भवति । पचति, चिकीर्षति, पुत्त्रीयति, काग्यति । अनद्ह्वदेरिति किम् ? अस्ति, जुहोति, बोभोति ।

१४६ **दिवादिभ्यः श्यन् ।**

शपोऽपवादः । दिवादिभ्यः धातुभ्यः सार्व्वधातुके श्यन् स्यात् । दीव्यति, सीव्यति ।

१४७. **वा भ्राश-भ्लाश-भ्रमु क्रमु-त्रपि-त्रुटी-लषः ।**

एभ्यः सार्व्वधातुके श्यन् वा स्यात् । भ्राश्यते, भ्राशते; भ्लाश्यते, भ्लाशते । भ्रमु चलने, भ्रमु अनवस्थाने, द्वाभ्यामेव भ्राम्यति, भ्रमति । क्राम्यति, क्रामति, क्रमति । क्लाम्यति, क्लामति; त्रस्यति, त्रसति; त्रुट्यति, त्रुटति; लस्यति, लसति ।

१४८. **समो यसः केवलाच्च ।**

सम्पूर्व्वादप्रादेश्च यसो दैवादिकात् श्यन् वा स्यात् । संयस्यति-संयसति, यस्यति-यसति । अन्यतो नित्यमेव । प्रयस्यति ।

१४९. **स्वादिभ्यः श्नुः ।**

स्वादेः सार्व्वधातुके शपोऽपवादः श्नुः स्यात् । सुनोति, सिनोति ।

१५०. **कृवि-धिवि-श्रुवां कृ धि-शृ च ।**

कृव्यादेः श्नुः स्यात् । क्राद्यादेशश्च । कृणोति, धिनोति, शृणोति ।

---

१४३. ननु तलुगित्युक्ते प्रकरणान्निमित्तीभूतस्य तस्य लुक् प्राप्यते किमिण इत्यनेन इत्याह सामान्येण इति । तेन कर्त्तृविहिताद् भावकर्म्मविहितादपीणः पदस्तकारो लुप्यते । अतः समपादीत्युदाहृतम् । अभावि, अकारि ।

१५०. अत्र विभक्तिविपरिणामात् पञ्चमास्तेन विवृणोति । कृव्यादेरिति । भूवादित्वात् शपि प्राप्ते वचनमिति न्यासः । त्रिलोचनस्तूभयमत्र विधेयमिति ब्रवीति ।

१५१. **अक्षो वा ।**

अक्षः श्नुर्व्वा स्यात् । अक्ष्णोति, अक्षति ।

१५२. **तनूकृतौ तक्षः ।**

तनूकरणे तक्षः श्नुर्व्वा स्यात् । तक्ष्णोति । तक्षति, तनूकृताविति । किम् ? सन्तक्षति वाग्भिः ।

१५३. **तुदादिभ्यः शः ।**

एभ्यः शः स्यात् । तुदति, नुदति ।

१५४. **रुधादेः श्नम् ।**

एभ्य श्नम् स्यात् । रुणद्धि, भिनत्ति ।

१५५ **तनादिभ्य उः ।**

एभ्यः उः स्यात्, तनोति' सनोति ।

१५६, **क्र्यादेः श्ना प्वादिह्रस्वश्च ।**

एभ्यः श्नाप्रत्ययः स्यात् । प्वादीनां ह्रस्वश्च । क्रीणति, पुनाति ।

१५७ **स्तम्भु-स्तुम्भु-स्कम्भु-स्कुम्भु-स्कुञ्भ्यः श्नुश्च ।**

स्तम्भ्व दिभ्यः सौत्रेभ्यः स्कुञश्च श्नुः स्यात् श्ना च । स्तभ्नोति, स्तभ्नाति, स्तुभ्नोति, स्तुभ्नाति स्कभ्नोति, स्लभ्नाति; स्कभ्नोति, स्कुभ्नाति, स्कुनोति, स्कुनाति । उक्ता विकरणाः ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
तृतीयस्याध्यायस्य द्वितीयः पादः

---

१५२. तक्षू त्वक्षू तनुकरणे भौवादिकः । ननु तनुकरणे एवायं पठ्यते, तत् किं तद्विशेषणोपादानेनेत्याह तनूकृताविति । किमिति । अनेकार्थत्वात् सन्तक्षति निर्भत्सतीत्यर्थः ।

१५३. शकारः स्थादेः (३/३/२१) इत्यस्य विशेषणार्थः, ङित्त्वार्थश्च । तेन भौवादिक-शद-सदोः सीदौ भवतः ।

१५४. शकारः श्नात् (३/३/६७) इत्यस्य विशेषणार्थः । मिदचः (१/१/२८) इति विशेषणार्थो मकारः ।

तृतीयः पादः

पदकदम्बप्रकरणम्

१. हु-झलो र्हेर्धिः शा-शासेश्चास्तेरत् ।

जुहोतेर्झलन्ताच्च हेर्धिः स्यात् । शासेश्च शादेशो हन्तेश्च एद् भवति । जुहुधि, भिन्धि, छिन्धि, शाधि, एधि ।

२. हलः श्न आनश् हौ ।

हो परे झलन्तात् श्नाप्रत्ययस्याऽऽनश् भवति । पुषाण, बधान, अशानि ।

३. हन्तेर्जः ।

हौ परे हन्तेर्ज स्यात् । जहि । अप्रत्ययत्वाद्हेर्लुक् न स्यात् ।

४. घोरादेद्द्विलुक् च ।

हौ परे घुसंज्ञकस्यादेद् भवति । द्विरुक्तस्य लुक् च । देहि, धेहि ।

५. अयुक्श्नूदतो हेः प्रत्ययात् ।

असंयुक्ता—श्नु, उत्, अत् इत्येतेभ्यः प्रत्ययेभ्यः उत्तरस्य हेर्लुक् स्यात् । सुनु, कुरु, भव । अयुगिति किम्? शक्नुहि, प्रत्ययादिति किम् ? नुहि, स्तुहि ।

६. उतश्च वा वमयोः ।

वमयोः परतः प्रत्ययस्योकारस्य लुक् स्याद् वा । सुन्वः—सुनवः । अतन्म—अतनुम । अयुगित्येवं प्राप्नुवः ।

---

१. ननु झलन्तादनयोर्हेर्धौ सिद्धे आदेशमात्रं विधीयते, उभयं नोच्यते, अनयोः परत्वान्नित्यत्वाच्चादेशे कृते हेर्धिर्विधीयते, उभयमित्यन्ये । 'हु झल्' इति किम् ? बभन्धि पिपृहि ।

२. आनशः शकारः परप्रसिद्धार्थः, आदेश स्थानिवत् क्वचिदित्यस्य व्यभिचारार्थ इत्यन्ये ।

६. कार्य्यिणा हन्यते कार्य्यो इति नयो हि निरस्तः । प्रत्ययादिति विशेषणमनुवर्त्तते, तच्चेह षष्ठ्यन्तं विपरिणमत इत्याह प्रत्ययस्येति । विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वाद्युगप्यनुवर्त्तत इत्याहायुगित्येवेति । कथं सुनोमीति नित्यम् । अदन्त-वमयोर्निमित्तत्वात् ।

७. नित्यं करोतेर्ये च ।

वमयोर्यकारे च परे कृञ उतो नित्यं लुक् स्यात् । कुर्व्वः, कुर्म्मः, ये—कुर्य्यात् ।

८. कुर् ङित् सार्वधातुके ।

ङित्सार्व्वधातुके विषये करोतेः कुरादिश्यते । कुरुतः, कुर्वन्ति । ङिदिति किम् ? करोति ।

९. श्नमस्त्योरतः ।

लुगित्येव, ङित् सार्व्वधातुकविषये श्नमोऽन्तश्चान्तो लुक् स्यात् । रुन्धः, रुन्धन्ति, स्तः, सन् । अत इति किम् ? परत्वाल्लङि वृद्धौ सत्याम्, आस्ताम्, आसन् ।

१०. सः सि ।

लुगित्येव, सकारे परतोऽन्तः सोलुक् स्यात् । व्यतिसे । पिति च वक्तव्यम् । असि ।

११. ह एति ।

एति परे अस्ते सो हः स्यात् । व्यतिहे ।

१२. श्नाभ्यस्तयोरातः ।

ङित्सार्व्वधातुकेऽनयोराता लुक् स्यात् । पुनन्ति अपुनन् । दत्तः ददति जाज्ञति ?, दद्यात् ।

१३. ई हल्यघोः ।

हलि परे श्नाऽभ्यस्तयोरात ईत् स्यात् । पुनीतः, पुनीयात्, जिहीते, जिहीयात्, जाज्ञीतः । अघोरिति किम् ? धत्ते । दद्यात् ।

---

१०. अस्तेरित्यनुषज्यते । सकारे ङितीत्यवगन्तव्यम् । ननु अस्तेः साविति गुणिनि सकारे सलोपार्थं परेण सूत्रितम्, तदभावात् कथं तद्भवेदित्याह पिति च वक्तव्यमिति । वक्तव्यं व्याख्येययमित्यर्थः । न इति योगविभागात् पित्यपि सकारे लक्षणानुरोधाद् भवतीति ।

१४. ईद्दरिद्रातेः ।

ङित्सार्वधातुकविषये दरिद्रातेरीत्वापवाद इत् स्यात् । दरिद्रितः, दरिद्रियात् । हलीत्येव, दरिद्रति ।

१५. भी-हाकोर्व्वा । आ च हो हौ ।

हलि तत्र भीहाकोरिद् वा स्यात् । भिय ईत् इत् । बिभितः—बिभीतः । बिभियात्—बिभीयात् । जहितः जहीतः । आ च हो हौ – जहिहि, जहीहि, जहाहि च ।

१६. लोपो यि ।

यादौ तत्र जुहातेरातो लोपः स्यात् । जह्यात्, जह्युः ।

१७. ओतः श्यनि ।

श्यनि परे ओदन्तस्य ओतो लोपः स्यात् । सो—अवस्यति । दो—द्यति ।

१८. शमादेर्दीर्घः ।

श्यनि शमाद्यष्टस्य दीर्घ स्यात् । शाम्यति । शमु, तमु, दमु, श्रमु, भ्रमु, क्षमु, क्लमु, मदी ।

१९. ष्ठिवु-क्लम्वाचमां शिति ।

एषां शिति दीर्घ स्यात् । निष्ठीवति, (ष्ठीव्यति) क्लामति, आचामति ।

२०. क्रमः परस्मैपदे ।

शिति दीर्घः स्यात् । क्राम्यति, क्रामति, क्रामन्, नेह क्रमते ।

२१. स्थादेस्तिष्ठादिः ।

शिति स्थादे स्थाने तिष्ठादिरादिश्यते । तिष्ठति, पा-घ्रोः पिब-जिघ्रौः । पिबति । ध्मो—धमः । धमति । म्नो -मनः । आमनति । दाण यमोर्यच्छः । यच्छति दृशेः पश्यः । पश्यति । अर्त्तेर्ऋच्छः । ऋच्छति । सर्त्तेर्धावो वेगे । धावति, अन्यत्र सरति । शद-सदोः शीय सीदौः । शीयते, सीदति । इषोरिच्छः । इच्छति । गमो—गच्छः । गच्छति । ज्ञाजनोर्जा । जानाति, जायते । शितीत्येव, पाति, पास्यति, पाहि ।

२२. अदाद्युतो वृद्धिः पिति हलि ।

पिति हलादौ सार्व्वधातुकेऽदादेरुदन्तस्य वृद्धिः स्यात् । नौति, रौति, रौषि, यौति, कौति, स्तौति । हलीति किम् ? रवाणि, रवीति, स्तवीति ईड् वैदिके ।

२३. **ऊर्णोर्न लङि वान्यस्मिन् ।**

ऊर्णोतेस्तत्र लङि वृद्धिर्नास्ति । प्रौर्णात्, प्रौर्णाः । वान्यस्मिन्—प्रोर्णौति, प्रोर्णोति । पितीत्येव—प्रोर्णुतः ।

२४. **अदेत् तृणहः ।**

पिति हलि तृहेः श्नमोऽत् स्यात् । तृणेढि, तृणेक्षि । अतृणेट् ।

२५. **ब्रुव ईट् ।**

पिति हलि ब्रुव ईट् स्यात् । ब्रवीति, ब्रवीतु । अब्रवीत् । पितीत्येव, आत्थ । ब्रूयात्। हलीत्येव, ब्रवाणि ।

२६. **यङ्लुको वा ।**

पिति हलि यङ्लुगन्तादीड् वा स्यात् । लालपीति, लालप्ति, बोभवीति, बोभोति । पितीत्येव, व्यतिबोभूते ।

२७. **रुदादेरिड्यचि ।**

अयचि सार्व्वधातुके रुदादेरिट् स्यात् । रोदिति, रुदितः "टिदागमः परवत्" इति न गुणः । अयचीति किम् ? रुद्यात्, रुदन्ति । रुदि, स्वपि, श्वसि, अनि, जक्षि ।

२८. **ईडीश्भ्यां सेध्वे च ।**

आभ्यां से ध्वे च परे इट् स्यात् । ईडिषे, ईडिध्वे, ईशिषे, ईशिध्वम् ।

२९. **सिचो दिस्योरीट् ।**

दिस्योः परतः श्रूयमाणसिच उत्तरे ईट् स्यात् । अवादीत्, अवादीः । अकार्षीः । सिपि माङि भियो वा माङि भियः सिपिः ईड् वा स्यात् । मा भैषीः, मा भैः ।

---

२७. रुदादिभ्यः सार्वधातुके यक्वर्जिते इट् स्यात् । रुदित इति इटो व्यवहिते तसि कथं गुणो न स्यादित्याह टिदागमः परवदिति । टानुबन्ध आगमः परवत् प्रत्ययवदित्यर्थः, स्याट इवामुष्याः प्रत्ययत्वात् षत्वम् ।

२८. जनी शीङः से-ध्वे इति चन्द्रगोमिना सूत्रयित्वा जन जनने इत्यस्य व्यतिजज्ञिष्व व्यतिजज्ञिध्वमित्युक्तम् । तस्य छान्दसत्वादुपेक्षितमनेनाचार्येण ।

२९. नन्वभूदित्यादौ सर्वविधिभ्यः (परि० ४३) इति न्यायाद् गाति (२/२/११६) इति सिचो लुकि स्थानिवद्भावात् कथमीट् न स्यात् ? इत्याह श्रुतानुमितयोः श्रुतसम्बन्धो विधिर्बलवानिति न्यायाद् यत्र सच् श्रूयते तत्र तस्यादीड् विधीयते, यत्र तु लुप्यते तत्र न स्यादित्यर्थः ।

३०. अस्तेर्लङि ।

दिस्योरीट् स्यात् । आसीत्, आसीः।

३१. रुदादेरच्च ।

रुदादेर्लङि दिस्योरत् स्यात् । ईट् च इटोऽपवादः । अरोदत्—अरोदीत्, अस्वपत्—अस्वपीत् । अरोदः—अरोदीः । अस्वपः—अस्वपाः ।

३२. अदः ।

अदेर्लङि दिस्योरत् स्यात् । आदत्, आदः ।

३३. दिपिसस्तः सिपि वा ।

लङि दिपि सान्तस्य स-स्तः स्यात् । अशात्, अचकात् । सिपि वा । अशात्त्वम् अशास्त्वम् वा । नास्तेरीट् व्यवधानात् । आसीः ।

३४. द-धो रुः ।

लङि सिपि दस्य धस्य च रुर्वा स्यात् । अभिनस्त्वम्—अभिनत्त्वं वा । अरुणस्त्वम्—अरुणत् त्वं वा नर्द्देयङ्लुकि रलोपदीर्घत्वे अनानाः । गृधेर्झषन्ताच्च कत्वात् गस्य घत्वे कृते धस्य रुत्वं—अजर्घाः ।

३५. शीङः शेः सार्व्वधातुके ।

सार्वधातुकमात्रे शीङः शेः स्यात् । शेते, शयाते, शेरते, शयानः ।

३६. शय्यि क्ङिति ।

यादौ क्ङिति प्रत्यये शीङः शयादिश्यते । शय्यते, शाशय्यते संशय्य (मानः) शय्या । क्ङितीति किम् ? शेयम् ।

३७. प्रादेरूहो ह्रस्वः ।

यादौ क्ङिति प्रादेः परस्य ऊहो ह्रस्वः स्यात् । समुह्यते । समुह्य गतः । क्ङितीत्येव । अत्यूह्योऽयमर्थः ।

३८. ह्रस्वस्य दीर्घोऽकृत्सार्वधातुके ।

अकृत्सार्वधातुके क्ङिति यकारे ह्रस्वान्तस्य दीर्घः स्यात् । भृशायते, चीयते, वल्गूयति, तोष्टूयते, स्तूयते । अकृतसार्वधातुक इति किम् । प्रकृत्य स्तुयात्, चिनुयात् । अतो दीर्घो न यकि । सुख-सुख्येयुः, चिकीर्ष्यते अत्र इत्यतो लुक् ।

---

३४. इह रूकारकणंर रुसोः (१/३/१) इत्यस्य विशेषणार्थम्, रेफकरणस्तु दीर्घार्थम् । अजर्घा इत्यादौ तथोश्च वक्तव्यम्, चान्द्रादौ दृष्टत्वात् कृत अकृणत् अकृणः । व्यथेर्यङ्लुकि अवाव्यत्—अवाव्यः । वृतेर्यङ्लुकि (३/४/४६) इति रु कृते अवर्व्वाः ।

३९. इणो न लोङि प्रादेः ।

प्रादेरुत्तरस्य इणो लोङि दीर्घो न स्यात् । उदियात्, अन्वियात् । प्रादेरिति किम् ? ईयात् ।

४०. ऋतो री ।

अकृत्सार्वधातुके क्ङिति यकारे ऋतौ री स्यात् । मात्रीयति, मात्रीयते । चेक्रीयते । तपरः किम् ? निजेगिल्यते, चेकीर्ष्यते ।

४१. रि लोङ्यको शः रियः ।

लोङि यकि च ऋतो रिः स्यात् ह्रस्वविधानान्न दीर्घः । क्रियात्, क्रियते । यीत्येव—कृषीष्ट । शे रियः म्रियते, आद्रियते । क्ङितीत्येव—हरति ।

४२. शासः शिसङ् हलोरनाङः ।

अङि हलादौ क्ङिति च शासः शिसादिश्यते । अशिषत्, शिष्टः, शिष्यते, क्यप्—शिष्यः । शादेशसामर्थ्यान्नेह शाधि । अनाङ् इति किम् ? आशास्तः, आशास्यते ।

४३. आशीः ।

आङः क्विपि शासेः निपात्यते ।

४४. अम्-सृजादृशोझल्यकिति ।

अनयोर्झलादावकित्यागमः स्यात् ? स्रष्टा, अस्राक्षीत्, द्रष्टा । अद्राक्षीत् । अकितीति किम् ? सृष्टः, सिसृक्षति, दृक्षीष्ट ।

४५. सृप-तृप-स्पृश-मृष-कृषां वा ।

एषां झल्यकिति अम् वा स्यात् । सृप्ता-सर्प्ता । स्प्रष्टा-स्पर्ष्टा । अकितीत्येव-अस्पृशत् ।

---

४०. विशेषातिदिष्टः (परि० ३१) इति न्यायात् कृत्-सार्वधातुक विहित क्ङ्द्यकार एवानुवर्त्तत इत्याह अकृदित्यादि ।

४१. यं विधि (परि ६३) इत्यभिप्रेत्याह ह्रस्वविधानान्न दीर्घ इति । ननु यदि निरनुबन्धक श इत्युच्यते तत्र तौदादिक एव गृह्यते शे तृम्फादेरितिवत्, तत् कथमुक्त क्ङितीत्येव ? सत्यमेतदुपायवैचित्र्यात् ।

४५. अस्राप्सीत् – असार्प्सीदिति पदद्वयं पुस्तकेषु दृश्यते तदतीव मन्दम् । क्वापि व्याकरणे सृपेः सिचो विहितत्वात् केवलं लृदनुबन्धादङेव, "गिरिमन्वसृपद्रामः" इति भट्टिः ।

४६. **इदितो नुम् धातोः ।**

इदितो धातोर्नुम् स्यात् । वन्दते, कम्पते, अभिवदन्ते ।

४७. **शे मुचादेः ।**

एषां शे नुम् स्यात् । मुञ्चति-लुम्पति । लिम्पति । मुच्, लुप्, षिच्, कृती, खिद, पिशः ।

४८. **मस्जिनशोर्झलि ।**

अनयोर्झलि नुम् स्यात् । मस्जेरन्त्यात् पूर्व्वं नुममिच्छन्ति । मङ्क्ता । मङ्क्ष्यति । नंष्टा नङ्क्ष्यति । झलीति किम् ? नशिता रधादि ।

४९. **रधिजभोरचि ।**

अनयोरचि परे नुम् स्यात् । रन्धयति । जम्भयति । रन्धकः । जम्भकः । अचीति किम् ? रब्द्ध्वा । जब्धः ।

५०. **रधेरिटि लिटयेव ।**

इटि रधेर्लिटयेव नुम् स्यात् । नान्यत्र । ररन्धि ररन्धिम । न क्वसौ । रेधिवान् । नियमः किम् ? रधिता, रधितुम् ।

५१. **रभलभोरशब्लिटोः ।**

अनयोरचि नुम् स्यात् । आरम्भयति, आरम्भी, लम्भयति, लम्भकः । अशब्लिटोरिति किम् ? आरभते, आरेभे ।

५२. **लभेराङो यति ।**

आङो लभेर्यति नुम् स्यात् । आलम्भ्यः ।

५३. **उपात्स्तुतौ ।**

नुम् स्यात् । उपलम्भ्या विद्या । स्तुताविति किम् ? उपलभ्यं किञ्चित् ।

---

४६. अत्र धात्वधिकारे पुनर्धातुग्रहणम्, धातूपदेशावस्थायामेव नुमः सूचनार्थम् । तेन् कुण्डा हुण्डादौ (४/२/९७) ङाप् न स्यात्, अन्यथा (४/२/८८) क्तिन् स्यात् । अतएव इदितो धातोर्नुम् स्यादित्येव विवृतं-न तु निमित्तान्तरम् ।

४८. ननु मस्जेर्नुमि कृते सकारस्यादित्वाभावात् कथं स्को (२/३/१०७) इति सलोपः स्यात् । न च वक्तव्यम्, अन्तरङ्गत्वात् प्रागेव सलोपः प्राप्नोति । नित्यत्वादन्तरङ्गत्वात् परत्वात् नुमेव स्यादित्याह मस्जेरन्त्यादित्यादि ।

५४. प्रादेः खल्घणोः । न केवल सुदुर्भ्याम् ।

अनयोः प्रादेर्लभेर्नुम् स्यात् । सुप्रलम्भः: विप्रलम्भः । प्रादेरिति किम् ? ईषल्लभः, लाभः । लभेर्घणि केवलाच्च दृश्यते "कात्यानयनीं तुष्टुवुरिष्टलम्भात्" राष्ट्रलम्भः । न केवलसुदुर्भ्याम् । सुलभो दुर्लभः । सुलाभो दुर्लाभः । केवलेति किम् ? अतिसुलम्भः । कथमतिसुलभः ? सुलभसिद्धौ पश्चात् प्रादिसमासेन ।

५५. णमिणोरप्रादेर्व्वा ।

अनयोलभेरप्रादेर्नुम् स्यात् । लम्भं लम्भम्, लाभं लाभम् । अलम्भि-अलाभि । अप्रादेरिति किम् ? नित्यं प्रलम्भम्, प्रालम्भि ।

५६. वनति-तनाद्यनिटामनुनासिक लोपो झलि क्ङिति ।

एषां झलादौ क्ङित्यनुनासिकलोपः स्यात् । वतिः, ततम्, सन्ततिः । क्षणु, क्षतिः, क्षत्वा । ङिति अतत, अतथाः । अनिटाम् —यमि रमि णमि गमि हनि मन्यतीनाम्, यत्वा, यतिः । ङिति—हतः । हथः । झलीति ? वनितम्, गम्यते ।

५७. न क्तिचि दीर्घश्च ।

वनत्यादेः क्तिचि अनुनासिकलोपो नास्ति । ङमः क्विझलो; क्ङितीति दीर्घश्च न भवति वन्तिः, तन्तिः, सन्तिः ।

५८. क्वियपोर्व्बहुलम् ।

तेषामनुनासिकः क्वौ यपि च बहुलं लुप्यते । अङ्गगत्, संयत्, आरत्, आनत् परीतत् । बाहुल्यान्नेह—ब्रह्महणौ । यपि—संयत्य, अनुमत्य । बाहुल्यात्, अवमन्य मननीति वा गमादेः । आगम्य, आगम्यः; विरम्य, विरम्य, उद्यत्य-उद्यम्य । बाहुल्यादत ऊच्च—अग्रेगूः ।

५९. हनस्तङि सिचि ।

तङि सिचि हन्तेर्न लोपः स्यात् । आहत, आहसाताम् ।

६०. यमो गन्धने ।

हिंसार्थकसूचने यमस्तङि सिचि मलोपः स्यात् । उदायत् । गन्धन इति किम् आयंस्त पादम् ।

---

५८. क्वचिदप्रवृत्तिरिति बाहुलकाङ्गमुदाहरति "अवमन्येति", अयन्तु मनस्तम्भ इति चौरादिकस्य प्रयोग इति रक्षितः । क्वचिद् विभाषेत्युदाहरति वा गमादेरिति । गमादौ धातुत्रयमत्र गृह्यते । क्वचिदन्यदेवेत्युदाहरति बाहुल्यादत ऊच्चेति ।

६१. वोपयमेन ।

स्वीकारे तङि सिचि यमो मलोपः स्याद्वा । उपायत कन्याम्, उपायंस्त वा ।

६२. गमेर्लोङि च ।

गमेस्तङि लोङि सिचि च मलोपो वा स्यात् । सङ्गसीष्ट, सङ्गंसीष्ट । समगत, समगंस्त भ्रमरः सरोरुहेण ।

६३. जन-अन-खनामाज्झलि क्ङित् सनि ।

एषां झलादौ क्ङिति सनि च नकारस्यात् स्यात् । जातम्, जंजातः । सातम्, सिज्लुकि—असात, असाथाः । सिषासति, सातिः । खातम्, खातिः । झलीति किम् ? जिजनिषति, चिखनिषति ।

६४. ये वा ।

जनादेर्यादौ क्ङिति आद्वा स्यात् । जायते-जन्यते । सायते-सन्यते । खायते-खन्यते । चाखायते-चंखन्यते ।

६५. तनेर्यक्ि ।

आद्वा स्यात् । तायते-तन्यते ।

६६. सनः क्तिचि लुक् च वा ।

सनोतेः क्तिचि आद्वा, लुक् च वा स्यात् । सातिः, सतिः, सन्तिः ।

६७. श्नान्न लुक् ।

श्नमः परस्य नो लुक् च स्यात् । भनक्ति । हिनस्ति ।

---

६१. यद्यपि यमिर्विवाहे वर्त्तते तथापि स्वीकारोऽर्थोऽत्र लक्ष्यते इत्याह स्वीकार इति । तथा च भट्टिः "नोपाय (त) ध्वं भयं सीतां नोपायंस्त दशाननः" इति । विवाहेऽयं विधिरिति जयादित्यः ।

६३. वनति (५६) इत्यतोऽनुनासिकलोप एवानुवर्त्तते ; कार्यिणा हन्यते कार्य्यीति न्यायाल्लोपं निवर्त्त्याकारः प्रवर्त्तत इति स्फुटयन्नाह नकार आद् भवतीति । सातमित्यत्र यद्यपि तनादित्वादनुनासिकलोपः प्राप्नोति तथापि परत्वाद् विशेषत्वाच्चाकार एव स्यात् ।

६८. **शपि-दंश-रञ्ज-सञ्ज-स्वञ्जाम् ।**

एषां शपि नो लुक् स्यात् । दशति, रजति, प्रसजति परिष्वजते । परिष्वजेते ।

६९. **रञ्जेर्घणि भावकरणयोः ।**

घणि रञ्जेर्नो लुक् स्यात् । भावे रागो वर्त्तते करेण रागः कुङ्कुमम् । रजनाद्या औणादिकाः ।

७०. **णौ मृगरमणे ।**

णौ रञ्जेर्नो लुक् स्यात् । रजिता मृगाः । रजयति मृगम् ।

७१. **स्वञ्जेर्लिटि वा ।**

अस्य नो लुक् स्यात् वा । स्वजे-स्वञ्जे वा ।

७२. **अनिदितामनुषङ्गस्य क्ङिति ।**

क्ङित्येषामनुषङ्गस्य नो लुक् स्यात् । सक्तम्, सनीस्यते । दनीध्वस्यते । अनिदितिमिति किम् ? कम्प्यते ।

७३. **तङ्गिकम्प्योरुपतापाङ्गविकारयोः ।**

अनयोरत्रार्थे नो लुक् स्यात् । विलगितः, विकपितः ।

---

६८. ननु परिष्वजते इत्यादौ आदित् (३/२/१०७) इत्यत इति कृते (१/२/३) इति गुणे शपोऽभावात् कथमनुषङ्गलोप ? मैवं संस्था, इत्वादयो बहिरङ्गाः नकारलोपस्त्वन्तरङ्गः, ततोऽन्तरङ्गबहिरङ्गयोररन्तरङ्गो बलवान् (परि० ४२) इति प्रागनुषङ्गलोपः प्राप्नोतिः । अथान्तो विधिरन्तङ्ग इतीत्त्वादयोऽप्यन्तरङ्गा इति चेत ? वर्णात् प्राकृतं बलीय इति भविष्यति । किञ्च स्थानवित्- (परि० १२) इति स्थानविद्भावाच्छपः प्राप्नोतीति । शपीति किम् ? दिदक्षति ।

६९. अनेयोरिति किम् ? रजत्यस्मिन्निति रङ्गः ।

७०. इहमृगरमण मृगक्रीड़ा, तथाहि मृगक्रीड़ायां रञ्जोरज इति वासवतं सूत्रम् ।

७२ नन्वनुषङ्गसंज्ञा तावादिह न विहिता, कस्तावदनुषङ्गः । सत्यम् हलन्तोपान्तनकारोऽनुषङ्ग इति प्रसिद्धा संज्ञा वर्गवदिह गृह्यते ! तथा च "व्यञ्जनोऽनुषङ्गः इति कातन्त्रसूत्रम् । अनिदनुबन्धानां क्ङिति प्रत्ययेऽनुषङ्गस्य लुग्विधीयते । वा न स्मर्यते "उभयो विभाषयोर्मध्ये यो विधि स नित्य" इति न्यायात् ।

७३. दण्डके लगिर्गत्यर्थः, कपिश्चलनार्थः तयोर्यथाक्रमम् पतापाङ्गविकारयोर्नकारो लुप्यये । विलसितो रोगः, विकपितो देहविकारो रोगेतरः । नच वक्तव्यम्, लगे सङ्गे इत्यस्य क्ते विलगिते इति मा भूदित्यारम्भः । अनयोः किम् ? विलङ्गितः पशुः, विकम्पितस्तरुः ।

७४. **दंशेर्यङ्लुकि पिति च ।**

अत्र दंशेर्नो लुक् स्यात् । दंदशीति, दंदष्टः ।

७५. **क्त्व-जान्त-नशां वा ।**

जान्तां नशेश्च क्त्वि नो लुग्वा स्यात् । रक्त्वा-रङ्क्त्वा वा । अक्त्वा-अङ्क्त्वा वा । नष्ट्वा-नंष्ट्वा वा । (पक्षे नशित्वा) क्ङित्येव-अञ्जित्वा ।

७६. **भञ्जेरिणी च ।**

भञ्जेरिणी क्त्वि च नो लुग्वा स्यात् । अभाजि-अभञ्जि वा । भङ्क्त्वा वा ।

७७. **नाञ्चेः पूजायाम् ।**

अत्राञ्चेर्नोलुक् नास्ति । अञ्चिता गुरवः । अञ्च्यते । समक्नोऽन्यत्र ।

७८. **क्त्वि स्कन्दस्यन्दोः ।**

अनयो क्त्वि नोलुक् नास्ति । स्कन्त्वा, स्यन्त्वा प्रस्कन्द्य ।

७९. **शे तृन्फादेः ।**

एषां शे नो लुक् नास्ति । तृम्फति । तृन्फ, तुन्फ, तुन्प्, दृन्फ, ऋन्फ, उन्फ, शुन्भ, गुन्फ ।

८०. **स्यदो जवे ।**

स्यात् (घणि स्यदः) स्यन्दोऽन्यत्र ।

८१. **एधोद्मावोद-प्रश्रथ-हिमश्रथाः ।**

अमी निपात्यन्ते । इन्धी घण् एधः, उन्दी म उद्मम् "ओद्मीकुर्व्वन् कुचतटभुवम्" । अच्-अवोदः—इषदार्द्रः । प्रश्रथः । हिमं श्रथ्नाति मुञ्चति कर्म्मणोऽण्-हिमश्रथश्चन्द्रः ।

८२. **क्सस्यातोऽचि ।**

निपातप्रसङ्गाल्लुगित्येव । अचि क्सस्यातो लुक् स्यात् । अधुक्षि । अघुक्षि ।

८३. गम-हन-जन-खन-घसां क्ङित्यनङि ।

अजादौ क्ङिति गमादेरतो लुक् स्यात् । जग्मुः, संजग्मे । जघ्नुः घ्नन्; घ्नन्ति, जज्ञे, निचख्नुः,त्रसुः । अनङीति किम् । अगमत्, अवसत् ।

८४. धि सो लोपः ।

धे सकारस्य लोपः स्यात् । चकाधि । आध्वम् । वस-निवध्वं वस्त्रम्, ऐक्षिध्वम् अलविध्वम् । लोपेऽपि सिचि इट् ।

८५. जो जि यणच्परे ।

यण्-अच्- परे जकारे परतः सो जो भवति । भृज्ज्यते । बभृज्ज्वान् । मज्जति । मज्जनम् ।

८६ झष स्तथोर्धोऽधः ।

अधाञो झषन्तात्तथोर्धः स्यात् । दोग्धि, अदुग्धाः लब्धः । अध इति किम् ? धत्तः ।

८७. सस्तः सि लुप्ते चार्धधातुके ।

आर्धधातुके सकारे परतः सस्त स्यात् । जिघत्सति वत्स्यति, अवात्सीत् । लुप्ते च, अवात्ताम् । प्रत्ययलोपलक्षणेनैव सिद्धे लुप्तग्रहणमुद्वृत्तं, खलु ज्ञापयति । षढोः कः सेऽसुपीत्यत्र सिचो लोपे कत्वं माभूत्, तेन, अदृष्ठाः, अद्ढ्वमिति । आर्धधातुके विधि वा स्यमि-व्योः ।

८८. आतो लुगिट्क्ङिदचोः ।

इटि क्ङिदचि च परे आतो लुक् स्यात् । पपिथ, पपि, पपिम, पपतुः, पपुः । आख्यत् । आर्द्धधातुक इत्येव—यान्ति ।

---

८३. उत्तरे त्वाद्यमिति न्यायादजादावित्युक्तम् ।

८४. चकाधीत्यत्र ध्यादेशे सन्निपातलक्षण (परि० ४०) इति नाशङ्कनीयम्, वर्णग्रहणे निमित्तत्वात् एंव लाक्षणिकत्वादपि नो जन्यं निमित्तम् नश्चामस्य (१/३/३१) इत्यात्रातुकीति पर्युदासात् । ननु आध्वमित्यादौ लोपस्यादेशत्वात् आगमादेशयोः (परि० ४८) इतीडागमः प्राग् भवत्येव, ततः सलोपः । नैवम्; नित्यात्वादागमत्वं परत्वमपि बाधमानलोपः प्रवर्त्तते । उक्तञ्च, परान्नित्यमित्याह लोपेऽपीत्यादि, सिचः सलोपे सति स्थानिवद्भावात्तस्मिन्ने सिचीट् स्यादिति भावः । धीति किम् ? चकास्ति ।

८९. **दरिद्रो बहुलम् ।**

आर्धधातुके बहुलं दरिद्रातेरातो लुक् स्यात् । दरिद्र्यात्, दरिद्रयति, अचि दरिद्रः । लुक्-सनोरिटि, इनि वा । अदरिद्रीत्, स्वागम अदरिद्रासीत्, अदरिद्रि अदरिद्रायि वा, दिदरिद्रिसति दिदरिद्रासति । क्वसौ न निड़ाम् ददरिद्रान्, ददरिद्रावा-नित्येके । 'बाहुल्यान्नेह' दरिद्रायकः, दरिद्राणम् ।

९०. **अतः ।**

आर्धधातुकेऽतो लुक् स्यात् । वरः – यायावरः, चिकीर्षिता, चिकीर्ष्यते ।

९१. **यस्य हलोऽनीर्ष्यादेः ।**

आर्धधातुके हलः परस्य यस्य लुक् स्यात् । बेभिदिता, सुखितुम् । नेह ईर्ष्यिता हल इति किम् ? लोलूयिता । कथं पुत्रकाम्या? बहुलाननुवृत्तेः ।

९२. **क्यस्य वा ।**

हल परस्य क्यस्य लुग्वा स्यात् । समिधिता समिध्यिता, नमसितुं, नमस्यितुम् । व्यवस्थितविभाषया नेह नमस्या, तपस्या, वरिवस्या ।

९३. **णेर्लोपोऽडानिऽल्वाय्यामन्तडित्नुषु ।**

इड़ादिवर्ज्जिते आर्धधातुके णिङणिचोर्णेर्लोपः स्यात् । कामनः, याष्टिः, पाक्तिः, पाचनम् अचीकरत्, कारक कार्य्यते, क्विप् घटकाः, क्वसु-चकार्व्वान् । अनिडादाश्विति किम् ? कारयिता । इट्साहचर्यादिणि च णेर्न वृद्धिरिणागमे घटयिष्यते । स्पृहयालुः, स्पृहयाय्यः, आम् कारयामास । अन्तट्-मण्ड यन्तः, औणादिक इत्नु-हर्षयित्नुः । णेरिष्णु-श्छन्दसीति नोच्यते, कारयिष्णुरिति । बहुलानुवृत्त्या यति गणेयम् । ङापि चिन्तियेति, प्रशंसीयादिति च ।

---

८९. चतुरङ्गबहुलं व्याख्यातुकामः क्रमेणोदाहरिति दरिद्रात्यादि क्वचिद्विभाषेत्याह लुङ्सनोरिति, अस्यार्थं लुङ्सनोरिटि परेदिरिद्रातेरातो लुक् स्यात्, इणितु विभाषा । अदरिद्रीदिति (६/४/९९) इति वेट्, इडभावपक्षे आतो लुगभावत् (३/४/१२०) इति स्वागम इत्याह स्वागम इत्यादि । इणो लुङ् निमित्तत्वादिणि वेत्युदाहरति अदरिद्रीदित्यादि । इट्पक्षे दिदरिद्रिषति, तदभावात् दिदरिद्रिषति, तथा पायेणिनीय "न दरिद्रायके लोपो दरिद्राणे च नेष्यते । दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा" अद्यतन्या वेति चोक्तम, क्वसौ न लिडामिति । क्वसौ कर्त्तव्येऽनेकाच्त्वेऽपि लिडाम न विधीयते, तस्यापि विधयेत्वात् । ददरिद्राणिति धातुपारायणम्' तत्सम्मतोऽयं पक्षः । अन्ये तु न मुञ्चन्ति तन्मतमाह ददरिद्रावा-नित्येके इति अत्र प्रवृत्तिपक्षमाह बाहुल्यादिति ।

९०. यायावर इति यद्यपि कौटिल्ये यङः शासनम्, तथापि तदर्थं परिहृत्य रूढ्या वानप्रस्थे वर्त्तते ।

९१. अत्र अकार सहित यकारस्य लोपः, न तु केवल 'य' इत्यस्य ।

९३. अनिडाल्विति पर्य्युदासोऽयमित्याह इडादिवर्जित इति । णेरित्युत्सृष्टानुबंध इत्याह णिङणिचाविति ।

९४. **इटि निष्ठायाम् ।**

णेर्लोपः स्यात् । कारितो गणितः ।

९५. **यप्ययलघुपूर्व्वात् ।**

लघुपूर्व्वात वर्णाद् यपि णेरय् स्यात् । प्रबेभिदय्य । प्रणमय्य । लघुपूर्व्वादिति किम् ? प्रबोध्य, प्रपाठ्य ।

९६. **वाऽऽप्नोतेः ।**

आप्नोतेर्यपि णेरय् स्यात् । प्रापय्य । प्राप्य ।

९७. **अस्ति ब्रुवो भूवचौ ।**

आर्धधातुके अस्तेर्भू ब्रुवश्च वच् स्यात् । भविता, वक्ता, उवाच, नास्तेरनुप्रयोगस्य ईहायाम् ।

९८ **भ्रस्जो भर्ज् वानृतः ।**

आर्धधातुके ऋद्विषयादन्यस्य भ्रस्जो भर्ज् वा स्यात् । भ्रष्टा—भर्ष्टा । बभ्रज्ज—बभर्ज्ज । अनृत इति किम् ? भ्रष्टम् ।

---

९४. निष्ठायामिटि परे णेर्लोपो विधीयते ननु णिजन्तान्निष्ठायामिडस्त्येव तर्हि किमिटीत्युक्तम् ? न च संज्ञापित इत्यत्र, इवन्तर्ध (३/८/१०७) इतीटो विभाषयित्वान्न श्वी (३/४/१२५) इतीड्निषेधे इति वाच्यम्, वसौ (३/४/११४) इत्यत्र एकाजित्यनुवृत्तेः, ज्ञप्त इत्यत्र तु वा दान्त (३/८/१३३) इत्यादिना निपातनादनिष्ठायामपि णिचो लोपः स्यात् । सत्यमुक्तम्, इति कृते णिचो लोपार्थमिटीत्युक्तम् । अन्यथा पाचित इत्यादौ नित्यत्वान्निलोपे सति, एकदेश (परि० ३) इति न्यायात् पाचिरपि पाचिरेवेति न शकादेरितीडभावः, ततः पाचित इति न स्यादेवेति भावः । उक्तञ्च कातन्त्रे" वेटामकेस्वरस्मृत्या संज्ञापिते इडस्ति ते । पाचिते, प्रागिणोलोपे एकस्वरान्न चेट् पचेः "इति ननु यद्यप्यसतीडागमे लोपो भविष्यति ततः किमनेन कार्य्यं पूर्व्वेण सिद्धत्वात् । ततो वचनबलादेव इडागमे भूते लोपः स्यादिति चेनैवम्, इटः सदसन्नभावयोर्लोपस्य नित्यत्वं स्याद् तु कृताकृतप्रसङ्गी (परि०५३) स नित्य इति तल्लक्षणात् । अतोऽनेन नित्यं लोपः स्यादित्युक्तमेव ।

९५. इह वचनबलादेकवर्णव्यवधानेऽपि लघुपूर्व्वत्वं गृह्यते । अथ भूतपूर्वगतिमाश्रित्य लघुपूर्व्वत्वमिति केचित् । विगणय्येत्यादौ स्यान्न प्रणमय्येति गणयतेरदन्तत्वात् तस्मादिह भूतपूर्व्वगतिर्नाश्रीयते पूर्व्वग्रहणादित्याह प्रबेभिद्य ति ।

९९. अदो जग्धः क्तित्ति यपि ।

कित्तकारे यपि चादो जग्धः स्यात् जग्धः, जग्ध्वा, प्रजग्ध्य । कित्तीति किम्? अत्ता । बहुलानुवृत्त्या-अन्नम् ।

१००. लुङ् सनपि घस्लृ-घण्यनुपसर्गे, लिटि वा ।

लुङादिष्टो घस्लृः स्यात् । लृदित्वादङ्-अघसत्, अघासि, जिघत्सति । अप्-प्रघसः, निघसः । घण्-घासः, णोपसर्गे, न्यादः । लिटि वा । जघास, जक्षतुः । आद आदतुः ।

१०१. वेञोवयिर्यश्च क्रिति वो वा ।

वेञो लिटि वयिर्व्वा स्यात् । उवाय । किति यश्च वकारो वा—उयतुः, उवतुः । पक्षे ववौ ववतुः ।

१०२. हनो वधो लोङ्यनिणि ।

लोङि हन्तेर्व्वधः स्यात् । वध्यात् वध्यास्ताम् । वधिषीष्ट, अनिणीति-किम्? घानिषीष्ट ।

---

९९. इह यपीत्यन्तरं समुच्चार्थश्चकारः प्रयोज्य इत्याशङ्क्य विवृणोति यपि चेति । नन्बन्तरङ्गत्वाद् यवादेशात् प्राक् कित्तकारे परे जग्धादेशो भविष्यति ततः किमर्थं यपीत्युक्तम्? यप् पुनरुभयाश्रितत्वाद्बहिरङ्ग एवं, सत्यमुक्तम्, यपीत्य-नेनान्तरङ्गा विधेयो यपा बाध्यन्ते इति ज्ञाप्यते तथाहि प्रणमेत्यादौ तकार-माश्रित्य दीर्घः पञ्चमलोपश्च स्याताम् । उक्तञ्च कातन्त्रे "जग्धे सिद्धेऽन्त-रङ्गत्वाद् यपि यदुच्यते । ज्ञापयत्यन्तरङ्गाणां यपा भवति साधनम्" इति ।

१००. लिटि वेत्यनुपसर्ग इति स्मर्यते, उपसर्गाभावशिष्टस्य घणोनिमित्तस्य लिटि वेत्यनेन बाधित्वाल्लिटि परे अदेघस्लृ विभाष्यते । ननु किमर्थमिदम्? यतः अद् भक्षणे, घस्लृ अदने इत्याम्यां जघास आदेत्युभयं सिध्यति? मैवम् सृघस्यदोरमक् (४/१/९५) इति मरकविषयादन्यत्र घस्लृ अदने इत्यस्य प्रयोगो भाषायां नाभि-धीयते ।

१०१. अत्र पुनर्वाग्रहणं वस्थाने वादेशज्ञानस्य स्पष्टीकरणार्थम्, परत्र विकल्पनिवृत्त्यर्थ-मित्यपरे ।

१०२. वधादेशोऽदन्तः । आर्धधातुक इति विषयसप्तमी, तेनार्धधातुकोपदेशे अकारा-न्तत्वादतो लोपः, पा० २/४/४२ ४७,

१०३ **लुङि च। तङि वा ।**

लुङि हन्तेर्व्वधः स्यात् । अवधीत् । तङि वा, आवधिष्ट-आहत, अवधि-अघानि । ण्यति च, वध्यः, घात्यः । न जनवधेति वृद्धिनिषेधः ।

१०४. **इणिकोर्गा लुङि ।**

लुङ्यनयोर्गा स्यात् । अगात्, अध्यागत । अगायि ग्रामः । अध्यगायि पाठः ।

१०५. **णिसनोर्गमिरबोधने ।**

णौ सनि च इणिकोर्गमि स्यात् । गमयति ग्रामम्, जिगमिषति । अधिजिगमिषति अबोधने इति किम् ? अर्थान् प्रत्याययति, अध्याययति । इक्- अधीषिषति ।

१०६. **इङ: सनि ।**

सनीङो गमिः स्यात् । शास्त्रमधिजिगांसते ।

१०७. **गाङ् लिटि ।**

लिटीङो गाङ् स्यात् । अधिजगे ।

१०८. **णौ संश्चङोर्व्वा ।**

सन्. चङ् विषये इङो गाङ् वा स्यात् । अधिजिगापयिषति शिष्यं शास्त्रम्, अध्यजीगपत् । अध्यापिपयिषति, अध्यापिपत् ।

१०९. **लुङ्लृङोर्गीः ।**

अनयोरिङो गीर्व्वा स्यात् । अध्यगीष्ट —अध्यैष्ट । लृङि—अध्यगीष्यत — अध्यैष्यत ।

११०. **चक्षिङः ख्याञ् ।**

आर्धधातुके चक्षिङः ख्याञ् स्यात् । व्याख्याता । व्याख्यास्यति, व्याख्यास्यते, ञित्वादुभयपदी । कर्म्मणि व्याख्यायते । बहुलानुवृत्या नेह वर्ज्जने सञ्चक्ष्या दुर्जनाः । वर्ज्जनीया इत्यर्थः । सार्व्वधातुभ्योऽसिः, नृचक्षा राक्षसः । टन-विचक्षणः ।

---

१०५. गमेबोधनार्थस्य जिगमिषतीति इ गतावित्यस्य सेत्स्यति, ततो बोधनवर्ज्जनात् किमिष्टसिद्ध मित्युच्यते सनिगमिरयतिश्च बोधने नाभिधीयते ।

११०. भाष्ये तु (ख्शा) क्शा मुग्धबोधे क्सा इत्यादेशः, तेन चक्शौ, चख्यौ, ख्याता, क्शाता, क्साता इत्यादि पदं भवति ।

१११. **वा लिटि ।**

लिटि चक्षिङः ख्याञ् वा स्यात् । आचख्यौ, आचख्ये आचचक्षे वा ।

११२. **अर्जेर्व्वीरक्यघणप्सु ।**

अजेर्व्वीः स्यात् । प्रवायकः । प्रवणीयम् । वीत्वा । वीतः । अक्यादिष्विति किम् समज्या, समाजः, समजः ।

११३. **टनाकिद्हलोर्व्वा ।**

टनेऽकिद्हलि चाजेर्व्वी स्याद् वा । प्रवयणम् प्राजनम् । प्रवेष्यति प्राजिष्यति । प्रवेता-प्राजिता ।

११४. **प्यायः पीर्लिटयङोः ।**

लिटि यङि च प्यायः पी स्यात् । आपिप्ये, आपेपीयते ।

११५. **अप्रादेर्निष्ठायामाङस्त्वन्धूधसोः ।**

अप्रादे र्निष्ठायां प्यायः पी स्यात् । पीनो वाहुः, पीनवान् । अप्रादेरिति किम् ? प्रप्यानः । आङस्त्वन्धूधसोः, आपीनो अन्धुः आपीनमूधः । अन्धूधसोरिति किम् ? आप्यानस्कन्धकण्ठांसमिति भट्टिः ।

११६. **चाय कीर्यङि ।**

यङि चायते कीः स्यात् । चेकीयये ।

११७. **हनो घ्नीर्हिंसायाम् ।**

हिंसायां यङि हन्तेर्घ्नी स्यात् । जेघ्नीयते । हिंसायामिति किम् ? जंघन्यते ।

११८. **आदीर्घ्राध्मोः ।**

यङि घ्राध्मोरात ई स्यात् । जेघ्रीयते देध्मीयते ।

११९. **घु-मास्था.गा-पिब सा-हाको ऽक्वि-यपि क्ङिद्धलि ।**

हलादौ क्ङिति एषामादीः स्यात्-घु-दीयते धीयते, धेट्—धीतः धीतवान् । मीयते, स्थीयते, तेष्ठीयते, गै गीयते, पेपीयते, सीयते-व्यवसीयते, हीयते हीनः । पिब-हाक इति किम् ? पातेः-पायते । पातः । ओहाङ्-अ द्धायते, हानः । अक्वि यपि इति किम् ? क्विप्—संस्थाः, यप्—प्रदाय । तेनोद्गीय खलेनेत्यपि बाहुल्यात् आपीयेति पीङ् पाने ।

१२०. **लोङ्येत् ।**

लोङि तेषामादेत् स्यात् । देयात्, धेयात्, प्रमेयात्, स्थेयात्, गेयात्, पैपिवत्योः—पेयात् अध्यवसेयात् हेयात् । क्ङित्येव-दासीष्ट ।

१२१. **स्थोऽन्यस्य संयोगादेर्व्वा ।**

लोङि तिष्ठतेरन्यस्य संयोगादेर्धातोरादेद्वा स्यात् । ध्येयात्-ध्यायात् । ग्लेयात्—ग्लायात् ।

१२२. **दो-स्यति-मा स्था-मित्ति-किति वा च-शाच्छोः ।**

तादौ किति एषाभादित स्यात् । दित्वा, निर्द्दितम् । दितिः । अवसितवाम् । माङ्-मिति, मित्वा । स्थितिः । शाच्छोर्वा-निशितं-निशातम् । छितं छातम् । बाहुल्यात् नित्यं- संशितं व्रतमिति ।

१२२. **दो दद्धोः ।**

तादौ किति दोद्त् स्यात् । दत्वा । दत्तम् । दत्तवान् । धोरिरि किम् ? अवदातं वस्त्रम् । द्यतेरित्त्वमुक्तम् ।

१२४. **मरुत्प्राद्यचस्तो वा दीर्घश्चेणोऽनारम्भे ।**

मरुच्छब्दादजन्तप्रादेश्च तादौ किति वा द स्तः स्यात् । इणन्तस्य दीर्घश्च । मरुद्दत्तो-मरुदत्तो वा । प्रदत्तं-प्रत्तं वा । विदत्तं-वीत्तं वा । सुदत्तं सूत्तं वा । द्यतेरपि-अवत्तो सारः । अच इति किम् ? निर्द्दत्तम् । अनारम्भ इति किम् ? आदिकर्म्मणि न भवति, प्रदत्तम् ।

१२५. **धाञो-हिः । क्त्वि हाकश्च ।**

तादौ किति धाञो हिः स्यात् । हित्वा, विहितम् क्त्वि हाकश्च, हित्वा राज्यं वनं गतः । तीत्येव विहाय ।

१२६. **स्फायः स्फीर्निष्ठायाम् ।**

निष्ठायामस्य स्फीः स्यात् । स्फीतः, स्फीतवान् ।

---

१२३. ननु किमयं धान्तादेशः ? उत् दान्ता वा ? आद्ये रुधः (६/३/८६) इति धत्वम् स्यात्, उत्तरत्र निष्ठातो नत्वम्, न च वक्तव्यम्, सन्निपात (परि० ४०) इति तस्य वर्णग्रहणे निमित्तत्वात् ? सत्यम्, तान्तोऽयमादेशः पारम्पर्य्यात् । अनभिधानात्तौ न स्यातामिति स्थितम् । प्रदायेत्यत्र बहिरङ्गोऽपि यदन्तरङ्गान् बाधत इत्युक्तम्, अदो जग्धः (३/३/९९) इत्यत्रापवादत्वाद् ध्यातेर्न स्यादित्याह द्यतेरित्त्वमुक्तमिति ।

१२४. ननु द्यतिरपि घुसंज्ञकस्तस्य तो नस्यादिति तकारस्यापवादत्वादिति चेन्नैवम्, हलन्तापसर्गेऽनुपसर्गे तस्य चरितार्थत्वादित्याह द्यतेरपीति ।

१२६. स्फायी ओस्फायी वृद्धौ । ननु निष्ठायांस्फायतेरीकारान्तादेशे सति नेट्, स्वरान्तभिन्नत्वादनिट्त्वं सिद्धम्, तत् किमिदमनुबन्धेन ? न च वाच्यम्

१२७. स्त्यः स्तीः प्रात् ।

प्रात् स्त्यायतेर्निष्ठायां स्तीः स्यात् । प्रस्तीतः, प्रस्तीमः । प्रस्तीतवान् । प्रादिति किम् ? संस्त्यानः ।

१२८. श्यः शीः स्पर्शद्रव मूर्त्योः ।

अन्नार्थयोः श्यैङः शीः स्यात् । शीतो वायुः, शीतवान् । द्रवस्य काठिन्ये, शीनं घृतं, शीना वसा । स्पर्शादौ किम् ? आश्यानः कर्द्दमः ।

१२९. प्रतेश्च । अभ्यवदपूर्वस्यवा ।

निष्ठायां प्रतेश्च श्यैङः शीः स्यात् । प्रतिशीनः, प्रतिशीनवान् । अभ्यवपूर्व्वस्य वा; अभिशीनः, अभिश्यानः, अवशीनः, अवश्यानः । अवशीनवान्, अवश्यानवान् ।

१३०. शृतं क्षीरहविषोः पाके ।

श्रातेः श्रपेश्च निपात्यते । शृतं क्षीरम् । शृतं हविः । अन्यत्र-श्राणा श्रपिता यवागूः ।

न शकादे रिति पञ्चमी निर्द्देशात् काण्डादिविहितार्धधातुक एवानिटत्वं विहित-मिह तु यान्तादविहितनिष्ठायां कथमीदन्तादनिट्त्वं स्यादिति । निष्ठायां-मिति विषयसप्तमीयम् । तत आदेशान्तरमेव निष्ठोद्भव इति? सत्यम्, अत्रेदनु-बन्धकरणादनित्योऽयमादेशः । तेन स्फातः स्फातवान् । इहेट् प्रतिषिध्यते ।

१२९. प्रतिपूर्व्वोऽयं योगे एव प्रवर्त्तते, अतः पूर्व्वेण न सिध्यतीति वचनम् । अभ्यव— अभ्यवौ पूर्व्वौ यस्मात्तस्य श्यैङः शीर्विभाष्यते । स्पर्शद्रव मूर्त्योर पीयम्, परत्वात् प्राप्तेऽन्यत्रापाप्तेत्युमयत्र विभाषेयम् ।

१३०. श्रा पाके इत्यादौ, श्रै पाके इति भूवादौ, द्वयोरेव पुनर्घटादौ पाठः विशेषार्थो-पादानादिति गणवृत्तौ व्याख्या । इह केवलस्य णिजन्तस्य च निपात इत्याह श्रातेः श्रपेश्चेति । अत्र क्षीरपदं जलदुग्धपरमिति क्षीरभट्टः, ''पिबेदर्धशृतं पयः'' इति वैद्यकप्रयोगात् । ननु कथं प्रयोजकणिजन्तयोः श्राति-श्रयत्योश्च श्रपेरित्युक्तं भाष्यविरोधात् । तथाहि ''श्रपेः शृतमन्यत्र हेतोः'' इति भाष्यम् । अत्रोच्यते, इमौ पच्यमानकर्त्तृकावकर्म्मकौ, पक्तृकर्त्तृकौ सकर्म्मकौ, पच्यमान-कर्त्तृकाभ्यामुत्पन्नेन णिचा पक्तृकर्म्मकत्वमेव प्रतीयते । यथा श्रपयति वटुः पुराडोशम्, श्राति श्रापयति (श्रयति) वा बटुः पुरोडाशमितिवत् । ततश्च विक्लित्त्यर्थस्य पचेः समानार्थस्य श्रातेर्णिजन्तस्य केवलस्य च समानार्थता, ततश्च प्रयोजकणिजन्तावप्यर्थान्तराप्रतीतेः पक्तृ कर्त्तकतुल्यत्वेमेति नान्या प्रयोजकप्रतीति । तेन श्रपे शृतमन्यत्र हेतोरिति सूत्रे पाचायितरि हेतौ न

१३१. **वचिस्वपियजादेः साचो यण इक् किति ।**

किति वच्योदः साचो यण इक् स्यात् । उक्तम् । ऊचुः, प्रोच्यते । सुप्तम् सुप्यते । यजादेः-यजि वपि वहि वसि वेञ् व्येञ् ह्वेञ् वद् श्वि । इत्येतस्य इज्यात्, इष्टिः उप्यते । ऊढम् । उषितम् । उतम्, साचो ग्रहणात् व्येञो यस्यैव संवीतम् । आहूतम् । उदितम् । उच्छनः । संवादित इति बद स्थैर्ये ।

१३२. **सनि प्रच्छः ।**

यण इक् स्यात् । पिपृच्छिषति ।

१३३. **स्वपेश्चङ् यङ्लुकि च ।**

एषु सनि च स्वपेयर्ण इक् स्यात् । सुषुप्सति । असूषुपत् । सोषुप्यते । सोषुपीति-सोषाप्ति ।

१३४. **स्यमिव्योर्यङ्लुकोः ।**

अनेयोर्यङि यङ्लुकि च साचोयण इक् स्यात् । सेषिम्यते सेष्यन्ति । वेवीयते वेवेति- वेवयीति । आर्धधातुके इति निर्वृत्तम् ।

१३५. **भ्रम-जि-ग्रहि-व्रश्चि-प्रच्छि-ज्या-वयि-वष्टि-व्यधि-व्यचां क्ङिति ।**

एषां क्ङिति साचो यण इक् स्यात् । भ्रष्टं, भ्रच्यात्, भ्रज्जति, वरीतज्जयते । ग्रहीतम् । ग्रहणाति । वृक्णम् । वृश्चति। पृष्टम्, पृच्छति । जीनः । जिनाति । ऊयतुः, ऊयुः । वश-उशितम्, उश्यते, उशन्ति । व्यध-विद्धम, विध्यति । व्यच- विचितम्, विचितिः, विचितवान् ।

स्यादित्यर्थः । इहापि समर्थितो निपातस्येष्ठविषयत्वात् । अयमत्रार्थः संक्षिप्तः श्रृतं क्षीर स्वयमेवेति पच्यमानकर्त्तृकस्य श्रृतं क्षीरं बटुनेति वा पक्तृकर्त्तृकस्य श्रपयतेरप्येवं श्रृतं क्षीरमृत्विना यजमानेनेति प्रयोगो न स्यात् । किन्तु श्रपितमेव अतएव श्रोहविः क्षीर पाके प्रयोजकस्याप्रजोजकत्वमिति वासवतं सूत्रम् । अन्य-त्रेति क्षीरहविषोः पाकादन्यस्मिन्नित्यर्थः । श्राणा यवागू (४/२/४८) इति निष्ठानत्वम् ।

१३१. साच इति स्वरस्य यवरल (स्थाने) इ उ ऋ लृ आदिश्यते यथाक्रमम् । लकारस्याभावात् लृदित्यादेशाभावः, यजादौ तदभावात् । यथा क्रमानुरोधा-देव न स्वर्णग्रहः । ननु ऐजेचश्चेतिवत् स्थाने सदृशनमोऽव्यक्तयोगे इति नाव्य-याद् भविष्यति । मैवम् श्रि-व्या-ज्या (३/३/१४१) इत्यत्र दोर्घकरणेवैयर्थ्यं स्यात् न च ह्रस्वपक्षे तस्य चारितार्थता, इत्युपादानात् ।

१३२. ऋपूङ् (३/४/१०६) सनः कित्त्वाभावाद् वक्ष्यमाणेन निषिध्यतीति वचनम् ।

१३३. एष्विति जात्यपेक्षं बहुवचनम्। चकारः सनः समुच्चयार्थः ।

१३६. ह्वो द्विरुक्तिहेतौ णिव्यवाये च ।

ह्वेञोऽत्र यण इक् स्यात् । जुहाव जोहूयते जुहूषति, णिव्यवाये च—जुहावयिषति । अजुहवत् । द्विरुक्ति-हेतोरिति किम् ? ह्वाययाञ्चकार ।

१३७. श्वेर्वा लिड्यङोः, णौ च संश्चङोः ।

अत्र श्वेर्यण इग्वा स्यात् । लिटि—शुशाव-शिश्वाय शुशुवतुः-शिश्वियतुः । यङ्-शोशूयते- शेश्वीयते । णौ च संश्चङो-शुशावयिषति-शिश्वाययिषति (शिश्वायिषति) । अशूशवत्-अशिश्वयत् ।

१३८. न व्या-ज्या-वेञो लिङ्पयोः ।

एषां लिटि यपि च यण इक् नास्ति । संविव्युः संव्याय । जिज्यतुः, प्रज्यायः । ववुः, प्रवाय । न व्यादेशस्य निषेधः, पृथगुपादानात् ऊयुः ।

१३९. परेर्व्यो यपि वा ।

यपि परेर्व्यो यण इग्वा न स्यात् । परिवीय-परिव्यायः ।

१४०. वशेर्न यङि ।

यङि वशेर्यण इक् नास्ति । वावश्यते ।

१४१. शिव-व्या-ज्या ह्वामिग् दीर्घः ।

एषां यण इग्दीर्घो भवति । शूनम् । संवीतम् । जीनः । आहूतम् । कथं जिनाति ? प्वादि ह्रस्वत्वात् ।

१४२. एचः आदेऽशित्यात् ।

अशिति प्रत्यये परे धातोरुपदेशमात्रे एच आत्वं स्यात् । धेट्-धाता, धातुम्, धीयते । ग्लै-ग्लाता जग्लौ ग्लानम् । दो-दाता, दातव्यम् । अशितीति किम् ? धयति-शुनन्धयः ।

१४३. न व्यो लिल्लिटि ।

वेञो लिल्लिटयात्त्वं नास्ति । संविव्याय । संविव्ययिथ । लिल्लिटीति किम् ? संविव्युः ।

---

१३७. णौ च संश्चङोरिति सम् चङ् विषन्ने णौ च श्वयतः साचो यण इग्विभाष्यते । अतोऽन्तरङ्गापि वृद्धिर्बाध्यते । स्वरूपग्रहणाद् वा आह 'शुषावयिषतीति ।

१४३. ननु किति सम्प्रसारणे (यण इकि) इपि संविव्युरिति सिध्यतेवेति प्रागेव व्याख्यातं तदेकारयुज आकारयुजो वा स्यादिति न कश्चिद् विशेषः तत् किं लिट्विशेषणेन प्रत्याख्यातम् ; सत्यम्, लिदिति नियमार्थं विकल्पार्थं वा, उक्तञ्च, सिद्धे (परि० ११) इति । तेनाकित्यात्त्वं विभाष्यते । तथा च भट्टिः "संविव्युर्देहान्" इति । तत्र नञा निर्दिष्टमनित्यमित्यन्ये ।

१४४. मि-मीङ् दीङां यपि च ।

एषामेज्विषये यपि च विधिबलादिच आत्वं स्यात् । प्रभातव्यम् । प्रमाय । उपमातव्यम् । उपमाय । उपदातव्यम् । उपदाय । घण्-उपदायः ।

१४५. न निमिमीलियां खलपोरचि च ।

ईषन्निमेयो निमयः । दुष्प्रमयः, मयः, ईषल्लयो लयः ।

१४६. लियो वा ।

लीलीङोरेज्विषये यपि च विधिबलादिच् आत्वं स्याद् वा । अलासीत्-अलैषीत । अलान्त-अलेष्ट । विलाता-विलेतो । विलानम्-विलयनम् । विलापयति-विलाययति, विलाय-विलीय ।

१४७. नित्यं स्फुर स्फुलोर्घणि ।

घण्यनयोरच आत्वं स्यात् । विस्फारो विस्फालः ।

१४८. ढे सहि-वहोरोदवर्णस्य ।

ढे परे सहिवहोरवर्णस्य ओद् भवति । सोढ़ा । असोढाम्, सोढ्वा, सढ्वित्यपि भाषायामपीच्छन्त्येके ।

१४९. दीधीवेव्यो-रीलुक् यीवर्णयोः ।

यीकार उच्चारणार्थः । यकारेवर्णयोः परयोरनयोरीलुक् स्यात् । आदीध्यते । आदीध्ये गतः । दीधितिः । वेव्यते । छान्दसाविमौ धातू ।

१५०. आदेर्णो नः ।

गणपाठे धातोरुपदेशे आदेर्णो नकारः स्यात् । णीञ्-नयति, णम्-नमति ।

---

१४४. मिनोति मीनाति दीङाम् यपि चेति ग्रहणाद् गुणवृद्धिस्थाने आत्वं स्यादित्याह एज्विषय इति । भोक्तुकामन्यायात् स्वरस्यैव, न स्वरव्यञ्जनसमुदायस्येत्याह इच् हति । तत् कथं सम्पद्यतामित्याह विधिबलादिति । कातन्त्रे तु सनि दीङ आत्वविधानात् उपदिदासत इति । ऊन ईषदुपादानम् ।

१४८. ननु सहिवहोराकार एव नास्ति, तर्हि किं सवर्णपरिग्राहकवर्णग्रहणेनेत्याह अवोढामिति । वह-लुङ्-प्रभृतिः, अतएव तेनाकारस्य ओकारः ऊढयत्यादौ तु अन्तरङ्गानित्यत्वाच्च यण इक्, सहे क्त्व विभाषेत्यन्ते :

१५१. षः सोऽसुप् ष्ठिवु-षुग्धीनाम् ।

गणपाठे धात्वादेः ष स स्यात् । ष्ठा—स्थाता, ष्मिङ्—स्मयते । असुवादीनामिति किम् ? सुद्धातोःषोड़ीयति, षडदन्ता यस्य-षोडतृ पृषोदरादि, षोडन्तमाचष्टे णिच् टिलोपः पचाद्यच—षोडस्ततः क्यच् । ष्ठिवु-निष्ठीव्यति, षुग्ध-षुग्धति ।

इति श्रीपद्मनामदत्तकृतौ सुपद्मव्याकरणे
ततीयस्याध्यायस्य तृतीयः पादः

———

१५१. येवर्णयोरिति वक्तव्ये यीवर्णयोरिति कथ मुक्तमित्याह यीकार इति । दीधीङ दीप्तिदेवनयोः, वेवीङ् वेतिना तुल्ये इमौ छान्दसाविति केचिदिच्छान्ति; तन्मतमाह छान्दसाविमौ धातू सहवहेश्च्छन्नसीतिवत् ।

चतुर्थः पादः

अट्-प्रकरणम्

१. अट् प्रागमाङि लुङ्-लङ्-लृङ्क्षु तेनाजादेस्तु वृद्धिश्च ।

अमाङि योगे लुङ्-लङ् लृङ्क्षु परतो धातोः प्रागडागमो भवति । अभूत, अभवत्, अभविष्यत् । तेन अटा सह अजादेस्तु वृद्धिश्च । अध्यैष्ट, अध्यैत, अध्यैष्यत । संग्रामयतेरुपसर्गात् प्रागटमिच्छन्ति असंग्रामयत् । संग्राम युद्धे ऽप्यस्ति । अमाङीति किम् ? मा त्वं भूः, मा स्म भवन्तौ स्याताम् । नाजादिसुपोऽक्ताद्यन्तस्य । अप्सरायत । क्ताद्यन्तस्य तु—औजढत् । इहाभ्यासादेशयोः कृतयोरजादित्वम् । ऋ-ऐयः । वश-औष्टाम् । यज्-प्रैज्यत ।

२. द्वि राद्येकाशादेशः स्थानिवच्च ।

आदिरेकाज्वर्णः प्राग् द्विर्भवति । इत्यधिक्रियते । एकाजिति बहुव्रीहि । "आद्यन्तवदेकोऽपि स्वरो द्विरुच्यते" । इयाय । पपाच । आट । द्वित्वे कर्त्तव्येऽपि परे कृतादेशः स्थानिवत् । निनाय, ययुः, जघ्नुः । आय्लुगादेशयोः स्थानिवत्त्वेन द्वित्वम् । अचीति किम् ? जेघ्रीयते । यङीत्वं न स्थानिवत् एतदेव ज्ञापकं "अन्यकार्यात् शरद्विरुक्तिर्लिङादिषु" इति ह्वेञ्-जुहाव । त-तीतिर्व्वान् । पॄ-पपूर्व्वान् ।" "णिलोपो द्विरुक्तेः परः तेनाजादेर्द्वितीयो द्विर्भवति । आटिटत् । "णौ कृतं स्थानिवदेव"-अजुहवत् ।

---

१. इकरोऽत्रासेवात्(१/३/५५/) इत्यत्रस्य विशेषणार्थः । ये पुनः संग्राम युद्धे चुरादौ न मन्यन्ते तन्मतमाह संग्रामयतेरिति । संग्रामं परस्परहिंसनं सम्पादयति "संग्रामयतीत्यर्थ । स्वमतमाविष्करोति संग्राम युद्धे इत्यादि, कथं मा निषाद प्रतिष्ठां त्वमगमः" इति । आङिता माशब्देनिति केचित् तन्न, माङि लुङ् (३/२/७३) इतिकालसामान्ये लुङ्मुपपत्तेः । तर्हि चिन्त्यमेतदिति पुरुषोत्तमः नाजादिसुपोऽक्ताद्यन्तस्येति क्ताद्यन्तरहितस्यजादिषु धातोरडेव नास्ति—यथा ओजायत, ओजायिष्ठ ओजविष्यत । एवमप्सरायतेत्युदाहरति । ओजढदिति कातन्त्राः । ननु सुबादिनां वृद्धिरादेरिति—वृहिश्चान्तङ्गमप्याडागमं परिहृत्य वृद्धिः प्रवर्त्तिष्यते किं तेनेत्यनेन ? सत्यमेतत् तेनेत्यनैतदावेदितम्, अडागमात् प्राग् द्विरुक्तिर्बहिरङ्गो लाक्षणिकस्यापीह वृद्धिरिति स्वप्राधान्यबोधकतृतीयान्तत्वादित्याह इहाभ्यासादेशयोः कृतयोरजादित्वमिति ।

२. ननु एकस्वरश्चेद् द्विरुच्यते कथं हल्सहितस्य द्विरुक्तिरित्याह एकाजितीति । एकोऽच् अवयवो यस्य स तथा, अज्झलसमुदायः समासार्थोऽवयवस्य समुदाये-

३. **हलादिसंयोगे शरपूर्व्वस्तु खय् प्राक् शरः ।**

संयोगे (द्विरुच्यमाने) सति आदिभूतो हलेकाच् द्विर्भवति । ध्वन्-दध्वान । शरपूर्व्वस्तु खय् शरः प्राक् एकाच् द्विर्भवति । चुश्च्योत । निर्दिष्ठेव, चस्कन्द ।

४. **अजादेर्द्वितीयो वनदरादौ त्वन्तः ।**

अजादेर्धातोर्द्वितीय एकाच द्विर्भवति । आटिटिषति । णेरलोपे आटिटत्, व-न-दरादौ—संयोगेन्तोऽलेकाच् द्विर्भवति । व-उव्जिजिषति । न उन्दिदिषति, ऊञ्छिषति । द-अद्डिडिषति, र-अर्चिचिषति, अर्कायितुमिच्छति, अर्चिकायिषते ।

५. **ईर्ष्यो यः, सन् वा ।**

द्वि स्याद् वा । ईर्ष्यियिषति, ईर्ष्यिषिषति ।

६. **र्य्यन्ययोरणौ ।**

र्य्यन्योः संयोगे र्णौ द्विरुच्यते । अरार्य्यते । अर्य्यमाख्यातवान्-अरर्य्यत्, अनन्यत् ।

न्तर्भावात् हल्सहिताचो द्विरुक्तिरिति सिद्धम् । तर्हि कथमटत्यादेः स्वरमात्रस्य द्वित्वं स्यादतः कर्म्मधारयोऽप्युच्यतामिति चेदुभयसमासाभ्युयगमे वाक्यभेदः स्यादित्याह "आद्यन्तवदेकम्" इति । उदाहृतं क्रमशो द्वयम् । अच्यादेश स्थानिवदिति व्याचेष्ट द्वित्व इति । अन्यकार्य्यात् परा द्विरुक्तिस्तर्हि कथमाटिट-दित्याह णिलोपो द्विरुक्तेः परे इति । ज्ञापक—(परि० ८२) इत्यनित्यत्वा-भ्युपगमादित्यभिप्रायः । कथमजूहवदित्यादौ हौ शब्दस्य द्विरुक्तिरित्याह णौ कृत्वं स्थानिवदिति । णौ णिचि यत् कृतं तत् सर्व्वं स्थानिवदवेत्यर्थः ।

३. इह हल्ग्रहणमादिभूतस्य हलोद्विर्वचनार्थम् न पुनवर्णमात्रस्य । अन्यथा अचिक्षिषतीत्यादौ पूर्व्वस्य द्विरुक्तिभवेन्न-द्वितीयस्येति । एतेनैतदुक्तं भवति संयोगादेरादिहल् द्विरुच्यते न तु संयोगमात्रवतः ।
शरपूर्व्वस्त्विति, शर—पूर्व्वो यस्तात् स शर—पूर्व्वः न पुनः शरः पूर्व्वः । पप्सावित्यत्र पकारस्य द्विरुक्तौ वैयर्थ्यापत्तेः तिष्ठेव इति वौपः ।

५. ईर्ष्य ईर्ष्यार्थः, तस्य यः सन् वा द्विरुच्यते । वाशब्दः समुच्चयार्थः । यकार-द्विर्वचनं पूर्वेण प्राप्तमप्यनूद्यते क्रमव्यवस्थार्थम्, तेन युगपन्न स्यात् । तथा च "ईर्ष्या" यः सन् वा द्विरिति चान्द्रं सूत्रम् ।

७. **ऊढयत्यादेः प्रकृत्याचाद्यप्रकृत्यन्तः ।**

एषां प्रकृत्यचा सह सूत्र प्रकृत्यन्तो द्विर्भवति । ऊढमाख्यातवान्-औजढत्, वहो हकारस्य ढस्य लुप्ताकारेण सह द्विरुक्तिः । एवं ऐजष्टत् ।

८. **कण्डूयादेर्यः ।**

एषां यो द्विरुच्यते । कण्डुयियिषति । असूर्यियिषति ।

९. **अजादेर्नाम्नो वा यथेष्ठन्तु हलादेः ।**

अजादेर्नाम्नो यकारो द्विर्व्वा स्यात् । अश्वीयियिषति । अशिश्वीयिषति । हलादेर्नाम्नो यथेष्टं द्विरुच्यते । पुपुत्रीयिषति; पुतित्रीयिषति, पुत्रीयियिषति, पुपुतित्रीयियिषतीत्यादि ।

१०. **पूर्व्वोऽभ्यासः ।**

धातो द्विरुक्तस्य पूर्व्वोऽभ्याससंज्ञः स्यात् ।

११. **द्विरुक्तजक्षादिषट्के अभ्यस्तम् ।**

द्विरुक्तमुभयं जक्षादिषटकञ्चाभ्यस्तसंज्ञः स्यात् । जुह्वति, ददति, जक्षति । जक्ष, जागृ; दरिद्रा, चकासृ शासु, दीधी । अभ्यस्तदेशाः अन्तोऽदभ्यस्तादित्येवमादयः ।

---

७. इह प्रकृतिपदेन प्रत्ययप्रथमक्रियमाणस्य ग्रहणे सिद्धे यन्मूलप्रकृतीत्युक्तं तच्छब्दजननकारणं धातुग्रहणार्थम् अतएव वहो हकारस्य ढस्य लुप्ताकारेण द्विरुक्तिरित्युक्तम् । अतस्तत्र प्रकृत्यचा पदेन प्रत्ययो चेति तात्पर्यम् । तथाहि मूलप्रकृत्यान्तोऽकारादे प्रत्यया चेति, क्रमदीश्वरः प्राह, एवमूढिमाख्यातवान् औजिढदिति । तथा असिद्धं (परि० ४२)इति न्यायात् प्रकृतेः पूर्व्वं पूर्व्वं स्यादित्यन्तरङ्गमित्यन्तङ्गे द्विर्वचनेन कर्त्तव्ये ढत्वं बहिरङ्गसिद्धं भविष्यति, ततश्च णौ कृतं स्थानिवदेवेति लुप्तस्वरेण सह द्विर्भविष्यति किमनेनेति ? सत्यम्, तस्यासिद्धवद्भावस्य द्विर्वचने निराकृतत्वात् । तथा च वार्त्तिकम् "पूर्व्वत्रासिद्धीयमद्विर्वचने" इति द्विर्वचनादन्यस्मिन् कार्य्ये परकार्य्यमसिद्धं भवति, द्विर्वचने कार्य्ये न भवतीत्येतदुक्तम् । एवमग्निमाख्यातुमिच्छति अजिग्नयिषति अगतेर्निप्रत्यये अग्निरित्युणादौ ।

११. अत्र दीधीत्युपलक्षणम् । वेवीत्यपि । अथ दीधीधातोरभ्यस्तसंज्ञया किं प्रयोजनम्? यत आदीध्यते इत्यत्र "तङानतः" इत्यनेनैव सिद्धः । अथादीध्यूरवेवधुरित्यत्र "लङः" (३/२/९०) इति प्रयोजनञ्चेत्, न तस्य छान्दसत्वात् । तथाहि व्यत्ययो बहुलमिति वचनात्तत्रैव परस्मैपदम्, अतः पञ्चैते भाषायां व्यवस्थिता इति दुर्गः । छान्दसा अपि क्वचिद् भाषायां प्रयुञ्यन्त इत्येके ।

१२. **लिट् संश्चङ्-यङ् लुक्ष्यनभ्यासस्य ।**

एषु धातोर्द्विरुक्तिः स्यात् । डुढौके, चिकीर्षति । अचीकरत् । चेक्रीयते । यङ् सान्निध्यात् यङ्लुकि च । चर्करीति, चर्कर्त्ति । एतत् पृथगुपादानम् खलु ज्ञापयति, यङि यत्कार्यं तत् यङ्लुकि न भवतीति । अनभ्यासस्येति किम् ? चेक्रीयिषते । अस्थानिवत्त्वान्न लिडामि— दयाञ्चक्रे ।

१३. **जुहोत्यादेः कर्त्तरि सार्व्वधातुके ।**

एषां कर्त्तरि सार्वधातुके द्विः स्यात् । जुहोति, जिह्रेति जिहीताम्, अमिमीत, जह्यात् ।

१४. **पदमाभीक्ष्ण्यवीप्सयोः ।**

अनयोः सुप्तिङन्तस्य द्विरुच्यते । आभीक्ष्ण्येभुक्त्वा भुक्त्वा व्रजति । नदीमवस्कन्दमवस्कन्दमुपस्पृशति । वदति वदति, लुनीहि लुनीहि इत्येवायं लुनाति । आमन्त्रणे— भीम ! भीम ! पश्य पश्य । युगपद्व्याप्तुमिच्छा वीप्सा गृहे गृहे अश्वाः, नदीं नदीमवस्कन्दमुपस्पृशति । इहाढ्यतरमाढ्यतरमानय । *न समासे । नद्यवस्कन्दमाचामति ।

---

१२. इह लुक्पदेन यङ्लुगुच्यते, भवति च तत्सान्निध्यात्तद्व्यपदेशः । यथा— गङ्गासमीपदेशो गङ्गेति । "गुणो यङ्लुकोः" इत्यादौ तथादर्शनादित्याह यङ् सान्निध्यादिति । ननु चेक्रीयितग्रहणे चेक्रियितलुगन्त स्यापि ग्रहणमिति कातन्त्रे परिभाषितम्, तदिहाश्रीयताम्, किं पृथक् ग्रहणेनेत्याह एतत् पृथगुपादानमित्यादि । तेन जङ्घन्ति जङ्घनीति इत्यादौ "हनो घ्नीः" (३/३/११७/) इति घ्नीर्नस्यादिति । चेक्रीयिषत इतीच्छार्थे सन् तेनैकस्मिन् प्रतिनिमित्तं न द्विरुक्तिरिति तात्पर्यम् । अथ "भीह्री" इत्यत्र द्विकरणसामर्थ्याद परत्र लिटचामि कृते द्विर्वचनं न स्यादित्याह न लिडामीति ।

१४. सुप्तिङन्तं समस्तमेव द्विरुच्यते न पुनर्धात्वेकदेशमात्रम् । आभीक्ष्ण्यं साध्यरूपक्रियाया पुनः प्रवृत्तिः । सा पुनः क्वचित् प्रधानम्, पचति पचति पचति । क्वाचिदवछिन्ना, जीवति जीवति । क्वाप्यनु (न्य) क्षणान्तरिते गौणोऽविच्छेदः । यथा भुक्त्वा भुक्त्वा व्रजति । अत्र व्रजलक्षव्रणेनान्तरितं मुहुर्भोजनम् । आभीक्ष्ण्यप्रकर्षोभयविवक्षायां कृतद्वित्वतिङन्तात्तरतमौ । यथा पचलि पचतितराम् । गच्छतिगच्छतितराम् । सोपसर्गे च प्रपचति प्रपचति । पुनः पुनर्मधु पिबति मधुपायीत्यत्र णिन्प्रत्ययेनोक्तार्थत्वान्न द्विः । इत्यादि । सजातीयानामर्थानां क्रिया-गुण-द्रव्यै-र्युगपद्व्याप्तुमिच्छा वीप्सेत्यर्थः । सर्व्व एव गृहा युगपत् अश्वैर्व्याप्ताः । गुणव्याप्तौ ग्रामो ग्रामो रमणीयः ।

१५. **त्रिश्चतुरपि सम्भ्रमे ।**

त्वरायां पदं त्रिश्चतुरपि भवति । अहिरहिरहिः, पश्य पश्य पश्य पश्य ।

१६. **गुणसादृश्यपीड़ानुपूर्व्येषु बहुलं समासवत् ।**

एषु द्विरुक्तं पदं बहुलं समासवत् स्यात् । गुणे—सुखसुखेन, प्रियप्रियेण । सादृश्येऽपि गुणवचनस्यैवेष्यते—पटुपट्वी, मृदु-मृद्वी, पूर्व्वपदस्य पुंवत् । "मन्दमन्दमुदितः प्रययौ खं, भीत-भीत इव शीतमयूखः ।" पीडायां—गतगता नष्ट-नष्टा । आनुपूर्व्ये—ज्येष्ठज्येष्ठं प्रवेशय, एकैकमक्षरं जपति । बाहुल्यात्-"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्" इति ।

---

१६. गुणादौ गम्ये तत्तत्प्रत्यायकं पदं द्विरुच्यते तच्च बहुलं समासवत् । इह समासातिदेशे कर्मधारियातिदेशे एव पुंवत्त्वस्य वक्ष्यमाणत्वात् । सुब्लक पुनर्वृत्तिमात्रे । यद्वा द्विरुक्तस्य समासकार्यातिदेशात् तदन्यथानुपपत्त्या द्विरुक्तिरवसीयते जातिशक्ति पक्षे गामानयेति वत् । गुणे—सुख सुखेनेति । तेन "अकृच्छे प्रियसुखयोरन्यतरस्याम्" (पा० ८/१/१३) इति वक्तव्यम् । इहाकृच्छ्रकृच्छ्रौ प्राणिधर्मौ, तेन द्रव्यवृत्तौ न स्यात् । प्रियः पुत्रः सुखोरथः । पक्षे सुखेन प्रियेण ददति, इदञ्च द्विर्वचनं गुणविशिष्टद्रव्यवृत्तश्चष्यते । यथा शुक्लशुक्लपटः शुक्लशुक्लमस्य रूपम् । सादृश्येऽपीत्यादि बाहुल्यादित्येवधेयम् । (तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम्) गुणमुक्त्वा यो गुणिनि वर्त्तते स गुणवचनः । पटुपटुः । भागवृत्तिकारस्तु जातीयेऽपि सादृश्ये भवतीत्युक्तवान् । अत्रोक्तार्थत्वेऽपि जातीयश्चेष्यते । पटुपटुः जातीयः पण्डितपण्डितजातीयः । मृदुमृद्वीत्यत्र पुंवद्भावः । मन्दमन्दमुदित इत्यत्र समासवद्भाव एव बाहुल्यात् । क्रियावचनस्यापीत्याह भीतभीत इवेति । "वसन्ते भीतभीतेन कोकिलेन वने रुतम्" इति क्रियावचने पुरुषोत्तमः । पीड़ायां हा तातेति हाशब्देनोक्तार्थत्वात् न द्विः । आनुपूर्व्ये इति ज्येष्ठज्येष्ठमित्यादौ प्रथमं सर्व्वज्येष्ठः ततः पश्चात् तत्कनीयानितरेभ्यो ज्येष्ठ इत्यनुक्रमेण प्रवेशनीय इत्याभीक्ष्ण्यवीप्साभिन्नवृत्तित्वाद्भिन्नविधिः । एवं मूले मूले स्थूलाः, अग्रे अग्रे सूक्ष्मा इत्यादावपि बोध्यम् । आधिक्ये वाक्यञ्च यथेष्ठं बाहुल्यात् । अहो लावण्यमहो लावण्यं तरुण्याः । मह्यं रोचते मह्यं रोचते । अत्र लावण्यस्य रुचेश्चाधिक्यं द्वित्वात् प्रत्येतव्यम् । एवं "नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः" । तथा विषादादावपि "हा हन्त नलिनीं गज उज्जहारे" ति । युक्त प्रसमुपोदामुपसर्गानां पादपूरणे द्विर्वचनं दृश्यते तच्छान्दसम् । तथाहि "प्रसमुपोदः" छान्दसाः इति पुरुषोत्तमः । यथा "प्रप्रगृह्य महादेवः संसंयम्य मनः सदा । उपोपहाय संसर्गमुद्भूतः सः तापसः" इति ।

१७. **उपर्य्यध्यधसः सामीप्ये ।**

एते सामीप्ये द्विः स्युः । उपर्य्युपरि, अध्यधि, अधोऽधो ग्रामम् । सामीप्ये इति किम् ? सर्वस्योपरि चन्द्रमाः ।

१८. **परिरसमासे वर्ज्जने ।**

द्विः स्यात् । परिपर्य्युदधेः । समासे तु—पर्य्युदधि वृष्टो देवः ।

१९. **डाचि प्रकृत्या तश्च लुगनुकरणे ।**

अनुकरणे डाचि परे पदं प्रकृत्या द्विर्भवति । तान्तस्य तलुक् च । पटपटाकृत्य, खरट्खरटाकरोति । अनुकरण इति किम् ? सुखाकरोति ।

२०. **इतरेतरान्योन्यपरस्परं क्लीबमेकत्वे सुपश्च स्त्रीनपुंसकयोराम् वा ।**

इदं त्रयं कर्म्मव्यतिहारवृत्ति निपात्यते । नित्यमेक वचनं क्लीबञ्च, तेभ्यश्च स्त्रीनपुंसकयोर्व्वर्त्तमानेभ्यः सुपः आम् वा स्वात् । इतरेतरम्-इततेरां वा, स्त्रियौ कुले वा स्पर्द्धते । इतरेतरेण—इतरेतरां वा, स्त्रीभ्यां स्त्रीभिर्व्वा कुलाभ्यां कुलैर्व्वा स्पर्द्धयते एवं अन्योऽन्यं, अन्योऽन्येन— अन्योऽन्यां—परस्परस्य परस्परां वा मित्रे व्यतिस्तुतः । पुंसि तु आम् न भवति ।

---

१७. सामीप्यं देशकालकृता प्रत्यासत्तिः । उपर्य्युपरि दुःखम् उपरि शिरसो घट इत्यत्र सदपि सामीप्यं न विवक्षितम् । किन्त्वौत्तरधर्म्यमेव, अध्यधि शिरसं मेघः, नवानधोऽधोबृहतः पयोधरानिति ।

१९. अशक्तिजमसाधुशब्दरूपमनुकरणम् । अनुकरणे डाचि परे अनुकृतं पदं प्रकृत्या द्विरुच्यते । सति सम्भवे अन्तस्य लुक् च । अत्र कृतटिलोपस्य द्विर्वचने प्राप्तेऽकृतद्विर्वचनस्य टिलोपस्य द्विर्वचनार्थं प्रकृत्येति वचनमभ्यासस्य स्वरान्तत्वप्रत्यायकम् । अन्यथा टेः (५/१/५५) इति टिलोपे हलन्तता स्यादिति ।

२०. इदं त्रयं स्वतः कर्म्मव्यतिहारवृत्ति, सर्वनाम च कृतद्विर्वचनं निपात्यते । विपर्य्ययेण क्रिया प्रवर्त्तनं कर्मव्यतिहारः, तत् पुनः क्रियाविशेषणवत् नित्यमेकवचनं क्लीबलिङ्गञ्च तेभ्य इतरेतरादिभ्यश्च स्त्रीनपुंसकविषयेभ्यः सुप आम् विभाष्यते । एभ्यः प्रथमा नाभिधीयते इति वृद्धाः । अयन्तु तन्न मन्यते । इतरेतरमिति इतरा इतरां स्पर्धते सापि तामित्यर्थ । क्लीबत्वेऽपि डतरादिभ्यः (२/३/ १) इति सूत्रे पञ्चभ्य इति विशेषणात् स्वमोर्डतु न हीयते । अथवैषां सर्वनामगणेऽनुपदिष्टानां निपातस्येष्टिविषयत्वात् न सर्वनामत्वम्, न तु

२१. **यथास्वे यथास्वम् ।**

अत्रेदं निपात्यते । "यथायथं ताः सहिता नभश्चरैः ।"

२२. **क्वचिद्द्वन्द्वघनाघनौ ।**

एतौ क्वचिदर्थे निपात्येते । द्वौ द्वौ द्वन्द्वम् । कल्पयुग्मयोः, द्वन्द्वो नाम समासः । शक्रादौ घनाघनः ।

२३. **चराचरादयो वा ।**

एते द्विरुक्त्या वा निपात्यन्ते । चराचरः, चलाचलः, पतापतः, वदावदः । पक्षे चरश्चलः, पतोवदः । उक्तं द्विर्वचनम् ।

२४. **अव्यक्तानुकरणस्येतावतो लुग्वानन्तवच्च आभीक्ष्ण्ये तु तः ।**

इतौ परे अव्यक्तानुकरणस्यातौ लुग्वा स्यात् । अपदान्तवच्च — अतो लुकि टकारादेस्तृतीयो न भवति । घटिति करोति, घटिति घटदिति गम्भीरम्बुदैर्नुदितम् । आभीक्ष्ण्ये तु तकारस्यैव लुग्वा, इतौ परे । पटपटेति करोति, पटदिति वा । पदमिति निर्वृत्तम ।

डतरादित्वम् । एवमितरेतरस्मै इतरेतरां स्त्रियः स्पृह्यन्ति ब्राह्मणकुलानि च । इतरेतरस्मात् इतरेतरां वा विरमन्ति । अन्योऽन्यतः पथि रताविति तामिभोष्ट्रौ इतरेतस्य इतरेतरां स्मरन्ति । परस्परां विस्मरन्ति लक्ष्मीम्, इतरेतरस्मिन् इतरेतरां वानुबध्यन्ते । एवमन्योऽन्यमिति स्वमोः । व्यतिस्तुत इत्यत्र (३/१/५५) अन्योन्यार्थोपपदत्वात् परस्मैपदम् । क्रमदीश्वरस्त्वेषां वाच्यलिङ्गत्वं मन्यते, श्रीपतिस्तु अ योऽन्यादयः पुंस्त्वैकत्वयोरेव स्वभावात् अन्योऽन्यमितरेतरं परस्परमिति क्रियाविशेषणत्वेऽपि पुंस्त्वमेव नपुंसके डतुरागमश्च स्यादन्यादित्वात् । न ह्येषां सर्वनामगणे प्रतिपदपाठोऽस्तीत्येकं मतम् । सर्वनामगणे त्वन्यादेरन्यत्र नपुंसकान्यमून्युपदेश्यानीत्यपरे । एभ्योऽमादेरादेशो बहुलमिति केचित् । अमामौ वेति पठन्त्येके । आमन्तस्य च प्रायः प्रयोगो दृश्यत इत्याह प्रत्युदाहरति पुंसित्वित्यादि । अन्योऽन्यस्य ब्राह्मणाः प्रतिगृह्णन्ति । कथमन्योऽन्येषां प्राहरन् पुष्कराणीति माघे बहुवचनं प्रयुक्तम् । तच्चिन्त्यमित्येके । एकशेषादित्यपरे । अन्योऽन्यस्य. प्राहरन्निति पाठः ।

२४. अशक्तिजमसाधुशब्दानुकरणम् । अव्यक्तमस्फुटमनुकरणं वा, तत्र च सा दृश्येनार्थप्रतीतिः, अतो ध्वनितुल्यतामाश्रित्य स्फुटवर्णेन तदनुक्रियते । तस्यानेकाच्

२५. **ह्रस्वोऽभ्यासस्य ।**

धातोरभ्यासस्य ह्रस्वः स्यात् । ययौ । जग्लौ । एच इण् ह्रस्वत्वे, डुढौके, तुत्रौके ।

२६. **उरत्**

अभ्यासस्य धातोर्ऋवर्णस्यात् भवति । ववृधे, चक्रे । ऋ-लृवर्णयोश्च सावर्ण्यात्—चक्लृपे ।

२७. **क-ख-छां चो ङश्च ञः ।**

एषामभ्यासानां चः स्यात् चुकवे, चिखनिषति, चेछिद्यते । ङश्च ञः—ञुङुवे ।

२८. **न कवतेर्यङि ।**

कुङो यङि कश्चो न स्यात् । कोकूयते, अकोकूयिष्ट ।

२९. **घ-झ-ग-हो-जः ।**

एषामभ्यासानां जः स्यात् । जघास, जझाम, जगाम, जग्राह, जुहाव ।

इति शब्दे परेऽतो लुग्विभाष्यते । तस्य साधुत्वाद् विभक्त्युपपत्तौ पदत्वे सम्भवति । अपदान्तवदित्यतिदिश्यते । तत्फलं व्यनक्ति अतो लुकीति । अनेकाच इति बहुलानुवृत्तेर्विवक्षणीयम् यथा घटिति, एवं तड़िति तिड़तुलां यान्त्य-गेन्द्रा युगान्ते । अव्यक्तेति किम्? दृशदित्याह । एकाचस्तु न स्यात् अदिति । अत इति किम्? चटुदिति(चटदिति) करोति । इताविति किम्? पटत्करोति । पक्षे "मटदिति भङ्गुरतामवाप मध्यम" इति । द्वितीयं लक्षणं व्याकरोति आभीक्ष्ण्ये त्विति, आभीक्ष्ये तु कृतद्विर्वचनस्य तकारस्यैव लुगितो विभाष्यते, न पुनर्लुप्तनकारस्य द्विर्वचनम् परान्नित्याः (परि० ५१) नित्यादन्तरङ्गम् (परि० ५२) इति न्यायात् द्विरुक्तेरन्तरङ्गत्वात् यथा—पटत्पटेति करोति, धग्धगित्यादि ।

२५. ननु ऋतोऽदित्युच्यताम्, ततः स्वरूपग्राहकस्तकारो भविष्यति तर्हि दीर्घग्रहणं स्यादेव । परत्वाद् ह्रस्वेकृते वस्तुक्षतेरभावादित्याह ऋ-लृवर्णयोः सावर्ण्यादिति सवर्णग्रहणात् लृकारसाप्यकारो भवतीति । अतः प्रथमतो द्विर्वचनं परत्वात्, पश्चात् लृकारे कृते सर्व्वाभीष्टसिद्धिः किं सवर्णग्रहणेन ? मैनम्, अन्तरङ्ग-त्वात् लृकारः प्रथमं प्रवर्तते, वर्णोविधिरन्तरङ्ग इत्यन्तरङ्गता ।

३०. **टुतुपोर्द्वितीयस्य प्रथमो झषश्च जश् ।**

अभ्यासस्य टुतुपोर्द्वितीयस्य प्रथमो भवति । निर्टिष्ठैव तस्थौ, पफाल । झषश्च जश्—तच्चतुर्थस्य तृतीयो भवति । डढौक । दधौ । बिभत्ति ।

३१. **धो-धाञोङित्-स-ध्व-तथे ।**

ङिति सकारादौ धाञोदत्त्वापावादो ध एवावतिष्ठते । धत्से, धत्स्व, धत्ते, धत्ताम्, धत्थ । यङ्-लुकिधात्तः । दात्तश्चेत्येके । ङिदिति किम् ? दधामि ।

३२. **द्युति-स्वाप्योर्दि-सू ।**

अनयोरभ्यासस्य दि-सू इत्येतो स्याताम् । दिद्युते, दिद्युत्यते । स्वापेर्ण्यन्तः सुष्वापयिषति । न घणन्तादेः स्वापस्ततो णिच्-सिष्वापयिषति ।

३३. **निजादेर्गुणः सार्व्वधातुके ।**

निजिर्, विजिर् विष्लृ एषामभ्यासस्य गुणः स्यात् । नेनेक्ति, अनेनेक्, नेनिज्यते, वेवेक्ति, वेवेष्टि । सार्व्वधातुक इति किम् ? निनेज ।

३४. **अर्त्तेरियः ।**

अस्याभ्यासस्य इयः स्यात् । इयर्त्ति, ऐयः, इयृयात् । सार्व्वधातुक इत्येव-आर ।

---

२८. कुङ् शब्दे, कु शब्दे इत्येतयोस्तौदाकादादिकयोर्व्यवच्छेदार्थं कवतेरित्युक्तम् । ननु त्रयाणां शब्दार्थत्वे यङि विशेषाभावात् किमिति सविकरणनिर्द्देशः कृतः इति शब्दार्थत्वेऽपि भेदो महानस्ति । तथाहि कवतिरव्यक्तशब्दे, कौतिः शब्दमात्रे, कुरतिरार्त्तस्वरे तयोश्चोकूयते, यङ्लुकि—चोकवीति ।

३०. सूत्रे (परि० ८०) इत्यनेन टुतुपोरिति पुंस्त्वनिर्द्देशः । वृत्तौ तु टु तु पुन इति वक्तव्ये यत् टुतुपोरिति निर्दिष्टं तदनुक्तम् । इह द्वितीयचतुर्थ्योः प्रथमद्वितीयाविति वक्तव्ये यत् टुतुपोर्द्वितीयस्येत्युक्तं तत् वैचित्र्यार्थम् । अथ झय् जशोः प्रथमजशावित्युच्यताम् किं टुतुपोरित्यनेन कार्य्यमिति ? न च कुट्वोरिति तथास्त्विति वाच्यम् । क-ख-छां ङश्च ञ इति घझगहोज इति विशेषविधिभ्यामाघ्रतत्वात् सत्यम्, मन्दधियां सुख प्रतिपत्त्यर्थम् । निटिष्टेवेत्यादि ष्ठिवु निरसने द्विर्वचने कृते षकारसंयोगाभावात् निमित्ताभावे नैमित्तिकस्याप्यभाव इति थकार एवावतिष्ठते तदा तिष्ठिवेति रूपं मन्वाना ष्टिटठकारयिषतीत्युदाहरन्त्येके ।

३४. ननु ऋ-पृ-भृञादेरच इदिति कृते सिद्धे किमनेन सूत्रेण ? न च वाच्यम्, इयृतीत्यादौ दोषः स्यात् ।

३५. पॄ-भृञ्मादेरच इत् ।

एषां सार्व्वधातुकेऽच इत् स्यात् । पिपर्ति, अपिबः, पिपूर्य्यात् । डुभृञ्, माङ्, हाङ् । बिभर्त्ति, अबिभः, बिभृयात्, मिमीते, जिहीते ।

३६. लिटि भुवो वः ।

लिटि परेऽभ्यासस्य भुवो वः स्यात् । बभूव ।

३७. वचि-ज्यादि-व्यथेरवेञ इण् यवयोर्व्यज्यस्वे विजिसु ।

वच्यादेर्ज्या-वयीत्यादेर्व्यथेश्च लिटचभ्यासयोर्यवयोरिन् स्यात् । उवाच । इयाज । वयि-उवाय । व्य-जय-स्वे विजि-सु इत्येते स्युः । विव्याय, विव्यथे, जिज्यौ, सुष्वाप । अवेञ् इति वेञ्‌रूपस्यैव निषेधो नादेशस्य । ववौ ।

३८. आनच्यत ऋदुपधाशूद्विहलाम् ।

एषामभ्यासस्याचि परे अतः स्थाने आन् भवति । आनर्द्ध, आनृधतुः । अशू-व्यानशे । द्विहलाम्-आनञ्ज, आनङ्ग । आनर्च्च । नान्छेः । आछि आयामे आन्छ, आन्छतुः । अचीति किम्? चचार । द्विहलामिति किम् ? आट् ।

३९. इत् सनि ।

अत इत्येव, सनि परे अभ्यासस्य अत इद् भवति । पिपासति, पिपक्षति ।

४०. ओः पुयण्जेऽवर्णपरे ।

अवर्णपरे पवर्गे यणि जकारे च परे सन्यभ्यासस्य उकारस्य इत् स्यात् । पू-पिपावयिषति, यण्—यियावयिषति, रिरावयिषति, लिलावयिषति, जूः सौत्रः-जिजाव-यिषति, णौ कृतं स्थानि वदिति स्थानिनो द्विरुक्तिः । अवर्णपर इति किम् ? बुभूषति ।

---

३६. इह पाणिनिमते भवतेर इति शितपा निर्द्देशात् कर्त्तर्य्येवायं विधिरिति केचित्, तदन्ये न मन्यन्ते सुनोति सुवतीत्यादौ शितपा निर्द्दिष्टेऽपि भावकर्मणोविधि-दर्शनात् । नव्यास्तु मतभेदात् विकल्पमिच्छन्ति तेन, तैर्हवींषि जुहात्रांबभूविव इत्यादि माघप्रयोगस्य सिद्धिः । बोपदेवमतेऽपि बभूव बभूवे इत्यादि रूपद्वयम् । अस्मन्मेतेऽपि पाणिनिप्रामाण्याद् भावकर्म्मणोर्व्वेति वक्तव्यम् ।

३८. अत इति किम्? प्रत्युदाहरति नान्छेरिति । आछि आयामे इत्यस्य लिटचभ्या-सस्य औपदेशिकातोऽभावादानादेशो न विद्यते ।

४०. अकार पर इत्यकारशब्दोऽत्रावर्णपरः, तेन पिपविषते यियविषति । पिपाव-यिषतीति प्रयोजके णिच्, पारयितुमिच्छतीति सन्, णौ कृतस्य स्थानिवद् भावात् पूद्विर्वचनम्, तत आकारपरपकारे उकारस्येकारः । एवमन्यत्राप्यवधेयम् ।

४१. **श्रु-द्रु-श्रु-स्रु-प्लुङ्-च्युङां वा ।**

एषां यण्व्यवधाने ओरिद्वा स्यात् । पिप्रावयिषति-पुप्रावयिषति । दिद्राव यिषति पिप्लावयिषति । चिच्यावयिषति । चुच्यावयिषति । अवर्णपर इत्येव पुप्रूषते ।

४२. **गुणो यङ्लुकोः ।**

यङि यङ्लुकि चाभ्यासस्य गुणः स्यात् । लोलूयते । लोलवीति ।

४३. **दीर्घोऽनागमस्यातः ।**

यङि यङ्लुकि चाविद्यमानागमस्यातो दीर्घः स्यात् । पापठ्यते । पापठीति । अशाशते । आशीति । अनागमस्येति किम् ? जङ्गम्यते ।

४४. **नीरन्ते वन्चु-स्रंसु-ध्वंसु-भ्रंशु-कम-पत-स्कन्दाम् ।**

यङ्—यङ्लुकोरेषामभ्यासस्यान्ते नीः स्यात् । वनीवच्यते, वनीवञ्चीति । सनीस्रस्यते, सनीस्रंसीति । दनीध्वस्यते, दनीध्वंसीति । बनीभ्रश्यते, बनीभ्रंशीति । चनीकस्यते, चनीकसीति । पनीपत्यते, पनीपतीति । पनीपद्यते, पनीपदीति । चनीस्कन्द्यते, चनीस्कन्दीति ।

४५. **अदुपधङमां जप-जभ-सह-दन्श-भन्ज-पशाञ्चानुस्वारोऽन्तवच्च ।**

यङ्—यङ्लुकोरेषामभ्यासस्यान्तेऽनुस्वारागमः स्यात् । स च पदान्तवच्च वा परसवर्णार्थम् । अदुपधङमन्तानाम्-तन्तन्यते, तंतनीति । जङ्गम्यते, जङ्गमीति । जपादेः जञ्जप्यते, जञ्जपीति । दंदश्यते, दंदशीति । यङ्लुकि चास्य न लोप उक्तः । बम्भज्यते बंभञ्जीति । पश बन्धने, पम्पश्यते, पंपशीति । अदितितपरः किम् ? बाभाम्यते ।

न जुः सौत्र इति जुचंक्रम्य (४/१/४७) इत्यादि । सूत्रे भवः सौत्रः गणपठित इति भावः । नन्वन्तरङ्गत्वात् वृद्धावादेशे कृते सति पश्चादकार-युजो-द्विर्वचनम् । ततः पूर्व्वसूत्रेणैवेत्त्वं सिध्यति किमनेनेत्याह णौ कृतं स्थानि-वदिति । स्थानिनो द्विरुक्तिरिति । अयमर्थः इदं वचनं ज्ञापयति णौ कृतं स्थानिवदिति तेन जुहावायिषतीत्यादौ वृद्धावादेशयोरनन्तमुकारवतो हकारस्य द्विर्व्वचनं स्यादिति एतदपि न सर्व्वोद्दिष्टम् । तेनाचीकीर्त्तदीति । अन्यथा णिचिरादेशस्य स्थानिवत्त्वेनैतत् पदं सिध्यति, सन्वद्भावस्य हि विषयो लघु-धात्वक्षर एव । अथ आत् पर इति वक्तव्ये किमवर्णपर इत्युक्तम् ? न च यियविषतीत्यादौ दुष्यति । तत्र गुणान्तरिताद्विर्वचने पूर्वेणैव सिध्यतीति सत्यम्, वर्णशब्दोऽयम्, वर्णयति सनि गुणात् प्राक द्विरुक्तिरिति । तेन प्रोर्णुनविषतीति सिद्धम् । अन्यथा प्रोर्णिनविषतीति स्यात् ।

४४. विधये (१/१/३१) इति न्यायात्तदन्तानामित्याह अदुपधङमन्तानामिति ।

४६. **चरफलोः परादुच्च ।**

यङ्—यङ्लुकोरनयोरभ्यासस्यान्तेऽनुस्वारागमः स्यात् प्रकृतेरत उच्च । चञ्चूर्य्यते, चंचुरीति, । चञ्चुरः । पम्फुल्यते । पंफुलीति ।

४७. **उत्ति च ।**

पुनरुक्तकरणमयङ्लुगर्थम् । तादौ च अत उद् भवति । चूर्तिः । ञिफला विशरणे, प्रफुल्तं पद्मम् ।

४८. **ऋ री-ऋन्मध्यस्य ।**

ऋन्मध्यस्थाभ्यासस्यान्ते री स्यात् यङ्यङ्लुकोः परतः । वरीवृत्यते, वरीवृतीति, परीपृच्छ्यते ।

४९. **रु रिकौ च लुकि ।**

ऋन्मध्यस्य धातोर्यङ्लुकि अभ्यासस्यान्ते रु-रिकौ स्याताम्, रीश्च । नर्नर्त्ति-नरिनर्त्ति । एव नर्नृतीति, नरीनृतीति, नरीनृतीतीत्यादि । ऋन्मध्यस्यैवेति किम् ? जाग्राढि, जाग्रहीति । तसादौ जागृढः, । जरीगृढो वेत्येके । केचिद् ग्रहेर्यङ्लुकि यण इकमिच्छन्ति-जरीगर्ढि-जरीगृहीतीत्यादि ।

५०. **ऋतश्च ।**

ऋदन्तस्य च धातोरभ्यासस्यान्ते रु-रिकौ स्याताम् रीश्च । चर्कर्त्ति-चरिकर्त्ति-चर्करीति । ऋ-अरर्त्ति-अररीति-अर्य्यरीति । अर्यृतः, अर्य्यतीत्यादि । तपर किम् ? कॄ—चाकर्ति । करोतेश्चर्करीतम् । यङ्लुकः संज्ञायाम् ।

५१. **णौ चङ्यनग्लोपित्वादेः सन्वल्लघौ लघ्विणो दीर्घश्च ।**

चङि परे णौ परतो धातोरभ्यासस्य लघो धातुवर्णे परे सन्वत्कार्यं भवति । अपीपठत्, अबिभ्रजत्, अबीभजत्, ओरित्वं—अपीपवत्, अबीभवत् । *प्रु-द्रु-स्रु-श्रु-प्लुऽ-च्युङां वा । अपिप्रवत्, अपुप्रवत्, अदिद्रवत् : अदुद्रवत् । अशिश्रवत् अशुश्रवत् । लघोरिति किम् ! अररक्षत् । अजजागरत् अदिदीपत् । अरिदित्यत्र णौ परे लघुपरत्वाभावान्न दीर्घः । णाविति किम् ? अचकमत । अनग्लोपित्वादेरिति किम् ? चुरादौ कथादेरदन्तस्यातो लुकि—अचकथत् । दृशदमाख्यातवान्-अददृशत् । घटं कृतवान्—अजघटत् । कथं अवीवद्वीणां परिवादकेन ? णौ णिलोपे ण्याकृतिनिर्देशात् सिद्धम् । त्वरादेः त्वर प्रथ म्रद स्मृ द स्तॄ स्पश— अतत्वरत्, अपस्मरत, अददरत्, अतस्तरत् । * ऊर्णोर्न दीर्घः । प्रोर्णुनवत् ।

---

५१. सन्वदिति कार्य्यातिदेशोऽयमित्याविष्करोति, सन्वत्कार्यमिति । तेन सनीव सन्वदित्यर्थः । अनग्लोपित्वादेर्लघ्विणो दीर्घश्च स्यात् । चकारोऽयमन्वाचयशिष्टः । अबिभ्रजदिति भ्राज (५५) इत्युपधाह्रस्वः । ओरित्वमिति तस्यापि सनि

५२. **गणेर्व्वा**

गणयतेर्णौ चङि सन्वद् वा स्यात्। अजीगणत्, अजगणत्। पर्व्वतीय इति माहवजीगणः।

५३. **वेष्टिचेष्टयोरेरत्**

णौ चङ्चनयोरभ्यासस्य इकारस्यात् वा स्यात्। अववेष्टत्-अविवेष्टत्। अचचेष्टत्-अचिचेष्टत्। इत्यभ्यासविधिः।

५४. **उपधाह्रस्वोऽनग्लोपिशास्वृदिताम्।**

चङि परे णौ परत उपधाह्रस्वः स्यात्। अचीकरत्, अरीहरत्। असीसरत्। उपधाह्रस्वे कृते द्विर्वचनम्, मा भवानाटिटत्। उपधेति किम्? अचकांक्षत्। अनग्लोपिशास्वृदितामिति किम्? मालामाख्यातवान्-अममालत्। मातरं-अममातत्। शासेः—अशशासत् - ऋदिताम्, बाधृ-अबबाधत्=ढौकृ—अडुढौकत्।

विहितत्वात्। तत्रत्यं सूत्रं विकल्पविधायकमतस्तदर्थमेतदाविष्करोति प्रु द्रु इत्यादि। अदिद्रवदित्यतः परं अशुश्रवदशिश्रवदित्यादि ज्ञेयम्। अजजागरदिति जागुः(३/४/८३)इति गुणः। अत्र त्वरादिवर्ज्जनादनेकवर्णव्यवधानेऽपि लघूनि सन्वत् स्यादिति मतेनाजीजागरिदिति कातन्त्रम्। तत्र तु तन्मतं नाद्रियते। यतो येन नाव्यवधानं तेन व्यवहिते स्यादिति। अचीकरदित्यादवेकवर्णव्यवधानमशक्य परीहारमाश्रीयते न त्वनेकवर्णेन यत्त्वादिवर्ज्जनं तदचिक्षणदचिक्रमदित्याद्यनेकव्यञ्जनव्यवधानज्ञापकम्। समानविषयत्वान्न सर्वोदिष्टमिति। लघोरिति किम्? अतित्रपत्। आटिटदित्यादि, णौ परे टकारस्य स्वरशून्यत्वादिति भावः। अचकमतेत्यण्यन्तपक्षे चङ्। अददृशदित्यादौ इष्ठवत्त्वाट्टौ लुप्यमाने तदेकदेशोऽपि लुप्यत इति भावः। पटुमाख्यातवानपीपटदिति वृद्धौ सन्ध्यक्षरलोपे इति कातन्त्रम्। अथ वादितवन्तं प्रयोजितवानिति वाक्ये कृदन्तोपाख्याने (३/१/२४) अथ वादितवन्तं इत्यनेन प्रकृतौ सत्यां णेर्लोपो विहितः। ततोऽग्लोपित्वे कथं सन्वदिति पूर्वपक्षयन्नाह कथमित्यादि। सिद्धान्तमाह। णौ णिलोपे इत्ययमर्थः। णि-पदमत्र जातिपरम्, जातेरेकत्वान्नित्यत्वाच्च सर्वदावस्थानम, न त्वग्लोपित्वं, न च जातिव्यतिरिक्तो नास्तीति वाच्यम्, जात्याश्रयः व्यक्तेरेव सत्वात्, तर्हि तल्लोपेऽग्लोपित्वात् कथं सन्वदितिमन्वान आह ण्याकृतिनिर्द्देशादिति जाति-व्यक्त्योरनन्यत्वमिति सांख्यसिद्धांताश्रयणात् तर्हि कथं णिलोपे इत्युक्तमिति चेत्तिरोभावनिबन्धनम्, न तु सर्वथा लोपोऽस्तीति। तथा चाहु "नासदुत्पद्यते नापि सद्विनश्यति, उत्पत्तिविनाशयोराविर्भावतिरोभावरूपत्वादिति।

५५. भ्राज-भाष-भास-दीप-जीव-मील-पीड़-कण-रण-वन-भण-श्रणां वा ।

एषां णौ चङ्युपधाह्रस्वो वा स्यात् । अबभ्राजत्, अबिभ्रजत् । अबभाषत्, अबीभषत् । अबभासत्, अबीभसत् । अचकासत्, अचीकसत् । अबभाणत्, अबीभणत् । अशश्राणत्, अशिश्रणत् । (अन्येषामप्येवं रूपं ज्ञेयम्)

५६. अल्लुक् पिबतेः कृताभ्यासाविधेः ।

णौ चङि कृताभ्यासकार्यस्य पिबतेरुपधाया अतो लुक् स्यात् । अपीप्यत्, अपीप्यताम् ।

५७. इत् स्थो वा च जिघ्रतेः ।

णौ चङि तिष्ठतेरुपधाया इत् स्यात् । अतिष्ठिपत् । घ्रो वा । अजिघ्रिपत्, अजिघ्रपत् ।

५८. ऋ (उ) ॠत् ।

चङ्युपधाया ऋवर्णस्य ॠद्वा स्यात् । इररारामपवादः । इर्-अचीकृतत्-अचिकीर्तत् । अर्-अवीवृतत्-अववर्तत् । आर्-अमीमृजत्-अममार्जत् ।

५९. इज्झनगमां सन्सि दीर्घो, वा च तनेः ।

सन्-सकारे परत इजन्तादेर्दीर्घः स्यात् । चिचीषति, चिकीर्षति, तुष्टूषति । हन्-जिघांसति । इङो गमिः, अधिजिगांसते । तनेर्वा-तितांसति-तितंसति च । सीति किम् ? जिगमिषति, तितनिषति ।

६०. दन्तेर्धीप्-धिपौ द्विर्लुक् च ।

दन्तेः सन्सि धीप्धिपौ सत्याम् । द्विरुक्तस्य लुक् च धीप्सति, धिप्सति । सीत्येव-दिदम्भिषति ।

६१. घुमीमामच इस् ।

एषां सन्सि अच इस् भवति । द्विरुक्तस्य लुक् च । दित्सति । धित्सति । मीञ्-मित्सति, ञित्वादुभयपदी, मित्सते । मा-माङ्-मेङां मा, प्रमित्सति, प्रमित्सते ।

६२. रभ-लभ-शक-पत-पदामित् ।

एषाः सन्सि अच इत् स्यात् । द्विर्लुक् च । अपरिप्सते । लिप्सते शिक्षिते । पित्सति । अपित्सते । सीत्येव पिपतिषति ।

---

५९. इह हन्तेरादादिकस्य साहचर्यात् इङो गमेरेव ग्रहणम्, न पुनर्भौवादिकस्य गच्छतेरित्याह गमेरिति । गच्छतेस्तु संजिगंस्त इति रूपम् ।

६३. **राधो हिंसने ।**

अच् इत् स्यात् । द्विर्लुक् च । अपरित्सति । हिंसन इति किम् ? आरिरात्सति ।

६४. **ऋधः इर् । आप्लृ ज्ञपेरीत् ।**

एषां सन्सि अच् ईरीतौ स्याताम् । द्विर्लुक् च । ईर्त्सति । ईप्सति । जपेर्णिलोपे ज्ञीप्सति । सीत्येव, अर्द्धिधिषति । जिज्ञपयिषति, इवन्तर्द्धेति विकल्पेनेट् ।

६५. **मुचेरोद्वा कर्म्मकर्त्तरि ।**

अस्याच ओद्वा स्यात् । द्विर्लुक् च । मोक्षते वत्सः स्वयमेव, मुमुक्षते वा । कर्म्मकर्त्तरीति किम् ? मुमुक्षति वत्सं गोपः । अच इति निवृत्तम् ।

६६. **देङो दिगि लिटि ।**

लिटि देङो दिगिः स्यात् । द्विर्लुक् च । दिग्ये, दिग्याते, दिग्यिरे ।

६७. **अदेन्मध्येऽसंयोगपार्श्वोऽनादेशाभ्यासस्यागुणवादि-शसि-ददोऽणिति ।**

अणिति लिटि परेऽनादेशाभ्यासस्य धातोर्मध्येऽसंयोगपार्श्वोऽदेद् भवति । द्विर्लुक् च । रेणतुः. रेणुः, रेणिथ । पेचुः । पेचिथ, पेचे । अनादेशाभ्यासस्येति किम् ? बभणतुः । असंयोगपार्श्व इति किम् ? ततक्षुः । तत्सरतुः । तत्सरुः । शशक्य । अणितीति किम् ? रराण । पपाय । अगुणादेरिति किम् ? विशशरतुः, विशशरिथ । वादि-ववले । शस-विशशतुः । दद-दददाते । रधिनश्योः संयोगेऽप्यनुमि । रेध्मः, नेध्मः । नेह ररन्धिव ।

६८. **तॄ-फल-भज-त्रप-श्रन्थ-ग्रन्थ-दन्भां नश्चलुक् ।**

एषामाणीति लिटयत एत् स्यात् । द्विर्लुक् च नोपान्तास्य नस्य च लुक् । तरतेर्गुणार्थं वचनम् । तेरतुः तेरिथ । फेलुः । फेलिथ । भेजुः । भेजिथ । त्रेपे । त्रेपिरे । श्रेथुः श्रेथिथ ग्रेथुः ग्रेथिथ । देभुः । देभिथ । श्रन्थ-ग्रन्थ-दन्भां केचिदेत्वं विकल्पयन्ति । नश्चलुक् नित्यमेव, तन्मते शश्रथुः । जग्रथुः ददभुः । * नशेर्लुङ्पमि च । पुषाद्यङ्—अनेशम् । * मनेराशिष्यके—मेनका ।

६९. **राधो हिंसायाम् ।**

अस्य विधिबलादात एत् स्यात् । द्विर्लुक् च । अपरेधतुः । अपरेधिथ । हिंसायामिति किम् ? आरराधतुः ।

---

६५. मोक्तुमिष्यमाणो वत्सो न प्रातिकूल्यमाचरतीति कर्म्मकत्वम् सुमोचत्वात् ।

७०. **वा-जॄ-भ्रमु-त्रसि-वमि-फणादीनाम् ।**

अणिति लिटचेषामवर्णस्य एत् वा स्यात् । द्विर्लुक् च । जेरुः-जजरुः । जेरिथ-जजरिथ । एवं भ्रेमुः-बभ्रमुः । त्रेषुः-तत्रसुः । वेमुः ववमुः । फणादेः, फेणुः फणतुः । फण, राजृ, भ्राजृ, भ्राशृ, भ्लाशृ, स्यमू, स्वनः ।

७१. **सिचि वृद्धिर कोऽश्वि-जागुः परस्मैपदे ।**

अक इत्यवर्ण उत्तरार्थः । इगन्तस्य सिचि परस्मैपदे वृद्धिः स्यात् । अजैषीत् । अलावीत् । अश्विजागुरिति किम् ? अश्वयीत् । अजागरीत् । अपरस्मैपद इति किम् ? व्यजेष्ट । * वोर्णोः । प्रौर्णावीत्-प्रौर्णवीत्, अगुणपक्षे—प्रौर्णवीत् । सिचीति वर्त्तते वी (वि) अन्यस्येति यावत् ।

७२. **अनिटो हलन्तस्य ।**

सिचि परस्मैपदेऽनिटो हलन्तस्याको वृद्धिः स्यात् । अपाक्षीत्, भ्रस्ज—अभ्राक्षीत्, रन्ज-अराङ्क्षीत्, अभैत्सीत् । अनिट इति किम् ? अदेवीत् ।

७३. **इटि लघोरतो ल्रान्त (ऌन्त वद-व्रजाम् ।**

लान्तरान्तदेरिडादौ सिचि परस्मैपदे अतो वृद्धिः स्यात् । अचालीत् । अक्षारीत् । अवादीत् । अव्राजीत् लघोरिति किम् ? अवभ्रीत् ।

७४. **वान्यस्यैकाचो हलादेर्ह्म्यन्त-क्षण-वध-श्वसेदिताम् ।**

लान्तरान्तदेरन्यस्य हलादेरेकाचो ह्म्यन्तादिवर्ज्जितस्य इडादौ सिचि परस्मैपदेऽतो वृद्धिर्वा स्यात् । अपाठीत् । अपठीत् । अतानीत्-अतनीत् । एकाच इति किम् ? अचकासीत् । अह्म्यन्तादीनामिति किम् ? ह-अग्रहीत् । म-अवमीत् । य-अव्ययीत् । क्षणु-अक्षणीत् । हनो वध-अवधीत् । श्वस-अश्वसीत् । एदितां-अहसीत् । अलगीत् । सिचीति निर्वृत्तम् ।

---

७२. इगन्तस्यानिटो धातोर्वृद्धिरुक्ता । अतो हलन्तस्यैवेयं वृद्धिर्भविष्यति किं हलन्तस्येत्यनेनेत्याह रन्जेति, अयमर्थ हलन्तस्यानेकवर्णव्यवधानेऽपि वृद्धिः स्यात् । अन्यथैकवर्णेन व्यवधानमाश्रीयते न त्वनेकवर्णेनेति प्रवर्त्तते ।

७३. ननु अनिटो हलन्तस्येत्युक्ते वक्ष्यमाणविकल्पबाधिका वृद्धिः । सेट्कस्यैव सम्भवति किमिटित्यनेन ? सत्यम्, स्पष्टार्थम् ।

७४. ननु हलन्तस्येति ग्रहणदनेकहल्व्यवधाने स्यादित्युक्तम्, इह त्वज्झल्व्यवधाने न स्यादेव किमेमाच इत्यनेन कार्य्यम् ? सत्यम्, मन्दधियां सुखप्रतिपत्त्यर्थम् ।

७५. ऋत इरुपधायाश्च ।

अगुणवृद्धिविषयार्थं वचनम् । ऋदन्तस्य ऋदुपधस्य च धातोर्ऋत इत्स्यात् । किरति, कीर्य्यते । चिकीर्षति । अस्तीर्णम् । कृत-कीर्त्तयति-कीर्त्तनम् । परत्वाद् गुण-वृद्धिभ्यां बाध्यते । विचकरतुः, विचकार । *न सुपः । अनृच्यते ।

७६. उर्पोः ।

पर्वगान्दुत्तस्य ऋत उद् स्यात् । पिपूर्त्तः, पिपूरति, पो पूर्य्यते, पुपूर्य्यति । वृ-वुवूर्षति । वुभूर्षति मुमूर्षति । परत्वाद् गुणवृद्धी, निपपरुः, निपपार ।

७७. शिति मिदेर्गुणः ।

शितस्य गुणः स्यात् । मेद्यति । अमेद्यत् ।

७८. ऋ-छशोरङि ।

ऋवर्णान्त-दृशोरङि गुणः स्यात् । आरत् । अजरत् अदर्शत् ।

७९. ऋ-संयोगादृयतोर्यक्-यङ्-लोङ्येषु ।

एष्वर्त्तेः संयोगादेर्ऋदन्तस्य च गुणः स्यात् । अर्य्यते । अरार्य्यते । अर्य्यात् अर्य्यास्ताम् । स्मर्यते । सास्मर्य्यते । स्मर्य्यात् । ध्वर्य्यते, दाध्वर्य्यते, ध्वर्य्यात् । *न सुटः कृञो यगादिषु । संस्क्रियते, सञ्चेस्क्रियते, संस्क्रियात् ।

८०. ऋच्छृतोश्च लिटि ।

लिटि ऋच्छ-ऋदन्तयो ऋसंयोगाद्यृतोश्च गुणः स्यात् । आनर्च्छ । आनर्च्छतुः । ऋतः—निजगरुः, तेरुः । तस्तरुः । ऋ—आरुः । संयोगाद्यृतः—सस्मरुः । दध्वरुः । सञ्चस्करुः । णिति परत्वाद् वृद्धिः-निजगार । * ऋतोन क्वसौ । तितीर्व्वान् ।

८१. शदॄ-पॄ-ह्रस्वो वा ।

एषां लिटि ह्रस्वो वा स्यात् । शश्रुः-शशरुः । शशृवान्-शिशीर्व्वान्। दद्रुः-ददरुः । पप्रुः-पपरुः ।

८२. इग्लघूपधयोरुश्नोश्वाक्ङिति

पर्य्युदासे नञि क्ङितोऽन्यस्मिन् परे इगन्तस्य लघूपधस्य च धातोरुश्नुवोश्च विकरणयोः गुणः स्यात् । जयति । वर्द्धते । करोति । चिनोति । लघूपधस्येति किम् ?

---

८०. सञ्चस्करुरिति, असिद्धं (परि० ४२)इत्यस्यानित्यत्वाद् विधिः ।

सूदयति । अक्ङितीति किम् ? जितम् । बिभिदुः । चिनुतः । नियमः किम् ? अकणिषम इटो न गुणः । * लिखादेष्टगादौ बहुलम् । लिखनम्, लेखनम् । लिखनीयम्, लेखनीयम् । लिख्यम्, लेख्यम् । नित्यं लेखनी मीलनम् । * ष्ठिवु-सिवोर्दीर्घश्च । निष्ठीवनं, निष्ठेवनम् । सीवनं, सेवनम् ।

८३. **जागुरवीण्णल्ङित्सु ।**

प्रतिषेध- वृद्धिविषये च जागर्त्तेर्गुणः स्यात् । जागरितः । जागर्य्यात् । जागरयति । जागरकः । अवीण्णल्ङित्स्विति किम् ? औणादिको विक् जागृविः । इण्-अजागारि । णल्—जजागार । परत्वाण्णलि वोक्तम् । अहं जजागरेति । ङिति-जागृयात् ।

८४. **गोह ऊदच्योतः ।**

गोहोऽचि ओत ऊन् स्यात् । उपगूहति । गूहते,निगूहणम् । निगूहयति । अजीति किम् ? घोक्ष्यति । गोह इति किम् ? गुहा ।

८५. **मृजेर्वृद्धिः सन्यपि क्ङिदचि तु वा ।**

मृजेर्गुणापवादो (दात्) वृद्धिः स्यात् । मार्ष्टि । मार्ष्टा । मार्ष्टव्यम् । सनि कित्वेऽपि मिमार्क्षति । क्ङिदचि तु वा । ममृजः, ममार्ज्जुः । मृजन्ति, मार्ज्जन्ति । व्यवस्थितविभाषया नित्यम्, तुन्दपरिमृजः ।

८६. **अदुपधेचोर्णिति ।**

अदुपधस्य इजन्तस्य च धातोर्णिति वृद्धिः स्यात् । पाठयति । पाठकः । भावः । कारयति । संविव्ययाय । णेर्न वृद्धिरिणागमे । घटयिष्यते।

८७. **णलि वोत्तमे ।**

उत्तमे णलि परे वृद्धिर्वा स्यात् । अहं पपाच, पपच वा । चकार, चकर वा ।

८८. **न जन-वध-मान्तानाभिण्-कृतोरनाचमि-कमि-वमि-यमि-रमि-नमि-गमाम् ।**

जनादेरिति णिति कृति च वृद्धिर्नास्ति । अजनि,जनः, जनकः । अवधिः, वधः, वधकः । अशमि, शमः, शमकः । अनाचमादेरिति किम् ? आचामि, आचामकः, कामः, वामः, आयामः, रामः, प्रणामः, गामुकः । * भ्रमेर्णके वृद्धिश्चुरादि पाठाद् वा । भ्रामकः । घणि आमश्चामयते । * वेः श्रमेर्घणि वा । विश्रामो विश्रमः ।

---

८२. ननु विधीयमानो गुणः सनिमित्तस्तावन्न स्यात् । तस्यानुलिखितत्वात् । अथ निमित्तशून्यो गुणो भवन्निग्विधौ धातु हलन्तावित्यादिकं विरुणद्धि, न च तत्र भूतपूर्वगत्याश्रयणं युक्तम्, विहितविशेषणविरोधादित्याह पर्य्युदास इति । पर्य्युदासविषयकः पर्य्युदास एव । तमेव व्यनक्ति क्ङितोऽन्यस्मिन्निति ।

८९. घटादेर्णौ ह्रस्वश्च ।

घटादेर्णौ वृद्धिर्नास्ति । दीर्घस्य च ह्रस्वः स्यात् । घटयति, घटकः । व्यथयति, व्यथकः । गमयति, गमकः । उद्घाटयति, संक्रामयति इत्यपि चुरादिपाठात् । दीर्घस्य च ह्रस्वः । हेड़-हिड़यति, श्रा-श्रपयति । घट व्यथ श्रप म्रद स्खद क्षञ्ज दक्ष क्रुप (कृप) क्लृप कन्द क्रन्द, क्लद क्रुद ञित्वरा इति षितः । ज्वर गड हेड । वट भट परिभाषणे । णट नृतौ, नट गतवित्येके । ष्टक चक कथे रगे लगे ह्रगे ह्लगे षगे ष्ठगे संवरणे । कगे नोच्यते । अक अग कुटिलायां गतौ । कण रण गतौ । चण षण श्रण दाने । शण गतावित्येके । श्रथ श्लथ क्रुथ क्लथ हिंसायाम् । चन (वनु) वन नोच्यते । ज्वल दीप्तौ । ज्वल ह्वल क्षल (क्षण) चलने । लड-जिह्वोन्मन्थने । मदी हर्षग्लेपनयोः । स्मृ आध्याने । दृ-भये दृ विदारणे । नृ नये । श्रा पाके । मारण-तोषण-तेजने-निशामनेषु ज्ञा । चल कम्पने । छदिर् ऊर्ज्जने । स्वन शब्दे । स्वन अवतंसन इत्येके । जनी जषु क्नुसु रञ्जोऽमन्ताश्चा । ज्वल ह्वल क्षल नमामनुपसर्गात् वा । ग्ला स्ना वनु वमाञ्च । न कम्यमिचमाम् । शमोऽदर्शने । यमोऽपरिवेषणे । स्खदेरपपरिभ्याञ्च न घटादित्वम् । अपस्खादयति । क्षण गताविति घटादयः ।

९०. णमिणोर्दीर्घो वा ।

णौ घटादेर्णमि इणि च दीर्घो वा स्यात् । घटं-घटम् घाटं-घाटंम् वा । अघटि-अघाटि । घटयिष्यते-घाटयिष्यते । शम-शमम्, शामं शामम् । अशमि-अशामि, शंशमं शंशामम् । अशशमि-अशंशामि । अक्षञ्जि-अक्षाञ्जि । अदक्षि- अदाक्षि । अहिड़ि-अहीड़ि । न जन वधोः—अजनि, अवधि ।

---

८९. इह घटादेर्भूवादिगणपठितस्य प्रयोजकव्यापारगोचरो णिच् प्रयुज्यते, नान्यः, तेन स्वार्थणौ वृद्धि नियमो नास्तीत्याह, उद्घाटयतीति । तथा च गणान्तरे ये धातवस्ते चात्र पठचन्त इत्युक्तम् । अत एव "स तैराक्रामयामास धुर्य्यान् विश्रामयेति सः" इत्यादयः प्रयोगाः साधवः स्युः । कगे नोच्यते इति क्वचित्पाठः, अनिर्दिष्टार्थं कगे धातुर्घटादिरित्यर्थः । कण रण गतावित्यपठिता अन्यत्र न पठिता अप्यर्थविशेषेण घटादित्वार्थं पुनः पठयन्ते तेनानयोः शब्दार्थयोः काणयति राणयतीति रूपम् । वनु च नोच्यते इति क्वापि, सः पुनः कगेवद् व्याख्येयः । अमन्ता गमादयः । अमन्तत्वेन प्राप्ते निषेधमाह न कम्यमिचावमामिति । दर्शनादन्यस्मिन्नर्थे शमो न घटादिः । निशामयेत्यादि तु चौरादिकस्य रूपम् ।

९०. ननु जनीधातोर्घटादित्वाद् विकल्पदीर्घः कथं न स्यात् । मैवम्, न जनवधेति विधिना निषिध्यते इत्याह न जनवधोरिति ।

९१. **न गुणवृद्धि पिबाद्यग्लोपिनाम् ।**

एषां गुणवृद्धी न स्याताम् । पिबति । कुरुते । गियोऽनिणि शिवादित्वम् अध्यगीष्ट । इणि—अध्यगायि । अग्लोपिनाम्—गुणयति । चुरादौ कथ-वर-गणादयोऽदन्ता,। णौ तेषामग्लोपित्वात् कथयतीत्यादि । दीधीवेव्यौ छान्दसौ । तयोश्च पिबादित्वम् । आदीध्यकः । आनेव्यकः ।

९२. **कुटादेरणिति ।**

अणिति प्रत्यये परे कुटादेर्गुणवृद्धी न भवतः । कुटिता । पुटिता । संकुटितव्यम् । संकुटितुम् । अधुवीत् । अणितीति किम् ? घण्-कोटः । णिच्-उत्कोटयति ।

९३. **विजेरिटि ।**

अस्येटि गुणो न स्यात् उद्विजिता । उद्बिजितुम् । इटीति किम् । उद्वेजनम् । ण्यन्तात्" उद्वेजिता वृष्टिभि" रिति कुमारे ।

९४. **वोर्णोः ।**

ऊर्णोरिटि गुण-वृद्धी वा न स्याताम् । प्रोर्णुविता-प्रोर्णविता । सिचि-प्रोर्णावीत्, प्रौर्णवीत्-प्रौर्णवीत् ।

---

९१. गुणश्च वृद्धिश्च गुणवृद्धी, अत्र ध्यन्तस्य प्राङ्निपाते प्राप्ते धर्मार्थादिषुभयरित्युभयं स्यात् । ननु पिबादेशसामर्थ्यादेव गुणो न भविष्यति किं पिबग्रहणेन ? न च वाच्यम्, तद्गुणसंविज्ञानो बहुव्रीहिरयम् शास्त्रे तस्येहानादृतत्वात् । मैवम्, प्रक्रियालाघवमनादृत्येदमुक्तवान् । मुवुसामना (?) कान्ता इतिवत् कुरुत इति परत्वादन्तरङ्गत्वाच्च कुरादेशे तनादिभ्य उरिति उः प्राप्नोति, अन्यथा गुणप्रतिषेधवैफल्यं स्यात् । एवमं ऋणुते घृणुते क्षणुते । गियोऽनिणि पिबादित्वमिति । अध्यगीष्टेति लुङ्-लृङो रिति ग्यादेशे प्रत्युदाहरति इणि अध्यगायीति । अग्लोपिनामिति, अग्लोपोऽस्यास्तीतीन् । गुणयतित्यादि, गुणमाचष्टे इत्यादि वाक्ये णिचीष्ठवद्भावाट्टिलोपः । चुरादावतोऽदन्ता इत्यधिकृतत्वात् कथ वाक्यप्रबन्धे इत्यादेरदन्तत्वम् । ननु न दीधीवेवीटामिति सूत्रमन्तरेण कथमादीध्यक इत्यदावगुणत्वम् ? न च वाच्यम्, छान्दसत्वात् परिहार्य्यमिति । दीधीवेव्योरी, लुक्यीवर्णयोरिति भाष्यसूत्राद् भाषायामपि प्रयुज्यत इत्याह तयोश्च पिबादित्वमिति । दीधीवेव्यो छान्दसविति प्रायिकच्छान्द सत्वम् ।

९३. ओविजी भयचलनयोरितास्यैव सेटौ ग्रहणम्, न तु विजिर् पृथग्भाव इत्यस्य । उद्विजिता इति प्रयोजकण्यन्तादिटि गुणः न तु केवलस्य ।

९५. **न भू सूङो लुङ्लोटोः ।**

भुवो लुङि सूङो लोटि गुणो न स्यात् । अभूत् । अभूः । सुवै । सुवावहै ।

९६. **यङादिलुगार्द्धधातुके वा अतः ।**

यङादिलुगन्तानामार्द्धधातुके गुणवृद्धी न भवतः । लोलुवः, चक्षुरः, बेभिदिता. मरीभृजः, नेन्यति, प्रबोभूवयति, चरिक्रयति, तातृ-तातिरथति । तातिराञ्चकार । क्यलुक्-समिधिता, समिधकः । विल्वोपस्य च विधुवयति रविः । अतो वृद्धिर्व्वा । पापाचयति, पापचयति वा ।

९७. **न लघूपान्ताभ्यस्याचि पिति सार्व्वधातुके ।**

लघूपान्तस्य द्विरुक्तस्य धातोरजादौ पिति सार्व्वधातुके गुणो न स्यात् । नेनिजानि, अनेनिजम् । बेभिदीति । चक्षुरीति । त्रिवन्तस्य च । गोदुहति । अचीति किम् । बेभेत्ति, हलि दीर्घत्वे चक्षुर्त्ति ।

९८. **इडयच्यार्द्धधातुके ।**

याद्यजादिवर्ज्जिते आर्द्धधातुके परतो धातोरुत्तरे इडागमो भवति । भविता । लविषीष्ट । पठिष्यति । अयचीति किम् ? भव्यम् । भवनीयम् । आर्द्धधातुके विधिरापादपरिसमाप्तेः ।

९९. **स्वृ-सू-धूञ् दिन्निष्कुषरधादि दरिद्राद् वा ।**

एभ्योऽच्यार्धधातुके इड् वा स्यात् । स्वर्त्ता-स्वरिता । सूति-सूयत्योः—सोता-सविता । धोता-धविता । ऊदित्—गाढ़ा-गाहिता । गोप्ता-गोपिता । मार्ष्टा-मार्जिता । निष्कोष्टा-निष्कोषिता । रद्धा-रधिता । रीध-नशि तृपि दृपिद्रुह मुह ष्णुह ष्णिह इति रधादि । दरिद्राता-दरिद्रिता, दिदरिद्रासति-दिदरिद्रिषति ।

१००. **न शकादेः ।**

शकादेरिण् नास्ति । शक्ता-शक्ष्यति । वक्ता-वक्ष्यति । अनिडेकः शकिः कान्ते (१) चान्ते पचि-वची रिचिः । सिचिर्मुचिरिची चैके (६) श्छान्ते प्रच्छिरुदाहृतः (१) ॥

---

९५. भवतेर्लुङि, सूते लोटयुत्तमे यथाक्रमं गुणो निषिध्यते ।

९६. उभयोर्विभाषयोर्मध्ये यो विधिः सः नित्य इति न्यायात् यङादिलुगन्तानां गुणवृद्धिनिषेधो नित्यः स्यात् ।

१००. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्, न तु लाक्षणिकस्य । ननु कृञादे दीर्घत्वे लाक्षणिकत्वादित्यनेन किं प्रयोजनम् कृञ् धातोः सनि दीर्घत्वे श्युकः

भजि भञ्जि यजि त्यजि रञ्जि रुजः सृजि सञ्जि विजि स्वजि मज्जि भुजः। युजि भृज्जि निजोऽपि जान्तगणे (१५) गुणसिन्धुभिरुचिर इत्यनिटः॥ अदि हृदि स्कन्दि भिदिच्छिदि क्षुदीन् शदि सदि। स्विद्यति पद्यती खिदि। तुदि नुदि विद्यति विन्द (१५) इत्यपि, प्रतीहि दान्तान् *दशपञ्च चानिटः। विन्द इति श्नमा निर्देशः। क्रुधि राधि रुधि क्षुधि बुध्यतयो व्यधि शुध्यति सिध्यति बन्धि युधः। सह-साध्य इत्यनिटोधगणे, (११) हनि मन्यति चेत्यपि नान्तगणे। (१२) स्वपि वपि तपि तिप्यापि शपोऽपि क्षिपि सृपि तृपि दृपि लिपि लुम्पि छुपयश्च (१३) पान्तगणेष्वथ भान्ते-जभि-रभि-लभयोऽप्यनिटो (३) मान्त यमि रमि नमि गभयश्च (४)। शिषि शिलषी दुष्य विषि त्विषि द्विषीन् पिषि कृषि पुष्यति शुष्य तुष्यतीन् (११)। शिशि दृशि रिशि रुषि स्पृशि क्रोश विशो ऽनिटो (१० जगुः। घसिश्च वसतिः सान्ते (१२) हान्ते दहति मेहती। दिहिर्दुहिलिही-रोह-वही नहिरिमेऽनिटः (८) ऋदूदन्तावनेकाचो वृञ् वृङौ रु क्षु यु स्नुवः। नु क्षु श्रिञ् श्वि डी शीङः सेटोऽजन्ता उदाहृताः" एभ्योऽन्ये स्वरान्ताः सर्व्वेप्यनिटः। स्तोता। चेता। कर्त्ता। कृञादे दीर्घत्वे लाक्षणिकत्वान्न भवति। चिकीर्षति। तुष्टूषति बुभूर्षति।

१०१. वर-न-र-ति-त्रादौ कृत्यभणादेः।

वरादौ कृतीण्णास्ति। वरः-ईश्वरः। न-याञ्चा। र-दीप्रः। क्तिन्-दीप्तिः। त्र-वस्त्रम्। आदिशब्दात्-नक्तु-त्रस्नुः। तु-जन्तुः। मन्-भस्म। त-हस्तः। थक्-कुष्ठम्।

१०२. स्नौतेस्तङि।

इण्नास्ति। कर्म्मणि-प्रसनोता-प्रस्नोषीष्ट। अतङि तु प्रस्नविता।

१०३. क्रमेस्तङर्हात्।

आत्मनेपदनिमित्तात् क्रमेरिण्नास्ति। प्रचिक्रंस्यते, उपक्रंस्यते। तङर्हत्वात् क्तिच। उपक्रान्त्वा। तङर्हादिति किम्? निष्क्रमिता। * तरत्यादेस्तुमादौ वेत्येके। तर्त्तु-तरितुम्। तर्त्तव्यं-तरितव्यम्।

(३/४/१०४) इति निषेधः स्यात्? सत्यम्, वतः (३/४/१०८) इति विकल्पेट् न स्यात्। सत्तायां विद्यते ज्ञाने वेत्ति विद विचारणे। विन्दते विन्दति प्राप्तौ श्यन्लुक् श्नम् शेष्विदं क्रमात्।

१०१. ननु सत्यभान् इत्यत्र कथं नेट्? सत्यमत्र लिखनक्रमात् क्तिन्येवेड्विधानात्, नान्यस्मिन्, सूत्रञ्च-भणादेः क्तौ चेति।

१०३. इह यद् विशेषणविशिष्टात् क्रामतेरात्मनेपदं विहितं तद्विशेषणविशिष्टात् क्रामतेरिण् न स्यात्। अतस्तङर्हादित्युक्तमित्याहात्मनेपदनिमित्तादिति।

१०४. श्र्युकोऽजागुः किति ।

श्रिञः उगन्तात् कितीण् नास्ति । श्रितः । रुत्वा भूत्वा । सूनः, वृतम्, तीर्त्वा, पूर्त्तम्, पूर्णम् । * जवेरपि निषेधमिच्छन्ति । तन्मतेन जप्तम् । अजागुरिति किम् ? जागरितः ।

१०५. सनि-ग्रह-गुह-गुपादेश्च ।

ग्रहादे श्र्युकश्च सनीण् नास्ति । जिघ्रक्षति । जुघुक्षति गुपादेरनिच्छार्थे-जुगुप्सते । तितिक्षते । चिकित्सति । श्र्युकश्च कित्त्वादगुणः-शिश्रीषति, रुरुषति ।

१०६. ऋ-पूङ्-स्मिङ्ऽशू-किरादिभ्य इट् ।

एभ्यो निषेधविकल्पापवादः सनीट् स्यात्, ऋ-अरिरिषति । पु-पिपविषते । स्मिङ्—सिस्मयिषते । अशू-अदिशिषते । कॄ-चिकरिषति । गॄ-चिगरिषति । शूङ्-दिदरिषति । धृङ्-दिधरिषति । प्रच्छ-पिपृच्छिषति ।

१०७. इवन्तर्द्ध-भ्रस्ज-दम्भु-श्रि-स्वृ-यूर्ज-भवति ज्ञापि-सनि-तनि-पतिभ्यो वा ।

एभ्यः सनीड् वा स्यात् । इवन्तः-दिदरिषति, दुद्यूषति वा । ऋध-अर्द्धिधिषति-ईर्त्सति । भ्रस्ज-बिभ्रज्जिषति-बिभ्रक्षति (बिभर्जिषति-बिभर्क्षति) दम्भु-दिदम्भिषति-धिप्सति-धीप्सति । श्रिञ्-शिश्रयिषति-शिश्रीषति । स्वृ-सिस्वरिषति-सुस्वर्षति । यु-यियविषति-युयूषति । ऊर्णुञ्-प्रोर्णुनविषति-प्रोर्णुनुविषति । भृञ्-बिभरिषते-बुभूर्षति । ज्ञपिर्ण्यन्तः-जिज्ञपयिषति-ज्ञीप्सति । जिज्ञापयिषति । सन्-सिसनिषति । तन्-तितनिषति-तितांसति-तितंसति च । पत्-पिपतिषति-पित्सति ।

१०८. वॄतः ।

वृञः वृङः ॠतेश्च सनीड् वा स्यात् । प्राविरिषुः । प्राविवरीषु प्रावुवूर्षुः । ॠतः तितरिषुः, तितरीषु, तितीर्षुः । लाक्षणिकत्वान्नेह चिकीर्षति । सनीतिनिवृत्तम् ।

१०९. तङिलोङ् सिचोः संयोगाद्यृतश्चासुटि ।

लोङ सिचोरात्मने पदे वृतः संयोगाद्यृदन्ताच्च इड् वा स्यात् । वरिषीष्ट-वृषीष्ट । आस्तरिषीष्ट-आस्तीर्षीष्ट । ध्वृ-ध्वरिषीष्ट च ध्वृषीष्ट । सिचिवरिष्ट-अवृत । आस्तरिष्ट-आस्तीर्ष्ट । अध्वरिषाताम्-अध्वृषाताम् । असुटीति किम् ? संस्कृषीष्ट । समस्कृत । तङीति किम् ? आस्तारिष्टाम्-आस्तारिषु । नित्यमिट् ।

---

१०४. नन्वत्र इतिपदेन किं प्रयोजनम् (३/४/९९) इति विभाषितेट्त्वात्; न श्वि (३/४/१२५) इतीण् निषेधः स्यात् ? सत्यम् न श्वीति सूत्रे उगन्तेतट-विभाषितेटो ग्रहणम्, न तूगन्तस्येत्याह सून इति ।

१०९. असुटीति । अस्यार्थः, सुटि सति संयोगाद्यृतो न स्यात्, तेन सुटः कृञो न स्यादिति । नान्वेह इटः प्रकृत्याश्रितत्वादन्तरङ्गता उपसर्गाश्रितत्वात् सुटो

११०- कृ-सृ-वृ-भृ-स्तु-द्रु-श्रु-स्रुवो न लिटि ।

एभ्य एव लिटि इण् नास्ति । चकृव । चकृढ्वे । ससृव । ससृवहे । ववृव । बभृव । बभृवहे । तुष्टुव । दुद्रुव, शुश्रुव, सुस्रुव । असुटीत्येव, सञ्चस्करिव । सञ्चस्करिम । नियमः किम् ? विभिदिव । उपसेदिवान् । रधादेर्वेत्येके* । ररन्धिव-रेद्ध्व । ररन्धिम-रेध्मे । मुमोहिथ-मुमोढ ।

१११. ऋतः स्त्वादेस्थलि :

ऋदन्तात् स्तु-द्रु-प्रभृतेश्चैव थलीण्नास्ति । सस्वर्थ:, ससमर्थ । ऋत एकाच इति वक्तव्यम् * । तेन जजागरिथ इति । स्त्वादि ग्रहणं पर विकल्पापवादार्थम् । तुष्टोथ शुश्रोथ, सुस्रोथ । असुरीत्येव, सञ्चस्करिथ ।

११२. अण्सृज दृशत्वतोऽनिटो वा ।

शकादि पाठेऽनिटोऽणन्तात् सृजिदृशिभ्याञ्च अत्वतश्च थलीड् वा स्यात् । अणन्तात्-पपिथ-पपाथ वा । जिगयिथ,-जिगेथ वा । जुहुविथ-जुहोथ । सृजि—ससर्ज्जिथ सस्रष्ठ । दृशि-ददर्शिथ-दद्रष्ठ । जघनिथ-जघन्थ । अनिट इति किम् ? लुलविथ, दुधविथ, जग्रहिथ । अत्वत इति किम् ? रुरोहिथ, बिभेदिथ । तपर; किम् ? रराधिथ ।

११३. अर्त्ति वृ-वयिभ्य इट् ।

एभ्यस्थलि प्रतिषेधे विकल्पापवाद इट् स्यात् । आदिथ । घस्लादेशाच्च-जघसिथ । आरिथ । ववरिथ । वेञोवयि-उवयिथ । ऋतस्त्वादेर्नियमात् न व्योर्लिटित्यात्त्वनिषेधा—दनन्ताच्च व्येञ् इट् सिद्ध एव । संविव्ययिथ ।

बहिरङ्गता, ततश्च, असिद्धं (परि० ४२) इति न्यायात् सुटोऽसिद्धिः स्यात् । तथा च कातन्त्रे "ऋद्वृद् वृञां सनीड् वा स्यादात्मने च सिचाशिषोः । संयोगादेर्ऋतो वाच्यः सुडसिद्धो बहिर्भवः" । इति । तत्कथमसुरीत्युक्तम् ? मैवं तस्यानित्यत्वात् परार्थञ्च वक्ष्यति, असुडित्येवेति ।

११०. नन्वमीषां धातूनां शकादित्वादनिटत्र सिद्धमेव, तत् किमनेन योगेनेत्याह नियतः किमिति । सिद्धे(परि० ७७) तेनान्येषामनिटां लिटीट् स्यादेव । उपसेदिवानिति यदुदाहृतं तत् प्रायकिम्, वक्ष्यमाणविषयत्वात् । अनेन परत्वाद्रधादि—विकल्पोऽपि बाध्यते तेन नित्यं ररन्धिम, इत्यादि वृत्ति-कृतसम्मतमत आह रधादेर्वेत्येके इति ।

११२. अत् अकारः विद्यते यत्र सः अत्वत्, तस्मादित्यर्थः ।

११४. **वसौ सद्विरुक्त्येकाजाद्घसः ।**

कृतद्विर्वचनैकाच आदन्ताच्च घसेश्च वसाविट् स्यात् । आदिवान् । पेचिवान् । पपिवान् । तस्थिवान् । घस-जक्षिवान् । सद्विरुक्त्येकाजिति किम् ? विविद्वान् । शिश्रिवान् ।

११५. **वा गम-हन-विद्लृ-विश-दृशः ।**

एभ्योवसाविड् वा स्यात् । जग्मिवान्,-जगन्वान् । जघ्निवान्-जघन्वान् । विविदिवान्-विविद्वान् । विविशिवान्-विविश्वान् । ददृशिवान्-ददृश्वान् ।

११६. **ऋद्धनः स्ये ।**

आभ्यां स्ये इट् स्यात् । करिष्यति । हनिष्यति । अहनिष्यत् ।

११७. **वधादेशाच्च लोङ् सिचोः ।**

इट् स्यात् । वधिसीष्ट । अवधिष्टाताम् । अयचीत्येव-वध्यात् ।

११८. **अञ्जेः सन् सिचोः ।**

इट् स्यात् । उदित्वेन विकल्पे प्राप्ते नित्यार्थं वचनम् । अञ्जिजिषति । आञ्जीत् ।

११९. **स्तु-सू-धूञः सिच्यतङि ।**

इट् स्यात् । अस्तावीत् असावीत् । अधावीत् । अतङीति किम् ? अस्तोष्ट । असोष्ट । अधोष्ट-अधविष्ट ।

१२०. **यम-रम-नमातः सु च ।**

एभ्यः सिचीट् स्यात् । स्वागमश्च । अयंसीत् । अयंसिष्टाम् । व्यंरसीत्-व्यरंसिस्टाम् । अनंसीत्-अनंसिष्टाम् । आदन्तात्-अयासीत् । अधासीत् । * दरिद्रा वा । अदरिद्रासीत्-अदरिद्रीत् । अतङीत्येव, आयंस्त । अरंस्त । अनंस्त । व्यत्यभास्त ।

१२१. **तीष-सह-लुभ-रुष-रिषो वा ।**

एभ्यस्तकारादाविड् वा स्यात् । इषु-एष्टा-एषिता । सोढा-सहिता । लोब्धा-लोभिता । रोष्टा-रोषिता । रेष्टा-रेषिता । इष् गतौ नित्यम्—प्रेषिता ।

---

११९. धुनोति चम्पकवनानि धुनोत्यशोकं, चूतं धुनाति, धूवति स्फुटितातिमुक्तम् । वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च । इति कविरहस्यम् ।

१२१. इषु इत्यस्योकारकरणात् इष् गतौ, इष् आभीक्ष्ण्ये इत्यनयोः प्रेषितेत्यादयो नित्यं भवन्ति । यत् पुनः (५/४/२३६) इति सूत्रे इषगताविल्यस्यान्वेष्टेति तत्तत् सूत्रनिर्देशादेवेति केचन ।

१२२. सेऽसिचि कृत-चृत-छद-तुद-नृतः ।

कृतादेः सकारादाविड्वा स्यात् । कर्त्स्यति-कर्त्तिष्यति । अकर्त्स्यत्-अकर्त्तिष्यत् । चृती-चर्त्स्यति-चर्त्तिष्यति । छर्त्स्यति-छर्दिष्यति । तर्त्स्यति-तर्दिष्यति । निनृर्त्स्यति-निनर्त्तिषति । असिचीति किम् ? अकर्त्तीत् ।

१२६. गमेरतङीट् ।

पुनरिड्ग्रहणं नित्यार्थम् । सेऽतङविषये गमेरिड् स्यात् । गमिष्यति, जिगमिषति । इङो गमेश्च कृति— अधिजिगमिषिता व्याकरणस्य । अतङीति किम् ? सङ्गस्यते, सङ्गसीष्ट । अधिजिगांसते ।

१२४. तङि वृतादेः क्लृपो लुटि च ।

सेटकत्वे सिद्धेऽपि नियमः । से तङ्येव वृतादेरिट् स्यात् । वर्तिष्यते । वर्द्धिष्यते । वर्द्धिषीष्ट । अवर्द्धिष्यत । स्यन्दिष्यते । क्लृपो लुटि च—कल्पिष्यते । कल्पितासे । तङीति किम् ? वर्त्स्यति । तङि नियमात् परस्मैपदे स्यन्दि-क्लृपिभ्यामूदित्त्वेन विकल्पोऽपि निषिद्धः, व्यवस्थितविभाषया वा । सिस्यंत्सति । चिक्लृप्सति । कल्प्तासि । कृति च—विवृत्सिता । विवृत्सितुम्, सेऽतङ्विषयत्वान्नेट् ।

१२५. न श्वीदिदादिड्डीय-श्वसि-वमिविभाषितेटौ निष्ठायाम् ।

श्वीदित आदितः, डीयादेश्च निष्ठायामिण् नास्ति । शूनः; शूनवान् । ईदितः-लग्नः, उद्विग्नः । आदितः, मिन्नः । क्षिण्णः । मूर्च्छा-मूर्त्तः, मूर्च्छितइति तारकादित्वादितः । डीयादे डीय इति श्यना निर्देशः, उड्डीनः । डीङो भौवादिकादप्रतिषेधः, उड्डयितः । श्वस्तः । वान्तः विभाषितेष्टौ यस्य विकल्पेन क्वचिदिडुक्तस्तस्मात्, ऊदितः— गूढः, गूढवान् । उदितः—वृद्धः । रधादौ नेष्टः ।

१२६. धृष-शसो वैयात्ये ।

आभ्यामविनीततायां निष्ठायामिण् नास्ति । धृष्टः, विशस्तः । अन्यत्र धर्षिता विशसितः ।

१२७. कषः कृच्छ-गहनयोः ।

निष्ठायामिण्नास्ति । कष्टं व्याकरणम् । कष्टं वनम् । कषितमन्यत्र ।

---

१२६. वियातः प्रगल्भः तस्यभावः वैयात्यं प्रागल्भ्यम् प्रागल्भ्य एव इट् न स्यात् । ननु निष्ठायामितः (३/४/१३१) इति विकल्पितेड् बाधनार्थं कथं न स्यात् ? सत्यम्, भावादिकम्मर्णोः प्रागल्भ्ये धृषेरेव प्रयोगोऽनभिधानात्, इति वामन-जिनेन्द्रपादौ । प्रागल्भ्यादन्यत्र प्रयोगोऽस्त्येव ।

१२७. कष्टं व्याकरणमिति, कृच्छ्रं दुःखम्, तज्जनकत्वात् कारणे कार्य्योपचारः । कष्टं वनमिति दुर्गमित्यर्थः । अनयोः किम् ? कषितं सुवर्णम् ।

१२८. घुषेरविशब्दने ।

निष्ठायामिण्नास्ति । घुष्टा रज्जुः । विशब्दने तु, अवघुषितं ते वाक्यम्, प्रतिज्ञातं ख्यातं वा ।

१२९. अर्द्देः सन्निविभ्यः अभे सन्निकर्षे ।

एभ्यो निष्ठायामिण्नास्ति । समर्णः, न्यर्णः । वार्णः । अभ्यर्णा सेना, अभ्यर्द्दितमन्यत्र ।

१३०. मनु-पति-निष्कुष-गत्यर्थधाव इट् ।

एभ्यो निषेधविकल्पापवाद इट् स्यात् । मनितः । पतितः । निष्कुषितः । धावितः । गत्यर्थेति किम् ! धौतं वस्त्रम् ।

१३१. म्लिष्ट-विरिब्धादयोऽस्पष्टस्वरादिषु ।

अविस्पष्टाद्यर्थेषु म्लिष्टादयोऽनिटः साधवः स्युः । म्लिष्टं अविस्पष्टे, म्लेच्छितमन्यत्र । विरिब्ध स्वरे, विरेभितमन्यत्र । आदिशब्दात् क्षुब्धो मन्थे । स्वान्तं हृदि । ध्वान्तं तमसि । लगे लग्नः संसक्ते । फण-फान्टमनायासे । बाहृ (?) (ह) बाढ़ं प्रतिज्ञा-भृशयोः । बृहेर्बृंहेश्च-परिवृढोऽधिपे । दृहेर्दृढः स्थूलबलिनोः ।

१३२. णेरध्ययने वृत्तम् ।

ण्यन्तस्य वृतेर्वृत्तं निपात्यते अध्ययनञ्चेत् । वृत्तं सूत्रमनेन ।

१३३. वादान्त-शान्त-पूर्ण-दस्त-स्पष्टच्छन्न-ज्ञप्ताः ।

एते ण्यन्ता वा निपात्यन्ते । पक्षे दमितः, शमितः, पूरितः, दासितः, स्पाशितः, छादितः, ज्ञपितः ।

१३४. रूष्यमत्वर-संघुषास्वनः ।

एभ्यो निष्ठायामिड् वा स्यात् । रुष्टः, रुषितः । अभ्यान्त, अभ्यमित । तूर्णम्, त्वरितम्, संघुष्टम्, संघुषितम् । आस्वान्तः, आस्वनितः ।

१३५. हृषो-लोम-विस्मित प्रतिहतेषु ।

लोम्नि कर्त्तरि विस्मिताद्यर्थे च हृषेर्निष्ठायामिड् वा स्यात् । हृष्टं हृषितं लोम-केशैः । हृष्टः हृषितः, विस्मितः प्रतिहतो वा ।

१३६. अपचितश्च ।

चायतेर्वा निपात्यते । पक्षे अपचायितः । * अपचितिर्नित्यम् ।

१३७. आदितो भावारम्भयोः ।

आदितो निष्ठायां पूर्व्वेण निषेधे प्राप्ते भावादि-कर्म्मणोरिड् वा विधीयते । मिन्नं मेदितमनेन । प्रमिन्नः, प्रमेदितः । श्वसि-वसेश्च । श्वस्तः, श्वसितः । वान्तं-वमितम् ।

१३८. शकः कर्म्मणि वते ।

इड् वा स्यात् शक्तो घटः कर्त्तुम्, शकितो वा ।

१३९. क्लिशपूङःक्त्वा निष्ठयोः ।

इड् वा स्यात् । क्लिष्ट्वा, क्लिशित्वा । क्लिष्टः, क्लिशितः, क्लिष्टवान्, क्लिशितवान् । पूत्वा, पवित्वा, पूतः-पवितः, पूतवान्-पवितवान् ।

१४०. क्षुधि-वसति-विमोहनार्थलुभिपूजायाञ्च इट् ।

एभ्यः क्त्वा-निष्ठयोरिट स्यात् । क्षुधित्वा । क्षुधितः । क्षुधितवान् । उषित्वा, उषितः । आकुलीकरणे लुभः, लुभित्वा । लुभितः । पूजायामञ्चतेः, अञ्चित्वा । अञ्चितो गुरुः । अन्यत्र तीषसहलुभेति क्त्वीड् वा लुब्ध्वा, लुभित्वा हलादेर्व्युपधादिति भकित्त्वे लोभित्वा । इह इट् निषेधः, लुब्धः, उदक्तमुदकं कूपात् ।

१४१. जॄ-व्रजेश्च क्त्व ।

निषेधविकल्पापवाद इट स्यात् । जरित्वा । वृश्चित्वा ।

१४२. उदितो वा ।

उदितः क्त्वीड् वा स्यात् । शमित्वा, शान्त्वा । शासित्वा-शिष्ट्वा । स्रंसित्वा-स्रस्त्वा । उवुन्दिर निशामने, वुन्त्वा, वुन्दित्वा ।

१४३. ग्रहेरिड्दीर्घोऽलिटि ।

ग्रहेरिड् दीर्घः स्यात् । गृहीत्वा । ग्रहीतुम् । अलिटीति किम् ? जग्रहिव ।

---

१४३. ननु ग्रहेरीड़ित्यागमे कृतेऽपि सिध्यति किं दीर्घ इत्यनेन ? उच्यते, अग्रहीदित्यत्रागमान्तरे सति 'इट् ईटीति' सिचो लोपो दुर्लभः स्यात् इटश्व स्थाने दीर्घत्वेऽपि इटत्वमस्त्येवेति, किञ्च सेटकत्वाद् वृद्धिरपि न स्यात् ।

१४४. वा वॄतोऽलोङ् परस्मैपदसिचोः ।

वृङ्-वृञ्-ॠत इड् दीर्घो वास्यात् । वरीता-वरिता । प्रावरिष्ट प्रावरीष्ट । तरिता-तरीता । वॄत इति किम् ? करिष्यति । अलोङादौ किम् ? वरिषीष्ट । आस्तरिषीष्ट । परस्मैपद सहचरिते सिचि प्रावारिषुः । आस्तारिषुः । अलिटीत्येव— तेरिथ ।

१४५. स्यसिच्-लोङ्-लुटि भावकर्म्मणोरज्झनग्रहदृशोर्वेण्

अजन्तादेः स्यादौ भावकर्मणोरिण् वा स्यात् । भविष्यते-भाविष्यते वा । अकारिष्यत-अकरिष्यत । हनिष्यते-घानिष्यते । ग्रहीष्यते-ग्राहिष्यते । द्रक्ष्यते-दर्शिष्यते । सिचि—अदिषाताम् – अदायिषाताम् । अहसाताम् — अघानिषाताम्—अग्रहीषाताम् अग्राहिषाताम् । अदृक्षाताम्—अदर्शिशाताम् । लोङि दासीष्ट—दायिषीष्ट । घानिपीष्ट-वधिर्षीष्ट । ग्रहिषीष्ट—ग्राहिषीष्ट । दृक्षीष्ट—दर्शिषीष्ट । लुटि, नेता—नायिता । हन्ता-घानिता । ग्रहीता-ग्राहिता । द्रष्टा-दर्शिता ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मव्याकरणे
तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः

प्रथमः पादः

कृत्-प्रकरणम्

१. **कृद्बहुलम् ।**

कृदित्यधिक्रियते, स च बहुलं स्यादिति च ।

२. **लट्लृटौस्मादौ शतृशानश्च ।**

लट्लृटोः स्थाने कृतसंज्ञकः शतृ, शानश्च बहुलं भवति । पृथक् निर्देशोऽयथासंख्यार्थः । भवन्, जुह्वत्, चिकीर्षन्, धावयन्नुपनिषदम् । शानः-पवमानः, यजमानः, अधीयानः, कुर्वाणः, क्रीणानः भाव्यमानः भूयमानम् । लृटः खल्वपि, करिष्यन्, करिष्यमाणः । * क्रियाया हेतुलक्षणयोः । अजर्यन्नास्ते, अल्पन्तो ज्ञातव्याः । * माङ्याक्षेपे । मा जीवन्, मा पक्ष्यमाणः, बाहुल्यात् क्वचिन्नित्यम् । हे पचन्, हे पचमानः । पचन्तं, पचमानं पश्य । पक्ष्यता, पक्ष्यमाणेन कृतम् । क्वचिन्नियमः । × अर्हन् पूज्ये द्विषन् शत्रौ, सुन्वन् यजमाने । क्वचिन्न स्यात् । पचतितराम् । अस्मादिति किम् ? पचति स्म, करोति स्म पुरा, याति स्म ।

३. **विदोलटः स्वसू ।**

स्यात् । विद्वान्, विदन्नपि ।

४. **इङः शतृ शक्तौ ।**

इङः सामर्थ्ये लटः शतृ स्यात् । अधीयन्, पारायणम् । नेह कष्टेनाधीते ।

५. **शानः शक्ति -वय-शीलेषु परस्मैभाषाच्च ।**

शक्त्यादौसर्व्वधातुभ्योः लटः शानः स्यात् । हस्तिनं निघ्नानः, शिखण्डं वहमानः, हसमानो विप्रः ।

---

३ यद्यप्येनेके विदः सन्ति तथाप्यभिधानाज्ज्ञापनार्थ एव विदि गृह्यते । अथ विद्वानिति निपातयितव्यो यल्लटौ विधानं तत्पक्षे शतुः स्थिति व्यनक्तीत्याह विदन्नपीति । न च वक्तव्यम् पंडितपर्य्यायोऽयमिति महिम्नः पारन्ते परमविदुष इत्यादि— दर्शनात् प्रथमाधिकरणेऽप्ययं विधिः ।

६. **लिटः क्वसु-कानौ ।**

लिटो बहुलं क्वसु-कानौ स्याताम् । शुश्राव-शुश्रूवान् । उपसेदिवान् । तस्थिवान् । उषिवान् । तितीर्व्वान् । कानस्तङि, पेचानः, चिक्यानः । दास्वानादि छान्दसम् ।

७. **ईयिवाननाश्वाननूचानः ।**

एते निपात्यन्ते । इटि-ईयिवान्, उपेयिवान्, इड़-भावे नञि अनाश्वान्, धृतजय-धृतेरनोशुषः । अनुवचेरतङ्यपि कर्त्तरि कानः । अनूचानः ।

८. **कृत्याः प्राङ्णकात् ।**

णकात् प्राक् कृतः कृतसंज्ञकाः वेदितव्याः ।

९. **तव्यानीयौ ।**

धातोस्तव्यानीयौ स्याताम् । भवितव्यम् । भवनीयम् । * वास्तव्यः कर्त्तरि । वसतीति वास्तव्यो जनः ।

१०. **यदणन्तादेरात एच्च ।**

अणन्तादेर्यत् स्यात् । आदन्तस्यात एच्च । दित्स्यम् । धित्स्यम् । देयम्, धेयम्, नेयम्; हव्यम्, भव्यम् । आदिशब्दात् विभज्यम् । * तकि-शकि-शसि-सहि-चति-यति-जनश्च । तक्यम्, शक्यम्, शस्यम्, सह्यम्, चत्यम्, यत्यम्, जन्यम् ।

---

९. धातोरितिधातुमात्रादित्यर्थः । नत्वचाऽपवाद विषयं परिहृत्योत्सर्गः प्रवर्त्तत इत्यस्ति, तत्कथं धातुमात्रादित्युक्तम् यतो ण्यद-यतादयः सन्तीति, सत्यम्, इह हि बाहुल्यादपवाद विषयेऽप्युत्सर्गोऽभिनिविशते । तथाहि नन्द्यादेरन इत्यनविषयेऽपि णक्-तृचौ भवतः । नन्दकः, नन्दयिता, अतो बाहुल्यादेव क्त-इन्-खलर्थेष्वेव नास्तीति । तथाहि भावे हन-क्तौ क्लीबे, हसनं, हसितं एतयोर्विषये भावे घण् न स्यात् । यत्र इच्छार्थेष्वककर्त्तकेषु तुमं, इच्छति भोक्तुम, तत्र इच्छार्थे (३/२/६३) इति, इच्छामि भुञ्जीत भवान्, इच्छामि भुङ्क्तां भवानिति लिट्लोटौ न भवतः । तया आदृशि (४/२/८२) इति दुर्गातं खलर्थस्थनस्य विषये दुःस्विषद्भ्यः (४/२/८०) इति खल न भवति । अतो बाहुलकमाश्रित्य मुनिप्रणीतमपि वा सरूपोऽस्त्रियामिति सूत्रमनेनैव प्रत्यादिष्टेयम् । सर्व्वमिदमालोच्य कर्त्तव्यं करुणीयमिति ण्यदविषये उदाहृतम् । वस निवासे कर्त्तरि तव्यः । केचित्तु गृहभूमिर्वास्तु सूत्र भवो वास्तव्यः दिगादेर्य इत्याहुः ।

११. **पवर्गादवपि-रपि-लिपि-त्रपि-दभि चमः ।**

जप्यम्, लभ्यम्, रम्यम् । वपादेस्तु ण्यत् भविष्यति । वाप्यम्, राप्यम्, लाप्यम्, त्राप्यम्, दभिः सौत्रः अवदाभ्यम्, आचाभ्यम् ।

१२. **गद-मद-चर-यमोऽप्रादेः ।**

गद्यते गद्यम्, माद्यन्तेऽनेन मद्यम्, चर्य्यम्, चम्यम् । प्रादेस्तु ण्यत्, प्रगाद्यम् । कथं नियम्यम्, पश्चात् प्रादिसमासेन । आचारेरगुरौ । आचर्य्यो धर्मः । गुरौ तु ण्यत्, आचार्य्यो गुरुः ।

१३. **अवद्यं-गर्ह्ये । पण्यं विक्रेये ।**

१४. **वर्य्योऽनिरोधे ।**

मुख्य इत्यर्थः । अन्यत्र वार्य्य ऋत्विजः ।

१५. **अजर्यं सङ्गते । वह्यं करणे ।**

वहन्त्यनेन वह्यं शकटम् ।

१६. **अर्य्यः स्वामिवैश्ययोः ।**

आर्य्योऽन्यत्र ।

१७. **उपसर्या स्यादृतुमत्याम् ।**

१८. **सुपो वदः क्यप् च ।**

सुपः परस्माद वदः क्यप् स्यात् । यच्च । ब्रह्मोद्यम् । ब्रह्मवद्यम् । सतोद्यम् : सत्यवद्यम् । तदस्यास्तीत्यत्यवद्यो रघूत्तमः । सुपः इति किम्? वाद्यम् । बाहुल्यात् क्वचिन्नित्यम् । मृषोद्यम् । * प्रादेरनोरेव । अनूद्यम् । नान्यत्र, अभिवाद्यम् ।

१९. **भुवो भावे ।**

सुपो भुवः क्यप् स्यात् । ब्रह्मभूयं ब्रह्मत्वम् ।

---

१०. नन्वणादेरित्युक्तेऽपि विधये (१-१-३१) इति न्यायादणन्तादिति लभ्यते किमन्त ग्रहणेन? सत्यम्, सुखार्थमेवेदम् । तथाणग्रहणमिति । ऋवर्ण-हलन्तेभ्यो ण्यतः सत्वात् बाधकत्वमपि (नास्ति) स्वरूपत्वात् ।

१९. भावपदेनात्र न धात्वर्थः किन्तु त्वतावादिवाच्यो जात्याद्यपरपर्य्यायोऽसाधारणो धर्म्मः । परसूत्रे तु भावपदं धात्वर्थ परमिति बोद्धव्यम् ।

२०. **हनः स्त्रियाम्, नस्त च ।**

भावे क्यप् स्यात् । ब्रह्महत्या ।

२१. **ऋदुपध-शास्वेति-स्तु-दृ-वृञ-जुषोऽक्लृप्चृतेः क्यप् ।**

ऋदुपधादेः क्यप् स्यात् । वृत्यम्, गृध्यम्, शिष्यः, इण्-इत्यः, आदृत्यः, वृत्यः, जुष्यः । वृङः स्तु वार्य्यः । अक्लृपचृतेरिति किम् ? कल्प्यम्, चर्त्यम् ।

२२. **खेच खनः ।**

क्यप् स्यात् । (खे इत्यादेशश्च) खेयम् ।

२३. **भृञोऽसंज्ञायाम् ।**

क्यप् स्यात् । भृत्यः । संज्ञायान्तु भार्य्या । वा समः । संभृत्य, संभार्य्यः ।

२४. **ग्रहेः पद-परतन्त्र-पक्ष्य-बाह्यासु ।**

एष्वर्थेषु ग्रहेः क्यप् स्यात् । प्रगृह्यं पदन् । प्रगृह्यः परतन्त्रः । पक्ष्ये अर्ज्जुन-गृह्योऽरिः, ग्रामगृह्या सेना, ग्रामबाह्या इत्यर्थः ।

२५. **रुच्यकृष्टपच्याव्यथ्याः ।**

निपातयन्ते । रोचते रुच्यः । कृष्टेन पच्यन्ते कृष्टपच्याः शालयः । न व्यथते अव्यथ्यः । * राजसूय क्रतौ । * सूर्य्योऽर्के । * कुप्यं धने । गोप्यमन्यत्र । * आज्यं-घृते । आङ्यमन्यत्र । * पुष्यसिद्धयो नक्षत्रे । * भिद्योद्धयौ नदे । भिद्यः, उद्धयः । उज्झ्यमन्यत्र । * युग्यं याने । * त्रिपूयोभुञ्जे । *विनीयः कल्के । * जित्या हलौ । जित्या स्यात्, हलिर्बृद्ध लक्षेत् ।

---

२०. ननु क्यपः ककारे लुप्ते क्वियपोः (३/३/५९) इत्यनुनासिकलोपे ह्रस्वात् (४/२/१७४) इति तुकागमो भविष्यति किं तकारकरणेनेति चेन्नैवं क्यपो द्वयनुबन्धत्वात्तत्रैकानुबन्ध एव यविष्ठ ।

२१. पुनः कारग्रहणमधिकारनिर्वृत्यर्थम्, तेन भावे सुप इति च निर्वृत्तम् ।

२५. * राज्ञा सोतव्योऽभिषेकद्वारा निष्पादयितव्यः । यद्वा लतात्मकसोमो राज्ञा, स सूयते कण्डयूतेऽत्रेति अधिकरणे क्यप्, निपातनाद्दीर्घः । राजसूयनर्द्ध-र्च्चादिः । सरत्याकाशे सूर्यः । कर्त्तरि क्यप्, निपातनादुत्वम् । यद्वा षु प्रेरणे तुदादिः । सुवति कर्म्मणि लोकं प्रेरयति क्यपोरूट् । गुपेरादेः कुत्वञ्च संज्ञायाम् । सुवर्णरजतभिन्नं धनं कुप्यम् । कृष्टे स्वयमेव पच्यन्ते कर्म्मकर्त्तरि क्यप्* ।

२६. कृ-वृषि-मृजि-शसि-दुहि-गुहिभ्यो वा ।

एभ्यः क्यप् स्याद् वा । कृत्यं-कार्य्यम् । वृष्यं वर्षण्यम् । मृज्वं-मार्ग्यम् । शस्वम्-शंस्यम् । दुह्यं-दोह्यं । गुह्यं—गोह्यम् ।

२७. ऋ हलासु युवो ण्यत् ।

ऋवर्णान्ताद् हलन्तादेर्य्यत् स्यात् । कार्य्यम्, तार्य्यम्, पाक्यम्, आसाव्यम् याव्यम् ।

२८. सृजः पाणि-समवाभ्याम् ।

ण्यत् स्यात् । पाणिसर्ग्या रज्जुः, समवसर्ग्यः घटः ।

२९. ओरावश्यके ।

उवर्णान्तादावश्यके गम्ये ण्यत् स्यात् । अवश्यभाव्यम्, अवश्यलाव्यम् । लव्य-मन्यत्र ।

३०. अमावसेर्यच्च ।

अमापूर्व्वात् वसेर्यत् स्यात् । ण्यच्च । सहवसतोऽस्यां चन्द्रार्काविति अमावास्या, अमावास्या वा । * प्रणाय्योऽकामासम्मतयोः । प्रणाय्यो निस्पृहोऽसम्मतश्च । * आनाय्यो दक्षिणाग्नौ स्यात् । पाय्यं माने । माङो निपात्यते * सान्नाय्यं हविर्विशेषे । निकाय्यो गृहे । चिञो निपात्यते ।* धाय्या सामिधेन्याम् । धाञो-धाय्या, सामिधेनी ऋक् ।

३१. क्रतौ कुण्डपाय्यसञ्चाय्यौ ।

एतौ क्रतौ स्याताम् । कुण्डैः पीयते सोमोऽस्मिन्निति कुण्डपाय्यः, सञ्चीयते सोमोऽत्रेति सञ्चाय्यः ।

३२. अग्नौ चित्याग्नचाय्यपरिचाय्यसमूह्याः । चित्या च ।

एते अग्निविषये स्युः । चित्योऽग्निः उपचीयते उपचाय्यः, परिचाय्यः समूह्यः । स्त्रियां भावे चित्या, अग्निचित्या ।

३३. कर्म्मकर्त्तरि केलिमो हलः ।

हलन्तादेः कर्म्मककर्त्तरि केलिमः स्यात् । पचेलिमा माषाः स्वयमेव । भिदेलिमं काष्ठं स्वयमेय । उक्ताः कृत्याः ।

---

३०. हविर्विशेष इति "ऐन्द्रं दधामावास्यामैन्द्रं परोऽमावास्याम्" इति विहितदधि-पयोविशेषरूपः ।

३३. केलिमस्तु कर्म्मण्येव सर्व्वसम्मतः, कर्म्मकर्त्तरीति भाष्यविरुद्धम् ।

३४. णकःतृचौ कर्त्तरि वर्तमाने ।

एतौ कर्त्तरि वर्त्तमाने च स्याताम् । कारकः, कर्त्ता । बाहुल्यात्, पादाभ्यां ह्रियते पादहारकः ।

३५. णको भविष्यति, तुमर्थे च ।

वर्षशतस्य पूरकः । ओदनं भोजको व्रजति—भोक्तुमित्यर्थः । * शीलाचारसाधुषु निन्दादेः । निन्दकः हिंसक । निन्द हिंस क्लिश खाद विनाशि परिक्षिप परिरट परिवादि व्याभाष असूय । * प्रादेर्देविक्रुशश्च । परिदेवकः, आक्रोशकः ।

६६. नृति खनि रजेः शिल्पिनि टकन् ।

एभ्यः शिल्पिनि टकन् स्यान् । नर्त्तकः, नर्त्तकी खनकः, खनकी, रजकः, रजकी । निपातनान्नलोपः ।

३७. प्रसृल्वोऽकः साधुकारिणि ।

एभ्यः साधुकारिण्यकः स्यात् । प्रवकः, सरकः लवकः ।

३८. जीवादेराशिषि ।

अकः स्यात् । जीवतात् जीवकः ।

३९. नन्द्यादेरनः ।

एभ्यः कर्त्तरि वर्त्तमानेऽनः स्यात् । ण्यन्तात् नन्दयतीति नन्दनः, वास (श) नः, मदनः, दूषणः, साधनः मण्डनः अण्यन्तात् तपनः, रमणः, सहनः, संक्रन्दनः । णत्वे लवणः । * अण विषये च । जनार्दनः मधुसूदनः इत्यादयः ।

४०. क्रुधभूषार्थाच्छीलाचारसाधुषु (च) ।

क्रोधार्थात्—क्रोधः, कोपनः । भूषार्थात्-भूषणः, मण्डनः ।

४१. चलनशब्दार्थादकर्मकाच्च ।

चलनार्थात्—चलनः, वेपनः । शब्दार्थात्—शब्दनः, रवणः । अकर्म्मकादिति किम् ? पठिता तन्त्रम्, तृन् भविष्यति ।

४२. आत्मनेभाषाद् अय-दीप-दीक्षाङितो हलादेः ।

शीलादौ, वर्त्तनः, वर्द्धनः; वेवृः—देवनः । अयन्तादेरिति किम् ? आप्यायिता, दीपिता दीक्षिता, शयिता । हलादेरिति किम् ? एधिता । अकर्म्मकादित्येव, वसिता वस्त्रम् ।

४३. जु-चंक्रम्य-दंद्रम्य-सृ-गृधि-ज्वल-जुच-लष-पत-पदः ।

शीलादौ, जुः सौत्रः-जवनः, चंक्रमणः, दंद्रमण । सरणः गर्द्धनः । पूर्वेणैव सिद्धे पदग्रहणं सकर्म्मकार्थम् । प्रपदनः ।

४४. पचादेरच् ।

एभ्यः कर्तरि वर्त्तमानेऽच् स्यात् । पचतीति पचः, वदतीति वदः, कद्वदः, देवः, मेघः, श्वेतः, स्पर्शः लेहः, स्मरः, लोलुवः, चण्गुरः, चोरः । * प्रायोऽण् विषये च । श्वपचः, जातिस्मरः, शक्तिधरः, गङ्गाधरः ।

४५. हृञोऽनुत्क्षिप्यकर्म्मणः ।

अंशहरः, मनोहरः, पित्तहरं क्षीरम्, वाक्यहरा दूती । अनुत्क्षिप्यकर्म्मणि इति किम् ? भारहारः ।

४६. वयसि च ।

वयसि गम्येऽच् स्यात् । कवचहरः क्षत्रियः कुमारो वा, अस्थिहर श्वा ।

४७. आङि ताच्छील्ये ।

पुष्पाहरः, विद्याधरः ।

४८. अर्हः ।

पूजार्हः ।

४९ शक्त्यादेर्ग्रहः

शक्तिग्रहः । शक्ति लाङ्गूल अङ्कुश यष्टि तोमर घट घटी धनुपः ।

५०. सूत्रात्वधारणे ।

सूत्रमर्थतोऽवधारयति सूत्रग्रहः । सूत्रग्रहोऽन्यत्र ।

---

४३. अथ जु-चंक्रम्य-दंद्रम्य-सृणां चतुर्णां चलनार्थत्वात् (४१) पूर्व्वेणैव सिद्धयति कि (मेभिरिति) मिह ग्रहणेन ? सत्यम्, सकर्म्मकार्थमेव । अथ पति-पदिभ्यानुकञा बाधित्वाऽप्राप्त्यर्थं तद्ग्रहणम् बोधयति ताच्छीलिकेषु वासरूपविधिर्नास्तीति । दृश्यते च, यथा—विकत्थी विकत्थनः । भासुरः भासनः जागरिता जागरूकः । वद्धिष्णुः, वर्द्धनः । अपलषिता, अपलाषुकः ।

४४. अथ णकतृच इत्यकयोगः शोभते किं पचादेरिति पृथक् ग्रहणेन ? सत्यम्, पचादिग्रहणं बाधकबाधनार्थम् । तेन देवादौ को न स्यात् (जा-भररघूद्वाहोरण चल स्यात्) अथ ब्रवीतीति ब्रुवः, बाहुल्यादगुणाभावः । एवम(यड्वि) विषयेऽपि, ब्राह्मणमात्मानं ब्रुवते ब्राह्मणब्रुवः ।

५१. **किं-बहु-यत्तदः कृञः ।**
किङ्करा, बहुकरा, यत्करा, तत्करा ।

५२. **शमः संज्ञायाम् ।**
शङ्कर, शम्भुः । * स्तम्बेरमहस्तिनि । * कर्णेजपः सूचके ।

५३. **शीङः सुपः ।**
उत्तान शेते उत्तानशयः, अवमूर्द्धशयः, पार्श्वाभ्यां शेते पार्श्वशयः, उरःशयः खे शेते खशयः, गुहाशयः दिग्धसहपूर्व्वाच्च-दिग्धसहशयः ।

५४. **ज्वलादेरप्रादेर्णश्च ।**
ज्वलादेर्ण स्यात् अच्च । ज्वालः ज्वलः । कसपर्यन्ता ज्वलादयः । अप्रादेरिति किम् ? प्रज्वलः ।

५५. **श्याद् व्यधा-श्रु-संस्रवतीणवसावहृतनश्वसः ।**
एभ्यो णः स्यात् । अवश्यायः । श्याग्रहणं सोपसर्गात् कबाधनार्थम् । आतः-दायः, धायः । व्यधादेः व्याधः, आश्रावः, संश्रावः, अत्यायः, अवसायः, अवहारः, वितानः, श्वासः ।

५६. **द्रु-नी-ग्रह-भुवो वानुपसर्गे ।**
एभ्यो णो वा स्यात् । दावोरवः, नायोनयः, ग्राहोग्रहः, भावोभवः । उपसर्गे तु प्रभावः ।

५७. **इगुपध-ज्ञादेः कः ।**
इगुपधात् ज्ञादेश्च कर्त्तरि कः स्यात् । ईशः, बुधः, कुशः, मृडः, कृशः । ज्ञादे, जानातीति ज्ञः प्री-प्रियः, कॄ-किरः, पॄ-पुरम्, ग्रह-गृहं गृहाः । वाहुल्यात् सुप्युपपदे च । मूलं विभुजतीति मूलविभुजो रथः । नखमुचं धनुः । कौ मोदते कुमुदं सरोरुहम् । अपो बिभर्त्तीति अम्भं, महीध्रः, । * शोकापनुदः, प्रियेः । तुन्दपरिमृजोऽलसे । तुन्दपरिमार्जोऽन्यत्र । * करणादौ च । आयुध्यन्तेऽनेनेति आविधं, आयुध्यन्तेऽनेन आविधः । त्रयो दीव्यन्त्यत्रेति त्रिदिवः स्वर्गः । * कृतादेर्हनः कृतघ्नः, शत्रुघ्नः, प्रलम्बघ्नः । स्तम्बो हन्यते स्तम्बघ्नः, गौर्हन्यतेऽस्मै गोघ्नोऽतिथिः । उपघ्न आश्रये । निघ्न आयत्ते । विघ्नोऽन्तराये ।

---

५३. अवनतो मूर्द्धा यस्य सोऽवमूर्द्धः, अधोमुखशेते इति वाक्यम् । दिग्धसहपूर्व्वाच्चेति विशिष्टोपपदनियमार्थम् । तेन कृता (४/३/४०) इति समासः । वाक्यन्तु दिग्धेन सह शेते इति ।

५५. लेहः श्लेष इति पाणिनीये णप्रत्ययान्तौ, अत्र तु पचादित्वाद जन्तौ लेहश्लेषौ ।

५८. **आतः प्रादेरप्रादौ सुपश्च ।**

आदन्तात् प्रादेरेव कः स्यात् । प्रस्थः, सुस्थः सुग्लः, सुम्लः प्रह्वः । असति प्रादौ सुबन्तमात्राच्च । गां ददादीति गोदः, नृपः, सर्व्वज्ञः, अङ्गुलित्रः, आतपात्त्रायते आतपात्त्रायते आतपत्रं छत्रम् । द्वाभ्यां पिबतीति द्विपः कच्छपः, मधुपा, क्षीरपा स्त्री, स्वस्थः, मध्यस्थः, नदीष्ण नदीज्ञ इत्यर्थः । अप्रादाविति किम् ? कर्म्मणोऽण् गोसन्दायः ।

५९. **समादौ च ख्याते ।**

सुपः सम्पूर्व्वादौ च सति ख्याते कः स्यात् । गोसंख्यः स्त्र्याख्यः । *प्र-दाज्ञः। शुभप्रदः, पथि प्रज्ञः । उदःस्थो भावे च । आखूनामुत्थानं आखूत्थो वर्त्तते । कर्त्तरि च तत उत्तिष्ठतीति तदुत्थः, नदीमुखोत्थेन समीरणेन ।

६०. **गेयाद्गष्टक् ।**

गेयात् गायतेष्टक् स्यात् वेदगः । सामगी ।

६१. **सुरा-शीध्वोः पिबतेः ।**

एतयोरुपपदयोः पिबतेष्टक स्यात् । सुरापी, शीधुपी । कथं मधुपी भ्रमरी ? जातेर्ङी ।

६२. **लक्षणे जायापत्योर्हनः ।**

अनयोर्हनष्टक् स्यात् । जायाघ्नी रेखा, पतिघ्नस्तिलकालकः ।

६३. **अमनुष्यकर्त्तके च ।**

अमनुष्यकर्त्तृके उपपदे हनष्टक् स्यात् ।

वातघ्नं तैलम् । पित्तघ्नी तिक्ता, श्लेष्मघ्नं त्रिकटु । नेह श्वश्रूघ्ना नारी * नगरादहस्तिनि । नगरघ्नी व्याघ्री । नेह नगरघातो हस्ती ।

---

५८ प्रादेरेवेति केवलप्रादेः सुवन्तामिश्रितादिति यावत् । ह्वयतेः कप्रत्ययो नाभिधीयते । कह्ववत् प्रह्वोऽपि उप्रत्ययान्त एव । सुग्ल इति ग्लै हर्षक्षये । सुम्ल इति म्लै गात्रविनामे । द्वितीयं लक्षणं व्याचष्टे असति प्रादाविति, सुबन्तमात्रात् परस्मादादन्तादित्यर्थः ।

५९. संपूर्व्वादौ चेति समादौ पूर्व्वे सतीत्यर्थः । सं-पूर्वख्यातिरिह नाभिधीयते, तेन ख्याञिह गृह्यते ।

६४. शक्तौ हस्तिकवा (पा) टयोः ।

अनयोर्हनष्टक् स्यात् । हस्तिघ्नः, कवा (पा) टघ्नी । शक्ताविति किम् ? हस्तिघातो विषेण ।

६५. णनो हो व्रीहिकालयोः ।

व्रीहौ काले चाभिधेये हो णन स्यात् । हायनो व्रीहिरब्दश्च ।

६६. कृञो हेतौ ।

णनः स्यात् । कारणम् ।

६७. गस्थक-टनणौ ।

गायतेस्थक-टनणौ स्याताम् । गायकः । गायनी ।

६८. पा-घ्रा-ध्मा-धे-दृशः शः ।

एभ्यः शः स्यात् । ततो विकरणश्च । पिबः, जिघ्रः, उद्धमः, उद्धयः, शश्यः, उत्पश्यः ।

६९. अप्रादे र्लिम्प-विन्द-धारिपारि-वेदि-चेति-साति-साह्युदेजिभ्यः ।

एभ्योऽप्रादेः शः स्यात् । लिम्पः, विन्दः, धारयः, पारयः, वेदयः, चेतयः, साति सूौत्रः सातयः, उदेजयः । * गवादेर्विन्दे संज्ञायाम् । गोविन्दः, अरविन्दम् । * णेर्लिम्पेः । निलिम्पा नाम देवाः ।

७०. दाञ् धाञो वा ।

आभ्यां शो वा स्यान् । ददो दायः, दधो धायः ।

७१. ग्रहादेर्णिन् ।

एभ्यः कर्त्तरि णिन् स्यात् । ग्राही, स्थायी, परिभारी ।

---

६५. जहात्युदकमिति हायनो व्रीहिः जहाति भावान् हायनो वत्सरः । जिहीते प्राप्नोति वा ।

६६. (रथचक्रमध्यवर्त्ती काष्ठविशेषः अरः) अराकाराणि दलानि तत्सादृश्यात् अराः, तान् विन्दति लभते इति अर + विद् = श्, सुम् । कुत्सितमन्नादि-म्रक्षितसूत्रादिकं, कुवृत्या व जीविकां विन्दतीति कुविन्दस्तन्त्रवायः । गां पृथ्वीं धेनुं वा विन्दतीति गोविन्दः कृष्णः । शताल्लुम्पेः । शतं लुम्पति शतलुम्पो भारविरित्युत्पलिनी ।

७२. **आवश्यकाधमर्ण्ययोः ।**

अवश्यङ्कारी कटस्य । ऋणे—शतं दायी ।

७३ **शीलाभीक्ष्ण्ये (योः) सुपोऽजातेः ।**

अत्रार्थयोः सुबन्ताद् धातोर्णिन् स्यात् । शीले—शीघ्रभोजी, नित्यस्नायी, मृदुभाषी, वृद्धसेवी । आत्मानं श्रावयति आत्माश्रावी । आभीक्ष्ण्ये, पुनः पुनर्मधु पिबति मधुपायी, क्षीरपायी । अजातेरिति किम् ? तृणं नेता, शीले तृन् ।

---

७३. शीलाभीक्ष्ण्ये धात्वर्थे इति । यद्यप्याभीक्ष्ण्यमपि शीलतो लभ्यते तथापि जात्युपपदार्थं पृथगुच्यते । तथा—"उपेयुर्मधुपायिन्यः' इति । क्षीरपायीति, तत्राप्यन्यत् पेयं नास्तीति रुचिं विनापि क्षीरे तात्पर्यमिति दुर्गः । सुप इति किम् ? प्रादेर्नेष्यते, उपभोक्ता । तर्हि कथमुदासारी प्रत्यासारीति ? उत्प्रतिभ्यामाङः सर्त्तेरिति वक्तव्यात् । अजातेरिति "आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक् । सकृदाख्यातमिग्राह्यगोत्रं च चरणैः सह" इति । अस्यार्थः जातिः संस्थानव्यङ्ग्यः गवादौ गोत्वादि लक्षणा विषाणाद्याकृत्या व्यज्यते । गुणक्रियालक्षणा च प्रत्यादिष्टा संस्थानव्यङ्ग्यत्वाभावात् । ननु ब्राह्मणत्वादि जातिः संस्धानव्यङ्ग्या न स्यात्, तदाश्रयस्य क्षत्रियादिनापि समानत्वादित्याह लिङ्गानामिति । लिङ्गानां सर्व्वं रूपं न भजते, सर्वाणि लिङ्गानि न भजन्त इत्यर्थः । सापि सर्वाणि लिङ्गानि न भजन्त इत्यर्थः । सापि जाति ब्राह्मणत्वादिः ब्राह्मणादिशब्दस्य स्त्रीपुंसयोर्वर्त्तते अतः सर्वलिङ्गभागपि जातिरिति पूर्व्वेण स्यादिति तटा (टचा) दि शब्दवत् । तर्हि यदृच्छाशब्दोऽपि जाति स्यादित्याह सकृदाख्यातेनिर्ग्राह्येति । सकृदेकवारमाख्याता उपदिष्टासती निश्चयेन गृह्यते । तथाहि काल-धवलादौ गोपिण्डे सकृदाख्याता पिण्डान्तरेऽपि गोरिति प्रतीतिः, देवदत्तादौ तु न तथा प्रत्येकमुपदिष्टत्वात् । अथ बाल्यादिभेदाद् देवदत्तादिरपि सकृदाख्यात इति चेन्न, न खलु जातिरिह स्वरूपसामान्यमाश्रीयते द्रव्याणम्, किन्तु सादृश्यसामान्याम्, येन (स्वभावेन) (स्व) भावाः सदृशा भवन्ति सा जातिरिति बाल्यादिस्त्वस्थाया भेदो न तु व्यक्तेरिति । तृतीयं लक्षणमाह गोत्रञ्च चरणैः सहेति । पौत्राद्यपत्यं गोत्रमिह गोत्रम्, गोत्रप्रत्ययान्तमित्यर्थः गार्ग्यादिषु गार्ग्यत्वादिकम् न संस्थानव्यङ्ग्यम् तदाश्रयस्य जात्यन्तरेणापि सदृशत्वात् । नाप्यसवर्णलिङ्गता ; सर्वलिङ्गतादर्शनात् । तथा कठबह्वृचादिशब्दश्चाध्ययनक्रियासम्बन्धप्रवृत्तत्वात् क्रिया शब्दो न जातिशब्दः । तथाहि

७४. साधोः ।

साधुकारी, साधुदायी, *ब्राह्मणो वेदः । ब्रह्मवादी ।

७५. कुमार शीर्षाद् हन्तेः ।

कुमारघाती, शीर्षघाती ।

७६. कर्त्तुरूपमानात् ।

णिन् स्यात् । सिंह इव नर्द्दति सिंहनर्दी, हंसगामी ।

७७, व्रते ।

स्थण्डिलशायीं, अश्राद्धभोजी ।

७८. मनः ।

सुपो मन्यतेर्णिन् स्यात् । दर्शनीयां मन्यते—दर्शनीयमानी भार्यायाः, रिपुमानी भ्रातुः ।

कंठचरकाल्लुगिति सूत्रेण अध्येत्रर्थविहितप्रत्ययलोपेऽयं चरणशब्दः । अतः क्रियैवास्य प्रवृत्ति (विपत्ति) निमित्तम् तत्र जातित्वसिद्धये चरणैः सहेत्युक्तम्, अन्य पुनराचक्षते" प्रागुत्पतिविनाशाभ्यां सत्त्वस्य युगपदगुणैः । असवर्णलिङ्गां बह्वर्था तां जातिं कवयो विदुः "इति । अस्यार्थः—उत्पत्ति-विपत्ति धर्माणो (र्म्मार्णा धर्म्मिणां) गुणाः सत्येव गवाद्यर्थे उत्पद्यन्ते विपद्यन्ते च तैर्गुणैर्युगपद विशिष्टो गवाद्यर्थो भवति, तस्यैवंविधस्यार्थस्य यद् रूपान्तरमुत्पत्तिविनाशाभ्यां प्राङ् नोत्पद्यते नों विनश्यति, केवलमुत्पत्तेः प्रभृत्या विनाशमुपगच्छति । एतत् समर्थकं रूपं जातिरित्यर्थः । ब्राह्मणत्वादिकं तु नोत्पत्तेः प्रभृत्या विनाशमनुवर्त्तते । यतः (था) "तपः श्रुतञ्च योनिश्च एतद् ब्राह्मणलक्षणम्" इति । न च तदर्हंजातस्य एतत् त्रयं सम्भवति । सत्यपि तस्मिन् पिण्डे विषादगामिनि क्रियाभ्रंशाद् ब्राह्मणत्वभ्रंशेतिन विनाशमनुवर्त्तते गोत्ववदत आहासर्व्वलिङ्गानामिति । अस्मिन्मते गोत्रचरणमप्यसर्वलिङ्गतया जातिः । शाकटायनोऽप्याह ब्राह्मणत्वमात्रलिङ्गतयैव जातिरिति । देवदत्तादि व्यवस्थित··· (त्ताषवर्द्धकथामिति) एतन्मते कुमारत्वं जातिः, सत्यामपि व्यक्तौ उत्पत्तिविनाशधर्मत्वात् । अतः कुमारवादीति पूर्व्वोक्तमते त्वाकृतिग्राह्यत्वात् कुमारत्वं जातिरेव ।

७९. **ख्यश्चात्ममाने ।**

आत्ममाने गम्ये मनः ख्यः स्यात् णिन् च । पण्ठितम्मन्यः, पाण्डितमानी, साधुम्मन्यः, साधुमानी ।

८०. **करणाद्भूते यजः ।**

णिन् स्यात् । हविषा इष्टवान् हविर्याजी ।

---

७९. आत्ममान इति, मननं मानः आनः आत्मानः मानः आत्ममानः । णिन् चेति चानुकृष्टं इति नेहाश्रीयते । किञ्च णिन् स्यात् ख्यश्चेति वा युज्यते । ननु (ज्ञानाद्याश्रया) आत्मा ज्ञानगुणाश्रय आत्मा मानमपि ज्ञानं परविषयमपि ज्ञानमात्मज्ञानमेव, तत् क्रिमात्मग्रहणेनेति ? सत्यमं, आत्मशब्दोऽत्र बाह्यात्मपर न पुनः शरीरलक्षणः, अतएव वाक्ये आत्मानमित्युक्तम्, तत्रापि सुखार्थमेव । तत्रैव कारकशक्तिभेदादेकस्य कर्त्तृत्वं कर्म्मत्वञ्च । पीयमानं मधु मदयतीतिवत् । आत्ममान इति किम् ? विद्वन्मात्री पुत्रस्य ।

८०. कथमग्निष्टोमयाजीत्यत्र यागविशेषस्य करणत्वम् । तस्य कार्यत्वात् ? मैवं वादीः, विशेषव्यवहारः सामान्यव्यवहारस्य करणम्, विशेषस्य सामान्यव्यभिचारित्वात् । तथाहि—स्वर्गकामः स्वर्गः कार्य्यः इति सामान्यव्यापारमात्मन्यारोपयति । ततस्तदुद्धारमन्विष्यन् अग्निष्टोमेन स्वर्गकामो यजेतेति श्रुतेः अग्निष्टोमस्य स्वर्गफलभावनायां करणत्वमवलम्बते । तस्मादित स्वर्गोपादनं सामान्यब्यापारोऽग्निष्टोमादियागो विशेषव्यवहार इति । ननु तथापि करणत्वं न सङ्गच्छते । करणं नाम तदेव यन्मात्रव्यवहितः कर्त्ता व्यापारफलमुत्पादयति स्वर्गस्य कालान्तरभावित्वान् यागस्य क्षणिकत्वात् । सत्यम्, यागः क्रियमाणोऽपूर्व्वं जनयति, स चावान्तरव्यापारतया यागस्य शक्तिरिति तद्द्वारेण स्वर्गभावनायां यागस्य करणत्वम्, फलार्थिनो वृक्षसेचनवत् नहि स्वव्यापारव्यवायः (व्यापारयः) कारकाणां कारकमुपहान्त सर्वत्र (तः) तथाप्रसङ्गात्, नहि पाके (व्यापार) करणभूतानां काष्ठानां ज्वलनमवान्तरव्यापारस्तेषां (कुर्व्वन्तीति) करणत्वं हन्तीति तथा चोक्तम्, "ज्वलनाद् जायमानेऽपि पाके तत्समनन्तरम् । काष्ठानां करणत्वं यत् प्रागुक्तन्तन्न हीयते" एवमपूर्व्वानन्तरं भवत् स्वर्गादिफलमपि यागकरणत्वं भजेदिति (त्याजयेदिति) तत्र यद्यपि स्वर्गभावनां प्रति साधनत्वेन जन्यमानः कार्य्यतामनुभवति तथापि शक्तिभेदात्तस्य करणत्वं दीयमानेन धनेन दृष्ट इतिवत् । अथ कथमग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्र कर्म्मत्वम्, सत्यम्, अपौरुषेयत्वाद् वेदस्य, उक्तञ्च" "दोषाः सन्ति न सन्तीति पौरुषेयेषु युज्यते । देवकर्त्तुरभावाच्च दोषाशङ्कैव नास्ति नः" इति । करणादिति किम् ? काश्यामिष्टवान् ।

८१. **गर्ह्यायां कर्मणो हनः ।**

भूते णिन् स्यात् । पितृव्यं हतवान्-पितृव्यघाती, अन्यासक्तघाती ।

८२. **इन्-विक्रियः ।**

भूते गर्ह्यायामिन् स्यात्, तैलविक्रयी, घृतविक्रयी ।

८३. **भविष्यति गमि-गम्यादयः ।**

एते भविष्यति कर्त्तरि च इनन्ता णिनन्ताः साधवः स्युः । गमी, गामी, आगामी, स्थायी, भावी, भवी ।

८४. **आ क्वेः शीलाचारसाधुषु ।**

अयमधिकारः ।

८५. **तृन् ।**

कर्त्तरि शीलादौ गम्ये धातोस्तृन् स्यात् । मण्डूकगत्या वर्त्तमान इत्येव । शीले—विरुद्धं वक्ता खलः । आचारे—वधूं मुण्डयितारः श्राविष्ठायनाः । साधौ—गन्ता खेलः, निर्णेता वेदार्थं मनुः ।

८६. **सम्पृचाविविच-त्यज-रज-भज-संसृजादेर्घिनुण् ।**

एभ्यः शीलादौ घिनुण् स्यात् । सम्पर्क्किणी नदी राज्ञः । विवेकी, त्यागी, रागी, निपातनान्नलोपः । भागी, संसर्गी सरितां नृपः । आदिशब्दात्—युज योगी । ज्ञमादेर्न जनवधमान्तानामिति वृद्धिनिषेधः, शमी, दमी, तमी, भ्रमी, श्रमी, क्षमी, क्लमी, मादी । *द्विष-दुष-दुह-द्रुहानुरुध-विरुध-संज्वराभ्याहनश्च । द्वेषी अभ्याधाती । *आङो यम यस मुष क्रीडः । आयामी । *प्रे-यस-लप-सृ-द्रु-मथ-वद-वसः । प्रयासी । *परेः सृ-देवि-क्षिप-रट-दुह-मुह-वदः । परिसारी । * वौ सृ-कषवस-लष-वद-लस-कत्थ-श्रम्भः । विसारी, विकाषी, विवासी, विवादी, विलासी, विकत्थी, विश्रम्भी । *अपलषश्च । अपलाषी (विलाषी) । समत्यपाच्चरः, सञ्चारी, अतिचारी, अपचारी ।

---

८१. गर्ह्यायां किम् ? दुर्ज्जनं जघान, दण्डेन हतवान् पितृव्यमिति सापेक्षत्वात् । तर्हि कर्म्मग्रहणं सुखार्थमिति दुर्गादयः ।

८२. गर्ह्यायां किम् ? तैलविक्रायस्तैलिकः । अर्थान्तरस्य मत्वर्थीयेनागर्ह्यायामपि धान्यविक्रयी वैश्य इत्यपि स्यादिति चेदिष्ट एव तर्हि कुत्सायामणो बाधनार्थं वचनम् । कथमगर्ह्याम् "मांसविक्रयिणः धर्म्मव्याधस्यापि विगर्हितम्" इति भट्टिः ? सत्यम् मांसविक्रयिणोऽपि विप्रादेर्व्याधस्यापीति योज्यम् ।

८७. **इन्-जि-दृ-क्षि-विश्रीण-वमात्यथाभ्यम-परिभू-प्रजु-प्रसूभ्यः ।**

एभ्यः शीलादौ इन् स्यात् । जयी, आदरी, क्षयी, विश्रयी, अत्यायी, वमी, अव्यथी, परिभवी । जूः सौत्रः । प्रजवी, प्रसवी :

८८. **इष्णुः सह-चर-वृत्र-वृधु-रुचि-भ्राज-निराकृञ्-अलंकृञ्-प्रतुन-अपत्रय-भूत्पचोत्प-तोन्मदः ।**

एभ्यश्चतुशर्दध्यः शीलादौ इष्णुः स्यात् । सहिष्णुः, चरिष्णुः, वर्त्तिष्णुः. वर्धिष्णुः, रोचिष्णुः भ्रजिष्णुः, निराकरिष्णुः, कन्यामलङ्करिष्णुः, प्रजनिष्णुः, अपत्रपिष्णुः, भविष्णुः, उत्पतिष्णुः, उत्पचिष्णुः, उन्मदिष्णुः । *णेरिष्णुश्छन्दसीति नोच्यते । भावयिष्णुरिति ।

८९. **भू-जि-ग्लः क्स्नुः ।**

एभ्यः क्स्नुः स्यात् । भूष्णुः, जिष्णुः, ग्लास्नुः । *स्थास्नुः । अमीत्वं निपात्यते ।

९०. **त्रसि-गृधि-धृषि क्षिपेः क्नुः ।**

एभ्यः क्नुः स्यात् । त्रस्नुः, गृध्नुः, धृष्णुः, क्षिप्नुः ।

९१. **उकण्-स्था-शॄ-भू-वृष-हन-कम-गम-लस-पत-पदः ।**

एभ्य उकण् स्यात् । स्थायुकः, शारुकः, भावुकः, वर्षुकः, घातुकः, कामुकः, पातुकः, पादुकः ।

९२. **जल्प-भिक्ष-कुट्ट-लुण्ट-वृङ आकट् ।**

एभ्य आकट् स्यात् । लजल्पाकः, भिक्षाकः, वराकी ।

९३. **शीङ-स्पृहि-गृहे पतेरालुः ।**

एभ्यः आलु स्यात् । शयालुः, स्पृहयालु, गृहयालुः, पतयालुः, चौरादिकोणिच् ।

---

८८. क्षयिष्णुरिति क्वचिद् दृश्यते ।

८९. दंशेश्छन्दसीति दंष्णवः पशवः ।

९३. स्पृहि गृहि पतयश्चौरादिका इति सूचयन्नाह चौरादिको णिजिति । ननु निद्रा-तन्द्रा-श्रद्धाभ्य आलुरिति पाणिनिः । भट्टौ च प्रोक्तम् कथमनेन न सूत्रितम् ? सत्यम्, कृपादेरालुरिति तद्धितो भविष्यति । चन्द्रगोम्यपि श्रद्धा-तन्द्रादिभ्योऽस्त्यर्थतद्धितमिष्टवान् ।

९४. **दा-धे-सि-सद-शदो-रुः ।**

एभ्यो रुः स्यात् । दारुर्दानशीलः, धारुः, सेरुः, सद्रुः, शद्रुः ।

९५. **सृघस्यदोमरक् ।**

एभ्यो मरक् स्यात् । सृमरः, घस्मरः, अद्मरः ।

९६. **भञ्ज-भास-भिदो घुरः ।**

एभ्यो घुरः स्यात् । अनङ्गमानभङ्गुरम् । कर्म्मकर्त्तरि च । भङ्गुरं काष्ठं स्वयमेव । भासुरम्, मेदुरम् ।

९७. **विदि-भिदि-छिदेः कुरः ।**

एभ्यः कुरः स्यात् । विदुरो ज्ञाता, दोषान्धकारं भिदुरः, कवीन्द्रदर्पच्छिदुरो मृगेन्द्रः । भिदिछिदेः कर्म्मकर्त्तरि च भिदुरं काष्ठं स्वयनेव, छिदुरा रज्जुः स्वयमेव ।

९९. **गत्वरः ।**

अझल्परत्वान्मलोपो निपात्यते ।

१००. **जागृ-यायजि-जंजपि-दंदशि-वावदेरूकः ।**

एभ्य ऊकः स्यात् । जागृ-जागरूकः, यङ्लुगन्तात् यायज्यादेः—यायजूकः, जंजपूकः दंदशूकः, वावदूकः ।

१०१. **किन्-सहि-वहि-चलेर्यङः ।**

सहादेर्यङन्तात् किन् स्यात् । त्रैलोक्यभारं सासहिः, वावहिः, चाचलिः ।

१०२. **पापति सस्रि-चक्रि-दधि-जज्ञिनेमयः ।**

षडमी शीलादौ किनन्ता निपात्यन्ते ।

१०३. **स्मय-जसि-कमि-कम्पि-नमि-हिंस दीपो रः ।**

एभ्यो रः स्यात् । स्मेरः, नञो जसः—अजस्रा शब्दप्रवृत्तिः, कम्रः, कम्प्रः, नम्रः, हिंस्रः दीप्रः ।

१०४. **सनाशंसभिक्ष उः ।**

सनन्तादेः शीलादौ उः स्यात् । कटं चिकीर्षुः, क्षेत्रमाशंसुः, भिक्षुः ।

---

१०३. पपिः, वभ्रिः, जल्मिः, जघ्निः, इत्यपि पदान्तराणि दृष्यन्ते पाणिनीये।

१०५. **विन्दुरिच्छुः ।**

द्वौ निपात्येते ।

१०६. **स्वपि-तृषि-धृषेर्नजिङ् ।**

एभ्यो नजिङ् स्यात् । स्वप्नक्, स्वप्नजौ । तृष्णक्, तृष्णजौ, धृष्णक्, धृष्णजौ धृष्णजः ।

१०७. **शॄ-वन्देरारुः ।**

आभ्यामारुः स्यात् । शरारुः, वन्दारुः ।

१०८. **भियः क्रुः ।**

शीलादौ भियः क्रु स्यात् । भीरुः, स्वार्थे कः भीरुकः; लत्वे भीलुकः ।

१०९. **स्थेश-भास-पिस-कसो वरः ।**

एभ्यो वरः स्यात् । स्थावरः, ईश्वरः, भास्वरः, पेस्वरः, विकस्वरः ।

११०. **यो यङः ।**

यातेर्यङन्तात् वरः स्यात् । यायावरोऽनिलयः ।

१११. **क्विप्-विच्-मन्-वन्-क्वनिपः प्रायेण ।**

क्विबादयः प्रत्ययाः धातोः प्रायेण भवन्ति । प्रायग्रहणात् क्वचिद् भावकारकयोश्च, क्विब्विचोः सर्वापहारी लोपः । क्विप्—बिभ्राजते बिभ्राट् । भा भासौ धुर्व्वी-धूः, धुरौ । विद्युत् । ऊर्क्, ऊर्ज्जौ । पृ-पूः, पुरौ । *सुपश्च । ग्रावस्तुत । श्रयादेर्दीर्घश्च । श्रीः, जूः, कटप्रूः, भ्रूः, स्रूः ।

होर्द्वित्वञ्च । हूयते अनया जुहूः । ध्यायतेर्दधातेर्व्वा धीः । *गमादेर्द्वित्वञ्च । जगत्, दिद्युत्, ददृत्, उखास्रत्, पर्णध्वत्, मांसपिपक्, शोकच्छित् । * भूवः संज्ञायाम् भूः, पुनर्भूः, प्रतिभूरन्तरस्थः । दिविषत्, प्रसूः, प्रद्विट्, गोधुक्, मित्राय द्रुह्यति मित्रध्रुक्, प्रयुक्, अश्वयुक्, वेदवित्, शत्रुचित्, प्रणीः, सेनानीः, भ्रजते राट्—सम्राट्, शस्यमत्ति शस्यात् । क्रव्यात् । बाहुलकात्—अन्नादः, कणादः, क्रव्यादोऽपि कर्म्मणोऽण् । दीर्घानुनासिकलोपादजाद्याः । अप्सु जायते—अब्जाः, अग्रेगाः, उदधिक्राः । संपदादेः स्त्रियां भावे—सम्पत्, संवित्, विपत्, प्रतिपत्, संसत्, परिषत्, चित्, भित्, शुक्, रुक्, लुक् । * ब्रह्मादिषु

हनादेर्भूते। ब्रह्माणं हतवान् ब्रह्महा। भ्रूणहा, सुकृत्, पुण्यकृत्, कर्म्मकृत्, पापकृत्, सोमसुत्, अग्निं चितवान् अग्निचित्। * श्येनादेरग्न्याख्यायाम्। श्येनचित्, रथचक्रचित्। उक्तं शीलादौ। विच्-वेट्, शुभयाः। मन्—सुशर्म्मा, देवशर्म्माः, सुदामा। दीर्घः सूत्रामा। स-स्तः—अश्वत्थामा। वन्, यज्वा, घृतपावा, भूरिदावा। क्वनिप्-सुञ-सुत्वा, धीवा, पीवा। * युधिकृञो राज्ञः सहाच्च। राज युध्वा, राजकृत्वा, सहयुद्ध्वा, सहकृत्वा।

११२. वचादेर्णिः।

एभ्यो णिः स्यात्। वाक्, शब्द प्राट्, व्रज परिव्राट्। भज-सह-वहेः कर्म्मणः। अर्द्धं भजते अर्द्धभाक्, पादभाक्। सह वहेश्छन्दसि। तुराषाट्, जनावाट, प्रष्टवाट्।

१२४. सुपः।

अधिकारोऽयं प्राग्जीर्य्यतेः।

११३. युजादेः क्विन्।

एभ्यः कर्त्तरि क्विन् स्यात्। युङ्, युञ्जौ। समासे अश्वयुक्, प्रयुक्। क्रुञ्चेर्नोपधात्, कुङ्, क्रुञ्चौ। बाहुल्यात्कर्म्मादौ च। दिश्यतेऽसौ दिक्, दृश्यतेऽनया दृक्।

११४. अञ्चेः सुपः।

क्विन् स्यात्। प्राङ्, विश्वप्राङ्।

११५. स्पृशोऽनुदकात्।

घृतस्पृक्, मन्त्रेण स्पृशति मन्त्रस्पृक्। अनुदकादिति किम्? उदकस्पर्शी (र्शी) विप्र।

११६. ऋत्विक्-दधृक्-स्रगुष्णिहः।

एते क्विनन्ता निपात्यन्ते। ऋतौ यजति ऋत्विक्। धृषेर्द्वित्वञ्च दधृक्, सृजत्यसौ स्रक्। उतः (दः) स्निहेस्तलोप षत्वञ्च, उष्णिक्।

---

१११. ब्रह्मेति चत्वारोऽत्र नियमा इत्याम्नायम्। ब्रह्मादिष्वेव हन्तेरेव, भूत एव, क्विप् एव। तेन गां हतवान्, ब्रह्माधीतवान्, ब्रह्महन्ति, अतोऽण्। वामनवृत्तिकारस्तु हन्तेर्नियमादरिहेत्यसिद्धेरित्याह "त्वं ब्रह्मह भ्रूणहनावुपेतौ। मन्ये भवेतां प्रणिपत्य पूतौ। यथा मखेन विशुद्धदेहः स वृत्रहाभूद्दिवि देवराजः" इति। ब्रह्मविच्छब्दात्तुसाधु मन्यते। विदेः सामान्यक्विब्विधानात्, ततः षष्ठीसमासः। इह मधुहा अरिहा गोत्रहा ब्रह्मघ्नः। वृत्रस्य हन्तुः कुलिशमिति महाकविप्रयोगेष्वनियमोऽपि दृश्यते।

११७. समानान्यतदादेः कर्म्मण्युपमानात् दृशष्टक्सकौ च ।

समानादेरुपमानात् परस्मात् दृशः कर्म्मणि क्विन् टक् सक् स्युः । समाने इव दृश्यते सदृक्, सदृशः, सदृक्षः । अन्यतदादेष्टेरात्, अन्यादृक्, अन्यादृशः, अन्यादृक्षः । तादृक्, तादृशः, तादृशी, यादृक् यादृशीत्यादि ।

११८. वि-संप्रेभ्यो भुवो डुः ।

एभ्यो भुवो डुः स्यात् । विभवतीति विभुः, सम्भवतीति सम्भुः प्रभुः ।

११९. शतद्र्वादयश्च ।

शतद्रुरित्यादयः साधवः स्युः शतद्रुः मितद्रुः, शं कल्याणं भवते प्राप्नोति (यस्मात्) शम्भुः शिवः, भू प्राप्तावात्मनेपदी ।

१२०. कर्म्मणोऽण् ।

कर्म्मोपपदाद्धातोरण् बहुलं स्यात् । कुम्भं करोतीति कुम्भकारः, सूत्रधारः, शत्रुलावः, वेदाध्यायः कत्राभिप्रायः, द्वारपालः ।

१२१. आतः सोपसर्गात् ।

१२२. ह्वा-वामोऽप्रादौ च ।

स्वर्गह्वायः, तन्त्रवायः, धान्यमायः । नेह, गोदः, क एवात्र पूर्व्वविप्रतिषेधेन । बाहुल्यात् तुमर्थे सर्व्वतः, गोदायो व्रजति, ओदनभोजो व्रजति । क्वचिन्न स्यात् । आदित्यं पश्यति, ग्रामं गच्छति । क्वचिदच् प्रभृतयः । पयोधरः, मधुसूदनः । कथं मांसशीला, मांसे शीलमस्या इति समासेन अच्-प्रत्ययेन वा, तेन ङी न भवति । एवं मांसकामा, मांसभक्षा कल्याणाचारा, सुखप्रतीक्षा, दुःखक्षमा ।

१२३. दुहः को दुघ च ।

दुहेः कर्म्मणः कः स्यात्, दुघादेशश्च । कामदुघा गौः क्विप्-कामधुक् ।

---

१२०. कर्म्मशब्दोऽत्र संज्ञावचनो न तु स्वरूपवचनः "स्वरूपं शब्दस्यशब्दसंज्ञा (प० ३८) इति न्यायात् । उपकारि पदमुपपदम् क्रियायानिर्वर्त्ये कर्मणि कुम्भकार इति । इतरे तु प्राप्यकर्मणि ।

१२२. ननूभय प्राप्तौ विप्रतिषेधे (१.१.३४) परं कार्य्यं स्यात् कथमत्र क-प्रत्यय इत्याह पूर्व्ववि प्रतिषेधेनेति । विप्रतिषेधे क्वचित् पूर्व्वकार्यमपि, तत्र कार्य्य-ग्रहणात् । बाहुल्यादिति तुमर्थे सर्व्वतः (सर्व्वधातुभ्यः) बाधकविषयेऽपि स्यादित्यर्थः । क्वचिन्न भवतीति बाहुल्यादिति शेषः । ननु शीले कामिभक्ष्या-चरिभ्योऽणः, ईक्षि-क्षमिभ्याञ्चेति सूत्रितं मुनिना, तत्कथमत्र सूत्रितमित्याह कथमिति । अतोभवतः प्रतीतिभङ्गिः । अथाभिगम्यते इत्यभिगमः, अम्भोऽभिगमोऽस्या इत्यम्भोऽभिगम इति भवति । वस्तुतस्तु अम्भोऽभिगामीति स्यादित्याह अच् । प्रत्ययेन वेति । तेनाम्भोऽभिगमेत्यत्र बहुव्रीहिर्नेष्यत इति भावः ।

१२५. **चरेष्टः ।**

सुबन्ताच्चरेष्टः स्यात् । कुरूषु चरनीति कुरुचरः कुरुचरी, खेचरी, नञ्चक्तरी, भिक्षाचरः । * आदाय—सहाच्च । आदायचरः, सहचर, सहचरी ।

१२६. **पुरोऽग्रतो ऽग्रेभ्यः सर्त्तेः ।**

एभ्य सर्त्तेष्टः स्यात् । पुरः सरः, अग्रतः सर, अग्रेसरी । बाहुल्यात् पुरःसरा वाचः, इत्यचा ।

१२७. **पूर्व्वात् कर्त्तुः ।**

कर्त्तृ पूर्व्वात् सर्त्तेष्टः स्यात् । पूर्व्वः सरतीति पूर्व्वसरः । कर्त्तुरिति किम् ! पूर्व्वं सरतीति पूर्व्वसारः ।

१२८. **कृञो-हेतु-शीलानुकूल्येष्वशब्दादेः ।**

हेत्वादौ गम्ये सुपः करोतेष्टः स्यात् । यशस्करी विद्या । शीलं स्वभावः, स्वादुकारः । आनुकूल्ये वचनकरः ।

एवं शीलादौ दिवाकरः, निशाकर । एवं विभा, प्रभा, भास, कार, अन्त, अनन्त, आदि, बहु, नान्दी, किम्, लिपि, लिबि, बलि, भक्ति, कर्तृ, चित्र क्षेत्र, एकादि संख्या । जङ्घा, बाहु, अहन, यत्, तत्, धनुस्, अरुस् इत्यादि । * कर्म्मकरो भृत्यः । कर्म्मकारोऽन्यत्र । हेत्वादित किम् ? कुम्भकारः । अशब्दादेरिति किम् ? शब्दकारः । शब्द-श्लोक-कलह-गाथा-बैर-चाटु-सूत्र-मन्त्र-पदाः ।

---

१२५. आदाय सहाच्चेति सूत्रयतोऽयमभिप्रायः" नहि सापेक्षत्वे कृत्तद्धितसमासाः आदायशब्दस्य कर्म्मसापेक्षस्योपपदत्वाभावात् अप्यवन्त निरासार्थञ्चेति सहशब्दस्यापि सापेक्षत्वादाभ्यामपि चरतेष्टो विधीयते । टकार ङीप्रत्यार्थः ।

१२८. प्रतीतिशक्तिकं कारणमिह हेतुः । फलसाधनयोग्यपदार्थं इति यावत् । तेन विद्यया यशस्करणे शक्तिः प्रतीता । क्वचिदकरणेऽपि टप्ययो न विहन्यते । सम्बोधितदैवतो हविस्त्यागः श्राद्धम्, तत्कर्म्म कर्त्तव्यमित्येव य फलनिरपेक्षः करोति स श्राद्धकरः । हेत्वादौ किम् ? भाष्यकारः । यत्तु कुम्भकार इत्युदाहृतं वृत्तौ तन्न हेत्वर्थविवक्षणात् । हेत्वाद्यर्थाविषयत्वात् शब्दादौ कुम्भशब्दः क्रमदीश्वरेण पठितः । एवं शीलादाविति । दिवाशब्द आधारवचनमव्ययम् । करोतीति प्राणिनश्चेष्टायुक्तान् दिवाकरः । कर्म्मापेक्षायामपि प्रत्यय इति वर्धमानः । ननु-दिवा-विभाप्रभादि सूत्रं टप्रत्यार्थं पाणिनि प्राणिनाय तत्कथम् नोच्यते इत्याह एवमिति । शीलाद्यर्थविवक्षयेत्यर्थः । कातन्त्रे त्वहेत्वाद्यर्थोऽयमारम्भ इत्युक्तम् । यथा दिवाकर इत्यादिः । एककरः, द्विकरः, संख्याकरः इत्यादि । आदिशब्दात् दिवाकरादयोऽपि ।

१२९. **स्तम्बकरिशकृत्करी व्रीहिवत्सयोः ।**
इदन्तौ निपात्येते । स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः

१३०. **दृतिहरिनाथहरी पशौ ।**
एतौ पशौ कर्त्तरि स्याताम् । दृतिहरिः श्वा, नाथहरिरश्वः ।

१३१. **आत्मोदरकुक्षिभ्यो भृञ इख् ।**
एभ्यो भृञ इख् स्यात् । आत्मानं बिभर्त्तीति आत्मम्भरिः, उदरम्भरयश्चकोराः, कुक्षिम्भरिः ।

१३२. **फलेग्रहिः ।**
स्यात् । फलानि गृह्णातीति फलेग्रहिः ।

१३३. **एजेः खश् ।**
सुप एजयतेः खश् स्यात् । अङ्गमेजयः । जनमेजयः ।

१३४. **धेटो मुष्ट्यादेः ।**
खश् स्यात् । मुष्टिन्धयो बालः, स्तनन्धयी, धातोष्टित्वात् ङी । शुनींधयः पापः । मुष्टि स्तन शुनी घटी खारी वाताः ।* नासिकादेर्घ्मः । नासिकान्धयति नासिकन्धयः । नासिका नाड़ी पाणि कर घटी खारी खरी वाताः । वातन्धमः ।

१३५. **वातादजः ।**
वातमजो मृगः ।

१३६. **शर्द्धाज्जहातेः ।**
शर्द्धंजहा माषाः ।

१३७. **तिलविध्वरुषस्तुदः ।**
तिलन्तुदः काकः, विधुन्तुदो राहुः । अरुन्तदो मर्मस्पृक् ।

१३८. **अल्प-मित-नख-परिमाणात् पचः ।**
अल्पम्पचः, मितम्पचः नखम्पचा यवागूः । परिमाणात् प्रस्थम्पचः कटाहः प्रसृतिम्पचः ।

१३९. **वहाभ्राल्लिहः ।**
वहंलिहो गौः, अभ्रंलिहो वायुः ।

---

१३४. मुष्टादयःषट् । "मुष्टि-स्तन-मुञ्ज-कुलास्यपुष्पेषुधेटः" इति कातन्त्रम् ।
१३६. शर्द्धोऽपानवायुस्तज्जहातीति वाक्यम् । जहातिरन्तर्भावितण्यर्थः ।

१४०. **कूलादुद्रुजोद्वहेः।**

कूलमुद्रुजो गजः। कूलमुद्वहा नदी।

१४१. **दृशेरुग्राऽसूर्य्यात्।**

उग्रंपश्यः, सूर्य्यमपि न पश्यतीति असूर्य्यम्पश्या देवी। नञर्थो दृशिना सम्बध्यते।

१४२. **ललाटात्तपः।**

ललाटन्तपः सूर्य्यः।

१४३. **प्रियवशाद् वदः :**

प्रियंवदः, वशंवदोऽनुकूलः।

१४४. **सर्व्वकूलाब्भ्रकरीषात् कषः।**

सर्व्वङ्कषः खलः, कूलङ्कषा नदी। अब्भ्रङ्कषो गिरिः, करीषङ्कषा वात्या।

१४५. **वाचंयमो व्रती।**

वाचंयमः स्यात्, व्रती चेत्। अन्यत्र वाग्यामः।

१४६. **सर्व्वंसहेरम्मद-परन्तप-द्विषन्तप-भगन्दर-पुरन्दराः।**

एते खशन्ता निपात्यन्ते। सर्व्वंसहः साधुः, असंज्ञार्थमस्य ग्रहणम्। इरया माद्यति इरम्मदो मेघज्योतिः, परान्तपतीति परन्तपः। द्विषन्तपः। भगन्दरो रोगः। पुरन्दरः इन्द्रः।

१४७. **मेघर्तिभयात् कृञः खः,**

एभ्यः करोते खः स्यात्। मेघङ्करो वातः ऋतिङ्करः भयङ्करः।

---

१४१. सूर्य्यं न पश्यतीति गुप्ततयाऽनिवार्यं दर्शनमपि सूर्यं न पश्यति। अथ सूर्य्यसम्बन्धस्य नञः पर्युदासार्थस्य कथं दृशिना सम्बन्धः? क्रियासम्बन्धस्य नञः प्रसृज्यवृत्तेः समास एव नास्ति सापेक्षत्वादिति चेत् गमकत्वात् समासः प्रसृज्यवृत्तेरकर्त्तरीतिवदित्याह नञर्थो दृशिना सम्बध्यते इति।

१४६. भृतॄ-(१५०) इति सहतेः खशि सिद्धे किमर्थमेतस्य ग्रहणमित्याह-असंज्ञार्थमिति। अथ फलेग्रहीतितिवत् संज्ञाया व्युत्पादितोऽपि क्वचिद् यागार्थमनुसरिष्यति चेदिदमपि कष्टकल्पनम्।

१४७. भयेन तदन्ताविधिरिष्ट इति दुर्गः। तेन नाभयङ्कर भयङ्करो सिद्धौ।

१४८. क्षेमप्रियमद्रादण् च ।

एभ्यः कृञः खोऽण् च स्यात् । क्षेमङ्करः, क्षेमकारः, प्रियङ्करः प्रियङ्कारः मद्रङ्करः मद्रङ्कारः । बाहुल्यात् क्वचिदुत्सर्गापवादयोः समावेशः, तेन क्षेमकरस्य हितस्य च प्रजानामिति भट्टिः । * भद्राच्चेत्येके । भद्रङ्करो, भद्रकार ।

१४९. आशिताद् भुवः करणभावयोः ।

'आङोऽश्नातेः क्तान्तादाशिताद् भुवः' खः स्यात् । आशितेन तृप्तेन भूयतेऽनेन आशितम्भवः ओदनः । भावे—फलैर्येष्वाशितम्भवम्, तृप्तिरित्यर्थः ।

१५०. भृ-तॄ-वृ-जि-धारि-सहि तपि-दमो नाम्नि ह्रस्वश्च ।

सुप एभ्यः संख्यायां खः स्यात् । विश्वम्भरो विष्णुः । विश्वम्भरा भूः, रथन्तरं साम, पतिंवरा कन्या, धनञ्जयः । धारेर्ह्रस्वश्च वसुन्धरा, सर्व्वंसहा भूः, शत्रुन्तपः बलिन्दमः कृष्णः ।

१५१. गमः ।

गमः खः स्यात् । प्लवङ्गमः, भुजङ्गमः, सुतङ्गमः, पूर्व्वंगमोऽयं पन्थाः हृदयङ्गमो वाचः । * प्रवङ्ग-तुरङ्ग-विहङ्ग-विहङ्गम-विहगभुजङ्गश्च । अत्र मलोपो विहायसो विहश्च निपात्यन्ते । लत्वे प्लवङ्गश्च ।

१५२. प्रियाढ्य-सुभग-स्थूल-पलित-नग्नान्धादच्वेर्भुवः खिष्णु-खुकणौ ।

प्रियादिभ्योऽच्व्यन्तेभ्यश्च्विसादृश्याच्च्व्यर्थे वर्त्तमानेभ्यः पराद्भुवः खिष्णु-खुकणौ स्याताम् । अप्रियः प्रियो भवति प्रियम्भविष्णुः प्रियम्भावुकः, आढ्यम्भविष्णुः, आढ्यम्भावुकः । अच्वेरिति किम् ? आढ्यीभविता रसविधिः ।

---

१४८. ननु खो विभाषाताम् ततः पक्षेऽण् भविष्यति । किमण् ग्रहणेन ? सत्यम्, हेत्वादिष्वपि टबाधनार्थमिदम् । उत्सर्गापवादयोः समावेश इत्युत्सर्गापवादावण् खौ न स्याताम् । किं वा उत्सर्गमपवादञ्च परिहृत्य विधिरन्यः प्रवर्त्तते । क्षेमकरस्येत्यत्राच् टो वा ।

१५२. इहाच्वेरिति नञः पर्युदासवृत्तितया प्रियादेस्तत्साहश्यमित्याह च्विसादृश्या-दिति । केन धर्म्मेण तत्सादृश्यमिति चेत्, अभूततद्भाववृत्तित्वेनेत्याह च्व्यर्थे वर्त्तमानेभ्य इति । लिङ्गविशिष्टग्रहणात् नग्नम्भविष्णुः कामुकी ।

१५३. करणे कृञः खनट् ।

प्रियादिभ्यः करोते करणे खनट् स्यात् । अप्रियं प्रियं कुर्वन्त्यनेन प्रियङ्करणं दानम् । आढ्यङ्करणा वणिज्या, सुभगङ्करणं दानम्, स्थूलङ्करणमौषधम् । पलितङ्करणं तैलं, नग्नंङ्करणं द्यूतम्, अन्धङ्करणं शोकः । च्वेष्टनेन भवितव्यम् । आढ्यीकरणो रसविधिः ।

१५४. गमादेर्डः ।

सुप इत्येव, गमादेः कर्त्तरि डः स्यात् । भुजगः, तुरगः, खगः, प्लवगः, स्त्र्यागारगः, पूर्व्वगः, अन्तगः, अत्यन्तगः । अध्वगः, दूरगः, पारगः, सर्व्वत्रगः । * उरसः सलोपश्च । उरग । पद्भ्यां न गच्छतीति (पन्नं पतितं गच्छतीति वा) पन्नगः सर्पः । *सुदुर्भ्यामधिकरणे । सुगः, दुर्गः । * निर्गो देशे । आदिशब्दात् गिरौ शेते गिरिशः, कह्वः, आखन्यते आखा, परिखा । उतस्तलोपश्च । उखा ।

१५५. आशिषि हनः ।

शत्रुं वध्यात् शत्रुहः । क्वाचिदनाशिषि, ववाहः, कटाहः । अपाज्ज्वरक्लेशतमसः । ज्वरापहः, तमोऽपहः, क्लेशापहः ।

१५६. राजघः, पाणिघताड़घौ शिल्पिनि ।

एते निपात्यन्ते, राजघस्तीक्ष्णः । पाणिना हन्तीति पाणिघः, ताड़घः ।

१५७. भूते जनः ।

भूते जनो डः स्यात् । उपसरे जातः उपसरजः । मन्दुराया ह्रस्वश्च । मन्दुरजः, तज्जः, कृतज्ञः, ब्राह्मणाज्जातो ब्राह्मणजो धर्मः, बुद्धिजः, कौशल्याजो रामः, न जातोऽजः, द्विर्जातो द्विजः, सहजः, अनुजः, रामानुजः, पुमनुजः, स्त्र्यनुजः, प्रजाताः प्रजाः अभिजातः अधिजः, प्रथमजः, केन जातः किञ्जः । क्वचिन्न जातेः, अश्वाज्जातः । दार्व्वाघाटादयः पृषोदरादौ ज्ञेयाः । सुप इति निवृत्तम् ।

---

१५३. यच्छेषमनुवर्त्तते इति न्यायात् प्रियादानुवर्त्तते एवेत्याह प्रियादिभ्य इति इहापि लिङ्गविशिष्टग्रहणान्नग्नङ्करणम् करणे प्रत्ययान्तरत्वादुक्तेराह च्वेरिति ।

१५४. भिन्न प्रकरणमित्र सामान्यमुपपदमनुवर्तते इत्याह सुप इत्येवेति, अस्य विधेः सामान्यविषयत्वात् संज्ञायामुदाहरति भुजग इत्यादित्रयम् ।

१५५. कर्तृ कर्मणोऽच्व्यर्थयोरिति वाच्यम् । अनाढ्येनाढ्येन दुःखेन भूयते दुराढ्यम्भवमिति भट्टोजिदीक्षितः ।

१५६. 'अशिषि' इति किम्? क्रोशं हन्ति गच्छतीति वाक्यमेव कातन्त्रे हन्तेः कर्म्मण्याशीर्गत्योरिति सूत्रयित्वा क्रोशह इन्युदाहृतवान् ।

१५८. **जीर्य्यतेरतृः ।**

अस्माद् भूतेऽतृः स्यात् । जरन्, जरती ।

१५९. **निष्ठा ।**

पृथक्त्वाद् धातुमात्राद् भूते क्त-क्तवतू स्याताम् । कृतः कृतवान् ।

१६० **ज्ञानेच्छा-पूजार्थञीतः क्तो वर्त्तमाने च ।**

एभ्यः क्तो वर्त्तमाने च भवति । ज्ञानार्थात्—राज्ञां मतः, बुद्धोऽवगतः, राजाभिर्ज्ञायत इत्यर्थः । इच्छार्थात्—इष्टः, वाञ्छितः । पूजार्थात्—सतां पूजितोऽर्च्चितः । ञीतः खल्वपि, ञिमिदा-मिन्नः । बाहुल्यादन्येभ्योऽपि ।

१६१. **कृत्य-क्त-खलर्था भावकर्म्मणोः ।**

कृत्यादयो भावे कर्म्मणि च स्युः । भवितव्यम् । सकर्मकेभ्यश्च भावे विवक्ष्यते । सभां वा न प्रवेष्टव्यम् । भूतं कृतं तव; ईषदाढ्यम्भवस्तेन । कर्म्मणि- कर्त्तव्यः, कटः कृत, सुकरः कटो भवता ।

---

१५७. दार्व्वाहनोऽणन्तस्य च टः संज्ञायाम् दारावुपपद आङ्पूर्वाद् हन्तेरण् वक्तव्योन्त्यस्य च टो वक्तव्यः । चारौ वा दार्व्वाघाटः । दार्वाघाटः, चार्व्वाघाटः । कर्म्मणि समि च । कर्मण्युपपदे सम्पूर्वाद् हन्तेरुक्तं वेत्यर्थः । वर्णान् संहन्तीति वर्णसंघाट, पदसंघाटः, पदसंघातः ।

१५९. ननु अनन्तरस्य (परि० २९) इति न्यायात् जीर्यति कथं नानुवर्त्तत इत्याह पृथक्त्वात्, पृथग्योगादित्यर्थः ।

१६०. राजभिर्ज्ञात इत्यनेन वर्त्तमानत्वं व्यञ्जितम् । तेन (२/२/५१) इति षष्ठी । बाहुल्यादन्येभ्योऽपि । यथा—शीलितो रक्षितः क्षान्तः आक्रुष्टः जुष्टः इत्यापि । रूटश्च रुषितश्चोभावभिव्याहृत इत्यपि । क्रुष्ट जुष्टो तथा कान्तस्तथोऽभौ संयतोद्यतौ । कष्टं भविष्यतीत्याहुरमृताः पूर्ववत् स्मृताः । कष्टमिति भविष्यति काले, कषिष्यतीति कष्टम्, कषः कृच्छ (३/४१/२७) इत्यनिट् । न म्रियन्त इत्यमृताः । बहुवचनादमृतादिगणः तेन सुप्तः शयितः आशितः लिप्तः स्निग्धः, इत्यादि ।

१६२. गेयादयो बहुलम् ।

स्युः । कर्त्तरि गेयोऽयं साम्नाम् । कर्म्मणि-गेयान्यनेन सामानि । एवं भव्योऽयम् । भावे-भव्यमनेन । प्रवक्तीति प्रवचनीयो गुरुर्धर्मस्य, समावर्त्तनीयो गुरुरुपनीतस्य, उपस्थानीयः शिष्योऽगुरौ, उपासक इत्यर्थ । लोचनं लोभयतीति लोभनीया संस्यपंक्तिः । जायते वा जन्यः, आप्लवते आप्लव्यः, आपतति वा आपत्यः । पूर्वं बहुलग्रहणं स्पष्टार्स्थम्, करणाद्यर्थञ्च, करणे—स्नानीयं चूर्णम् । सम्प्रदाने—दानीयो भिक्षुः । अपादाने—भेतव्या रजनी,प्रपतनीयो भृगुः । आधारे—शयनीयं वस्त्रम् रमणीया वापी, रम्यमुद्यानम् । तिष्ठन्त्यस्मिन्निति स्थेयः ।

१६३. आरम्भे क्तः कर्त्तरि च ।

आदिकर्म्मणि क्तः कर्त्तरि च भवति । प्रकृतः कटः चैत्रः । अन्यत्र यथाप्राप्तञ्च, प्रकृतः कटश्चैत्रेण, प्रद्योतितो भानुः, द्योतितुमारब्ध इत्यर्थः ।

१६४. गत्यर्थोऽकर्मक-श्लिष-शीङ्-स्था-आस-वस-जन-रुह-जीर्यतिभ्यश्च ।

एभ्यः क्तः कर्त्तरि च भवति । ग्रामं गतोऽसौ,एनं गतः, श्वो भवितेति रामः । पक्षे यथाप्राप्तञ्च, ग्रामो गतस्तेन, ग्रामे गतममुना, इमं देशमहिः सृप्तः, अयमहिना सृप्तः इहाहिना सृप्तम् । अकर्मकात्—भूतोऽयम्, भूतमनेन । श्लिषादेः—अयमाश्लिष्टा सा, अस्याश्लिष्टम् । शीङादेः पृथगुपादानं उपसर्गात् सकर्मकार्थम् । अधिशयितः खट्वाम् । खट्वाधिशयितानेन, अधिशयितमस्याम्, एवम् उपस्थितो गुरुम् । उपासितो गुरुम्, अध्युषितस्तरुम्, उपजातः पुत्रम्, आरुढस्तरुम्, अनुजीर्णोऽयं वृषलीम् । क्तवतुः कर्त्तर्य्येव व्यवस्थितः ।

---

१६४. ननु शीङादयोऽप्यकर्मकास्तेषामकर्मकत्वेन ग्रहणं स्यात्, किं पृथगुपादानेनेत्याह शीङादेरिति । उपसर्गविशेषे च केचन धातवः सकर्मका स्युरित्यर्थ । उपजातः सूत्रमिति । एवमसौ कुमारस्तमनुजात इति रघु० । ननु विशेषाभावात् क्तवतुः कुत्र स्यादित्याह क्तवतुः कर्त्तर्येव व्यवस्थित इति, कर्त्तरीत्यानुवृतेर्बाहुल्यादिति शेषः । तर्हि कथं नीरक्तो गामतरति क्षयं पृषत्कैरिति भारवौ, प्रबोधिवता किं कुम्भकर्णेन वेति वीरचरिते कर्म्मणि स्यात् ? महाकविप्रयुक्तत्वात् बाहुल्यात् समर्थनीयः । इह यद्यपि भावकर्म्मानुकर्षकश्चकारस्तथाप्यनुक्तसमुच्चयार्थोऽपि आवृत्तिपाठात् । तेन सौधवासमुटजेन विस्मृत इति कालिदासः । वागीश्वरं पितरमेतमानतोऽस्मीति ।

१६५. **अधिकरणे च गत्याहारार्थाकर्म्मकेभ्यः ।**

एभ्यः क्तोऽधिकरणे च भवति । पक्षे यथाप्राप्तञ्च । इदम (इहा) हेर्गतम्, इदमहेः सुप्तम्, इदमस्य भुक्तम्, पीतम्, इदमस्यासितम्, शयितम् । कथं पीता गावः, विभक्ताः भ्रातरः इति ? पीतं विभक्तं चास्यास्तीति मत्वर्थीयोऽत् ।

इति पद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
चतुर्थस्याध्यायस्य प्रथमः पादः ।

———

१६५. कथं पिबतिभजत्योः कर्त्तरि क्तः स्यादित्यभिप्रेत्यत्याह कथमिति ।

———

अथ चतुर्थाध्यायस्य

द्वितीयः पादः

उणादि-प्रकरणम् ।

१. उणादयो बहुलम् ।

उणादयः प्रत्यया धातोर्बहुलं स्युः । यदाहुः—उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति । वर्त्तमान इत्यनुवर्त्तते ।

२. कादिभ्य उण् ।

कार्य्यं कारुः, वायुः ।

३. मङ्गेरलच् ।

मङ्गलम् । केचिद् भूते च । वृतं तदिति वर्त्म । भसितं भस्म ।

---

१. नन्वेषां प्रकृतिप्रत्ययविभागमकृत्वा किमित्युणादयो बहुलमित्युच्यते इत्याह यदाहुरिति, मुनय इति शेषः । उणादिप्रत्ययान्ताः शब्दाः अव्युत्पन्नानि प्रातिपदिकानि रूढ़ा इत्यर्थः । औणादिका हि संज्ञाशब्दास्ते च व्युत्पत्तिमन्तरेण लोके विशिष्टविषयितया प्रसिद्धाः, न च तेषां व्युत्पत्तिः कर्त्तुं शक्यते आनन्त्यात् । कृतान्तु प्रकृतिप्रत्ययविभागो दर्शित एव, अत्र तेषां शक्तेः, ननु सूत्रमेव प्रणीयतामिति चेत् । युक्तमुक्तम् बालव्युत्पत्तये सूत्रप्रणयम् । ये पुनर्व्युत्पत्तिमाद्रियन्ते यदृच्छाशब्दानाम्, तेऽपि कार्त्स्न्येन प्रकृतिप्रत्ययादीन् दर्शयितुं न शक्ताः, रूढिमेव प्रतिपद्यन्ते यत्र क्वचन । तथा चोक्तम्, 'नाम धातुजमाह निरुक्ते व्याकरणे शकटस्य तोकम् । यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्" इति । अस्यार्थो व्याख्यायते निरुक्तकारो निरुक्ते स्वशास्त्रे नामधातुजमेवाह । चकारोऽवधारणे । न केवलं स एवमाह, शाकटायनोऽपि व्याकरणे धातुजमाह । एवं पुनरविहितप्रकृति-प्रत्ययविशेषं शब्दजातं तत्कथं निश्चीयतामित्याह यन्नेत्यादि । प्रकृत्यादिरिह पदार्थ उच्चते । पदमर्थः प्रयोजनं यस्येति पदार्थः । प्रत्ययविशेषात् समुत्थः प्रादुर्भावो यस्य । एवं यन्न भवति यत् समूह्यम्, ऊहनद्वारेण प्रतिभातमात्रात् प्रत्ययात् प्रकृतेश्चेति । ऊहस्तु लोकेप्रसिद्धेषु प्रकृति-प्रत्ययप्रविकल्पने यः कर्त्तव्यः, यथोक्तम् "संज्ञासु धातुरूपाणि प्रत्ययांश्च ततः परे । कार्य्याद् विद्यादनुबन्धमतेच्छास्त्रमुणादिषु" इति । कार्य्यैर्गुणवृद्धयादिलक्षणैः ।

४. भीमादयोऽपादाने ।

भीमः, भीष्मः । पुनर्बहुलग्रहणं स्पष्टार्थम् ।

५. न्यादेःकरणे त्रट् ।

नीआदेः करणे त्रट् स्यात् । न्यत्यनेन नेत्रम् । दाप्—दान्त्यनेन दात्रम् । नी दाप-शम-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-नहः । शस्त्रम्, योत्रम्, योक्त्रम्, स्त्रोत्रम्, तोत्त्रम्, सेक्त्रम्, मेहड्ढ्रम्), पत्रम्, नध्री । पोत्रं हलशूकरयोर्मुखे, बाहुल्यात्-धः कर्म्मणि । धीयतेऽसौ—धात्री ।

६. दंष्ट्रा दशने ।

आबन्ता निपात्यते ।

७. अत्यादेरित्रः ।

एभ्यः करणे इत्रः स्यात् । अर्य्यतेऽनेन अरित्रं नौवाहनम् । रिपुलवित्रोवा णः धुवित्रं धवित्रञ्च व्यञ्जनम् । सू-सवित्रम्, सहित्रम्, घरित्रम्, वहित्रम्, परित्रम बाहुल्यात् पुरः कर्त्तरि च । पुनातीति पवित्रोऽग्निः । पवित्र ऋषिः ।

८ घण् भावकारकयोरकर्त्तरि ।

अनयोर्धातोर्घण् स्यात् । भावे—पाकः, त्यागः, रागः—कारके । संज्ञायासज्ञायाञ्च । लिख्यतेऽसौ लेखः । वेदः, प्रास्यते प्रासः, रज्यतेऽनेनेति रागः कुङ्कुमम्, दाशन्ति यस्मै वा दास्यत्यस्मै दाशो (स) विप्रः आहरन्त्यस्मादित्याहारः, आध्रियते अस्मिन्नित्याधारः । बहुलाधिकारात् पदादेः कर्त्तरि च । पद्यते पादः । रुजति रोगः सरति कालान्तरमिति सारः स्थिरांशः । अतिसारो व्याधिः, विसारो मत्स्यः । वहतीति वाहोऽश्वः । कलयतीति कालः, सरन्त्यनेन सारो बलमित्यादि । शृणातेर्व्वायुवर्णनिवृत्तेषु । शारो वायुर्व्वर्णश्च । नीशारः प्रावरणम् । अतो भावेऽकर्त्तरि कारके च विधिः ।

अनुबन्धं णकारादिकं जानीयात् । अथ व्युत्पत्तिपक्षमाश्रित्याह- -वर्त्तमान इत्यनुवर्त्तत इति । णक्-तृचौ कर्त्तरि वर्त्तमान इत्यत इति शेषः । अत एव "कृ-वा-पा-जि-मि-स्वदि-साध्यशूभ्यः उण्" इति पूर्व्वाचार्यसूत्रमुद्दिशति । यद्वा अव्युत्पन्नानि प्रत्यायार्थघटकीभूतप्रकत्यर्थशून्यानि, ईषद्व्युत्पन्नानीत्यर्थः । अथवा प्रकृतिप्रत्ययघटितार्थशून्यानि, रुढानीति यावत् । प्रकृतिप्रत्ययशक्तिमनपेक्ष्यार्थबोधकत्वं रुढ़ार्थत्वम् । यथा मण्डपः । प्रकृतिप्रत्ययशक्तिमनपेक्ष्यार्थबोधकत्वं यौगिकत्वम् । यथा पाचकः । प्रकृतिप्रत्ययशक्तिमपेक्ष्य समुदायशशक्त्यैकपदार्थबोधकत्वं योगरूढ़म् । यथा—पङ्कजः ।

४. भयानक, वाह, चरु, प्रस्कन्दन, प्रपान, स्रुव, स्रक् दृष्टि, वक्षः, शङ्कु, शुक मूर्ख खलति । इति आकृतिगणोऽयम् ।

९. परिमाणार्थे सर्व्वेभ्यः ।

अत्र सर्वधातुभ्यो घण् स्यात् । सर्व्वग्रहणादपवादविषये च । एकस्तण्डुलनिश्चायः, द्वौ शूर्पनिष्पावौ । बाहुल्याद् नैकोऽपि तव निश्चय इत्यप् ।

१०. इङादेश्च ।

अपोऽपवादार्थोऽयमारम्भः । इङादेर्घण् स्यात् । अध्यायः उपेत्याधीयतेऽस्मादित्युपाध्यायः । दीर्य्यतेऽभीभिर्दाराः, जीर्यतेऽनेन जारः ।

११. समोद्रुवः । स्तुवश्च यज्ञे ।

संद्रावः, संस्तावश्छन्दोगानाम्, अयज्ञे तु संस्तवः ।

---

९. इह भावो भवत्यर्थः । स तावत् क्रियासामान्यवचनः । सत्ता द्विविधा, साध्यः सिद्धश्च । प्रथमस्त्यादिवाच्यः, द्वितीयस्तु द्रव्यरूपो घञादिवाच्यः । उक्तञ्च—"क्रियायाः साध्यतावस्था सिद्धता च प्रकीर्त्तिता । सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ्विधिम्" इति । अतएव कृद्विहितो भावो द्रव्यवत् प्रकाशत इति । तेन द्विवचने बहुवचने लिङ्गभेदश्चोपद्यते । यथा पाकौ पाकाः (पाकः पक्तिः) एष्विति किम् ? शृणोत्यनेन शरः । घकारश्चजोघिण्ण्यतोरित्यस्य विशेषणार्थः । ननु कर्त्तरि च कारके इति संज्ञायामिति मुनिप्रणीतं सूत्रं कथमपनीतम् ? इत्याह कारक इति । दास्यत इति दासृ दाने भौवादिकः । दासः शूद्रे दानपात्रे भृत्यधीवरयोरपीति विश्वप्रकाशकृता दन्त्यान्ते पठितः । ऋत्विजि दाशस्तालव्यो धीवर एष दन्त्य-तालव्य इति गदसिंहेन तालव्यान्त उक्तः । असंज्ञायान्तु लाभो लब्धः, दायो दत्तः इत्यादिः । पदादेः कर्त्तरि चेति पद्यत्यनेन पाद इति करणव्युत्पत्त्या सिद्धे पद रुज विशस्पृशो घञिति पाणिनिसूत्रानुरोधात् पाद इत्युक्तम् । इह विध्यति व्याध इत्यपपाठः । श्याद्व्यधास्रु—(४-१-५५) इति ण प्रत्ययेन सिद्धेः । स स्थिरे । सर्त्ते स्थिरे कर्त्तरि घञ् स्यात् । व्याधिमत्स्यबलेष्विति वाच्यम् ।

१०. अध्याय इति भावकर्म्मणोः । दारजारौ कर्त्तरीति केनचित् सूत्रितम्, तदिह न वक्तव्यमित्याह दीर्य्यत इत्यादि ।

११. समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः, स देश संस्तावः । यज्ञे किम् ? संस्तवः परिचयः ।

१२. निरवः पुवः ।

निष्पावः, उत्पावः ।

१३. समुदो युद्रुवः ।

संयावः, उद्यावः । संद्रावः, उद्द्रावः (यावश्च) ।

१४. प्रे-द्रु-स्तु-स्रुवः ।

प्रद्रावः । प्रस्तावः । प्रस्रावः । स्रावश्च ।

१५. वेःक्षुश्रुवः ।

विक्षावो विश्रावः ।

१६. प्रे स्त्रोऽयज्ञे ।

प्रस्तारः । यज्ञे तु बर्हिषः प्रस्तरः ।

१७. प्रथने वेरशब्दे ।

वारिविस्तारः । शब्दे तु—वाग्विस्तरः ।

१८. छन्दसि च ।

विष्टारः पंक्तिनाम छन्दः ।

१९. रुवः प्रादेः ।

संरावः, विरावः आङो वा केवलाच्च । आरावः रावो रवश्च ।

२०. श्रि-भुवोऽप्रादेः ।

श्रायः, भावः । प्रादेस्तु-प्रश्रयः, प्रभवः । प्रभावादिस्तु समासेन ।

२१. उदः श्रियो वा ।

उच्छ्रायः, उच्छ्रयः ।

२२. अवान्नियः ।

अवनायः ।

२३. उदो वा केवलाच्च ।

उन्नायः, उन्नयः । नायो नयः । जालमानय ।

२४. परिणायः शारीणां सर्व्वतोऽनयेन ।

२५. अभेर्लुवः ।

अभिलावः ।

२६. ण्युदोऽग्रः, किरश्च धान्ये ।

निगारः, उग्गारः । निकारः उत्कारः, एतौ धान्योत्पक्षेणार्थौ । अन्यत्र निकरः पुष्पोत्करः ।

२७. **अवात् तॄ स्तृञः ।**

अवतारः, अवस्तारः ।

२८. **न्यायो नये ।**

२९. **नीवारस्तृणधान्ये ।**

३०. **पर्य्यायोऽनुक्रमे ।**

३१. **उपशाय-विशायौ पर्य्यायशयने ।**

अद्य ममोपशायः, तवाद्य विशायः ।

३२. **हस्तादाने चेरस्तेये ।**

हस्तेन पुष्पप्रचायः, फलोच्चायः । हस्तादा इति किम् ? वृक्षाग्रे पुष्पप्रचयोऽयम् । अस्तेय इति किम् ? चौर्य्येण पुष्पप्रचयं करोति हस्तेन ।

३३. **गृह-देह-राशीकरणेष्वादेश्च कः ।**

निकायो गृहम्, कायो देहः, काष्ठनिकायः ।

३४. **सङ्घे सधर्म्मिणाञ्च ।**

एकधर्मानुसारिणां समूहे भिक्षुनिकायः । सधर्मिणामिति किम् ? शूकरनिचयः ।

३५. **उदि ग्रहः ।**

उद् ग्राहः ।

३६. **न्यवादाक्रोशे ।**

निग्राहस्ते भूयात्, अवग्राहस्ते भूयात् ।

३७. **समि मुष्टौ ।**

अहो मल्लस्य संग्राहः, मुष्टिरित्यर्थः ।

३८. **परेर्यज्ञे ।**

उत्तरपरिग्राहः । अज्ञये तु—परिग्रहः ।

---

३४. समान एको धर्मोऽस्यास्तीति सधर्म्मी, अतएव ज्ञापकात् कर्म्मधारयादपि मत्वर्थीय इत्याह एक धर्म्मानुसारिणामिति । श्रुतिस्मृत्युक्ताचारो धर्म्मः ! संघे चानौत्तराधर्य्ये । अस्यार्थः उत्तरे चाधरे च, उत्तराधरास्तेषां भावः तद्भिन्नार्थं गम्ये चेर्घण् कश्च भवति । शूकरनिचय इति स्तन्यपानार्थं हि हि ते उत्तराधर भावेन शेरतेऽतो न समानधर्मत्वम् । शूकरनिचय इति पौर्वापर्य्यमात्रं विवक्षितं नैकधर्म्मत्वात् ।

३९. प्रालिप्सायाम् ।

पात्रप्रग्राहेण चरति भिक्षुः ।

४०. वा वणिजाम् ।

वणिक्सम्बन्धिन्यभिधेये प्राद्वा स्यात् । तुलाप्रग्राहः । तुलाप्रग्रहो वा ।

४१. रश्मौ च ।

रश्मिरश्वादिधारणरज्जुः, तत्र वा । प्रग्राहः, प्रग्रहः ।

४२. अवाद् वृष्टिविबन्धे ।

अवग्राहोऽवग्रहश्च मेघस्य ।

४३. खनः ।

वेत्येव । आखानः, आखनः ।

४४. वृञ आच्छादने ।

प्रावारः, प्रवारः, प्रवरः ।

४५. आङि प्लुवः ।

आप्लावः, आप्लवः ।

४६. परे भुवोऽवज्ञाने ।

परिभावः, परिभवः ।

४७ उदङ्कोऽनुदके ।

घृतोदङ्कः । नेह जलोदञ्चनः ।

४८. ऋदिण् गमादेरप् ।

ऋदन्तादिणन्ताच्च गमादेश्च घण्वादोऽप् स्यात् । ऋतः, करः, आकारः, तरः, आतरः, गरः, सङ्गरः । इणन्तात् चयः, जयः । कथं भयं क्लीबे ?

---

४०. वणिकसम्बन्धिनि तुलासूत्रे वाच्ये ग्रहो घण् स्यात् । अत्र वणिजामित्युपलक्षणत्वात् सूत्रस्यैव प्राधान्यम्, तेन तुलाप्रग्रहेण चरति विप्र इत्यपि भवति। तुलाभिज्ञतयेत्यर्थः ।

४३. भिन्नधातुत्वादुपपदं निवर्त्तते, आङभिधीयते, विकल्पस्त्वनुवर्त्तते, इष्टत्वादित्याह वेत्येवेति । खनः करणाधिकरणयोरिति वासवतं सूत्रम् । शरीराखनतुण्डाग्रं करणाधिकरणयोरित्यमिधानात् । खनेर्ड-डर-इक-इकवका वाच्याः । आखः, आखरः । आखनिकः आखनिकवकः ।

लोकाश्रयत्वाल्लिङ्गस्येति । जवः, प्लवः, द्रवः, उत्सवः । गमादेः खल्वपि, गमः निगमः, ग्रहः, निग्रहः, विग्रहः, लत्वे अक्षेषु ग्लहः । परिसरो गर्भग्रहः । छदः, प्रच्छदः, अपि ह्रस्वश्च । सञ्चरः, वहः, व्रजः, व्यजः, पणः, आपणः मदः । प्रमद-सम्मदौ हर्षे । अन्यत्र प्रमादः । वृ-वरः, दृञ् आदरः, वशः, रणः, भरः ।

४६. **प्रादेरदः**

प्रघसः, विघसः । अप्रादेस्तु घासः ।

५०. **नेर्व्वा ।**

निघसः, न्यादः ।

५१. **व्यध-जपोऽप्रादेः ।**

व्यधः, जपः । प्रादेस्तु आव्याधः, उपजापः ।

५२. **स्वनहसो वा ।**

स्वनः, स्वानः, हसो हासः । अप्रादेरित्येव, प्रहासः, उपहासः ।

५३. **यमो नि-वि-समुपाच्च ।**

यमो यामः, नियमो नियामः वियमो- वियामः, संयमः, संयामः, उपयमः उपयामः ।

५४. **नेर्गदनदपठस्वनः ।**

वेत्येव । निगदो निगादः, निनदो निनादः निस्वनो निस्वानः ।

५५. **क्वणोऽप्रादेश्च नेश्च ।**

क्वणः, क्वाणः, निक्वणो निक्वाणः ।

५६. **प्रादेश्च वीणायाः ।**

प्रक्वणः, प्रक्वाणः इत्यादि ।

५७. **नित्यं समुदोरजः पशोः ।**

पशुसम्बन्धित्याभिधेये—समजः पशूनां सङ्घः, उदजः पशुप्रेरणम् । अन्यत्र विप्रसमाजः ।

५८. **ह्वो हुश्च । ।**

हवो हुतिः ।

---

४८. भयम् । लोके शास्त्रकारः तदधीनत्वात् लिङ्गस्य ।

५८. सम्पूर्वोऽजिः समुदाये, उत्पूर्व्वश्च प्रेरणे वर्त्तते ।

५९. **विन्यभ्युपाच्च ।**
विह्वो निह्वः, अभिह्वः, उपह्वः ।

६०. **आहावो निपाने ।**

६१. **आहवो युद्धे ।**

६२. **हनो वधश्च ।**
स्यात् । वधः । बहुलाधिकारात् घातश्च ।

६३. **मूर्तौ घनः ।**
मूर्तौ हनोऽप् घनादेशच स्यात् (शत्रुघणः कथं सैन्धवघनमागमयेति ? घनशब्देन धर्म्मो लक्ष्यते) ।

६४. **अन्तर्घनो देशे ।**
अयमन्तर्द्देशे स्यात् ।

६५. **गृहैकदेशे प्रघ 'न' ण प्रघा 'न' णौ ।**

६६. **उद्घनोऽत्याधाने ।**

६७. **अपघनोऽङ्गे ।**

६८. **स्तम्बायो विद्रुभ्यः करणे ।**
एभ्योहनोऽप्, घनादेशच । स्तम्बघनः, के स्तम्वघनो ऽपि, अयोघनः, विघनः, द्रुघणः, कुठारः । संज्ञायां णत्वम् ।* उपघ्न आश्रये ।

६९. **परेर्घः ।**
परेर्हनोऽप् घादेशच । परिघः ।

७०. **सङ्घो गणे ।**

७१. **उद्घः प्रशंसायाम् ।**

७२. **निघो निमिते ।**
निघा वृक्षाः, परितः समा इत्यर्थः ।

७३. **गोचराह्वयौ ।**
नाम्नि एतौ निपात्येते । शुक-बकाद्या औणादिकाः ।

७४. **यज-याच-स्वप-यत-रक्षो नः ।**
एभ्यो यथायोग्यं भावेऽकर्त्तरि कारके च नः स्यात् । यजन्त्यस्मिन्निति यज्ञः, याञ्चा स्त्रियाम्, स्वप्नः, यत्नः, रक्षणः ।

७५. **विश्नप्रश्नौ ।**

विच्छ-प्रच्छौ निपात्येते ।

७६. **घोरूपसर्गात् किः**

उपसर्गाद्दाधाभ्यां किः स्यात् । आदिः, निधिः, विधिः, प्रधिः, प्रणिधिः, अन्तर्धिः, बाहुल्यात् कर्त्तर्य्यपि विधिः ।

७७. **कर्म्मणोऽधिकरणे**

कर्म्मोपपदाद् धोः किः स्यात्, जलं धीयतेऽस्मिन्निति जलधिः, वातधिः, इषुधिः, ओषधिः स्त्रियाम् ।

७८. **ट्वितोऽथुच् ।**

टुकारेत्संज्ञकादथुच् स्यात् । वेपथुः, वमथुः, क्षवथुः (क्षवयथुः) ।

७९. **ड्वित स्त्रिमक् तद्भावनिर्वृते ।**

तद्भाव निर्वतेऽर्थे डुकारेत्संज्ञकात् त्रिमक् स्यात् । पाकेन निर्वृत्तं पक्त्रिमम्, कृत्रिमम् क्रीत्रिमम्, लब्धिमः ।

८०. **दुःस्वीषद्भ्यः कृच्छाकृच्छार्थेभ्यः खल् ।**

दुरादिभ्यो (दुरादिपूर्व्वेभ्यः) धातुभ्यः खल् स्यात् । कृच्छ्रेण क्रियते दुष्करः, अकृच्छ्रेण क्रियते-सुकरः, कटौ भवता, सुलभा विद्या भवता, ईषत्करः । ईषल्लभ्यमिति लभ्यसिद्धौ पश्चात् समासेन ।

८१. **कर्त्तृकर्म्मभ्याञ्च भूकृञ्भ्याम् ।**

दुरादिपूर्व्वात् कर्त्तुर्भुवः कर्म्मणः कृञः खल् स्यात् । कृच्छ्रेणाढ्येन भूयते दुराढ्यम्भवम् । ईषदाढ्यम्भवम् । कृच्छ्रेणायमाढ्यः क्रियते दुराराढ्यङ्करस्त्वया पुत्रः । स्वाढ्यङ्करः सुपुत्रः । ईषदाढ्यङ्करा कन्या ।

८२. **आद्-दृशि-घृषि-मृषि-युधिशासुभ्योऽनः ।**

आकरान्ताद् दृश्यादेश्च दुरादिभ्योऽनः स्यात्, दुष्पानम्, ईषत्पानम्, दुर्द्दानो गाः । दुर्दर्शनः । दुर्घषणः, दुर्मषणः, दुर्य्योधनः, दुःशासनः ।

---

७९. तद्भावोधात्वर्थस्तेन निर्वृत्ते निष्फले इत्यर्थः । पाकेनेति करणे हेतौ वा तृतीया निर्वृत्तमिति भावक्तान्तपक्षेऽन्तर्भूतणिजर्थत्वात् कर्म्मक्रान्तपक्षे तु कर्त्तर्य्येव । केचित्तु भावमात्रड्वनुबन्धात् त्रिमक् प्रत्ययं विधाय तदन्तान्निवृत्तेऽर्थे नित्यमिमं सिद्धं मन्यन्ते ।

८२. दुष्पानमिति षात्पदान्तादिति णत्वनिषेधः ।

८३. इ कि श्तिपो धातुकथने ।

एते त्रयः प्रत्यया धातुनिर्देशे स्युः । इ-इन्धिः, यजिः, कि-युधिः, रुधिः । वृधिः । श्तिप्—भवतिः, करोतिः । दृष्टयार्त्तिसर्त्त्योयो निपातनात् । आकाराद्यास्तद्धिताः, कार-शब्देन समासेन च । एवंकार, वषट्कार, इत्याद्याः । * इक् कृष्यादिभ्यः । कृषिः, किरिः गिरिः * इण् अजादिभ्यः । आजिः, आतिः, आटिः, * पदादेस्तिः । पत्तिः, यष्टिः, शक्तिरायुधम्, ज्ञातिः, औणादिकाश्चैते ।

८४ टनः कर्त्तरि च ।

धातोर्भावकारकयोष्टनः स्यात् । गमनम्, दानम्, पयः पान्, गुड़भोजनम् । कर्त्तरि—उपशमयतीति उपशमनः, द्विषदुपशमनी विद्या, गुणमुक्तवान् गुणवचनः । कर्म्मणि—राजभोजनाः शालयः, अवसेचनो वृक्षः । करणे प्रमाणम्, उपमानम्, छेदनः परशुः सम्प्रदाने—दीयतेऽस्मै दानो विप्रः । अपादाने—प्रपतनो भृगुः । आधारे गोदोहनी, मत्स्यधानी, राजधानी, ओदनपचनः कटाहः, व्रीहिहरणः कुशूलः ।

८५. पुंसि घणप् कि नाथुचः ।

एते पुंसि स्युः, तथैवोदाहृताः । कथं सारमिदम्, सारेयम् ? अप्-धनम्, वनम्, कि—ओषधिरियम् । न याञ्चा ? बाहुल्यात्, आहुश्च "लिङ्गमशिष्यं लोकाश्रयत्वा-ल्लिङ्गस्येति ।

---

८३. ननु वर्णस्वरूपनिर्देशे वर्णात्कार इति सूत्रितम्, अत्र प्रकरणे तत् कथं मुनिना प्रात्याख्यातमित्याहाकाराद्यास्तद्धिता इति । तद्धिते सूत्रितं, कृति तु न कृतम् । कारशब्देन समासेनेति चान्द्राः । तन्मते ओंकारं व्याहरतीत्यादौ स्वरूपबोधादु-पपदात् कारशब्दस्य क्रियार्थत्वात् । आजिरित्यत्र वी आदेशः कथं स्यात् ? सत्यमार्द्धधातुकीयं कार्य्यमनित्यमिति ।

८४. ननु कर्म्मणि च येन संस्पर्शात् कर्त्तुः शरीरसुखमिति सूत्रं केनचित् कृतम् । अस्यार्थः—येन कर्म्मणा स्पृश्यमानस्य कर्त्तुः शरीरसुखमुत्पद्यते तस्मिन्नुपपदे (भावे) कर्म्मणि टनो विधीयते । पयः पानं सुखम्, इक्षुभक्षणं सुखम् । नित्य-समासविषयार्थमिदम् । अतः शूलिकयोः समुत्थानं सुखमिति व्यावृत्तौ वाक्यमेव तदिह न वक्तव्यमित्याह पयःपानं गुड़भोजनमिति चन्द्रगोमिना वाक्यस्यैव प्रयुक्तत्वात्, नापि नित्यसमासविधायकं सूत्रमस्ति । सर्पिषः पानं सुखमित्यापि वाक्यं स्यात् ।

८६. **भावे टन-क्तौ क्लीबे ।**

स्याताम् । हसनम्, हसितम् तव ।

८७. **इनण्णभिविधौ वृद्धिरादेश्चोपसर्गस्य ।**

अभिव्याप्तौ धातोर्भावे क्लीबे च इनण् स्यात् । उपसर्गस्यादेर्वृद्धिश्च । सांरावणम्, सांकोटिनम् ।

८८. **स्त्रियामिकण्क्तिनौ ।**

स्त्रीलिङ्गे भावे चाकर्त्तरि कारके इकण्-क्तिनौ स्याताम् । भवतः शायिका, आसिका । संज्ञायाम्—प्रवाहिका, विर्चचिका, प्रच्छर्दिका, प्रस्कन्दिका, दमनकपुष्पभञ्जिका नाम क्रीड़ा । पर्य्याये-अद्य तव शायिका । अर्हे—अर्हसि त्वमिक्षुभक्षिकाम् । धारेः—धारयसि मे पयः पायिकाम् । उत्पत्तौ—उत्पन्ना मे पयः शायिका । क्तिन्—कृतिः, स्थितिः, दृष्टिः, गीतिः, कीर्णिः ।

८९. **प्रश्नाख्यानयोरिण् च ।**

अनयोर्धातोरिण् स्यात् । इकणादयश्च । प्रश्ने—त्वं कां कारिमकार्षीः, कां कारिकाम्, कां कृत्याम्, कां क्रियां वा । आख्याने—सर्व्वां कारिमकार्षम्, सर्व्वां कारिकाम्, सर्व्वां कृतिमित्यादि ।

९०. **ऊति-यूति-जूति-साति-हेति-कीर्त्तयश्च ।**

निपात्यन्ते । अवतेर्व्वेञो वा—ऊतिः, स्यतेः सिञो वा सातिः । हि-गतौ, हेतिः ।

९१. **ग्लाम्ला-ज्या-हाभ्यो निः ।**

एभ्यः स्त्रियां निःस्यात् । ग्लानिः, म्लानिः, ज्यानिः, हानिः ।

---

८६. उक्तलिङ्गेतरौ भावे कृत्तद्धितौ नपुंसके इत्यभिधानात् हसनं हसितमिति सिद्ध्यति किमनेन सूत्रेण ? मैवम्, उद्वर्तोहि ग्रन्थः समधिकफलमाचष्टे इति न्यायादाखूनामुत्थानमाखूत्थो वर्तत इत्यत्र भावप्रत्ययेऽपि पुंस्त्वम् ।

८७. अभिविधिरभिव्याप्तिः साकल्येन क्रियासम्बन्ध इति यावत् ।

८८. ननु रोगाख्यां ण्वल् चेति बहुलं संज्ञायाञ्चेति सूत्रद्वयं क्तिनोऽपवादार्थं प्राचीनैर्विहितं तत्कथं प्रत्याख्यातमित्याह संज्ञायामिति । प्रवाहिकादयो रोगभेदाः । बाहुल्यात् शिरसोऽर्त्तिः शिरोऽर्त्तिः । तथा पर्य्यार्हणोत्पत्तिष्विति न वक्तव्यमित्याह पर्य्याय इति । पर्य्यायः परिपाटी क्रमः । अर्हा योग्यता । ऋणं धारः । उत्पत्तिः प्रादुर्भाव इत्यवधेयम् । पुंस्यन्यत्रापि दृश्यते । अरोचकः अनाशकः उत्कन्दकः इत्यादयो रोगाः ।

९२. क्तिजाशिषि नाम्नि ।

आशिषि धातोः क्तिच् स्यात् । तनुनात्-तन्तिः, वन्तिः, भूतिः ।

९३. व्याङि व्यतिहारे णट् ।

क्रियाव्यतिहारे व्याङि संघातोपपदेऽन्यतश्च धातोः स्त्रियां णट् स्यात् । व्यावक्रोशी, व्यावहारी, व्यात्युक्षी ।

९४. व्रजादेर्भावे क्यप् ।

व्रजादेर्भावे स्त्रियां क्यप् स्यात् । व्रज्या, इज्या, परिचर्य्या । जागर्य्या । गुणविधानान्न तुक् । कृत्या ।

९५. संज्ञायां समजादेः ।

समज्या, समस्या, निषद्या, निपद्या, मन्या, विद्या, सुञः—सुत्या, शय्या, भृत्या, इण्—इत्या ।

९६. क्रिया-अटाट्या-मृगया-परिसर्य्येच्छाः ।

पञ्चैते स्त्रियां भावे निपात्यन्ते ।

९७. सनादि षिद्भिदादिभ्यो डाप् ।

एभ्यो भावे कर्त्तरि कारके च स्त्रियां डाप् स्यात् । सनान्द्यन्तात्, जिगीषा, पुत्रीया, पुत्रकाम्या, लोलूया, चंक्रमा, कण्डूया । षितः—पचा, त्रपा, क्षिष-क्षिया । घटादेःषितः, घटा व्यथा, प्रथा, प्रथा । बाहुल्यान्नेह उपलब्धिः । भिदादेर्यथादर्शनम् । भिदा, विदा, छिदा, पृच्छा, क्षिपा, रुजा, गुहा, मृजा. णिजन्तात्-चिन्ता, पूजा, कथा, कुम्बा, चर्चा । गुर्वादिहलोऽदीपादेः । शिक्षा, भिक्षा, चूड़ा, पीड़ा, मेधा, ईहा, ऊहा-बाधा, राधा । बाहुल्यात् ऊहः, बाधः, । अदीपादेरिति किम् । दीप्तिः, आप्तिः । सोपसर्गादादन्तात् । प्रमा, प्रतिमा, प्रभा, आख्या, आह्वा । प्रापिवेन्त्यस्यां प्रपा । आस्था व्यवस्था, उपधा, विधा, अन्तर्धा । श्रतश्च श्रद्धा निपातनात् ।

---

९२. चकारः सनः क्तिचीत्यस्य विशेषणार्थः । वसून्यस्य भूयासुरिति वसुभूतिः, अग्निरस्य भूयादग्निभूतिः । कृदन्योऽपि दृश्यते । देवाय एनं देयादिति देवदत्तः, यज्ञे एनं देयात् यज्ञदत्तः । वीरो भूयादिति वीरभूः, वीरभूतिरपि । एषां संज्ञाशब्दत्वाद्यादृच्छिकी व्युत्पत्तिः । आशीर्ग्रहणन्तु नार्थवदिति लक्ष्यते ।

९३. अत्रान्यस्याप्रस्तुतत्वात्तद्व्यतीहारो नास्तीत्याह क्रियेति । व्यतिहारो विनिमयः :

९५. अञ्जेःऽनेक्यपि वीभा वो नेति वाच्यम्, इति सिद्धांतकौमुदी ।

९७. श्रतश्चेति भिदादिगणपाठात्, अथवा प्रज्ञा, श्रद्धा-चर्चावृत्तिभ्यो ण इति ज्ञापकात् ।

९८. जराधारादयश्च ।

गुणवृद्धिभ्यां ङाबन्ता निपात्यन्ते । जरा, धारा, शोभा, गोधा, योधा, जागरा, अप्प्रत्यये जागरश्च । लेखा, रत्वे, रेखा, धारा, भारा, हारा, आरा, ज्वाला । कृपेश्च कृपा निपातनात् ।

९९. ण्यासश्रन्थादेरनः ।

ण्यन्तादेः स्त्रियामनः स्यात् । कामना, कारणा, भावना, वासना, उपासना, श्रन्थना । आदिशब्दात् ग्रन्थना, घट्टना, वन्दना, वेदना, गवेषणा । इषरेनिच्छार्थात् । अन्वेषणा, पर्य्येषणा । बाहुल्यात् क्वचित् सामान्यविशेषयोश्च समावेशः, परीष्टिः, पाचयतेः पाक्तिः ।

१०० आक्रोशे नञ्यनिः ।

आक्रोशे नञ्युपपदे धातोरनिः स्यात् । 'मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति । तस्याजननि (नी) रेवास्तु जननीक्लेशकारिणः, इति माघः—अकरणि (नि)स्तु भूयाच्छठः ।

१०१ तुम् तादर्थ्ये भावस्य ।

धात्वर्थस्य त्वादर्थ्ये गम्ये तातोस्तुम् स्यात् । क्त्वामान्तकृतश्चातुम् । पक्तुंव्यम्

---

१०१. तस्मै तुम् कर्त्तव्यत्वरूपेणाभिमताय धातवेऽयं तदर्थः, तदर्थ इति सूत्रस्थभावशब्द-विशेषणम्, तस्य भाव इति यण्, तादर्थ्यम् तस्माद् धातोस्तुम् स्यात् । सूत्रस्य तच्छब्देन स धातुराकृष्यते । तुमुण्वुलौ क्रियायां क्रियार्थायाम् । क्रियार्थायां क्रियामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । कृष्णं दृष्टुं यातीत्यादि । समान-कर्त्तृकेषु तुमुन् । अक्रियार्थोपपदार्थमेतत् । इच्छार्थेष्वकर्त्तृकेषु धातोस्तुमुन् स्यात् वष्टि इच्छति वाञ्छति वा भोक्तुमित्यादि । शक-धृष-ज्ञा-ग्ला-घट-रभ-लभ-क्रम-सहार्हास्त्यर्थेषु तुमुन् । एषूपपदेषु धातोस्तुमुन् स्यात् । शक्नोति भोक्तुम् धृष्णोति भोक्तुम् । अर्थग्रहणमस्तिनैव सम्बध्यतेऽनन्तत्वात् । अस्ति भवति विद्यते वा भोक्तुम् । पर्याप्तिवचनेष्वलमर्थेषु । पर्याप्तिः पूर्णता, तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन् स्यात् । पर्याप्तः प्रवीणः कुशलः पटुर्वा भोक्तुम् । पर्याप्तिवचनं किम् ? अलं भुक्त्वा । अलमर्थेषु किम् ? पर्याप्तम्भुङ्क्ते । प्रभूततेह गम्यते, न तु भोक्तुः सामर्थ्यम् । कालसमयवेलासु तुमुन् । पर्यायोपादानामर्थो-पलक्षणार्थम् । कालार्थेष्वुपपदेषु तुमुन् । पयार्योपादानामर्थोपलक्षणार्थम् । कालार्थेषूपपदेषु तुमुन् स्यात् । कालः समयः वेला अनेहा वा भोक्तुम् । प्रैषादिग्रहणमिहानुवर्त्तते, तेनेह न ।" भूतानि कालःपचतीति वार्ता" ।

भोक्तुं व्रजति, पाकाय भोजनाय इत्यर्थः। एवं शक्नोति भोक्तम्। अलं भोक्तुम्, मल्लो भोक्तुम्। कालो भोक्तुम्, समयो भोक्तुम्। गन्तुमनाः, गन्तुकामः श्रोतुं श्रवणम्, दृष्टुं चक्षुः, योद्धुं धनुः, वक्तुं जडः, गन्तुमलसः, पातुं पयः। तुमर्थे णकः प्रागुक्तः। ओदनं भोजको व्रजति।

१०२ **क्त्वाऽल्ङ्खल्वोः प्रतिषेधयोः।**

प्रतिषेधार्थयोरलं-खल्वोर्योगे क्त्वा स्यात्। अलंकृत्वा, खलुकृत्वा, खलूक्त्वा खलु वाचिकम्, न वक्तव्यमित्यर्थः। बाहुल्यात् अलं बाले, रोदनेन, अलं भोजनेन (प्रतिषेधयोः किम्? अलङ्कारः। अलंङ्खल्वोः किम्? मा कार्षीः)।

१०३. **मयतेर्व्यतिहारे वा मिश्च यपि।**

मेङः कर्म्मव्यतिहारे क्त्वा स्यात्। यपि तस्य मिश्च वा स्यात्। अपमित्य याचते, अपमातुं याचते वा, विनिमयं कर्त्तुमित्यर्थः। पक्षे अपमाय।

१०४. **एककर्त्तृकयोः पूर्व्वकाले।**

एककर्त्तृकयोर्धा (त्वर्थथोर्यः) त्वोः पूर्व्वकाले वर्त्तते तस्मात् क्त्वा स्यात्। भुक्त्वा व्रजति, कटं कृत्वा शेते। द्वित्वमतन्त्रम्। तेन स्नात्वा भुक्त्वा पीत्वा व्रजति। परापेक्षया वा। एककर्त्तृकयोरिति किम्? भुङ्क्ते जल्पति च। * परावरयोगे च (परेण पूर्व्वस्यावरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्) बाल्यमतिक्रम्य यौवनम्, बाल्यात् परिमित्यर्थः। (अतिक्रम्य पर्व्वतं स्थिता नदी, अवरपर्व्वतयोगोऽत्र नद्याः) अप्राप्य नदीं पर्व्वतः, नद्या अवर इत्यर्थः (परनदीयोगोत्र पर्व्वतस्य) अत्रापि पूर्व्वकालता एककर्त्तृकता च वर्त्तते, भवत्यस्तीति पदाध्याहारात्। यथा—झणत्कृत्य पतति, मुखं सम्मील्य हसतीत्यत्र वाक्यादेव पूर्व्वकालता। (एककर्त्तृकता) च गम्यते। यदि समकालं विवक्ष्यते, तदैवं स्यात्। झणत्कुर्वन्, झण-झणाय-मानो वा पततीति। इह स्नात्वा सुखं भवति, पापं कृत्वा अनुतापः स्यादित्यादौ, स्थितस्येति पदमध्याहार्य्यम्।

---

१०४. परस्यावरेण योगेऽवरस्य परेण योगे सति क्त्वा भवतीत्यर्थः। बाल्यमतिक्रम्य यौवनमिति परबाल्ययोगेनावरदेशरस्थ यौवनं विशिष्यत इति। इहकालकृत-पूर्व्वत्वे क्त्वा विहितो देशकृते न प्राप्नोतीति बचनम्। अन्ये तु वक्तृवुंद्ध्या-रुढ़यो यौवनपर्व्वतयोर्गोचरयोः (क्रिययोः) कालकृतमपि पौर्व्वापर्य्यमस्तीति मन्यन्ते इत्याहात्रापीति। क्वाचिद् प्राक्कालेऽपीत्येके। उदरं पूरयित्वा भुङ्क्ते, खटदीति कृत्वा पतति, किम् स मुखं व्यादाय स्वपिति चक्षुरुन्मील्य हसति। तन्मतं समाधित्सुराह (वाक्यादेव) दिवक्षाधीनत्वात् प्रयोगस्य। अथ कथं भिन्नकर्त्तृके क्त्वा स्यादिति समाधित्सुराह। इह तु कातन्त्रे

१०५. **आभीक्ष्यण्ये णम् वा।**

पूर्व्वार्थे पौनःपुन्ये च धातोर्णम् वा स्यात् क्त्वा च। भोजं भोजं व्रजति। भुक्त्वा भुक्त्वा व्रजति।

१०६. **अग्रे-प्रथम-पूर्वेषु।**

एषु प्रयुज्यमानेषु णम् क्त्वा च भवति (भवतः)। अग्रे भोजं, अग्रे भुक्त्वा व्रजति। प्रथमं भोजं प्रथमं भुक्त्वा, पूर्व्वं भोजं पूर्व्वं भुक्त्वा वा।

१०७. **कर्म्मण्याक्रोशे कृञः खमुण्।**

कर्म्मण्युपपदे कृञः खमुण् स्यात् आक्रोशश्चेत्। तं चौरङ्कारमाक्षिपति। चौरशब्दमुच्चार्येत्यर्थः।

१०८. **स्वादुवचने च।**

स्वाद्वर्थे च कृञः खमुण् स्यात्। स्वादुङ्कारं भुङ्क्ते, मिष्टङ्कारं भुङ्क्ते, लवणङ्कारं भुङ्क्ते। न च्वौ—स्वादुकृत्य।

१०९. **अन्यथैवमित्थङ्कथमो णम् सिद्धाप्रयोगे।**

एभ्यः कृञो णम् स्यात्। सिद्धार्थाप्रयोगश्चेत्। अन्यथा वक्तीति अन्यथाकारं वक्ति, एवङ्कारम्। इत्थङ्कारं, कथङ्कारम्।

सुखस्योत्पादकः पुरुष इति भावनयैककर्त्तृकतेत्याह। अन्ये तु एककर्त्तृकयोः पूर्व्वादिति सिद्धे यत्काल इत्युक्तं तद्बोधयति पूर्व्वकालमात्रेऽपि क्त्वा स्यादिति, तथाहि 'प्राप्य दारगवानां यन्मुनीनामभयं सदा' इति भट्टिः "मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा" इति कालिदासः। अपि च स्थितस्येति (अत्र स्पष्टार्थ) अपुष्टार्थत्वमवधिकपदत्वं वितनोति प्रत्युतदोषमावहतीत्याहुः।

१०६. यत्तु "न यद्यनाकाङ्क्षे" इति सूत्रितम्, अनाकांक्षे वाक्ये यद्युपपदे क्त्वाणमौ स्याताम्। यदयं भुङ्क्ते ततो व्रजति, यदयमधीते तच्छेते। अनाकांक्ष इति किम्? यदयं भुक्त्वा व्रजति ततः परमधीत इति व्याख्यातञ्च तदनेन ग्रन्थकृता नोट्टङ्कितं चन्द्रगोमिना प्रत्याख्यातत्वात्। तथाहि यच्छब्दयोगे ततः शब्देन क्रमस्याभिधानात् क्त्वा न भवति। आभीक्ष्ण्याभावाच्च णमपि न स्यात्। प्रत्युदाहरणे तु भोजनव्रजनयोः क्रमेण क्त्वा, व्रजनाध्ययनयोस्तु ततः शब्देन क्रमाभिधान्न भवतीति।

१०९. शिरोऽन्यथा कृत्वौदनादिकं भुङ्क्ते इत्यर्थलाभाय करोतेः प्रयोगे आवश्यकस्तदभावे तु भुजिक्रियागत एव प्रकारो गम्येत न तु शिरोऽन्यथाकरणमतः कृञः प्रयोगस्यावश्यकतास्तीति णमन्तः कृञात्र प्रयुज्यत इति भावः।

११०. **यथा-तथाभ्यामसूयोत्तरे ।**
कृञो णम् स्यात् । यथाकारं तथाकारं भुङ्क्तां किन्त्वानेन ।

१११. **कर्म्मणो दृशिः विदः साकल्ये ।**

कर्म्मण आभ्यां णम् स्यात् । ब्राह्मणदर्शं प्रणमति, सर्व्वान् ब्राह्मणानित्यर्थः । भिक्षुवेदं भोजयति । अतः कर्म्मणो विधिः ।

११२. **यावतो विन्द-जीवेः ।**
णम् स्यात् । यावद्वेदं भुङ्क्ते, यावज्जीवमधीते ।

११३. **चर्म्मोदरभ्यां पूरेः ।**
णम् स्यात् । चर्म्मपूरं तिलान्ददाति, उदरपूरं भुङ्क्ते ।

११४. **वृष्टिप्रमाणे ऊलोपो वा ।**
वृष्टि प्रमाणे पूरेर्णम् स्यात्, ऊलोपो वा । गोष्पदप्रं वृष्टो देवः, गोष्पदपूरं वा ।

११५. **चेलार्थात् क्नोपेः ।**

वृष्टिप्रमाणे णम् स्यात् । चेलक्नोपं वृष्टो देवः, वस्त्रक्नोपं वृष्टो देवः । वसनक्नोपम् ।

११६. **प्रागुपदंशो यथाविध्यनुप्रयोगः ।**

इतो यस्माद्धातोर्णम् विहितस्तस्यैवानुप्रयोगः कार्य्यः । मण्डूकप्लुत्या सिद्धार्थाप्रयोगश्चेति प्रागुपदंशः ।

---

११४. इह खलु गोःपदं प्रातीतिके सति क्रियाविशेषणत्वात् गोष्पदप्रवृष्टो देव इति सिद्धे पूरेञ्चकारलोपं णमरू प्रत्याचक्षणेन भाष्यकृताव्ययत्वं भाषायामुत्पत्तिप्रयोजनमपि नोक्तम्, यदि चैतदेव प्रयोजनं तदा तमेव (तदर्थमेव) प्रतिपादनमित्याह रत्नमिति, विभक्तिरूपाच्च निपातिता इति । ततश्चन्द्रगोमिना अन्यथाकारं भुङ्क्ते इत्यादिष्वपि भाषायां णम् विधानं नादृतम् । न चैवमादिषु णमन्तेष्वपि पूर्व्वकालता प्रतीयते । अन्यथादीनामर्थे अन्यथाकारं प्रभृतीनां प्रायः प्रयोगः ।

११५. यथा वर्षणेन चेलानि क्नोप्यन्ते शब्दायन्ते तथा वृष्टः ।

११६. यथा मण्डूकः प्लवेन गच्छन् मध्यं न स्पृशति तथायमयधिकार इत्यर्थः ।

११७. **निमूलसमूलात् कषः ।**

णम् स्यात् । निमूलकाषं कषति, समूलकाषं कषतीत्यर्थः ।

११८. **अकृतात् कृञः ।**

णम् स्यात् । अकृतकारं कुरुते ।

११९. **जीवाद् ग्रहः ।**

णम् स्यात् । जीवग्राहं ग्रह्णाति ।

१२०. **शुष्क-चूर्ण-रूक्षात् पिषः ।**

एभ्यो पिषोः णम् स्यात् । शुष्कपेषं, चूर्णपेषं, रूक्षपेषं पिनष्टि ।

१२१. **हनः समूलात् ।**

णम् स्यात् । समूलघातं न्यवधीत् ।

१२२. **करणाच्च ।**

कर्म्मण इति निर्वृत्तम् । हनः करणोपपदाण्णम् स्यात् । पाणिना हन्तीति पाणिघातं हन्ति, शरघातमरीन् हन्ति ।

१२३. **स्नेहोदकात् पिषः ।**

स्नेहोदकात् करणात् पिषो णम् स्यात् । घृतपेषं तैलपेषं (उदपेषं) उदकपेषं पिनष्टि ।

१२४. **हस्तार्थाद् वर्तिग्रहेः ।**

हस्तार्थाद् करणाभ्यां णम् स्यात् । हस्तवर्त्तं वर्त्तयति, हस्तग्राहं, पाणिग्राहं गृह्णाति।

१२५. **स्वार्थात् पुषः ।**

आत्मात्मीय-धन-ज्ञाति-करणात् पुषेर्णम स्यात् । स्वेन पुष्णाति पुष्यति पोषति वा स्वपोषम् एवं आतमपोषम्, आत्मीयपोषम्, धनपोषम्; रैपोषम्, गोपोषम्, पितृपोषम् ।

१२६. **बन्धोऽधिकरणात् ।**

बध्नातेर्णम् स्यात् । चक्रे बद्धः चक्रबन्धः बद्धः गुप्तिबन्धं बद्ध्नाति ।

१२७. **कर्त्तुरूर्द्ध्वाच्छुषि पूरेः ।**

आभ्यामूर्द्ध्वात् कर्त्तुर्णम स्यात् । ऊर्ध्वः शुष्यति-ऊर्ध्वशोषं शुष्यति ऊर्ध्वपूरं पूर्य्यते ।

१२८. **पुरुषाद्वहः । जीवान्नशः ।**

पुरुषात् कर्त्तुर्व्वहेर्जीवान्नशेश्च णम् स्यात् । पुरुषः सन् वहति --पुरुषवाहं वहति । जीव एव नष्टः—जीवनाशं नष्टः ।

१२९. **उपमानात् कर्म्मणश्च ।**

उपमानात् कर्त्तुः कर्म्मणश्च धातोर्णम् स्यात् । मृग इव नष्टः मृगनाशं नष्टः, घृतविलायं विलीनः । कर्म्मणः—रत्नमिव निहितः रत्ननिधायं निहितः, मयूरिकाबन्धं बद्धः ।

१३०. **उपदंशस्तृतीयायाः ।**

यथा विधानु निवृत्तम् । तृतीयान्तादुपदंशो णम् स्यात् । मूलकेनोपदश्य मूलकोपदंशं भुङ्क्ते, मूलकिनोपदंशं वा । अतो विकल्पेन समासः ।

१३१. **हिंसार्थादभिन्नकर्म्मकात् ।**

तृतीयान्तोपपदाद् हिंसार्थादेकर्म्मकाद्धातोर्णम् स्यात् । दण्डोपघातं गाः कालयति, दण्डेनोपधातं वा । दण्डताड़े गाः कालयति, दण्डेन ताड़ं वा । अभिन्नकर्म्मकादिति किम् ? दण्डेनाहत्य वृक्षं गाः कालयति, अत्रार्थान्तरप्रयोगाद् भिन्नकर्म्मता ।

१३२. **सप्तम्याश्चोपपीड़रुधकर्षः ।**

सप्तम्यन्तात् तृतीयान्ताच्च उपपीडादेर्णम् स्यात् । उपादेव पीडोऽन्यतोऽनिय(मः) मात् । पार्श्वोपपीड़ं शेते, पार्श्वे उपपीड़ं शेते, पार्श्वेनोपपीड़ं वा । कर्णरोधं हस्ते रोधं हस्तरोधं हस्तेनोपरोधं वा धनुर्दधाति । पाणिकर्षं बटुकमानयति, पाणौ कर्षं पाण्युपकर्षं पाणिना कर्षं वा ।

---

१३०. तृतीयान्तादिति तृतीयान्तोपपदादित्यर्थः । अत्र वाक्य प्राग्भावनियमा (भावा) दुपदंशमूलकेन भुङ्क्ते इत्यपि । यत उपपदानां धात्वर्थमात्रे सम्बन्धो गृह्यते, न तु क्रमः । एवमुत्तरत्रापि ज्ञेयम् । चानुवृत्तेर्मूलकेनोपदश्य भुङ्क्ते । एवमग्रेऽपि । तृतीयाया इति किम् ? मूलकमुपदश्य भुङ्क्ते । अत्र भुजिं प्रति मूलकस्य करणत्वेऽपि पक्षे कर्म्मत्वमुपदंशिना व्याप्तत्वात् । भुजेस्तु प्राधान्यमपेक्ष्य वाक्ये तृतीयैव युज्यते । ननु दंशिं प्रति मूलकादेः कर्म्मत्वमेव कारकद्वैधे तथैव प्रातिपादित्वात् न करणतेति, चेन्न अत्रः (क्त्वा) तृतीयाग्रहणादेव । इतरथा उपदंश इत्युक्ते कर्म्मण इत्यनुवर्त्तिष्यत एव । उत्तरार्थं तदिति चेत् ? नैवम्, प्रधानक्रियां प्रतिकरण(भावे)ता सति वाक्ये समासपक्षे तृतीयाश्रयणार्थमिहापि "कान्ताधरोपदंशस्तु पिवन्ति मधु मानवाः" इति व्योषः ।

१३३. **समासत्ति-प्रमाणयोः ।**

सन्नि ानगतौ प्रमाणे च सप्तम्यन्तात् तृतीयान्ताच्च धातोर्णम् स्यात् । केश-ग्राहं युध्यन्ते, केशेषु ग्राहं । केशैर्ग्राहं वा । लाङ्गूलोत्कर्षं द्वयङ्गुल-उत्कर्षं द्वयगुलेन उत्कर्षं वा दण्डिकां छिनत्ति ।

१३४. **अपादानात् त्वरायाम् ।**

अपादानाद्धातोर्णम् स्यात्, त्वरा चेत् । शय्योत्थायं व्राजति, शय्याया उत्थायं वा ।

२३५. **द्वितीयायाश्च ।**

द्वितीयान्तात् त्वरायां णम् स्यात् । लोष्टग्राहं युध्यन्ते लोष्टं ग्राहं वा ।* (लोष्टः ढेला) अपगुर ओराद्वा । अस्यपगारं युध्यन्ते, अस्यपगोरम्, असिमपगोरं वा । * अत्वरायाञ्च । एकवर्ज्जम् ।

१३६. **स्वाङ्गादध्रुवात् क्लिश्यमानाच्च ।**

द्वितीयान्तात् स्वाङ्गाद्धातोर्णम् स्यात् । भ्रूविक्षेपं वक्ति, भ्रूवं विक्षेपं वा । अध्रुवादिति किम् ? शिर उत्क्षिप्य कथयति । क्लिश्यमानाच्च । उरः प्रतिपेषं युध्यन्ते, ध्रुवार्थमिदम् । 'यत्राहते प्राणी म्रियते तद्ध्रुवम् ।

१३७. **विशि-पति-पदि स्कन्दो व्याप्यमानासेव्यमानाभ्याम् ।**

आभ्यां कर्म्मभ्यां विश्यादेर्णम् स्यात् । व्याप्यमानाद्वीप्स्यमानद्रव्यात् । समासे द्विरुक्तेरप्रयोगः । गेहानुप्रवेशमास्ते, गेहङ्गेहमनुप्रवेशं वा, लतानुपातं पुष्पं गृह्णाति, लतां लतामनुपातं वा, गेहानुप्रपादं, गेहङ्गेहमनुप्रपादं वा आस्ते । नद्यवस्कन्दमाचामति नदीं नदीमवस्कन्दं वा, आसेव्यमानाभीक्ष्ण्यक्रियायाः । गेहानुप्रवेशमास्ते, गेहमनुप्रवेश-मनुप्रवेशं वा, एवं नद्यवस्कन्दं, नदीमवस्कन्दमवस्कन्दं वा ।

---

१३५. अथ नवर्ज्जमिति ज्ञापकात् क्वचिद् द्वितीयान्तोपपदात् त्वरायामपि स्यादित्याह 'त्वरायाञ्चेति वार्त्तिकम् । पर्व्ववर्ज्जम् ।

१३६. किमर्थमिदं पूर्वेणैव सिद्धेरित्याह ध्रुवार्थमिदमिति । अत्र ध्रुवादपि क्लिश्य-मानाण्णम् स्यात् । शिरः प्रतिपेषं युध्यन्ते ऋक्षाः, शिरांसि प्रतिपेषं वा । स्वाङ्गमिति परिभाषितम् ।

१३७. कर्म्मभ्यामिति द्वितीयाश्चेत्यनुवृत्तौ द्वितीयान्तं कर्म्म भवतीत्यभिप्रेत्योक्तम् । व्याप्यमानपदं व्याचष्टे । वीप्स्यमानद्रव्यादिति । श्रुतत्वाद्विश्यादिक्रियाभिः साकल्येन द्रव्याणामेव सम्बन्धोऽव्याप्तिः, तत्सम्बन्धं पदं व्याप्यमानमित्यर्थः । अतोऽद्रव्यस्य द्विर्वचनम् । समासे तन्न स्यादित्याह समास इति । समास एव वीप्साभीक्ष्यर्थमनिधत्ते शब्दशक्तिस्वभावतः । "गृह प्रवेशमात्मीयं समानयति

१३८. **कालादसुतृषोऽन्तरे ।**

अन्तरे वर्त्तमानात् कालात् कर्म्मणोऽस्यतितृषिभ्यां णम् स्यात्। द्वयहात्यासं गाः पाययति द्वयहमभ्यसं वा। द्व्यहतर्षं द्वयहन्तर्षं वा। अन्तर इति किम्? द्वयहमत्यस्य शरान् गतः।

१३९, **नाम्न आदिशि ग्रहेः।**

नाम्नः कर्म्मणः आभ्यां णम् स्यात् । नामादेशमाचष्टे, नामग्राहं पृच्छति ।

१४०. **अयथायुक्ताऽऽख्यानेऽव्ययात् कृञः क्त्वा वा।**

अव्ययात् कृञः क्त्वा वा स्यात्। पक्षे णम् भवति। अयथायुक्ताख्यानञ्चेत्। ब्राह्मण! पुत्रस्ते जात इति नीचैःकारमाचष्टे नीचैःकृत्य वा, उच्चैरिहाख्यानं युक्तम्। आवेदयन्तः क्षितिपालमुच्चैःकारं मृतं रामवियोगशोकदिति भट्टिः। नीचैरिहाख्यानं युक्तम् ।

१४१. **तिर्य्यचो (को)ऽपवर्गे ।**

तिर्य्यक् शब्दात् कृञः क्त्वा-णमौ स्याताम्। समापनञ्चेत्। तिर्य्यक कृत्य कृत्वा तिर्य्यक्कारं वा गतः, समाप्येत्यर्थः।

योजनम्" इति व्योषः। अथासेव्यमानपदार्थं व्याख्यातुकाम आचष्टे आसेव्यमानादिति। अयमर्थः क्रियायां आभीक्ष्ण्यणमासेव्यमानम्, अतएव क्रियाया द्विर्वचनम्।

१४१. ननु तिर्य्यंच (क्) इति कथं निर्दिश्यते तिरश्च इत्येव स्यात्। सत्यम्, अनुकरणमिदम्। तिर्य्यकशब्दस्य शब्दाभिधेयस्य। तेन शब्दविशेषत्वमपि भवति। अथ प्रकृतिवदनुकरणं भवतीति प्रकृतिकार्यं स्यादेव। मैवं वादीः, अनुक्रियमाणरूपः प्रत्ययात् यद्यत्र प्रकृतिकार्यं स्यात् तदा यादृशमनुक्रियमाणरूपः तादृशं न प्रतीयते। अथ प्रकृतिवदनुकरणं (न) भवतीति निर्विषयमभूत्, यद्येवमर्थकस्यानु (पदार्थ शक्त्या) करणमस्य विषय इति, तथाह सर्व्वत्रानुकरणभूतः शब्दः शब्दस्वरूपानुकरणम्। किन्त्वयं विशेषः कश्चित्शब्दपदार्थकस्यानुकरणं कश्चिदर्थ (पदार्थः) कस्यानुकरणम्। अतएव तिर्य्यक्शब्दादित्युक्तम् वृत्तौ। श्लाघनीयामहं मन्ये तिर्य्यंक्कारं गतार्थवानिति व्योषः। अपवर्ग इति किम्? तिर्य्यक् कृत्वा काष्ठं गतः।

१४२. तस्यन्त-स्वाङ्ग-ना-धार्थप्रत्ययेभ्यो भुवश्च ।

एभ्यः कृञो भुवश्च क्त्वाणमौ स्याताम् । तस्यन्तस्वाङ्गात् । मुखतः कृत्य मुखतः कृत्वा, मुखतःकारम् । पृष्ठतो भूय, पृष्ठतो भूत्वा, पृष्ठतो भावम् । ना-धार्थ-प्रत्ययान्तेभ्यश्चच्व्यर्थेऽभिधानम् । नानाकृत्य, नाना कृत्वा, नानाकारम् । नानाभूय नानाभूत्वा, नानाभावम् । एवं विना च । विनाकारमित्यादि । द्विधाकृत्य द्विधाकृत्वा द्विधाकारम्, द्विधाभूय, द्विधाभूत्वा, द्विधाभावम् । एवं द्वैधं त्रैधं द्वेधा त्रेधाश्च ।

१४३. तूष्णीमः अन्वक् (च)आनुकूल्ये ।

चानुकृष्टं न सर्व्वत्रेति कृञो निवृत्तिः । आभ्यां भुवः क्त्वाणमौ स्याताम् । तूष्णींभूय तूष्णींभूत्वा, तूष्णींभावम् । अन्वग्भूय, अन्वग्भूत्वा, अन्वग्भावं रघुवृषभयोः ।

१४४. अव्ययकृतो भावे ।

अव्ययकृतो भावे भवन्ति । तत् कथं ओदनं पक्तुं व्रजति, कटं कृत्वा व्रजति । तत्राहुः "भावेऽपि हि सकर्म्मकाद्धातोः कर्म्मसम्बन्धो भवत्येव" यथा ओदनस्य पाकः कर्म्मणि षष्ठी । उक्ताः कृतः प्रत्ययाः ।

१४५. क्त्वो यप् समासेऽनञ्पूर्व्वे ।

समासे नञोऽन्यस्मिन् पूर्व्वे क्त्वा यप् स्यात् । प्रकृत्य विनीय, सन्धाय, शुक्लीकृत्य, नानाकृत्य उच्चैकृत्य । कथं परंकृत्वा ? यदृच्छादयश्चेति निपातनात् । अनञ्पूर्व्वे इति किम् ? अकृत्वा । समास इति किम् ? उच्चैः कृत्वा । क्वचित् केवल-स्यापि दृश्यते, स्वधनं त्यज्य गच्छति, सन्ध्यावधूं गृह्य करेण गाढमिति ।

---

१४२. ननु नाधार्थप्रत्ययेभ्यःच्व्यर्थ इति मुनिनोक्तं । कथं च्व्यर्थ इह लभ्यत इत्याह नाधार्थप्रत्ययेभ्य इति । नाधार्थस्तु—ना विना नाना धा त्रिधा ध्यमुन् ध्यम् ।

१४५. समास इति क्रियाचिन्हसप्तमी, विषयसप्तमी वा । अनञ् पूर्व्वे इत्यनेनोप-पदानां पूर्वत्वमाक्षिप्यते, तेन पीत्वा सुहितक इत्यादौ न स्यात्, यदृच्छानिपा-ताद्वा । अथानञीति सिद्धे यत् पूर्व्वग्रहणम् तच्छिष्टप्रयोगे केवलस्यापि क्त्वो यब्विधानार्थमिति मनसि कृत्वाह क्वचित् केवलयापि दृश्यते इति । यथा— "दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति । अदाता पुरुषस्त्यागी स्वधनं त्यज्य गच्छति" ।

१४६. अमदो दान्निष्ठातो नो दश्च ।

दकारात् परस्य निष्ठातकारस्य नः स्यात् । दकारस्य च नकारः । भिन्न भिन्नवान् । अमद इति किम् ? मत्तः मत्तवान् ।

१४७. र-ल्वादि-सूयत्याद्योदितोऽपॄ मूर्च्छः ।

रेफादेर्निष्ठातकारस्य नः स्यात् । कीर्णः, पूरि-पर्णम्, कथं चरितम् ? इड्-व्यवधानात् । कथं कृतस्यापत्यं, कार्त्तिः, आ—ऋतः, आर्त्तिः ? वृद्धेर्ब्बहिरङ्गत्वात् । ल्वादेः खल्वपि-लूनः, लूनवान्, धूनः, जीनः, रीणः, लीनः । सूयत्यादेः सूदः, दूनः, दीन, उड्डीन इत्यादि । ओदितः—मग्नः, लग्नः, । * लस्जेर्लोनो वा । नग्नो दिगम्बरः अपॄ मूर्च्छ इति किम् ? पूर्त्तः, मूर्त्तः मूर्त्तवान् । * दुग्वोदीर्घश्च । निष्ठा-नत्वञ्च । दूनः, गूनः ।

१४८. आतो यण् संयोगपूर्व्वादध्याख्यः ।

यण् संयोगपूर्व्वादादन्ताद्धातोर्निष्ठातो नः स्यात् । संस्त्यानः, श्राणः, प्राणः, निद्राणः, म्लानः, म्लानवान् अध्याश्य इति किम् ? ध्यातः, ख्यातः, ध्यातवान् । यण् संयोगपूर्व्वादिति किम् ? स्नातः । धातोरित्येव निर्य्यातः ।

१४९. क्षियो दीर्घश्च कर्त्तृऽधिकरणयोः ।

क्षियो निष्ठातो नः स्यात् । दीर्घश्च । कर्त्तरि क्षीणो धर्म्मः, अधिकरणे इदमस्य प्रक्षीणम् । अनयोरिति किम् ? भावे क्षितमस्य जातम् ।

१५०. वाक्रोशदैन्ययोः ।

क्षियोऽत्र निष्ठानत्वं दीर्घो वा स्यात् । आक्रोशे क्षीणायुस्त्वम् । क्षितायुस्त्वम-भव वा । दैन्यक्षीणो विप्रः क्षितो वा ।

१५१. श्योस्पर्शे ।

श्यैङो निष्ठातो न स्यात् । शीनं घृतं, शीना वसा । अस्पर्श इति किम् ? शीतो वायुः ।

---

१४७. रेफान्तधातोरनिट्त्वाभावाल्लाक्षणिक एव रेफो गृह्यते, तेन तस्या अनित्यत्वमपि पॄ-मूर्च्छवर्ज्जनमप्येतद् वेदयति । आर्त्तिरिति ऋगादि (१/२/१०) इति वृद्धिः, निष्ठानकारस्य प्रकृत्याश्रयणादन्तरङ्गता, वृद्धेरुपसर्गाश्रयणादन्तरङ्गता, कार्त्तौ प्रत्ययाश्रयणादनित्यत्वमपि ।" बहिरङ्गे कृते कार्ये अन्तरङ्गं न सिद्ध्यति । बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली" । प्रत्ययाश्रितं कार्यन्तु बहिरङ्ग मुदाहृतम् । प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।

१५२. **अञ्चोऽनपादाने ।**

निष्ठातो नः स्यात् । समक्नौ शकुनेः पादौ, समक्नः पङ्के । अनपादान इति किम् ? उदक्तमुदकं कूपात् ।

१५३. **पूञो विनाशे ।**

निष्ठातो नः स्यात् । पूना यवाः । विनाश इति किम् ? पूतं धान्यम् ।

१५४. **षिञो ग्रामकर्म्मकर्त्तृकस्य ।**

निष्ठा-नत्वं स्यात् । सिनो ग्रामः स्वयमेव, अन्यत्र सितो ग्रामोऽनेन ।

१५५. **दिवोऽविजिगीषायाम् ।**

निष्ठानत्वं स्यात् । आद्यूनः औदरिक इत्यर्थः । परिद्यूनवान् । अविजिगीषायामिति किम् ? द्यूतम् ।

१५६. **निर्व्वाणोऽवाते ।**

निपात्यते । निर्व्वाणो मुनिः (अग्निर्वा) । अवात इति किम् ? निर्व्वातो वातः, गत इत्यर्थः ।

१५७. **शुषः कः ।**

शुषो निष्ठातकारस्य कः स्यात् । शुष्कः, शुष्कवान् ।

१५८. **पचो वः ।**

पचो निष्ठातो वः स्यात् । पक्वः, पक्ववान् ।

१५९. **क्षायो मः ।**

क्षायो निष्ठातो मः स्यात् । क्षै-क्षामः, क्षामवान् ।

१६०. **प्रस्त्यो वा ।**

प्रस्त्यायते निष्ठातो मो वा स्यात् । प्रस्तीमः, प्रस्तीतः ।

१६१. **अप्रादे फुल्ल-क्षीब-कृशोत्फुल्ल-संफुल्लोल्लाघाः ।**

एते निष्ठातकारेण सह निपात्यन्ते । फुल्लः, निष्ठाधिकारे निपातनात्—फुल्लवान् । (क्षीबवान्) अप्रादेरिति किम् ? ञिफला विसरणे आदित्वान्नेट् प्रफुल्लतं

---

१५४. पिण्डीक्रियमाणो ग्रासो दध्यादिव्यञ्जनादिना यदा बन्धनेऽनुकूलस्तदा कर्म्मण एव तत्रैवेदं प्रवर्त्तत इति बोध्यम् ।

१६१. ञिफला फुल्लः निष्ठातस्य लत्वं निपात्यते । क्तवत्वेकदेपास्यपीदन्निपातन—मिष्यते । फुल्लवान् । क्षीवादिषु तु क्तप्रत्ययस्यैव तलोपः, तस्यासिद्धत्वात् प्राप्तस्य टोऽभावश्च निपात्यते । क्षीबो मत्तः, कृशस्तनुः । उल्लाघो नीरोगः इति भट्टोजिदीक्षितः । कृशेः क एष विहित इगुपधात् स्वरे हि दोषो भवति परिकृशे । पदस्य लोपो विहित इति मतं जगत्यमूनां भवति हि रुचिरा ।

पद्मम्। क्षीवृ –प्रक्षीवितः, कृश-प्रकृशितः लाघृ –प्रोल्लाघितः। कथं प्रफुल्लं पुण्डरीकाक्षम्? पश्चात् (प्रादि) समासेन। उत्फुल्लादयो निपातिता एव। केचित् क्तवतोर्नेच्छन्ति, तेषां मते क्षीबितवानित्यादि। अथ मन्यते पाणिनीये चेति निष्ठाधिकारे निपातनात्। अन्यथा शेषे क्ताधिकारे एवोक्तं स्यात्। भक्ष इति अप्प्रत्ययान्तः कैश्चित् क्तान्तो निपात्यते।

१६२. नुदोन्द-विन्दि-त्रा-घ्रान्ह्रीभ्यो वा।

एभ्यो निष्ठातो नो वा स्यात्। नुन्नं नुत्तम् वा। नुन्नवान्, नुत्तवान्। उन्नं उत्तम् वा। विद-विचारणे विन्नं, वित्तम्। त्राणं-त्रातम्। देवत्रात इति नित्यम्। घ्राणं घ्रातं। ह्रीनं ह्रीतम्।

१६३. ऋणं धारे।

स्यात्। ऋतमन्यत्र।

१६४. वित्तं धनख्यातयोः।

विन्दतेर्निपात्यते। वित्तंधनम्, वित्तः पाण्डित्येन। विन्नमन्यत्र।

१६५. भित्तं शकले।

भित्तं खण्डे स्यात्। भिन्नमन्यत्र।

१६६. धूर्त्तः कितवे।

१६७. ऋल्वादेः क्तिन स्तो नोऽपिपर्त्तेः।

ऋकारान्ताल्वादेश्च क्तिनस्तो नो भवति। कीर्णिः, गीर्णिः, धूनिः, लीनिः, पिपर्त्तेस्तु पूर्तिः।

१६८. हलादो ह्रस्वः क्तिनिष्ठयोः।

हलादोऽत्र ह्रस्वः स्यात्। प्रह्लत्तिः (क्ति) प्रह्लन्नः, प्रह्लन्नवान्।

१६९. छादेरद्व्युपसर्गस्यापि।

छादेरपप्रत्यये ह्रस्वः स्यात्। छदः, प्रच्छदः, उरश्छदः। अद्व्युपसर्गस्येति किम्? समुपछादः।

१७०. इस्-मन-त्र-क्विषु च।

एषु छादेर्ह्रस्वः स्यात्। छदिरिदम्, मन्-छद्म, त्र-छत्रम्, क्विप्-प्रच्छत्।

---

१६२. "वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते।
विन्देर्विन्नश्च वित्तश्च भोगे वित्तं च विद्यतेः"। इति।

१७१. क्षियो दीर्घो यपि।

यपि क्षियो दीर्घः स्यात् । प्रक्षीय ।

१७२. आने ऽतोऽम् ।

आने परे अतो अम्भवति । पचमानः, करिष्यमाणः । अत इति किम् ? ददानः

१७३. आस आदीत् ।

आसः परस्य आत ईद् भवति । आसीनः ।

१७४. ह्रस्तात्तुक् पिति क्ङ (क्ङि) ति ।

ह्रस्वान्ताद्धातो पिति क्ङ (क्ङि) ति परे तुगागमः स्यात् । प्रकृत्य, जित्वरः, अग्निचित् । संयत् । ह्रस्वादिति किम् ? ग्रामणीः । पितीति किम् ? चितम् । कथं ग्रामीणि कुलम् ? ह्रस्वस्य बहिरङ्गत्वात् ।

---

१७२. नन्वमोऽकारकरणमनर्थकं कृतं लोप्यञ् चेत् ? सत्यं, एकवर्णो विधिरन्ते प्रवर्तते इति परिभाषां मन्यमानां मतेऽकारस्यापि मकारः स्याद् यथायं मानुबन्धोऽकारः कथं न स्यादिति चेन्न वैयर्थ्यात् । ददान इति दाञो जौहात्यादिकस्य रूपम्, ददान इत्यस्य ददमान इत्येव स्यात् कामया ? पचानेत्यादौ आगमशासनम-नित्यमिति न्यायादागमशानमस्यानित्यतया भविष्यति ।

१७३. आस ईदित्युक्ते परस्यादेरिति परिभाषया शानाकारस्यैव भविष्यति किमीद् ग्रहणेन ? मैवम्, तस्येहानङ्गीकारात् ।

१७४. ननु उपेत्य अधीत्यादौ इण् क्त्वा इति स्थिते वर्णो विधिरन्तरङ्ग इति न्यायान् गुणोदीर्घश्चान्तरङ्ग इति न्यायात् गुणोदीर्घ-श्चान्तरङ्गः समाश्रितत्वाद् यवादेशब्दान्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवानिति सन्धौ ह्रस्वाभावात् कथं तुगागमो भवितुमर्हतीति ? सत्यम्, भवेदेवम्, यदि धातो पूर्व्वमुपसर्गेण सम्बद्धः स्यात्, यतोधातुः क्रिया-प्रतिपादकः, क्रिया च साध्यरूपा, साध्यस्तु साधनायत्तम्, अतः पूर्व्वं धातु साधनेन सम्बध्यते पश्चादुपसर्गेणेति । उक्तञ्च "धातुः सम्बन्धमायाति पूर्व्वं कर्त्तादिकारकैः । उपसर्गादिभिः पश्चादिति जल्पन्ति कोविदाः" (केचन) इति । यस्मादुपसर्गाविशेषकाः भवन्ति ते च साधनतो लब्धात्मिकां विशिषन्ति, नहि स्वयमभीष्टार्थस्य विशेषाकांक्षा भवतीति पश्चादुपसर्गेण

१७५. खिति नाजन्त-द्विषद-रुषोऽनव्ययस्य मुम् ह्रस्वश्च ।

खिदन्ते परे नान्ताजन्तादेर्मुम् स्यात् । राजमेजयः, राजम्मन्यः. जनमेजयः, गुणिम्मन्यः । दीर्घान्तस्य ह्रस्वश्च । कालिमेजयः, महिलम्मन्यः, शुभ्रम्मन्या, खलपुम्मन्यः । द्विषदरुषोरन्तलोपश्च । द्विषमेजयः, अरुन्तुदः, अनव्ययस्येति किम् ? दिवामन्या रात्रिः, दोषामन्यमहः । नाजन्तादेरिति किम् ? विद्वन्मन्यः ।

सम्बद्धः साधनेन सम्बध्यमानो धातुस्तदभिधायिना प्रत्ययेन सम्बध्यते इति प्रत्ययकार्यं यदादेशलक्षणम् प्रथमं तस्मिन् सति तुगागमस्तत्कार्य्यत्वात् पूर्व्वमेव प्रवर्त्तते । ततः सन्धिरिति भावः ।

१७५. ननु नाजित्युक्तेऽपि विधये विशेषणमन्त्यमिति न्यायादन्तो लभ्यते किमन्तग्रहणेन? सत्यं मन्दधियां सुखप्रतिपत्त्यर्थम् । मुम्मकारो मिदच इत्यस्य विशेषणार्थः । राजमेजय इत्यादौ खश्ख्यौ । दीर्घान्तस्य ह्रस्वश्चेत्यजन्तस्य श्रुतत्वात् । तेन वाङ्मन्येति न ह्रस्वः । अत्र केचित् सन्ध्यक्षराणामपि ह्रस्वत्वमतिरि कुलमित्यादि; दीर्घसंज्ञाया अभावात् ह्रस्वाभावः, न दीर्घस्यैव भवतीति । तेन परमरैमन्य, उत्तमनौमन्य इत्यादौ न स्यादित्याचक्षते । अपरे तु तत्र इण् ह्रस्व इति परिभाषाबलात् सन्ध्यक्षराणामपि ह्रस्वत्वमतिरिकुलमित्यादिवभवत्येवेति, तेन परमरिमन्य, उत्तमनुम्मन्य इत्यादय सिध्यन्तीत्याहुः । इदन्तु कातन्त्रवासवतासम्मतम् । ननु हरिणीम्मन्या तरिम्मन्या इत्यत्र कर्त्तृकर्मत्वयोरेकत्र विवक्षित्वात् स्त्रीपुंवदभाषितेत्यादिना तुल्याधिकरणे तत्रैव पुंवद्भावः । स्त्रीपुंवदित्यनेन यत्र तु न तथा तत्र स्यादेव । अथ कालीमिवात्मानं मन्यत इति भेदप्रतीतिरस्तीति, न पुंवत् प्राप्नोत्ति विद्वन्मानिनीतिवत्, तत्कथं ह्रस्वो भवेत् ? सत्यमेतत्, विप्रतिषेधे क्वचित्पूर्वोऽपि विधिः प्रवर्त्तत इति व्याख्यातत्वात् ह्रस्वः स्यात् । अन्ये तु यत्राभेदप्रतीतिस्तुल्याधिकरणे तत्रैव पुंवद्भावः । स्त्रीपुंवदित्यनेन तत्र तु न स्यादेव । अथ कालीमिवात्मानं मन्यत इति भेद प्रतीतिरस्तीति न पुंवत्, तर्हि कथं विद्वन्मानिनीति ? क्यङ्मानिनोरिति विशेषविधानात् । द्विषदरुषोः संयोगान्तलोप इति मुनिकृते संयोगान्तस्येति शेषः । अरुन्तुद इति तिलविध्वरुषन्तुद इति खश् ।

१७६. इच-एकाचोऽम् द्वितीयावच्च ।

इजदादेकाचः खिदन्ते परेऽमागमः स्यात् । स चाम् द्वितीयैकवचनवच्च । गाम्मन्या, श्रियम्मन्या, नृ-नरम्मन्यः ।

१७७. कारेऽगद-सत्यास्तुभ्यः ।

एभ्यः कारे परेऽम् स्यात्, अगदङ्कारः, सत्यङ्कारः, अस्तुङ्कारः ।

१७८. श्येनतिलात् पाते णे ।

आभ्यां णान्ते पाते परेऽम् भवति । श्येनम्पाता मृगया, तैलम्पाता स्वधा । (ण इति किम् ? श्येनपातः, तिलपातः) ।

१७९. रात्रेः कृति वा ।

कृति परे रात्रेरम् भवति वा । रात्रिञ्चरोरात्रिचरः रात्रिमटो रात्र्यटः । खिदन्ते तु मुम् नित्यम्, रात्रिम्मन्यमहः ।

---

१७६. ननुद्वितीयावदित्युक्ते कथं द्वितीयैकवचनवदिति प्राप्यते ? सत्यम्, तत्दृश्यात्तद्व्यपदेशः: यथा तरुणारुणकिरणस्तरुषु पतन् किसलयवद् व्यपदिश्यते । अथवामिवागमः स्यादित्युक्तेऽपि सिध्यति किं द्वितीयाग्रहणेन ? सत्यम्, तदा-अम् शब्दोच्चारितमेव कार्य्यं प्रतिपद्येत नान्यत् । ततश्च स्त्रियम्मन्य इत्यादा-विषाद्यादेशो दुष्प्रापः स्यादिति । चेत् इति किम् ? ईम्मन्या, नित्यत्वात् परत्वाच्च ह्रस्वत्वं बाध्यते । एकाच इति किम् ? सेनानीम्मन्य इत्यत्र ओश्च व इति यत्वं बाधितम् । यदा तु स्त्रियमात्मानं मन्यते कुलमिति भूतमियं ब्राह्मणी-तिवल्लिंगपरित्यागः, तदा स्त्रियम्मन्यं कुलमिति । भाष्ये तूपचारेऽपि क्वचि-ल्लिंगपरित्यागः ।

१७९. इह सोपपदविधानान्निरुपपदविधिर्बाध्यते इत्याह खिदन्ते त्विति ।

१८०. तिमिङ्गिलादिषु च ।

तिमिङ्गिलादिषु अम् द्वितीयैकवचनवन्निपात्यते । तिमिङ्गिलः, दीपङ्करः, सर्व्वन्दमः ।, धेनोर्भव्यायाम् । धेनुम्भव्या गौः । अग्निभ्राष्ट्रादिन्धे—अग्निमिन्धः, भ्राष्ट्रमिन्धः । उष्णभद्रात् करणे । उष्णङ्करणम् भद्रङ्करणम् ।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
चतुर्थस्याध्यायस्य द्वितीयः पादः ।

———

१८०. अस्ति मत्स्यतिमिर्नाम् तथा चास्ति तिमिङ्गिलः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव ! इति रामायणम् । मध्यस्य दिने । मध्यञ्च तद्-दिनञ्चेति मध्यन्दिनम् । लोकस्य पृणे । पृण इति कप्रत्ययान्तः लोकस्य पृणः लोकम्पृणः इत्येऽनभ्याशस्य । अनभ्याशमित्यः, दूरात् परिहार्यमित्यर्थः । तथा परम्परा, आन्दोलनम्, आञ्चोट (ड़) नम् । धुरन्धर इत्यादयो वेदितब्याः । पञ्जिका दृश्यताम् ।

अथ चतुर्थाध्यायस्य

तृतीयः पादः

समासप्रकरणम्

१. **समर्थानां समासः ।**

अधिकारोऽयम् । परस्परसम्बद्धार्थानां पदानां समासो वेदितव्यः । अनेकपदस्यैकपदत्वं समासः । यथा—राज्ञः पुरुषो राजपुरुषः । समर्थानामिति किम् ? भार्या राज्ञः, पुरुषो देवदत्तस्य ।

२. **सुप् सुपा ।**

सुबन्तेन सह सुबन्तं समस्यते । इत्यधिकृतं वेदितव्यम्, विधिश्चायम् । भूतःपूर्वम् भूतपूर्वः, विस्पष्टपटः, पुनर्नवः, अध्वगन्तव्य इति ।

३. **अव्ययीभावः ।**

तत्पुरुषात् प्रागव्ययीभावो नाम समासो वाच्यः । अन्वर्था संज्ञेयम्, तेनायमव्ययवद्बोद्धव्यः ।

४. **अव्ययं सप्तस्यनुक्रम-समीप-पश्चाद्-यथा–अत्याभाव-शब्दप्रकाश-यौगपद्य-सम्पद्-असम्प्रति-साकल्यान्तार्थेषु ।**

सप्तम्याद्यर्थेषु अव्ययं सुबन्तेन सह समस्यते । सप्तम्यर्थे स्त्रीष्वधिकृत्य या कथा प्रवर्त्तते सा अधिस्त्रि कथा । अनुक्रमे, अनुज्येष्ठं यथावृत्तं प्रविशन्तु । समीपार्थे—उपकुम्भम् । पश्चादर्थे—अनुरथं पादाताः । यथार्था बहवः, योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यम् । योग्यतायाम्—अनुरूपमस्य दानम् । वीप्सायाम्—प्रतिदिनं ददाति, पदार्थानतिक्रमे—यथाशक्ति करोति सादृश्ये सदृशः किख्याः सकिखि, सलक्ष्मि स्त्री, सवीणं ध्वनति । अत्यार्थे—निःशीतम्, अतियौवनम् । अभावः सम्बन्धिभेदादनेकविधः, तत्र ऋद्ध्यभावे—विगता ऋद्धिर्यवनानां दुर्यवनम्, दुर्भिक्षम् । अर्थाभावे—अभावो मक्षिकाणां निर्मक्षिकम् । शब्दप्रकाशने—पाणिनेः

---

३. समासग्रस्तत्वे (?) सति नानाविभक्तिष्वेकरूपतावत् पदत्वमव्ययीभावत्वम् । किञ्च उत्तरार्थान्वितस्वार्थाव्ययपूर्वस्तु यो भवेत् । समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः । अमादेशं विना श्रूयमाणषष्ठी न बोधिका । स्वार्थे यदर्थस्य यद्वा सोऽव्ययीभाव इष्यते ।

शब्दस्य प्रकाशः इतिपाणिनि, उत्पाणिनि। यौगपद्ये—सचक्रं निधेहि बाणम्। सम्पद् द्विविधा, आत्मतासम्पत्तिः समृद्धिश्च, सम्पन्नं ब्रह्म बाभ्रवाणां सब्रह्म। समृद्धिर्मद्राणां सुमद्रम्। असम्प्रत्यर्थे—नायमस्य भोगकालः, अतितैसृकं हिमम्, तिसृकाग्रामे भवं तैसृकं वस्त्रम्। साकल्ये-सतृणमभ्यवहरति। अन्तार्थे—सतद्धितमधीते।

५. **यथा न तुल्ये।**

यथाशब्दः सादृष्यार्थेन समस्यते। यथा शक्रस्तथार्ज्जुनः।

६. **यावदियत्तायाम्।**

अवधारणे यावत् समस्यते। यावदमन्त्रं विप्रानामन्त्रयस्व।

७. **प्रतिना मात्रार्थे।**

सुबित्येव, अल्पार्थे प्रतिना सह सुबन्तं समस्यते। शाकप्रति, सूपप्रति।

८. **परिणा-अक्षशलाकासंख्या द्यूतेऽन्यथावृत्तौ।**

अक्षादयः परिणा सह समस्यन्ते। द्यूतेऽन्यथावृत्तिश्चेत्। अक्षाभ्यां द्यूते अक्षेणैवं न तथा वृत्तम् यथा पूर्व्वञ्जये अक्षपरि। पञ्चभिः शलाकाभिर्द्यूते एकया शलाकया न तथा वृत्तम्, शलाकापरि। तथा संख्या—एकया संख्यया न तथा वृत्तम्, एकपरि, द्विपरि, चतुष्परि।

९. **विभाषा।**

अतो विभाषाधिकारः।

१०. **आङपपरिबहिरञ्चः पञ्चम्या।**

एते पञ्चमम्यन्तेन वा समस्यन्ते। आपाटलिपुत्रं वृष्टो देवः आपाटलिपुत्राद् वा, अपत्रिगर्त्तम्, अपत्रिगर्त्तेभ्यः, परित्रिगर्त्तम्, परित्रिगर्त्तेभ्यः। बहिर्ग्रामम्, बहिर्ग्रामात्। अञ्चत्यन्तः, प्राग्ग्रामम्, प्राग्ग्रामात्।

११. **लक्षणेनाभिप्रती आभिमुख्ये।**

आभिमुख्यार्थेऽभिप्रती लक्षणवाचिना सुबन्तेन सह समस्येते। अभ्यग्नि शलभाः पतन्ति, प्रत्यग्नि। लक्षणेनेति किम्? स्रुघ्नं प्रति गतः, स्रुघ्नं गतः इत्यर्थः।

१२. **अनुर्दैर्घ्यसामीप्योः।**

अनुरत्र समस्यते, अनुगङ्गं वाराणसी, गङ्गावदायता। अनुवनं वापी, तत्समीपे इत्यर्थः। अनुक्रमाद्यर्थे पूर्वमुक्तम्।

१३. **तिष्ठद्गुवादीनि च।**

तिष्ठद्गुप्रभृतीनि निपात्यन्ते। तिष्ठन्ति गावोऽस्मिन् काले तिष्ठद्गुः कालः,

बृहद्गुः कालः, आयतीगवम्, खलेयवम्। लूनयवम्। संह्रियमाणयवम्। संहृतयवम्। उन्मत्तगङ्गं नाम देशः। लोहितगङ्गम्, समम्भूमि, समम्पदाति, सुषमम्, विषमम्। निःषमम्। दुःषमम्। अपरसमम्। आयतीसमम्। प्राह्णम्। प्ररथम्। प्रमृगम्। प्रदक्षिणम्। सम्प्रति, पापसमम्, पुण्यसममित्यादि।

१४. पारेमध्ये षष्ठ्या वा।

एतौ षष्ठ्यन्तेन समं वा समस्येते। निपातनादेत्वम्। पारेगङ्गम्, गङ्गायाः पारम्। मध्येगङ्गम्, गङ्गायाः मध्यम्। वानुवृत्तौ पुनर्वाग्रहणात्-गङ्गापारम्, गङ्गामध्यम्।

१५. संख्या वंश्यनदीभिः।

संख्याशब्दा वंशभवैर्नदीवाचिभिश्च समस्यन्ते। द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणम्, त्रिमुनिशाखा, द्विगङ्गम्, पञ्चनदं समाहारे।

१६. तत्पुरुषः।

अयमधिकारः। तत्पुरुषो नाम समासो वाच्यः, आकर्मधारयात्।

१७. नञ्।

नञ् सुबन्तेन सह समस्यते। न ब्राह्मणोऽब्राह्मणः।

१८. ईषद्गुणेन।

ईषच्छब्दो गुणवाचिना सुबन्तेन सह समस्यते। ईषद्रक्तः ईषत्पिङ्गलः।

१९. पूर्वापरावरोत्तरमेकदेशिना षष्ठ्यन्तेन। अर्द्धं नपुंसकम्।

पूर्वादयोऽवयविना षष्ठ्यन्तेन समस्यन्ते। पूर्वंकायस्य पूर्वकायः, अपरकायः, अवरकायः, उत्तरकायः। अर्धपिप्पली। अर्धं समभागे क्लीबम्। नेह ग्रामार्धः। षष्ठीसमासापवादोऽयम्। तेन कार्यपूर्वमिति न भवति। मध्याह्नादयो विशेषण-समासेनैव सिध्यन्ति।

२०. द्वितीय-तृतीय-तुरीय-चतुर्थ-तुर्य्यं वा।

एतेऽवयविना षष्ठ्यन्तेन वा समस्यन्ते। द्वितीयं भिक्षायाः द्वितीयभिक्षा,

---

१६. असमानविभक्तमत्प्रतिपदप्रकृतिकत्वे सत्यभेदबोधकपदत्वं तत्पुरुषत्वम्। अन्यच्च यदीयेन सुबर्थेन यत्यत्बोधनक्षमः, स समासस्तस्य तत्र च तत्पुरुष उच्यते। द्वितीयादिसुबर्थस्य भेदादेष च षड्विधः। क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः।

तृतीयकथा, तुरीयवापी, चतुर्थगाथा तुर्य्यश्लोकः । पक्षे विभाषाधिकारे पुनर्वाग्रहणात् पूरणप्रत्यान्तेनापि षष्ठीसमासः । भिक्षाद्वितीयम्, वापीतुरीयमित्यादि ।

२१. **कालाः परिमाणिना ।**

परिमाणिना षष्ठ्यन्तेन कालशब्दाः समस्यन्ते । मासो जातस्य (यस्य सः) मासजातः, द्व्यहोजातस्य द्व्यहजातः ।

२२. **प्राप्तापन्ने द्वितीयया ।**

एते द्वितीयान्तेन समस्येते । प्राप्तो जीविकां प्राप्तजीविकः, आपन्नजीविकः । पक्षे-जीविकाप्राप्तः ।

२३. **द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नारूढगम्यादैः ।**

श्रिताद्यैर्द्वितीयान्तं समस्यते । कष्टंश्रितः कष्टश्रितः, लोकातीतः, श्वभ्रपतितः ग्रामगतः, तरङ्गात्यस्तः, सुखप्राप्तः, सुखप्राप्तः, सुखापन्नः, वृक्षारूढः, ग्रामगमी, ग्रामगामी, ओदनबुभुक्षुः, द्विषद्वीर्यऽनिराकरिष्णुः विप्राय वेदविदुषे ।

२४. **क्तेन खट्वा क्षेपे ।**

क्तान्तेन द्वितीयान्ता खट्वा समस्यते । खट्वारूढो जाल्मः ।

२५. **स्वयंसामि ।**

एतौ क्तान्तेन समस्येते । स्वयंकृतम्, सामिकृतम् । सामीत्यर्थग्रहणात् नेमिभिन्नम् । अर्द्धकृतञ्च ।

२६. **काला अत्यन्तसंयोगे च ।**

द्वितीयान्ताः कालवाचकशब्दाः क्तान्तेन अत्यन्तसंयोगे च सुबन्तेन सह समस्यन्ते । अहरतिसृताः, रात्र्यारूढाः । वर्षं भोग्यो वर्षभोग्यः, मुहूर्त्तसुखम् ।

२७. **तृतीया तत्कृतगुणवचन-समोनार्थार्थपूर्व-निपुण-कलहावर-मिश्रश्लक्ष्णैः ।**

गुणमुक्तवान्-गुणवचनः । तृतीयान्तकृतेन गुणवचनेन समार्थ-ऊनार्थ-अर्थशब्दादिभिश्च तृतीयान्तं समस्यते । शलाकया काणः शलाकाकाणः, शंकुलाखण्डः । इह कस्मान्न भवति घृतेन पाटवम् ? नेदं तत्कृतगुणमुक्तवत्, किन्तर्हि ? तद्भक्षणे परिणामोपाधिरिति । समर्थाद्यैः—पितृसमः, गुरुतुल्यः, एकोनः, द्व्यङ्गविकलः । धान्यार्थः, मासपूर्व्वः वाङ्निपुणः, वाक्कलहः, मासावरः कनीयान्, गुड़मिश्रः, वाक्श्लक्ष्णः ।

---

२४. नहि केवलवाक्येन क्षेपः (निन्दा) गम्यते ।

२८. **कर्त्तृकरणे कृता बहुलम् ।**

तृतीयान्ते कर्त्तकरणे कृदन्तेन सह समस्येते । चौरहतः, शरभिन्नः, दध्युपसिक्तः अश्वयानम्, बाहुल्यन्नेह दात्रेण लूनवान् ।

२९. **कृत्यैरधिकार्थोक्तौ ।**

कृत्यैस्तृतीयान्तं समस्यते । अधिकार्थोक्तिश्चेत् । श्वलेह्यः कूपः, काकपेया नदी, वाष्पछेद्यानि तृणानि ।

३०. **चतुर्थी-प्रकृत्यर्थ-बलि-हित-सुख-रक्षित-देयैः ।**

प्रकृतिवाचिना सुबन्तेन सह अर्थशब्दादिभिश्च चतुर्थ्यन्तं समस्यते । यूपाय दारु-यूपदारु, कुण्डलाय हिरण्यं कुण्डलहिरण्यम् । प्रकृतीति किम् ? रन्धनाय स्थाली । *अर्थेन सह नित्यसमासः सर्व्वलिङ्गता च बहुलानिवृत्या, विप्राय इदं—विप्रार्थं पयः, विप्रार्था शाटी, विप्रार्थःपटः । यक्षबलिः, गोहितम्, गोसुखम्, गोरक्षितम्, देवदेयं पुष्पम्, परत्र देया कन्या ।

३१. **पञ्चमी भयाद्यैः ।**

भयादिभिः पञ्चम्यन्तं समस्यते । राज्ञो भयं—राजभयम्, वृकभीः, चौरभीतः, श्वभीतिः । सितेतरः, ग्रामनिर्गतः अधर्मजुगुप्सुः । *अपेतापोढमुक्तपतितापत्र-स्तैरल्पशः—सुखापेतः, कल्पनापोढ़, रोगमुक्तः, मञ्चपतितः रणापत्रस्तः । अल्पशः इति किम् ? प्रासादात् पतितः ।

३२. **स्तोकान्तिक-दूरार्थ-कृच्छ्राणि क्तेन ।**

पञ्चम्या अलुक् । स्तोकान्मुक्तः, अल्पान्मुक्तः, अन्तिकादागतः, निकटादुपेतः, दूरादागतः, विप्रकृष्टादागतः, कृच्छ्रादवाप्तः ।

३३. **षष्ठी ।**

षष्ठ्यन्तं सुपा सह समस्यते : राज्ञः पुरुषो राजपुरुषः ।

३४. **क्रीड़ाजीविकयोर्नित्यम् ।**

समस्यते । दमनकपुष्पभञ्जिका नाम क्रीड़ा, उद्यालपुष्पभञ्जिका । जीविकायां—दन्तलेखकः, कुक्षिलेखकः ।

---

३२. अत्र स्तोकार्थोऽल्पशब्दे एव ग्राह्यः न तु लेशादयः ।

३५. न निर्द्धार्य-पूरण-गुण-सहितार्थाव्यय-लादेशैः।

निर्द्धार्यर्थेन पूरणादिभिश्च षष्ठी न समस्यते। गवां कृष्णा सम्पन्नक्षीरतमा, छात्राणां पञ्चमः। गुणे प्रतिषेधो बहुलम्। पटस्य शुक्लत्वम्, वलाकायाः शौक्ल्यम्। बाहुल्यात्—तत्सामीप्यम्। *अधिकारणैतावत्वे च। वस्त्रपीतिमा, उदरगौरवम्। द्रवकाठिन्यम्, मुनिचापलम्, चन्दनगन्धः, अङ्गस्पर्शः, नान्दीघोषः, फलरसः, कन्यारूपमित्यादि। फलानां सुहितः' फलानां तृप्तः, फलानामाशितः। अव्ययेन—कटस्य कृत्वा। लादेशेन—कटस्य कुर्वन्, कटस्य कुर्व्वाणः। *कारकषष्ठी न समस्यते। सर्पिषो ज्ञानम्, राज्ञां मतः, इदमेषामाशितम्, आश्चर्यो गवां दोहोऽगोपालकेन, भवतः शायिका, भवतः आसिका, तस्यकर्त्ता, ओदनस्य भोजकः। एषां सम्बन्धषष्ठीसमासेन तु भवितव्यम्। सर्प्पिज्ञानम्, राजसम्मतः, इदमेतदाशितम्, गोदोहः, भवदासिका, तत्कर्त्ता, ओदनभोजकः। याजकादिभिः सह कारकषष्ठी च समस्यते। ब्राह्मणयाजकः, गुरुपूजकः, इहापि भवति, ब्राह्मणकर्त्तव्यम्। इह कस्मान्न भवति। राज्ञः श्रौघ्नस्य (स्रौघ्नस्य) धनम्। सामानाधिकरण्येन सम्बन्धाभावात्। ब्राह्मणस्योच्चैर्गृहमित्यत्र सापेक्षत्वान्न स्यात्।

३६. सप्तमी शौण्डादिभिः।

शौण्डादिभिः सप्तम्यन्तं समस्यते। अक्षेषु शौण्डः अक्षशौण्डः, अक्षधूर्त्तः, रणपण्डितः, कार्य्यनिपुणः, काम्पिल्यसिद्धः, छायाशुष्कः, कारकबन्धः। संज्ञायां—वनेकिंशुलुकाः, अलुक्।

३७. कृत्ययता नियमे।

नियमार्थे कृत्यता सह सप्तम्यन्तं समस्यते। मासदेयमृणम्, पूर्व्वाह्णे गेयं साम।

३८. तत्राहोरात्रावयवाः क्तेन।

एते सप्तम्यन्ता क्तान्तेन समस्यन्ते। तत्रेति ग्रहणसामर्थ्यात् सप्तम्या अलुक् तत्रकृतम्, तस्येदम् तात्रकृतम्। अहोरात्रावयवाः—पूर्व्वाह्णकृतम्, मध्याह्नगीतम्, पररात्रकृतम् सर्वेषां श्वेततरः सर्व्वश्वेतः। अवयवा इति किम्? अह्नि कृतम्।

---

३५. यस्मान्निर्द्धार्य्यते यश्च निर्द्धार्य्यते, यश्च निर्द्धारणहेतुस्तत्त्रितयसन्निधाने सत्येव षष्ठी, तदैवायं निषेध इति कैयटः। पुरुषोत्तमित्यादौ तु तदभावात् सम्बन्धषष्ठीसमासः। हलादिरित्यादावपि तथेति भाष्यम्। गुणस्तरेण तरलोपश्चेति वक्तव्यम्। तरबन्तं शब्दं गुणवाचि तेन सह समासस्तरलोपश्च निर्धारणनिषेधस्य प्रतिप्रसवोऽयम्। सर्वेषां महत्तरः सर्वमहान्।

३९. **पात्रेसमितादयः क्षेपे ।**

अमी शब्दाः क्षेपे समस्यन्ते । पात्रेसमितः पिण्डीशूरः, गेहेनर्दी, मातरिपुरुषः, तीर्थध्वाङ्क्षः, तीर्थकाकः, उडुम्बरमशकः, प्रवाहेमूत्रितम्, वनेरुदितम् । भस्मनिहुतम् ।

४०. **कुप्रादयो नित्यम् । अलंभूषणे ।**

कुशब्दः प्रादयश्च नित्यं समस्यन्ते । भूषणे अलं शब्दश्च । नित्यसमासानां स्वपदविग्रहो नास्ति । पदान्तरेणार्थप्रदर्शनम् । कुत्सितो नृपः कुनृपः, कोष्णम्, प्रणतः, प्रणायकः, प्रकृत्यः, विजित्यः, दुष्कुलम्, सुमानुषी, अभिष्टुतम्, आपिङ्गलः, अलंकृतः कुमार्य्या अलंकुमारिः, अलंकृत्य । *प्रादयो गताद्यर्थे प्रथमया । प्रगतः प्रकृष्टो वा आचार्य्यः प्राचार्य्यः, प्रान्ते वासी प्रवासी । *अत्यादयः कान्ताद्यर्थे द्वितीयया । अतिक्रान्तः खट्वम् अतिखट्वः । *अवादयः क्रुष्टाद्यर्थे तृतीयया । अवक्रुष्टं कोकिलया अवकोकिलं वनम्, अवमयूरम् । *पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । परिग्लानोऽध्ययनाय पर्यध्ययनः । *निरादयः क्रान्ताद्यर्थे पञ्चम्या । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः, निर्व्वाराणसिः । *सुब्विधिविषयाः प्रादौ नेष्यन्ते । वृक्षं प्रति विद्योतते विद्युत् ।

४१. **कृता तदर्थोपपदम् ।**

कृदन्तेन सह तन्निमित्तोपपदं समस्यते । इदं समासवचनं प्राक्सुबुत्पत्तेः । कुम्भं करोतीति कुम्भकारः, ग्रामणीः । तदर्थेति किम् ? कटं कुर्व्वन् ।

४२. **अमैवाव्ययेन ।**

अव्ययकृता यदुपपदं समस्यन्ते, तदमैव । स्वादुङ्कारम् । नान्येन अलंकृत्वा ।

४३. **तृतीयादीनि वा क्त्वा च ।**

उपदंशस्तृतीयाया इत्यादीन्युपपदानि अमा क्त्वा च समस्यन्ते । मूलकोपदंशम्, मूलकेनोपदंशं वा । उच्चैःकृत्य—उच्चैः कृत्वा वा कथयति । तृतीयादीनीति किम् ? खलु कृत्वा ।

४४. **च्विडाजूर्य्यादीनि च ।**

अतदर्थोपपदार्थमिदम् । नित्यंकृतेति चानुवर्त्तते । च्वि डाच् प्रत्ययान्तौ ऊर्यादीनि कृदन्तेन नित्यं समस्यन्ते । च्विः—शुक्लीकृत्य, शुक्लीभूय । डाच्—पटपटाकृत्य ।

---

१. यदुत्तरपदं नामानुत्तरं यदबोधकम् । धातुकृज्जमुपपदसमासः स तदन्तकः । विभागो यथा कारकैकोपपदकः षड्विधोऽयमिति भ्रमः । कर्म्मकर्त्राद्युपपदभेदाद् बहुविधस्त्वसौ ।

ऊर्य्यादीनि च ऊरीकृत्य। ऊरी उररीकृत्य ऊररी चाङ्गीकारे विस्तारे च। गुलु गुधा पीडार्थे। फल फली विकारे। मसमसा हिंसार्थे। श्रौषट्, वौषट, वषट्, स्वाहा, स्वधा, प्रादुस्, आविस्, श्रत् पूजार्थे, सजूः सहार्थे। कारिकाशब्दश्च। कारिकाकृत्य इत्यादिः। *अनुकरणञ्चानितिपरम्। खाट्कृत्य, खटत्कृत्य। अनितिपरमित किम्? खाडितिकृत्वा निरष्ठीवत्।

४५. **सदसती आदरानादरयोः।**

सत्कृत्य गुरुम्, असत्कृत्य खलान् गतः।

४६. **अन्तर् ग्रहणे।**

अन्तर्हत्य स्थितश्चौरः। न ग्रहणे। अन्तर्हत्वा वर्त्तिकां गतः श्येनः। गृहीत्वेत्यर्थः।

४७. **कणी-मनसी श्रद्धान्ते।**

कणेहत्य, मनोहत्य पयः पिबति, तृष्णान्तं यावदित्यर्थः।

४८. **अस्तं पुरोऽव्ययौ।**

अस्तं गत्य। परोभूय।

४९. **अदोऽनुपदेशे।**

अदः कृत्य स्थितः। उपदेशे तु, अदः कृत्वा गच्छ।

५०. **तिरोऽन्तर्द्धौ।**

तिरोभूय स्थितश्चौरः। अन्तर्द्धाविति किम्? तिरो भूत्वा स्थितं काण्डम्।

५१. **कृञा वा।**

तिरस्कृत्य, तिरस्कृत्वा, तिरःकृत्य वा।

५२. **साक्षादादीनि च।**

कृञा वेत्येव। साक्षात्कृत्य, साक्षात्कृत्वा वा। साक्षात्, मिथ्या, चिन्ता, भद्रा रो(लो)चना, अमा, आस्था, नमस्, लवणम्, उष्णं, शीतम्, उदकम्, आर्द्रम्। लवणादेर्मान्तत्वं निपातनात् अ(ग्नौ) सौवशे विक(ल्प)सने, विहसने, एषां सप्तम्यन्त-निपातः। उपाजे अन्वाजे एतौ बलाधानार्थौ।

५३. **उरसि-मनसि-मध्ये-पदे-निवचने चानतिश्लेषे।**

उरसि कृत्य मन्त्रं शेते, उरसि कृत्वा वा, निवचनेकृत्य निवचने कृत्वा वा, तूष्णीं कृत्वेत्यर्थः। अनतिश्लेष इति किम्। उरसि कृत्वा हस्तं शेते।

५४. नित्यं हस्तेपाणौ विवाहे।

कृञेत्येव। हस्तेकृत्य, पाणौकृत्य कन्याम्।

५५. प्राध्वं बन्धे।

(रक्षा) बन्धार्थानुकूल्ये। प्राध्वं कृत्य कुटुम्बं स्थितः। बन्ध इति किम्? प्राध्वं कृत्वा शकटं गतः।

५६. जीविकोपनिषदावौपम्ये।

जीविकाकृत्य, उपनिषत्कृत्य कथयति, सदृशीकृत्वेत्यर्थः।

५७. अच्छ गत्यर्थवदैः।

अच्छेत्यव्यय आभीक्ष्ण्यवृत्ति, गत्यर्थवद्भिः कृदन्तैर्नित्यं समस्यते। अच्छगत्य, अच्छोद्य।

५८. विशेषणमेकार्थेन कर्म्मधारयो बहुलम्।

विशेषणवाचि सुबन्तं विशेषणैकाधिकरणेन सह समस्यते। समासश्च कर्म्मधारय संज्ञो भवति। नीलञ्च तदुत्पलञ्चेति नीलोत्पलम्, लसद्विच्छेदः, इदंपुरुषः, इदंस्त्री, चतुर्वर्णाः। द्वीन्द्रिये, पूर्वाह्णः प्रथमपुरुषः, चरमगिरिः, जघन्यदेशः, समानदेशः, मध्यमपुरुषः, वीरपुरुषः, एकपत्नी, सर्व्वकालः, जरद्गवः, पुरातनतरुः, नवान्नम्, केवलान्नम्, पापपुरुषः, अणकभार्या। *विशेषणेन च। शीतोष्णम्, उष्णशीतम्। *सन्महत्परमोत्तमोत्कृष्टः पूज्यमानैः। सत्पुरुषः, महापुरुषः, परमपुरुषः, उत्तमपुरुषः। पूज्यमानैरिति किम्? उत्कृष्टो गौः पङ्कात्। बाहुल्यात् क्वचिन्नित्यम्, कृष्णसर्पः पञ्चाम्राः, सप्तर्षयः। क्वचिद्वाक्यमेव—लोहितस्तक्षकः। विशेषणमिति किम्? तक्षकः सर्पः, वृक्षः शिंशपाः *शाकप्रधानादेः पार्थिवादौ मध्यमपदलोपश्च। शाकप्रधानश्चासौ पार्थिवश्चेति शाकपार्थिवः, अजातोल्वलिः, दध्युपसिक्तश्चासौ ओदनश्चेति दध्योदनः, गुड़मिश्रा धानाः गुड़धानाः, तिलतण्डुलाः, विन्ध्यनामा गिरिः, श्रीहर्षनृपतिः, चारणकारकम्, तर्क्कविद्या, व्याकरणशास्त्रमित्यादि।

५९. उपमानावधारणे।

उपमानं विशेषणम्। शङ्ख इव पाण्डरः शङ्खपाण्डरः, शस्त्रीश्यामा। स्त्रियाः पुंवत्त्वे मृगीव चपला, मृगचपला, काकवन्ध्या, अवधारणम्—गुण एव धनम् गुणधनम्, सुकृतबन्धुः।

६०. **कृतादीन्यकृतादिभिः ।**

कृतञ्च किञ्चिदकृतञ्च किञ्चित् कृताकृतम्, अशितानशितम्, हृतापहृतम्, गतप्रत्यागतम्, क्रयाक्रयिका, फलाफलिका, मानोन्मानिका ।

६१. **पूर्वकालवृत्तयश्च ।**

पूर्वं दग्धः पश्चात् प्ररूढ़ः दग्धप्ररूढ़ः, स्नातानुलिप्तः, लिप्तवासितः ।

६२. **श्रेण्यादयः कृताद्यैश्च्यवर्थे ।**

अश्रेण्यः श्रेण्यः कृताः श्रेणिकृताः, पूगभूताः । श्रेणि पूग कूट पगु मृदु देव श्रवण पण्डिताद्याः । कृत भूत मत समाख्यात अवकल्पितादिः कृतादिः ।

६३. **कतरकतमौ जातिपरिप्रश्ने ।**

कतरकठः, कतमकलापः ।

६४. **किं संज्ञाक्षेपयोः ।**

किम्पुरुषः, किन्नरः । आक्षेपे—किं राजा । यो न रक्षति प्रजाः, किं पुत्रो यौःशील्यात्, किं गौरदोहवाहात् ।

६५. **वर्णो वर्णेन ।**

श्वेतरक्तः कृष्णलोहितः । स्पष्टार्थं बाहुल्येन विशेषणं प्रदर्शितम् । अथास्य परनिपातार्थं प्रपञ्चमाह ।

६६. **उपमेयं व्याघ्रादिभिः श्रेष्ठार्थे ।**

श्रेष्ठार्थे व्याघ्रादिभिरुपमेयं समस्यते । पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः, पुरुषसिंहः, बाहुलताकरपद्मम्, स्त्रीवृन्दारिका, मुनिकुञ्जरः, पुरुषनागः । श्रेष्ठार्थे इति किम् ? पुरुषोऽयं व्याघ्र इव शूरः, सामान्य प्रयोगोऽयम् ।

६७. **जातिः प्रशंसावचनाद्यैः ।**

एभिः सह जातिशब्दाः समस्यन्ते । गोमतल्लिका, गोमर्चिका अश्वप्रकाण्डम्, विप्रोद्धः । आद्यशब्दात्—पोटा, युवति, स्तोक, कतिपय, गृष्टि, धेनु, वशा, वेहत्, बष्कयणी, प्रवक्तृ, श्रोत्रिय, अध्यापकः, धूर्त्तः । गोपोटा, इभयुवतिः, अग्निस्तोकः, घृतकतिपयः, गोगृष्टिः, गोधेनुः, गोवशा, गोवेहत्, गोबष्कयणी, कठप्रवक्ता, कठश्रोत्रियः, विप्राध्यापकः, बकधूर्त्तः । जातिरिति किम् ? यज्ञदत्तो धूर्त्तः ।

६८. निन्द्यं कितवादिभिः ।

समस्यन्ते । याज्ञिककितवः, छात्रदुर्दुरूढ़ः वैयाकरणखसूचिः, मयूरव्यंसकः, विगतावंसस्येति व्यंसकः धूर्त्तो वा । कम्बोजमुण्डः, यवनमुण्डः । (एवमन्येऽपि)

६९. चतुष्पादो गर्भिण्या ।

चतुष्पादवाचिन एव गर्भिण्या समस्यन्ते । गोगर्भिणी । अश्वगर्भिणी । जातिरित्येव, काणाक्षी गर्भिणी ।

७०. युवाखलतिपलितवलिनजरतीभिः ।

खलत्यादिभिर्युवा समस्यते । युवखलतिः, युवपलितः, युववलिनः । इह सामानाधिकरण्यात् युवतिर्जरती । पुंवत्त्वे, युवजरती ।

७१. कुमारः श्रमणादिभिः

समस्यते । भिन्नलिङ्गत्वालिङ्गविपरिणामः । कुमारीश्रमणा, कुमारश्रमणा, कुमारभिक्षुकी, कुमारपण्डितः । श्रमणा. कुलटा, भिक्षुकी, तापसी, गर्भिणी, पण्डित, अध्यापक, पटु, मृदु, निपुणादि ।

७१. कृत्य-तुल्यार्था अजात्या ।

कृत्यान्ता-तुल्य-समानार्थाश्च अजातिवाचिना सुबन्तेन सह समस्यन्ते । भोज्य-लवणम्, पानीयोष्णम्, तुल्यश्वेतश्चन्द्रेण, सदृशमहानिद्रेण । अजातिवाचिनेति किम् ? भोज्य ओदनः, विशेषणसमासोऽपि निषिद्धः ।

७२. यदृच्छादयश्च ।

निपात्यन्ते । या इच्छा यदृच्छा, उच्चावचम्, परमकृत्वा, उत्तमकृत्वा, प्रोष्य-पापीयान् । एहीडादयोऽन्यपदार्थे । इह एहीति यत्रोच्यते तदेहीहं (एहीडं) कर्म्म । अव्ययं कृत्वा । प्रातर्दोहः, प्रातराशः, अवश्यकर्त्तव्यम् । जहि जोहादयोऽभीक्ष्णं तद्वाक्य-वादिनि । जहि जोड़मित्यभीक्ष्णमाह जहिजोड़ः, जहि स्तम्बः । *आख्यातमाख्यातेन क्रियासातत्ये । अश्नीत पिबतेति यत्रोच्यते सा क्रिया अश्नीतपिबता पचतभृज्जता, खादतमोदता इत्यादिः ।

७४. द्विगुः संख्या तद्धितार्थसमाहारयोः ।

तद्धितार्थविषये समाहारे चाभिधेये एकार्थेन सुपा सह संख्या समस्यते । समासश्च द्विगुसंज्ञो भवति । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः सूपः, द्विगोरजादेर्लुगनपत्ये इत्यणो लुक्, पञ्चानां पूलानां समाहारः पञ्चपूली, पञ्चगवम् ।

---

७०. साधारणसूत्रेण सिद्धे समासे पूर्वनिपातार्थं सूत्रमिदम् ।

७४. समानविभक्तिमत्पदप्रकृतिकत्वे सत्यभेदबोधकसंख्यापूर्वपदत्वं द्विगुत्वम् :—

७५. **अनेकमन्यपदार्थे बहुव्रीहिः ।**

अनेकं सुबन्तमन्यपदार्थे समस्यते । समासश्च बहुव्रीहिसंज्ञो भवति । द्वितीयाद्यन्यपदार्थेऽभिधानम् । आरूढ़ा वानरो यं वृक्षं स आरूढ़वानरो वृक्षः, ऊढ़ो रथो येनाश्वेन स ऊढरथोऽश्वः, दत्तबलिर्दानवः, च्युतफलस्तरुः सुसूक्ष्मजटकेशो व्रती, बहुमत्स्यो देशः । प्रथमार्थे तु न भवति, वृष्टे देवे गतो यः । समस्तस्यासमस्तेन नित्यापेक्षेण संहति । कमलेः समकेशन्ते, राज्ञा दत्तधनो द्विजः । *अव्ययमस्ति नास्ति च समस्यते । अस्तिक्षीरा ब्राह्मणी, लेखको नास्तिदोषकः । क्वचिदुक्तार्थत्वान्मध्यमपदलोपश्च । कण्ठेस्थितः कालोऽस्येति कण्ठेकालः, उरसिलोमा, उष्ट्रमुखः, काकजङ्घः, केशसंघातश्चूडा अस्येति केशचूडः सुवर्णविकारोऽलङ्कारोऽस्येति सुवर्णालङ्कारः । कचिद्वा अपुत्रोऽविद्यमानपुत्रो वा, प्रपर्णः, प्रपतितपर्णः । क्वचित् समासो न भवति । पञ्चभिर्भुक्तमस्येति । प्रपञ्चोऽयं बहुलानुवृत्तेः ।

७६. **अव्ययासान्नादूराधिकसंख्याः संख्यया संख्येये ।**

संख्येयवाचिन्या संख्यया सह अव्ययादयः समस्यन्ते । अतः प्रथमार्थे अभिधानम् । दशानां समीपे वर्त्तन्ते ये ते उपदशाः, आसन्नविंशाः, अदूरदशाः द्वौ वा त्रयौ वा इमे द्वित्राः, त्रिचतुराः, पञ्चषाः ।

संख्या शब्दयुक्तं नाम तदलक्ष्यार्थबोधकम् । अभेदेनैव यत्स्वार्थे स द्विगुस्त्रिविधो मतः ॥१॥ तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मतः । तद्धितार्थे लाक्षणिकस्वान्त्यनामात्वहसर्व्वगः ॥२॥ स्वान्तनिविष्टशब्दाभ्यां शब्दान्तरसमासगः । यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः ॥३॥ स्वार्थान्वितसमाहारलक्षकस्वान्त्यशब्दकः । उक्ताभ्यामितरः किंवा समाहारद्विगुर्विदुः ॥

७५. नञ् तत्पुरुषः भिन्नत्वे सति उत्तरपदलाक्षणिकत्वं बहुव्रीहित्वम् । बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः । निरुढया लक्षणया स्वांशज्ञापकशब्दवान् । अस्यैकं प्रथमान्तं सत् सुबन्तैरितरैः सह । यदा भेदसुबन्तेन साकाक्षं नाम विग्रहः । तद्विभागो यथा—तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिभिः । निग्रहस्य विशेष्योस्तद्विशेष्यकबोधकृत् ।

अत्र प्राचां मतम्—यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने ।
अनुकूलो बहुव्रीहिः स तयोरथरादिमः ॥

स्पष्टार्थमन्यविधम्—स्वान्तनिविष्टद्वित्र्यादि नामभिर्विग्रहात् पुनः ।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः ॥

७७. **दिग्दिशा दिश्यन्तरस्याम् ।**

संख्यायां दिशि वाच्यायां दिग्वाचि सुबन्तं दिग्वाचिना सुबन्तेन सह समस्यते । पूर्वस्याश्च दक्षिणस्याश्च दिशोर्या मध्या दिक् सा पूर्व्वदक्षिणा दक्षिणपश्चिमा ।

७८. **तेषु तैश्च युद्धमिति सरूपे ।**

सप्तम्यन्ते तृतीयान्ते च समानरूपे द्वे पदे समस्येते । इतिशब्दो लौकिक-विवक्षार्थः केशेषु च केशेषु च गृहीत्वा युद्धमिदं वृत्तं केशाकेशि, दण्डैश्च दण्डैश्च प्रहृत्य युद्धमिदं वृत्तं दण्डादण्डि । युद्धमुपलक्षणम्, तेन जल्पाजल्पि प्रवादिनाम्, कर्णाकर्णि भूतम् ।

७९. **सह तेन वर्त्तने ।**

सह शब्दस्तृतीयान्तेन समस्यते । वर्त्तनञ्चेत् । पुत्रेण सह वर्त्तते सपुत्रः, सविद्यः, सदर्पः ।

८०. **चार्थे द्वन्द्वः ।**

अनेकमित्येव, चार्थाः बहवः, तत्रसमाहारेतरेतरयोगयोः सामर्थ्यादनेकं सुबन्तं समस्यते । समासश्च द्वन्द्वसंज्ञो भवति । संहतिप्राधान्यो हि समाहारः । तत्र वाक् च त्वक् च वाकत्वचम्, पीठच्छत्रोपाहनम् । संहन्यमानप्राधान्यो हि इतरेतरयोगः, कृष्णार्जुनौ, धवखदिरपलाशाः । (समुच्चयान्वाचययोरसामर्थ्यान्नास्ति समासः) समुच्ये एकात्रानेकप्रचये—गामश्वं पुरुषं पशुमहरहर्नयमानो वैवस्वतस्तृप्तिं नोपयाति, यस्मिन् काले गां नयति तस्मिन् कालेऽश्वं न नयतीति भिन्नकालत्वादसामर्थ्यम् । अन्वाचये मुख्यसिद्धावप्रधाननिष्पत्तौ—भो बटो भिक्षाभट यदि पश्यसि गाञ्चानयेति ।

८१. **प्रथमा पूर्व्वं समासे ।**

समाससूत्रे प्रथमानिर्दिष्टं यत् पदं तत् पूर्व्वं निपतति । अधिस्त्रि, राजपुरुषः ।

८२. **राजदन्तादिषु परम् ।**

एषु प्रथमान्तं पदं परं निपतति । दन्तानां राजा राजदन्तः, अन्तर्व्वणम्, अग्रेवनम्, आदौ वासितं ततो लिप्तं लिप्तवासितम्, नग्नमुषितम्, सपत्नीमाता । द्वन्द्वे, (पुष्यापुनर्वसू) पुत्रपशू, स्वातीचित्रे, भार्यापती । *जायाया जम्भावोदम्भावश्च ।

---

८०. पदजन्यप्रतिपत्ति विषयभेदबोधकत्वे सति समानविभक्तिकपदत्वं द्वन्द्वत्वम् । यदर्थकयन्नामव्यूहो यदयत् प्रकारके । बोधे समर्थः स द्वन्द्व समासतदर्थकः, द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ । एकान्यवचनाकांक्षाहीनौ पादानतश्च तौ ।

जम्पती, दम्पती, जायापती च । *धर्मार्थादिषूभयम् । धर्मार्थौ, अर्थधर्मौ; शब्दार्थौ, अर्थशब्दौ; कामार्थौ, अर्थकामौ; चन्द्रार्थौ अर्थचन्द्रौ; अन्तादी, आद्यन्तौ; सर्पिमधुनी, मधुसर्पिणी; गुणवृद्धी, वृद्धिगुणौ; इन्द्राग्नी, अग्नीन्द्रौ ।

८३ः द्वन्द्वे घ्यन्तमजाद्यदन्तमल्पाच्-लघ्वक्षरमभ्यर्हितं यथोत्तरम् ।

द्वन्द्वे घ्यन्तादि यथोत्तरं पूर्व्वं निपतति । हरिहरौ, सिन्धुशैलौ । बहुष्वेकत्र नियमः । पटुशुल्कमृदवः अजाद्यन्तम् "ईशकृष्णौ" इन्द्रवायू । अल्पाच्—धवाश्वकर्णौ - लघ्वक्षरम्-कुशकाशम् । अभ्यर्हितम्—युधिष्ठिरार्जुनौ, मातापितरौ ।

८४. ऋतु-नक्षत्र-वर्ण-संख्याः क्रमेण ।

ऋत्वादयः क्रमेण पूर्वं निपतन्ति । हेमन्तशिशिरवसन्ताः, भरणीकृत्तिकारोहिण्यः, ब्राह्मणक्षत्रियविट्शूद्राः, पञ्चषट् । संख्याया अल्पीयः । एकादश, द्वादश । प्रायिकं सर्वमेतद्व्यभिचारदर्शनात् । उलूखलमुसले (उदूखलमुषले), चित्ररथबाह्लीकौ, अक्षि-भ्रुवम्, दारगवम्, शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् । शूद्रविट्क्षत्रियविप्राणाम्, काशकुशावलम्बनम्, नरनारायणावित्यादि विपर्य्यदर्शनम् ।

८५. बहुव्रीहौ सप्तमी-निष्ठा-विशेषणान्यदण्डहस्तादिषु ।

बहुव्रीहौ सप्तम्यन्तादि पूर्वं निपतति । कण्ठेकालः, कण्ठेगडुः । कथं गडुकण्ठः ? गडूपलक्षितः कण्ठोऽस्येति विग्रहे । निष्ठा—कृतकटः प्राप्तजीविकः । विशेषणं—चित्रगुः । सर्वनाम संख्या च विशेषणे—सर्वश्वेतः, त्रिगम्भीरः, सप्तरक्तः । अदण्ड-हस्तादिष्विति किम् ? दण्डहस्तः, दण्डपाणिः, गदापाणिः । *जातिकालसुखादिभ्यः क्तः परः । जातेः—सारङ्गजग्धी, पलाण्डुभक्षितः, नृजग्धः । कालात्—मास-जातोऽस्येति मासजातः, वर्षप्रमितः । सुखादेः—सुखजातः, सुखहीनः, कृच्छ्रजातः ।

८६. वाऽऽहिताग्न्यादिषु ।

एषु निष्ठादिकं पूर्व्वं वा स्यात् । आहिताग्निः, अग्न्याहितः, उद्यतासि, अस्युद्यतः; जातपुत्रः, पुत्रजातः; जातश्मश्रुः, श्मश्रुजातः; पीतघृतः, घृतपीतः; ऊढ़भार्य्यः, भार्य्योढः, गुडप्रियः, प्रियगुडः । (क्वचिन्न—विवृतासिः)

८७. कडारादीनि कर्म्मधारये ।

कडारादीनि शब्दरूपाणि कर्म्मधारये पूर्व्वं वा निपतन्ति । कडारजैमिनिः । जैमिनिकडारः, गडुलकाणः, काणगडुलः, खञ्जकुब्जः, कुब्जखञ्जः, खलतिखोड़, खोड़खलति; गौरवृन्दः, वृन्दगौरः, श्वेतकृष्णः, कृष्णश्वेतः इत्यादि ।

---

८३. घ्यन्तादजाद्यन्तं प्रतिषेधेन इन्द्राग्नी ।

८८. **सरूपाणामेकशेषो द्वन्द्वे ।**

द्वन्द्वे तुल्यरूपाणमेकोऽवशिष्यते । घटश्च घटश्च घटौ, घटाः । सरूपग्रहणाद् भिन्नार्थानाञ्च । माषाः व्रीहिमानमूर्खाः । पादा रश्म्यङ्घ्रितुर्य्यांशाः । एकार्थानां भिन्नरूपाणां क्वचिदेकशेषो वक्तव्यः । घटश्च कुम्भश्च घटौ । द्वन्द्व इति किम् ? केशाकेशि ।

८९. **वृद्धो यूना तल्लक्षणे स्त्रीपुंवच्च ।**

यूना सहोक्तौ वृद्धः शिष्यते । स्त्री च वृद्धा पुंवद् भवति वृद्धयुवतद्धितप्रत्यये परे तल्लक्षभवञ्चेत् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ, गार्गी च गार्ग्यायणश्च गार्ग्यौ । नेह गार्ग्यवात्स्यायनौ ।

९०. **पुमान् स्त्रिया ।**

स्त्रिया सहोक्तौ पुमान् शिष्यते । तल्लक्षणञ्चेत्, देवश्च देवी च देवौ । एवं ब्राह्मणौ, कुक्कटौ, गौः, स्त्री, गौर्नागावौ, शिवश्च शिवा च शिवौ ।

९१. **स्वस्रा भ्राता, पुत्रो दुहिता ।**

स्वसृ-दुहितृभ्यां सहोक्तौ भ्रातृपुत्रौ शिष्येते । भ्राता च स्वसा च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ ।

९२. **तवादिः सर्वैस्तत्र च परम् ।**

सर्वैस्तदादिभिरन्यैश्च सहोक्तौ तदादिः शिष्यते तत्र तदादौ च परम् । स च विप्रश्च तौ । यश्च कश्च कौ, स च त्वञ्च युवाम्, स च त्वञ्च अहञ्च वयम् ।

९३. **अनेकशफग्राम्यपशूनां सङ्घेऽतरुणे स्त्री ।**

अतरुणामनेकशफग्राम्यपशूनां संङ्घे सहोक्तौ स्त्री शिष्यते । गावः इमाः, अजा इमाः । अनेक शफ इति किम् ? अश्वा इमे, गर्दभा इमे । अतरुण इति किम् ? वत्सा इमे, बर्क्करा (?) इमे । ग्राम्येति किम् ? कुरङ्गा इमे ।

९४. **अक्लीबेन सरूपेण क्लीबमस्यैकवचनवच्च वा ।**

समानरूपेणाक्लीबेन सहोक्तौ क्लीबं शिष्यते। अस्यैकवचनवच्च वा स्यात् । शुक्लः पटः, शुक्ला शाटी, शुक्लंवस्त्रं, तानि इमानि शुक्लानि, तदेदं शुक्लं वा ।

९५. **मातृश्वश्रूभ्यां वा पितृश्वशुरौ ।**

मातृश्वश्रूभ्यां सहोक्तौ पितृश्वशुरौ शिष्येते। मातापितरौ, पितरौ वा, श्वश्रूश्वशुरौ श्वशुरौ वा ।

९६. परं लिङ्गं द्वन्द्वतत्पुरुषकर्मधारये ।

द्वन्द्वादिषु परं लिङ्गं स्यात् । कुक्कुटमयूर्यौ, मयूरी-कुक्कुटौ । तत्पुरुषे—अर्धपिप्पली, राजकुलम् । कर्मधारये—मुखचन्द्रः, करपद्मम् ।

९७. पूर्व्वमश्ववडवयोः ।

असमाहारे अश्ववडवयोः पूर्वं लिङ्गं स्यात् । अश्ववडवौ ।

९८. अन्यवत् प्राप्तापन्नालम्प्रादिपूर्वे तत्पुरुषे

प्राप्तादिपूर्वे तत्पुरुषे वाच्यलिङ्गं स्यात् । प्राप्तजीविकः, आपन्नसुखः, अलंकुमारिः, निष्कौशाम्बिः, प्रतिगतोऽक्षम्, प्रत्यक्षः पटः ।

९९. पथः संख्याव्ययात् क्लीबे ।

कृतसमासान्तः पथः संख्याव्ययात् परः क्लीबे स्यात् । तत्र संख्यापूर्व्वको द्विगुः । त्रिपथम्, अपथम्, विपथम्, कापथम् । कथं दुरध्वो विपथः, कदध्वा कापथः ? व्यवस्थितविभाषानुवृत्तेः । नान्यपदार्थे, अपथो देशः ।

१००. संज्ञायां षष्ठ्याः कन्थोशीनरेषु ।

उशीनराभिधाने षष्ठ्यन्तात् परा कन्था क्लीबे स्यात् । सौशमिकन्थम् । संज्ञायामिति किम् ? वीरणकन्थाः । उशीनरेष्विति किम् । दाक्षिकन्था नाम पर्वतः ।

१०१. उपज्ञोपक्रमौ तदादित्वकथने ।

षष्ठीतत्पुरुषेऽमू क्लीबे स्याताम् । तयोरादित्वकथनेऽच्चेत् । पाणिनोपज्ञमकालकं व्याकरणम्, चन्द्रोपज्ञमसंज्ञकम्, नन्दोपक्रमाणि नामानि ।

१०२. सभेश्वरामनुष्यार्थादराज्ञः ।

ईश्वरार्थादमनुष्यार्थाच्च षष्ठ्यन्तात् परा सभा क्लीबे स्यात् । ईश्वरसभम्, इनसभम्, राक्षससभम्, पिशाचसभम् । अराज्ञ इति किम् ? राजसभा । कथं नृपति-सभामगमदिति ? नृपत्युपलक्षिता सभा नृपतिसभा इति शाकपार्थिवादित्वात् । अमनु-ष्यार्थादिति किम् । नरसभा । अमनुष्याः रक्षः पिशाचादयः, तेन देवसभेति ।

१०३, अशाला च ।

अशालार्था च सभा क्लीबे स्यात् । स्त्रीसभम्, गोपीसभम्, तत्समूह इत्यर्थः । अशालेति किम ? धर्म्मसभा, धर्म्मशालेत्यर्थः ।

१०४ छाया बहुत्वे वान्यत्र ।

षष्ठी समासे बहुत्वे छाया क्लीबे स्यात् । शलभानां छाया शलभच्छायम् । बहुत्वादन्यत्र वा, वृक्षच्छायम्, वृक्षच्छाया वा ।

१०५. सेना-शाला-सुरा-निशाः ।

एताः षष्ठ्यन्तात् परा क्लीबे वा स्युः । शक्रसेनम्, शक्रसेना वा । गोशालम्, गोशाला वा । यवसुरम्, यवसुरा वा । श्वनिशम्, श्वनिशा वा ।

१०६. पुंस्यह्नो रात्रश्चागणात् ।

अह्नः पुंसि स्यात् । पूर्वाह्णः, मध्याह्नः, रात्रोऽगणात्—अहोरात्राविमौ पुण्यौ, पश्चिमरात्रः । गणात् क्लीबे—गणरात्रम् ।

१०७. अहोऽसुदिनपुण्यात् ।

अहः पुंसि स्यात् । द्व्यहः, त्र्यहः, एकाहः, सुदिनपुण्यात् क्लीबे—सुदिनाहम्, पुण्याहम् ।

१०८. अर्द्धर्चादयः क्लीबे च ।

क्लीबे पुंसि च अर्धर्चादयः स्युः । अर्धचमर्द्धर्चः; शतमानं, शतमानः; अष्टापदम् अष्टापदः इत्यादि । असमासे च । यूयम् यूथः, कर्म्म, कर्म्मा, इत्यादयः ।

१०९. अव्ययीभावश्च ।

क्लीबे स्यात् । अधिस्त्रि, *क्रियाविशेषणं कर्म्म च, नपुंसकञ्च । साधु भवानास्ताम् ।

११०. क्लीबमेकं समाहारे ।

समाहारे द्विगुः द्वन्द्वश्च क्लीबमेकवचनं स्यात् । द्विपात्रम्, अश्ववडवम् काष्ठदृशदम्, द्विनदम्, पञ्चगोदावरम् । कथं विदिभिदिच्छिदेरिति पुंसस्त्वं ? सूत्रे लिङ्गवचनमतन्त्रमिति ।

१११. द्वन्द्वोऽनुवादे चरणानां स्थेणोलुङि ।

चरणानामनुवादविषये स्थेणोर्लुङ्प्रयोगे द्वन्द्वः क्लीबमेकवचनं स्यात् । उपगात् कठकालापम्, प्रत्यष्ठात् कठकौथुमम् । चरणः शाखा, तद्वान् विप्रश्च । अनुवाद इति किम् ? उदण्डः कठकालापाः ।

११२. यजुष्क्रतूनामनपुंसकानाम् ।

यजुर्वेदविहितससोमकयागानां अक्लीबानां द्वन्द्वः क्लीबमेकं स्यात् । अर्काश्वमेधम् । अक्लीबानामिति किम् ? राजसूयराजपेयः । अदर्धर्च्चादिः ।

११३. समीपाध्ययनानाम् ।

पाठे सन्निकृष्टानां द्वन्द्वः क्लीबमेकं स्यात् । पदकक्रमकम् क्रमकवार्त्तिकम् । समीपमेति किम् ? याज्ञिकवैयाकरणौ ।

११४. अप्राणिद्रव्यजातीनाम् ।

प्राणिभ्योऽन्येषां द्रव्यादीनां क्लीबमेकं स्यात् । आराशस्त्रि, द्रुमशैलम् । अप्राणीति किम् ? विट्शूद्रौ । द्रव्येति किम् ? रूपरसगन्धस्पर्शाः । जातीनामिति किम् ? विन्ध्यहिमालयौ ।

११५. नदीदेशनगराणां भिन्नलिङ्गानाम् ।

एषां द्वन्द्वः क्लीबमेकं स्यात् । गङ्गाशोणम् कुरुकुरुक्षेत्रम्, मथुरापाटलिपुत्रम् । एषामेवेति किम् ? ग्रामाणां मा भूत, जाम्ववशालूकिन्यौ । भिन्नलिङ्गानामिति किम् ? गङ्गायमुने, मद्रकेकयौ ।

११६. नित्यवैरिणाम् ।

नित्यविरोधिनां द्वन्द्वः क्लीबमेकं स्यात् । काकोलूकम्, अहिनकुलम्, अश्वमहिषम् । नित्येति किम् ? नैमित्तिकविरोधिनां माभूत, देवासुराः, कौरवपाण्डवाः ।

११७. शूद्राणामनिरवासितानाम् ।

शूद्राणां द्वन्द्वः क्लीबमेकं स्यात् । तक्षायस्कारम् । अनिर्वासितानामिति किम् ? चाण्डालमृतपाः ।

११८. गवाश्वादीनाम् ।

एषां द्वन्द्वः क्लीबमेकं स्यात् । गवाश्वम्, अजैडकम्, कुब्जवामनम्, पुत्रपौत्रम्, दर्भशरमित्यादि ।

११९. प्राणितूर्य्याङ्गानाम् ।

प्राण्यङ्गादीनां द्वन्द्वः क्लीबमेकं स्यात् । पाणिपादम्, मार्दङ्गिकपाणविकम् ।

१२०. सेनाङ्गःक्षुद्रजन्तुफलानां बहुत्वे ।

सेनाङ्गदेर्बहुत्वे द्वन्द्वः क्लीबमेकं स्यात् । हस्तिनश्चाश्वाश्च हस्त्यश्वम्, दंशमशकम् । बदरामलकम् । बहुत्व इति किम् । हस्त्यश्वौ, दंशमशकौ, बदरामलके ।

१२१. वृक्षमृग-शकुनि-तृण-धान्यविशेषाणां वा ।

वृक्षादेर्बहुत्वे द्वन्द्वः क्लीबमेकं स्यात् वा । प्लक्षवटम्, प्लक्षवटाः । रुरुपृषतम्, रुरुपृषताः । मृगशब्दः कुरङ्गे पशुमात्रे च वर्त्तते, तेन सिंहाजोरभ्रम्, सिंहाजोरभ्राः ।

हंसकारण्डवाः । कुशकाशम्, कुशकाशाः, तिलमाषम्, तिलमाषाः । न द्वित्वे-प्लक्षवटौ । अथ समाहार एवैकत्वे सिद्धे प्रकरणमिदं नियमार्थम् । चरणादीनां द्वन्द्वः समाहार एव । वृक्षमृगादीनांमुभयत्रैव दधिपयादीनामितरेतरयोग एव ।

१२२. व्यञ्जनानाञ्च ।

अप्राणिद्रव्यजातित्वान्नित्ये प्राप्ते विकल्प आरभ्यते । दधिघृतम्, दधिघृते, शाकसूपम्, शाकसूपौ ।

१२३. विरोधिनामद्रव्याणाम् ।

विरुद्धानामद्रव्यवाचिनां द्वन्द्वः क्लीबमेकं वा स्यात् । सुखदुःखम्, सुखःदुखे; शीतोष्णम्, शीतोष्णे; हिमातपम्, हिमातपौ । अद्रव्याणामिति किम् ? सुखदुःखाविमौ ग्रामौ ।

१२४. नैकं दधिपयादीनाम् ।

एषां द्वन्द्वः एकं न भवति । दधिपयसी, सर्पिमधुनी, मधुसर्पिषी । शुक्लकृष्णौ ऋक्सामे, वाङ्मनसे, शिववैश्रवणावित्यादि ।

१२५. संख्याप्रयोगे च ।

इह द्वन्द्वो नैकं स्यात् । दशमार्दङ्गिकपाणविकाः ।

१२६. वा समीपे ।

समीपे संख्याप्रयोगे द्वन्द्वः एकं वा स्यात् । उपदशं वैणिकवैणविकम्, उपदशाः वैणिकवैणविकाः ।

१२७. अदन्तो द्विगुः स्त्री समाहारेऽपात्रादिभिः ।

अदन्तो द्विगुः स्त्रीलिङ्गं स्यात् । पञ्चपूली, दशशती । अकारान्तप्रकृतेरेवाभिधानान्नेह, पञ्चगवम् । समाहार इति किम् ? तद्धितार्थे—पञ्चकपालः सूपः । अपात्रादिभिरिति किम् ? द्विपात्रम्, त्रिभुवनम्, चतुर्युगम् । *आबन्नन्त क्लीबञ्च नश्च लुक् । पञ्चखटम्, पञ्चखट्वा, पञ्चतक्षम्, पञ्चतक्षी ।

१२८. ह्रस्वोऽनपुंसके प्रातिपदिकान्तस्य ।

क्लीबे प्रातिपदिकान्तस्य ह्रस्वः स्यात् । सोमपं कुलम्, सह, एन, सम, बहुप्रेयसि कुलम् । एच इण् ह्रस्वत्वे । अतिरि, अतिनु, सुद्यु, बहुगु ।

१२९. गोस्त्रियोरन्यार्थेऽश्यादीयसः ।

अन्यपदार्थे गोशब्दस्य स्त्रीप्रत्ययान्तस्य च ह्रस्वः स्यात् । चित्रगुः,

निष्कौशाम्बिः, अतिखट्वः, बहुवामोरुः। अन्यार्थ इति किम्? सुगौः सुकुमारी। अश्र्यादीयस इति किम्? सुश्रीः, सुधीः, सुलक्ष्मीः, सुतन्त्रीः, सुतरीः, सुभ्रूः, बहुप्रेयसी राजा। *ईयसः प्रादितत्पुरुषे न विप्रतिषेध इति वक्तव्यम्। अतिप्रेयसिर्नृपतिः।

१३०· **तद्धितलुकि लुक् स्त्रिया अगोण्यादेः।**

तद्धितलुकि सति स्त्रीप्रत्ययस्य लुक् स्यात्। पञ्चशस्कुलः, तेन क्रीतमित्यर्थे टिकण्, द्विगोरध्यर्धपूर्वाच्च लुक् संज्ञायामिति टिकण्लुक्। अगोण्यादेरिति किम्? पञ्चगोणिः पटः, पञ्चसूचिः।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
चतुर्थस्याध्यायस्य
तृतीयः पादः

अथ चतुर्थस्याध्यायस्य

चतुर्थः पादः

अलुक् प्रकरणम्

१. **अलुग्विशिष्टादुत्तरपदे ।**

अधिकारोऽयम् । उत्तरपदे परतीऽलुग्वक्तव्यः ।

२. **ओजः सहोऽम्भस्तमसस्तृतीयायाः ।**

एभ्यस्तृतीयाया अलुक् स्यात् । ओजसाकृतम्, सहसाकृतम्, तमसाकृतम्, अम्भसा व्याप्तम् । अविशिष्टादित्येव, महौजःकृतम्, नैशतमोवृतम् ।

३. **मनसः संज्ञायामाज्ञायिनि च ।**

नाम्नि मनसस्तृतीयाया अलुक् स्यात् । मनसादेवी । आज्ञायिनि च, मनसाज्ञायिनो योगिनः ।

४. **आत्मनः पूरणे ।**

तृतीयाया अलुक् स्यात् । आत्मनापञ्चमः ।

५. **पुंसोऽनुजे, जनुषोऽन्धे ।**

अलुक् स्यात् । पुंसानुजः, जनुषान्धः ।

---

१. अलुक्शब्दस्य चैकत्वे नालुक् द्वित्वबहुत्वयोः । समासे सर्वान्तरमुत्तरपदमिति, वक्ष्यतिः तस्मिन् परे ऐकार्थ्ये चेत्यनेन प्राप्तः सुपो लुङ्निपात्यते । अविशिष्टादिति विशेषणं पूर्वपदं विशेष्यमपेक्षते, तत्पुनर्वक्ष्यमाणमोजःप्रभृति । तस्मान्नेह विवृतमिति ।

२. तृतीयैकवचनस्यैवालुगिति केनचिदुच्यते, द्विवचनबहुवचनयोरित्यन्यैश्च । तमसःस्थाने तमस इति चान्द्राः । अन्ये तु येन (परि० ५) इति नियमात् महौजसाकृतमित्येवमिच्छन्ति ।

३. मनसादेवीति करणत्वेऽपि कर्म्मसत्त्वात् कर्म्मणोऽणित्यण् । कृता (४।३।४१) इति समासः । मनसा ज्ञातुं शीलमेषां ते ।

४. आत्मना पद्यत इत्यचि आत्मने पदं शब्द इति वा । एवमात्मनेभाषः ।

६. **वैयाकरणाख्यायामात्मनेपराभ्यां चतुर्थ्याः ।**

आभ्यां चतुर्थ्या अलुक् स्यात् वैयाकरणी आख्या चेत् । आत्मनेपदम्, परस्मैपदम्, परस्मैभाषा ।

७. **पञ्चम्यां स्तोकादिभ्यः क्ते ।**

स्तोकार्थेऽन्तिकार्थे दूरार्थे कृच्छ्रेभ्यः क्तान्ते परे पञ्चम्या अलुक् स्यात् । स्तोकान्मुक्तः, अल्पान्मुक्तः, कृच्छ्रान्मुक्तः ।

८. **सप्तम्या हलदन्तेभ्यो नाम्नि ।**

हलन्तादन्ताच्च संज्ञायां सप्तम्या अलुक् स्यात् । त्वचिसारः, वनेकिंशुलूकाः ।

९. **मध्यान्ताद् गुरौ ।**

सप्तम्या अलुक् स्यात् । मध्येगुरुः, अन्तेगुरुः ।

१०. **अपो योनिम(तु)तोयेषु ।**

एष्वपः सप्तम्या अलुक् स्यात् । अप्सुयोनिरग्निः, अप्सुमतिः, दिगादेर्यः—अप्सु भवो अप्सव्यः ।

११. **स्वाङ्गादमूर्धमस्तकादकामे बन्धे वा ।**

स्वाङ्गात् हलदन्तात् सप्तम्या अलुक् स्यात् । कण्ठेकालः, उरसिलोमा । हस्तबन्धो हस्तेबन्धो वा । अमूर्द्धमस्तकादिति किम् ? मूर्द्धशिखः, मस्तकशिखः । अकाम इति किम् ? सुखकामः । हलदन्तेभ्य इत्येव—अंगुलिमुद्रः ।

---

६. अत्र तादर्थ्ये चतुर्थी । अप्रकृतिभावोऽप्यस्मादेव वचनात् समासः ।

७. स्तोकान्मुक्त इत्यत्र स्तोकोऽल्पेति करणे पञ्चमी इति समासः ।

९. यदा तु मध्यपदलोपी समासस्तदा मध्यगुरुरिति भवति ।

१०. शौण्डादेराकृतिगणत्वात्तत्पुरुषः, बहुव्रीहौ तु अब्योनि । अम्मतिः । तथा च यन्मतियोनिष्वप इति श्रीपति सूत्रम् । स्वमते त्वप्सूयोनिरस्येति वाक्यम् । अपसव्य इति बहुलं प्रातिपदिकात् तद्धिता इति विधानात् प्रातिपदिकात्तद्धितो विधीयते, अर्थविशेषस्तु प्रत्ययेन द्योत्यते तत्कथं सप्तम्यन्ताद् यत् प्रत्ययः ? उत्तरपदे विधीयमानत्वात् कथं वाऽलुक् स्यात् ? सत्यम्,तस्मादेवालुक् विधानादेतत् वचनं सम्पद्यते । बन्धे वेति पृथग्योगात् स्वाङ्गादस्वाङ्गादपि स्यात्, चन्द्रबन्ध इति ।

१२. तर-तम-काल-तनेषु कालनाम्नः ।

वेत्येव, तरादौ कालनाम्नः सप्तम्या अलुक् स्यात् । विधिबलात् सप्तम्यन्तात्तरतमौ । पूर्वाह्णेतरां गायति, एकारान्तादाम्, पूर्वाह्णतरे वा, पूर्वाह्णेतमाम्—पूर्वाह्णतमे वा । पूर्वाह्णेकालकृतम्, पूर्वाह्णकालकृतम् पूर्वाह्णेतनम्, पूर्वाह्णतनं वा । पूर्वाह्णापराह्णाद्वेति तनट् । हलदन्तेभ्यः इत्येव, रात्रितमायां जागर्त्ति ।

१३. तत्पुरुषे कृति बहुलम् ।

तत्पुरुषे कृदन्ते परतो बहुलं ससप्तम्या अलुक् स्यात् । दिविषत्, वनेचरः, स्तम्बेरमः, हृदिस्थः, हृदिस्पृक् । *प्रावृट्-शरत्-काल दिवां जे । प्रावृषिजः, शरदिजः, कालेजः, दिविजः । *वर्ष-क्षर-शर-वर-मनसो वा । वर्षेजः; वर्षजः, क्षरेजः, क्षरजः; शरेजः, शरजः; वरेज, वरजः; मनसिजो, मनोज । *सरसो रुहे च । सरसिजम्, सरोजम् । सरसिरुहम्, सरोरुहम् । *शय-वास-वासिष्वकालात् । खेशयः खशयो वा, वनेवासः वनवासो वा । ग्रामेवासी, ग्रामवासी वा । अकालादिति किम् ? पूर्वाह्णशयः बाहुल्यात् क्वचिन्नैव, स्थण्डिलशायी, विषमस्थः, साङ्काश्यसिद्धः ।

१४. षष्ठ्याः संज्ञा-भर्त्सनयोः ।

संज्ञायायामाक्षेपे च षष्ठ्या अलुक् स्यात् । शुनः शेफोनाम मुनिः दिवोदासः । आक्षेपे चौरस्य कुलम् । वृषल्याः पति, देवानांप्रियः । पुत्रे वा दास्या पुत्रो दासीपुत्रो वा ।

१५. वाग्दिक्पश्यद्भ्यो युक्ति-दण्ड-हरेषु ।

युक्त्यादौ वागादेः षष्ठ्या अलुक् स्यात् । वाचोयुक्तिः दिशोदण्डः पश्यतोहरः ।

---

१३. गवियुधिभ्यां स्थिरः । गविष्ठिरः युधिष्ठरः । कारनाम्नि च प्राचां हलादौ । वणिक्पशुपालकर्षकेभ्यो राजग्राह्यभाग करः, स एव कारः । प्राचां देशे यत् कारनाम तत्र हलादावुत्तरपदे हलदन्तात् सप्तम्या अलुक् । मुकुटे कार्षापणम् । दृषदिमाषकः कारनाम्नि किम् ? अभ्याहितपशुः । प्राचां किम् ? यूथपशुः । हलादौ किम् ? अविकटो रणः हलदन्तात् किम् ? नद्यांदोहो नदीदोहः । मनसिशय इति नित्यम् ।

१४. हलदन्तेभ्यः इत्येव, भूमिशयः' खट्वाशयः । बाहुल्याद् बहुव्रीहावपि । वास्तोष्पतिदिवस्पत्यपांस्पत्यादयो बाहुल्यात् । दास्यतेऽस्मै दासो दानपात्रम् । दिवोदासो नृपभेदः ।

१६. अदसष्टायनकुलिकादिषु ।

एष्वदसः षष्ठ्या अलुक् स्यात् । अपत्ये आमुष्यायणः । कुलिकेति भविष्यद्-रूपग्रहणम् । भावे—आमुष्यकुलिका, आमुष्यपुत्रिका, आमुष्यपुत्रता ।

१७. ऋतो विद्यायोनिसम्बन्धे वा च स्वसृपत्योः ।

ऋदन्तात् षष्ठ्या अलुक् स्यात् विद्यायोनिसम्बन्धे । होतुरन्तरवासी, होतु पुत्रः । वा च स्वसृपत्योः, मातुः स्वसा दुहितः पतिः, मातृष्वसा, दुहितृपतिः । उक्तोऽलुक् ।

१८. ऋदन्तपुत्रयोरादृतो द्वन्द्वे ।

द्वन्द्वे ऋदन्तपुत्रयोः परयोः ऋदन्तस्य ऋतः स्थाने आद् भवति विद्यायोनि-सम्बन्धे—होतापोतारौ, मातापितरौ, पितापुत्रौ ।

---

१६. ननु नडादिगणेऽमुष्येति षष्ठ्यन्तपाठसामर्थ्यात् द्वन्द्वामुष्येति सूत्रेऽमुष्यकुलादि-पाठाच्चालुग्भविष्यति किमनेन लक्षणेन ? सत्यम् स्पष्टार्थमेतत् । ननु द्वन्द्वा-मुष्यत्यत्रामुष्यकुलादिपाठादामुष्यकुलिकेति भवत्येव, कथमिह कुलिकेत्युक्तमित्याह कुलिकेत्यादि भिविष्यदिति, अनेन सहेति शेषः । भाविनि (परि० ३३) इति न्यायात् ।

१७. "ऋतः पूर्वोत्तरपदविद्यायोनिसम्बन्धवाचित्वे" इति क्रमदीश्वरसूत्रम् । "ऋतो विद्यायोनिनिमित्तेषु" इति श्रीपतिसूत्रम् । तस्य दर्शनादिहापि, विद्यायोनि-सम्बन्धोभयपदेष्वभिधानं शरणीकरणीयम् तेन पूर्वपरविद्यायोनिसम्बन्धासत्त्वे दातृपुत्रः । उभयपदविद्यायोनिसम्बन्धासत्त्वे पितृऋणम् । किञ्च होतुः पुत्र इत्युदाहरता एकस्मिन्नोभयसम्बन्धेऽप्यलुग्भवतीति स्वस्थितम् । तेनात्र क्रमेणास्तीति सूचितम् । कथं तर्हि भ्रातृपुत्र इति । भ्रातुरेकत्वे न स्यादेव । कथं पितामहः पितृपिता इत्यमरकोषे प्रयुक्तमिति चेच्चिन्त्यम् । ऋत इति किम् ? मातुलपुत्रः । स्वसृपत्योः । ऋत इति किम ? आचार्यस्वसा । उभयत्र विद्यायोनि-सम्बन्धाभावादिह लुक् स्यात् । दातृस्वसा, अध्येतृपतिः पतिरिह प्रधानम् ।

१८. इहापि पूर्वोत्तरपदयोनिसम्बन्धित्वमाश्रयणीयम् । एकत्रोभयसम्बन्धित्वं तु नेष्यते । होतापोताराविति, होत्रादय ऋत्विग्विशेषाः; ते पुनर्विद्यासम्बधाः कात्यायनसूत्रे दर्शिताः । यद् यथा ब्रह्मोद्गातृहोत्रध्वर्युब्राह्मणा इत्यादयः । ननु सर्वान्तमुत्तरपदमिति वक्ष्यति तर्हि कथं होतापोतानेष्ठोद्गातारः ? सत्यम्, होता च पोता च होतापोतारौ, नेष्ठा च उद्गाता च नेष्टोदगातारौ, पुनर्द्वन्द्वे भवति । उत्तरपद इति किम् ? होतृनेष्टोद्गातार इति । अत्र न पूर्वपदस्य,

१९. **इन्द्रादेरतो दैवते ।**

देवताद्वन्द्वे इन्द्रादेरत आद्भवति । इन्द्राबृहस्पती, मित्रावरुणौ, सूर्य्याचन्द्रमसौ । लोके वेदे च सहचरितयोरेवाभिभावान्नेह शिववैश्रवणौ ।

२०. **इत ईदाग्नेः सोमवरुणयोरवृद्धौ ।**

अनयोरग्नेरित ईत् स्यात् । अग्निषोमौ, अग्नीवरुणौ । अवृद्धाविति किम् ? अग्निषोमम्, आग्निवारुणं कर्म्म ।

२१. **वृद्धावाद्विष्णौ ।**

वृद्धिमति विष्णौ परे, अग्निरित आद्भवति । आग्नावैष्णवम् । *इन्द्रे च । आग्नेन्द्रश्चरुः ।

२२. **दिवो द्यावा ।**

दैवते द्वन्द्वे दियो द्यावा स्यात् । द्यावापृथिव्यौ, द्वावाभूमी, द्यावाधरण्यौ ।

२३. **दिवस् च पृथिव्याम् ।**

पृथिव्यां देवो दिवस दिवस् द्यावा च स्यात् । दिवस्पृथिव्यौ, द्यावापृथिव्यौ, स चेति निर्देशान्न विसर्गः ।

२४. **उषासोषसः**

दैववे द्वन्द्वे उषस उषासा स्यात् । उषासानक्तम्, उषासासूर्यम् ।

२५. **मातरपितरौ कुशीलवौ च ।**

द्वौ निपात्येते । चकारात्, मातापितरौ, कुशलवौ च ।

मध्यस्यैवात्व मितिवर्द्धमानः । अन्ये तु त्रिपदद्वन्द्वे पूर्वोत्तरपदयोर्व्यवधानात्त्वाभावः, मध्यपदेऽपि नात्त्वम्, पूर्वपदत्त्वाभावादित्याहुः । पित्तापुत्राविति पुत्रार्थग्रहणात् पुत्रौ च दुहितानुजावित्येके अन्यत्र अध्येतृवेदित्रोरिति न्यासः ।

१९. ननु देवतानामवायूनां वेदे सहश्रुतानां इति वर्द्धमानसूत्रे सहश्रुतानामिति निर्देशादेवताद्वन्द्वमात्रे कथं न स्यादित्याह लोके वेदे इति सहचरितयोरिति दानसहोक्तयोरित्यर्थः । तेन इन्द्रासोमावित्यादौ भवति । इह न स्यात् ब्रह्माप्रजापती, चन्द्रसूर्यौ । अत इति किम् ? वायग्नी, रविचन्द्रौ । दैवत इति किम् ? नृपबाणौ ।

२६. **स्त्री पुंवद्भाषितपुंसकानूङ्तुल्यार्थे स्त्रियामपूरणीप्रियादिषु ।**

तुल्याधिकरणे वर्त्तमानायां स्त्रियां परतो भाषितपुंस्कं ऊङ्वर्ज्जितं स्त्रीलिङ्गं पुंवद् भवति । कर्म्मधारये—शोभनभार्य्या, पटुभार्य्या । बहुव्रीहौ—युवभार्य्यः, पटुभार्य्यः । भाषितपुंस्केति किम् ? खट्वाशय्यः । अनूङिति किम् धीबन्धुभार्यः । तुल्यार्थ इति किम् । कल्याण्या माता कल्याणीमाता । स्त्रियामिति किम् ? मानिनीजनः, कल्याणीप्रधानः । अपूरणी प्रियादिष्विति किम् ? श्रेष्ठापञ्चमी, कल्याणी पञ्चमी-रात्रिर्यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः इह प्रधानपूरण्या एव निषेधोऽत् समासान्तश्च, तेन संज्ञायां गोण्यास्तु कप्, कल्याणपञ्चमीकः पक्षः । प्रियादौ—कल्याणीप्रिया, मनोज्ञादुहिता कल्याणीप्रियः, विदुषीकान्तः, मामिनीदुहितृकः स्त्रिया कान्ता सुभगा दुर्भगा वामना दृढ़ा विदुषी भक्ति क्षमा समा दुहिता चपला इत्यादि ।

---

२६. यद् विशेषणतां प्राप्य स्त्रियां पुंसि च वर्त्तते । भवेन्नपुंसकेवर्त्ति भाषितपुंस्कं तदुच्यते । भाषितः पुमान् येन स भाषितपुंस्कोऽर्थः, शब्दोवान्यपदार्थः । न तावदाद्यः, अर्थकार्याभावात् । नान्त्यः, द्रोणी भार्या इत्यादावपि स्यात् । तस्मात् समानायामाकृतावित्युच्यतामिति चेन्न, समानाश्रयवृत्तिनिमित्तत्वेनार्थ एवा-श्रीयते । शोभनभार्या इत्यादौ शोभनत्वार्थसम्बन्धात् पुंसि स्त्रियाञ्च शोभनशब्दो वर्त्तते इति न तथा, अतस्तदर्थसम्बन्धात् शब्दोऽपि भाषितपुंस्क इत्याह भाषितपुंस्कं स्त्रीलिङ्गमिति । अत एकस्मिन् प्रवृत्तिनिमित्ते । भाषितः पुमान् येनेति क्रमदीश्वरवृत्तिरिति । अनूङिति न विद्यते ऊङ् यस्मादिति विग्रहः । धीबन्धूभार्य्यः धीर्बन्धुर्यस्या इति वाक्ये उङुत इति नृजातिवाचिन उदान्तान्तादनूङ् । स्त्रीति किम् ? ग्रामणि कुलं दृष्टिरस्येति ग्रामणिदृष्टिः, इहापि रूपातिदेशः सम्भवतीति एवं दारदवृन्दारिका, ऐड़विड़वृन्दारिका, पार्थुकवृन्दारिका, अत्र दरदादीनां स्त्र्यपत्ये प्रत्ययस्य लुक् । रूपातिदेशे तु प्रत्ययश्रुतिः । कथं गर्भिभार्य्यः, प्रजातभार्य्यः, प्रसूतभार्य्यः इति । स्त्रीणां गर्भित्वादयो धर्म्मा अन्य एव सत्यमन्तरवर्त्तिकत्वमात्रादित्वं विवक्षितम् । चन्द्रगोमी तु अत्रार्थे प्रसूता प्रजाता गर्भिण्य इति सूत्रमेव प्रणिनाय । क्वचिद-न्यत्राप्येतश्रयमेवोदाहरति । कल्याणीपञ्चमा रात्रय इति, कल्याणीपञ्चमी रात्रिर्यासां रात्रीणामित्यवयवेन विग्रहः ।अवयवश्च समुदायेऽन्तर्भवति । रात्रयो ह्यत्र स्त्रियो मुख्या इति । अत पूरणीप्रमाणीभ्यामित्यत् इह प्रधानपूरण्या इत्यत्राभिधानादिति शेषः अतएव प्रधानपूरणप्रत्ययान्तश्चेति निषेधसूत्रम् । एवं युवति पञ्चमाः स्त्रियः, कल्याणीषष्ठीरात्रयः संज्ञायामिति पूरणप्रत्ययार्थस्या-

२७. **श्लिष्टप्रियादिषु च ।**

पूरणीप्रियाद्यपवादोऽयम् । एषु स्त्री पुंवत् । श्लिष्टप्रियः, वियुक्तकान्तः, दृढ़भक्तिः, प्रियदुहिता, मृगचपला, महापञ्चमी, पुण्यषष्ठीत्यादि ।

२८. **कल्पादितद्धिते च ।**

कल्पादौ तद्धिते च स्त्री पुंवद्भवति । अत्र परिगणनम्—कल्प, देश्य, देशीय, तर, तम, तरट्, जातीय, रूप, पाश, थमु, था, दा, र्हि, थ्य (ति), वृद्धकल्पा, रम्यतरा, पटुचरी, वृद्धपाशा, कया आकृत्या कथम्, तथा आकृत्या तया, तस्या वेलायां तदा, तर्हि, अजथ्या (प्रशस्ता वृकी वृकतिः) । *शसि बह्वल्पार्थस्य । बह्वीभ्यो देहि बहुशो देहिः अल्पशः *त्वतापोर्गुणवचनस्य । पटव्या भावः पटुत्वम्, पटुता, मृदुत्वम् मृदुता । गुणवचनस्येति किम् ? कठीत्वम्, दण्डिनीत्वम् । व्यभिचारित्वमित्यपीष्यते । गुणे च तन्वीत्वमित्यपि । भस्याढे ये तद्धिते । हस्तिनां समूहो हास्तिकम् । अढेय इति किम् ? रौहिणेयः, ऐणेयः ।

२९. **तसादौ च बहोः ।**

अत्र बहोः स्त्री पुंवत् । बह्वीभ्यो बहुतः, बह्वीषु बहुत्र ।

विवक्षितत्वादित्यर्थः । केचित्तु पूरणीप्रत्यया हि स्त्री पूरणीत्युच्यते । न चेह बहुव्रीहिणा स्त्रीवाच्या, अपितु पुमानपक्ष इति गौणत्वमप्याहुः । विदुषीकान्त इति । एवं भवनमुखताकान्त इति नैषधीये । मासीनादुहितृक इति मासो वयः परिमाणमस्या इत्यर्थे मासाद् वयसि येनेणाविति परेण तत् सिध्यतीति नात्रोदाहार्यम् । इह प्रियादेर्भक्तौ पुंवन्निषेधात् कथं दृढभक्तिरिति ज्येष्ठे, दृढभक्तिर्भवान्या इत्यादि ? सत्यम्, अविवक्षितस्त्रीत्वमिति पूर्व्वस्येत्येके । अन्ये तु भक्तिशब्दोऽत्र स्त्रियादिसाहचर्यात् कर्म्मिवचनो कर्म्मसाधनो गृह्यते । तेन भवानीभक्तिरस्येति भवानीभक्तिः । तथा च भक्तौ च कर्म्म साधनायामिति भोजदेवः पठतीत्यन्ये । चपलेत्यादिपदात् स्वाहा सचिवा क्षान्ता बालतनयेति ।

२७. श्लिष्टप्रयोगदृष्ट्यान्यैरयुक्तमत्यनेन सूत्रितमिमिति ।

२८. ननु सर्वनाम्नो वृत्तिमात्रे (४।४।३१) इत्यत्र वृत्तिरैकार्थ्यमित्युक्तम्, तत्तु प्रकृतिप्रत्यययोरपि तिष्ठति । यथा तमिच्छति तत्कामयति, तद्वदिहापि, किममुत्र पाठेनेति ? सत्यं प्राचां मतमनुरुद्ध्वेदमुक्तवान (?) । स्त्रियामित्येव पट्वीकल्पः । तद्धित इति किम् ? पट्वीकल्पा मनोज्ञा दुहिता ।

३०. **क्यङ्मानिनोः ।**

क्यङि मानिनि च परे स्त्री पुंवत् भवति । एनी-एतायते, दर्शनीयां मन्यते दर्शनीयमानी भार्यायाः ।

३१. **सर्वनाम्नो वृत्तिमात्रे तसादौ च ।**

एकार्थे वृत्तिमात्रे सर्वनाम्नः स्त्री पुंवत् स्यात् । सर्व्वासां प्रियः, सर्वप्रियः अन्यतनयः, तस्या मुखं तन्मुखम्, एकक्षीरम्, तद्धिते—एकस्या आगतं एकरूप्यम् । एकत्वम्, भवदीयम् । तसादौ च तस्यास्ततः, तस्यां तत्र, कस्यां क्व । भवतीप्रसादादित्यपीष्यते ।

३२. **कुक्कुटचदीनामण्डादिषु ।**

एषु स्त्री पुंवत् भवति । कुक्कुटचा अण्डं कुक्कुटाण्डम्, मृगपदम्, मृगक्षीरम्, काकशावः ।

३३. **न नाम पूरणीकोपधस्यायापाकादेरकर्मधारयजातीयदेशीये ।**

कर्मधारयादेरन्यत्र संज्ञादीनां भाषितपुंस्का स्त्री पुंवन्न भवति । दत्ताभार्यः, दत्तामानिनी, दत्ताकल्पा पञ्चमीभार्य्याः, द्वितीयाकल्पा । कोपधस्य—मद्रिकाभार्य्यः, पाचिकाभार्यः, पाचिकाकल्पा, पाचिकायते, पाचिकामात्मानं मन्यते पाचिकामानिनी । अपाकादेरेति किम् ? पाकभार्यः, एकभार्यः, शुष्कभार्यः, शुष्कशाखः । कर्मधारयादौ तु पुंवदेव-दत्तवृन्दारिका, पञ्चमवृन्दारिका, पाचकवृन्दारिका, कारकजातीया, दत्तदेशीया ।

---

३३. पूरणप्रत्ययान्ता स्त्री पूरणी, ननुसंज्ञायामेकव्यक्तिनिष्ठत्वाद्भाषितपुंस्कत्वाभावे कथं पुंवत्व प्राप्तिः ? नैवम्, संज्ञाशब्दो हि बहुव्यक्तिनिष्ठालोके शास्त्रे च दृश्यते, यथा—देवदत्तादिर्धात्वादिश्च । यद्येवं समानायामाकृतौ भाषितपुंस्कत्वं नास्ति समानप्रवृत्तिनिमित्ताभावात् ? सत्यम्, दत्तगुप्तादौ योगरूढित्वात् सप्तपर्णादिवत् समानप्रवृत्तिनिमित्तत्वमस्त्येव, यत्र तु तन्नास्ति तत्र स्वरूपमेव प्रवृत्तिनिमित्तमिति वक्ष्यति । स्वरूपमात्रे डित्थत्वमिति । इह कोपधग्रहणेन तद्धितकोपधा पाकाढिकणन्ता गृह्यन्ते । तथैव शिष्टैरिष्टम् । मद्रिकाभार्य्य इति मद्रवृजिकाभ्यां क इति शेषे वक्तव्यम् । मद्रेषु भवा मद्रिका एवं वृजिकाभार्य्य,, लविकाभार्यः, रजकीभार्य्यः, पाचिकाभार्य्यः । ग्रन्थकृतापि सामान्यमुक्तम् पाका-बाला भार्य्या यस्येति विग्रहः एकभार्य्य इति तु प्रायिकमनुरुध्योक्तम् । वस्तुतस्तु सर्वनाम्नो वृत्तिमात्र इत्यनेन सिध्यति । इह भेकभार्य्य इत्युदाहृतं केनाचित्तदतीवदुष्टम् । जातित्वाद् भेकीभार्य्य इत्येव स्यात् एवं जल्पाकभार्य्यः ।

३४. **वृद्धिहेतोस्तद्धितस्यारक्तविकारयोः ।**

वृद्धिनिमित्तस्य तद्धितस्य स्त्री पुंवन्नभवति । औपगवीभार्य्यः । ह्रस्वे—माथुरिकल्पा, माथुरीमानिनी । वृद्धिहेतोरिति किम् ? मध्यमभार्य्यः । अरक्त इति किम् ? काषायबृहतिकः, हारिद्रपताकः अविकार इति किम् ? लौही ईषा अस्य लोहेषो रथः । अकर्मधारयादित्येव—माथुरवृन्दारिका, माथुरजातीया ।

३५. **जातिस्वाङ्गादीदमानिनि ।**

जातेस्वाङ्गाच्च परा स्त्री ईत् पुंवन्न भवति । कुम्भकारीभार्यः । कल्पे ङी-ह्रस्वः, कटिकल्पा, सुकेशीभार्यः, सुकेशिकल्पा । अमानिनीति किम् ? कठमानिनी । ईदिति किम् ? शूद्रा भार्य्या यस्येति शूद्रभार्यः । अकर्मधारयादित्येव—कठन्वृदारिका, सुकेशदेशीया ।

३६. **तर-तम-कल्प-रूप-चेलड़-ब्रुव-मत-हत-गोत्रे ङ्यनेकाचो ह्रस्वः ।**

तरादौ परे अनेकाचो ङ्यन्तस्य ङी ह्रस्वः स्यात् । ब्राह्मणितरा, पट्वितया, पटुतया । गुणादुभयम् । भुजङ्गिकल्पा, गौरिरूपा, वृषलिचेली, ब्राह्मणिब्रुवा, तरुणिमता, गौरिहता, पट्विगोत्रा । भाषितपुंस्का इत्येव—बदरीतरा ।

३७. **उगितः शेषनदी च वा पुवंचोगितः**

उगितो ङी शेषनदी च तरादौ ह्रस्वो वा स्यात् । काऽसौशेषनदी ? एकाच् ङी ऊङन्ता च, कृदन्ता च उगितः पुंवत्त्वं तद्धित एवेष्यते । श्रेयसितरा, श्रेयस्तरा, श्रेयसीतरा । विदुषिकल्पा, विद्वत्कल्पा, विदुषीकल्पा । पचन्तितरा, पचन्तीतरा, पचतरा । एकाच्-ङी—स्त्रितरा, स्त्रीतरा । ऊङ्—धीबन्धूतमा, धीबन्धुतमा । कृत्—लक्ष्मिकल्पा, लक्ष्मीकल्पा । स्त्रियामित्येव, स्त्रीकल्पः । *कृन्नद्या प्रतिषेध इत्येके—लक्ष्मीतरा, लक्ष्मीतमा इत्येव ।

३८. **वले दीर्घोऽणः**

वलप्रत्ययेऽणन्तस्य दीर्घः स्यात् । दन्तावलः, कृषीवलः ।

३९. **नहि-वृति तृषिव्यधि-रुचि-(सहि) तनिषु क्वचयन्तेषु ।**

एषु क्विबन्तेषु पूर्वस्याणो दीर्घः स्यात् । उपानत्, नीवृत्, प्रावृट्, मर्म्माविद्, (ऋतीयट्) परीतत । प्रादेः कृन्निमित्तोपपदस्याभिधानान्नेह—तिग्मरुक् ।

---

३९. क्रियाविशेषणस्य कर्म्मत्वे स्तोकं विध्यतीति स्तोकचित्, उरसि तत विस्तारो यस्य स उरसितत, दन्तेरुग् यस्य स दन्तरुगित्यादौ कथं न दीर्घ इत्याह प्रादेरिति । उक्तञ्च वार्त्तिककृता गतिकारकोपपदाभ्यामन्यपूर्वस्य दीर्घत्वं नेष्टमिति, तत्रगतिपूर्वस्य नित्यसमासत्वात् कारकपूर्वस्यापि नित्यसमासाभ्युपगम इति पुरुषोत्तमादयः ।

४०. **कर्णे लक्षणस्यास्रुवादेः ।**

कर्णे परे लक्षणवाचिनो दीर्घः स्यात् । दात्राकर्णः, स्थूलाकर्णः, द्व्यंगुलाकर्णः । अस्रुवादेरिति किम् ? स्रुवकर्णः स्रुव-स्वस्तिक-छिन्न-भिन्न-छिद्र-विष्ट-अष्ट-पञ्णमणि । लक्षणस्येति किम् ? शोभनकर्णः ।

४१. **इको वहेऽपीलोः ।**

वहे इगन्तस्य दीर्घः स्यात् । ऋषीवहः, कपीवहः । पीलोस्तु न, पीलुवहः ।

४२. **प्रादेर्घणि बहुलम् ।**

घणि प्रादेर्दीर्घः स्यात् । वीमार्गः, अपामार्गः । बाहुल्यात् । *सादकारयोः कृत्रिमे । प्रसादः, प्रकारः । अन्यत्र, प्रसादः, प्रकारः, निषादः, निकारः । क्वचिद् वा— प्रतिवेशः प्रतीवेशः; प्रतिहारः, प्रतीहारः । क्वचिन्न स्यात् । प्रवाहः, प्रहारः । इहापि नियमः । *इकःकाशे । नीकोऽनूकाशः । नेह प्रकाशः ।

४३. **विश्वस्य वसु-राटोः ।**

अनयोर्विश्वस्य दीर्घः स्यात् । विश्वावासुः, विश्वाराट् । राडिति निर्देशान्नेह, विश्वराजौ ।

४४. **नरे च नाम्नि । मित्रे च ऋषौ ।**

दीर्घः स्यात् विश्वानरः, विश्वामित्रः ऋषिः ।

४५. **यथारूढ़ि संज्ञायाम् ।**

नाम्नि दीर्घः स्यात् संस्कृतासंस्कृता वापि प्रायः संज्ञा यथा श्रुता । कोटरावणम्, मिश्रकावणम्, किंशुलुकागिरिः रोहितागिरिः । मतौ च उडुम्बरावती, वारणावती, मशकावती, शरावती, अहीवती, मुनीवती, पद्मावतीत्यादि । यथारूढ़िवचनान्नेह,

---

४०. यत् पशूनां स्वामिना सम्बन्धविज्ञानार्थं दात्राकारादि चिह्नं क्रियते तदिह लक्षणम् ।

४५. संस्कृतासंस्कृता वेति संज्ञा यथाश्रुता मुनिभिः प्रयुक्ता प्रायः प्रयुज्यते इत्यर्थः । असंज्ञायान्तु कोटरवणम्, णत्वञ्च न स्यात् । किंशुलुकानां गिरिरिति षष्ठी-समासः । कोटर मिश्रक मिध्रक पूरग शारिक प्रयोगश्च पञ्चमी । किंशुलुक-शार-नड-नड-अञ्न-लोहित-कुक्कुट-वन-पिंगल-शाल्व-शुलुकानामित्यन्ये । अजिर-खदिर-कारण्डव, चक्रवाक कलहंसाः मलयश्च । अजिरादिः । शर-वंश-धूम-अहि-कपि-मणि-मुनि-शुचि-हनुः । शरादिः

अजिरवती (म) वलयवतीत्यादि । *शुनो दंष्ट्रादौ । श्वादंष्ट्रः श्वायुच्छः, श्वपुच्छोऽपि । अष्टनो वक्रादौ । अष्टावक्रः ऋषिः । अष्टापदं कनकम्, (अष्टाबन्धुः) । *कपाले हविषि । अष्टाकपालं हविः । *गवि तद्युक्ते । अष्टागवं शकटम्, द्विगुरयम् ।

४६. **चितेः कपि**

चितेः कपि दीर्घः स्यात् । एकचितीकः, द्विचितिकः ।

४७. **अन्येषामपि दृश्यते ।**

अन्येषामपि (यथादर्शनं) दीर्घः स्यात् । दण्डादण्डि, बाहूबाहवि, यष्टीयष्टि, श्वापदः (स्वापदः श्वपुच्छोऽपि) श्वाकर्णः, जनाषाट्, तुराषाट्, पूर्वामुखः, उत्तरामुखः, उक्तो दीर्घः ।

४८. **गोत्रे यापः ईः पुत्रपत्योस्तत्पुरुषे ।**

तत्पुरुषे पुत्रपत्योः परतो गोत्रे याप ईः स्यात् । कारीषगन्धीपुत्रः, जातुकर्णीपतिः, जातुकर्णीपुत्रः । तत्पुरुष इति किम् ? कारीषगन्ध्यापतिर्ग्रामः ।

४९. **बन्धौ बहुव्रीहौ वा च मातृकमातृमातेषु ।**

बन्धौ परे बहुव्रीहौ यापः ईः स्यात् कारीषगन्ध्याबन्धुरस्य कारीषगन्धी बन्धुः वा च मातृकादिषु, हे कारीषगन्ध्यामातृक ! हे कालेनीमात ! हे कान्यामा! हे वाराहीमात ! हे वाराह्यामात ।

५०. **इदं किमो रीकीदृक्-दृश्-हक्षेषु ।**

मृगादिषु इदम ईः, किमः की स्यात् । ईदृक्, ईदृशः, ईदृक्षः, कीदृक्, कीदृशः, कीदृक्षः ।

---

४७. दृश्यते इत्यभिधानार्थम् । अत्र पाणिनीयमते शुनोदंष्ट्रादावित्यस्य लक्षणस्याभावादनेनैव प्रयुक्तम् । लक्षणेषु दीर्घः इत्याविष्कुर्वन्नाह श्वदंष्ट्रेति । पशुपुच्छयोरेवेति चान्द्रलक्षणाद् दीर्घाभावोऽपीत्याह श्वपदः श्वपुच्छोऽपीति । एवं श्वपदञ्च । इह पुरुषो नारक इत्यादावप्ययं दीर्घः इति वामनः । अनेकोत्तरपदे विधानादप्राप्तिः ।

४८. पुरुषादयोः दीर्घोपदेशा एव संज्ञाशब्द । इति भागवृत्तिः । अनयोः किम् । कारीषगन्ध्याप्रियः गोत्र इति किम् ? भौज्योपतिः ।

४९. कालस्यैनः कालेनस्तस्यापत्यं स्त्रीकालेन्या, अत्र वचनसामर्थ्यात् मातुर्मातरादेशः, समासान्ताभावश्चेति पुरुषोत्तमः ।

५१. अन्यतदादेष्टेरात् ।

दृग्-दृश्-दृक्षेष्वन्यतदादेष्टेराद् भवति । अन्यादृक्, अन्यादृशः, अन्यादृक्षः । तादृक्, तादृशः, तादृक्षः । अमूदृक्, अनूदृशः, अमूदृक्षः । एतादृक्, एतादृशः, एतादृक्षः, भवादृक्, भवादृशः ।

५२. महतश्चैकाधिकरणजातीययोः ।

अत्र महतष्टेराद् भवति । महापुरुषः । महान् भुजोऽस्येति, महाभुज,, महाजातीयः । एकाधिकरण इति किम् ? महतः पुत्रो, महापुत्रः । न च्यवर्थे । महद्भूतः । *घासकरविशिष्टेषु पुंवच्च । महत्या घासो महाघासः महाकरः, महाविशिष्टः ।

५३. द्व्यष्टनोर्दशादौ वा तु चत्वारिंशदादिष्वा नवतेरबहुव्रीह्यशीत्योः । त्रेस्त्रयश्च ।

दशादौ द्व्यष्टनोष्टेराद् भवति त्रेश्च त्रयम् । द्व्यधिका दश द्वादश, द्वाविंशतिः, द्वात्रिंशत्, अष्टादश, अष्टाविंशतिः अष्टात्रिंशत्, त्रयोदश, त्रयोविंशतिः, त्रयस्त्रिंशत् । वा तु चत्वारिंशदादिषु । द्वाचत्वारिंशत्, अष्टाचत्वारिंशत्, अष्टचत्वारिंशत्, त्रेस्त्रयश्च—त्रिचत्वारिंशत्, त्रयश्चत्वारिंशत् । एवं यावन्नवतेः—द्वानवतिः, द्विनवतिः, अष्टानवतिः, अष्टनवतिः, त्रयोनवतिः, त्रिनवतिः । आनवतेरिति किम् ? द्विशतम्, अष्टसहस्रम्, त्र्ययुतम् । अबहुव्रीह्यशीत्योरिति किम् ? द्विदशाः, त्रिदशाः द्व्यशीतिः, त्र्यशीतिः ।

५४. षोडशैकादशे च ।

षषः षस्य डत्वम्, दस्य डत्वम्, दीर्घत्वञ्च निपात्यते । षोडश, एकादश ।

---

५२. कर्म्मधारय बहुव्रीह्योरेकाधिकरणत्वं सम्भवतीति तथोदाहृतवान् । महाजातीय इति प्रकारे जातीय इति जातीयः । लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यस्य नित्यत्वात् पुंवद्निषेधविषये आत्त्वं न स्यात् । यथा महतीप्रियः । न च्यवर्थे इति । अमहान् महान् भूतः महद्भूतश्चन्द्रः, महद्भूता ब्राह्मणी (४।३।४४) इति समासः । ननु महतो महद्भावाद् गौणोऽयं महच्छब्दस्ततो गौणत्वादेव न भवति किमनेन ? नैवम्, न शब्दाश्रये गौणमुख्यव्यवहारः । किञ्च महद्रूपेण चन्द्रस्य भूतत्वादिहापि मुख्यो महच्छब्द प्रयोगः । यथा मृत्पिण्डो घटीभूत इत्यत्र प्राप्तोत्तरावस्था एव च्यवन्तेनोच्यते । घास । एषु महतष्टेरात् पुंवच्च भवति । व्यधिकरणार्थं वचनमिदम् ।

५५. अन्नञोऽनखादेरचि त्वन् ।

उत्तरपदे परे नञोऽद्भवति । अब्राह्मणः, अचि तुअन् अनुष्णः, अनूरुः । सर्वान्तमुत्तरपदम्, ततो नेह नातिशुक्लम् । अनखादेरिति किम् ? नास्ति खं शून्यमस्मिन्निति नखः न भ्राजते नभ्राट्, न पातीति नपात्, पृषोदरादिः, न वेत्ति नवेदाः वसन्तः । नास्त्यसत्यमस्मिन्निति नासत्यः । संज्ञायामेव नमुचि, नकुल, नपुंसक नक्र (नक्षत्र) नाकाः । *नगो वा द्रुमशैलयोः । पक्षे गः ।

५६. तिङि चाक्षेपे ।

नञस्तथा स्यात् अपचसि जाल्म । अघटते नितराम् अनशान त्वम् ।

५७. एकादनः ।

एकान्नञोऽन्नः स्यात् । एकान्नविंशति एकान्नशतम् अनशान त्वम् ।

५८. सहसस्य सो वा बहुव्रीहौ ।

अत्र सहस्य सो वा स्यात् सपुत्रः, सहपुत्रो वा । बहुव्रीहौ किम् ? सहयुध्वा ।

५९. आशिषि गोवत्सहलेष्वेव ।

अशंसायां गवादिष्वेन सहस्य सो वा स्यात् । स्वस्ति ते सगवे, सहगवे वा । स्वस्ति ते सवत्साय, सहवत्साय वा । स्वस्ति ते सहलाय, सहहलाय वा । नान्यत्र, स्वस्ति ते सहपुत्राय ।

---

५५. सर्वान्तमुत्तरपदमिति समासे यत् सर्वेषामन्तर्भूतं पदं तदुत्तरपदमित्यर्थः । तेन न विद्यतेऽतिशयितः शुक्लो यत्र तन्नातिशुक्लं वस्त्रमित्यत्र सर्वान्तत्वाभावादतेर्नोनादेशः । एवं नैककीर्त्तिरित्यादि । सति साधु सत्यम्, न सत्यम् असत्यम् नासत्यसत्यमस्मिन्नासत्य स्ववैद्य, नासत्यश्चैव दश्रश्च द्वावितौ ब्रह्मणः सुताविति प्रयोगादेकवचनोऽपि । नासत्या बहुवचनविषया एवेति रक्षितः । मुचेः (४।२।८३) इतीक् । नास्ति मुचिर्मोक्षणमस्मादिति वाक्यम् । न विद्यते कुलमस्येति नकुलः । न स्त्री न पुमान्नपुंसकम्, अत एव निपातनात् स्त्रीपुंसयोः नपुंसकादेशः । न क्रामतीति डः, नक्रः । कं सुखम्, अकं दुःखम्, तदत्रनास्तीति नाकः । न गच्छतीति नञो गमेर्डः । नग इति द्रुमेशैले चार्थे । अन्यार्थे त्वगोवृश्चिकः शीतेन । एवं नगः अनगः, नागः । न विद्यते अभागो यस्य नाभागादयोऽप्यन्ये यथादर्शनं ज्ञेयाः ।

५७. एकादूनार्थस्य नञो विंशति विशदाद्युत्तरपदेऽकारोत्तरद्विनकारोत्पत्तौ अन्न आदिश्यते । अभिधानादेतद् त्रिपदेऽपि तृतीया समासः । एकान्नविंशतिरित्यादि । एकान्नादौ संख्यायामिति वर्द्धमानादि सूत्रे उकार मध्योऽप्यादेशो दृश्यते ।

६०. नित्यं संज्ञाग्रन्थान्ताधिकानुमेये ।

एषु नित्यं सहस्य सः स्यात् । संज्ञानाम्—साश्वत्थं स्थानम्, ग्रन्थान्ते—साङ्गान् वेदानधीते, अङ्गान्तानधीत इत्यर्थः । अधिके—सद्रोणा खारी । अनुमेये—साग्निः कपोतः, गृहे कपोतपतनाद् भाव्याग्निरनुमीयते । सपिशाचिका वात्या ।

६१. अव्ययीभावे चाकाले ।

अत्र सहस्य सः स्यात् । सचक्रं निधेहि बाणम् अकाल इति किम् सह मध्याह्नम् ।

६२. समानस्य च दृक्-दृश-दृक्ष ज्योतिर्जनपदरात्रिनाभि-बन्धु-सुह्मचारिपक्षेषु ।

एषु समानस्य च सः स्यात् । सदृक्, सदृशः, सदृक्षः, सज्योतिः, सजनपदः सरात्रिः, सनाभिः, सबन्धुः, समानं ब्रह्मचरतीति सब्रह्मचारी, सपक्षः ।

६३. विभाषा रूपगोत्र-नाम-स्थान-वर्ण-धर्म-वयोजातीयोदरेषु ।

रूपादौ समानस्य सो वा स्यात् । सरूपः, समानरूपो वा । सगोत्रः समानगोत्रो वा, सनामा समाननामा वा, सधर्म्मा समानधर्म्मा वा, सवयाः समानवयाः वा । सजातीयः समानजातीयः । सोदरः, समानोदरः, सोदर्य, समानोदर्य इत्यपि ।

६४. अन्यस्यन्यत् कारकेययोरषष्ठचतृतीयास्थस्य त्वाशीराशास्थास्थितोत्सुकोतिरागेषु ।

कारके ईये च परे सामान्येन अन्यस्यान्यद् भवति । अन्योऽन्यस्य कारकः, अन्यत्-कारकः, अन्यस्मिन् भवोऽन्यस्येदं वा, अन्यदीयम् । आशीरादौ पुनरषष्ठचतृतीयास्थस्य वा अन्यस्यान्यत्, अन्या अन्यास्मिन् वा आशीः, अन्यदाशीः । एवम्; अन्यदाशा, अन्यदा-स्थितिः, अन्यदास्था, अन्यदास्थितः, अन्यदुत्सुकः, अन्दूतिः, अन्यद्रागः । अष्ठचतृतीस्थ-स्येति किम् । अन्यस्याशीः, अन्याशीः । अन्येनास्थितोऽन्यास्थितः ।

६५. अर्थे वा ।

अर्थे तथैवान्यस्यान्यद् वा स्यात् । अन्यदर्थोऽन्यार्थो वा ।

६६. को कत्-तत्-तत्पुरुषेऽच् त्रि-वद-रथेषु ।

अनादौ परे कोः कत् स्यात् । कदन्नम् कदुष्णम्, कत्त्रयः । कृत शास्त्रो न यो जिष्णुर्यश्चाढ्यो यश्चनिस्पृहः । कामी यश्च जरन्नेते क्षत्त्रवशेषु कत्त्रयः । कद्वदः, कद्रथः । एष्विति किम् । कुब्राह्मणः । तत्पुरुष इति किम् । क्वाशयोऽयं जनः ।

६७. तृणे च जातौ ।

तृणे को कत् स्यात् । कत्तृणम् । जाताविति किम् ? कुतृणम् ।

---

६०. संज्ञायां विषये, ग्रन्थान्ते गम्यमानेन, इतरयोरुपपदयोरिति वर्द्धमानः ।

६८ **का पथ्यक्षयोरीषदर्थे च ।**

पथ्यादौ कोः का स्यात् । कापथः, काक्षः । ईषदर्थे च काम्लम्, कामधुरम् । *वा पुरुषे । कापुरुषः कुपुरुषः ।

६९. **कवश्चोष्णे ।**

उष्णे कोः कवः का च स्याद् वा । कवोष्णम्, कोष्णम्, कदुष्णम् च ।

७०· **हृदयस्य हृद् याऽण्लेखलासेषु ।**

यादौ हृदयस्य हृद्भवति । निरनुबन्धकयप्रत्यये, हृदयस्य प्रियं हृद्यम् । तस्येदमित्यण्, हार्दम् । हृदयं लिखति हृल्लेखः, हृल्लासः । अन्यत्र हृच्छब्दोऽप्यस्ति, तेनोभयं स्यात् । हृदयशोकः, हृच्छोकः, हृदयरोगः, हृद्रोगः, सौहृद्यम्, सौहार्दम्. सौहृदय्यम् ।

७१. **नस् नासिकाया य-तसि-क्षुद्रेष्वर्णनगरयोः ।**

यादौ नासिकाया नस् भवति । नस्यम्, नस्तः पतितम्, न क्षुद्रम्, नस्क्षुद्रम्, अवर्णनगरयोरिति किम् ? नासिक्यो वर्णः, नासिक्यं नगरम् ।

७२. **पादस्य पदो गोपहतात्याजिषु ।**

गादिषु पादस्य पदः स्यात् । पदगः पदोपहतः, पदातिः, पदाजिः ।

७३. **पद्धिमकाषिहतिगेषु ।**

हिमादिषु पादस्य पद्भवति । पद्धिमम् पत्काषीं, पद्धतिः, पदगः (इति चिन्त्यम्, अन्यत्रादर्शनात्) ।

७४. **येऽप्यदतर्थे ।**

ये पादस्य पद् भवति । पादौ विध्यन्ति पद्याः कण्टकाः पादे भवः पद्यः शूद्रः । अतदर्थे इति किम् ? पाद्यं जलम् । केवलस्य ग्रहणान्नेह, द्विपाद्यम् । अपिशब्दादिके च चरतौ, पादाभ्यां चरति पदिकः ।

---

७०. अथ हृच्छब्देन सिद्धे यादिषु हृदयनिवृत्त्यर्थं वचनम् । *शल्यदाहदुःखादिष्वपि हृदादेशो दृश्यते । यथा—हृच्छल्यम्, हृद्दाहः, हृद्दुखम् । अन्यत् प्रयोगतो ज्ञेयम् ।

७४. ननु नानङ्गस्येति केनचित् सूत्रितम्, तदिह न वक्तव्यमित्याह केवलस्येति । तेन साङ्गार्थस्य पादशब्दस्येह ग्रहणमित्यष्टकवृत्तिकारादि मते वेष्यते । तस्येव प्रकृतत्वात् । परिमाणवचनात्तु न स्यादित्यर्थः । द्वाभ्यां पादाभ्यां, क्रीतमिति

७५. **ऋचः शे ।**

ऋचः शे पादस्य पद्भवति । पच्छो गायत्रीं शंसन्ति वीप्सायां शस् । ऋच इति किम् । पादशः कार्षापणं ददाति । पच्छब्दोऽप्यस्ति, तेनान्यत्रोभयं स्यात् । पद्घोषः । पन्मिश्रः, पादमिश्रः । पच्छब्दः, पादअब्दः । पनिष्कः, पादनिष्कः ।

७६. **उदकस्योदधिपेषं वासवाहनेषु ।**

एषूदकस्य उदः स्यात् । उदधिः, उदपेशम्, उदवासः, उदवाहनः ।

७७. **संज्ञायामन्तस्थ च ।**

नाम्नि समासे पूर्वपदस्यान्तस्य च उदकस्य उदः स्यात् । उदमेघो गिरिः, उदपेयः, क्षीरोदः, लवणोदः, लोहितोदः ।

७८. **वा मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहेषु ।**

मन्थादौ परे उदकस्योदो वा स्यात् । उदमन्थः, उदकमन्थः । उदौदनः, उदकौदनः । उदमुक्तः, उदकमुक्तः । उदबिन्दुः, उदकबिन्दुः । उदवज्रः, उदकवज्रः । भारहारगाहाः कर्मणोऽणन्ता घणन्ताश्च, उदभारः, उदकभारः । उदहारः उदकहारः । उदवीवधः, उदकवीवधः । उदगाहः, उदकगाहः । अणि उदकग्राही स्त्री ।

७९. **तत्पूर्य्ये चैकहलादौ ।**

तत्पूर्य्ये परे उदकस्योदो वा स्यात् । उद्कुम्भः, उदककुम्भः । उदपात्रम्, उदकपात्रम् । एकहलादेरिति किम् ? उदकस्थानम् । तत्पूर्य्ये इति किम् । उदकगिरिः ।

८०. **इको ह्रस्वोऽङ्यादेशसेयुवः ।**

उत्तरपदे परे इगन्तानां ह्रस्वो वा स्यात् । ग्रामणिपुत्रः, ग्रामणीपुत्रो वा । जम्बुलता जम्बूलता वा । अङ्यादेरिति किम् ? गार्गीपुत्रः । आदेशस्य—कारीषगन्धीपुत्रः, शुक्लीभूतम् । सेयुवः, स्त्रीकुलम्, श्रीकुलम्, भ्रूकुलम् ।

पण पादमासाद् य इति यः । अत्र पणादिभिः परिमाणवचनैः साहचर्यात् पादशब्दोऽपि परिमाणवचनः आपि शब्दोऽयमनुक्तसमुच्चयार्थः । पदिक इति द्व्यजनौभ्यामिक इतीकः ।

७५. ऋचः ऋक्सम्बन्धिव इत्यर्थः । पच्छ इति पादं पादं गायत्र्याः शंसन्तीत्यर्थः । वाक्यगम्यस्य पादसम्बन्धस्य वृत्तौ निवृत्तत्वात् स्वाभाविकमेव शंसनक्रियाकर्म्मत्वमिति । पच्छब्देन सिद्धे हिमादिषु पादप्रयोगव्यावृत्त्यर्थं वचनजातम्: पच्छब्दोऽप्यस्ति; तेन वा घोषमिश्रशब्देषु, निष्के चेति द्विसूत्री परिष्कृता ।

८१. भ्रुवः कुसकुटचौरच्च ।

अनयोर्भ्रुवो ह्रस्वो वा स्यात् । अच्च वा । भ्रुकुंसः भ्रूकुंसः । भ्रुकुटिः, भ्रूकुटिः । भृकुटिश्चेत्येके ।

८२. ङ्यापोर्नाम्नि बहुलम् ।

संज्ञायां ङ्यापोर्बहुलं ह्रस्वः स्यात् । रेवतिपुत्रः, रोहिणिपुत्रः, वैदेहिबन्धुः, शिलप्रस्थं नाम नगरम् । क्वचिन्नैव, नान्दीघोषः । क्वचिदसंज्ञायाञ्च, कलज्ञः, मन्दुरजः, सुसूक्ष्मजटकेशः ।

८३. इष्टकेशीकामालानां चिततूलभारिषु ।

इष्टकादेश्चितादौ ह्रस्वः स्यात् । इष्कटचितम् । सविशेषणानाञ्चेष्यते, पक्वेष्ट-कचितम्, इषीकतूलम्, मालभारिणी, उत्पलमालभारिणीकन्या ।

८४. केऽणोऽकपि प्रत्यये । आपः कपि वा ।

के प्रत्ययेऽणो ह्रस्वः स्यात् । ज्ञका, चण्डिका, वधुका, ग्रामणिकः, नैषादकर्षूकः । अण इति किम् ? नौका । अकपीति किम् ? सस्त्रीकः सवधूकः । आपः कपि वा । बहुखट्वको बहुखट्वाकः ।

८५. इदस्य कात्पूर्वस्यापि स्वार्थेऽक्षिपकादेः ।

आपि परे प्रत्ययकरात् पूर्वस्यावर्णस्य इद् भवति । कारिका, पाचिका । प्रकारार्थे जटिलिका, मुण्डिका । *मामकनरकयोः मामिका, नरिका । त्यणत्यपोः दाक्षिणात्यिका, अमात्यिका । स्वार्थ इति किम् । बहुपरिव्राजका पूरी । अक्षेपकादेरिदि किम् । क्षिपका, ध्रुवका (धुवका) उपत्यका, अधित्यका, देवदत्तका, उत्तरपदलोपे चे, देवका । *तारका ज्योतिषि । तारिका अन्यत्र । *अष्टका पितृदैवत्ये । यत्तदोश्च । यका, सका. यकाभ्याम्, तकाभ्याम् । *आशिषि च । जीवका नन्दका ।

---

८५. अर्थवशादविभक्तिविपरिणामः (परि० ३२) इत्यत्र प्रत्ययककारादिति । ननु पूर्वस्यापीत्युक्ते आपि परे के प्रत्यये पूर्वस्यावर्णस्येतद्भाव, तत् किम् कादित्युक्तम् ? सत्यम्, प्रातिपदिकमात्रस्येति व्यावृत्त्यर्थम् । इतरथा कारिकेत्यादिर्नहि सिद्ध्यति । न च क्षिपकादि पर्युदासात्तथेति वाच्यम् । सर्व्विकादावप्रसक्तेः । कारिकेति णकः । प्रकारार्थ इति जटिल प्रकार इत्यर्थे स्थूलादेः क इति कः । मामकनरकयोरिति अप्रत्ययककारार्थोऽयमारम्भः । मामकतिरकयोरव्यापि कात् पूर्वस्यास्येद् भवति । ममेयमित्यर्थे युष्मदस्मदोः (५।३।२४) इत्यण्, ममकादेशश्च, न च वक्तव्यम् ।

८६. **सूतकादीनां वा ।**

एषामवर्णस्य इद्भवति वा । सूतिका, सूतका, सत्पुत्रका, सत्पुत्रिका, वृन्दारिका, वृन्दारका । *आपो य-कपूर्व्वस्य । इभ्यिका, इभ्यकाः, क्षत्रियिका, चटकका । आप इति किम् ? शकशकायतेः क्विप्, शकशकाः, ततः कः शकशकिका नित्यम् । *द्वैषयोश्चानञः । द्वके, द्विके । एषिका । नञ्पूर्व्वयोस्तु नित्यम्—अद्विके, अनेषिका । *भस्त्राजाज्ञास्वानां नञ्पूर्व्वाणामपि । भस्त्रका, भस्त्रिका अभस्त्रका, अभस्त्रिका; अजका अजिका, ज्ञका, ज्ञिका, स्वका स्विका ।

८७. **नित्यस्त्रीणां प्रकृत्या वापः ।**

सर्व्वदा स्त्रीणां प्रकृत्या आप इद वा स्यात् । मालाका, मालिका, मालका वा । खट्वाका, खट्विका, खट्वका ।

८८. **द्व्यन्तरूपसर्गादनतोऽपि ईप् ।**

द्व्यादेः परस्यापशब्दस्य ईप् स्यात् । द्वीपः, अन्तरीपः, अन्वीपः, नीपः, समीपः । अनत इति किम् ? प्राप कूपः ।

८९. **अनूपो देशे ।**

निपात्यते ।

मामकादाप् प्रत्ययो नास्ति संज्ञायामेव ङीविधानात् । अतो मामकी देवतेत्यत्र वक्ष्यति । नर कायतीति डः । अदन्तादपि नरिका । त्यण्त्यपोरिति, आपो यकपूर्वस्येति वक्ष्यमाणविकल्पापवादार्थं वचनम् । दाक्षिणत्यिकेति दक्षिणा—(५।३।८) इति त्यण् । कादिति किम् ? नन्दका । प्रत्यय इति किम् ? *अज्ञाताद्यर्थे कः के ऽणः (८४) इति ह्रस्वः । अत्र द्वैषाजाज्ञास्वानामिति श्रीपतिप्रभृतेर्विशेषो नेष्टः, अतएव बह्वाजिका बह्वजकेत्युदाहृतम् । स्त्रीलिङ्गनिर्देशात् शुभ्रोऽजो यस्याः, प्रियोऽजा यस्याः सा शुभ्राजिका प्रियाजिकेति नित्यम् ।

८८. नन्वप ईपिति कृते उत्तरे त्वाद्यपिति न्यादादेर्भविष्यति किं समस्तादेशेन ? सत्यम्, क्वचन तस्य व्यभिचारार्थम् । अतत्रवातः प्रादेः क इति तत्रैवोदाहृतम् । ननु समापो नाम्नीति चन्द्रगोमिना लक्षितम्, तदिहि कथं संज्ञाशब्दात् । तथा च समाङ्पूर्वस्याप शब्दस्य समापो देवयजनमित्येके ! *समा आपो यस्मिन्निति ब्रोध्यम।

९०. **पृषोदरादीनि यथोपदिष्टम् ।**

शिष्टैर्यथा प्रयुक्तानि पृषोदरप्रकाराणि तथैव साधूनि स्युः । पृषदुदरमस्य पृषोदरः, मह्यां रौति मयूरः, भ्राम्यन् रौति भ्रमरः । ब्रुवन्तः सीदन्त्यस्यां बृसी । वारिवाहो वलाहकः, पूर्यन्ते गलन्ति च पुद्गलाः तथ्यस्य भावः, तथा (तथता) ममेत्यव्ययस्य भावः ममत्वम् । ममता रतेस्तननं रत्नम् । वाहितं पापमनेन सुब्राह्मणः, यशस्करोति यस्कः, जित्तं मनोऽनेन जिनः, कौ जीर्यते कुञ्जरः, हिनस्तीति सिंहः,

---

९०. पृषोदर पृषोत्थान, वलाहक, जीमूत, श्मशान, उलूखल, पिशाच, बृषी, मयूरः । पृषोदरादिराकृतिगणः ।

भवेद्वर्णागमाद्हंसः सिंहो वर्ण विपर्य्यात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरः ॥

षष उत्वं दतृ-दशसूत्तर पदादेष्टुत्वञ्च । षष उत्वं वक्तव्यम् । उत्तरपदादेः ष्टुत्वञ्च वक्तव्यम् । षोडन्, षोडशा धासु वा । धासु वेति वक्तव्यमुत्तरपदादेः ष्टुत्वञ्च वक्तव्यम्, षोढा, षड्ढा कुरु । षड्दधीतीत्यत्र न स्यात् । षडधेति आदिशब्दात् तीरस्य तारो वा, दक्षिणतीरं, दक्षिणतारं । अवाप्योस्तु तंसादिष्वतोलोपो विभाष्यते । अवतंसोऽवतंसः । अवक्रुशो वक्रुशः । अपिनद्धं पिनद्धं । अपिहितम् पिहितम् । अपिधत्ते पिधत्ते । जीवनस्य मृतः पुटबन्ध (गोलः) जीवनं (जलं) मूत्रयतीति जेर्जीम्, चेति क्तेऽपि जीमूत औणादिकः । दुर्दाश्यते दूडाशः। दुर्नाश्यते दूनाशः, दुर्दभ्यते दूडभः । खलि-दाश्नृपशि-दान्तिषु नश्च लुक् । वाग्वादस्यापत्यम्, इण्, वाग्डलिः, तस्य डत्वम्, दस्य लत्वम् वादोह्रस्वश्च । गानं धर्मस्येति गन्धर्वः । पिशितमश्नाति पिशाचः । अश्वास्तिष्ठन्त्यास्मिन्निश्वत्थः, एषु त्रिषु सस्तः । उद्धतोऽद्मरः उडुम्बरः, ऊर्ध्वं खन्यते ऊदूखनम्, उदूखलञ्च । कस्य तु वा मध्ये उत्वञ्च । कमुद्धालयति कुद्दालः, उणदिलोपः । किखीभिरिध्यते किष्किदन्धा, ण्यन्तादिन्द्धेर्यत्, ङापि किष्किन्धेत्यपि । किं कलतीति किष्कुः, ङुः, एषु त्रिषु मूर्ध्न्यः । द्यौरोकोऽस्येति दिवौकाः, वर्णागमः । दिव् शब्देनापि सिद्धिः । ओकार निवृत्यर्थं पाठः । ओकारमध्येऽपि दृश्यते । ईशेस्तालव्यान्तादप् प्रत्यये हलीषा लाङ्गलीषेति । एतौ मूर्धन्यान्तवित्यन्ये । अप्सु लोलतीति लुलापः । मह्यां शेते इति महिष इति वर्द्धमानः । धूरिव जटोऽस्येति धूर्ज्जटिरित्यादयः । वर्णागम इति—इह पृषोदरादौ निरुक्तकारस्य शाकटायनस्य मतं पञ्चविधम् निरुक्तम्. तदुच्यते इत्यन्वयः । पञ्चधात्वं विवृणोति वर्णागम इत्यादि । वर्णागमः, कुतश्चित् प्राप्तिः (प्रेः)

केन उम्भ्यते कुम्भः, अङ्गन्ति आगच्छन्त्यत्रेति अङ्गणम् । षषो धा दतृभ्याम्, षोढ़ा, षोडतृषोडन् वत्सः, षड्ढा च धा प्रत्यये । तृतीयं त्रिदशानां वा विष्टपं त्रिविष्टिपम् इत्यादि ।

वर्णागमो वर्णविपर्य्यश्च द्वौचापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
चतुर्थाध्यायस्य चतुर्थः पादः

विपर्य्यः पौर्व्वापर्य्याकरणम् । विकारस्त्विवहादेशः । नाशो लोपः । तयोर्विाकर-नाशयोर्द्विस्त्रिः प्रवृत्तिः । अर्थस्य च तेन योगो धातोः । यथा मह्यां रौति मयूर इत्यत्र हस्य य ईत ऊत् । भ्राम्यन् रौति भ्रमर इत्यत्र यण् दीर्घाणां नाश इति । शिवम् ।

तद्धितप्रकरणम्

पञ्चमाध्यायस्य

प्रथमः पादः

१ तद्धिते ।

अधिकारोऽयम् ।

२. ञिति वृद्धिरचामादेः ।

ञिति तद्धिते परे प्रकृतेरचां मध्ये आदेरचो वृद्धिः स्यात् । गार्ग्यः, दाक्षिः । समासे तु पूर्वपदस्य —औपगवः ।

३. प्रलय-केकय-मित्रयुवां यादेरियश्च ।

एषां यादिभागस्य वृद्धिसहचरित —इयादेश स्यात् । प्रलयादागतं प्रालेयं हिमम्, केकयस्यापत्यं कैकेयी, मित्रयोर्भावेन श्लाघा मैत्रादिका ।

४. देविका-शिंशपा-दित्यवाड्-दीर्घसत्रश्रेयसामात् ।

एषामादरेच आद् भवति । वृद्धेरपवादः देविकायां भवं दाविकं पयः, दाविका कुलाः शालयः, शिंशपायाः विकारः शांशपश्चमसः, दात्यौहः, दीर्घसत्रे भवं दार्घसत्रम्, श्रेयसि भवं श्रायसम् ।

५. इणो य्वोरस्वागतादेरैयौवौ ।

अचामादेरिण् आदेशयोर्यकारवकारयोः स्थाने ऐयौवौ स्याताम् । वैयाकरणः, श्वस्यापत्यं सौवश्विः । अस्वागतादेरिति किम् ? स्वागतमाह स्वागतिकः, व्यवहारेण चरति व्यावहारिकः, व्यडस्यापत्यं व्याडिः । अत्रादेशस्थानिकं क्वचिदिति यणादेशस्य-स्थानित्वादिणोवृद्धिर्न भवति ।

---

२. नन्वादेर्वृद्धिरित्युक्ते आद्यन्तव्यवहारस्य सजातीयसापेक्षत्वादचामिति लभ्यते, तत्कथमचामित्युक्तम् ? न चाद्यन्तवदेकमिति न्यायादेकाचोऽपि क्वचिद्वृद्धिः स्यादिति वाच्यम् । तस्येष्टविषयत्वात् परत्वाच्च यस्येति प्रवर्त्तते । यथा ज्ञो देवतास्या इति । सत्यम् समासेऽपि पूर्व्वपदस्य यथा स्यादित्याह समासे पूर्व्वपदस्येति । तेन सार्व्वजनिक औपगव इति गामुपगत उपक्रान्तो वा उपगुः तस्यापत्यमित्यण् ।

६. **श्वादेरश्वगणादेः ।**

अनिणादेशार्थं वचनम् । श्वादेर्य्योरैयौवौ स्याताम् । शुन इदं शौवं मांसम्, श्वादष्ट्रायाम्भवं शौवादंष्ट्रम् । द्वारे नियुक्तो दौवारिकः, श्वो भविता शौवस्तिकः, स्वस्तीत्याह सौवस्तिकः । समस्तस्य तु—न्याग्रोधमूलयः शालयः । अश्वगणादेरिति किम्? श्वगणेन चरति श्वागणिकः । श्वादेविकारादावेव निषेधः, श्वादांष्ट्रिः, स्वास्थ्यं, स्वाजन्यम्, स्वपतौ साधुः स्वापतेयम्, स्वार्थिकः, स्वाभाविकः । * श्वापदस्य वा । श्वापदम् शौवा पदम् ।

७. **गुरुलघ्वादेरुत्तरपदस्य ।**

गुरुलघप्रभृतेरुत्तरपदस्य वृद्धिः स्यात् । गुरुलाघवम् एकपौरुष्यम्, पितृपैतामहम्, गङ्गास्रोतो न्यायेनात्र वृद्धिर्विक्षिता (कार्य्या) । * ऋतोरङ्गे । (अवयवे) उत्तरपदस्य वृद्धिः स्यात् । पूर्व्ववार्षिकः श्रावणः, अपर हैमनम् । अङ्गेति किम् ? पूर्व्वासु वर्षासु भवं पौर्ववार्षिकम्, अनुशतादिः ।

८. **सुसर्व्वार्द्धाज्जनपदस्य ।**

वृद्धिः स्यात् । सुमाद्रः सर्वपाञ्चालकः, अर्द्धपाञ्चालकः, बहुवचनविषयादित्यकण् ।

९. **दिशः परस्यामद्राणाम् ।**

जनपदस्येत्येव, दिशः परस्य वृद्धिः स्यात् । पूर्व्वपाञ्चालकः । अमद्राणामिति किम् ? पौर्वमद्रः ।

---

६. नन्वादेरित्यौवादेश निषेधकं मुनिप्रणीतं सूत्रं कथं प्रत्याख्यातमिति मनसि कृत्वाह श्वादेरिति । अत्र श्वगणादिनिषेधात् श्वादिपदेन श्वशब्दादि परिगृह्यते देन स्वादेरेव प्रतिषेध इकारादौ प्रत्यय एवामिधीयते । तेन श्वादंष्ट्रायां भवः अवयवे च (५/३/६१) इत्यण् । शौवादंष्ट्रामुनिः, श्वभस्त्रस्यापत्यं श्वाभस्त्रिः श्वयूथेन चरति श्वायूथिकः । तद्धितान्तेऽपि श्वाभस्त्रेरिदं श्वाभस्त्रम् । श्वापदशब्दस्यापि औरादेशो भविष्यतीत्यर्थः । अण्येवायं विधिः, तेनान्यस्मिन्नित्यम्, सौवापदिकः । श्वन्, श्वादंष्ट्रा द्वार, श्वस्, स्वस्ति, स्वरू, स्वर, स्फारुत, स्वादु, मृदु, द्युग्राम, स्वनगर (श्वन् स्व) ।

७. ननु वृद्धिबाधकैयोरेवानुवर्त्तिष्यते ततः कथं वृद्धिरनुवर्ततां विप्रकृष्टत्वादित्यत आह गङ्गास्रोत इति ।

८. ननु दिश इत्युत्तरदिग्योगलक्षणा पञ्चमी, ततश्च दिश उत्तरस्य जनपदस्येत्येव वृद्धिर्भविष्यति किं परस्येत्यनेन ? न च षष्ठीत्याशङ्का मद्रवर्जनादिति चेत् ? सत्यम्, मन्दधियां दुःखप्रतिपत्यर्थम् ।

१०. आदिग्रामनगराणाञ्च ।

दिश इत्येव, पूर्वषुकामशमाः गजाः इषुकामशमी ग्रामः पूर्वकान्यकुब्जकोऽश्वः पूर्वमाथुरः ।

११. संख्यायाः संवत्सरसंख्ययोः ।

द्विसांवत्सरिकः, त्रिसांवत्सरिकः, तमधीष्टो भृतो भूतो भावी वा । द्विसाप्ततिकः, त्रिषाष्टिकः, क्रीतार्थे टिकन् ।

१२. वर्षस्याभविष्यति ।

संख्याया इत्येव, द्वे वर्षे अधीष्टो भृतो भूतोवा द्विवार्षिकः, अमविष्यतीति किम् ? द्वे वर्षे भावि द्वैवार्षिकं भक्तम्, त्रैवार्षिकं धान्यम् ।

---

१०. आदिशब्दोऽत्र पूर्व्वार्थः पूवेषुकामशम्यां भवाः पूवेषुकामशमाः एवमादिषु कृतायामुत्तरपदवृद्धौ एकदेशो भवतीति नेन्द्रस्य (१८) इत्यनेनज्ञापितम् । परनिमित्तादेशः इति न्यायादेकदेशेऽपि न क्षतिरित्यन्ये । इह दिक्पूर्वपदो हि समुदायः । पूवेषुकामशम्यादिग्रामाणां नामधेयम् । पाटलिपुत्रादि पुनरुत्तरपदमेव नगरमाह, तत्रायं सम्बन्धो भिद्यते ग्रामवाचिनामवयवस्य दिक्शब्दादुत्तरस्य वृद्धिः । नगरवाचिनस्तु दिश उत्तरपदस्येति । तेन पूर्वपाटलिपुत्रे भवः, पूर्वपाटलिपुत्रकः, इन्द्रोपधाभ्याम् (५/३/२६) इत्यकण् । ग्रामत्वादेव नगराणामपि ग्रहणे सिद्धे यदुभयोरुपादानम्, तत् सम्बन्धभेदप्रतिपादनार्थमिति काशिका, चान्द्रास्तु समुदायस्य ग्रामवाचित्वादवयवोऽपि तथा यथा—सत्यभामेति सम्बन्धभेदाभावादपरपरिग्रहणमनर्थकमित्याहुः । आदीति किम् ? पूर्वदेवदत्तो नायं बाल्हीकग्रामस्तत्र भवः पौर्वदेवदत्तः ।

११. इह द्विष्टयादिशब्दो वर्षेषु संख्येयेषु वर्त्तमानः कालाधिकारमुत्पादयति क्रीतार्थे टिकणिति शेषः । परिमाणस्य (१२) इति सिद्धे संवत्सरग्रहणं कालपरिमाणग्रहणार्थम्, तेन द्वैसमिकः, त्रैसमिकः, नोत्तरपदवृद्धिरित्यष्टकवृद्धिकृत् ।

१३. अत्र शाणस्य वृद्धिप्रतिषेधः पूर्वपदवृद्धयर्थः, इह परिमाणान्तस्यासंज्ञाशाणयोरिति पाणिनीयस्मृतेः, असंज्ञायामेवेयं वृद्धिरभिधीयते, तेन पञ्चकपालाः परिमाणमस्यपञ्चकपालिकम्, पञ्चलोहिताः परिमाणमस्य पाञ्चलोहितम्, भस्याढेये (४/४/२८) इति पुंवत्वम्, तदस्यपरिमाणमिति योगाविभागेन संज्ञायां टिकण् । अयं तद्धितान्तसमुदायः संज्ञा । इह कुलिजस्य प्रतिषेधमिच्छान्ति केचित्, द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकम् । नेच्छन्त्यन्ये द्विकौलिजिकम् तन्मतमिह प्रमाणम् । कुलिजस्य वेति वासवतं सूत्रम् ।

१३. परिमाणस्याशाणस्य ।

संख्याया इत्येव, क्रीतार्थे टिकण् द्विनैष्ठिकम् । अशाणस्येति किम् ? द्वैशाणम्, द्वित्रिपूर्वाद् अण् च ।

१४ प्रोष्ठपदाभद्रपदयोर्जाते ।

तत्र जातः, प्रोष्ठपदो बालः, भद्रपादः । ऋतुभसम्बन्धादेरवर्षाभ्योऽण् । जात इति किम् ? भवार्थे, प्रौष्ठपदो मेघः ।

१५. अनुशतादेरुभयोः ।

अनुशतादीनामुभयोः पदयोर्वृद्धिः स्यात् । तत्र भवः आनुशातिकम्, अध्यात्मादिः । शातकौन्तम्, सार्वपौरुष्यम् । तत्र दीयते, आनुसांवत्सरिकम्, पाञ्चभौतिकम्, सार्व्वभौमः, आधिभौतिकः, पौष्करसादिः, पौर्वंवार्षिकः, आधिदैविकम्, चातुर्वैदिकम्, आनुहौडिकम्, कौरुपाञ्चालकः ।

१६. सिन्धु-लोक-भगान्तस्य ।

शौरसैन्धवः, ऐहलौकिकः । सार्व्वलौकिकः । कथं त्रैलोक्यम् ? भाविवहुवचनात् । सौभाग्यम्, दौर्भागिनेयः ।

१७. हृदन्तस्य बहुलम् ।

सौहार्दम्, सौहृद्यम् ।*पुण्ड्रादे नगरे । पौण्ड्रनागरः, सोह्मनागरः ।

१८. देवताद्वान्द्वे सूक्तहविषोः ।

सौर्यचान्द्रमसो मन्त्रः, अग्निमारुतं हविः । सूक्तहविषोरिति किम् ? ब्राह्मविशाखम् ।

१९. नेन्द्रस्य परस्य ।

सौमेन्द्रश्चरुः; परस्येति किम् ? ऐन्द्रार्बार्हस्पतयः ।

२०. दीर्घाद्वरुणस्य ।

नेत्येव । ऐन्द्रावरुणं कर्म्म । दीर्घादिति किम् ? आग्निवारुणम् ।

२१. जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ।

जङ्गलाद्यन्तस्य उत्तरपदस्य वृद्धिः स्याद् वा । कौरुजाङ्गलः, कौरुजङ्गलो वा । समूहे-कार्ष्णधैनुकम्, कार्ष्णधेनुकं वा । दौग्धवालजः, दौग्धवलजो वा ।

२२. अर्द्धात् परिमाणस्य, पूर्वस्य तु वा ।

अर्द्धात् परस्य परिमाणस्य वृद्धिः स्यात् । पूर्वस्य तु वा । अर्धद्रौणिकम्, आर्धद्रौणिकम्, क्रीतार्थे टिकण् ।

२३. न परस्यातः ।

अर्द्धात् परस्य परिमाणस्यातो वृद्धिर्नास्ति । पूर्वस्य तु वा । अर्धप्रास्थिकम् । आर्धप्रास्थिकम्, क्रीतार्थे टिकण् । "न प्रवाहणस्य टेयणि । प्रवाहणेयः (पूर्वस्य तु वेति केचित्, तेन प्रावहणेय, प्रवाहणेयः) ।

२४. नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ।

नञः परेषामेषां वृद्धिस्यात् । पूर्वस्य तु वा । अशोचम्, आशौचम् । अनैश्वर्यम्, आनैश्वर्यम् । अक्षैत्रज्ञम्, आक्षैत्रज्ञम् । अकौशलम्, आकौशलम्, अनैपुणम्, आनैपुणम् ।

२५. यथातथायथापुरयोः पर्य्यायेण ।

नञः परयोरनयोः पर्य्यायेण णिति वृद्धिः स्यात् । आयथातथ्यम्, अयाथातथ्यम् । आयथापूर्य्यम् । अयाथापूर्य्यम् । उक्तो वृद्धिविधिः ।

२६. भस्य ।

यादावजादौ च तद्धिते परे पूर्वस्य कार्यं वक्तव्यमित्यधिकृतम् ।

२७. नष्टेर्लोपोऽङ्चणोः ।

नान्तस्य भस्य टेलोर्पः स्यात् । अग्निशर्म्मिः, औडुलोमिः । अङ्चणोरिति किम् ? सुप्रेम्नी, सौत्वनः, सामनः ।

२८. अणि चापत्ये इनो गाथिविदथिकेशिगणिपाणिसंयोगादिवर्ज्जम् ।

अपत्यार्थेऽणि परे इनन्तत्तस्य टिलोपः स्यात् । मैधावः पुत्रः । गाथादिवर्ज्जिमिति किम् ? गाथिनः पाणिनः । संयोगादे वान्दिनम्, स्राग्विनः ।

---

२५. तथेत्यनतिक्रम्य पुरेत्यनतिक्रम्येत्यव्ययीभावः इत्येके, अयथातथाभावे, अयथापुराभाव इति वर्णयतो भाष्यकृतः सुप्सुपेति समास इति मतं लक्ष्यते, चान्द्रास्तु आयाथातथ्यमिति समासात् प्रत्ययः अथवा अयथातथ्यमिति प्रत्ययान्तेन समास इतीदं प्रत्याचख्युः ।

२८. पूर्व्वस्यापवादोऽयम् । अत्र केचिच्चकारस्यानुक्तसमुच्चयार्थत्वात् समूहार्थत्वेऽपि तेन मैधावं समूह इत्याहुः । अपत्य इति किम् ? मेधाविन इदम् मैधावम्, दाण्डं समूहः, गाथम्, चान्द्रम् । इह गर्भिवर्म्मिचर्म्मिनाञ्चेति समूहार्थे नलोपनिषेधकं सूत्रं वर्द्धमानस्य । गार्भिणं वार्म्मिणं चार्म्मिणम् ।

२९. **मनश्चावर्म्मणः ।**

मनन्तस्य चापत्येऽणि टिलोपो भवति । भाद्रसारः पुत्रः । अवर्म्मणं इति किम् ? चान्द्रवर्म्मणः सूत्रः ।

३०. **सब्रह्मचार्य्यादेः संघादौ च ।**

एषां संघादौ चाणि टिलोपो भवति । साब्रह्मचारा पैठसर्पाः, तस्येदमित्यण् । सब्रह्मचारि, पीठसर्पि, कलापि, कुथुमि, तैतिलि, जाजलि, जाङ्गलि, शिलालि, शिखण्डि, सुधाकर, सद्म, सुपर्व्वाणः ।

३१. **अह्नष्टेनयोः ।**

पूर्वेण नित्ये प्राप्ते नियमार्थं वचनम् । टेनयोरेवाह्नष्टिलोपः स्यात् । समाहारे द्व्यहः त्र्यहः । द्वे अहनी भूतो भृतो भावी वा, द्व्यहीनः । अहोरात्रि संवत्सराच्चेति ईन । टेनयोरितिकिम् ? आह्निकम् ।

३२. **आत्माध्वनोरनीने ।**

अनयोरनीने टिलोपो भवति । प्रत्यात्मम्, प्राध्वम् । अनीन इति किम् ? आत्मनीनोऽध्वनीनः ।

३३. **ये त्वनो भावकर्म्मणोः ।**

अनन्तस्य यादौ भावकर्म्मणोरेव टिलोपः स्यात् । राज्ञो भावः कर्म्म वा राज्यम् । भावकर्म्मणोरितिकिम् ? तदलंगामीत्यध्वन्यः । तत्र साधुः, सामन्यः, सुत्वन्यः । ब्रह्मण्यः । तत्र भवः शीर्य्यण्यः ।

३३. **यूनोऽभावाणकयोः ।**

यूनो भस्य टिलोपः स्यात् । यौवः । भावाणकयोस्तु-अणि यौवनम्, अके यौवनकम्, मनोज्ञादिः ।

३५. **शुनः सङ्कोचविकारयोः ।**

अत्रार्थे शुनष्टिलोपः स्यात् । शौवः सङ्कोचः, विकारे—शौवं माँसम् ।

३६. **वा हितनाम्नोऽपत्ये ।**

हितनाम्नष्टिलोपः स्याद् वा । हैतनामः पुत्रः, हैतनामनो वा ।

३७. **अश्मनो विकारे ।**

टिलोपो स्यात् । आश्मः प्रासादः आश्मनो वा । तस्येदमित्यणि आश्मनो नित्यम् ।

३८. **ब्राह्मोऽजातौ ।**

टिलोपः स्यात् । ब्राह्मो नारदः । जातौ तु ब्राह्मणः ।

३९. **कार्म्मस्ताच्छील्ये ।**

स्यात् । अन्यत्र कार्म्मणः ।

४०. **चार्म्मः कोषे ।**

स्यात् । चार्म्मणोऽन्यत्र ।

४१. **औक्षमनपत्ये ।**

स्यात् । औक्षं पदम् । अपत्ये तु औक्षणो वत्सः ।

४२. **आथर्व्वणिक जैह्माशिनेय दाण्डिनायन हास्तिनायनवासिनायनिभ्रौणहत्य-धैवत्यानि ।**

इमानि निपात्यन्ते । अथर्व्वा, उक्थादिः, जिह्माशिन्, शुभ्रादिः । दण्डिन्हस्तिनौ नडादौ । वासिन् तिकादिः । भ्रूणहन्.धीवन् एतौ भावटचणन्तौ ।

४३. **सायं प्रातरादेश्च ।**

भस्य टिलोपः स्यात् । सायंप्रातिकः, पौनः पुनिकः । नेह आरातीयः, शाश्वतः शाश्वतिकः ।

४४. **यस्य ।**

इकारस्यावर्णस्य च भस्य तद्धितस्य लोपः स्यात् । बालेयास्तण्डुलाः । वत्सप्रीः वात्सप्रेयः, अस्यापत्यं इः, ज्ञो देवता अस्य ज्ञः । गार्गी, कुमारी । तद्धित इत्येव, द्वे काण्डे । बिल्वकीयादेरीयलुग्वक्तव्यः । बैल्वकः (बिल्वकीय इति कश्चित्)

---

३९. पूर्वेण सिद्धे सूत्रमिदं किमर्थम् ? नन्वणि टिलोपनिषेधार्थं प्रत्यये निषेध एव न सम्भवति किं निपातेन ? सत्यम् एतदेवज्ञापयति ताच्छीलिके नेहप्यण् कृतं कार्य्यं भवति तेन चौरी तापसी ङी सिध्यतीत्यन्ये ।

४३. अत्र तु न टचणिष्यते इति जयादित्यः । क्वचिदपवादविषये उत्सर्गस्यापि समावेश इति स्मृतेः टचणि पौनःपुन्यमिति च । अथाव्ययस्येति सिद्धे सायंप्रात-रादिग्रहणमाराच्छश्वतोष्टिलोपनिषाधार्थमित्याहेति । शाश्वतिक इति कालाट्ठिकण् शश्वदादिनिषेधादिकः को न भवति ।

४४. इश्च अश्च यम्, समाहारे द्वन्द्वः, न तु यकारः, तल्लोपस्य (४९-२२) वक्ष्यमाण-त्वादित्याह इकारस्येति ।

४५. ओरवधातोरास्त्रियाम् ।

उवर्णान्तस्य भस्य तद्धिते ओरवादेशो भवति । औपगवः, बाभ्रव्यः । अधातोरिति किम् ? स्वायम्भवम्, खालप्वम् । अस्त्रियामिति किम् ? पट्वी, कुरूः । कथं पौनर्भवम् ? पुनर्भवशब्दात्, नञा निर्दिष्टमनित्यमिति ।

४६. एयणि लोपोऽकद्र्वाः ।

एयणि परे ओर्लोपो भवति । मार्कण्डेयः, कामण्डलेयो जाम्बवेयः । अकद्र्वा इति किम् ? काद्रवेयः ।

४७. पाण्डोर्ण्ये जनपदस्य ।

ण्ये परे जनपदस्य पाण्डोरुलोपः स्यात् । पाण्डयः ।

४८. सारवैक्ष्वाक-हिरण्मयानि ।

अमूनि निपात्यन्ते सरय्वा अणि, यलोपः, सारवं जलम् । इक्ष्वाकोरुलोपः, तस्यापत्यं ऐक्ष्वाकः बहुत्वे लुकिः, इक्ष्वाकवः । इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः । इक्ष्वाकवः । हिरण्यस्य मयटि यादिलोपो हिरण्मयम् ।

४९. हलस्तद्धितयोऽनाति ।

हलपरस्य तद्धितयकारस्य भस्य तद्धिते लोपः स्यात् । गार्गी, सौमी दृष्टि, आनुपूर्व्वी, औचिती, गार्गीः, गार्ग्याणां समूहो गार्गकम् । हल इति किम् ? कैकेयी तद्धित य इति किम् ? वैद्यस्य भार्य्या वैद्यी । अनातीति किम् ? गार्ग्यायणः । ईकारे ह्यनपत्यस्य यस्य लोपो नान्यास्मिन् तेन सांकाश्यकः ।

५०. तिष्यपुष्ययोर्नक्षत्राऽणि ।

अनयोर्नक्षत्रेऽणि यलोप स्यात् । तैषः, पौषः ।

---

४५. कथमिति ननु पुनर्भवशब्दादणि पौनर्भव इत्यस्य सिद्धौ कथं द्विरूढापत्यमित्यर्थः प्रतीयते, न च (न) प्रतीयते, मन्वादौ द्वादशविधपुत्रगणने पौनर्भव इत्यस्यापि गणितत्वादित्याह नञेति ।

४७. जनपदस्येति किम् ? भारतस्य पाण्डोरपत्यम् पाण्डवः, शुभ्रादित्वात् पाण्डवेय इत्यन्ये । एवं ण्य इत्यस्यापि प्रत्युदाहरणमिति चेज्जनपदस्येति स्पष्टार्थम् । यत्तु तस्यामेव रघोपाण्डा इति प्रयुक्तम् । तत् पाण्डो साधव इति यति साधु ।

४९. कैकयीत्यत्र वृद्धिसहचरितस्य तद्धितत्वमौपचारिकम् । वस्तुतस्त्वात्रेयीत्युदाहार्यम् । कारिकेयीति भाषावृत्तौ प्रत्युदाहृतम् ।

५१. सौर्यागस्त्योऽर्ङ्यामीये च ।

य लोपः स्यात् । सौरीं, सौरीयास्तण्डुलाः । आगस्ती, आगस्तीयः, अणन्तादीयः

५२. ङ्यामत्स्यस्य ।

यलोपः स्यात् । मत्सी । ङ्यामीति किम् ? मात्सो न्यायः प्रवर्त्तते ।

५३. क्यच्व्योरपत्यस्य ।

क्ये च्वौ च परे आपत्यस्यैव यकारस्य लोपः स्यात् । वात्सीयति, वात्सायते वात्सीभूतः । हल इत्येव, आत्रेयीयति ।

५४. नाऽके राजन्यस्य मनुष्यस्यङ्यञ्च ।

यलोपो नास्ति । समूहे, राजन्यकम्, मानुष्यकम् । अस्य ङ्याञ्च, मनुष्यी ।

५५. टेर्डिति ।

डिति परस्य टेर्लोपः स्यात् । डट् एकादेशः, डकःत्रिशकः । डित्यभस्यातद्धिते च । कुमुद्वान्, प्लवगः ।

५६. विंशतेरतेः ।

डिति विंशतेरतेर्लोपः स्यात् । ऊनविंशकोऽश्वः, ऊनविंशं शतम् ।

५७. इष्ठेमेयःस्वऽनेकाचः ।

इष्ठादौ परे अनेकाचष्टिलोपः स्यात् । पटिष्ठः, पटिमा, पटीयान् । अनेकाच इति किम् ? श्रेष्ठः, स्रजिष्ठः ।

५८. स्थूल-दूर-युव-ह्रस्व-क्षिप-क्षुद्र-क्षुदाणां स्थव-दव-यव-ह्रस-क्षेप-क्षोदाः ।

इष्ठादौ परे स्थूलादीनां स्थवादयः स्युः । स्थाविष्ठः, स्थवीयान् । इमन्नत्र न सम्भवति । दविष्ठः, दवीयान् । यविष्ठः, यवीयान् । ह्रस्व-क्षिप्रयोरिमन्नास्ति ह्रसिष्ठः, ह्रसिमा, ह्रसीयान् । क्षेपिष्ठः, क्षेपिमा, क्षेपीयान् । क्षोदिष्ठः, क्षोदिमा, क्षोदीयान् ।

---

५६. ननु डिति तिलोपे स्वेष्ठसिद्धौ किमकारोलुप्यते? न च वाच्यम् । अकारस्थित्या-मनिष्टरूपं स्यात् पूर्वेणेव तल्लोपसिद्धेः, सत्यम् तेर्लोपे पुनरकारलोपः पूर्व्वेण न प्राप्नोति । परनिमित्तादेश (परि० १७) इति न्यायात् (प्रक्रियामित्यन्ये) ।

५९. **प्रिय-स्थिर-स्फिरोरु बहुल-गुरु-तृप-दीर्घ-वृन्दारकाणां प्र-स्थ-स्फ-वर-वंह-गर-त्रप-द्राघ-वृन्दाः ।**

इष्ठादौ परे प्रियादीनां प्रादयः स्युः । प्रियोरुबहुलगुरुदीर्घाणामेव प्रियादित्वादिमन्नास्ति । इष्ठेयसौ सर्वत्र । श्रेष्ठः, प्रेमा, प्रेयान् । स्थेष्ठः, स्थेयान् । स्फेष्ठः, स्फेयान् । वरिष्ठः, वरिमा, वरीयान् । बंहिष्ठो, वंहोयान् । गरिष्ठः, गरिमा, गरीयान्, त्रपिष्ठः, त्रपीयान् । द्राघीष्ठः, द्राघियान् । वृन्दिष्ठः ।

६०. **बहोर्भूयादिरिष्ठश्चादिलोपः इमेयसोः ।**

बहोरिष्ठादौ भूः स्यात् । इष्ठश्च यादिर्भवति । इमेयसोरादिलोपश्च । भूयिष्ठः भूमा, भूयान् ।

६१, **दृढ़ पृथु-मृदु-कृश-भृश-परिवृढानामृतो रः ।**

एषामिष्ठादौ परे ऋतो रः स्यात् । द्रढिष्ठः द्रढ़िमा द्रढ़ीयान् । प्रतिष्ठः प्रथिमा प्रथीयान् । म्रदिष्ठोः म्रद्रिमा म्रदीयान् । भ्रशिष्ठः परिव्रढिष्ठः ।

६२. **विन्मतोर्लुगिष्ठेयसोः ।**

इष्ठेयसोः परतो विन्मतोर्लुक स्यात् । स्रग्विनः, स्रजिष्ठः, स्रजीयान् । ओजस्विनः, ओजिष्ठः, ओजीयान् । त्वग्वतः, त्वचिष्ठः, त्वचीचान् । धर्म्मवतः धर्मिष्ठः. धर्म्मीयान् । पापवतः, पापिष्ठः, पापीयान् ।

६३. **प्रशस्य-वृद्धयोः श्रवर्षौ ।**

अनयोः श्रवर्षौ स्याताम् । श्रेष्ठः श्रेयान् वर्षिष्ठः, वर्षीयान् ।

६४. **अन्तिकबाढ़योर्नेदसाधौ ।**

अनयोर्नेदसाधौ स्याताम् । नेदिष्ठः, नेदीयान् । साधिष्ठः साधीयात् । क्रियाविशेषणमित्यर्थे साधीयः ।

६५. **ज्यश्चेयस ईदाच्च ।**

इष्ठेयसोः परयोः प्रशस्यवृद्धर्योज्यादेशः स्यात् । ईयस ईकारश्चाद्भवति । ज्येष्ठः, ज्यायान् ।

६६. **युवाल्पयोः कन् वा ।**

अनयोः कनादेशो भवति वा । कनिष्ठः, कनीयान् । पक्षे—यविष्ठः यवीयान् । अल्पिष्ठः, अल्पीयान् ।

६७. **शिरसः शीर्षयोऽणि ।**

अणि शिरसः शीर्षः स्यात् । स्थौलशीर्षम् हास्तिशीर्षः पुत्रः ।

६८. शीर्षन् ये, वा च केशेषु ।

ये शिरसः शीर्षन् स्यात् । शिरसि भवः शीर्षण्यः स्वरः । केशेषु वा । शीर्षण्याः केशाः, शिरस्या वा ।

६९. अन्तिकस्य तसि कादे लुग्वा, तादेश्च तमे ।

तसि परे अन्तिकस्य कादिपरभागस्य लुग्वा स्यात् । अन्तितः, अन्तिकतो वा । तमे परे तादेः कादेश्च वा । अन्तमः, अन्तितमः, अन्तिकतमः ।

७०. अ-म-तदुपधेभ्यो झयश्च मतोर्भोऽयवादेः ।

अकारमकारान्तेभ्योऽकरमकारोपधेभ्योः झषन्ताच्च परस्य मतोर्म्मभावः स्यात् । गुणवान्, मालावान्, किंवान् । अमोपधेभ्यश्च, पयस्वान्, भास्वान्, लक्ष्मीवान् । झयन्तात्-मरुत्वान्, कुमुद्वान् । अमादेरिति किम् ? बुद्धिमान्, धीमान्, श्रीमान्, आयुष्मान् । अयवादेरिति किम् ? यवमान्, उर्म्मिमान्, भूमिमान्, कृमिमान्, ककुद्मान् गरुत्मान्, हरित्मान् ।

७१. नाम्नि बहुलम् ।

संज्ञायां मतोर्म्मभावः स्यात् । अहीवती पद्मावती, मुनीवती नदी । बाहुल्यात् कार्यान्तरञ्च निपात्यते । आसनस्य आसन्दीवान् ग्रामः । अष्ठीवत् प्राण्यङ्गे । कक्षीवान् ऋषिः । चक्रीवान् गर्दभः । लवणस्य रुमनादेशः, रुमन्वान् शैलः । न लोपाभावोऽपि चर्म्मादेः । चर्म्मण्ववती नदी । उदन्वानुदधौ । उदकस्योदन् । क्वचिन्न भवति । बिन्दुमती काचित् ।

७२. उगिसुस्तान्तादोर्भ्योऽशश्वदादेरिकः कः ।

उक् प्रत्याहार उस् तान्त दोस् एभ्यः परस्य टिकणादेरिकः कः स्यात् । नैषाद-कर्षुक,, पैतृकः, सार्पिष्कः, धानुष्कः, औदश्वित्कः, दोर्भ्यां तरति दौष्कः । अशश्वादेरिति किम् ? शाश्वतिकः, यावतिकश्च ।

७३. ऋतोरो यि ।

यादौ तद्धिते ऋतो रः स्यात् । ण्यः—पित्र्यम्, यः—पैत्र्यः ।

---

७२. कथं द्युतेरादेर्जश्चेति इस्, ज्योतिः, तस्य जौतिषिकः इति ? सत्यम् ज्योतिरधिकृत्य कृतो ग्रन्थः इत्यणन्तं ज्योतिषं शास्त्रम् तदधीते ज्यौतिषिक इति उक्थादिभ्याष्टिकण् ।

७४. **बहुलं प्रातिपदिकात्तद्धिताः ।**

अतः प्रातिपदिकात्तद्धितसंज्ञकाः प्रत्ययाः बहुलं वाच्याः ।

७५. **समासान्तः ।**

आ पादपरिसमाप्तेः समासा (श्रयः)वयवः प्रत्ययो वाच्यः ।

७६. **न पूजने स्वतिभ्यां प्राग्बहुव्रीहेः ।**

बहुव्रीहि । प्राक् पूजार्थे स्व-अतिभ्यां परात् समासान्तो न भवति । सुराजा, अतिराजा, सुगौः, अतिगौ । प्राग्बहुव्रीहेरिति किम् ? स्वक्षो मैत्रः, अतिसक्थः ।

७७. **किमः क्षेपे ।**

क्षेपे किमः परात् समासान्तो न भवति । किं राजा यो न रक्षति प्रजाः, सः किंसखा साधु न शास्ति योऽधिपम्, किंगौरदोहवाहात् । क्षेप इति किम् ? कस्य राजा, किंराजः, किंपथः, किंगवः ।

---

७४. प्रातिपादिकपदमत्र सुबन्तपरम्, तस्य तदन्ततया व्यभिचारात् । व्यावर्त्तकस्य तिङन्तस्य तिङश्च तरतमावित्यनेन प्राप्तेः स्पष्टार्थञ्च । किञ्च "प्रवृत्तिश्च विभाषोक्तविधेः क्वचित् । अपूर्वस्य विधानाञ्च बहुलं स्याच्चतुर्विधम् ।" इत्युक्तेरिह बहुलाद् यदपरं बहुलं ग्रहीष्यति तदपि स्पष्टार्थमेव । तद् यथा—रम्भोरुकेलिचलत्, वृद्धानड्वान् वृद्धानडुत्कः । वृद्धोऽनड्वान यस्य स पुनर्रडुत्कः एव । यथा राजानिसंख्या । सर्वनाम वृद्धमाथुर कारक राजपुरुष उक्तेभ्योऽप्रत्यये निषेधः । तद्धितसंज्ञेयं ऊढा, तेन गरीयसी ।

७५. ननु समर्थपदसमूहो वाक्यम्, तस्यैव समाससंज्ञा, ततश्च पदमेव समासावयवः समासावयवः न च समासात् प्राक् टादिर्विधीयते सर्व्वत्र लक्षणापतेः ? कथं तर्हि टादिप्रत्ययः समासावयवः न च समासात् प्राक् टाविविधिर्विधीयते सर्व्वत्र लक्षणापत्तेः ? सत्यम् यथा प्रारम्भकत्वात् राजादिसमासावययवस्तथा तदुक्तष्टादिरपि, तेन अवयवायवोऽपि समासावयव इत्याह समासावयव इति । अतोऽधिराजमुपराजमित्यादावव्ययीभावादम् । द्विराजमित्यादौ समाहारनिमित्तं क्लीबत्वम् । पात्रादित्वात् द्विपूरी त्रिपूरीत्यादावदन्तो द्विगुरिति स्त्रीलिङ्गत्वे द्विगोरिति ङी । तर्हि कथमकारान्तप्रकृतेरेवाभिनान्नेह पञ्चगवमित्युक्तम् ? सत्यम्, मतभेदात् । पात्रादित्वादित्यन्ये । अतएव पञ्चराजीत्युदाहरिष्यति । तत्र राजधुरेत्यत्र परं लिङ्गमित्यादिना स्त्रीलिङ्गता । वाक्त्वचिनीत्यत्र द्वन्द्वेऽदङ्गागादिति व्रीह्यादित्वादिन् ।

७८. **नञस्तत्पुरुषाद् वा तु पथः ।**

नञ् पूर्वात् तत्पुरुषात् समासान्तो न भवति ।
अराजा, असखा, अगौः अधुः । पथो वा, अपथम्, अपन्थाः । तत्पुरुषादिति किम् ? अराजकं नगरं, अधुरं शकटम् ।

७९. **ऋक्-पथि-पूरपोधुरश्चानक्षेऽत् ।**

ऋगादिभ्यः सर्वसमासेऽद् भवति । ऋचोऽर्धं अर्धर्च्चम्ः, अनृचो माणवकः, बह्वचश्चरणविषय एव । राजपथः, बहुपथो देशः । पुरः क्लीबे-नान्दीपुरम्, त्रिपुरम् । अपः परलिङ्गता च नेष्यते—गङ्गापः, द्वीपम् बह्वपानि तड़ागानि । कथं बह्वम्पि ? समासान्तो विधिरनित्य इति । धुरः—द्विधुरम्, राजधुरा, महाधुरः । अनक्ष इति किम् ? अक्षधूः, दृढ़धूरक्षः स्यन्दनस्य ।

८०. **प्रत्यन्ववात् सामलोम्नः ।**

प्रत्यादिपूर्वात् साम्नो लोम्नश्चाद् भवति । प्रतिसामम्, अनुसामम्, अवसामम्, प्रतिलोमम्, अनुलोमम्, अवलोमम् ।

८१. **संख्याया नदीगोदावरीभ्याम् । कृष्ण-पाण्डूदकाच्च भूमेः ।**

संख्यादिपूर्वात् नद्यादेरत् स्यात् । द्विनदम्, पञ्चगोदावरम्, दशभूमं सूत्रम्, कृष्णभूमो देशः, (उदक्भूमम्) उदकभूमम्, पाण्डुभूमा स्थली ।

८२. **अक्ष्णोऽप्राण्यङ्गे ।**

अप्राण्यङ्गे गमोऽक्ष्णोऽत् स्यात् । लवणाक्षम्, गवाक्षः पुष्कराक्षः । प्राण्यङ्गे तु, गवाक्षिः (गोऽक्षिः) ।

८३. **ब्रह्मराजहस्तिपल्येभ्यो वर्च्चसः ।**

एभ्यो वर्च्चसोऽत् स्यात् । ब्रह्मवर्च्चसम् ? राजवर्चसम्, हस्तिवर्चसम्, पल्यवर्चसम् ।

---

७९. ननु नञ्बहुभ्यां माणवकचरणयोरिति लक्षितमन्यैः तत्कथमिह लभ्यते इत्याहानृचो माणवकः, बह्वृश्चरणंविषय एवेति बाहुल्यादिति शेषः । अन्यत्र अनृक्कं साम, बह्वृकं सूक्तम् । शेषाद्वेति कप् । पुरः क्लीब इति बाहुल्यादिति शेषः । अदन्तेन पुरशब्देन सिद्धे पूरोग्रहणं राजपूरित्यादि प्रयोगनिरासार्थम् ।

८४. **तमसोऽव समन्धेभ्यः ।**
अवादेस्तमसोऽत्स्यात् । अवतमसम्, सन्तमसम्, अन्धतमसम् ।

८५. **निःश्वोभ्यां श्रेयसः ।**
अत् स्यात् । निःश्रेयसम्, श्वश्रेयसम् ।

८६. **रहसोऽन्वतप्तात् ।**
अत् स्यात् । अनुरहसम्, अवरहसम्, तप्तरहसम् ।

८७. **प्रादेरध्वनः ।**
अत् स्यात् । प्राध्वो, दुरध्वः । (पूर्णः समासमात्रविधिः)

८८. **द्विगु-तत्पुरुषकर्म्मधारये: (आद्वन्द्वमयमधिकारः) ।**

८९. **संख्याऽव्ययादङ्गुलेः ।**
आभ्यामङ्गुलेरत्स्यात् । द्वेऽङ्गुली प्रमाणमस्य इति मात्र टो लुक द्वयङ्गुलम् त्र्यङ्गुलम्, निर्गतमङ्गुलिभ्यो निरङ्गुलम् । द्विग्वादौ किम् ? पञ्चाङ्गुलिर्हस्तः ।

९०. **आयुषो द्वित्रिपुरुषात् ।**
अत् स्यात् । द्व्यायुषम्, त्र्यायुषम् । समाहारेऽभिधानम्, नेह द्वयोरायुः द्वयायुः त्र्यायुः, पुरुषायुषम् ।

---

८४. अतादिभ्योऽस-इत्यस्प्रत्ययान्तोऽदन्ततमसशब्देनैव सिद्धौ सन्तम इत्यनिष्टरूप निरासार्थिर्थदम् ।

८५. यद्यपि श्वशब्दः किल्बिषवचनः श्रेयः शब्दश्च प्रशस्यतरवचनस्तथाप्यत्र समुदायेन प्रोज्झितावयवार्थेन शुभमभिधीयते स्वभावात् । बहुव्रीहौ तु निश्चितं श्रेयोऽनेन निश्रेःयान्, नेयस् इति कप्निषेधः । अत्र श्वसोवसीय श्रेयस् इति वक्तव्यम् । अस्यार्थः श्वशब्दात् समासमात्रे स्यात् । श्वोऽवसीयसं वो भूयात् । वसुवच्छब्दादीयसु प्रत्यये मतोर्लुकि वसीयः शब्दः श्रेयसि वर्त्तते । श्वशब्दः कल्याणवचन इति स्वभावादुत्तरपदार्थवचनः, पूर्वं समासः । यथा द्विस्तावत्रिस्तावाविति वक्तव्यम् । अस्यार्थः, वेदि श्चेदभिधेया भवति तर्हि द्विस्ताव त्रिस्ताव इमौ निपात्येते । यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा कस्याञ्चिद्विकृतौ तत्रेमे वर्त्तते, द्विस्तावा, त्रिस्तावा वेदीकरणीये क्रियासामानाधिकरण्यम् । अन्यत्र द्विस्तावती रज्जुः । तथा गोधूल इति वक्तव्यम् । अस्यार्थः, गोशब्दादुःत्तरस्मात् धूलिशब्दात् स्यात् । गोर्धूलिर्यत्र स गोधूलः । अर्शादिवदित्यन्ये ।

९१. **उक्षणोजात-महद्वृद्धात् ।**

अत् स्यात् । जातोक्षः महोक्षः, वृद्धोक्षः ।

९२. **रात्रेर्व्वर्षा-पुण्य-दीर्घैकदेश-सर्वाव्ययवसंख्या संख्यातात् ।**

एभ्यो रात्रेरत् स्यात् । वर्षारात्रः, पुण्यरात्रः, दीर्घरात्रः । एकदेशात्—पूर्वरात्रः, अपरात्रः । सर्व्वादेः सर्वरात्रः । (अव्ययात्) नीरात्रः, अतिरात्रः । (संख्यायाः) पञ्चरात्रः । गणात् क्लीबे, गणरात्रम्, संख्यातरात्रः ।

९३. **टऽह्लोऽह्न एकदेशादेरनेकादसमाहारे ।**

एकदेशसर्वाऽव्ययसंख्या संख्यातादहन्शब्दस्य वक्ष्यमाण-टप्रत्यये परेऽह्लादेशो भवति । पूर्वाह्लः, मध्याह्लः, सर्व्वाह्लः, निरह्लः, प्रत्यह्लः, अत्यह्ल, द्वयोरह्लोर्भवः द्विगोरजादेर्लुगनपत्ये टिकण्लुक्, ततष्टः, द्वयह्लः, त्र्यह्लः, संख्यातमहः—संख्याताह्ल । एकदेशादिति किम् ? पुण्याहम् । अनेकादिति किम्ः एकाहः । असमाहार इति किम् ? द्वयहः, त्र्यहः ।

९४. **संख्या विसायादह्नस्याहन् वा ङौ ।**

ङौ परे—संख्यादिपूर्वस्याह्नस्याहनादेशो भवति वा । द्वयह्नः, द्वयहनि (द्वयह्नि) त्र्यह्ने, त्र्यहनि (त्र्यह्नि) सायान्हे, सायाहनिः (सायाह्नि) ।

९५. **निस्त्रिंशादयश्च ।**

टिलोपान्ता निपात्यन्ते । निस्त्रिंशानि वर्षाणि चैत्रस्य, निर्गतस्त्रिंशतोऽङ्गुलिभ्यः निस्त्रिंशःखड्गः, निश्चत्वारिंशाः ।

९६. **राजाहः सखिभ्यष्टः ।**

द्विगुतत्पुरुषकर्मधारये राजादेष्टः स्यात् । पञ्चराजी । देवराजः, महाराजः, द्वयहः, सोमाहः, उत्तमाहः, राजसखः । न लिङ्भेदे—महाराज्ञीः ।

---

८९ कथं भूमेरप्यङ्गमङ्गुलमिति ? यवमानवचनोऽङ्गुलशब्दोऽदन्तः । अङ्गुलम् यवोमत इत्यमरमाला ।

९४. नन्व्ययादह्लोऽह्लो विहितः, कथमव्ययात् सायंशब्दाद् अयमादेशः स्यात्? तथाहि "सायोवौ विकालकः" इति त्रिकाण्डशेषः । "दिनान्ते पुंसि सायः स्यात् सायाह्नेः सायमव्ययम्" इति शब्दार्णवः । सत्यम् तस्मादेव निर्द्देशात् । यद्वा सायंशब्दस्याव्ययस्य मलोपो निपातनात् ।

९७. **उरसःप्रधानार्थे ।**

टः स्यात् । हस्तिनापुरः प्रधानम्, हस्त्युरसम्, अश्वोरसम् ।

९८. **अनोऽश्मनायः सरसोजातिसंज्ञयोः ।**

एभ्यष्टः स्यात् । जातौ—उपानसम्, अमृताश्मः, कालायसम्, मण्डूकसरसम्, नाम्नि महानसम् पिण्डाश्मः, लोहितायसम्, जलसरसम् ।

९९. **ग्रामकौटात्तक्षणः ।**

टः स्यात् । ग्रामतक्षः, कुटीभवः तक्षा, कौटतक्षः स्वतन्त्रः ।

१००. **शुनोऽतिगोष्ठादुपमायाश्चाऽप्राणिनः ।**

शुनष्टः स्यात् । अतिश्वः, अतिश्वी मृगी । गोष्ठश्वः । उपमायाश्च—फलकः श्वेव फलकश्वो व्याघ्रादिः । अप्राणिन इति किम् ? वानरः श्वेव वानरश्वा ।

१०१. **मृगपूर्वोत्तरोपमानात् सक्थ्नः ।**

मृगादे सक्थ्नष्टः स्यात् । मृगसक्थम्, पूर्वसक्थम्, उत्तरसक्थम् । उपमानात् —फलक सक्थम् ।

१०२ **ब्रह्मणो जानपदाख्यायाम् ।**

ब्रह्मणष्टः स्यात् । जनपदभवाभिधानञ्चेत्, सुराष्ट्रब्रह्मः काशीब्रह्मः । जानपदाख्यायामिति किम् ? देवब्रह्मा नारदः ।

१०३. **कुमहद्भ्यां वा ।**

कुब्रह्मः, कुब्रह्मा, महाब्रह्मः, महाब्रह्मा ।

---

९८. कथं बिन्दुसरः एकसरः अच्छोदसर इति ? रूढार्थसंज्ञाविधानम् । शूर्पनखावदिति वर्द्धमानमिश्राः । चन्द्रसरः द्वैतसर इत्यत्र पूर्वपदे संज्ञा न पुनः समुदायस्य संज्ञावाचकत्वादिति क्रमदीश्वरः ।

९९. कुटीभवस्य तक्षा इति वाक्यं न समीचनम् । स्वातंत्र्यप्रतिबन्धत्वबोधकत्वात् ।

१०२. जनपदे भवो जनपदस्तदेकदेशस्तन्नाम्नि गम्ये जनपदात् ब्रह्मणष्टः स्यात् । ब्रह्मशब्दोऽयं ब्राह्मणार्थः । सुराष्ट्रब्रह्म इति शौण्डादेराकृतिगणत्वात्, योगविभागाद्वा समासः । षष्ठीतत्पुरुषो वा । जनपदो ब्रह्मन्निति सूत्रयतो नायमभिप्रायः ।

१०४. **गोरतद्धितलुकि ।**

टः स्यात् । पञ्चगवम्, राजगवी, स्त्रीगवी, पुंगवः । अतद्धितलुकीति किम् ? पञ्चगुः पटः, क्रीतार्थे टिकण्, द्विगोरर्ध्यर्धपूर्वाच्च लुक् संज्ञायां टिकण्लुक् ।

१०५. **नावो द्विगौ । अर्द्धाच्च ।**

द्विगुसमासे नावष्टः स्यात् । द्विनावम्, पञ्चनावप्रियः । द्विगोरिति किम् ? द्वयोर्नौः द्विनौः । अतद्धितलुकीत्येव, पञ्चनौर्गजः । अर्द्धाच्च—अर्धनावी, अर्द्धनावम् । लोकाश्रयत्वात् परलिङ्गता व्यभिचरति ।

१०६. **खार्य्या वा ।**

द्विगौ अर्द्धाच्च खार्य्याष्टो भवति वा । द्विखारम्, द्विखारी, अर्द्धखारम्, अर्द्धखारी ।

१०७. **द्वित्रिभ्यामञ्जलेः ।**

आभ्यामञ्जलेष्टः स्यात् । द्वयञ्जलम्, त्र्यञ्जलम् । द्विगोरित्येव-द्वयोरञ्जलिः द्वयञ्जलिः । अतद्धितलुकीत्येव, क्रीतार्थे द्वयञ्जलिः ।

१०८. **ष-द-चु-हो द्वन्द्वे समाहारे ।**

द्वन्द्वे ष-द-चवर्ग-हान्तात् टः स्यात् । ग्रीष्मप्रावृषम् । चु—वाक्त्वचम्, उपाध्यायशब्दप्राच्छम्, शीघ्रजम्, छत्रोपाहनम्, पिकमधुलिहम् - समाहार इति किम् ? ग्रीष्मप्रावृषौ । द्वन्द्व इति किम् ? पञ्चवाक्, परमवाक् ।

१०९. **धेन्वनडुहौ ।**

असमाहारे निपात्येते ।

११०. **स्त्रीपुंसर्गयजुषर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिव रात्रिन्दिवाहर्दिवाऽहोरात्राः ।**

द्वन्द्वेऽमी निपात्यन्ते । स्त्रीपुंसौ, ऋग्यजुषम्, ऋक्सामे, वाङ्मनसे, अक्षिभ्रुवम्, दाराश्च गावश्च दारगवम्, उरूच अष्ठीवांश्च उर्वष्ठीवम्, पादौ च अष्ठीवन्तौ च पदष्ठीवम्, नक्तन्दिवम्, रात्रिन्दिवम् । वीप्सायां अहर्दिवम्, अहोरात्रौ । उक्तो द्वन्द्वः ।

---

११०. नक्तञ्च दिवा च सप्तम्यर्थप्रधानेऽव्यये यद्यप्यादेशसापेक्षत्वेऽसामर्थ्याद् द्वन्द्वोऽत्र न व्याप्नोति तथापि निपातसामर्थ्यादेव भवति । नन्वहर्दिवमिति प्रयोग एव न भवति पर्य्यायित्वादेकेनैव तदर्थप्रतीतेर्द्वितीयप्रयोगो न युक्तः इत्याह वीप्सायामिति । वीप्साप्रयोगेनार्थद्वयप्रयोगः, वीप्सार्थे च द्वन्दोऽनमिधानादवगन्तव्य इति ।

११११. अव्ययीभावे शरदादेः ।

टः स्यात् । उपविपाशम्, उपदिवम्, प्रतिदिशम्, प्रतिदृशम्, उपचतुरम्, सरज-समभ्यवहरति ।

१११२. प्रतेरुरसः सप्तम्यर्थे ।

उरसि प्रतिवर्त्तते प्रत्युरसम् । सप्तम्यर्थ इति किम् ? उरः प्रतिगतं प्रत्युरः । (अत्र सप्तम्यर्थेऽव्ययीभावः)

१११३. अक्ष्णः समऽनुप्रतेः ।

समक्षम्, अन्वक्षम्, प्रत्यक्षम् ।

१११४. अनः । क्लीबाद् वा ।

अनन्ताट्टः स्यात् । राज्ञः समीपे यो वर्त्तते उपराजम् । दशानां समीपे ये वर्त्तन्ते उपदशम्, अध्यात्मम् । क्लीबाद् वा, उपभस्मम्, उपभस्म, उपचर्म्मम्, उपचर्म्म, प्रत्यहम् प्रत्यहर्याति ।

१११४. नदी-गिरि-पौर्णमास्याग्रायणीभ्यः ।

वेत्येव, उपनदम्, उपनदि, उपगिरम्, उपगिरि । उपपौर्णमासम्, उपपौर्णमासि, उपाग्रहायणम्, उपाग्रहायणि ।

१११६. झयः (श्च) ।

झयन्ताट्टो वा स्यात् । उपदृशदम्, उपदृशत्, प्रतिसमिधम्, प्रतिसमित् ।

१११७. उपशुनोपजरसे नित्यम् ।

उपशुनम्, जराया समीपे उपजरसम् ।

१११८. अनुगवमायामे ।

अनुगवं शकटम् । आयाम इति किम् ? गोः पश्चादनुगु ।

१११९. अक्षि-सक्थिभ्यां बहुव्रीहौ स्वाङ्गार्थे ।

आभ्यां स्वाङ्गार्थे टः स्यात् । दीर्घाक्षः, मृगाक्षी, दीर्घसक्थः, बहुव्रीहाविति किम् ? मृगस्याक्षि मृगाक्षः । अतो बहुव्रीहौ समासान्तो विधिः ।

१२०. नञ्दुसुभ्योः विभाषितौ हलि सक्थेः ।

नञादेर्हलिसक्थिभ्यां टो विकल्पितः । अहलः अहलिर्वा, दुर्हलो दुर्हलिर्वा, सुहलः सुहलिः, असक्थः, असक्थिः, (अशक्तः अशक्तिरिति केचित्) दुःसक्थः, दुःसक्थिः । सुसक्थः, सुसक्थिः ।

१२१. अङ्गुलेर्दारुणि ।

दार्व्वर्थे अङ्गुलेष्टः स्यात् । द्व्यङ्गुलं दारुः ।

१२२. द्विजिभ्यां मूर्द्धनः ।

टः स्यात् । द्विमूर्द्धः, त्रिमूर्द्धः ।

१२३. संख्येये डो ऽबहोः ।

बहुव्रीहौ संख्येयेः डः स्यात् । उपदशाः, आसन्नविंशाः, एकद्वाः, लक्षकोटाः । अबहोरिति किम् ? उपबहवः ।

१२४. अत् पूरणीप्रमाणीभ्याम् ।

स्त्रीलिङ्गे पूरणीप्रत्यान्तात् प्रमाणीशब्दात् च अत् स्यात् । कल्याणीं पञ्चमी रात्रींणां यासां ताः कल्याणींपञ्चमाः रात्रयः, भार्याप्रमाणाः कुटुम्बिनः ।

---

१२१. ननु अङ्गुलिशब्दो दार्व्वभिधेयो नास्त्येव तत् कथं दार्व्वर्थे इत्युक्तम् ? सत्यम् गौण्या लक्षणया अङ्गुलिसदृशो दार्व्वयव उच्यते । द्वे अङ्गुली यस्मिन् तद् द्व्यङ्गुलं, द्व्यङ्गुलावयवं धान्याद्युत्क्षेपणकाष्ठमुच्यते ।

१२४. पूरणशब्दार्थं विवृणोति स्त्रीति । संख्याया पूरणे डट् इत्यादिभिः सूत्रैः पूरण-प्रत्ययः । स्त्रीलिङ्गं पूरणप्रत्ययोऽन्तो यस्मात् स तथा । कल्याणपञ्चमीकः पक्ष इत्यत्र नदीलक्षणः कः समासान्तः, पुंवत्वञ्च मुख्यत्वञ्च रात्रित्वेनागतायाः, पूरण्याः समासाभिधेयत्वात् । एवं कल्याणीषष्ठाः, कल्याणीदशमा इत्यादयः । भार्याप्रमाणा इति प्रमाणशब्देन सिद्धे कः स्यादित्यारम्भः । उद्धतावयव-भेदस्य रात्रिसमूहस्य प्रधानत्वेन यथा प्रथमाद्या रात्रयः समासाभिधेयास्तथा पञ्चम्यपीति रात्रिपदार्थस्यान्यपदार्थेऽनुप्रवेशात् प्राधान्यमिति भावः ।

१२५. **नाभेः संज्ञायाम् ।**

अत् स्यात् । पद्मनाभः, ऊर्णनाभः । रूढ़िग्रहणान्नेह, प्रजा इवाङ्गादरविन्दनाभेः ।

१२६. **नेतुर्नक्षत्रपूर्वात् ।**

अत् स्यात् । मृगो नेता यासां ता मृगनेत्रा रात्रयः । पुष्यनेत्राः ।

१२७. **चतुरस्त्रिनञ्सुव्युपात् ।**

त्र्यादेश्चतुरोऽत् स्यात् । त्रिचतुराः, अचतुराः, सुचतुरः विचतुरः, उपचतुरः ।

१२८. **लोम्नोऽन्तर्बहिषः ।**

लोम्नोऽत् स्यात् । अन्तर्लोमः; बहिर्लोमः ।

१२९. **प्रादेर्नासिकाया नस् च ।**

नासिकाया अत् स्यात् नसादेशश्च । उन्नसं वक्त्रं; सुनसा स्त्री । अनुनासिकस्तु तत्पुरुषः ।

१३०. **खरणः खुरणो विग्रश्च ।**

खरादिपूर्वान्नासिकाया एते निपात्यन्ते । खरणाः, खुरणाः, विग्रः । चकारात् अन्नसादेशश्च । खरणसः, खुरणसः, विनसः ।

---

१२६. ऋक्षनेतृकः । नक्षत्रपूर्वादिति किम् ? देवनेतृकः । कथं सुमन्त्रनेत्रेण रथेन शोचन्निति नेत्रशब्देन सिद्धेः । अथ नेत्रशब्देन सिद्धेः नेतुः कः स्यादिति विधिः ।

१२९. ननूपसर्गाच्चेति मुनिसूत्रमपहाय किमिति प्रादेरित्युक्तम् ? सत्यम् ; नासिकायां प्रति तेषामुसर्गत्वाभावात् । अतस्तत्रैव नासिकां प्रत्युपसर्गत्वासम्भवादुपसर्गग्रहणं प्राद्युपलक्षकमिति न्यासकारेणोक्तम् । वासवतास्तूपसर्गान्नासिका नस् चेति सूत्रेऽतिक्रमार्थानां—प्रादीनामनुसर्गत्वादिह न स्यात् । शोभनो नासिका यस्य स सुनासिक इत्याहुः । तन्मते उन्नसमित्यत्रोदगता नासिका यस्येति वाक्ये उपसर्गत्वमस्त्येवेति ।

१३०. वे ख्यश्चेति क्रमदीश्वरः । विख्यो विग्रो विनासिकः इति रभसः । भाष्ये चान्द्रे च खकारात् परो रेफो दृश्यते । कैश्चित्पुनः खकारात् पर उकारोऽपि क्रियते विखुरिति । अतएव वेः ख्य-खु-ग्र इति शाकटायनसूत्रम् । कथं विनसा हतबान्धवेति भट्टिः ? विगतया नासिकयोपलक्षितेति व्याख्येयम् ।

१३१. **संज्ञायामस्थूलात् ।**

नाम्नि नासिकाया अत् स्यात् । द्रुणसः, गोनसः । अस्थूलादिति किम् ? स्थूलनासिको वराहः । संज्ञायामिति किम् ? तुङ्गनासिकः ।

१३२. **सुप्रातः सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदाजपदप्रोष्ठपदाः ।**

अदन्ता एते निपात्यन्ते । शोभनं प्रातरस्य सुप्रातोऽयम्, सुश्वः, सुदिवम्, शारेरिव कुक्षिरस्य शारिकुक्षः, चतस्रोऽश्रयोऽस्य चतुरश्रः, एण्या इव पादावस्य एणीपदः, अजपदः प्रोष्ठो गोः, तस्येव पादावस्य प्रोष्ठपदः ।

१३३. **नञ् सुदुरोऽसिः प्रजायाः अल्पाच्च मेधायाः ।**

नञादेः प्रजाया असिः स्यात् । अल्पाच्च मेधायाः । अप्रजाः, सुप्रजाः, दुष्प्रजसः । अमेधाः, सुमेधसो, दुष्मेधसः, अल्पमेधाः ।

१३४. **गन्धात् समवेतादित्-सूत्-पूति सुरभेः ।**

स्वादेर्गन्धादित् स्यात् । सुगन्धि कुसुमम्, उत्कट उदगतो वा गन्धोऽस्य उदगन्धिः पूतिगन्धिः, सुरभिगन्धिः । समवेतादिति किम् ? सुगन्धो गन्धवहः ।

---

१३२. सुप्रात इति प्रायः शब्देन तद्विहितं कर्म्म लक्ष्यते । अन्यथा प्रातः शब्दस्याधिकरणप्रधानतया सुशब्देन समानाधिकरणासम्भवः । एणीपदादिषु त्रिषु पद्भाव एण्याः पुंवद्भावश्च निपातनात् । चतुरश्रस्तालव्यमध्यः ।

१३४. पृथक्सिद्धयोः सम्बन्धः समवायः । तत्सम्बद्धसम्बन्धबोधकः समवेतः, स्वादिभ्यः परस्मात्तादृशाद् गन्धाद् बहुव्रीहावित् स्यात् । सुगन्धि कुसुममित्यत्र गन्धकुसुमयोः समवायसम्बन्धाद्गन्धः समवेत एव । आघ्रायिवान् गन्धवहः सुगन्धः, इत्यत्र गन्ध-गन्धवहयोः पृथकसिद्धत्वात् समवायसम्बन्धो नास्त्येव, किन्त्वरविन्दव्यतिसङ्गत्वात् संयुक्तसमवाये सुगन्धविशेषणम्, तर्हि कथं लग्नवान् सहकारसुगन्धौ मधूनीति माघः ? मधुनः पार्थिवत्वात् सहकारद्रव्यसंक्रमणाद् गन्धोत्कर्षो विवक्षितः । तथाच भट्टवार्त्तिकम्, सर्व्वे सांक्रामिका गुणा इति । पवने त्वपार्थिवत्वद्गन्धसंक्रान्तिर्नास्ति । ये तु वैशेषिकादयो गुणसंक्रान्ति न मन्यन्ते, तन्मते लग्नवान् सहकारसुगन्ध इत्येव भवति । अतएवागन्तोर्व्वेति चान्द्राः सूत्रयन्ति । दुर्गोऽप्याह तथादिभ्य आगन्तो सुगन्धञ्च सुगन्धि चेति ।

१३५. अल्पार्थे चोपमानाच्च ।

गन्धादित् स्यात् । अल्पः सूपोऽस्यां सूपगन्धिः स्थाली, घृतगन्धि भोजनम्, प्रेमगन्धि वचनम् । उपमानात्—पद्मस्येव गन्धोऽस्येति पद्मगन्धिः, करीषगन्धिः ।

१३६. क्रियाविनिमयार्थादिव्ययञ्च ।

इत् स्यात् । समासान्तश्चाव्ययं भवति । केशाकेशि, जल्पाजल्पि प्रवादिनाम् ।

१३७. द्विदण्ड्यादयश्च ।

इमे क्वचिदर्थे निपात्यन्ते । द्विदण्डि प्रहरति, द्विमुसली उभाहस्ति, उभयाहस्ति, उभाञ्जलि, उभयाञ्जलि, उभाखड्गि, उभयाखड्गि, उभार्कणि, उभयार्कणि, उभादन्ति, उभयादन्ति । नेह द्विदण्डा शाला । गणपाठात् समासान्तरेऽपि, निकुच्यकर्णि धावति कर्णौ निकुच्येत्यर्थः । यदृच्छादयश्चेति समासः । प्रोह्यपदि हस्तिनं वाह्यति, पादौ प्रोह्येत्यर्थः ।

१३८. धर्मादन् केवलाद् वा च बहुपदे ।

धर्मादन् स्यात् । प्रियधर्म्मा । वा च बहुपदे । साक्षात्कृतो धर्मो यैस्ते साक्षात्कृतधर्माणो मुनयः साक्षात्कृतधर्मा वा । परमः स्वो धर्मोऽस्येति परमस्वधर्मा परमस्वधर्मो वा । केवलादिति किम् ? परमः कुलधर्मोऽस्येति परमकुलधर्म्मः ।

१३९. जम्भा-सु-हरित-तृण-सोमात् ।

एभ्योऽनन्तो जम्भास्यात् । जम्भो भोजनम्, दन्तभेदाश्च । सुजम्भा, हरितजम्भा, इत्यादि । (स्वादिभ्यः किम् ? पतितजम्भः) ।

३४०. दक्षिणेर्म्मा व्याध-व्रणित-दक्षिणाङ्गे ।

अयमत्रार्थे निपात्यते । दक्षिणे ईर्म्मं व्रणं यस्य स दक्षिणेर्म्मा मृगः ।

१४१. जाया जानिः ।

जाया जानिः स्यात् । युवती जाया यस्येति युवजानिः, प्रियजानिः ।

१४२. धनुर्धन्वन् वा च नाम्नि ।

धनु शब्दो धन्वन् स्यात् । शार्ङ्गधन्वा, गृहीतधन्वा । कथं धृतधनुषमह्नाय तृणवत्, अनित्यत्वात् । वा च नाम्नि । पुष्पधन्वा, पुष्पधनुः ।

---

१३८. केवलात् किम् ? परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् । स्वशब्दो हीह न केवलं पूर्वपदं किन्तु मध्यमत्वादापेक्षिकम् । इति केचित् ।

१४०. मृग इत्युपलक्षणम् व्याधव्रणितदक्षिणाङ्गेऽन्यास्मिन्नपि भवतीत्यन्ये ।

१४३. जानुज्ञुः प्रसमो वा चोर्ध्वात् ।

प्र-संभ्यां जानुशब्दो ज्ञुः स्यात् । प्रज्ञुः । संज्ञुः । ऊर्ध्वाद् वा, ऊर्ध्वज्ञुः, ऊर्ध्वजानुः ।

१४४. सु-संख्याभ्यां वयसि दन्तो दतृः ।

आभ्यां दन्तो दतृ स्यात् । सुदनः कुमारः, सुदती बाला । द्विदन् वत्सः, षोडन् दम्यः । वयसीति किम् ? द्विदन्तो गजः । संज्ञायाञ्च । सुदती, फालदती, काचित् ।

१४५. अग्रान्त-शुद्ध-शुभ्र-श्यावा-ऽरोक-वृषवराहोऽहिगर्दभ-शिखर-मूषिकाद् वा ।

अग्रान्तादेर्दन्तो वा दतृः स्यात् । कुन्दकोरकाग्रदन्, कुन्दकोरकाग्रदन्तो वा, शुद्धदन् शुद्दन्तो वा । एवं श्यावदन्, श्यावदन्तो वा । अरोको निर्दीप्तिः, अरोकदन्, अरोकदन्तः । अहिदन्, अहिदन्तः, शिखरदती शिखरदन्तीत्यादि ।

१४६. अल्लुक् पादस्य संख्यासूपमानादहस्त्यादेः ।

संख्यादिपूर्वस्य पादस्य अल्लुक् स्यात् । द्विपात्, त्रिपात्, सुपात् । उपमानात्— व्याघ्रपात्, सिंहपात् । अहस्त्यादेरिति किम् ? हस्तिपादः, कण्डोलपादः ।

१४७. कुम्भपदादिषु च ।

अल्लोपोऽत्र निपात्यते । कुम्भपदी, शतपदीः एकोऽभिन्नः सर्वेषां पादोऽत्रेति एकपदी पन्थाः । गोधापदीत्यादि निपातनात् ङी नित्यम् ।

१४८. ककुदस्य पूर्णादेरवस्थायाम् ।

पूर्णादेः ककुदस्याल्लुक् स्यात् । पूर्णककुत्, जातककुत्, स्थूलककुत् तरुणः । अवस्थायामिति किम् ? श्वेतककुदः ।

१४९. त्रिककुच्छैलविशेषे ।

पर्वतभेद त्रिककुत्स्यात् । (त्रिककुदोऽन्यत्र)

---

१४६. कथं गूढपद्भूजङ्गा ? पृषोदरादित्वादकारलोपः इति पाणिनीयश्चान्द्राश्च वदन्ति । पादयतीति क्विप् पात्, ततो गूढपद्भजङ्ग इति दुर्गः । तेन पादः (५/२/५) इति ङी न स्यात् । गूढपात् सर्पी कृतसमासान्तस्यैव पादस्तत्रग्रहणात् सुसंख्यागूढाच्चेति सूत्रयतः क्रमदीश्वरस्य चिन्त्यमेतत् ।

१५०. उद्विभ्यां काकुदस्य । पूर्णाद् वा ।

अल्लुक् स्यात् । काकुदं तालुका ? उत्काकुत्, विकाकुत् । पूर्णाद् वा—पूर्णकाकुत्, पूर्णकाकुदो वा ।

१५१. सुहृन्मित्रे । दुर्हृच्छत्रौ ।

अन्यत्र सुहृदयः साधुः, दुर्हृदयश्चौरः ।

१५२. ऋन्नदी-सर्पिरादेः कप् ।

अदन्तात् नदीसंज्ञकेभ्यः सर्पिरादेश्च कप् स्यात् । वृद्धपितृकः, सन्त्रीकः, सवधूकः ससर्पिष्कः, व्यूढोरस्कः, युक्तोपानत्कः । अर्थान्नञः अनर्थकः । इनः स्त्रियाम्—बहुदण्डिका शाला, बहुवाग्मिका-सभा । इह गणे लक्ष्मीरनड्वान् पयो नौः पुमानित्येकवचनान्ता गृह्यन्ते । सुलक्ष्मीकः, वृद्धानडुत्कः । द्विवचन बहुवचनान्तेभ्यो विभाषा । बहुलक्ष्मीर्बहुलक्ष्मीकः, प्राप्ते नावौ येन प्राप्तनौः, प्राप्तनौकः । द्विपुमान्, द्विपुंसकः । तदन्तात् कप्प्रतिषेधः, क्षतदृढोरसौ राक्षसः ।

१५३. शेषाद् वा ।

बहुव्रीहौ यस्मात्समासान्तो न विहितस्तस्मात् कप् वा स्यात् । बहुखट्वाकः, बहुखट्वः, बहुदण्डिकः, बहुदण्डी । शेषादिति किम् ? प्रियपथः, बह्वपः कूपः ।

१५४. नेयसः ।

ईयसान्तात् कप् न स्यात् । बहुप्रेयान्, बहुप्रेयसिर्नृपः ।

१५५. स्तुतौ भ्रातुः ।

(प्रशंसायां गम्यायाम्) न कप् स्यात् । सुभ्राता लक्ष्मणः । स्तुताविति किम् ? चौरभ्रातृकः ।

१५६. स्वाङ्गनाडीतन्त्रीभ्याम् ।

न कप् । बहुनाड़िः कायः, बहुतन्त्री ग्रीवा, तन्त्री शिरा । स्वाङ्ग इति किम् ? बहुतन्त्रीका वीणा ।

---

१५२. इहेति सर्पिरादावित्यर्थः । उक्तञ्च "अनडुत् पुंसयो-लक्ष्मीनावामेकत्ववाचिनाम् । नित्यं कप् स्याद् बहुव्रीहौ वा स्यादद्वित्वबहुत्वयोः" प्राप्तनौक इत्यादौ तदन्तादिति ग्रह्णवता प्रातिपदिकेन तदन्तविधिरिष्ट इति न्यायादिति शेषः ।

१५७. **निष्प्रवाणिः।**

निपात्यते। निर्गता प्रवाणी यस्मात् (यस्य) स निष्प्रवाणिरपनीतशलाको नवपटः। उक्ताः समासान्ता,।

इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
पञ्चमस्याध्यायस्य प्रथमः पादः

————

१५७. नाम्नीति वक्तव्यम्। संज्ञायां कप् न स्यात्। विश्वो देवोऽस्य विश्वदेवः, विश्वयशा इत्यादि।

अथ पञ्चमोऽध्यायस्य

द्वितीयः पादः

स्त्रीतद्धित-प्रकरणम्

१ स्त्रियामतक्रुञ्चादेराप् ।

स्त्रीलिङ्गेऽदन्तात क्रुञ्चादेर्हलन्तात् च आप् प्रत्ययो भवति । खट्वा, रामा, कन्या, देवदत्ता । तपरग्रहणान्नेह, संस्था, स्त्री, शुभंया । क्रुञ्चादेः—क्रुञ्चा, देवविशा । *ऋचि पादान्तात् । द्विपदा त्रिपदा गायत्री । *गिरादेर्व्वा । गिरा गीः, वाचा वाक्, दिश-दिक्, क्षुधा क्षुत्, उष्णिहा उष्णिक् । इह टित्त्वेऽपि सम्प्रहाणा, अपरहाणा, पूर्व्वाहाणेति च णत्वं मिपातनात् । अतः स्त्रियामित्यधिकारः ।

२. ऋदुगिन्नाञ्चेरमन्मातृपञ्चादेर्ङी ।

ऋदन्तादुगिदन्ताच्चस्त्रियां ङी स्यात् । कर्त्री, भवती, बहुगुणवती दण्डिनी, प्राची । अञ्चिग्रह्लादधातोरुगिनेष्यते, उखास्रदियम् । अमनादेरिति किम् ? मनन्तात् पामा, सीमा । मात्रादेः, माता दुहिता, स्वसा ननान्दा, याता, तिस्र, चतस्रः । पञ्चादेः पञ्च सप्त नव स्त्रियः । *नान्तसंख्यायास्तदन्ताच्च । प्रियपञ्चानो वेश्याः ।

३. वनो रश्चान्तोऽयुधः ।

वनन्तात् ङी स्यात् । नश्च रेफादेशः । धीवरी, बहुदृश्वरी, सुत्वरी । अर्थवद-ग्रहणान्नेह अतिशुनी । अयुध इति किम् ? राजयुध्वा, सहयुध्वा ।

४. वा बहुव्रीहौ ।

वनन्तात् बहुव्रीहौ ङी वा स्यात् । बहुधीवरी, बहुधीवा वा ।

५. पादोऽनृचि ।

पादान्तात् ङी वा स्यात् । द्विपदी, द्विपात्, भस्य पादः पत् ? अनृचीति किम् ? द्विपदा, त्रिपदा ऋक् ।

६. ऊधसो ङी सोनश्च ।

बहुव्रीहौ ऊधसन्तात् ङी स्यात् सोनश्च । कुण्डोघ्नी, निरुघ्नी चतुरुघ्नी ।

७. दाम्नः संख्यादेः । हायनाद्वयसि ।

संख्यादेर्दाम्नो हायनान्ताच्च बहुव्रीहौ ङी स्यात् । द्विदाम्नी, त्रिदाम्नी गौः । संख्यादेरिति किम् ? उद्दामा वडवा ।

८. **अनो वोपान्तलोपिनो नैवान्यस्मात् ।**

अनन्तादुपधालोपिनो ङी वा स्यात् । बहुराज्ञी बहुराजा वा, बहुतक्ष्णी, बहुतक्षा वा, सुधाम्नी, सुधामा वा । उपान्तलोपिनोऽन्यस्मादनन्तान्नैव, सुपर्वाणः सुशर्माणः स्त्रियः । *नित्यं संज्ञायाम् । सुराज्ञी नाम नगरी । वा बहुव्रीहौ नियमात् अतिपर्व्वणी क्रिया ।

९. **डाब्वाऽनो मनोऽन्यत्रापि ।**

पुनरन्ग्रहणादनन्तमात्राद् बहुव्रीहौ डाप् वा स्यात् । सुराजे—सुराजानौ, सुपर्वे सुपर्वाणौ, बहुधीवे बहुधीवानौ । मनन्तादन्यत्रापि, सुसीमे सुसीमानौ । तत्पुरुषे च । अतिपटिमे अतिपटिमानौ । स्वार्थे च, सीमे सीमानौ ।

१०. **स्वार्थे ।**

अतः स्त्रियां स्वार्थे विधिः ।

११. **टिदण् गौरादेर्ङी ।**

टितोऽणन्तात् गौरादेश्च स्वार्थे स्त्रियां ङी स्यात् । टित्—कुरुचरी, गायनी, वैनतेयी । अण्—कुम्भकारी, औपगवी । गौरादेः—गौरी, कुमारी, तरुणी, वर्करी, वधूटी, चिरण्टी, वलभी, किशोरी, नदी सखी, अशिश्वी, वर्षाभ्वी, पिप्पली, चाण्डाली, पुटी, घटी, पूरी, कल्याणी, शबरी, पिशङ्गी, शारङ्गी, निष्कली, विकली, पितामही, मतामही, हयी, गवयी, शुनी, द्रोणी. पृथिवी, मत्सी, मानुषी, ऋष्यी, वृषी, बिम्बी, प्लवी, चौरी, अनडुही । कुम्भी पात्रे । गोणी सत्यादावपने । स्थली अकृत्रिमाभूश्चेत् । *भाजी पक्वायाम् । *नागी स्थूला चेत् । जातो तु नाग्येव, नागाऽन्यत्र । काली कृष्णायाम् । *नीलात् प्राण्योषध्योः । नीली वडवा, नीली ओषधिः । नीला अन्यत्र । कुशी लोहविकारे । कामुकी मैथुनेच्छायाम् । कामुका अन्यत्र । कबरी केशवेशे । केवलादेः संज्ञायाम् । केवली नाम ज्योतिषम्, मामकी देवताः । समानी छन्दः । सुमङ्गली कापि । पृथ्वी भूमौ, नान्यत्र । स्वार्थ इति किम् ? बहुकुरुचरा नगरी, बहुकुम्भकारा इति, पठिताश्चापठिताश्च गौरादौ ज्ञेयाः ।

---

९. नन्वनन्तरस्य (परि० २६) इति न्यायेन इत्यनुवर्त्तते एव ततः किमन्ग्रहणेनेत्याह पुनरिति । बहुधीवेति वा बहुव्रीहावित्यनेन बहुधीवरी अपि । तत्रान्यत्रेत्यन्यपदेन बहुव्रीहिरुदस्तः । ततः समासान्तरे स्वार्थे भवतीत्यतो वक्ष्यति तत्पुरुषे च । स्वार्थे चेति वा ग्रहणमिहोत्तरत्र नित्यत्वार्थम् ।

११. वयस्य वचनेऽह्योड़ादेरिति वक्तव्यमित्याह कुमारीत्यादि । कुमारी, किशोरी, कलभी, करभी, शुनन्धयीति खशि घेटष्टकारः स्वार्थकः । प्रथमं वयः तरुणी

१२. **नण्-स्नण्-क्वरपः ।**

ननाद्यन्तात् ङी स्यात् । स्त्रैणी, पौंस्नी, इत्वरी ।

१३. **गार्ग्यादेष्टेटायनश्च बहुलम् ।**

गार्ग्यादेः स्त्रियां ङी स्यात् । टेरायनादेश्च बहुलम् । गार्गी गार्ग्यायणी, वात्सी वात्सायनी । बाहुल्यान्नित्यं लौहित्यादेः, लौहित्यायनी, सांशित्यायनी, कात्यायनी, शाकल्यायणी, माधव्यायनी बाभ्रव्यायणी । आङ्गिरसे काप्यायनी, वतण्डादङ्गिरसे यणो लुक् स्त्रियामायनश्च, वतण्डी वातण्डचायनी ।

१४. **कौरव्यासुरिमाण्डूकाच्च ।**

ङीआयनौ स्याताम् । कौरव्यायणी, आसुरायणी, माण्डूकायनी । तस्येदमित्यणन्तात् कौरवी सेना, माण्डूकी भार्याः ।

१५. **आवटचादाप् च ।**

आवटचा, आवटचायनी ।

१६. **द्विगोः ।**

द्विगुसमासान्तात् स्त्रियां ङी स्यात् । द्विशती, त्रिलोकी, त्रिखट्वी, त्रिफली । त्रिफला आमलक्यादित्रिके रूढिः ।

तलूनी, वर्करी वधूटी, चिरण्टी, द्वितीयं वयः । व्वस्थावाचित्वादेव होड़ाद्युदासः । होड़ा बाला वत्सा मध्या डिम्भा कन्या पाका नन्दा स्तनपा उत्तानशया । सखीति ईकारान्तोऽयम् । सहखेन वर्त्तते या सा सखीति न्यायः । अशिश्वीति न विद्यते शिशुरस्या अशिश्वी जाया । गणपाठाद् बहुव्रीहावपि वर्षाह्वीति । वर्षाभूर्वृन्दारिकेति । पुंवत्त्वमपीच्छन्ति वर्षाभूरित्येव साधुः, वर्षाह्वीत्यपपाठ इति वासवताः । मामकग्रहणं नियमार्थम्, अनन्तत्वादेव सिद्धेः, तेन लोकेऽसंज्ञायां मामिका ।

१३. अङ्गिरसे काप्यायनीति कपिशब्दोऽत्र ब्रह्मवचनः अन्यत्र काप्येति वर्द्धमानः । अस्मन्मते तु यणेव स्यात् । बाहुल्यात् क्वचिदन्यदेवेत्याह वतण्डादिति । वतण्डादङ्गिरसे स्त्रियां यणो न लुक् लुब्लुकालुप्ते इतिनिषेधादायनश्च न स्यात् । गोत्रप्रत्ययान्तत्वात् जाते ङी स्यादेव । वतण्डी अन्यत्रेति, आङ्गिरस इत्यर्थः । वातण्डायनीति लोहितादित्वात् । वर्द्धमानस्तु मनायी शब्दात् मानाय्यायनी, मनावीशब्दान्मानाव्यायनी, मनुशब्दान्मानव्यायनीत्याह बाहुल्यादयोपान्तान्न स्यात्, गौकक्ष्या शार्कराक्ष्या पौतिमाष्या ।

१७. **तद्धितलुकि परिमाणादसंख्याकालविस्ताचितकम्बल्यात् ।**

परिमाणान्ताद् द्विगोस्तद्धितलुकि ङी स्यात् । क्रीतार्थे—द्व्याढ़की: द्विप्रस्थी । परिमाणादिति किम् । पञ्चाश्वा । लुकीति किम् ? द्विपण्या । असंख्यादेरिति किम् ? द्विशता, द्विवर्षा द्विविस्ता, द्व्याचिता, द्विकम्बल्या ।

१८. **काण्डादक्षेत्रे ।**

काण्डान्तात् द्विगोस्तद्धितलुकि ङी स्यात् । द्वे काण्डे परिमाणमस्याः द्विकाण्डी रज्जुः । अक्षेत्र इति किम् ? द्विकाण्डा क्षेत्रभक्तिः ।

१९. **पुरुषात् प्रमाणे वा ।**

प्रमाणे वर्त्तमानात् पुरुषान्तात् द्विगोस्तद्धितलुकि ङी वा स्यात् । द्विपुरुषी यष्टिः, द्विपुरुषा वा ।

२०. **अन्तर्वत्नी गुर्विण्याम् ।**

मत्वन्तान्नो निपात्यते ।

२१. **पतिवत्नी भार्य्यायाम् ।**

भार्य्यार्थेऽत्र मतोम्मोवत्वं नकारश्च निपात्यते ।

२२. **पत्युरेश्चन ऊढ़ायाम् ।**

पत्युर्ङी स्यादेश्च नकारः । ऊढ़ायां भार्यायां पत्नी, नान्यत्र ।

२३. **वाऽन्यपदार्थे नित्यं सपत्न्यादौ तु ।**

अन्यपदार्थे स्त्रियां पत्युर्ङी वा स्यात् । एश्च नकारः, वृद्धपत्नी वृद्धपतिः । नित्यं तु सपत्न्यादौ, समानः पतिरस्या सपत्नी । समान एक वीर पिण्ड भ्रातृ पुत्रादिः ।

---

१९. ननु पुरुषशब्दोऽयं जातिवचनः, तत् कथमस्य प्रमाणे वृत्तिः ? सत्यम् पुरुषशब्दः पुरुषप्रमाणे वर्त्तते गौणत्वात् । यथा सिंहो माणवकः, अत्रापि सिंहशब्दो माणवक सान्निध्यात् शौर्यवति वर्त्तते, अतएवात्र प्रमाण इति । चतुर्हस्तः पुरुष इति पुरुषशब्दोऽपि प्रमाणवाचीत्यन्ये । उभयथापि परिमाणादित्यनुवर्त्तत इत्याह प्रमाणपदमनर्थकमिति स्फुरति ।

२०. गुरुरिणः पतिरस्या, गुरुमिन्वति प्रीणाति वा, नैरुक्तो वर्णनाशः (५।२।११) ङी, तस्यां वाच्यायामित्यर्थः । अन्तःशब्दादधिकरणप्रधानान्मतुः, निपातनान्नागम इति । मत्वन्तादिति । अन्यत्रान्तर्वती शाला ।

२२. पुंवत् स्वाम्यात् पतिरियमिति पत्नी । ऊढ़ायामिति किम् ? पतिरियं स्त्री ग्रामस्य । पतिशब्दः स्त्रियामपि वर्त्तते । तदा नदीत्वेन भवितव्यमिति मतम् । नान्यत्रेति, तेनोढ़ायामेव, संगृहीतायां मा भूत् ।

२४. **शोणादेर्व्वा ।**

शोणादेर्ङी वा स्यात् । स्वार्थे, शोणी शोणा वा, चण्डी चण्डा वा, उपाध्यायी उपाध्याया वा । शोण चण्डी उपाध्याय अराल विशाल विकट विसङ्कट कृपण पुराण कल्याण साधारण उदार ।

२५. **श्येतैतहरितलोहतात्तो नः ।**

एभ्यः स्वार्थे स्त्रियां ङी वा स्यात् । श्येनी श्येता, एनी एता, हरिणी हरिता, लोहिनी लोहिता ।

२६. **क्नोऽसित-पलितात् ।**

आभ्यां ङी वा स्यात् । तकारस्य क्नादेश्च । असिक्नी, असिता, पलिक्नी, पलिता ।

२७. **एरक्तिनर्थात् ।**

इवर्णान्तात् ङी वा स्यात् । रात्री रात्रिः, धूली धूलिः, भूमी भूमिः, मुनी मुनिः, युवती युवतिः । यष्टी यष्टिः, पद्धती पद्धतिः, अस्त्रेः—शक्ती शक्तिः, वस्ती वस्तिरित्यादि । श्रीयं लक्ष्मीयमिति दुर्घटरक्षितः । अक्तिनर्थादिति किम् ? गतिः, शक्तिः, हानिः, अकरणिः, कास्कारिमकार्षीः । स्त्रियामित्येव, अतिथिः ।

२८. **उतो गुणादखरुसंयोगोपधात् ।**

उदन्ताद् गुणवचनात् ङी वा स्यात् । गुर्व्वी गुरुः, तन्वी तनुः । गुणादिति किम् ? आखुः । अखरुसंयोगोपधादिति किम् ? खरूः, कद्रुः, पाण्डुः, कमण्डलुः ।

---

२७. नन्वितश्चेति तकारानुवन्धं विधाय ह्रस्वेकारादेव ईप्रत्ययं विधत्ते मुनिः, तत्कथं तां दृष्ट्वा श्रीमिवायान्तीमित्यादयः स्युः ? चेत् कृतिकारादिति भवतीत्याह श्रीयमित्याद्भिः । दुर्घटः ग्रन्थभेदः । स्वमते तु चोद्यमवद्यमेव वर्गान्ताद्विधेः । नन्वितोऽक्त्यर्थादनादेशाद वा अक्तेरिति सूत्रयित्वा अनादेशादिति किम् ? सुगन्धिस्तरुमवजानि पूः...। अक्तेरिति किम् ? कति कन्यकाः । तदन्तादपि, प्रियकतिरियं गणिकेति श्रीपतिः प्रत्युदाजहार, तत्कथमिह सङ्गच्छतामिति चेत् ? बाहुल्यात् मा गा ग्लानीं मृणालीन् मृदुरिति सूर्यशतके ग्लानस्य भावो ग्लानी टचणन्तात् ङी । अतिथिरिति प्रत्युदाहरणम् । अतिथिर्ना गृहागते इति मते प्राधुणिकस्त्वतिथिर्द्वयोरिति शासने तु स्त्रियामतिथी स्यादेव ।

२८. इह गुणशब्दो गुणवचनार्थः, तथाहि यः पूर्वं गुणमुक्त्वा पश्चात्तद्योगाद-भेदोपचाराद् वा तद्वति द्रव्ये वर्त्तते स गुणवचनः, उक्तञ्च, :—

२९. पुंयोगात्तन्नाम्नो नित्यमसूर्यादेः ।

पुंयोगात् स्त्रियां वर्तमानात् पुंनाम्नो नित्यं ङी स्यात् । गणकस्य भार्य्या गणकी, शूद्री, वैद्यी, क्षत्रियी, प्रष्ठी । असूर्यादेरिति किम् ? सूर्य्या गोपालिका ज्येष्ठा कनिष्ठा मध्यमेति । व्यवस्थावाचित्वात् ईश्वरा । ईश्वरीति औणादिको वरट् ।

३०. अग्नि-वृषाकपि-पूतक्रतु-कुसित-कुसीदानां टेरायः ।

अग्न्यादेर्ङी स्यात् । टेरायादेशश्च । अग्नायी वृषाकपायी पूतक्रतायी कुसितायी कुसिदायी । कुसीदायीति दीर्घमध्या इति केचित् ।

"सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । उत्पादनीयो नित्यश्च सोऽसत्त्वप्रकृतिर्गुणः" इतीह गुणो गृह्यते । आधेयश्चाक्रियाजश्च इति पाठान्तरम् अस्यार्थः, सत्त्वं द्रव्यं तत्रैव निविशते तदेवाश्रयति तस्मादपगच्छति च । तथाहि आमफले श्यामता पूर्वस्थितापि रक्ततायामपैति, नानाजातिषु दृश्यते, यथा श्यामताम्रे तृणे गवि च दृश्यते । जातिर्गुणः, जन्मनः प्रभृत्या विनाशमाधार-द्रव्यपरित्यागात् न च जातिर्जातौ वर्त्तते । क्रिया पुन गुणो भवति द्रव्यस्य सक्रियत्वादिदमपाकरोति । उत्पादनीयो नित्यश्चेति । तथाहि घटादावग्निसंयोगे रक्तता उत्पद्यते नित्ये द्रव्ये आकाशादौ महत्त्वादिगुणो नित्यः । एवं प्रकारद्वयं गुणे विद्यते, न पुनः क्रियायाम् । यतः सोत्पद्यते न तु नित्या भवति । एवं द्रव्यमपि गुणः स्यात् तत्राप्येतेषां धर्माणां सत्त्वात् । तथाहि द्रव्यमप्यारम्भकेऽवयवे द्रव्ये निविशतेऽपैति च । यथा शरीरं हस्तपादादिष्वयवेषु समवैति तद्विनाशेन नाशात् ततो विमुच्यते । नानाजातिष्वपि दृश्यते, हस्तादिद्रव्याणां नानाजातिषु दर्शनात् । द्रव्ये च प्रकारद्वयमस्ति घटादिवर्जनः आकाशादिर्नित्ये इत्याह सोऽसत्वप्रकृतिर्गुण इति । प्रकतिः स्वभावः, सत्त्वं प्रकृतियस्य स तथा, ततो नञ्समासः, यथोक्ते धर्मे द्रव्यस्वभावो न भवति स गुणः । इत्थमर्थं विवृणोति गुणवचनादि । यथा गुर्वी गुरु, लघ्वी लघुरिति, लघ्वीतियानविशेषे नित्यं रुढ़ित्वात् । खरुरिति खरुः श्वेतार्थो गुणवचनः । खरुरश्वेते हरे दर्पे दण्डे श्वेते तु वाच्यवदिति त्रिकाण्डशेषः ।

२९. ननु सूर्याद्देवत इत्यनेन दैवत एवाभिधीयते, इह तल्लक्षणाभावात् । सूर्या भार्य्या मानुषीत्यत्र कथं न स्यात् । सत्यम्, इहाभिधानाद्दैवतायामेवायं विधिः तेन (५।१।५१) सौर्यागस्त्यतययोङ्च्मीये चेति सूत्रं समगंस्त तत एव ज्ञापकात् ।

३१. **मनोराव् च वा ।**

मनो स्त्रियां पुंयोगात् ङी वा स्यात् । टेराव् च । मनावी मनायी मनुः ।

३२. **आनिन्द्र-वरुण-भव-शर्व्व-रुद्र-मृडाऽऽचार्य्यब्रह्मणां योपधादणत्वञ्च ।**

इन्द्रादेः पुंयोगात् स्त्रियां ङी स्यात् । टेरानादेशश्च । इन्द्राणी, वरुणानी भवानी शर्व्वाणी रुद्राणी मृडानी । आचार्यादणत्वञ्च, आचार्य्याणी, ब्रह्माणी ।

३३. **वोपाध्यायमातुलयोः ।**

अनयोः पुंयोगात् टेरान् वा स्यात् । ङी नित्यमेव, उपाध्यायानी, उपाध्यायी, मातुलानी मातुली ।

३४. **अर्य-क्षत्रियाच्चापुंयोगात् ।**

आभ्याम् पुंयोगाभ्यां ङी वा स्यात् । आन् च टेः । चकारो वाभिसम्बद्धार्थः । अर्य्याणी, अर्य्या । क्षत्रियाणी, क्षत्रिया । पुंयोगात्तु अर्य्या, क्षत्रियी ।

३५, **हिमान्यरण्यान्यौ महत्त्वे ।**

स्याताम् । महद्हिमं हिमानी, महदरण्यमरण्यानी ।

३६. **यवनानी लिपौ ।**

थवनानी स्याल्लिपिश्चेत् ।

३७. **यवानी दोषे ।**

दुष्टो यवो यवानी स्यात् ।

३८. **क्रीतात् करण पूर्वात् ।**

क्रीतात् स्त्रियां ङी स्यात् । करणपूर्वञ्चेत् धनक्रीती, यवक्रीती ।

३९. **क्तादल्पाख्यायाम् ।**

करणपूर्वात् क्तान्तादल्पाख्यायां ङी स्यात् । अभ्रलिप्ती द्यौः, अल्पाभ्रा इत्यर्थः । अक्षरलिप्ती जिह्वा ।

---

३८. करणादित्यनेन सिद्धे पूर्वग्रहणेन गतिकारकोपपदानां (कु प्रादयो नित्यं, कृता तदर्थोपपदम् इत्यनयोः) कृदभिः समासवचनं प्राक् सुबुत्पत्तेरित्यस्या अनित्यता ज्ञाप्यते, तेन धनेन क्रीतेत्यदौ धनक्रीतेत्यादिस्तदेतदाह क्वचिन्नेति ।

३९. करणपूर्वादित्यनुवर्त्तते, समुदायद्योत्यत्वमल्पत्वम्, तच्च क्रियागतं करणगतं वा ।

४०. स्वाङ्गपूर्वादजातादेर्बहुव्रीहौ ।

स्वाङ्गपूर्वात् क्तान्ताद् बहुव्रीहौ ङी स्यात् । शङ्खभिन्नी केशविलूनी, कर्णछिन्नी । *पाणिगृहीती पत्न्याम् । पाणिगृहीता अन्यत्र । स्वाङ्गपूर्व्वादिति किम् ? वृक्षभिन्ना वाटी । अजातादेरिति किम् ? दन्तजाता दन्तमिता दन्तकृ(हृ)ता दन्तप्रतिपन्ना ।

४१. जातेरनाच्छादनाद् वा ।

जातिशब्दपूर्व्वात् क्तान्ताद् बहुव्रीहौ ङी वा स्यात् । पलाण्डुभक्षिती पलाण्डुभक्षिता वा, सुरापीती, सुरापीता वा । अनाच्छादनादिति किम् ? वस्त्रच्छन्ना । अजातादेरित्येव, वृक्षजाता ।

४२. स्वाङ्गदप्रधानादसंयोगोपध-बह्वच्-क्रोड़ादेरसहनञ्-विद्यमानपूर्वाच्च ।

अप्रधानात् स्वाङ्गात् संयोगोपधादिवर्ज्जितादसहादिपूर्व्वात् ङी वा स्यात् । दीर्घकेशी, दीर्घकेशा वा । अतिकेशी, अतिकेशा वा । *नखमुखात्संज्ञायाम् । सुनखा, सुनखी, सुमुखा, सुमुखी । असंज्ञायामिति किम् ? शूर्पणखा, कालमुखा । असंयोगोपधादेरिति किम् ? सुगुल्फा, बन्धुरस्कन्धा । बह्वचः, पृथुजघना । क्रोडादेः, सुक्रोड़ा, सुगला । भग खुर बाल गुद शफ शिखा अंस । असहादिपूर्व्वादिति किम् ? सकेशा, अकेशा, विद्यमानकेशा । अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्रदृष्टञ्च (तस्य) तेन चेत्तत्तथायुतम् ।। अद्रवं किम् ? बहुकफा । मूर्तिमत् किम् ? बहुज्ञाना, प्राणिस्थं किम् ? दीर्घमुखा शाला । अविकारजं किम् ? बहुशोथा, अतत्स्थं तत्र दृष्टञ्च तदपि स्वाङ्गम्, दीर्घकेशी रथ्या दीर्घकेशा वा । तेन चेत्तत्तथायुतं स्वाङ्गम्, पृथुस्तनी प्रतिभा, पृथुस्तना वा ।

---

४२. इहाप्रधानार्थादित्युक्ते बहुव्रीहावित्युक्तस्य सुतरां निवृत्तिः । सामान्यविधेः, अतोऽतिकेशी बालेत्याह स्म, अतिक्रान्ता केशानिति अत्यादय (४।३।४०) इति समासः । नखमुखादसंज्ञायामिति नखमुखादप्रधानात् स्वाङ्गादनाम्नैव ङी स्याद् वा । संज्ञायान्तु शूर्पणखा । क्वचिन्नञ्निर्दिष्टस्यनित्यत्वात् शूर्पणखीत्यपि स्यादिति श्रीपतिः । असंगोगोपधेत्यादि संयोगसंज्ञा उपधा यस्य स तथा । बहवोऽचो यस्य स बह्वच् । क्रोड़ आदिर्यस्य स क्रोड़ादिः । ततो द्वन्द्वान्नञ्समासः । असह-नञ्विद्यानपूर्वादिति—अत्र पूर्वस्यावयववाचित्वात् महाद्यवयवपूर्व्वमेव यत् स्वाङ्गं तस्मात् प्रतिषेधो भवति, तेन कल्याणविद्यमानमुखीत्यत्र

४३. **नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठाच्च ।**

एभ्यो बह्वच् संयोगोपधेभ्यो ङी वा स्यात् । तुङ्गनासिकी, तुङ्गनासिका वा, तनुदरी तनुदरा वा, बिम्बोष्ठी बिम्बोष्ठा वा, दीर्घजङ्घी दीर्घजङ्घा, समदन्ती समदन्ता, चारुकर्णी चारुकर्णा, तीक्ष्णशृङ्गी तीक्ष्णशृङ्गा, सुगात्री सुगात्रा, मृद्वङ्गी मृद्वङ्गा, कम्बुकण्ठी कम्बुकण्ठा वा ।

४४. **पुच्छाच्च ।**

ङी वा स्यात् । दीर्घपुच्छी दीर्घपुच्छा वा ।

४५. **कबर-मणि-विष-शरेभ्यो नित्यम् ।**

कबरपुच्छी, मणिपुच्छी, विषपुच्छी, शरपुच्छी ।

४६. **पक्षाच्चोपमानादेः ।**

उलूकपक्षी शाला । पुच्छाच्च । काकपुच्छी, (उलूकपुच्छी सेना) ।

४७. **जातेरस्त्रीविषयादवैश्यादेः ।**

जातेःसामान्यवचनात् ङी स्यात् । कुक्कुटी, विहगी, मृगी, दूती, पूतनी, भ्रमरी, ब्राह्मणी, बृषली, नटी, कठी । *नृनरयो वृद्धिश्च । नारी । अस्त्रीविषयादिति किम् ? मक्षिका पिपीलिका वलाका, एता नित्यस्त्रियः । अवैश्यादिति किम् ? वैश्या । गवय हय मुकय-मत्स्यादन्यो योपधः । क्षत्रिया, अर्य्या । गवयादेस्तु गवयी, हयी । अजादयश्च वैश्यादेः, अजा अश्वा, एड़का, कोकिला । *शूद्राच्चामहत्पूर्वात् । महत्पूर्वात्तु महाशूद्री आभीरी । स्वार्थ इत्येव, प्रियकुक्कुटा मथुरा, अत इत्येव तित्तिरिः ।

विधिरेवेति । पूर्वग्रहणस्य फलं न्यासकारो व्याजहारेह स्वाङ्गपदं परिभाषितमिति । प्राचीनमतमाहाद्रवमित्यादि । अतत्स्थं तत्र दृष्टञ्चेति अप्राणिस्थमपि प्राणिनि दृष्टं स्वाङ्गम् । तेन चेत्तत्तथायुतमिति प्राणिनो यथासम्बन्धस्तथा यद्यप्राणिनस्तदपि स्वाङ्गमित्यर्थः । अप्रधानादिति किम् शिखा ।

४७. जातिशब्दार्थं विवृणोति सामान्यवचनादिति । अनेकवृत्तित्वादेव सामान्यं ब्राह्मणत्वादि । अथैवं तटादीनामपिशब्दानां जातित्वप्रसङ्ग इति चेदन्यदेव जातिलक्षणमास्थेयम् । तथाहि—"आकृतिग्रहणा जातिलिङ्गार्थानाञ्च सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह" अस्यार्थः।(४।१।७३) सूत्रे द्रष्टव्यः ।

४८. **पाक-कर्ण-पर्ण-वालमूलान्तात् ।**

जातेरित्येव, पाकाद्यन्तस्य ङी स्यात्, स्त्रीविषयार्थं वचनम्, ओदनपाकी, आखुकर्णी, पृश्निपर्णी, गोवाली, शतमूली । अमूलेति अजातिवचनत्वादाप् ।

४९. **पुष्पादसदादिपूर्व्वात् ।**

जातेरित्येव, पुष्पान्तात् ङी स्यात् । शंखपुष्पी । असदातदिपूर्व्वादिति किम् ? सत्पुष्पा । सत् प्राक्, काण्ड, प्रान्त, शत, एक ।

५०. **फलादसमाद्यादेः ।**

फलान्तात् ङी स्यात् । दाडिमफली । असमाद्यादेरिति किम् ? सम्फला । सम्, भस्त्र, अजिन, शण, पिण्ड ।

५१. **वाहः ।**

एदन्तात् ङी स्यात् । प्रष्ठौही, शाल्यूही ।

५२. **प्रायेणाल्पविवक्षायाम् ।**

अल्पविवक्षायां ङी स्यात् । अल्पं छत्रं छत्री, मृणाली, दण्डी, घटीत्यादि ।

५३. **इतो नृजातेरिणस्त्वन्यतोऽपि च ।**

इदन्तान्नृजातिवाचिनः स्त्रियां ङी स्यात् । अवन्ती, कुन्ती । इनन्तान्नृजातेश्चान्यतोऽपि च, औदमेयी, दाक्षी । तेन निर्व्वृत्ता, सौतङ्गमी पूरी । इत इति किम् ? दरत् । नृजातेरिति किम् ? तित्तिरिः ।

५४. **ऊङुतः ।**

उदन्तान्नृजातेरूङ्स्यात् । ब्रह्मबन्धूः, कुरूः, भीरूः । बहुलाधिकारात् भीरुरित्यपि ।* नयोपधात् । अध्वर्युर्ब्राह्मणी । नृजातेरित्येव, धेनुः । जातेरिति किम् ? किम्भीरुः रराय्यसे ।

५५. **अप्राणिनामरज्वादेः ।**

अप्राणिजातेरुदन्तादूङ् स्यात् । अलावूः, कर्कन्धूः । अप्राणिनामिति किम् ? कृकवाकुः । अरज्वादेरिति किम् ? रज्जुः, हनुः ।

५६. **बाह्वन्त-कद्रु-कमण्डलुभ्यो नाम्नि ।**

बाह्वन्तादेः संज्ञायामूङ् स्यात् । मद्रबाहुः, कद्रुः, कमण्डलुः । नाम्नीति किम् ? वृत्तबाहुः स्त्री, कद्रुः, कमण्डलुः ।

५७. ऊरोरुपमान-सहित-संहित-सह-शफ-लक्षण-वामादेः ।

उपमानादिपूर्व्वादूरोरूङ् स्यात् । करभ इव ऊरू यस्याः सा करभोरूः । संहितोरूः सहितोरू, सहोरूः, शफोरूः, लक्षणोरूः, वामोरूः । कथं रम्भोरु केलिस्खलत् ? बहुलाधिकारात् ।

५८. पङ्गूः श्वश्रूः ।

एते निपात्येते । श्वसुरस्य उकाराकारयोर्लोपः ।

५९. यूनस्तिः ।

यूनः स्त्रियां तिः स्यात् । युवतिः ।

६०. अणिणोऽनार्षादि-गोत्रे-गुरुपोत्तमाद् याप् ।

गोत्रे विहितो यावणिणौ तदन्तात् स्त्रियां याप् स्यात् । अण्—कारीषगन्ध्या, इण्-वाराह्या । अनार्षादीति किम् ? वाशिष्ठी । गोत्र इति किम् ? आहच्छत्री । गुरूपोत्तमादिति किम् ? औपगवी । उत्तमशब्दस्त्रिप्रभृतिषु वर्त्त ते, तत्समीपमुपोत्तमम् ।

६१. क्रोडचादेश्च ।

क्रोड़िप्रभृतेश्च स्त्रियां याप् स्यात् । क्रोड्या, लाड्या । क्रोडि, लाडि, व्याडि, आपिशलि सौधातकी भौरिकि, कापिष्ठलि, इत्यादि । भोजात् क्षत्रियजातौ । भोज्या । कुलनाम्नश्च, पौणिक्या, भौणिक्या, मौखर्य्या ।

६२. दैवयज्ञ्यादेर्व्वा ।

एभ्यो याप् वा स्यात् । दैवयज्ञ्या, दैवयज्ञि, शौचिवृक्षि, सात्यमुग्रि, काण्ठेविद्धि । पूर्णः स्त्र्यधिकारः ।

---

५७. उपमानं प्रसिद्धसाधर्म्यादप्रसिद्धसाधनमित्युक्तम् । उपमेति पाठे स एवार्थः, किञ्च इहादिशब्दः पूर्व्वार्थः, तेन ऊरुरुत्तरपदं यत्रोपमानादिकं पूर्वपदं तत्रैव स्यात्, यत्र हस्त इव स्वाम्युरूर्यस्याः सा हस्तस्वाम्युरः, तत्र न स्यादित्यर्थः ? एभ्योऽन्यत्र पीनोरुः स्त्री ।

६०. गोत्र इति गोत्राद्यपत्य इत्यर्थः । तदन्तात् ऋषिसम्बन्धिवर्ज्जितादिति शेषः । उत्तमशब्दस्त्रिचतुरादिवाचकः स्वभावात्, तत्समीपमुपोत्तमम्, गुरु उपोत्तमं यस्य तस्मादित्यर्थः । तेन वह्वचोऽन्ताज्द्वितीये गुर्व्वच इत्यर्थो लभ्यते । अतएव गोत्रेऽणिणो बहुस्वरादन्यगुरुपान्त्यादूङिति सूत्रितमन्यैः ।

६३. प्राग्दीव्यतोऽण् ।

तेन दीव्यतीत्यतः प्राग्येर्थास्तेष्वण् भवति । उपगोरपत्यं औपगवः, बहुलमित्येव, उपग्वपत्यम् ।

६४. दित्यऽदित्याऽऽदित्य-यमाण्ण्यः ।

दित्यादेर्दीव्यतेः प्रागर्थेषु ण्यः स्यात् । दितेर्दैत्यः, अदितेरादित्यः, आदित्यात् आदित्यः, याम्यः ।

६५. पत्युरगणादिपूर्व्वात् ।

गणादेरन्यपूर्व्वात् पत्युः प्राग्दीव्यतीत्यर्थे ण्यः स्यात् । बार्हस्पत्यः, सैनापत्यम् । अगणादेरिति किम् ? गाणपतम्, आश्वपतम् । गण, शत, धन, अश्व, राष्ट्र, कुल, गृह, पशु, धान्य, धवन्, प्राण, नृ, अधि, सभा, क्षेत्र, ज्ञान, यज्ञ, धर्म, स्थान । प्राग्दीव्यतेरित्येव, भावे टयण्, आधिपत्यम् । (गाणपत्यो मन्त्रः इत्यसाधुः) ।

६६. अः स्थाम्नः ।

स्यात्, अश्वत्थामः, महास्थामः ।

६७. लोम्नोऽपत्ये बहुषु ।

लोमान्तादबहुष्वपत्ये अः त्यात् । उडुलोम्नः पुत्राः उडुलोमाः, शरलोमाः । बहुष्विति किम् ? औडुलोमिः ।

६८. णाऽणौ पृथिव्याः ।

स्याताम् पार्थिवः पार्थिवा पार्थिवी ।

६९. देवादण्-यणौ ।

स्याताम्, दैवम्, दैव्यम् ।

७०. बहिषो डचण्डीकणौ ।

स्याताम् । बाह्यः, बाहीकः । जातेर्ङी, बाहीकी ।

७१. द्विगोरजादेर्लुगनपत्ये ।

द्विगुसम्बन्धिनोऽजादेः प्राग्दीव्यतीये तद्धितस्य लुक् स्यात् । पञ्चकपालः सूपः, तदधीते वेद वा, द्विवेदः, अनपत्य इति किम् ? द्वैमातुरः । अजादेरिति किम् ? पञ्चगर्गरुप्यम् । रुप्यो हेतुमनुष्याद्वा ।

७२. भवनादग्निकलिभ्यां टेयण् ।

भवने क्षेत्रे इत्यतः प्रागर्थेष्वग्निकलिभ्यां टेयण् स्यात् । तस्यापत्यम्, तेन दृष्टं साम, सास्य देवता, तस्येदम्, तस्य निमित्तं, संयोगे उत्पातो वा, तदर्हति, तत्र साधुः, तस्मै हितं वा, आग्नेयम्, कालेयम् ।

७३. स्त्रीपुंसाभ्यां नण्-स्नणौ, वा च भावे ।

आभ्यां प्राग् भवनान्नण्-स्नणौ स्याताम् । स्त्रैणम्, पौंस्नम् । वा च भावे, स्त्रैणम्, स्त्रीत्वम्, पौंस्नम्, पुंस्त्वम् । भवनादित्येव, स्त्रीवत्, पुंवत् ।

७४. गोरजादिप्रसङ्गे यत् ।

सर्वत्र अजादिप्रसङ्गे गोर्यत् स्यात् । गवि भवम् गोरिदं वा गव्यम्, गौदेवता अस्य, गव्यः । अजादीति किम् ? गोरागतम्, गोरूप्यम् ।

७५. तस्यापत्यम् ।

अत्रार्थे यथाविहितमणादयः स्युः । औपगवः, दैत्यः, बार्हस्पत्यः, सैनापत्यम्, स्त्रैणः । अतोऽपत्याधिकारः ।

७६. आद्यादेको गोत्रे ।

पौत्राद्यपत्यं गौत्रम्, तत्र आद्य प्रकृतेरेक एव प्रत्ययो भवति । असति युवप्रत्यये । उपगोः सर्वमेव गोत्रम्, औपगवः, दक्षस्य दाक्षिः, गर्गस्य गार्ग्यः, तदपत्यं तस्यापत्यञ्च । गोत्र इति किम् ? गार्ग्यस्यानन्तरापत्यं गार्गिः ।

---

७५. इह तस्येत्यनेन षष्ठ्यन्तं प्रातिपदिकं परामृश्यते । तेन षष्ठ्यन्तादपत्यवतस्तस्यापत्यमित्यर्थेऽणादयो विधीयन्ते । नन्वपत्यशब्दस्य पुत्रपर्यायत्वात् कथं पौत्रादौ प्रत्ययः ? नैवम्, न पततिवंशो येन जातेन तदपत्यमित्यर्थानिर्देशेनापत्यापत्यमपत्यशब्देनोच्यते, यतस्तेन जातेन पूर्वेषामपायेष्वपतनमेव ।

७६. पौत्राद्यपत्यं गोत्रमिति वक्ष्यति, तत्राद्यप्रकृतेरेकः एव प्रत्ययो नियम्यते । वक्ष्यमाणलक्षणस्य तात्पर्यमाह असति युवप्रत्यय इति । गोत्र इति किम् ? औपगविः ततष्टायनण् औपगवायनः, *(१) गोत्रेस्यैकोनसङ्ख्यानां प्रत्ययानामपरम्परा । यद्वा स्वद्व्यून(?)संख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते । अपत्यम्पितुरेव स्यात्ततः प्राचामपीति च । मतभेदेन तद्वदन्ये सूत्रमेतत्तथोत्तरम् ।" पितुरेवापत्यमिति पक्षे हि उपगोस्तृतीये वाच्ये औपगवादिञ् (इण्) स्यात् । चतुर्थे त्वजीवज्येष्ठे मृतवंश्ये औपगवः फक् (टायनण्) । इत्थमिञ् फकोः परम्परायां

७७. **गोत्राद् यून्यस्त्रियाम् ।**

वंशे जीवति तदपत्यं युवोच्यते तस्मिन्नपत्ये **यः** प्रत्ययः स एको गोत्राद्भवति, नाद्य प्रकृतेः । औपगवस्यापत्यं युवा औपगविः, दाक्षेर्दाक्षायणः, गार्ग्यस्य गार्ग्यायणः । अस्त्रियामिति किम् ? गार्गी, युवसंज्ञैव प्रतिषिद्धा ।

७८. **अद्बाह्वादेरिण् ।**

अदन्ताद् बाह्वादेश्चापत्ये इण् स्यात् । दक्षस्यापत्यं दाक्षिः, गार्गिः । तपरः किम् ।कैलालपः । बाह्वादेः, बाहोरपत्यं बाहविः । बाहु, उपबाहु, चूडा, बलाका, मूषिका, एडका, सुमित्रा पुष्करसद, अनडुह, स्वामिन्, देवशर्म्मिन्, अग्निशर्म्मिन् सुनामन्, कुलनामन्, पञ्चन्, सप्तन्, अष्ठन्, नवन्, लोमन्, कृष्ण, युधिष्ठिर, अर्जुन, गद, शाम्ब, प्रद्युम्न । कृष्णादीनां शिवाद्यण् बाधकबाधनार्थं पठ (वच) नमित्यादि ।* दशरथादेर्व्वा । दाशरथिः दाशरथश्च, "प्रदीयतां दाशरथाय मैथिली" । सौमित्रि, सौमित्रश्च ।

७९. **सुधात्रादेर्डकिण् ।**

एभ्योऽपत्यार्थे डकिण् स्यात् । सौधातकिः, वैयासकिः । सुधातृ, व्यास, वरुड़, निषाद, चाण्डाल, बिम्ब ।

मूलाच्छततमे गोत्रे एकोनशतम् प्रत्यया स्युः । पितामहादीनामपीति (२) मुख्यपक्षे तु, तृतीये वाच्ये उपगोरणा इष्टे सिद्धेऽपि अनन्तादिञपि स्यात्, चतुर्थे फगिति । ततः फगिञोः परम्परायां शततमे गोत्रेऽष्टनवतिरनिष्टप्रत्ययाः स्युः । अतो नियमार्थमिदं सूत्रम् । एवमुत्तरसूत्रेष्यूह्यम् ।।१।। गोत्रे इत्यस्यार्थः, सूत्रानारम्भे इति शेषः । गोत्रेऽर्थे तस्य विहितानां स्वस्य मूलपुषस्य यावन्तोऽधस्तनाः पुरुषाः एकोनतावत्संख्यकानां परम्परा स्यात् । पुत्रादेरपत्यत्वपक्षे तु द्व्यूनतावत्संख्यकानामिति भेदः । (२) पितामहादीनामित्यस्यार्थः—अपत्यमित्यनुषज्यते, स च मुख्यपक्षः । पौत्राद्यपत्यं गोत्रमिति सूत्रस्वरसात् ।

७७. गोत्रप्रत्यान्तं प्रातिपदिकमिह गोत्रमुच्यते, नाद्य प्रकृतेरिति बाधनात् गार्गीति युवसंज्ञैव प्रतिषिद्धेति, युवसंज्ञायां प्रयोजनम्, प्रत्यय एव, स चेत् स्त्रियां निषिद्धस्ततस्तत्र संज्ञैव निषिद्धेति तात्पर्य्यार्थः ।

७८. बाह्वादिराकृतिगणः । किञ्च सुधात्रत् मत्वन्तः सौधावतिः, औदञ्चिरिति उद ईत्वलोपाभावः । एवं बहवः । येऽत्र गोत्रवाचकाः सिद्धास्त एवात्र गृह्यन्ते । अगोत्रवाचके तु बाहुनाम कश्चित्, तदपत्यं बाहवः दशरथादेर्वेति बाहुल्यादिति शेषः ।

८०. शिवादिभ्योऽण् ।

एभ्योऽपत्यर्थेऽइणाद्यपवादोऽण् स्यात् । शैवः, यास्कः । शिव, यस्क, विश्रवण, रवण, गङ्गा, यमुना, इला, पीला, भूमि, सपत्नी, इरावती, ककुत्स्थ, वतण्ड, जरत्कारु, तक्षन्, पूषन्, अयस्थूण, पुत्रादि । तथा वाशिष्ठाद्या ऋषयः श्वाफल्काद्या अन्धकवंशाः, वसुदेवाद्या वृष्णयः, नकुलाद्या कुरवः ।* परस्त्रियाः परशु च । पारशवः ।

८१. मातुर्मातुर संख्यासंभद्रादेः ।

संख्यादिपूर्वाया मातुरपत्योऽण् स्यात् मातुरादेशश्च । द्वैमातुरः, त्रैमातुरः, षाण्मातुरः, साम्मातुरः, भाद्रभातुरः । संख्यादेरिति किम् ? सौमात्रः ।

८२. कन्यायाः कनीन् च ।

अण् कनीनादेशश्च । कानीनो व्यासकर्णयोः ।

८३. स्त्रीशुभ्रादेष्टेयण् बहुलम् ।

स्त्रीप्रत्ययान्तात् शुभ्रादेश्च टेयण् स्यात् पुनर्बहुलग्रहणं स्पष्टार्थम् । सुपर्णाया अपत्यम् सौपर्णेयः, सौभद्रेयः, गौप्तेयः, दात्तेयः, चान्द्रभागेयः, वासवदत्तेयः, यौवतेयः, कौम्भकारेयः । ऊङन्तात् कामण्डलेयः । बड़वाया वृषे । वाड़वेयो वृषः । बाहुल्यान्न पृथादेः, पार्थः, यामुनः, क्रौञ्चः, कौकिलः, गोतम्याः गौतमः । शुभ्रादेः खल्वपि, शौभ्रेयः, आत्रेयः, लेखाभ्रेषः । शुभ्र, अत्रि, वृष्णि, कद्रु, दिति, अदिति लेखाभ्र, विधि, कति, मातृ, विमातृ, सुरभि, अतिथि, प्रवाहण, भरत, मृकण्डु. इतर, अन्यतर, सुनामन्, जिह्माशिन्, गृष्टि, धेनु, शुक, शुक्ल, ग्रह, उग्र, अजिर, पाण्डर, विकर्ण, कुशात, कात्य काश्यप इत्यादि । भ्रुवो भ्रुव च, भ्रौवेयः । गङ्गायाः शिवादि-तिकादि-पाठाच्च, गाङ्गेयोः गाङ्गो, गाङ्गायनिः, मण्डूकाद् वा माण्डूकेयो माण्डूकिर्माण्डूको वा । पीलायाः पैलेयः । शिवादित्वात् पैलः ।

---

८०. विश्रववणरवणाविति विश्रवसो विश्रवणरवणौ चेत्यादेशावेतौ । ककुत्शब्दोऽत्रोपाध्यायसर्वस्वे तकारयुक्तो नेष्टः, काकुत्स्थोऽप्यकाकुत्स्थ इति रामचन्द्राविरोधाभावात्, अस्मिन् गणे तदन्तेभ्य इण् स्त्रीप्रत्ययान्तेभ्यः ष्टेयणः, तक्षणः, कुर्व्वादित्वात् ण्यस्य, सेनान्तत्वादिणो बाधकोऽण् बोद्धव्यः ।

८३. नन्वृद्धाभ्यो नदी मानुषीभ्यस्तन्नामिकाभ्यः (४।१।११३ पा०) इति सूत्रेणाण् प्रत्ययो विहितः पाणिनिना (ढक् विधायकमेतत्) तत्कथं सङ्गच्छतेति चेद्-बाहुल्यात् । तथाहि यमुनाया अपत्यं यामुनः, नार्म्मदः, सारस्वतः ।

८४. टैनेयण् परस्त्रियाः ।

टैनेयण् स्यात् । पारस्त्रैणेयः ।

८५. कल्याणादेष्टिनेयण् ।

एम्यष्टिनेयण् स्यात् । कलयाणिनेयः । सौभागिनेयः । कल्याणी, सुभगा, दुर्भगा बन्धकी, जरती, रजकी, ज्येष्ठा, कनिष्ठा, मध्यमा, कुलटा ।

८६. चटकाया ऐरण् लुक् स्त्रियाम् ।

अस्या अपत्ये ऐरण् स्यात् । लिङ्गविशिष्टग्रहणात्, चटकादपि । चाटकैरः । स्त्र्यपत्ये ऐरणो लुक् च, चटका ।

मानुषीनाम्नः चिन्तिता नाम काचित्, चैन्तितः, शैक्षकः, सौभद्रः, ऐलविलः । वृद्धयादेस्तु न स्यादेव, चान्द्रभागेयः, वासवदत्तेयः। अतएव द्व्यच इति तद्बाधकम् । तदपि न वाच्यमित्याह, दात्तेय इति । अनद्य इति वक्तव्यम्, शौणः, सैप्रः, वैरः तापः । तेन (द्वि सृन्नदीनाम्नः) इत्यपि प्रत्याख्यातम् । वडवाया वृष इति । वृषोऽत्र शुक्रवचनः, स तु गर्भाधायकोऽत्राभीष्टः । तेन वड़वा शब्दादुगर्भाधायको वाच्ये टेयण् स्यात् । तद्यप्यपत्यविहितस्यापि ततोऽपकृष्य शुक्रे विधीयते इत्यर्थः । अन्धकारे तु वाड़वः । बाहुल्यान्न पृथादेरित्यपि प्रागेव व्याख्यातकल्पम् । मृकण्डुरिति मृकण्डोरपत्यम्, मार्कण्डेयः, (५।१।४६) एयणीत्युलोपः, मृकण्डस्यापत्यम्, मार्कण्डः । अत्र पाण्डर पाठः प्रमादजः, पाण्डोरपत्यम्, पाण्डवेयः, पाण्डवश्च । पाण्डु, मण्डु, कदुष्कुलाट्टेयण् वेति परसूत्रात् । विकर्ण-कुशीतकाम्यां काश्यपे, आम्यां काश्यपेऽपत्ये एयण् भवति, वैकर्णेयः, कौशीतकेयः । अन्यत्र वैकर्णिः, कौषीतकिः । लक्षणश्यामाद् वाशिष्ठये । लाक्षणेयः, श्यामेयः (वाशिष्ठाः) । अन्यत्र, लाक्षणिः, श्यामायनः, नडादिः । आदिशब्दात् पुरुषभ्रूतादयः पञ्जिकोक्ता । अभीषामवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः इति बाधकबाधनार्थं पाठः । दुःशीलाभिधायी विधवाशब्दोऽत्र पठ्यते, क्षुद्राभ्यो वेति विहितैरणो बाधनार्थम् । तथा शवनादि । तथा "चतुष्पादाभ्यश्च" धावलेः, धावलेयः । कामण्डलेयः, जाम्बेयः, शितिवाहेः शैतिवाहेयः, धावलाचितुष्पाज्जातिवचनः । गङ्गाया इति प्रत्ययत्रयसामावेशार्थमिदमुक्तम् । तथा "शाम्नायाः क्षत्रियायाः" साम्नेयः, साम्नः बहुलप्रयोगोऽयम् ।

८५. अनुदृष्टिः अनुसृष्टि अनुसृति वलीवर्दौ । इत्यन्ये प्राहुः । अत्र कुलटाशब्द सतीवचनः ।

८७. **गोधाया रण् ¹(अपत्ये) एरण् च ।**

गोधाया अपत्ये रण्-एरणौ स्याताम् । चकाराट्टेयण्, गौधारा, गौधरः, गौधेयः ।

८८. **क्षुद्राभ्यो वा ।**

अङ्ग-शील-हीना अनियतपुंस्काश्च क्षुद्रास्ताभ्योऽपत्ये एरण् स्याद् वा । काणेरः काणेयः । दासेयो, दासेयः । कौलटेरः, कौलटेयः ।

८९. **स्वसृमातृभ्यामीयो भ्रातुश्च ।**

एभ्योऽपत्ये ईयः स्यात् । स्वसीयः, मात्रीयः, भ्रात्रीयः । पितुः कुर्व्वादित्वाण्ण्यः पैत्र्यः ।

९० **व्यो रिपौ च ।**

अपत्ये शत्रौ च भ्रातुर्व्व्यः स्यात् । भ्रातृव्यो भ्रातृजद्विषौ ।

९१. **पितृमातृपूर्व्वायाः स्वसुरीयण् टेयण्यन्त्यलोपश्च ।**

एतत्पूर्व्वायाः स्वसुरीयण् स्याट्टेयण्यन्तलोपश्च । एतल्लिङ्गाट्टेयण् च । पैतृष्वस्रीय, पैतृष्वसेयः, मातृष्वसीयः, मातृष्वसेयः ।

९२. **श्वश्रुरादयः ।**

श्वशुर्य्यः ।

९३. **कूलाद् यदेयकणौ : ईनः सपूर्व्वाच्च ।**

कूलादपत्ये यत्, एयकण् च स्यात् । ईनस्तु केवलात्, सपूर्व्वाच्च । कूल्यः, कौलेयकः, कुलीनः, आढ्यकुलीनः ।

---

८७. भिन्नविभक्तिनिर्द्देश परसूत्रार्थः । शुभ्रादित्वाट्टेयण्णित्यन्ये । युक्तन्तदेव, चकारः समुच्च्यार्थ एवात्र साधीयान् । जटाभ्य आरण्णिति वर्द्धमानः । जटाया अपत्यम् जाटारः एवं फान्टारः । काशिकादौ तु अन्येभ्योऽपीत्युक्तम् । तत्रान्तरे तु मृगी मूपिका काकीति गणितम् ।

९२. अत्र भ्रातृस्वस्रादिवत् श्वशुरोऽपि सम्बन्धिवचन एव गृह्यते, न श्वशुरनाम्नोऽपत्यं श्वाश्रुरित्युक्तमेव ।

९३. अत्र पूर्व्वशब्देन पूर्वमुच्यते, तेन बहुप्रत्ययपूर्व्वादपि कुलाद् यदेयकणौ भवतः । अत एव बहुप्रत्ययपूर्व्वाच्चेति वासवताः । कुलस्यापत्यम् कौलेयकः, कुल्यः, ईषदसमाप्तं कुलं बहुकुलम्, तदपत्यम् बहुकुल्यः बाहुकौलेयकः सपूर्व्वपदात्त, आर्यकुलस्यापत्यम् आर्य्यकुलीनः ।

९४. महाकुलादण्णीनौ च ।

अस्मादण्णीनौ स्याताम् । ईनश्च । माहाकुलः, माहाकुलीनश्च ।

९५. दुष्कुलाट्टेयण् ।

अस्माट्टेयण् स्यात् वा । पक्षे ईनश्च, दौष्कुलेयः दुष्कुलीनः ।

९६. रेवत्यदिभ्यष्टिकण् ।

एभ्यष्टेयणाद्यपवादष्टिकण् स्यात् । रैवतिकः । रेवती, अश्वपाली, मणिपाली; द्वारपाली, दण्डग्राहः, कणग्राह, फल्गुग्राहः इत्यादि ।

९७. गोत्रस्त्रियः कुत्सिते वा च ।

गोत्रान्तप्रत्ययान्तस्त्रियाः कुत्सिते अपत्ये णः स्याट्टिकण् च । गार्ग्या अपत्यम्' गार्गो जाल्मः, गार्गिकः । कुत्सित इति किम् ? गार्गेयः । गोत्रापत्ये ये प्रत्ययास्ते युवसंज्ञकाः ।

९८. कुर्व्वादिभ्यो ण्यः ।

एभ्योऽपत्यार्थे ण्यः स्यात् । कौरव्यः, गार्ग्यः । कुरुरयं मुनिवचनस्तेन बहुष्वपि कौरव्याः । तक्ष्णो वा । ताक्षण्यः, ताक्षः । कुरु गर्गर पितृ कवि ऐन्द्रजाली कापिञ्जल शङ्कु इल तक्षन् ।

९९. सेनान्तका(रि)रु-लक्षणादिण् च ।

एभ्य इण् ण्यश्च भवति । सेनान्तात्, हारिश्रेणिः, हारिषेण्यः, वैश्वकसेनि,ः वैश्वसेन्यः । एवम् उग्रसेन, भीमसेन, महासेन । कारोः । तन्तुवायिः तान्तुवाय्यः । लाक्षणि-लाक्षण्यः ।

१००. तिकादिभ्यो णायनिः ।

एभ्योऽपत्ये णायनिः स्यात् । तैकायनिः, कैतवायनिः । तिक कितव कौरव लोहित चन्द्रमस् शुक, शुभ(भ्र) गङ्गा वरेण्य उदन्य कौशल्य कार्म्मार्य्य इत्यादि ।

---

९७. गोत्रप्रत्ययान्ता स्त्री गोत्रस्त्री (इति लुप्त प्रथमैकवचनम्पदम्) पितुरसंविज्ञानात् मात्रादावुपदेशः, पुत्रस्य कुत्सोपगताविलयर्थः ते युवसंज्ञका इति, तेन यून्येव भवन्तीति तात्पर्य्यार्थः । गोत्रेति किम् ? कारिक्रेयो जाल्मः । स्त्रिया इति किम् ? औपगविर्जाल्मः । भागवित्ति तार्णविन्दकषायेभ्यः सौवीरे टिकण्णिति वर्द्धमानादयः । सौवीरगोत्रात् भागवित्त्यादेर्यून्यपत्ये टिकण् विभाष्यते कुत्सायां गम्यमानायाम् । भागवित्तेरपत्यं पुमान् भागवित्तिको जाल्मः, भागवित्तायनः । एवमन्येऽपि ।

१०१. अणोद्व्यचः ।

द्व्यचोऽणन्तात् यूनि णः स्यात् । हौत्रायणिः, यास्कायनिः । अण इति किम् ? दाक्षायणः । द्व्यच इति किम् ? औपगविः ।

१०२. फान्टाहृतिमिमताभ्यां ण च सौवीरे ।

आभ्यां यूनि णः स्यात् । णायनिश्च । फान्टाहृतः, फाण्टाहृतायनिः मैमतः, मैमतायनिः ।

१०३. तदादिभ्यो वा ।

णायनिर्व्वा स्यात् । । तादायनिः, पक्षेऽण्, तादः यादायनिः, यादः ।

१०४. वृद्धयाद्येचोऽगोत्रात् ।

वृद्धिसंज्ञक आद्यच् यस्य तस्माण्णायनिर्व्वा स्यात् । शालगुप्तायनिः । पक्षे इण् । शालगुप्तिः । कारोः, नापितायनिर्नापितिर्नापित्यः । वृद्धयाद्यच इति किम् ? दैवदत्तिः । अगोत्रादिति किम् ? औपगविः ।

१०५. वाकिणादेः कायनिण् ।

एभ्य कायनिण् वा स्यात् । वाकिनकायनिर्व्वाकिनिर्व्वा ।

१०६. पुत्रान्ताद्वृद्धयाद्यचश्च ।

गार्गीपुत्रकायणिः, गर्गीपुत्रायणिः, गार्गीपुत्रीर्व्वा ।

१०७. ग्लुचुकादेरायणिः प्राचाम् ।

स्यात् ग्लुचुकायनिः । अन्येषाम्, ग्लौचुकिः ।

१०८. जातौ राज-क्षत्राभ्यां यदियौ ।

आभ्यां जातौ यत्-इयौ स्याताम् । राजन्यः, क्षत्त्रियः, जातौ किम् ? राजनः क्षात्त्रिः ।

---

१०२. फान्टाहृतेः प्रत्ययस्य णित्करणमनर्थकम् । किं कारणं वृद्धत्वात् प्रातिपदिकस्य वृद्धमेवैतत् प्रातिपदिकम् । पुंवद्भावप्रतिषेधार्थन्तु । पुंवद्भाव प्रतिषेधार्थो णकार, कर्त्तव्यः । फाण्टाहृता भार्यास्य फान्टाहृताभार्य्यः वृद्धि निमित्तस्य (४।४।३४) इति प्रतिषेधो यथा स्यादिति ।

१०९. मनोः स्यसणौ ।

मनोर्जातौ स्य-सणौ स्याताम् । मनुष्यः, मानुषः । पुत्रे जातौ च मानवः ।

११०. बिदादेरण् गोत्रे च ।

बिदादेः पौत्राद्यपत्येऽण् स्यात् । बैदः, और्वः । गोत्र इति किम्? बिदस्यानन्तरापत्यं बैदिः । एषोऽत्र विशेषः । बिद, उर्व्वा, कश्यप, कुशिक, भरद्वाज, बिश्वानर, हर्यश्व शुनक गोपवनादि हरितादि । अतो गोत्रापत्ये विधिः ।

१११. गर्गादिभ्यो यण् ।

गर्गादिर्गोत्रे यण् स्यात् । गार्ग्यः, वात्स्यः । गोत्र इत्येव गार्गिः । गर्ग वत्स, संस्कृति, पुलस्ति, विदभृत्, व्याघ्रपात् शङ्ख, धूम, अकट वरट, वृक्ष, अनडुह, लोहित, शंसित, बभ्रु, मण्डु, मनु, ध्रुव, वतण्ड, कपिकत, शकल, अगस्त्य, कुण्डिन (नी) यज्ञवल्क, शण्डिल, मुद्गल, परापर, जतुकर्ण, कृष्ण, उलूक, जमदग्नि इत्यादि । कथं रामो जामदग्नयः, पाराशर्यो व्यासः ? पुत्रेऽपि पौत्रादिकार्य्यकारकत्वात् तथा व्यपदिश्यते । अन्यथा जामदग्न एव । *बभ्रोः कौशिके । बाभ्रव्यः बाभ्रवोऽन्यत्र *मधोर्ब्राह्मणे । माधव्यो ब्राह्मणगोत्रः । माधवोऽन्यत्र ' कपिबोधादाङ्गिरसे । आङ्गिरसगोत्रे काप्यो बोध्यः । अन्यत्र कापेयो बौधिः ।

११२. कुञ्जादेष्टायन्यण् परयो लुक् च बाहुषु ।

एभ्यो गोत्रे टायन्यण् स्यात् । कौञ्जायन्यः, ब्राध्नायन्यः । गोत्र इत्येव, कौञ्जिः । परयश्च लुग्बहुषु, कौञ्जायनाः, स्त्रियां कौञ्जायनी । कुञ्ज, व्रध्न, शङ्ख, शुण्डा, विपाश, स्कन्द-स्कम्भ, स्तम्भादि ।

११३. नडादिभ्यः ष्टायनण् ।

एभ्यो गोत्रे टायनण् स्यात् । नाड़ायनः, चारायणः । गोत्र इत्येव, नाड़िः । नड़, चर, इति क, उपक, लमक, शलङ्कोः, शलङ्कञ्च, द्वीप, कश्यप, अमुष्य, ब्राह्मण, अग्र, शकट, मिमत, अलम्ब, युगन्धर, हस्तिन्, अश्मन्, बदर, अध्वर, उडुम्बर,

---

१०९. मनोराव् च जातौ वाच्यायामेतावपि स्याताम् । मानुष इत्यत्र प्रत्ययत्वात् षत्वम् । पुत्रे जातौ च मानव इति बहुलानुवृत्त्या । किञ्च माणवकः कुत्सित-बालयोरित्यन्ये । अनयोर्मूर्द्धन्यवान् साधुः । अत्र कापुरुष-बाल कुत्सितेषु कः, क-प्रत्यये एवेति वृद्धाः स्मरन्ति माणवक इव माणवको हारभेद इत्यन्ये ।

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य मूर्द्धन्यस्तेन सिद्ध्यति माणवः ॥ इति जयादित्यः ।

इत्याद्यपि च, अश्व, पिञ्जर, पिञ्जल, श्रविष्ठा, श्याम, धौम्र, विशम्प, राम, अर्जुन, आतप, शिव, कितव। *आत्रेयाद् भारद्वाजे। *भर्गात्त्रैगर्त्ते। *शरद्वतो भार्गवे। *शुनकात् वात्स्ये। *दर्भादाग्रयणे। *द्रोणपर्वतजीवान्ताद् वा। द्रौणायनो द्रौणिर्वा।

११४. इण्-यण् हारितादिभ्यः।

इणन्तादेर्गोत्रात् यूनि टायनण् स्यात्। इण्, दाक्षायणः। यण्, गार्ग्यायणः। हारितादेः, हारितायनः, बिदाद्यन्तर्गणः। उक्तं गोत्रे।

११५. पौत्राद्यपत्यं गोत्रम्।

पौत्रप्रभृत्यपत्यं गोत्रमुच्यते। गर्गस्य गोत्रापत्यं गार्ग्यः, अनन्तरापत्यं गार्गिः।

११६. जीवति वंश्ये युवाऽग्रजेऽपि।

पितृपितामहादौ वंश्ये जीवति सति पौत्रप्रभृतेरपत्यं युवोच्यते। गर्गे जीवति गार्गो, गार्ग्यो वा, तदा गार्ग्यस्यापत्यं युवा गार्ग्यायणः। मृते सति एको गार्ग्य एव। अग्रजे ज्येष्ठेऽपि भ्रातरि जीवति कनीयान् युवा गार्ग्यायणः।

११७. पितृव्यादौ वा वयोऽधिके।

वयोऽधिके पितृव्ये पितामहभ्रातरि वा जीवति तदा गोत्रापत्यं युवा वा स्यात्। गार्ग्यायणो गार्ग्यो वा।

११८. वृद्धश्च पूजायाम्।

गोत्रमेव वृद्धमाहुः, स च पूजायां युवोच्यते वा। स भवान् गार्ग्यायणः गार्ग्यो वा।

---

११६. वंश आदिपुरुषस्तत्र भवो वंश्यः पूर्वजस्तस्मिन् जीवतीत्यर्थः। तमेव विवृणोति गर्गे जीवतीति। गार्गायण् इति (५।२।११४) इति टायनण्। द्वितीयं लक्षणं व्याचष्टेऽग्रजेऽपीति। अयमर्थः। गर्गस्य द्वौ पुत्रौ, तयोः पूर्वजे जीवति पित्रादौ मृतेऽपि युवत्वात् कनीयान् गार्ग्यायणः। पौत्रादेर्यदपत्यं चतुर्थादि तद् युवसंज्ञमेव स्यान्नतु गोत्रसंज्ञम्।

११७. इहापि पौत्राद्यपत्यं जीवदेव युवेत्यभिधानात्। तथाहि जीवन् जीवद्वृद्धतरो भ्रात्रन्यः सपिण्डो वेति वासवतं सूत्रम्। अस्यार्थः--सप्तपुरुषावधयः सपिण्डाः भ्रातुरन्ये। सपिण्डो जीवन् यस्य, यस्य पौत्रदिः स जीवन् युवेत्यभिधीयते। तेन वृद्धतराभावे गार्ग्य एव, मृतोऽपि गार्ग्य एव।

११८. कस्तावद् वृद्ध इत्यपेक्षायामाह गोत्रमेवाहुरिति। पूर्व्वाचार्या इति शेषः। गोत्रं पौत्राद्यपत्यं, पौत्राद्येव। अतएव पौत्रादेः पूजानिन्दयोरिति क्रमदीश्वरः सूत्रं

११९. **युवा च निन्दायाम् ।**

निन्दायां युवा च युवसंज्ञो वा स्यात् । पितरि जीवति यः स्वतन्त्रः स गार्ग्यायणो जाल्मः, गार्ग्यो वा । (गोत्रयुवसंज्ञे उक्ते) ।

१२०. **कुरु-पञ्चाल युगन्धरादिभ्यः क्षत्त्रियेभ्यो राजनि च ।**

कुर्व्वादि पञ्चालादियुगन्धरादिभ्यः क्षत्त्रियेभ्यो जनपदरूपेभ्योऽपत्ये राजनि च यथाक्रमं ण्य अण् इण् प्रत्यया भवन्ति । कुर्व्वादेर्ण्यः, कौरव्यः पुत्रो राजा च, कौन्त्यः, आवन्त्यः । कुरु, कुन्ति, अवन्ति, निषध, कोशल, अजाद (अजातादि) वृद्ध्याद्यचः, आम्बष्ठ सौवीरादि । पञ्चालादेरण्, पाञ्चालः पुत्रो राजा च । ऐक्षाकवः । पञ्चाल, इक्ष्वाकु, विदेह, अङ्ग, बङ्ग, कलिङ्ग, मगध, सुह्म, सुरसम, शूरसेन मद्रादि । *साल्वेय-गान्धारिभ्याञ्च । साल्वेयः, गान्धारः । *युगन्धरादेरिण्, यौगन्धरिः पुत्रो राजा च, औडुम्बरिः । युगन्धर, उदु (डु) म्बर प्रत्यग्रथ, कलकूट इञ् अश्मकादि ।

१२१. **कम्बोजादेर्लुक् ।**

एभ्योऽपत्ये राजनि च विहितस्य लुक् स्यात् । कम्बोजः पुत्रो राजा च । चोलः, शकः, केरलः ।

१२२. **स्त्रियामवन्ति-कुन्ति-कुरु-शूरसेनादिभ्यः ।**

एभ्यः स्त्रियामपत्ये विहितस्य लुक् स्यात् । अवन्ती, कुन्ती, कुरूः, शूरसेनी, मद्री दरत् ।* केकयाद वा । कैकेयी । (केकयी इत्यत्र तु जन्यजनकभावलक्षणे पुंयोगे ङी) । एभ्यः किम् ? पाञ्चाली वैदेही मागधी आङ्गी बाङ्गी भार्गी ।

१२३. **यस्कादिजनपदे राजन्येभ्यो बहुष्वस्त्रियाम् ।**

एभ्योऽपत्यविहितस्य बहुषु लुक् स्यात् । यास्कः, यस्कौ, यस्काः । अयस्थूणाः । गर्गादिः, गर्गाः, वत्साः ।

प्रणीतवान् । तत्र भवच्छब्दः श्लाघ्यवचनः, श्लाघ्ये तत्रभवन्मुखा इति नाटय-लोचनस्वरसात्, सः पुनः पूजाद्योतकः, वाचकस्तु प्रत्यय एव । इत्थं परत्रादि ज्ञेयम् ।

१२०. कथं नैषध-कौरव इत्यादावण् प्रत्ययः ? सत्यम्, तस्माद् विषयो देश इत्येके, अजनपदविवक्षयेत्यन्ये, तस्येदमिति विवक्ष्येत्यपरे समादधुरिति । "साल्वावयव-प्रत्यग्रथ-कलकूटाश्मकादिञ्" साल्वो जनपदस्तदवयवा उदुम्बरादश्यस्तेभ्यः प्रत्यग्रथादिभ्यास्त्रिभ्यश्च इञ् । अञोऽपवादः ।

१२४. अगस्ति चागस्त्यस्य ।

अगस्त्यः । कौण्डिन्यस्य कुण्डिनश्च, कुण्डिनाः ।

१२५. विदादेरगोपवनादेः ।

बिदाः ऊर्व्वाः । गोपवनादेस्तु गौपवनाः, शैग्रवः । *अत्रिभृगु-कुत्स-वशिष्ठ-गोतमाङ्गिरेभ्यः । अत्रयः, भृगवः । *इणो बह्वचः प्राच्यभरतेषु । पन्नागाराः, पुष्करसदाः । भरतगोत्रे युधिष्ठिराः, अर्ज्जुनाः ।

१२६. तिककितवादिभ्यो द्वन्द्वे ।

तैकायनश्च कैतवायनश्च तिककितवाः ।

१२७. उपकादिभ्यो वा द्वन्द्वे च ।

उपकाः औपकायनाः । लमको लामकायनाः । उपकलमकाः, उपकायन-लामकायनाः । जनपदनामक्षत्रियेभ्यः खल्वपि । कुरवः, पञ्चालाः, युगन्धराः । कथं संरक्ष्यन्तां कौरवाः ? तस्येदमित्यणन्तात् । कथं प्रियबाङ्गा विप्राः ? नेदं बाङ्गस्य बहुत्वम्, प्रियो बाङ्गो येषामित्येकबचनत्वात् अन्यकृतबहुत्वे मा भूत् । इह भवति, आङ्गश्च, बाङ्गश्च कालिङ्गश्च अङ्गबङ्गकलिङ्गाः । अस्त्रियामिति किम् ? यास्क्य स्त्रियः, गार्ग्यः, वैद्यः, पाञ्चाल्यः । अपत्य इत्येव, यास्काश्छात्राः ।

---

१२७. एभ्यो बहुष्वपत्यप्रत्ययस्य लुक् वा स्यात् । द्वन्द्वयोस्तथोदाहृतमेव । उपकादिराकृतिगणः । तत्रोपकलमकौ नड़ादी । भ्रष्ठकपिष्ठलकृष्णाजिन-कृष्णसुन्दरा इणन्ताः, एषां पूर्वत्र पाठो द्वन्द्वे नित्यार्थ इति जयादित्यादयः । भाष्ये तु तत्र पाठ एव नेष्टः । अनुलोमन् प्रतिलोमन् बाह्वादी । पतञ्जलि-पदञ्जली अणन्तौ । काश्यपगोत्रः कुशीतकस्टेयणन्तः । अन्यत्राणन्तः । खारीजङ्घ, शलाथल, कठिषित्, कमन्दक कलशीकण्ठ दामकण्ठ जटिलकादय-इणन्ताः । बहुष्वेत्येव, औपकायनः । स्त्रियान्तु औपकायन्यः । अथ जनपद-राजन्येति गणं व्याचष्टे वृत्तिकारः, जनपदेति, जनपदो देशभेदः, तन्नाम क्षत्रियो जनपदनामक्षत्रियः । तेभ्यो बहुष्वपत्यराज्ञोर्विहितप्रत्ययस्य लुक् स्यात् । कुरुणामपत्यानि राजानो वा कुर्व्वादिभ्यो ण्यः कुरवः । पञ्चालाः अणो लुक् ? युगन्धरा इणो लुक् । अत्र बहुत्वमवयवकृतम् । इति सर्वेषामेव लुक् । इह बहुत्वलोपिनां द्वन्द्वबहुत्वे इति केनचित् सूत्रितम् । अस्यार्थः, ये बहुत्वलोपिनो यस्कादयो गर्गादयो बिदादयो अत्र्यादयो जनपदराजन्याश्च

१२८. न प्राग्दीव्यतीयेऽचि ।

प्राग्दीव्यतीयेऽजादौ कर्त्तव्ये बहुषु लुक् नास्ति । गार्ग्याणां छात्राः, गार्गीयाः, आत्रेयीयाः । अचीति किम् ? गार्ग्येभ्यो आगतं गर्गरूप्यम् ।

१२९. यूनि लुक् ।

अजादौ प्राग्दीव्यतीये कर्त्तव्ये यूनि विहितस्य प्रत्ययस्य लुक् स्यात् । फान्टाहृतेरपत्यं युवा फान्टहृतस्तस्य छात्राः णस्य लुक्, तत इणन्तात्, इण् काण्व्यादेरण् । गोत्रात्, फान्टाहृताश्छात्राः ।

१३०. टायनण्-णायन्योर्विभाषा ।

अनयोर्यूनि विहितयोरजादौ प्राग्दीव्यतीये कर्त्तव्ये लुग्वा स्यात् । गार्ग्यायणीया वा, यास्कायनेश्छात्राः यास्कीयाः, यास्कायनीया वा । व्यवस्थितविभाषया नित्यम्, आत्रेयायणस्य छात्राः आत्रेयीयाः । यूनीत्येव, नेह अश्वादेः आश्वायनीयाः ।

तेषां द्वित्वैकत्वयोर्वर्त्तमानानामपि द्वन्द्वस्य बहुत्वे लुक् स्यात् । यस्क-लह्य-द्रुह्याः, गर्गवत्स-शण्डिलाः, बिदोर्व्कुतसवशिष्ठाः, भृग्वङ्गिरोत्यः, अङ्ग-बङ्ग-कलिङ्गाः । एकशेषेऽपीति मतम् । अङ्गश्चाङ्गश्चाङ्गा इति मतमेतद्भाष्य-चान्द्रयोरपि समर्थितम् । अभेदविवक्षयापत्यवृत्तित्वाद् द्वन्द्वे विनाप्यमीषां लुक्-प्रयोगो भवतीति निरस्तमिदमन्यैः । वा लोपिना चेत्यन्यत् । अस्यार्थः ये अलोपिन उपगुप्रभृतेष्वणादयस्तेषामबहुत्ववृत्तीनामपि द्वन्द्वबहुत्वे लुग्विभाष्यते । अङ्गबङ्गोपगवः, आङ्गबाङ्गोपगवाः इदमपि भेदविवक्षयान्यैः परास्तम् । गर्ग विदादिभ्योऽबहुत्वे षष्ठयास्तत्पुरुषे वेत्येके । अनयोरपत्य-प्रत्ययस्याबहुत्वे षष्ठी तत्पुरुषे लुग्वा स्यात् । गार्ग्यस्य गार्ग्योर्वा भार्या गार्गभार्य्या । अबहुत्व इति किम् ? गार्ग्याणां भार्य्या गर्गभार्य्याः । अस्त्रिया-मित्येव गार्ग्यीपुत्रः । इह षष्ठया इत्यसमासात् गार्ग्याणां षष्ठीतत्पुरुषस्योत्तर-पद एव, तेन राजगार्ग्यः । गर्गस्तु कुलसम्बन्धादाद्येन गर्गेण गार्ग्योऽपि व्यपदिश्यते इति व्याख्यातवान् ।

१२८. गर्गाणामित्यनेन प्राप्ता लुग्निषिद्धा । एवमन्यत्र तत्राज्वर्जितानामिति पाणिनीयाः । दुर्गवर्द्धमानादयस्तु कालिङ्गीया ऐक्ष्वाकवीया इत्युदाहरन्तस्तदमी न मन्यन्त इति मन्ये । बहुष्वित्यनुवर्त्तते, तेन कम्बोजस्यापत्यम् कम्बोजः । ईयः खलुः स्यात् । प्राग्दीव्यतीय इति किम् ? गार्ग्येभ्यो हितम् गार्गीयम् । कथं गर्गाणां भृगूनाञ्च कुटुम्बकरणम् ? गर्भागुरिकाः बहुलानुवृत्तेरित्यन्ये ।

१३१. **पैलादिभ्यो यूनि ।**

पुनर्यूनीति ग्रहणं प्राग्दीव्यतीयेऽचीति निवृत्त्यर्थम् । एभ्यो युवप्रत्ययस्य लुक् स्यात् । पीलाया वा अण् ततो णायनेर्लुक् पैलः, पिता, पैलः पुत्रः । बैदार्दैबैदः पिता, बैदः पुत्रः । पान्नागार्य्यादिष्टायणस्य लुक् । पान्नागारिः पिता, पुत्रश्च । एवं सात्यकि, भौरिकि, औद्मेयि प्रभृतयः । दाक्ष्यादेर्नलुक् । दाक्षिः पिता, पुत्त्रश्च दाक्षायणः, आर्ज्जुनिः, आर्ज्जुनायनः । तौल्वलिः तौल्वलायनः । आसुरिः आसुरायणः । तैकायन्यादेरणोलुक् । तैकायनिः पिता, पुत्रश्च । ण्यार्षक्षत्रियेभ्य इणो लुक् । ण्यात् कौरव्यः पिता कौरव्यः पुत्रश्च । तिकादिपाठात्, कौरव्यायणिः । आर्षात् वाशिष्ठः पिता पुत्रश्च । क्षत्रियात् श्वाफलकः पिता पुत्रश्च । (पूर्णोऽपत्याधिकारः) ।

१३२. **तेन रक्तं रागात् ।**

तेन रक्तमित्यर्थे रागवाचिनः शब्दादण् स्यात् । कषायेण रक्तं, काषायं वस्त्रम् । कौङ्कुमम्, हारिद्रं, माहारजनम् । कथं हारिद्रौ कुक्कुटस्य पादौ ? उपमानात् ।

१३३. **लाक्षा-रोचनाट्टिकण् ।**

लाक्षया रक्तं लाक्षिकं वस्त्रम्, रौचनिकी शाटी ।

१३४. **शकल-कर्द्दमाद्वा ।**

शाकलिकं वस्त्रम्, शाकलं वा । कार्द्दमिकं पटः, कार्द्दमो वा ।

१३५. **पीतात् कः ।**

कः स्यात् । पीतकं वस्त्रम् ।

१३६. **नील्या अत् ।**

नीलः पटः । तेनेति वर्त्तते प्राक् कौमारात् ।

---

१३२. रागोरञ्जनसाधनं वस्तु, रञ्जनस्तु वर्णान्तरापदनम्, तेनायमर्थः । कषायो निर्यासादिः, "कषायो रसभेदे च निर्यासे च विलेपने । अङ्गरागे च ना स्त्री स्यात् मधुरे लोहिते त्रिषु ।" "महाजनमुद्दिष्टं शतकुम्भ-कुस्तुम्भयोः ।"

१३३. लाक्षारोचनादिति समाहारद्वन्द्वः । "रोचन-रक्तके क्लीबे गोपित्त-वृषयोषिताः ।" इति

१३४. शकलं त्वचि खण्डे स्यात् रागवस्तुनि वल्कले इति विश्वमेदिन्यौ ।

१३७. दृष्टं साम ।

अत्रार्थे यथाविहितमणादयः स्युः । वशिष्ठेन दृष्टं साम वाशिष्ठम्, वैश्वामित्रम्, आग्नेयम् कालेयम् ।

१३८. उशनस ष्टिटलोपो वा ।

उशनसा दृष्टं औशनं साम, औशनसं वा ।

१३९. गोत्रादकण् ।

औपगवेन दृष्टं साम औपगवकम् ।

१४०. वामदेवाद्यः ।

वामदेव्यं साम ।

१४१. परिवृत्तो रथः ।

अत्रार्थेऽण् स्यात् । वस्त्रेण परिवृतो रथः वास्त्रः, चार्म्मणः, काम्बलः । द्वैपेण चर्म्मणा परिवृतः, अणि टिलोपो निपात्यते द्वैपो रथः । वैयाघ्रः ।

१४२. पाण्डुकम्बलादिन् ।

पाण्डुकम्बली रथः ।

१४३. युक्तः कालो नक्षत्रात् ।

तेन युक्तः काल इत्यर्थे नक्षत्रादण् स्यात् । पुष्येण युक्तं पौषमहः, माघी रात्रिः ।

१४४. लुबविशेषे ।

अणो लुप् स्यात् । अद्य पुष्यः, अद्य मघा । अविशेष इति किम् ? श्रावणी रात्रिः ।

---

१४१. द्विपिनो विकारश्चर्म्म द्वैपम्, अणीत्यत्र (५।१।२८) चकारस्यानुक्तसमुच्चयार्थत्वादणि टिलोपः । तर्हि कथं द्वैपवैयाघ्रादञिति सूत्रितमितिचेत् तद्युवार्थम् ।

१४३. इहाव्यभिचारान्नक्षत्रपदेनेन्दुयुक्तनक्षत्रं लक्ष्यते, अतएव नक्षत्रात् तेनेन्दुयुक्तेन काल इति परसूत्रम् । पौषमह इति तिष्य—(५।१।५०) इति यलोपः । पुष्यसमीपचन्द्रयुक्तमित्यर्थः । इन्दुयुक्तं नक्षत्रं कथं लक्षितमिति चेत कृत्तिकाभिर्लक्षितमहः । काल इति किम् ? पुष्येण लक्षितं साध्यम् । किञ्च पुष्येण लक्षितः शशीति प्रत्युदाहरता पुरुषोत्तमेन लक्षणा नेहाद्रियत इति ।

१४४. कालविशेषाविवक्षायामिदमीयस्याणो लुप् स्यात् । पुष्य इति यावान् कालः पुष्येण युक्तस्तावानित्यर्थः । श्रावणी रात्रिरिति एकदेशस्यात्र प्रतीतिः

१४५. नाम्नि श्रवणाऽश्वत्थाभ्याम् ।

अणो लुप् स्यात् । श्रवणा रात्रिः, अश्वत्थो मुहूर्त्तः । (असंज्ञायान्तु श्रावणी आश्वत्थी ।)

१४६. द्वन्द्वादीयः ।

राधानुराधीया रात्रिः । लुप् च बाध्यते, अद्य पुष्यपुनर्व्वसवीयम् ।

१४७. तदयुक्ताऽस्मिन् पौर्णमासीति संज्ञायाम् ।

अत्रार्थे नक्षत्रादण् स्यात् । पुष्ययुक्तो पौर्णमासी अत्रेति पौषो मासः मार्गशीर्षः, शिरसः, शीर्षोऽणि ।

१४८. अश्वत्थाऽऽग्रहायणीभ्यां टिकण् ।

पूर्वार्थे आभ्यां टिकण् स्यात् । अश्वत्थया युक्ता पौर्णमासी अस्मिन्निति आश्वत्थिकः पक्षो मासो वा आग्रहायणिकः ।

१४९. चित्रा श्रवणा-फल्गुनी कृत्तिकाभ्यो वा ।

टिकण् वा स्यात् । चैत्रिको मासश्चैत्रो वा, श्रावणकः श्रावणः, फाल्गुनिकः, फाल्गुनः, कार्त्तिकिकः कार्त्तिकः ।

१५०. कौमारः प्रथमपरिणये ।

प्रथमविवाहे सति अणन्तः कौमारो निपात्यते । कौमारः पतिः । प्रथमोढ़ा कौमारी ।

१५१. तत्रोद्धृतं पात्रेभ्यः ।

तत्रोद्धृतमित्यर्थे पात्रेभ्योऽण् स्यात् । शरावेषूद्धृतं शारावं दधिः ।

पौषोऽहोरात्र इति प्रसज्यप्रतिषेधात् । इन्दोः सन्निधानात् तथा व्यपदेश इति चन्द्रगोमिनापि प्रत्याख्यातमिदम् । तन्नातिसुन्दरम्, विवक्षया प्रत्याख्यातुं न शक्यते ।

१४९. विभाषा फाल्गुनी श्रवणा कार्त्तिकी चैत्रीभ्य इति भाष्यम् ।

१५०. प्रथम परिणयोऽत्र कुमार्या एव । तथाहि कुमारीमपरिणीतां प्रथमं परिणीतवान् कौमारः पतिः, द्वितीयान्तादण् । या पत्या प्रथमोढ़ा पूर्व्वपतिः सा कौमारी । काशिकायां तु कुमार्या भव कौमारः पति तस्य स्त्री कौमारी । य कौमारहरः स एव हि वर इति सामान्यमपि प्रयोगदर्शनात् प्रत्याख्यातो योगः । अन्ये तु कौमारशब्दस्य भर्त्तरि वृत्त्यभावात् प्रसूतादिशब्दवत्···पुंयोगलक्षणि । ई प्रत्ययो न स्यात्, तेन कौमारस्य कौमारीत्यपि वचनं विना न सिध्यतीति सूत्रमिदमाद्रियते ।

१५२. **शेते स्थण्डिलात् व्रते ।**

अण् स्यात् । व्रतञ्चेत् । स्थण्डिले शेते स्थाण्डिलः ।

१५३. **संस्कृतं भक्षाः ।**

तत्र संस्कृतमित्यर्थेऽण् स्यात् । भक्षाश्चेत् । भ्राष्ट्रे संस्कृताः भ्राष्ट्राः आपूपाः, पैठराः ।

१५४. **शूलोखाभ्यां यः ।**

शूले संस्कृतं शूल्यम्, औख्यम् ।

१५५. **क्षीराट्टेयण् ।**

क्षीरे संस्कृता क्षैरेयी यवागूः ।

१५६. **दघ्नष्टिकण् ।**

दध्नि संस्कृतं दाधिकम् ।

१५७. **उदश्वितो वा ।**

उदश्विति संस्कृतम्, औदश्वितिकम् औदश्वितं वा ।

१५८. **तेन संस्कृते टिकण् ।**

तेन संस्कृतेऽर्थे टिकण् स्यात् । दध्ना संस्कृतं दाधिकम्, गौड़िकम्, माधविकम्, मारीचिकम् ।

१५९. **कुलत्थकोपधादण् ।**

कौलत्थम्, तैन्तिडिकम् ।

१६०. **साऽस्य देवता ।**

अत्रार्थे यथाविहितमणादयः स्युः । इन्द्रो देवताश्च ऐन्द्रं हविः, बार्हस्पत्यो मन्त्रः, आग्नेयश्चरुः ।

---

१५६. यस्य दधिकृतमेवोत्कर्षाधानं तद् दध्ना संस्कृतम्, इह तु केवलसाधनभूतं दधिद्रव्यान्तरेण लवणादिना संस्क्रियत इति भेदः । चान्द्रास्तु दध्नि संस्कृतं यत्तत् दध्नापि संस्कृतं तदिति नार्थभेदः, किन्तु संस्कृतभक्षमित्यबाधकमिति वदन्ति ।

१५७. इदमपि चान्द्रेण प्रत्याख्यातं पूर्वेण परेण सिद्धत्वात् ।

१५८. तेनेति करणे तृतीया । तेनेति सिद्धे संस्कृतग्रहणं भक्षनिवृत्त्यर्थम् । तेन विद्यया संस्कृतो वैद्यिकः ।

१६१. **कादायट्।**
को देवता अस्य कायं हविः।

१६२. **शुक्रादियः।**
शुक्रो देवता अस्य शुक्रियोऽध्यायः।

१६३. **अपोनप्त्रपांनप्तृभ्यामीयश्च।**
अपोनप्त्रीयम्, अपोनप्तृयञ्च, अपान्नप्त्रियञ्च*।

१६४. **महेन्द्रादण् च।**
अण् स्यात्। इय-ईयौ च। महेन्द्रो देवता अस्य माहेन्द्रम् महेन्द्रीयम् महेन्द्रियञ्च हविः।

१६५. **सोमाट्ट्यण्।**
सौम्यम्, सौमी ऋक्।

१६६. **महाराज-प्रोष्ठपदाट्टिकण्।**
आभ्यां पूर्व्वार्थे टिकण् स्यात्। माहाराजिकः प्रौष्ठपदिकः।

१६७. **ऋतुवायूषःपितृभ्यो यत्।**
ऋतुर्देवता अस्य, ऋतव्यम्, वायव्यम्, उषस्यम्, पित्र्यम्।

---

१६३. आभ्यां पूर्व्वार्थे ईयेयौ स्याताम्। अपोनपात् अपान्नपाच्चेति देवताभेदः। अनयोः प्रत्ययसंन्नियोगेन रूपमिदं निपात्यते। * शतरुद्रीयश्च। अस्मात् पूर्वार्थे ईयः स्यात्। रुद्रो देवतास्य शतस्य शतरुद्रीयम्, शतरुद्रियञ्च। निपातनात् समासः। पैङ्गाक्षी पुत्रादिभ्यश्च। एभ्यः पूर्व्वार्थे ईयः स्यात्। पैङ्गाक्षीपुत्रीयम्, तार्णविन्दवीयम्। इदमपि सूत्रद्वयं बाहुल्यात् समर्थनीयं पुरुषोत्तमाद्यैर्निरुक्तत्वात्।

१६५. अतः पूर्व्वार्थे ट्यण् स्यात्। कथं सौम्यो बुधः? सोमपितृत्वाद्देवतास्येति स्यात्। अपत्ये तु सौमिः। गर्गादित्वादित्यन्ये। तृप्तिहेतुत्वात्तुहिनदीधित्वाच्च सोमः सुन्दरोऽमुग्धश्च। ततो भेषज्यादेर्यण् स्वार्थ इति यण्, स एव मनोज्ञशान्तयोर्वर्त्तते इति शाब्दिकाः।

१६६. कथं महाराजिकः? महती राजिर्यस्येति बहुव्रीहौ कप्। संज्ञा० (३८) इत्यन्ये 'कालेभ्यो भववदित्येके' अस्यार्थः कालविशेषवाचिभ्यो देवतार्थे भवार्थे यावन्तः प्रत्ययास्ते विधीयन्ते। यथा मासादिषु भवं मासिकम्, नैशम्,

१६८. **द्यावापृथिव्यादेरीयश्च ।**

यच्च । द्यावापृथिव्यौ देवते अस्य द्यावापृथिवीयम्, द्यावापृथिव्यम् । द्यावापृथिवी शुनासीर मरुत्वत् अग्नीषोम वास्तोष्पति गृहमेध ।

१६९. **सोऽत्र वर्त्तते पूर्णमासात् ।**

अत्रार्थे पूर्णमासादण् स्यात् । पूर्णमासोऽत्र वर्त्तते, पौर्णमासी तिथिः ।

१७०. **अन्यादेष्टिकण् ।**

अन्योऽत्र वर्त्तते आन्यायिकः, औत्पातिकः, नावयज्ञिकः ।

१७१. **पितृव्य-मातुल-मातामह-पितामहाः ।**

चत्वारो निपात्यन्ते । पितुर्भ्राता पितृव्यः, मातुर्भ्राता मातुलः, मातुः पिता मातामहः, पितुः पिता पितामहः ।

१७२. **अवेः सोढदूसमरीसा दुग्धे ।**

अवि-शब्दात् एते स्युः । दुग्धञ्चेत् । अवसोढ़म्, अविदूसम्, अविमरीसम् ।

१७३. **तिलात्-पिञ्ज-पेजौ निष्फले ।**

तिलादेतौ स्याताम् निष्फलञ्चेत् । तिलपिञ्जः, तिलपेजः ।

१७४. **तस्य समूहो नपुंसके ।**

अत्रार्थे क्लीबेऽण् स्यात् । मयूराणां समूहो मायूरम्, कापोतम्, काकम्, शौकम्, औलूकम्, वाङ्वम्, भैक्षुकम्, गार्भिणम्, वार्म्मणम्, यौवतम् । पुंवद्भावात् यौवनमित्येके । वारत्रम् यौगवारत्रम्* । पर्शोरोवश्च । पार्श्वम् ।

नैशिकम्, ग्रैष्मम्, अमावास्यम्, पौषम्. प्रावृष्येण्यम्, वार्षिकम्, हैमनम्, पूर्वाह्णेतनम्, पौर्वाह्णिकम्, इत्यादि । तथा मासाद्या देवता अस्येत्यर्थेऽपि ।

१६९. प्रथमान्तादित्यर्थः । पौर्णमास्यन्तमासपक्षे व्युत्पत्तिरियम् सङ्गच्छते । काशिकायान्तु पूर्णमास इति पाठे पूर्णमासशब्देन चन्द्र इत्यर्थः, तस्येयं पौर्णमासीति व्युत्पादितम् ।

१७२. इह दन्त्योपादानसामर्थ्यान्न षत्वम् । अन्यथा प्रक्रियालाघवार्थं मूर्द्धन्यमेवोपदिशेदिति भत्तृहरिः । अविसोढ़मुत्तरासङ्गपरिस्रुदस्रकादासा अविदूसमविमरीसं क्रियमाणवुसपीनसप्रघसा इत्युष्मभेदाद् दन्त्यत्वम् ।

१७४. इहाचित्तत्वेऽपि भिक्षादेरण् विधीयते । * भिक्षादयस्तु भिक्षा, गर्भिणी, क्षेत्र, करीष, अङ्गार, चर्म्मिन, धर्म्मिन, सहस्र, युवति, पदाति, पद्धति, अथर्वन्

१७५. **अश्वादीयश्च ।**

अश्वीयम्, आश्वञ्च ।

१७६. **गोत्रोक्षोष्ट्रोरभ्र-राजन्य-राजपुत्र-वत्समनुष्याजवृद्धेभ्योऽकण् ।**

गोत्रात्, दाक्षीणां समूहो दाक्षकम्, गार्गकम् । अक्षोदः, औक्षकम्, औष्ट्रकम्, औरभ्रकम्: राजकम्, राजन्यकम्, राजपुत्रकम्, वात्सकम्, मानुष्यकम्, आजकम्, वार्द्धकम् ।

१७७. **केदारादिकण्यणौ च ।**

केदाराणां समूहः कैदारिकम्, कैदार्य्यम्, कैदारकम् ।

१७८. **ब्राह्मण-माणव-पृष्ठ-वाडवाद्यः ।**

ब्राह्मणानां समूहो ब्राह्मण्यम्, माणव्यम्, पृष्ठयम्, वाडव्यम् ।

१७९. **चरणेभ्यो धर्मवत् ।**

धर्मार्थे यथाविहितं प्रत्ययाः स्युः । कठानां समूहः काठकम्, छान्दोग्यम्, आथर्वणम् ।

१८०. **अचित्त-हस्ति-कवचि-धेनो-ष्टिकण् ।**

टिकण् स्यात् । टित्करणमुत्तरारार्थम् । अचित्तात्—अपूपानां समूहः आपूपिकम्, शास्कुलिकम् । हस्त्यादेः, हास्तिकम्, कावचिकम्, धैनुकम् ।

दक्षिणा, भरत, विषय, गोत्र इति * अङ्गारशब्दस्य पाशादित्वात् यावपि स्यात् । सचित्तत्वेऽपि पुंवन्निषेधार्थं पाठ इति जयादित्यादयः । भाष्यवार्त्तिकयोस्तु अत्रास्य पाठः प्रत्यादिष्टः । विमलमतिस्तु—"रूपलाग्वण्य-सयुंक्तं कलाकुशलयौवनम् । यस्य पुण्यवतः प्रेष्यं सकलं तस्य यौवनमिति" यमकानुरोधात्"मुत्तोल्यपुंवन्मेने । तन्मतमाविष्करोति पुंवद्भावादिति । युगधरत्राशब्दः सङ्घातवगृहीतः । तेन यौगम्, वारत्रम् । यौगवारत्रमिति दर्शयति । पर्शोरोर्व्वेश्चेति पर्शूनां पृष्ठास्थानां समूहः पार्श्वम्, वकारोऽवधारकः । उलूकशब्दोऽत्र गर्गादियणो लुकि निर्दिष्टः । तेन गोत्रान्तत्वादकण्ण स्यात् । तथा प्रजापतीनां समूहः प्राजापत्यम्, याम्यम्, स्त्रैणम्, पौंस्नम् । क्रमदीश्वरतु क्षौद्रकमानवात् सेनानाम्नीति लक्षितवान् । अस्यार्थः, सेना समूहभेदः तत्समूह इत्यर्थे आभ्यामण् स्यात् । क्षुद्रको मानश्च क्षत्रियभेदः । क्षुद्रकाणां मानवानाञ्चापत्यानि पञ्चालानाञ्च कुर्व्वादित्वात् ण्यः, बहुषु तयोर्लुक्, द्वन्द्वे क्षुद्रकमानवास्तेषां समूहः क्षौद्रकमानवी सेना । असेनानाम्नि तु क्षौद्रकमानवकम्, गोत्रादकण् ।

१८१. **केशाद् यण् च ।**

कैश्यम्, कैशिकम् ।

१८२. **गणिकायाश्च ।**

यण् स्यात् । गाणिक्यम् ।

१८३. **पुंस्यह्नः ईनः क्रतौ ।**

अहीनः क्रतुः ।

१८४. **जन-गज-बन्धु-सहाय-ग्रामेभ्यो स्त्रियां ताप् ।**

एभ्यः समूहो स्त्रियां ताप् स्यात् । जनानां समूहो जनता, गजता, बन्धुता, सहायता, ग्रामता ।

१८५. **पाशादिभ्यो याप् ।**

स्त्रियां याप् स्यात् । पाश्या, धूम्या, तृण्या, वन्या, हल्या, नड्या, वाच्या ।

१८६. **गोरथात् त्राप्कड्यापौ च ।**

याप् च । क्रमात्, गव्या, गोत्रा, रथ्या, रथकड्या ।

१८७. **खलादिन् च, याप् च ।**

खलिनी, खल्या ।

१८८. **नलादेश्च ।**

इन् स्यात् । नलानां समूहो नलिनी, पद्मिनी, उत्पलिनी, उलूकिनी । "आदिशब्दात्—डाकिनी, कुटुम्बिनीत्यादि" । उक्तं समूहे ।

१८९. **विषयो देशे ।**

तस्येत्येव, तस्य विषय इत्यर्थेऽण् स्यात् । देशश्चेत् । शिबीनां विषयो देशः, शैबः, आङ्गः* ।

१९०. **राजन्यादेरकण् ।**

राजन्यानां विषयो देशः राजन्यकः, माणवकः ।

---

१८५. विषयो ग्रामसमूहः । शिबीनां ग्रामसमूहः शैवः । एव माङ्गः, बाङ्गः, कालेयः । शेष इति किम् ? विप्रस्य विषयो वेदः, अत्यन्ताभ्यस्त इत्यर्थः । जनपदेन्द्रिय-ग्राह्यायन्तशीलिता (न) न्यत्र भाववृत्तित्वाद् विषयस्य देशग्रहणं जनपदप्रति-पत्त्यर्थम् ।* भौरिक्याद्यैषुकार्य्यादिभ्यो विधल्-भक्तलौ । भौरिकीनां विषयो

१९१. सोऽस्यादिरिति छन्दोभ्य: प्रगाथे ।
अत्रार्थे छन्दोभ्योऽण् स्यात् । प्रगाथश्चेत् । पंक्तिरादिरस्य प्रगाथस्य प्राङ्क्तः, त्रैष्टुभ:, जागत: । स्वार्थे च क्लीबे । अनुष्टुबेव, आनुष्टुभम्, त्रैष्ठभम् जागतम् ।

१९२. युद्धे प्रयोजनयोद्धृभ्य: ।
एभ्योऽणादय: स्युर्युद्धञ्चेत् । सुभद्रा प्रयोजनमस्य सौभद्रो रण:, द्रौपद:, स्त्रैण: । भरता योद्धारोऽस्य भारत: संग्राम:, पादात:, पाञ्चाल:, पौस्न: ।

१९३. तदत्र क्रीडायां प्रहरणमिति स्त्रियां ण: ।
अत्रार्थे प्रहरणात् स्त्रियां ण: स्यात् । दण्ड: प्रहरणमस्य दाण्डा क्रीड़ा, मोष्टा, पाल्लवा ।

१९४. घणश्च साऽस्यां क्रियेति ।
घणन्तादत्रार्थे ण: स्यात् । श्येनपात: क्रिया अस्यां वर्त्तते श्येनम्पाता मृगया, तैलम्पाता स्वधा, मौषलपाता भू: ।

१९५. तदधीते वेद वा ।
अनयोर्थयोरण् स्यात् । व्याकरणमधीते वेद वा वैयाकरण:, ज्यौतिष:, छान्दस:, तद्वेत्ति—नैमित्त: ।

देश: भौरिकिविधम्, भौलिकिविधम् । ऐषुकारिभक्तम्, सारसायणभक्तम् भौरि(लि)कि, चौप (ट) यत चैटयत, काणेय वाणिजक वाणि (लि) काज्य, सैकयत । इति भौरिक्यादय: । ऐषुकारि सारस्यायन, चान्द्रायण, द्व्याक्षायण त्र्याक्षायण जौड़ा (ना) यन, खाड़ायन, दासमित्रायण, दासमित्रि, शौद्रायण, दाक्षायण, शापण्डायन, ताक्ष्यायण, शौभ्रायण, सौवीर-सौवीरायण, शपण्डु, शौण्ड, शयाण्डि, शयाण्ड, वैश्वमानव, वैश्वध्येनव नड़ तुण्डदेव, विश्वदेव, सापिण्डि । इत्यैषुकार्य्यादय: ।

१९५. वा-ग्रहणमधीयानविदुषो: पृथक् विधानार्थम् । गोयीचन्द्रस्तु अध्ययनसाहचर्यात् यस्य वेदमध्ययनञ्च सम्भवति तस्मादेव प्रत्यय: । अत: पुरुषवाचकात् प्रभाकर-शब्दान्न प्रत्यय:, यतस्तस्त वेदनमेव न सम्भवति । नन्वध्ययनस्तूपचारात् तत्कृते वर्त्तते । तस्य तदुभयञ्च सम्भवतीति गौणादपि प्रत्यय: । यथा प्राभाकर: । इत्याह ज्योतिरधीते वेत्ति वा ज्यौतिष:, उक्थादित्वाज्यौतिषिक: । तद्वेत्तीति, निमित्तं शुभाशुभसूचकं वेत्ति नैमित्त: । एवं शाकुन:, अभिधानात् ।

१९६. **उक्थादिभ्याष्टिकण् ।**

टिकण् स्यात् । उक्तमधीते वेद वा औक्थिकः, याज्ञिकः, नैयायिकः, लोकायतिकः, ऐतिहासिकः, पौराणिकः, ज्यौतिषिकः, वार्त्तिकः । (१) *क्रतौ-आग्निष्टौमिकः, (२) *कल्प-लक्षण-सूत्रान्ताद् अकल्पादेः—प्राथमकल्पिकः, गौणलाक्षणिकः, वार्त्तिसूत्रिकः । अकल्पादेरिति किम् ? काल्पसूत्रः, (३) *विद्यायाः क्षत्राङ्ग-त्रि-धर्म्मादन्यपूर्व्वायाः । टिकण् स्यात् । वायसविद्यिकः, चातुर्विद्यिकः, कथं चातुर्विद्यः ? तत्र कुशलार्थेऽणि । क्षत्रादेरन्यपूर्वाया इति किम् ? क्षात्रविद्यः, आङ्गविद्यः, त्रैविद्यः, धार्म्मविद्यः । (४) *आख्यानाख्यायिकाभ्याञ्च । यावक्रीतिकः, वासवदत्तिकः ।

१९७. **क्रमादेरकः ।**

क्रममधीते वेद वा क्रमकः, पदकः, शिक्षकः, मीमांसकः, उपनिषत्कः सामन् (सामकः) ।

१९८. **पदोत्तरपदादिकः ।**

पदोत्तरपदिकः ।

१९९. **शतषष्टेः पथष्टिकः ।**

शतपथिकः, षष्टिपथिकः ।

२००. **अनुब्राह्मणादिन् ।**

अनुब्राह्मणी ।

---

१९६. उक्थ लोकायत, न्यास न्याय ज्योतिष संहिताः । पुनरुक्त यज्ञ चर्च्चा क्रमेततर-पदक्रमाः ।। श्लक्षणसंग्रहसंङ्घातायुर्व्वेदगणितोगणः । इतिहासः पुराणञ्च वृत्ति-तर्कौ सशब्दकौ ।। कृतान्तोद्विपदा तन्त्रं वसन्तशरदावपि । वर्षाहेमन्त-शिशिराः प्रथमं चरमन्तथा ।। अथर्वाणोऽप्यनुषेण इत्येताः कथिता दिशः ।। चतुरवयवा विद्या चातुर्विद्यिकः, अद्विगुत्वान्न लुक् । द्विगोर्लुकि चातुर्विद्य इति अनुन्यासकरः ।

२००. ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम् (४।३।४) इति सादृश्येऽव्ययीभावः । मत्वर्थीयेन सिद्धेऽण् बाधनार्थमिदम् ।

२०१. **सर्वादेरणो लुग्वक्तव्यः ।**

सर्व्ववार्त्तिकः, सव्वार्त्तिकः, द्विगेर्लुगेव, पञ्चकल्पः ।

२०२. **प्रोक्ताल्लुक् ।**

प्रोक्तप्रत्ययान्तात्तदधीते वेद वा इत्यर्थे विहितस्य प्रत्ययस्य लुक् स्यात् । पणिनिना प्रोक्तो ग्रन्थः पाणिनीयः, तमधीते वेद वा पाणिनीयोऽणो लुप्, आपिशलिना प्रोक्तम्, इण् काण्व्यादेरण्, गोत्रादापिशलं सूत्रम् तदधीते वेद वा इत्यणो लुक्, आपिशला ब्राह्मणी, पूर्वस्याणोऽन्यार्थत्वात् ङी न भवति । कठेन प्रोक्तं छन्दोऽपि कठः, तमधीयते कठाः ।

२०३. **सूत्राच्च संख्याप्रकृतिकोपधात् ।**

ईदृशः सूत्रात् अध्येतृवेदित्रोर्विहितप्रत्ययस्य लुक् स्यात् । अष्टकं पाणिनीय-सूत्रमधीयते विदन्ति वा अष्टकाः पणिनीयाः, दशकाः व्याघ्रपदीयाः, द्वादशकाः मीमांसकाः, पञ्चकाः सौपद्माः ।

२०४. **तदस्मिन्नस्ति देशे तन्नाम्नि ।**

अत्रार्थेऽण् स्यात् । देशस्तन्नामा चेत् । पर्वता अस्मिन् सन्ति पार्वतो देशः । औदुम्बरः ।

---

२०१. सर्वश्च सश्च सर्व्वसौ, तावादी यस्य तस्मादध्येतृ वेदित्रोर्विहितस्य लुग्विधीयते । अण् इत्युपलक्षणम् । वेदनेन सह वर्त्तते सवेदः सहस्य सादेशः । सर्वसूत्रः सर्वविद्यः सर्वलक्षणः, सर्वकल्पः टिकणो लुक् । सर्वसादेर्द्विगोश्च लुगिति मुनिना द्विगोश्चेत्युक्तम्, तत्कथं नोक्तमित्याह द्विगोर्लुगेवेति । द्विगोः प्राग्दीव्यतीयस्यैव लुक् स्यात् किमत्रोक्तेन ।

२०२. गणनम्पणः (४।२।४८) अप्, सोऽस्यास्तीति (५।४।२३६) इण् पणी, तस्य गोत्रापत्यमित्यण् (५।१।२६) इति टिलोपाभावः, ततः अद् बाह्वादेः (५।१।७८) इतीण्, तेन प्रोक्तम् (५।३।१३०) इति ईयः, पाणिनीयमधीते वेत्ति वेत्यण् । तस्य लुक् ।

२०३. कोपधादिति किम् ? चतुष्टया कौमाराः । संख्याप्रकृतीति किम् ? कालापकाः । उक्ता अध्येतृवेदित्रोः प्रत्ययाः ।

२०४. देश इति सकललोकसिद्धनिरूढ़े, न त्वाधुनिकसङ्केतलभ्योऽपीत्यर्थद्योतनाय इति शब्दः । देशे तन्नाम्नीत्युत्तरसूत्रत्रयेऽन्वेति । अस्तीत्युपाधिकात् प्रथमान्तात् सप्तम्यर्थे वक्ष्यमाणाः प्रत्ययाः स्युः, स चेत् सप्तम्यर्थः प्रसिद्धनामा ।

२०५. तेन निर्वृत्तः ।

अत्रार्थेऽण् स्यात् । कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी, माकन्दी नगरी, साहस्री परिखा ।

२०६. तस्य निवासः ।

अत्रार्थेऽण् स्यात् । शिबीनां निवासः शैबः ।

२०७. अदूरभवश्च ।

अत्रार्थेऽण् स्यात् । विदिशाया अदूरभवं वैदिशं नगरम्, गाङ्गम्, पाम्पानि वनानि । *एते चत्वारोऽर्थाः शैषिकं यावदनुवर्त्तन्ते ।

२०८. संकाशादेर्ण्यः ।

साङ्काश्यम्, काम्पिल्यम्, प्रागद्यम् ।

२०९. सुतङ्गमादेरिण् ।

सौतङ्गमिः ।

२१०. अरीहणादेरकण् ।

आरीहणकम् ।

२११. कृशाश्वादेरीयण् ।

कार्शाश्वीयम् ।

२१२. ऋष्यादेः कः ।

ऋष्यकम् ।

२१३. कुमुदादेरिक-टिकणौ ।

कुमुदिकम्, कौमुदिकम्, गोमठिकम्, गौमठिकम् ।

२१४. काशादेरिलः ।

काशिलम् ।

२१५. तृणादेः सः ।

तृणसा, वरणसा (वर्णसा), नड़सा ।

---

२०७. चकारोऽर्थत्रयसन्निधानार्थम्, तेनोत्तरत्र शैषिकं यावच्चातुर्थिकाः प्रत्ययाः भवन्तीति । किञ्च देशे तन्नाम्नीति सर्वत्रानुवर्त्तत इति प्राञ्चः ।

२१६. **प्रेक्षादेरिन् ।**
प्रेक्षी, फलकी ।

२१७. **अश्मादिभ्यो रः ।**
अश्मरम् ।

२१८. **सख्यादेष्टेयण् ।**
साखेयम् ।

२१९. **वलादेर्यः ।**
वल्यम् ।

२२०. **पक्षादेरायनण् ।**
पाक्षायणः ।

२२१. **कर्णादेर्णायनिः ।**
कार्णायिणिः ।

२२२. **वराहादेः कण् ।**
वाराहकः ।

२२३. **जनपद-वरणादिभ्यो लुप् ।**
जनपदो देशः । वरणादयो ग्रामाः, तेभ्यश्चातुर्र्थिकप्रत्ययस्य लुप् स्यात् । पञ्चालानां निवासः पञ्चालाः जनपदः । अङ्गा, बङ्गा, कुरवः । वरणा ग्राम, गया, उज्जयिनी, खलतिकं वनानि । कथं वरणसा ? विशेषविधानात् ।

२२४. **शार्क्कराया वा ।**
अणो लुप् वा स्यात् । शर्क्कराभिर्निव्वृत्तः, शर्क्करा अस्मिन् सन्ति वा, शर्क्करा देशः, शार्क्करो वा । (शर्क्करिकम्), शार्क्करकम् ।

२२५. **टिकणायौ च ।**
शार्करिकः, शर्करीयः ।

२२६. **नद्यां मतुः ।**
चातुरार्थिको मतुः स्यात् । नदी चेत् । उडुम्बरावती नदी, इक्षुमती ।

---

२१६. (५।४।२३७) इत्युक्त मतुना सिद्धेऽपि अर्थान्तरबोधार्थं नद्या अपि देशत्वेन तदस्मिन्निति प्राप्ताणो बाधनार्थञ्चेदम् ।

२२७. **कुमुद-नड़-महिष-वेतसाड्ड्नतुः।**
एभ्यश्चतुरर्थे ड्नतुः स्यात्। कुमुद्वान देशः, नड्वान्, महिष्मान, वेतस्वान्।

२२८. **नड़शादाड्ड्वलः।**
आभ्यां चातुरार्थिको ड्वलः स्यात्। नड्वलः, शाड्वलः।

२२९. **उत्करादेरीयः।**
उत्करीयः।

२३०. **नडादे कीयः।**
एभ्यः कीयः स्यात्। नडकीय, विल्वकीयः, बैल्वकीयः, प्लक्षकीयः।
*क्रुञ्चाया ह्रस्वश्च, क्रुञ्चकीयः।

उक्ताश्चातुरार्थिकाः।
इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
पञ्चमाध्यायस्य
द्वितीयः पादः।

---

२२७. कुमुद्वान् कौमुदिकः कुमुदिकश्च, कुमुदादित्वान्नड्वान् नड्वलः नड़कीयः। महिष्मान् देशस्तत्रभवा माहिष्मती पुरी। हैहयपुत्रेण महिष्मती निर्वृत्ता माहिष्मतोति पौराणिकाः।

अथ पञ्चमाध्यायस्य

तृतीयः पादः

(शेषतद्धितप्रकरणम्)

१. प्राग्विकाराच्छेषे ।

शेषार्थे विधिः प्राग्विकारात् । चक्षुषा गृह्यते चाक्षुषं रूपम्, श्रावणः शब्दः । अश्वैरुह्यते आश्वो रथः, चातुरं शकटम्, चतुर्दश्यां दृश्यते चातुर्दशो भूतः, दृषदि पिष्टा दार्षदा माषाः, औदूखलाः सक्तवः । अथ वक्ष्यमाणप्रत्ययाः शेषे, तत्र जातः, तत्र भवः, तत आगतः, तस्येदमित्यर्थे ज्ञेयाः ।

२. दिक् पूर्वपदारण्याण्णः ।

आभ्यां शेषार्थे णः स्यात् । पौर्वशालः, औत्तरशाला बाला, आरण्याः सुमनसः ।

३. राष्ट्रादियः ।

राष्ट्रे भवो राष्ट्रादागतो वा राष्ट्रियः ।

४. अवारपारीणः ।

अवारीणः, पारीणः । संघाताच्च । अवारपारीणः, पारावारीणश्च ।

५. ग्रामाद् यश्च ।

ग्राम्यो ग्रामीणश्च ।

६. कात्र्यादेरेयकण् ।

कत्रिः कात्रेयकः, ग्रामेयकः, नागरेयकः, कौलेयकः शुनि । कौक्षेयकः कृपाणे । ग्रैवेयकोऽलङ्कारे ।

---

३. ननु कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेष्विति मुनिप्रणीतं सूत्रम् तदिह न वक्तव्यमभिधानादेव तत्सिद्धेरित्याह कौलेयकः शुनीत्यादि । अन्यत्राण् प्राप्तः कुड्याया यलोपश्चेति वक्तव्यम् । कुड बाल्ये इत्यस्य यप्रत्यये, कौडेयकः, कुण्ड्याया इत्येके कौण्डेयकः ।

७. **नद्यादेष्टेयण् ।**

नादेयं पयः, वाराणसेयो जनः ।

८. **दक्षिणापश्चात्-पुरस्त्यण् ।**

आजन्तो दक्षिणाशब्दस्तेन सर्वनाम्नोः न पुंवत् । दाक्षिणात्यः, पाश्चात्यः, पौरस्त्यः ।

९. **अमा क्वेह तसित्रेभ्यस्त्यप् ।**

अमात्यः, क्वत्यः, इहत्यः । तस्यन्तात् ततस्त्यो यतस्त्यः ।* निरोऽनिरवसिते । निर्गतो देशात् निष्ठ्यश्चाण्डालादिः । ह्लस्वात्तादीति षत्वम् । *नेध्रुवे । नित्यम् ।

१०. **ऐषमो ह्यः श्वसो वा ।**

पक्षे तनट् वक्ष्यते । ऐषमस्त्यः, ऐषमस्तनम्, ह्यस्त्य,, ह्यस्तनम्, श्वस्त्यः, श्वस्तनम् । बाहुल्यात् प्रातस्त्योऽपि ।* दूरादेत्यः । दूरेत्यः पथिकः । उत्तरादाहञ् । औत्तराहः ।

११, **कापिश्यादेष्टायनण् ।**

कापिशायनं मधुः, कापिशायनी द्राक्षा, बह्लि, बाह्लायनी, तर्द्धि तार्द्धायनी ।

१२. **रङ्कोरमनुष्येऽण् च ।**

राङ्कवः, राङ्कवायणः, रङ्कुर्मृगभेदः ।

१३. **द्यु प्रागवागुदक्प्रतीचो यत् ।**

दिव्-दिव्यम्, प्राच्यम्, अवाच्यम्, उदीच्यम्, प्रतीच्यम् ।

१४. **कन्थायाष्टिकण् ।**

कान्थिकः ।

---

९. पकारस्त्यण्त्यपोरित्यस्य विशेषणार्थः । अमान्तिकसहार्थयोः । कुतस्त्यं भीरु यत्तेभ्य इति भट्टिः । सार्वत्रिक इत्याध्यात्मादित्वात् । एभ्य इति किम् । औपरिष्टः । आरातीय इत्यादि । कथमाविष्टयः ? छान्दसात् ।

१५, ईयस्तादिवृद्धाद्यज् गहादेः ।

तदादेस्तदीयम्, यदीयम्, मदीयम् । वृद्धयाद्यचः, शालीयः, गार्गीयः, आचार्य्यीयः गहादेः—गहीयः, अन्तस्थीयः, मत्वर्थीयः । *पृथिवी (पृथ्वी) मध्ये मध्यमात् । मध्यमीयः । नगराद्यन्तदेशाच्च । कटनगरीयः, दाक्षिकन्थायः, नन्दिग्रामीयः ।

१६. पर्वतान्मनुष्ये ।

पर्वतीय इति वा वजीगणः ।* वान्यत्र, पर्वतीयं फलम्, पार्वतं वा ।

१७. एङाद्यचः प्राग्देशात् ।

एणीपचनीयो जनः, भोजकटीयः । देशात् किम् ? गोमत्यां भवा गौमताः मत्स्याः ।* नृ नाम्नो वा । देवदत्तीयः, दैवदत्ताश्छात्राः ।

---

१५. गहो नाम देशः । असति सम्भवे देशादिविशेषणमनर्थंवत् । उक्तञ्चः... सम्भवव्यभिचारे हि विशेषणमनर्थकम् (वत्) इति यथा—पूर्वपक्षीयः । ननु पृथ्वीमध्यस्य मध्यमश्चेति पाणिनीयं सूत्रम् । अस्यार्थः—पृथ्वीमध्यशब्दादीयः स्यात् । तस्य मध्यमादेशश्च, तत् कथमिह स्यादित्याह पृथ्वीमध्ये मध्यमादिति मध्यमशब्दस्य मध्यमात्रवाचित्वादिह गहादिगणे तदवाचक एव गृह्यते । तथा निवासस्य चरणे अण् चेत्यभिधीयते । निवासस्य पृथ्वीमध्यस्य कठादावभिधेयेऽण् स्यान्मध्यमादेशश्च । पृथ्वीमध्ये निवास एषां माध्यमाः कठाः । निवासस्येति किम् ? पृथ्वीमध्यादागतः, पृथ्वीमध्यमीयाः कठाः । चरण इति किम् ? मध्यमीयः शूद्रः । तथा रेणुकादिभ्यो वृद्धिश्चेत्यभिधीयते । एभ्यः शेषे ईयः स्याद्वृद्धिश्च । रेणुकीयः, वैत्रकीयः, औत्तरपदकीयः, माध्यमकीयः प्लाक्षकीयः, आकृत्यान्यदपि ज्ञेयम् । नगरेति—नगराद्या अन्ते यस्य स नगराद्यन्तः स चासौ देशश्चेति कर्म्मधारयः । कटनगरीयम्, कटघोषीयम् । वृद्धाद्यचः, कथोपान्तात्—आरीहणकीयम्, कौटशिखीयम्, आयोमुखीयम् । कन्थापलदजन्यानगरग्रामक्रादोत्तरपदात्—दाक्षिकन्थीयम्, दाक्षिपलदीयम्, दाक्षिनगरीयम् । दाक्षिक्रदीयम् । वृद्धाद्या इत्येव, माहानगरम् । गर्त्तोत्तरपदात् । वृकगर्त्तीयः, हस्तिगर्त्तीयः, श्वाविदगर्त्तीयः । इह बाहिकाग्रामलक्षणप्रत्ययोऽपि न स्यात् दाक्षिग्रामीयम्, दाक्षिह्लदीयम्, कृकण पर्णशाद्भारद्वाजे । भरद्वाजदेशे आभ्यामीयः स्यात् । कृकणीयम्, पर्णशीयम् । वृद्धयाद्यचोऽन्यत्र कार्कणः, पार्णशः ।

१८. **पर-जन-राज-देवतात् कीयः ।**

परकीयः, जनकीयः, राजकीयः, देवकीयः ।

१९. **स्वादीयश्च ।**

स्वीयम्, स्वकीयम् ।

२०. **भवतष्टिकणीयौ, तोदश्चेये ।**

तावत्कम्, तो दश्च, भवदीयः ।

२१. **इण्-काण्व्यादेरण् गोत्रात् ।**

ईयस्यापवादः, इणन्तादे गोत्रात् काण्व्यादेश्च अण् स्यात् । दाक्षेरमी दाक्षाः । काण्व्यादेः—काण्व्यस्य छात्राः काण्व्याः, शाकलस्य शाकलाः । युवप्रत्ययत्वात् पाणिनेर्न भवति, पाणिनीयाश्छात्राः ।

२२. **न द्व्यचः प्राच्यभरतेषु ।**

द्व्यच इणन्तात् अण् नास्ति, प्राच्यभरतगोत्रे । रैस्कीयाः, रैस्कः क्वचित् ।

२३. **काश्यादिभ्यष्टिकणिकणौ ।**

काशिकी, इकण्, काशिका, बैदिकी, बैदिका ।

---

१९. अत्र देवदत्त इति मनुष्यनाम, काश्यादिगणे तु प्राग् देशवाचि देवदत्तस्यैव-ग्रहणमत्र नामशब्देनाधुनिकसङ्केतितमेव ग्राह्यम् ।

२२. काण्व्यादेरित्युक्तेरिणन्तादित्युक्तम् ? प्राच्य-भरत-गोत्राश्च ये तेष्वभिधेयेषु द्व्यच इणन्तादण् नास्ति । ईय एव स्यात् । रैस्किः, भरतापत्ये काशिः इणन्ताविमौ । द्व्यच इति किम् ? पान्नागाराः । पान्थरेषणाः । प्राच्यादिति किम् ? प्लाक्षाः । भरतानाँ प्राच्यत्वेऽपि पृथगुपादानमत्र प्राच्यग्रहणे भरता-नामग्रहणस्य लिङ्गम् । अग्रहणस्येति लुक् न भवति, औद्दालकिः पिता, औद्दालकायनः पुत्रः ।

२३. अत्र गणपाठादीयविषयादन्यस्मादपि स्यातामेतौ, किञ्च प्रागिव्यनुवृत्तेर्देवदत्तस्य प्रागदेशवाचिन इह ग्रहणमीयबाधनार्थम् । वाहीकग्रामवाचिनः पुनरवणे विधीयते । यथा देवदत्तः चेदिसाहचर्यात् काश्यादिर्देश एव गृह्यते । तेन संज्ञाया देवदत्तस्य छात्रा देवदत्तीया इत्यपि स्यादिति नृनाम्नो वेति विभाषितत्वात्

२४. **ओर्देशाट्टिकण् ।**

उवर्णान्ताद्देशाट्टिकण् स्यात् । नैषादकर्षुकः, शाकजम्बुकः ।

२५. **साङ्काश्यादेरकण् ।**

ईयाणोरपवादः, साङ्काश्यकः, पारधन्वकः, सैन्धवत्तकः, त्रैगर्त्तकः । *धूमादेः । धौमकः, वैदेहकः, साकेतकः, राजगृहकः, औज्जयनकः, दाक्षिणापथकः । प्रस्थपुरवहान्तात् । मालाप्रस्थकः, नान्दीपूरकः, पैलुवहकः ।

यथा कालपूर्वाद्धेशवाचित्वेऽपि औद्धबकालिकी, औद्ध्वकालिका, पौर्वकालिकी, पौर्वकालिका । आपत्कालिकी, आपत्कालिका । तात्कालिकी, तात्कालिका । तथा वाहीकग्रामेभ्यश्चेति वक्तव्यम् । शाकलिकी, शाकलिका मान्थरिकी, मान्थरिका । ईयविषयत्वादिह न स्याताम् । महिनगरम् । तथा चोशीनरेष्विति वक्तव्यम् । आङ्गजालिकी, आङ्गजालिका, आभ्यां निर्युक्ते पक्षे ईयः स्यादेव । आङ्गजालीया । एवं सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया ।

२४. देशादिति किम् ? पाटंब वचः, अत्र प्राच्यादीय इति वक्तव्यम् । प्राच्यादुवर्णान्तात् ईयविषये टिकण् स्यात् । आढ़कजम्ब कः नापितवास्तुकः । ईय इति किम् ? मल्लवास्तुनि भवं मल्लवास्तुवम् । नियमात् पूर्वेणाप्यसिद्धिः ।

२५. इहादिपदस्य व्यवस्थावाचित्वाद्दीर्घादिरीय प्राप्ते तदि तेरस्याणप्राप्तौ विधिरयमिति दर्शयन्नाह ईयाणोरपवाद इति । अत्र धन्वयोपधाद्वञिति यदुक्तम्, तत्प्रत्यादिशति सांकाश्यक इति । एवमायोधकः, काम्पिल्यकः । तथा पारधन्वक इति । धन्वा मरुदेशः, तदर्थादप्यकण्, पारे धन्वनि जातः पारधन्वकः, एवमैरातकः । तथा कच्छाग्निरक्त वर्न्तोत्तरपदादिति प्रत्यादिशाति सैन्धवक्त्रकः इति, दारूकच्छकः । भान्ताग्नकः । चाक्रवर्त्तकः । वृतु वर्त्तने इत्यस्याचि वर्त्त इति रूपम्, त्रैगर्त्तक इति त्रिगर्त्तेषु भवः, गर्त्तोत्तरपदादित्यस्यापवादः । धूमादिभ्यश्चेत्यत्रैव समाविशति, धूमादेरिति धूमादेशभेदः, तत्रः भवः, तत्र जातः, धौमकः । अत्रैव पाण्डुकविदेहपाथेयानर्त्तादेयकाणिनि प्रत्यादिश्य विवृणोति बहुवचनविषयादित्यनेन प्राप्तावित्याह क्षत्रियार्थः पाठः, विदेहानां क्षत्रियाणां वा वैदेहकः । एवं पाण्डुककः, पाथेयकः, आनर्त्तकः, अत्र पाण्डुकपाथेययोः कोपधत्वादणः प्राप्ता, आदेशत्वादप्राप्तौ च वचनमिदम् । जनपदतदवध्योश्चेति न वाच्यम्, अनेनैव सिद्धेः । तथाहि—आदर्शकः, आभिजातकः । अवधिभूतादपि जनपदात् श्यामायणकः, नन्ववधिभूतोऽपि जनपदश्चेति किमनेनेति ? न अभिसारगर्त्तक इत्यत्र ईयस्य बाधकः । प्रस्थेति, प्रत्ययन्तादप्यकण् विधीयते, तथोदाहृतम् । ईयविषयादन्यत्र न स्यात् (शैवपुरः) नैपुणः ।

२६. **ईद्रोपधाभ्यां प्राचाम्** ।

अकण् । ईदन्तात्-काकन्दकः । रोपधात्-पाटलिपुत्रकः, ऐकचक्रकः ।

२७. **बहुवचनविषयात्** ।

अकण् स्यात् ईयाणोपवादः । आङ्गकः, पाञ्चालकः, आजमीढ़कः, कालञ्जरकः। **न मद्रेभ्यो** । माद्रः ।

२८. **समुद्रान्नौमनुष्ययोः** ।

सामुद्रिका नौका, सामुद्रको मनुष्यः ।

२९. **नगरात् प्रावीण्य-गर्हयोः** ।

अकण् स्यात् । कुशलो नागरकः, खलो नागरकः । अनयोः किम् ? नागरा विप्राः ।

३०. **अरण्यादध्यायन्यायपथिहस्तिमनुष्यविहारेषु** ।

एष्वर्थेऽकण् स्यात् । आरण्यकोऽध्यायः, आरण्यको न्यासः, पन्था हस्ती मनुष्यो विहारश्च । वा गोमये । आरण्यकं गोमयम्, आरण्यं वा ।

३१. **कच्छादेर्मनुष्य तत्स्थयोः** ।

अकण् स्यात् । काच्छको मनुष्यः सैन्धवकः, काच्छकं (अस्य) मनुष्यहसितम्, सैन्धविका चूड़ा । अनयोः किम् ? काच्छः, सैन्धवः ।

३२. **साल्वादपदातौ** ।

साल्वकः, नेह साल्वः पदातिः ।

---

२७. बहुवचनमेव विषयो यस्य न स तस्मात् । विषयग्रहणमन्यत्र भावार्थम् । तेन वर्त्तनी च वर्त्तन्यौ च वर्त्तन्यः, तत्र भवः, वार्त्तनः । मद्रेभ्य इत्यकण्, प्रतिषेधकं वार्त्तिकम् । तेनौत्सर्गिकोऽणेव प्राप्तः । अथ मद्र-वृज्योः कन् इति वक्तव्यम् । मद्रेषु जातः, मद्रकः, एव वृजिकः । अकणि प्राप्ते वचनम् । तथा कोपधादणिति वक्तव्यम् । ऋषिकेषु जातः, आर्षिकः, माहिषिकः । अपग्रहणादुवर्णान्तादपि । ऐक्ष्वाकवः, त्रैशङ्कवः । कूलात् सौवीरेष्विति वक्तव्यम् । कौलको देशश्चेत् । कौलोऽन्यः ।

२८, समुद्रादनयोः शेषेऽकण् स्यात् । तथोदाहृतम् । अनयोः किम् ? सामुद्रं लवणम् ।

३२. गोयवाग्वोश्च वक्तव्यम् साल्वको गौः, साल्विका यवागूः, साल्वमन्यत् ।

३३. **कुरुयुगंन्धरेभ्यो वा ।**

कौरवको हस्ती, कौरवो वा, यौगन्धरको, यौगन्धरः । उक्तं देशात् ।

३४. **युष्मदस्मदोर्व्वाऽण्णीनण् च युष्माकास्माकौ चैकत्वे तवकममकौ ।**

शेषार्थे युष्मदस्मद्भ्यामण्, ईनण् च वा स्यात् । अयथासंख्यार्थं पृथग्वचनं सन्निपातलक्षणस्यानित्यत्वात् । तयोः परतो युष्मदस्मदोः स्थाने युष्माकास्माकौ एकत्वे तवक-ममकौ च स्याताम् । अण् यौष्माकी, ईनण् यौष्माकीणा, आस्माकम्, आस्माकीनम्, एकत्वे तु, तावकम्, तावकीनम्, ममकम्, मामकीनम् । पक्षे तदादित्वादीयः । युष्मदीयम्, अस्मदीयम्, त्वदीयम्, मदीयम् ।

३५. **अर्द्धात् यत्, परावराधमोत्तमपूर्व्वाच्च ।**

अर्द्धात् यत् स्यात् । अर्द्धचम् । परादि पूर्वाच्च । परार्द्ध्यम्, अपरार्द्ध्यम्, अधमार्द्धचम्, उत्तमार्द्ध्यम् ।

---

३३. कुरुशब्दादकणि प्राप्ते मनुष्य-मनुष्यस्थयोर्युगन्धरशब्दाच्च बहुवचनविषयात् इति प्राप्ते वचनम् ।

३४. ननु शतानि सहस्राणीत्यत्र विभक्तिसन्निपातजे नुमि कृते इति (२-३-२८) इति विभक्तिलुकप्रत्ययनिमित्तार्थं सन्निपातलक्षणोविधिः (परि० ४०) इति परिभाषाङ्गीकृता । अयमर्थः सन्निपात आनन्तर्यम्, तेन यस्यानन्तर्य्येण यो विहितस्तदानन्तर्य्यमसो न विरुणद्धि । न तिसृ (२।३।३३) इति दीर्घप्रतिषेधकं वचनम् ज्ञापकमस्याः । सत्यमस्या विभक्तिनिमित्तयोस्त्रिचतुरोः स्त्रियां तिसृचतृस्रिति ऋकारव्यवधानकारिणा ङाप्रत्ययादेशस्य निमित्तत्वाद्- दीर्घप्रतिषेधकवचनमुपपद्यते इति । तद्वदिहापि तत्कथमादेशोवेतौ भवेता मित्याह सन्निपातलक्षणस्यानित्यवादिति अदसीयानित्यत्वे देवायेत्र भ्या यि दीर्घ इति वचनमुपपद्यते । सन्निपातलक्षणत्वादिति पाठोऽप्राप्तावानित्यत्वादित्यध्याहृत्य योज्यम् । यौष्माकीर्त्याण स्त्रियां ङी स्यादिति प्रयोजनम् । मामकीति संज्ञायां ङी अन्यत्र तु आप् स्यात् । यौष्माकं यादृशं यानमास्माकन्तन्त्र तादृशमित्यादि, अतएव मामकनरकयोरित्युक्तं प्राक् ।

३५. ननु परावराधमोत्तमेभ्यश्चेत्युक्तेऽपि सिद्ध्यति किं पूर्वग्रहणेन ? सत्यम्, पूर्वग्रहणाद्दिग्वाचिभ्यामप्याभ्यां यदेव, न पुनष्टिञण् । तेन परदिगर्द्धे भवं परार्द्धचम्, एवमवरार्द्धचम् ।

३६. **दिक्पूर्वाट्टिकण् च ।**

पौर्व्वार्द्धिकम्, दाक्षिणार्द्धिकम् । पक्षे यत्-पूर्व्वार्द्धचम् ।

३७. **ग्रामजनपदांशेऽण्टिकणौ ।**

दिक्पूर्व्वादेव । ग्रामस्य जनपदस्य वा पूर्व्वार्द्धे भवाः पौर्व्वार्द्धाः, पौर्व्वार्द्धिकाः । औत्तरार्द्धाः, औत्तरार्द्धिकाः ।

३८. **शेषपूर्वाट्टिकण् ।**

उपयुक्तेतरपूर्व्वार्द्धात् शेषार्थे टिकण् स्यात् । गौतमार्द्धे भवं गौततमार्द्धिकम्, बालेयार्द्धिकम् ।

३९. **मध्यादेर्म्मोऽवोऽधसोः सलोपश्च ।**

एभ्यो मः स्यात् । मध्यमः, आदिमः, । अवोऽधसोः सलोपेश्चः अवमः, अधमः ।

४०. **मध्यान्न्याय्येऽत् ।**

अत् स्यात् । युक्ते नात्युच्चैर्नातिनीचैर्म्मध्यस्तार्क्किकः ।

४१. **द्वीपाद् यण् ।**

द्वैप्यः ।

४२. **कालाट्टिकण् ।**

कालवाचिनः शब्दात् टिकण् स्यात् । शेषार्थे । दैवसिकः, आन्हिकः, मासिकः, सांवत्सरिकः ।

४३. **शरदः श्राद्धे ।**

शारदिकम्, श्राद्धे किम् ? शारदं दधि ।

---

४०. मापवादः । न्यायायार्थं विवृणोति युक्त इति । मध्यशब्द एवं स्वाभावादुचितोऽपीति चान्द्रैः प्रत्यादिष्टमिदम् ।

४२. ननु शार्व्वरस्त्वन्धतमसमित्यमरः । शार्व्वरस्य तमसो निषिद्धये इति कालिदासः, अनुदितौषसराग इति भारविश्च, समानकालीनम् प्राक्कालीनमित्यादि च । अपभ्रंशशब्दा एवैते इति प्रामाणिकाः । अथवा क्वचिदुत्सर्गस्यापि (परि० ४९ इति न्यायात्) ।

४४. रोगातपयोर्व्वा ।

शारदिको रोगः, शारदो वा, आतपश्च ।

४५. निशाप्रदोषाभ्याञ्च ।

टिकण् वा स्यात् । नैशिकम्, नैशं वा तमः प्रादोषिक, प्रादोषो बा ।

४६. श्वसः श्वस्त चः ।

टिकण् वा स्यात् शौवस्तिकम्ः शौवस्तिकी भूतिः । पक्षे तनट् वा, श्वस्त्यः श्वस्तनम् ।

४७. ऋतु-भ-सन्ध्यादेरवर्षाभ्योऽण् ।

ऋतोः—ग्रैष्मम्, वासन्तम् । नेह, वार्षिकम्, पौर्व्ववार्षिकम् । नक्षत्रात्—तैषः, पौषः, माघः, रौहिणम् । सन्ध्यादेः—सान्ध्याम्, सान्धिवेलम् । अमावास्यम्, पौर्णमासम्, त्रायोदशम्, प्रातिपदम् ।

४८. संवत्सरात् फलपर्व्वणोः ।

अण् स्यात् सांवत्सरं फलं पर्व्वं वा ।

४९. हेमन्तादृटिकण्. वाऽणि तलोपश्च ।

हैमन्तिकम् । अणि तलोपश्च वा, हैमन्तम्, हैमनं वा ।

५०. प्रावृष एन्यः ।

प्रावृषेण्यो मेघः ।

४९. तदन्तविधिना पूर्वग्रैष्ममु, अवरशिशिरमित्यादि नक्षत्रादीयबाधकोऽपि । तेन स्वात्यां भवं सौवातम् (५।१।५) इत्यौवादेशः ।

५०. इह नोपदेशादन्योऽपि । तेन शूश्रूषेण्यः वरेण्यः इतिधातुपारायणम् । वृञ एण्य इत्युणादौ वरेण्यः । प्रावृषेण्य यते क्विपि प्रावृषेण इति णकारस्थित्यर्थो मून्योर्द्ध-ऽपदेशः इति रन्तिदेवः ।

५१. सायं-चिरं-प्राह्णे-प्रगेऽव्ययेभ्यस्तनट् ।

सायमादेर्निपातान्मान्तैतदन्तत्वम् । सायन्तनी, चिरन्तनम् । प्राह्णेतनम्, प्रगेतनम् । अव्ययकालात्—प्रातस्तनम्, दिवातनम्, दोषातनम्, ह्यस्तनम् ।

५२. पूर्वाह्णापराह्णाद् वा ।

तनट् वा स्यात्, पूर्वाह्णेतनम्, पौर्वाह्णिकं वा । अपराह्णेतनम् आपराह्णिकं वा, सप्तम्या अलुक् ।

५३. चिर-परुत-परारिभ्यस्तनः ।

चिरत्नम्, परुत्नस्तलोपश्च, परुत्नम् परारित्नम्, कालादुक्तम् ।

५४. अग्रपश्चादन्तेभ्यो डिमः ।

एभ्यः शेषे डिमः स्यात् । अग्रिमः, पश्चिमः, अन्तिमः । शेषे प्रभृतेरुक्ताः प्रत्ययाः अविशेषोक्तौ वक्ष्यमाणजाताद्यर्थेषु नेयाः ।

५५. तत्रजातः ।

अत्रार्थे यथाविहितमणादयः स्युः । माथुरः, राष्ट्रि (ट्री)यः, कात्त्रेयकः । सायन्तनः ।

५६. इकः प्रावृषः ।

प्रावृषि जातः प्रावृषिकः ।

---

५१. इह सायंचिरशब्दावनव्ययौ सायंचिरमर्थौ । तथा प्राह्णोऽनव्ययः । प्रगशब्दः प्रातरर्थोऽदन्तः, एतेषां मान्तैदन्वत्वमस्मादेव सूत्रनिर्देशादित्याह सायमादेरिति । अतएव चिरसाययोर्मश्च । प्रगप्राह्ण्योरेच्चेत्यापिशलीयं सूत्रम् । तेन सायं साये वा भवः सायन्तनश्चिरं चिरे वा भवश्चिरन्तनः । न जात्वनव्ययाट्टिकण् नियम इति वक्तव्यम् । इदं नक्तन्तनं दाम पौष्पमेतद्दिवातनम् । प्राक्तनं श्वस्तनं सदातनमित्यमरः । सद्यस्तनमनामयमित्यादि प्रयोगदर्शनात् न चाद्यन्त-नियमः । तदानीन्तनम्, साम्प्रतन्तनम्, तद्दिनं दिनमध्ये भवं तद्दिनतनमिति चान्द्रादावुदाहृतत्वात् । तर्हि कथं साम्प्रतन्तनम् साम्प्रतिकम् ? अध्यामादित् सायं प्रातिकमाधुनिकमिति च शार्व्वरवत् समाधेयम् । अध्यात्मादि-पाठाद्वा । दिवातनम्, दोषातनम्, रात्रितनम्, सर्व्वदातनम् उपरिष्टात्तनम्, उपरितनम् । यदा तु पुनर्दिग्देशयोर्वर्त्तते तदा औपरिष्टः, यस्तदेशे उपरितनं गिरिजलमिति तद्बाहुल्यात् । उपरिशब्दादेव दिग्देशयोस्तनटमिच्छन्ति । एवमुत्तरेणतनम् । दिग्देशयोस्तु औत्तरेतनम् । कथं स्वर्भवम्, सौरम्, सायम्भ-वम् ? सायंकालादित्यनुवृत्तेः । * प्रगस्य छन्दसि गलोपश्च त्नश्चवक्तव्यः । प्रत्नमात्मानम् । यदि मकारान्तः, सायं, कथं सायाह्णः ? सायमोऽह्णे मलोपो, वक्तव्यः । कथं सायंतरे ? तरे चेति वक्तव्यम् ।

५७. शरदोऽकण् संज्ञायाम् ।

शारदका मुद्गाः । शारदमन्यत्र ।

५८. मूलादेरकः ।

५९. पथः पन्थ चः ।

पथिजातः पन्थको वत्सः ।

६०. अमावास्याया अच्च वा ।

अत् स्यात् । अकाणौ च वा भवतः । अमावास्यः, आमावास्यकः, आमावास्यो वा ।

६१. सिन्ध्वपकराभ्यां कः ।

सिन्धुकः, अपकरकः, । वेत्येव, सैन्धवः, आपकरः ।

६२. नक्षत्रेभ्यो लुग्बहुलम् ।

जात्यर्थेऽणो लुक् । तद्धितलुकि लुक् स्त्रियां । रोहिण्यां जातो रोहिणः, रौहिणो वा । मृगाशिरा मार्गशिर्षौ (मार्गशीर्षोः) वा, अभिजित्, अभिजितो वा । अश्वयुकः आश्वयुजो वा । शतभिषगादेरणि टिलोपो वा । शतभिषक् शातभिषो वा । शातभिषजः । बाहुल्यान्नित्यं श्रविष्ठादेरणोलुक् । श्रविष्ठः फल्गुनोऽर्ज्जुनः, पुनर्व्वसुर्व्वररूचि, । श्रविष्ठा फल्गुनी अनुराधा स्वाती तिष्य पुनर्वसु हस्ता विशाखा आषाढ़ा कृत्तिका **बहुला ।**

६३. स्थानान्त गोशाल-खरशालाच्च ।

अणो लुक् । गोस्थाने जातः गोस्थानः, खरस्थानः गोशाल, खरशालः ।

---

६२. अत्रादिशब्दः सन्दिग्धः । शतं भिषज्यतीति क्विपि शतभिषज् जान्ता स्त्रियां स्वाभावाद् वर्त्तते । केवलादित्वात् ङी शतभिषी । किञ्च नित्यस्त्रियां रोहिणीचित्रारेवतीभ्योऽणोलुक् स्यात् । स्त्री प्रत्ययस्य लुक्यपि रेवतरोहिणीभ्यां केवलादित्वात् ङी, रेवत्यां जाता रेवती, रोहिण्यां जाता रोहिणी । फल्गुनोऽर्ज्जुन इति फल्गुन्याष्टश्चेति बाधनाल्लुक्यपि ङी गौरादित्वात् । राघवपाण्डवीय-श्लेषात् फाल्गुनोऽदन्त्यान्तः । शोभना आतिः स्वातिरिति व्युत्पत्त्या स्वादिर्दन्त्यादिः । अत्र पूषाश्च पठ्यते । बाहुल्यान्नि मघादेः, मघासु-जातः माघः, अश्वत्थेषु जातोऽश्वत्थः प्रोष्ठपदासु जातः प्रोष्ठपादः, भद्रपदासु जातः भद्रपादः (५।१।१४) इत्युत्तरपदवृद्धिः ।

६३. गोशाले जातः गोशालः, गोशालम् खरशालमिति क्लीबनिर्द्देशः, लिङ्गग्रहणे-लिङ्गविशिष्टस्यापि ग्रहणमिति न्यायात् । गोशालायां जातः, तद्धितलुकि (४/३/१३०/) इति स्त्रीप्रत्ययस्य लुक् ।

६४. वत्सशालाद् वा ।

वत्सशालः, वात्सशालो वा ।

६५. श्रविष्ठाषाढ़ाभ्यामीयण् च ।

श्राविष्ठीयः, आषाढ़ीयः । लुकि श्रविष्ठः । उक्तं जात्यर्थे तत्रेत्यनुवर्त्तते ।

६६. कृत-लब्ध-क्रीत-कुशलाः ।

तत्रकृताद्यर्थे यथाविहितमणादयः स्युः । स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः, राष्ट्री(ट्रि) यः ।

६७. प्रायभवः ।

अत्रार्थे यथाविहितं स्यात् । स्रुघ्ने प्रायेण भवः स्रौघ्नः, राष्ट्री (ष्ट्रि) यः ।

६८. उपजानूपकर्णोपनीवेष्टिकण् ।

औपजानुकः पाणिः, औपकर्णिकं चक्षुः, औपनाविकः करः ।

६९. सम्भूतम् ।

तत्र सम्भूतमित्यर्थे यथाविहितं स्यात् । स्रौघ्नो राजा ।

७०. कोशाड्ढेयण् ।

कोशे सम्भूतं कौशेयं वस्त्रम् ।

७१. कालात् साधुपुष्प्यत्पच्यमानेषु ।

अत्रार्थे कालात् यथाविहितं स्यात् । ग्रीष्मे साधु, ग्रैष्मं चन्दनम्, हैमनं वासः, वसन्ते पुष्प्यति वासन्ती लताः, शरदि पच्यन्ते शारदका मुद्गाः ।

---

६६. तत्रेति सप्तम्यन्तादेषु भव-प्रायभवसम्भृतोत्सन्नसाधुपुष्प्यदादिषु शेष इत्यस्य सिद्धे किमनेनेति चन्द्रगोमी प्रत्यादिक्षत् ।

६७. सप्तम्यन्तात् प्रायेण बाहुल्येन भव इत्यर्थे यथाविहितं स्यात् । न तु तत्र इत्यनेन गतार्थत्वमत्रानित्यभवार्थत्वात् । * प्रायभवग्रहणमनर्थकम् । किं कारणम् ? तत्र भवेन कृतत्वात् । यो हि राष्ट्रे प्रायेण भवति तत्र भवोऽसौ भवति तत्र तत्र भव (४।३।८१) इत्येव सिद्धम् । न सिद्धयति । अनित्यभवः प्रायभवः ।

६९. प्रमाणानतिरिरिक्तमिह सम्भवः । स्थानमिह सम्भवः इति त्रिमुनिसंग्रहकारः ।

७२. **उप्तञ्च ।**

अत्रार्थे कालात् यथाविहितं स्यात् । हेमन्ते उप्ता हैमन्ता यवाः, ग्रैष्माः शालयः ।

७३. **आश्वयुज्या अकण् ।**

आश्वयुज्यां पौर्णमास्यां उप्ता आश्वयुजका माषाः ।

७४. **ग्रीष्मवसन्ताद् वा ।**

ग्रैष्मकं ग्रैष्मं वा, वासन्तकं वासन्तं वा ।

७५. **देयमृणम् ।**

अत्रार्थे कालात् यथाविहितं स्यात् । देयमृणं मासिकम्, सांवत्सरिकम् ।

७६. **कलाप्यश्वत्थयवबुसादकः ।**

यदा कलापिनो मयूराः, अश्वत्था फलिनः, यवबुसा उत्सम्पद्यन्ते तदा देयमृणम्, कलापकम्, अश्वत्थकम्, यवबुसकम् ।

७७. **ग्रीष्मावरसमादकण् ।**

ग्रीष्मे देयमृणम् ग्रैष्मकम्, आवरसमकम् ।

७८. **संवत्सराग्रहायणीभ्यां टिकण् च ।**

सांवत्सरिकम्, सांवत्सरकम्, अग्रहायणिकम् अग्रहायणकम् ऋणम् ।

७९. **मृगशकुनि व्याहरति ।**

अत्रार्थे यथाविहितं स्यात् । निशायां व्याहरति नैशो नृगः, नैशिको दात्यूहः ।

---

७२. टुवप् बीजतन्तुसन्ताने इत्यतः क्ते यण इक् । पृथग्योग उत्तरार्थः ।

७६. ननु एषां मयूराद्यर्थवाचित्वात् कथं कालवाचित्वमित्याह यदेत्यादि । अयमर्थः । यदा कलापिनो मयूराः स कालः साहचर्यात् कलापी । एवं सर्व्वत्र ।

७८. नन्वणित्युच्यताम् ततः कालाट्टिकण् पक्षे भविष्यत्येव किं टिकणित्यनेन ? सत्यम्, यदा संवत्सरे देयमृणम् फलमपि विवक्ष्यते तदा फलार्थे संवत्सरात् फलपर्वणोः (४८) इत्यण् मा भूदिति । आग्रहायण्यां पौर्णमास्यां देयमृणं अग्रहायणिकमित्यर्थः, अस्मान्निर्द्देशाण्णत्वमिति गोयीचन्द्रः ।

८०. **तदनेन सोढम्** ।

अत्रार्थे यथाविहितं स्यात् । निशा सोढा अनेन तत्सहचरिताध्यनादिभिरिति नैशश्छात्रः नैशिकः । कालादिति निवृत्तम् ।

८१. **तत्र भवः** ।

अत्रार्थे यथाविहितं स्यात् । स्त्रुघ्ने भवः स्रौघ्नो राष्ट्रीयः, बाह्यो दैवसिकः, दिव्यः प्रावृषेण्यः ।

८२. **दिगादेर्यो हिते च देहावयवात्** ।

दिशि भवं दिश्यम्, रहस्यम्, वंश्यम्, मूल्यम्, अग्न्यम् । आद्यम्, अन्त्यम्, यूथ्यम्, गण्यम्, अग्र्यम् । सूनृतात् सूनृत्यम् । देहावयवाद् हिते च । दन्ते भवं दन्त्याय हितं वा, हितयोगे चतुर्थी, दन्त्यम् । ओष्ठ्यम्, तालव्यम्, मूर्द्धन्यम्, मुख्यम्, चक्षुष्यम्, उरस्यम्, नासिक्यम्, नस्यं वा ।

८३. **सोदरदादेर्भवे** ।

समानोदरे भवः, सोदर्यः, समानोदर्यः ।

८४. **सगर्भ्यसयूथ्यौ** ।

समानस्य सो निपात्यते ।

८५. **अहि-कुक्षि-कलशि-दृत्यस्तिवस्तेष्टेयण्** ।

अहौ भवः आहेयः, कौक्षेयोऽसिः, कालशेषं दधि, दार्त्तेयम्, आस्तेयम्, वास्तेयम् ।

---

८०. ननु निशायाः सहनमभ्यसनं न भवति तत्कथमुक्तमित्याह तत्सहचरितेति । अत एव निशासहचरितं कर्म्म निशेति पुरुषोत्तमः ।

८२. अप्सु भवोऽप्सव्यः, अपः (४।४।१०) इति सप्तम्या अलुक् । मुख्यं जघन्यमेनयोः । अन्ये तु शाखादित्वाद् यप्रत्ययं कृत्वा मुखमिव जघनमिवेति व्युत्पादयन्ति । यत्पुनरुदकाद्रजस्वलायामिति सूत्रितमिह क्रमदीश्वरेण तदन्तादिभ्यो य इति सूत्रे उदकमर्हति उदक्येति समर्थनीयम् । ननु तत्रेति सप्तम्यन्तमनुवर्त्तते तत्कथं दन्ताय हितमित व्याक्रियते ? इत्याह हितयोग इति शक्तार्थहितेत्यत्यनेनेत्यर्थः । नस्यमिति नस् नासिकायाः (४।४।७१) इति नसादेशः ।

८६. **ग्रीवाया अण् च ।**
तत्र भवो ग्रैवम्, ग्रैवेयम् ।

८७. **गम्भीरादेर्ण्यः ।**
गाम्भीर्यम्, पाञ्चजन्यः

८८. **अव्ययीभावादनुपकूलादेः ।**
पारिमुख्यम्, पारिहनव्यम् । नेह औपकुलः, औपशालः ।

८९. **चतुर्म्मासाद् यज्ञे ।**
चातुर्म्मास्यं व्रतम् ।

९०. **संज्ञायामण् ।**
चातुर्म्मासी पूर्णिमा ।

९१. **अध्यात्मादिभ्यष्टिकण् ।**
अध्यात्मे भवम् आध्यात्मिकम्, आधिभौतिकम्, चातुर्थिकः' त्रैवर्णिकः, साम्प्रतिकम्, सामानिकम्, सामानग्रामिकम्, आनुग्रामिकम्, औद्ध् र्वदेहिकम्,

---

८६. प्राण्यङ्गत्वात् प्राप्तयतोऽपवादः । ग्रीवाश्रिता शिरा ग्रीवा ।

८८. नन्वाङ्पः (४।३।१०) इति सूत्रे वर्जनार्थ एव पञ्चम्यन्तेन सह परिः समस्यते तत्कथमीशेऽदूर्थेऽव्ययीभावः ? सत्यम्, परिमुखादव्ययीभाव इति पूर्वाचार्यसूत्रादत्राप्यव्ययीभावः । अव्ययीभावादिति किम् ? परिगतं मुखं परिमुखं, प्रादिसमासः, तत्र भवम् पारिमुख्यम् ।

९१. हेतुशून्ये कालेऽकस्मादित्यव्ययम् । तदप्यत्र केनचित् पठ्यते आकस्मिकम्, अनेन ग्रन्थकर्त्ता विनयादिभ्यष्टिकण्णित्यत्र पठिष्यते । एवमामुष्मिकम्, आमुत्रिकम्, पारत्रिकम्, ऐहिकम् । तत्रैतद्रूपपाठसामर्थ्यात् सप्तम्या अलुक् । समानतदादिभ्याञ्चेत्यन्ये । सामानिकम् । देहाद्देहधारणादूर्ध्वं, परतः ऊद्ध्र्व-देहस्तत्र भव औदर्ध्वदेहिकः । किञ्च दीर्घादिवकारवन्मान्तमव्ययमूर्द्धवपर्य्याये ऊर्ध्वशब्दः । तत्र भवमौर्ध्वदेहिकम् । वर्णदेशनायान्तु वकाररहितोर्ध्वशब्दो वाच्यलिङ्ग इत्युक्तेरकालिङ्गोर्ध्वकास्त्रय इत्यमरकोषपाठे उपपन्नः स्यात् । ऊर्ध्व समानार्थोऽनव्ययोऽदन्तोऽप्यूद्ध्र्वशब्दोऽप्यस्तीति काशिका । अतएव ऊद्ध्र्व स्यादुच्छ्रितोत्तुङ्गे चोपरिष्टादपि स्मृतमिति रभसपालेन दन्त्योष्ठवान्ते पठितः । एवमौद्ध्र्वमौहूर्त्तिकम् । ननु लोकोत्तरस्य पदस्य च । अन्तः पूर्वपदाट्ठ-ञिति सूत्रितं मुनिना तदिह पृथङ्नोच्यत इत्याह लोकोत्तरपदादिति ।

लोकोत्तरपदात् । ऐहलौकिकम् बहुलाधिकारात् (सप्तम्याः) अलुक् । पारलौकिकम्, अन्तः पूर्वपदात् । आर्न्तवंशिकः, आन्तर्देहिकः ।

९२. **अभ्रादेरियः ।**

अभ्रियम्, अग्रियम् ।

९३. **जिह्वामूलादेरीयः ।**

अस्मादीयः स्यात् । जिह्वामूलीयः, अङ्गुलीयः, अग्रीयम्, मुखतः पार्श्वतसष्टिलोपश्च । मुखतीयः, पार्श्वतीयः ।

९४. **वर्गान्ताच्च ।**

कवर्गीयः, चवर्गीयः ।

९५. **यदीनौ चाऽशब्दे ।**

मित्रवर्ग्यः, मित्रवर्गीणः, मित्रवर्गीयश्च । शब्दे तु कवर्गीयः ।

९६. **मध्यान्मणमीयेयोः ।**

माध्यमः, मध्यमीयः, मध्यीयः ।

९७. **णौ मध्यान्दिनञ्च मध्यस्य ।**

माध्यन्दिनः ।

९८. **कर्णललाटादिकः स्त्रियां भूषणे ।**

कर्णे भवा भूषणं कर्णिका, ललाटिका ।

९९. **तस्य व्याख्यानमिति च तिङादेः ।**

तत्र भवः, तस्य व्याख्यानञ्च इति अर्थद्वये तिङादेरणादयः स्युः । तिङिभवस्तिङो व्याख्यानं वा तैङो ग्रन्थः, सोपः, कार्त्तम् ।

---

९८. लुक् स्थाम्नोवृजिनान्ताच्च । अग्निष्टोमादेर्मन्त्रे । स्थामान्ताद् वृजिनान्ताच्च भवे विहितस्य प्रत्ययस्य लुक् स्यात् । अश्वत्थाम्नि भवा अश्वत्थामा विद्या, अः स्थाम्नः (५।२।६६) इत्यप्रत्ययस्य लुक् । अग्निष्टोमादेर्भवे विहितस्य लुक् स्यात् मन्त्रश्चेत् । अग्निष्टोमः, राजसूयः । इदमुपचारात् सिद्धमिति चान्द्राः । अणादयोऽपीष्यन्त एव, तस्येदमिति विवक्षयेति च । तन्मतं शरणीकृत्योपेक्षितमनेन सूत्रत्रयमिदम ।

९९. व्याख्यायतेऽस्मिन्निति व्याख्यानम्, अधिकरणे टनः । तेन व्याख्यानपदेन ग्रन्थोऽभिधीयते । तिङादेर्व्याख्यातव्यादित्यर्थतोऽवसीयते । धातुः, धातवीयः,

१००. **द्वन्द्वात् कृत्तद्धितादेष्टिकण्** ।
भवव्याख्यानयोः । कार्त्तद्धितिकम्, षात्वणत्विकम् ।

१०१. **द्व्यचृद्ब्राह्मणादिभ्यश्च** ।
भवव्याख्यानयोष्टिकण् स्यात् । द्व्यचः—ऐष्टिकः । ऋतः—चातुर्होतृकः, ब्राह्मणादिः—ब्राह्मणिकः, प्राथमिकः, आध्वरिकः, आग्निष्टोमिकः, पाञ्चौदनिकः, पौरश्चरणिकः, नामाख्यातिकः । विगृहीताच्च । नामिकम्, आख्यातिकः, ऋचः, आर्च्चिकः ।

१०२. **ऋषेश्चाध्याये** ।
वाशिष्ठिकोऽध्यायः, वैश्वामित्रिकः ।

१०३. **पौरोडाश-पुरोडाशाद्विकः** ।
भवव्याख्यानयोः—पौराडाशिकम्, पुरोडाशिकी ।

१०४. **छन्दसो यदणौ** ।
छन्दस्यः, छान्दसः ।

१०५. **ऋगयनादेरण्** ।
आर्गयनः, नैरुक्तः, शैक्षः, योगः, नैगमः, वैयाकरणः । उक्ते भवव्याख्याने ।

१०६. **तत आगतः** ।
अत्रार्थे यथाहितं स्यात् । स्रुघ्नादागतः स्रौघ्नः ।

तिङादेरिति किम् ? पाटलिपुत्रस्य व्याख्यानं सुकोशलापाटलिपुत्रकम् । सुकोशलया व्याख्यायते । एवं सन्निवेशः पाटलिपुत्र इति ।

१००. द्वन्द्वादिति किम् ? कृद्विशिष्टस्तद्धितः कृत्तद्धितः तस्य व्याख्यानमित्यर्थः औत्सर्गिक एव अण् स्यात् ।

१०१. द्व्यजृर्क्ब्राह्मणक्प्रथमाध्वरपुरश्चरणनामानाख्याताट्टक् । ऋक्क्रतुयज्ञेभ्यश्चेति यदुक्तं तदत्र गृहीतम् ।

१०२. साहचर्यादृषिशब्देन ऋषिप्रणीतो ग्रन्थ उच्यते । ऋषिवाचिनस्तयोरध्याये-ऽभिधेये टिकण् स्यात् । अध्याय इति किम् ? वाशिष्ठी ऋक् ।

१०६. इह मुख्यापादानग्रहणात् स्रुघ्नादागच्छन् वृक्षमूलादागत इत्यत्र न स्यात् । तथा च क्रमदीश्वरसूत्रम्, आद्यापादानादागत इति ।

१०७. **आयस्थानेभ्याष्टिकण् ।**

आपणादागतः आपणिकः, शौल्कशालिकः ।

१०८. **शुण्डिकादेरण् ।**

टिकणोऽपवादः । शौण्डिकः, कार्कणः, तैर्थः ।

१०९. **विद्यायोनिसम्बन्धेभ्योऽकण् ।**

विद्यायोनिकृतः सम्बन्धो येषाम् तेभ्योऽकण् स्यात् । उपाध्यायादागतं औपाध्यायकम् आचार्य्यकम्, पैतामहकम्, मातुलकम् ।

११०. **ऋतष्टिकण् ।**

तथासम्बन्धात् ऋदन्ताट्टिकण् स्यात् । होतृकम् । मातृकम्, स्वासृकम् ।

१११. **पितुर्यच्च ।**

पित्र्यम्, पैतृकम् ।

११२. **गोत्रादङ्कवत् ।**

तस्याङ्क इत्यर्थे वक्ष्यमाणप्रत्ययवदेमोत्रात् । औपगवादागतम् । अण्—दाक्षम् ।

११३. **रूप्यो हेतुमनुष्याद्वा । मयट् च ।**

समाद्धेतोरागतं समरूप्यम्, सममयम्, देवदत्तरूप्यो देवदत्तमयः । पक्षे गहादित्वादीयः समीयः । अण् दैवदत्तः ।

११४. **प्रभवति**

तत इत्येव, ततः प्रभवतीत्यर्थे यथाविहितमणादयः स्युः । हैमवती, राष्ट्रीयः ।

---

११२. गोत्रापत्यप्रत्ययान्तात्तस्याङ्कवत् प्रत्ययाः स्युः । यथा औपगवानामङ्कः, औपगवकः, तथा तत आगतोऽपि । एवं नाडायकः । गोत्रादकण्, यथा—बिदानामङ्को बैदः तथा तत आगतोऽपि । एवं गार्गः, दाक्षः । एवं शकलेन प्रोक्तमधीयाना शाकलाः, तेषामङ्कः शाकलः । तत आगतोऽपि । ननु गोत्रादङ्कवदित्युक्तेऽणेवातिदिश्यते तर्हि कथमौपगवकमित्युदाहृतं ग्रन्थकृता गोत्रादकणित्यकणस्तस्येदमित्यर्थे विहितत्वात् ? सत्यमङ्कग्रहणन्तस्येदमर्थोपलक्षणार्थम्, तेन तस्येदमर्थाः प्रत्ययाः स्युः । अत एव तोकप्रत्ययान्तात्तस्येदमर्था इति क्रमदीश्वरोऽसूत्रयत् ।

११५. **विदूराण्ण्यः ।**

वैदूर्यो मणिः ।

११६. **तद्गच्छति पथिदूतयोः ।**

तद्गच्छतीत्यर्थे यथाविहितमणादयः स्युः । पथि दूतौ चेत् । स्रौघ्नः पन्थाः, माथुरो दूतः ।

११७. **अभिनिष्क्रामति द्वारे ।**

अभिनिष्क्रामतीत्यर्थे यथाविहितमणादयः स्युः द्वारञ्चेत् । स्रौघ्नम्, कान्यकुब्जं द्वारम् ।

११८. **अधिकृत्य कृतो ग्रन्थः ।**

तदधिकृत्य कृत इत्यर्थे यथाविहितं स्यात् । सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः रणः । भैमरथी आख्यायिका, कादम्बरी कथा, ज्योतिरधिकृत्य कृतो ग्रन्थः, ज्योतिषम्, इति संज्ञापूर्व्वको विधिरनित्य इति वृद्ध्यभावः ।

११९. **द्वन्द्वयमसभादेरीयोऽदेवासुरादेः ।**

द्वन्द्वात्, किरातर्ज्जुनीयम्, श्येनकपोतीयः । यमसभादेः—यमसभीयः, शिशुक्रन्दीयः, इन्द्रजालीयः, प्रद्युम्ननागमणीयः, सीतान्वेषणीयं काव्यं, शिष्योपनयनीयोऽध्यायः । अदेवासुरादेरिति किम् ? दैवासुरः, राक्षोगर्न्धवः ।

१२०. **सोऽस्य निवासः ।**

अत्रार्थे यथाविहितं स्यात् । स्रुघ्नो निवासोऽस्य स्रौघ्नः ।

---

११५. वैदूर्यसंस्कारस्थाननगरविशेषवाचको विदूरशब्द उपचाराद् बालवाये वर्त्तत इत्येके, विदूरभूमिर्नवमेघशब्दादिति दर्शनात् । बालवायगिरिवाचको विदूर-शब्दः प्रकृत्यन्तरमस्ति । ततः प्रभवतीत्यर्थे विदूराण्ण्यः स्यात् । ननु बालवायाद् यण् विदूरञ्चेति प्राचां सूत्रमन्यथा बालवायादीयः कथं न स्यात् ? सत्यम् अनभिधानात् ईयो न स्यादिति पाणिनीयाः, शाकटायनश्च प्रकृत्यन्तरपक्षे यणं समर्थयन्ति, तन्मतमत्राद्रियते ।

११८. ग्रन्थ इति किम् ? सुभद्रामधिकृत्य कृतः प्रासादः । कथं वासवदत्ता आख्यायिका, विक्रमोर्वशी, शिशुपालवधः, कुमारसम्भव इत्याद्यभेदविवक्षया सिद्धम् । अतएव लुप् प्रायेण लक्षणं लघुवृत्तिचान्द्रादौ प्रत्यादिष्टम् । भेदविवक्षायां भैमरथी आख्यायिकेत्युदाहृतम् ।

१२१. अभिजनश्च ।

अत्रार्थे यथाविहितं स्यात् । स्रुघ्नोऽभिजनोऽस्य स्रौघ्न, सैन्धवः, काश्मीरः, ताक्षशीलः । अभिजनः कुलस्थानम् ।

१२२. गिरेरीयोऽस्त्रजीविषु ।

रोहितगिरिरभिजन एषां रोहिता गिरीया अस्त्रजीविनः ।

१२३. शलातुरादीयण् ।

शालातुरीयः ।

१२४. तूदीवर्म्मतीभ्यां ढेयण् ।

तौदेयः , वार्म्मतेयः ।

१२५. शण्डिकादिभ्यो ण्यः ।

शण्डिकोऽभिजनोऽस्य शाण्डिक्य, चाणक्य, शाक्यः । कुचवारात्-कौचवार्यः,

१२६. सेव्यः ।

सोऽस्य सेव्य इत्यर्थे यथाविहितं स्यात् बुद्धः सेव्योऽस्य बौद्धः, स्रौघ्नः ।

---

१२१. कुलशब्दोऽत्र पूर्वजपरः, तेन तैरुषितस्थानमित्यर्थः । ननु सिन्धुवर्णुमधुमते काश्मीरसाल्व इत्येतेभ्यः कच्छादेर्मनुष्यतत्स्थयोरित्यकणि प्राप्ते तक्षशीला-(शिला) वत्सोद्धरण काण्डवारणछगलग्रामणीकर्कटा इत्येतेभ्यः इकटिकणोः प्राप्तयोः किष्किन्ध्या-गन्धार-वरणादरद इत्येभ्यो बहुवचनादिकणि प्राप्ते-तद्बाधकं सिन्धुतक्षशिलादिभ्यो अणञाविति सूत्रं मुनिना प्रणीतम्, तत् कथं न विहितमित्याह सैन्धवमित्यादिः । बाहुल्यादेतेभ्योऽण् समर्थनीय इतिभावः

१२२. ह्रदगोलोगिरिरभिजन एषां ह्रदगोलीयाः शस्त्रजीविनः । एवं भोजकटीयाः । अस्त्रजीविष्विति किम् ? ऋक्षोदोऽभिजन एषाम्, आर्क्षोदा (दीयाः) विप्राः शाङ्काश्यकाः शस्त्रजीविनः ।

१२५. सर्व्वसाद्यः शाक्यः बौद्ध्यः इत्यादि । अत्र जनपदेभ्यो बहुबचनबिषयादकणि प्राप्ते तदितरेभ्योऽपि विधिरयम् ।

१२६. अभिजनो निवृतः, स इति वर्त्तते । वैष्णव इत्यादि तु देवतार्थे सिध्यति । स्त्रैण-पौंस्न- राष्ट्रीयाद्यर्थमुत्तरार्थञ्चेद विधेयमेव ।

१२७. **अपूपादेष्टिकण् ।**
आपूपिकः मौदकिकः, माहाराजिकः ।

१२८. **वासुदेवार्जुनाभ्यामकः ।**
वासुदेवक,ः अर्जुनकः ।

१२९. **गोत्र-क्षत्रियाख्येभ्योऽकण् बहुलम् ।**
गोत्राख्यात्-औपगवः सेव्योऽस्य औपगवकः । क्षत्रियाख्याद्बहुवचनविषयात् जनपदात्-आङ्गकः, पाञ्चालकः । जनपदिनोऽपि बहुत्वे जनपदवत् । बाहुल्यान्नेह, पाणिनीयः, पौरवीयः ।

१३०. **तेन प्रोक्तम् ।**
अत्रार्थे यथाविहितं स्यात् । पाणिनिना प्रोक्तं पाणिनीयं सूत्रम्, तदधीते पाणिनीयः, प्रोक्ताल्लुक् । माथुरीवृत्तिरिति तत्र भवार्थे ।

---

१२७. अत्रादिपदेन देशकालव्यतिरिक्ताचेतनो महाराजश्च गृह्यते । अचित्तादेशकालाट्ठक्, महाराजाट्ठञ्च इति सूत्रद्वयम् (पा० ४।३।९६-९७ ।

१२८. वासुदेवोऽत्र परमार्थवचनः, वासुदेवस्यापत्यवाचिनस्तु परेणाकः स्यात् । वासुदेवकः जनमर्ज्जुनकं दृष्ट्वेति व्योषः ।

१२९. गोत्रप्रत्यायान्तात् पूर्वार्थेऽकण् स्यात् । (माहा) साहदेवकः, गार्गकः, क्षत्रियाख्यादिति क्षत्रियस्याख्या आख्या यस्य स क्षत्रियाख्या जनपदः, तस्माद् बहुवचनविषयात् पूर्वार्थेऽकण् स्यात् । तेन बहुत्वेऽकण् विधीयते । यथा— अङ्गानां निवासोऽङ्गाः, चातुर्थिकस्य लुप् । तत्र भव आङ्गकः । अथ अङ्गाः सेव्या अस्येति आङ्गकः । जनपदिनोऽपि बहुत्वे जनपदवदिति । अस्यार्थः, जनपदिनः क्षत्रियस्य बहुत्वे जनपदवत् स्यात् । जनपदे यथा प्रकृतिः यादृशः प्रत्ययस्तद्वदिहापि बहुलग्रहणात् । यथा मद्रस्यापत्यं माद्रः । पञ्चालादेरण्, वृजेरत्पयं वार्ज्यः, कुर्व्वादिभ्यो ण्यः, यस्कादीति बहुत्वे लुकि मद्राः, वृजयः । ते सेव्या अस्य मद्रकः, वृजिकः, मद्रवृजिभ्यां कः बाहुल्यात् । क्वचिदकण् न स्यात् । पौरवः सेव्योऽस्येति पौरवीयः । गोत्रादिति प्राप्तो निषिद्धः ।

१३०. प्रोक्तमिति प्रकर्षेणोक्तम्, आख्यातम्, अधीतं वा, अन्यथा कृतो ग्रन्थः इत्यनेन गतार्थत्वं स्यात् । ननु यदि प्रोक्तप्रत्ययान्तादध्येतृवेदित्रोर्विहितस्य लुक् स्यात् तर्हि कथं माथुरी ङी भवेत् ? अणोऽन्यार्थत्वादित्याह भवार्थ इति । यदा त्वनेन माथुरेण व्याख्याता तदा माथुरी वृत्तिरिति स्यादेव ।

१३१. **तित्तिरि-वरतण्डु-खण्डिकोखादीयण् ।**

तित्तिरिणा प्रोक्तं तैत्तिरीयम्, तदधीते वेद वा, तैत्तिरीयश्छात्रः, वरतण्डवीयः, खाण्डिकीयः, औखीयः ।

१३२. **छगलिनो ढेयिन् ।**

छागलेयि छन्दः । बहुत्वे छागलेयिनश्छात्राः ।

१३३. **कौशिकादिभ्यः ऋषिभ्यो णिन् ।**

कौशिकेन प्रोक्तं कौशिकि छन्दः, तदधीते वेद वा, प्रोक्ताल्लुक् । कौशिकिनश्छात्राः । काश्यपिनः, शौनकिनः । कलापिशिष्येभ्यः । औलपिनः, हारिद्रविणः । वैशम्पायनशिष्येभ्यः । आलम्बिनः, स्फौलिङ्गिनः इत्यादि ।

१३४. **पुराणप्रोक्तब्राह्मणकल्पे च ।**

तान्तवी मन्त्रः, पैङ्गी कल्पः ।

१३५. **कलापिनोऽण् ।**

कालापाः ।

१३६. **कठचरकाल्लुक् ।**

प्रोक्तप्रत्ययस्यैव लुक् । कठेन प्रोक्तः कठः, चरकः, तमधीयते कठाः ।

१३७. **कर्म्मन्द-पाराशर्य्याभ्यामिन् भिक्षुसूत्रे ।**

कर्म्मन्देन प्रोक्तं भिक्षुसूत्रं कर्म्मन्दि । तदधीते कर्म्मन्दी भिक्षुः, पाराशरी ।

---

१३१. छन्दस्येवायमितस्त्योविधिर्बोद्धव्यः । सोप्यध्येतृवेदितृविषय एवाभिधानादित्याह तैत्तिरीयं छन्दः । तदधीत इत्यादि । तथाह यस्मिन् सूत्रे छन्दसीत्युक्तं क्रमदीश्वरेण । छन्दोविहितप्रोक्तार्थप्रत्ययः तदध्येतृ तदवेदितृविषय एव स्यादिति च निरस्यते । तेन तित्तिरिणा प्रोक्तं श्लोकमधीत इत्यण् वाक्यञ्च स्यात् तैत्तिरः ।

१३४. पुराणैर्महर्षिभिः प्रोक्ते ब्राह्मणे न कल्पे च पुराणर्षेर्णिन् स्यात् । तन्तुना प्रोक्तं ब्राह्मणं तान्तवि, यदधीते तान्तविनः, एवं शाट्यायनिनः, तैत्तिरीयिणः, ऐतरेयिणः, भाल्लकिनः शिष्याः । पुराणेति किम् ? याज्ञवल्क्यानि, वामरथानि, ब्राह्मणानि, औत्सर्गिकोऽण् । पैङ्गीति पिङ्गेन प्रोक्तः पैङ्गी कल्पः, तमधीते विदन्ति वा पैङ्गिनः, प्रोक्ताल्लुगित्यणो लुक् । पुराणेति किम् ? आश्वरथः कल्पः, कल्पस्य वेदेतरत्वादध्येतृविषयता नास्ति ।

१३८. **शिलालि-कृशाश्वाभ्यां णिनिनौ नटसूत्रे ।**
शिलालिना प्रोक्तं नटसूत्रं शैलालि, तदधीते शैलालिनो नटाः । कृशाश्विनः ।

१३९. **तेनैकदिक् ।**
अत्रार्थे यथाविहितं स्यात् । सूर्येण एका समाना दिक् सौरी बलाका, सौदामनी विद्युत्, स्रौघ्नः पन्थाः ।

१४०. **उरसो यत् ।**
उरसा एका दिक्, उरस्योहारः ।

१४१. **उपज्ञातम् ।**
तेनोपज्ञातमित्यर्थे यथाविहितं स्यात् । पाणिनिना उपज्ञातम्, प्रथमं कृतम् पाणिनीयमकालकं व्याकरणम्, शूरेणोपज्ञातः शौरः संग्रामः ।

१४२. **कृतो ग्रन्थः ।**
तेन कृत इत्यर्थे यथाविहितं स्यात् । ग्रन्थश्चेत् । वररुचिना कृतो ग्रन्थः वाररुचो ग्रन्थः ।

१४३. **मक्षिकादेः संज्ञायाम् ।**
अण् स्यात् । मक्षिकया कृतम् माक्षिकं मधु, क्षौद्रम्, भ्रामरम्, वाटरम्, पादपम्, गार्म्मुतम् ।

---

१३८. अत्राथर्व्वणोऽण्, वेदे लुक् च वा, अथर्वणा प्रोक्तः आथर्वणः। अथर्वा च वेदः । तथा वशिष्ठादिभ्योऽनुवाकादिषु. वाशिष्ठो वेदः वशिष्ठश्च, इति सूत्रद्वयं प्राचीनैर्विहितम्, भर्तृहरिश्रुतपालाभ्यामप्यनुमतम् उपचारजीवातृकैश्चान्द्रैस्तु प्रत्यादिष्टम् ।

१३९. एवं हैमवतीं त्रैककुदी वाराहीयमित्यादि । अत्र तसिश्चाव्ययम् । उरसोयश्चेति सूत्रद्वयं व्याख्याय । हिमवतः उत्तरस्य इत्युदाहृतं पुरुषोत्तमेन, तदलौकिकमित्युपेक्षितमन्यैः ।

१४२. कृतः स्वयमुत्पादित इत्यर्थः । ग्रन्थ इति किम् ? तक्ष्णा कृतः प्रासादः । इहोपज्ञातकृतयोर्विद्यमानाविद्यमानविषयत्वाद् विशेषः । अन्ये तु मानसी कन्या नारदीयं वचनमिति प्रदर्श्य व्यतिरेकोऽपि शेषत्वात् सिद्ध इति प्राहुः ।

१४४. कुलालादेरकण् ।

कुलालेन कृतः कौलालको घटः, ऐन्द्रियकं ज्ञानम्, कुलाल, वरुड (ण), चण्डाल, निषाद, कर्म्मार-इन्द्रिय-देवराज-परिषद्-वधु-अनडुह-ऊरु-ब्राह्मन्, कुम्भकार-श्वपाकाः । तेन कृतं शौवपाककम् ।

१४५. तस्येदम् ।

अत्रार्थे यथाविहितं स्यात् । उपगोरिदम् औपगवम्, आध्वर्यम्, राष्ट्रियम्, पारिषदः, शास्त्रीयं न परित्यजेत् ।

१४६. संवोढुरण् वहितृश्च ।

संवोढुरिदम् सांवहित्रम् ।

१४७. अग्नीधः शरणे णोधोध्रश्च ।

णः स्यात् । आग्नीध्रः ।

१४८. ऋचि समिधष्टेन्यण् ।

अत्रार्थे समिधष्टेन्यण् स्यात् । सामिधेनी ऋक् ।

१४९. रथादपत्र (वाहन) पूर्वाद् यः ।

रथस्येदं रथ्यम्, परमरथ्यम् । अपत्र (वाहन) पूर्व्वादिति किम् ? आश्वरथं चक्रम् ।

---

१४५. तस्येति षष्ठयन्तादिदमर्थेऽणादयो महोत्सर्गा एकादश णादयः षट्त्रिंशत्प्रत्यया यथायथं स्युः । उपगोरिदम् औपगवं धनम् । सूत्रे (परि० ८०) इति न्यायादौपगवी पूः । औपगवो ग्रामः, दैव्यो बाह्यो बाहीकः, पार्थिवः, दैत्यः, बार्हस्पत्यः, अश्वत्थामः, आग्नेयः, स्त्रैणः, पौंस्नः, गव्यः, आरण्याः, सुमनसः, राष्ट्रियः, पारीणः, ग्रामीणः, मासिकः, चिरन्तनः, श्वस्त्यः, शाश्वतिकः । एवमन्येऽप्युत्पन्नेयाः । अत्र सम्बन्धमात्रविवक्षया सर्वत्र प्राप्तौ तस्यानन्तरं तस्य समीपमित्यादौ प्रत्ययो न स्यादिति काशिका ।

१४६. सोपसर्गस्य सांवहित्रम् । वाहित्रमिति वासवतम् । अण् ग्रहणमिह स्पष्टार्थम् ।

१४७. सामिधेन्यो मन्त्रः, समिधामाधाने षेन्यण् इति मुनिसूत्रम् । तत्र वन्हि-सन्दीपनार्थं यं मन्त्रमुच्चार्य समिधा दीयते स सामिधान इति व्याख्यातम् । सामिधेनीति हलस्तद्धितयः (५।१।४९) इति यलोपः ।

१४९. पत्रमिह वाहनम्: सर्वं स्याद् वाहनं यानमित्यभिधानात् । तुरगाद्यपूर्व्वाद्

१५०. **हलसीराट्ठिकण्।**

हलस्येदं हालिकम्। सैरिकम्।

१५१. **द्वन्द्वादिकः स्त्रियां वैरमैथुनिकयोरदेवासुरादेः।**

(वीरे भवं वैरं विरोधः, मिथुनस्य कर्म्म मैथुनिको विवाहस्तयोरर्थयोर्द्वन्द्वात् स्त्रियामिकः स्यात्) अश्वमहिषस्य (इदम्) वैरम् अश्वमहिषिका। काकोलूकिका। मैथुनिके--अत्रिभरद्वाजयोः कुटुम्बकरणम् अत्रिभरद्वाजिका। अदेवासुरादेरिति किम्? दैवासुरम्, राक्षसोगन्धर्वम्।

१५२. **गोत्रादकण्।**

औपगवस्येदम् औपगवम्, दाक्षकम्, गार्गकम्। न पाणिनेर्युवत्वात् पाणिनीयम्।

१५३. **चरणाद्धर्माम्नाययोः।**

कठस्य धर्म्म आम्नायो वा काठकम्, कालापकम्।

१५४. **नाऽन्तेवासि-दण्डमाणवेषु।**

एषु गोत्रचरणादकण् नास्ति। दाक्षा अन्तेवासिनः, गौरक्षा दण्डमाणवाः।

यण् स्यात्। किन्त्वनेनौत्सर्गिकः, रथ्यमिति चक्रमिति शेषः, तथाहि रथाङ्गे रथ-रथान्ताद् षदिति क्रमदीश्वरसूत्रम्। अङ्गे चेति वर्द्धमानस्य। अश्वरथमिति अश्वयुक्तो रथः अश्वरथः शाकपार्थिवादिः। एवं वाजिरथम्, वारणरथम्। अत्राभिधानादी यमपि वाधते। विज पत्रादप्यणेवाभिधीयते। अश्वस्येदमाश्वम्, औष्ट्रोभारः, वारणीतृषा, रासभी क्रीड़ा, ईयो न स्यात्। अत्रोत्सर्गिकटिकणि सिद्धे विधानम्। हास्तमित्यत्र न लुगर्थम् अन्यथा गथिविदथि (५।१।२८) इत्यादिना युक्त्यादित्वात् लुङ् निषेधे हास्तिनमित्यनिष्टं स्यादिति गोयीचन्द्रः।

१५१. द्वन्द्वसमासान्तातस्येदमर्थे वैरे वाच्ये देवासुरादिर्वर्ज्जिताद् मैथुनिके विवाहे च वाच्ये इकः स्त्रियां स्यात्। अहिनकुलिका, अश्वश्रृगालिका, मूषिकमार्ज्जारिका, अहिभुजङ्गिका, भृग्वङ्गिरसिका. गर्गजह्नविका। वैरमिति वदता वैरवर्ज्जनादभिप्रेतम्। एवं पाण्डवकौरवीयम्।

१५५. सङ्घाङ्क-लक्षण-घोषेस्विण् यण् बैदादिभ्योऽण् ।

सङ्घादौ इणाद्यन्तात् बैदादेश्च अण् स्यात् । अकणोऽपवादः । दाक्षीणां सङ्घोऽङ्को लक्षणं घोषो वा दाक्षः, गार्गः, बैदः, और्व्वः ।

१५६. छन्दोगादेर्ण्यः ।

धर्म्माम्नाय सङ्घादौ । छन्दोग्यम्, औक्थिक्यम्, याज्ञिक्यम्, बाह्वृचम्, नटानां नाट्यम् ।

१५७. रैवतिकादेरीयः ।

रैवतिकीयः ।

१५८. कौपिञ्जलहास्तिपदादण् ।

धर्म्माम्नाय सङ्घादौ । कौपिञ्जलः, हास्तिपदः ।

१५९. आथर्वणिकस्येकलोपश्च ।

आथर्वणः ।

(पूर्णः शेषाधिकारः)

१६०. विकारे ।

तस्य विकारः इत्यर्थे यथाविहितमणादयः स्युः । अश्मनः विकार आश्मः, आपूपिकः, आग्नेयः, स्त्रैणः, पौस्नः, मार्त्तिकः ।

१६१. अवयवे च प्राण्योषधि-वृक्षेभ्यः ।

एभ्यो विकारे अवयवे च यथाविहितमणादयः स्युः । मयूराणां विकारोऽवयवो वा मायूरः, स्त्रैणः, पौस्नः । ओषधेः—दौर्व्वः, मौर्व्वम् । वृक्षात्—वैणवम्, दैवदारवम्, दैवदारवम्, कापित्थम्, माधुकः ।

---

१५५. अङ्को गवादिस्थोऽपि न गवादीनाम्, किन्तु गवादिस्वामिनः । लक्षणन्तु लक्ष्यस्यैव चिह्नम्, यथा विद्या विद्यावतामित्यनयोर्भेदः । शाकलाद् वेति वक्तव्यम् । तस्मात्तेष्वकण् वा स्यात् । शाकलेन प्रोक्तमधीते शाकलः तस्य सङ्घादिः शाकलकः शाकलश्च । सङ्घादय इदमर्थे विशेषाः, गोत्रग्रहणानुवृत्तिरत्राणादीनाम्प्रत्ययतया तदन्तानां ग्रहणम् । गोत्रञ्चेह लौकिकम्, न तु ऋष्यपत्यरूपम् ।

१६१. अवयवोऽंशः, प्राणिन इति शेषः । अत्रौषधिशब्देन लतादिरपि, वृक्षशब्देन वनस्पतिरपि गृह्यते । भेदान्मयटोऽपवादः । इत उत्तरे प्रत्ययाः प्राण्योषधिवृक्षेभ्यो विकारावयवयोः । इतरेभ्यस्तु विकारमात्र विधेया इति जयादित्यपुरुषोत्तमादयः ।

१६२. **शम्याः शमील् च ।**
शामीलं भस्म । शामीली स्रक् ।

१६३. **त्रपुजतुभ्यां षुश्च ।**
त्रापुषम्, जातुषम् ।

१६४. **मयड्-वैतयोरभक्ष्याच्छादनयोः ।**

विकारावयवोर्वा मयट् स्यात्, अश्वत्थमयम् । आश्वत्थम् । रजतमयं राजतं वा, लोहमयं लौहं वा, काञ्चनमयी काञ्चनी वासयष्टिः, कपोतमयं कपोतं वा, दूर्व्वामयं दौर्व्वम्, बिल्वमयं बैल्वम्, मधूकमयं माधूकम् । अपूपमयः, आपूपः स्वस्तिकः । अभक्ष्याच्छादनयोरिति किम् ? मौद्गः सूपः, कार्पासः वासः ।

१६५. **नित्यमेकाच् शरादेः ।**

मृन्मयम्, वाङ्मयम्, त्वङ्मयम् । शरादेः शरमयम्, दर्भमयम् । शर दर्भ सोम वल्लज कूप तृण । अपो यण् च । आप्यम्, अम्मयम् ।

१६६. **वृद्धाद्यचः प्रायेण ।**
आम्रमयम्, शालमयम् ।

---

१६३. अत्र षुरागमः साध्यते । अण् पुनः सिद्ध एव । त्रपुमयम्, जतुमयमिति मयडपि स्यादितिमतम् ।

१६४. ननु विकारवयवयोरिति निमित्तत्वेनानुवर्त्तत एव । तत् किमेतयोरिति तत्परामर्शकेन सर्व्वनाम्नेति ? सत्यमेतद्ग्रहणं बाधकबाधनार्थमित्याह काञ्चनमयीति, वृद्धाद्यचः प्रायेणेत्यण् स्यात् । काञ्चनी वासयष्टिरिति मयट् न स्यादिति । कापोतमिति अवयये च (१६१) इति प्राप्तेः । अतएव बिल्वादिभ्यः (१८१) इति मयट् बाधकं मुनिसूत्रमनेनोपेक्षितमिति बिल्वमयमित्युदाहृतम् ।

१६५. आपो यण् चेति वक्तव्यम् । आप्यमयमित्यमरः । आप्यैरपित्रसरेणुभिरिति मुरारिः । तद्धिता इति बहुवचनादाप्यमपीति पाणिनीयाः । आपो यण् चेति चान्द्रं शाकटायनञ्च । अपशब्दाद् ब्रूञि आप्यमिति वर्द्धमानमिश्रेण निपातितम् ।

१६६. सैरीयकमयम् (मिदं) वनं येनेदं काञ्चनमयं निर्म्मितं पुरमित्यपि प्रायग्रहणात् । पुरी द्रक्ष्यसि काञ्चनीमिति भट्टिः ।

१६७. **तत्प्रभवे च तदादेः ।**

तन्मयः, यन्मयम् ।

१६८. **गोः पुरीषे ।**

गोमयम्, गव्यमन्यत्र ।

१६९. **व्रीहेः पुरोडाशे ।**

व्रीहिमयः पुरोडाशः, व्रैहमन्यत्र ।

१७०. **तिलयवाभ्यामसंज्ञायाम् ।**

तिलमयम्, यवमयम् । संज्ञायान्तु—तैलम्, यावकम् ।

१७१. **पिष्टाच्च नित्यम् ।**

पिष्टमयम् ।

१७२. **संज्ञायां कः ।**

पिष्टकः, पिष्टिका ।

१७३. **न दैवदारवादेः ।**

एभ्यो विकारावयवप्रत्ययान्तेभ्यो मयट् न स्यात् । विकारे—दैवदारवस्य विकारोऽवयवो वा दैवदारवो यूपः । शामीलस्य शामीलः ।

१७४. **तालाद् धनुषि ।**

तालं धनुः ।

---

१६८. गोभुक्ताहारे गोविकारत्वमारोप्य पुरीष इत्युक्तम्, तेन नाधिकारविरोधः ।

१७१. इह मयट् न स्यात्, अणेव स्यात्, दैवदारवादेरिति किम् ? बिल्वादेर्विकारायवप्रत्ययान्ताद् भवत्येव । बैल्वमयम्, पाटवमयम्, कार्पासमयं भस्म । कातन्त्रविस्तरे तु विकारावयवयोरपि प्रकृत्यावयविशब्दयोर्वृत्तिमाश्रित्य न द्विः प्रत्ययोत्पत्तिरित्युक्तम् ।

१७४. अस्माद् धनुषि वाच्चे तयोर्मयट् नास्ति, किन्त्ववयवे च (१६१) इत्यादिना अणेव । धनुषीति किम् ? तालमयी द्रोणी । वृद्धयाद्यचः (१६६) इति मयट् ।

१७५. **हाटकार्थान्माने ।**

हाटको निष्कः, राजतरूप्यम् । इह भवति बैल्वमयम् ।

१७६. **क्रीतवत्-संख्यापरिमाणात् ।**

आभ्यां विकारे क्रीतवत् प्रत्ययाः स्युः । यथा-क्रीतार्थे शत्यः शतिकः, तथा विकारेऽपि, एवं नैष्किकः । क्रीतवल्लुक् च । द्विसहस्रम् जातरूप्यम् ।

१७७. **उष्ट्रादकण् ।**

उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः ।

१७८. **उमोर्णाद् वा ।**

उमाया विकारादि, औमकः, औमो वा । और्णकः, और्णो वा ।

१७९. **एण्याष्टेयण् ।**

ऐणेयम्, ऐणेयी जङ्घा । एणादणे व, ऐणं चर्म्म ।

१८०. **पयसो यः ।**

पयस्यम् ।

१८१. **द्रोश्च ।**

द्रव्यम् । (द्रुर्वृक्षस्तस्यावयवो विकारो वा) द्रव्यम् ।

१८२. **माने वयः ।**

द्रुवयं मानम् ।

१८३. **पुष्प-फल-मूलेषु लुब्बहुलम् ।**

एषु विकारावयवयोरुक्तप्रत्ययस्य लुप् स्यात् । पुष्पे जात्यादिभ्यः; जातिः मालती मल्लिका केतकी शेफालिका चम्पको बकुलः पुष्पम् ।* पाटलाया वा । पाटलाः पाटलं वा ।

---

१७५. ततो विकार एवेष्यते । हाटकं सुवर्णम्, अस्मान्माने मयट् नास्ति, किन्त्वणेव । निष्कः पलमित्यर्थः, कार्षापणं मानभेदः । मान इति किम् ? शाटकमयी यष्टिः । इह भवति । बैल्वमयमित्यनेन दैवदारवादेरिति प्रत्युदाहृतम् । व्याख्यातमेव, तालाद् धनुषि, शाटकार्थान्माने इदं द्वयमपि न पृथगित्यपि स्पष्टीकृतम् ।

१८३. एषु विवक्षितेष्वित्यर्थः । जातिरित्यादिषु मयटो लुक् । एवं झिण्टी नवमालिका माधवी वाणा केतकिर्ह्रस्वान्तापि ।

१८४. **फले फलपाकान्त हरीतक्यादिभ्यः ।**

यवानां फलानि यवाः, तिलाः, मुद्गाः, माषाः गोधूमा, व्रीहय, कदली । हरीतक्यादेः—हरीतकी, कोषातकी, द्राक्षा, कोलिः, कमुकः कन्टकारिका । *बिदार्य्यादिमूले । विदारी, बृहती ।

१८५. **फले लुग्बदर्य्यादेः ।**

एभ्यः फले लुक् स्यात् । लिङ्गं फलस्यैव, बदर्य्याः फलम्, तद्धितलुकि लुक्-स्त्रियाः—बदरम्, आम्रम्, पनसम् खर्ज्जूरमित्यादि । आमलक्यादेर्व्वा—आमलकम्, आमलकी । कोलेरिदच्च । कोलम्, कोलिः ।

१८६. **न प्लक्षादेः ।**

एभ्यो लुप्लुकौ न स्याताम् । प्लाक्षं फलम्, नैयग्रोधम्, बार्हतम् ऐङ्गुदम्, आश्वत्थम्, काकुभम्, वैणवम्, कापित्थम् ।

१८७. **जम्ब्वा वा ।**

जम्ब्वा लुक्-लुपौ वा स्याताम् । जम्बूः फलम्, जम्बू च । जाम्बवञ्च ।

१८८. **बिल्वादेर्व्वा लुक् पुष्पे च ।**

एभ्यो लुग्वा निषेधश्च । बिल्वं बैल्वं वा फलं पुष्पञ्च । अशोकम्, आशोकं च, कदम्बं कादम्बञ्च, करवीरं कारवीरम् ।

---

१८४. फलपाकान्ता ओषधयो यवादयः युक्तवत् (२।१।४६) इति लिङ्गवचने युक्तवद् भवतः । हरीतक्याम्लिका पथ्या मृद्विका पिप्पली कणा । चिञ्चा कोषातकी द्राक्षा कर्कटी कण्टकारिका । श्वेतपाका च कर्कारुः कोलिर्भल्लातकी तथा । जाति तु क्रमुका घोण्टाप्येवमेला वलादयः । बिदार्यादेरिति । बिदारी, सुमती, मुस्ता बृहती शालपर्ण्यपि, गम्भारी च हरिद्राद्या ज्ञेया लक्ष्यानुसारतः । सर्व्वमिदं बहुलप्रपञ्चनम् ।

१८७. लुपि युक्तवत्वात् जम्बूः फलम् । स्त्री लुकि अणि तदभावात् क्लीबम् ।

१८८. एभ्यः फले पुष्पे च विकारार्थस्य लुग्वा स्वात् । पक्षे प्रत्ययास्थितिरिति विवृणोति निषेधश्चेति । तथा शिरीषम्, शैरीषमित्यादि । ह्रीवेरादेर्मूले इति वक्तव्यम्, ह्रीवेरम्, ह्रैवेरम् । शूरणम्, शौरणम्, कन्दम्, कान्दम्, इत्याकृतिगणोऽयम् । नान्येभ्यः—ऐरण्डम्, बैल्वमाम्रम् ।

१८९. कंसीयपरशव्याद् यणणौ लुक् चेययोः ।

आभ्यां विकारे यण् अणौ स्याताम् । ईय-ययोर्लुक् च । कंसीयस्य विकारः कांस्यम् पारशवम् ।

१९०. तत्त्वदस्मिन् वा प्रस्तुतमिति मयट् ।

तदेव प्रस्तुतम्, तदस्मिन् वा प्रस्तुतमित्यर्थे मयट् स्यात् । अमृतमेव प्रस्तुतम् अमृतमयम् । अन्नं प्रस्तुतमस्मिन् अन्नमयो यज्ञः । अपूपमयं पर्व्व ।

१९१. समूहवच्च बहुषु ।

अपूपाः प्रस्तुताः आपूपिकम्, अपूपमयञ्च, वाटकिकी, वटकमयी वा यात्रा ।

उक्ताः प्राग्दीव्यतीयाः

१९२. आब्रह्मचर्य्याट्टिकण् ।

ब्रह्मचर्यसंशब्दनपर्यन्तं टिकणधिकारः ।

१९३. तेन दीव्यति खनति जयति जितम् ।

एष्वर्थेषु टिकण् स्यात् । हलेन दीव्यति खनति जयति जितो वा हालिकः, खानित्रिकः । अक्षैर्दीव्यति जयति जितो वा आक्षिकः ।

१९४. तरति ।

तेन तरतीत्यर्थे टिकण् स्यात् । गौपुच्छिकः, तान्तुजालिकः ।

---

१९१. बह्वर्थे प्रस्तुतवृत्तेः समूहवत्प्रत्ययाः स्युः । मोदकाः प्रस्तुताः मौदकिकम् । शष्कुल्यः प्रस्तुताः शाष्कुलिकम् (५।२।१८०) इति टिकण् । पक्षे मोदकमयम्, शस्कुलीमयम् । तत्प्राचुर्याद् विकार एव मयट् । तथा श्रद्धामयः पुरुष इति चान्द्राः ।

१९३. अत्र दीव्यतेर्व्यवहारार्थस्य ग्रहणमिति गोयीचन्द्रः । तेनेति करणे तृतीयाः, तत्साहचर्य्याद् जितमित्यत्रापि । तेनाक्षैर्जितं धनमाक्षिकम् । न पुनश्चैत्रेण जितम् । किञ्च तेन सेनया जितमित्यत्रापि न स्यादनभिधानात् । अङ्गुल्या खनतीत्यत्रापि आख्यातार्थे विहितस्तद्धितः स्वभावात् साधनप्रधानः । सूत्रे लिङ्गं संख्या कालाश्चातन्त्राणीति न्यायात् अक्षैरदीव्यदित्यवधेः ।

१९४. तरतिरयं प्लवमात्रे तत्पूर्वकदेशान्तरप्रापणेऽरभिरभवे च वर्त्तते । प्लवमात्रवृत्तावुदाहृतम् । परयोस्तु काण्डप्लविकोनद्याः, अश्वमेधिको ब्रह्महत्यायाः ।

१९५. **द्व्यज्नौभ्यामिकः ।**

द्व्यच्, घटेन तरति घटिकः, कुम्भिका, स्त्री, बाहुकः, नाविकः ।

१९६. **वेतनादिभ्यो जीवति ।**

एभ्यस्तेन जीवतीत्यर्थे टिकण् स्यात् । वैतनिकः, जालिकः, वार्त्तिकः ।

१९७. **वस्न-क्रय-विक्रयादिकः ।**

वस्नो मूल्यम्, तेन जीवतीत्यर्थे इकः स्यात् । वस्नेन जीवति वस्निकम्, वस्निका वणिग्वधूः, क्रयिकः, विक्रयिकः ।

१९८. **आयुधादीयश्च ।**

आयुधीयः, आयुधकः ।

१९९. **हरत्युत्सङ्गादे ।**

एभ्यस्तेन हरतीत्यर्थे टिकण् स्यात् । औत्सङ्गिकः । औडुपिकः ।

२००. **भस्त्रादिभ्याष्टिकः ।**

भस्त्रया हरति भस्त्रिकी ।

२०१. **विवधवीवधाद् वा ।**

विवधेन हरति विवधिकः, वीवधिकः, । पक्षे वैवधिकः ।

२०२. **अण् कुटिलकायाः ।**

कुटिलिकया गत्या हरति कौटलिकी गणिका ।

२०३. **निर्वृत्तेऽक्षद्यूत्यादेः ।**

एभ्यस्तेन निर्वृत्तार्थे टिकण् स्यात् । अक्षद्यूतेन निर्वृत्ताक्षद्यूतिकं वैरम्, आनुप्रहृतिकम् जायाप्रहृतिकम् ।

२०४. **पाकादेरिमः ।**

पाकेन निर्वृत्तं पाकिमं फलम्, सेकिमा लता, कुट्टिमा भूः, दानिमः, पूर्णे—पूर्णिमा ।

२०५. **याचितापमित्याभ्यां ककणौ ।**

याचितेन निर्वृत्तं याचितकं मण्डनम्, अपमित्येति यपि आपमित्यकम् ।

२०६. **संसृष्टम् ।**

तेन संसृष्टमित्यर्थे टिकण् स्यात् । दध्ना संसृष्टं एकीभूतं दाधिकम् । गौडिकम् । (चूर्णादीनिरिति वक्तव्यम् । चूर्णिनोऽपूपाः)

२०७. **लवणाल्लुक् च ।**

लवणेन संसृष्टो लवणः (लवणा श्राणा, लवणं शाकम्) ।

२०८, **मुद्गादण् ।**

मुद्गेन संसृष्टा मौद्गी यवागूः—(मुद्गैः संसृष्टाः माषा इति वाक्यमेवानभिधानात्)

२०९. **सूपादेरुपसिक्ते: ।**

तेनोपसिक्त इत्यर्थे टिकण् स्यात् । सौपिकः, सार्पिष्कः, दाधिकः ।

२१०. **ओजःसहोऽम्भसो वर्त्तते ।**

एभ्यस्तेन वर्त्तते इत्यर्थे टिकण् स्यात् । ओजसा वर्त्ततेः, औजसिकः, साहसिकः, आम्भसिकः ।

२११. **चरति ।**

तेन चरतीत्यर्थे टिकण् स्यात् । शाकटिकः, हास्तिकः, दाधिकः ।

२१२. **अश्वादिभ्यष्टिकः ।**

अश्वेन चरति अश्विकः, रथिकः ।

२१३. **श्वगणाद् वा ।**

श्वगणिकः, (श्वागणः) श्वागणिका वा । तेनेति निवृत्तम् ।

२१४. **तदाहेति माशब्दादेः ।**

एभ्यस्तदाहेत्यर्थे टिकण् स्यात् । माशब्दमाह माशब्दिकः, कार्य्यशब्दिकः, नैत्यशब्दिकः, पार्याप्तिकः, प्राभृतिकः ।

---

२०६. अत्र चूर्णादीनिरिति वक्तव्यम् । चूर्णेन संसृष्टाश्च चूर्णिनोऽपूपाः । मत्वर्थीयेन सिद्धमित्यन्ये । टिकण्बाधनार्थमयमारम्भः ।

२०९. इह सूपादीनि व्यञ्जनान्येव गृह्यन्ते, तेनोदकेनोपसिक्तमन्नमिह न स्यात् । चान्द्रास्तु संसृष्टोपसृष्टयोरभिन्नार्थत्वमित्याहुः ।

२१५. **धर्म्मादिभ्यश्चरति ।**

एभ्यस्तच्चरतीत्यर्थे टिकण् स्यात् । धार्म्मिकः साधुः, आधर्म्मिकश्चौरः, महानाम्नीव्रतं चरति महानाम्नकः, आदित्यव्रतिकः , गौदानिकः ।

२१६. **चातुर्मास्यादिन् च, यलोपश्च ।**

चातुर्मास्यं व्रतञ्चरति चातुर्म्मासी चातुर्म्मासिकः ।

२१७. **देवव्रतादेश्च ।**

इन् स्यात् । देवव्रती, तिलव्रती, अवान्तरदीक्षी ।

२१८. **प्रदीपादेर्व्वर्त्तते ।**

एभ्यस्तद्वर्त्तते इत्यर्थे टिकण् स्यात् । प्रतीपं क्रियाविशेषणं वा प्रातीपिकम्, आन्वीपिकम्, प्रातिकूलिकः, परिमुखं वर्त्तते पारिमुखिकः सेवकः, पारिपार्श्विकः । (आनुलोमिकः)

---

२१५. चरिरिह सेवार्थे । अधार्मिकः । नञ्समासे आधार्म्मिकः तदिति द्वितीयान्तस्य धर्म्यमिति यावद्वर्त्तते । महानाम्नीनामृचां व्रतञ्चरति महानाम्नीकः । किञ्च महानाम्न्या देवस्य ब्रह्मचर्य इति क्रमदीश्वरसूत्रे महानाम्नीनामृचां ब्रह्मचर्यं महानाम्नीक इति दृश्यते इति मिश्रः । तदस्य ब्रह्मचर्य्यमिति महानाम्न्यादिभ्य उपसङ्ख्यानं कर्त्तव्यम् । महानाम्नीनां ब्रह्मचर्य्यं महानाम्नीकम् । तच्चरतीति च महानाम्न्यादिभ्य उपसंख्यानं कर्त्तव्यम् । महानाम्नीम्चरति महानाम्नीकः । आदित्यव्रतिकः । नैषयुक्तो निर्देशस्तच्चरतीति महानाम्न्यो नामर्च्चो न च ताश्चर्य्यन्ते । नैष दोषः । साहचर्य्यात्ताच्छब्दस्यम् भविष्यति । महानाम्नीसहचरितं व्रतं महानाम्नो व्रतमिति भाष्यम् । महानाम्न्यादिभ्य उपसङ्ख्यानम् । महानाम्नीया विद्या मधवन्नित्याद्या ऋचस्तासाँ ब्रह्मचर्यमस्य महानाम्निकः । हरदत्तस्तु भस्याढ़ेय इति पुंवद्भावान्माहानामिकः इत्याहः इति भट्टोजिदीक्षितः । नानारूपत्वमत्र सुधीभिर्विचार्य्यम् ।

२१६. चतुर्षु मासेषु भवश्चातुर्म्मासास्योद् यज्ञः, चतुर्मासाद् यज्ञ इति इति ण्यः । चातुर्मास्ययज्ञसहचरितव्रतं चातुर्मास्यमुच्यते इत्याह इत्याह चातुर्म्मास्यं व्रतमिति । तस्मादिन् यलोपश्चेति । अतएव ज्ञापकात् तत्र इकारे ह्यनापत्यस्येत्याद्युक्तम् ।

२१८. अत्र प्रतीपादयः क्रियाविशेषणानि । तथाह्यत्रैव पुरुषोत्तमः । क्रियायासाध्यत्वे तद्विशेषणानामपि साध्यत्वात् कर्म्मणि द्वितीया । क्रियायाश्चासत्त्वभूतत्वात् सामान्यलिङ्गेन विना विशेषस्य निर्देशं कर्त्तुमशक्यत्वान्नपुंसकलिङ्गेति न्याय इत्याह तां प्रातिकूलिकीं मत्वा जिहीर्षुर्भीमविग्रह इति भट्टिः । आनुकूलीकतयेति माघः ।

२१९. पृच्छति सुस्नातादेः ।

एभ्यस्तत्पृच्छतीत्यर्थे टिकण् स्यात् । सौस्नातिकः, सौखरात्रिकः ।

२२०. गृह्णाति द्विगुणादेः ।

एभ्तस्तद्गृह्णातीत्यर्थे टिकण् स्यात् । द्विगुणं गृह्णाति द्वैगुणिकः । वृद्धेर्वृधूषश्च, वार्धुषिकः, इण् चात्र दृश्यते वार्धूषिः । प्रातिकण्ठिको वल्लभः, आर्थिकः, लालाटिकः लालामिकः । पदान्तात् । प्रातिपदिकम्, पौर्व्वपदिकम्, औत्तरपदिकम् ।

२२१. कुसी (शी) द दशैकादशाट्टिकः ।

कुसीदिकः, दशभिरेकादशं गृह्णाति दशैकादशिकः ।

२२२. उञ्छति रक्षति ।

तदुञ्छति तद्रक्षति इत्यर्थयोष्टिकण् स्यात्, शाकानुञ्छति शाकिकः, बादरिकः समाजं रक्षति सामाजिकः, सांन्निवेशिकः ।

२२३. पशु-पक्षि-मत्स्यार्थेभ्यो हन्ति ।

एभ्यस्तद्धन्तीत्यर्थे टिकण् स्यात् । मृगं हन्ति मार्गिकः, शौकरिकः, हारिणिकः, खाड्गिकः । पक्षि-मत्स्यार्थात्—पाक्षिकः, शाकुनिकः, मात्स्यिकः, मैनिकः ।

---

२२०. ननु प्रयच्छति गर्ह्यमिति सूत्रेण प्रयच्छत्यर्थे प्रत्ययो विहितः, तत्कथमन्येन गृह्णात्यर्थे विहितः ? सत्यम्, यो हि गर्ह्यं द्विगुणाद्यर्थं प्रयच्छति स द्विगुणाद्यं गृह्णात्येवेति नार्थभेदः । अतएव गृह्णात्यर्थे गार्ह्यञ्चेति सूत्रितमन्यैः । यत्तु गर्ह्यमित्युक्तं तदप्यभिधानात् समर्थनीयम् । किन्तु पदोत्तरपदप्रतिकण्ठार्थ ललाटललाममन्तरेणेति वृद्धेर्वृधुषश्चेति वृद्धेष्टिकण् गृह्णात्यर्थेवंधुष आदिश्यते च, यद्यपि वृद्धितुल्यार्थो वृधुषिशब्दोऽप्यस्ति तथापि वृद्धिशब्दस्य-रूपबाधनार्थमिदम् । इण् चात्र दृश्यत इति ज्ञेयम्, शिष्टप्रयोगत इति । तथाच कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिरित्यमरः । प्रातिकण्ठिक इत्याभिमुख्योऽव्ययीभावः । ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेषु वर्त्तते । पदान्तादिति पदोत्तरपदादित्यर्थः ।

२२१. कुशीदं गर्ह्यं गृह्णातीत्यर्थः । कुशीदशब्दो दन्त्यतालव्यः । कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदम् । अत्र दशशब्दो दशार्थे वर्त्तते, एकादशब्द एकादशार्थः । ततो दश च एकादशचेति कर्म्मधारयः, दशैकादशाच्चेति निर्देशाददन्तता । पाणिनीयाः प्रयच्छतीत्यर्थे एकादशार्था दश एकादशशब्देनोच्यत इत्याहुः ।

२२४. **परिपन्थादुत्तिष्ठति च।**

परिपन्थ इति निपातनम्, तदुत्तिष्ठति हन्ति वा, पारिपन्थिकश्चौरः। परिपन्थी रिपौ निपात्यते।

२२५. **पारायणादेर्व्वर्त्तयति।**

एभ्यस्तद्वर्त्तयतीत्यर्थे टिकण् स्यात्। पारायणिकः, तौरायणिकः, चान्द्रायणिकः। तदन्ताच्च, द्वैपारायणिकः।

२२६. **पदव्यादेर्धावति।**

एभ्यस्तद्धावतीत्यर्थे टिकण् स्यात्। पदवीं धावति पादविकः, अनुपदिकः, आक्रन्दिकः,। * माथान्तात्। शौल्कमाथिकः, दाण्डमाथिकः।

२२७. **शब्ददर्दुरात् करोति।**

आभ्यां तत्करोतीत्यर्थे टिकण् स्यात्। शाब्दिकः, पादविकः, कुलालः।

२२८. **समवैति समवायादेः।**

एभ्यस्तत्समवैति इत्यर्थे टिकण् स्यात्। सामवायिकः, सामूहिकः, सामाजिकः, सामुदायिकः।

२२९. **परिषदो ण्यः।**

परिषदं समवैति पारिषद्यः।

२३०. **सेनाया वा।**

सेनां समवैति सैन्यः, सैनिकः।

२३१. **संज्ञायां ललाटकुक्कुटीभ्यां पश्यति।**

आभ्यां तत्पश्यतीत्यर्थे टिकण् स्यात्। यो हि कार्याक्षमः प्रभोर्ललाटमात्रे पश्यति स लालाटिकः, यो हि कुक्कुटीं दन्तचर्यां कुक्कुटीपातयोग्यमुदरदेशं वा पश्यति स कौक्कुटिकः, दान्तिको भिक्षुकश्च।

---

२२७. स्वरूपस्य पर्य्यायाणां विशेषाणाञ्च ग्रहणम्, मत्स्यपर्यायेषु मीनस्यैव।

२२८. समवायः समूहस्तत् समवैति सामवायिकः तदेकदेशीभवतीत्यर्थः। समूहात् समवैतीति सूत्रात् समूहार्थः समवायादिः।

२३१. अर्थनियमश्चात्र संज्ञा न रूढ़िरिति पुरुषोत्तमः। यः प्रभोर्ललाटमात्रमेव पश्यति स कार्य्येषु व्याप्रियते स लालाटिकः कार्य्याक्षमः सेवकादिः, ईश्वर-

२३२. **योजनादिभ्यो गच्छति ।**

एभ्यस्तद्गच्छतीत्यर्थे टिकण् स्यात् । योजनिकः, यौजनशतिकः, क्रौशिकः, पारदारिकः, गौरुतल्पिकः ।

२३३. **प्रतिपथादिकश्च ।**

प्रतिपथं गच्छति प्रातिपाथिकः, प्रतिपथिकश्च ।

२३४. **पथष्टिकः ।**

पन्थानं गच्छति पथिकः, पथिकी ।

२३५. **णः पन्थ च ।**

पथो णः स्यात्, पन्थादेश्च पान्थः, पान्था स्त्री ।

२३६. **उत्तरादिपूर्व्वात् पथस्तेनाहृतञ्च ।**

टिकण् स्यात् । उत्तरपथेनाहृतं गच्छति वा । औत्तरपथिकम्, जाङ्गलपथिकम्, शाङ्कुपथिकम्, आजपथिकम्, वारिपथिकम् ।

२३७. **स्थलवारिभ्यां मधुकमरीचयोरण् ।**

स्थालपथम्, वारिपथम् । (मधुकपथम्, मरीचपथम्)

२३८. **तस्य धर्म्म्यम् ।**

अत्रार्थे टिकण् स्यात । शुल्कस्य धर्म्माचारः शौल्किकः, आपाणिकः, सपत्न्या-धर्म्यं सापत्निकः ।

२३९. **होत्रादेरण् ।**

होतुर्धर्म्यं होत्रम्, औद्गात्रम्, महिष्या धर्म्यं माहिष्यम्, पौरोहितम्, प्राजापतम् ।

कोप-प्रसादचिह्ननिरीक्षणाय ललाटदर्शनात्तद्भावदर्शी वेति लालाटिक-कौक्कुटिकाविति निपातनादुभयमेव चान्द्रैरिष्टम् । कुक्कुटचनृत्यचर्य्या स्यादिति हारावली । मिथ्याचर्य्यापक्षे पश्यत्याचरतीत्यर्थः । परत्र कुक्कुटीशब्देन कुक्कुटीपातयोग्यदेशो लक्ष्यते, तेनायमर्थः, यत्र वा विक्षिप्तमुष्टिः कुक्कुटीपात-योग्यमल्पदेशं स्वपत्रमात्रं चक्षुः संयम्य पश्यन् गच्छति स कौक्कुटिकस्त-पस्व्यादिः ।

२३९. तस्य धर्म्यमित्यर्थे होत्रादेरण् स्यात् । ऋदन्तात् प्रायः पोत्रं मूल्यमपि धर्म्यमुप-चर्यते । महिष्यधर्म्यं माहिषं मूल्यम् । तस्य मूल्य इति सूत्रं क्रमदीश्वरश्चकारः ।

२४०. **विशसितुर्विशस्तृच ।**

वैशस्त्रम् ।

२४१. **विभाजयितुर्णिलोपश्च ।**

वैभाजित्रम् ।

२४२. **तदस्य पण्यम् ।**

अत्रार्थे टिकण् स्यात् । मोदकः प्रण्यमस्य मौदकिकः, लावणिकः, आपूपिकः ।

२४३. **किसरादेष्टिकः ।**

किसरं गन्धद्रव्यं पण्यमस्य किसरिकः, औषीरिकः ।

२४४. **शलालुनो वा ।**

शालालुकः, शलालुको वा ।

२४५. **शिल्पम् ।**

तदस्य शिल्पमित्यर्थे टिकण् स्यात् । मृदङ्गवादनं शिल्पमस्य मार्दाङ्गिकः वैणवात्—वैणविकः, वांशिकः ।

२४६. **वाऽण् मण्डूकझर्जरात् ।**

अण् वा स्यात् । मड्डूकवादनं शिल्पमस्य माड्डूको माड्डूकिको वा । झार्झरो झार्झरिको वा ।

२४७. **प्रहरणम् ।**

तदस्य प्रहरणमित्यर्थे टिकण् । असिः प्रहरणमस्य आसिकः, प्रासिकः, चाक्रिकः, धानुष्कः, पारश्वधिकः ।

२४८. **शक्तियष्टिभ्यां टीकण् ।**

शक्तीकः, शाक्तीकी, याष्टीकः, याष्टीकी ।

अवक्रय इति मुनिः प्रणिनाय । तस्यावक्रयः पारिभाषिकं मूल्यमित्यर्थे टिकण् स्यात् । नायमेकान्तधर्म्योऽवक्रयः, शुल्कशालादावनियतरूप-नियतकालमादीयते, स उच्यते शुल्कशालाया अवक्रयः शौल्कशालकः, आपणिकः । महिष्यादिभ्योऽणिति सूत्रे महिषी प्रजापति प्रजावती प्रलेपिका अनुलेपिका विलेपिका पुरोहित मणिपालि अनुचारक होतृ यजमान इत्यजीगणत् अथ नुर्नरस्य वा धर्म्यं नारम् ।

२४९. **अस्ति-नास्ति-दिष्टान्मतिः ।**

एभ्य साऽस्य मतिरित्यर्थे टिकण् स्यात् । परलोकः अस्तीति मतिरस्य आस्तिकः (नास्तीति मतिरस्य नास्तिकः, दिष्टमिति मतिरस्य दैष्टिकः) प्रामाणिक इत्यर्थः ।

२५०. **शीलम् ।**

तदस्य शीलमित्यर्थे टिकण् स्यात् ।

२५१. **छत्त्रादिभ्यो णः ।**

गुरुदोषाच्छादनं छत्रम्, तच्छीलमस्य छात्रः, छात्रा स्त्री, शैक्षः, तापसः ।

२५२. **कर्माध्ययने वृत्तम् ।**

अत्रार्थे यथाविहितं स्यात् । एकमन्यदध्ययनेऽपपाठ लक्षणं कर्म्म वृत्तमस्य ऐकान्यिकः, द्वैयन्यिकः, । ऐकरूपिकः । ऐकग्रन्थिकः

२५३. **बह्वच् पूर्वपदादिकः ।**

द्वादशान्यिकः, त्रयोदशग्रन्थिकः ।

२५४. **तदस्मै दीयते नियुक्तम् ।**

अत्रार्थे टिकण् स्यात् । अग्रभोजनं नियुक्तस्मै दीयते, आग्रेभोजनिकः । प्राथमकल्पिकः, श्राणिकः । माँसिकः, मांसौदनिकः । भक्तादण् च । भाक्तः, भाक्तिकः ।

२५५. **ओदनाट्टिकः ।**

ओदनं नियुक्तमस्मै दीयते ओदनिकः ।

२५६. **हितं भक्षात् ।**

तदस्मै हितमित्यर्थे भक्षात् टिकण् स्यात् । अपूपा हितमस्मै आपूपिकः, भौदगिकः ।

२५७. **तत्र नियुक्तः ।**

अत्रार्थे टिकण् स्यात् । द्वारे नियुक्तो दौवारिकः, शौल्किकः, आगारिकः ।

---

२५५. श्राणा मांसौदनादिति मुनिमतमवगत्य कथमित्युक्तम्, तत् किमिति चेत् ? श्राणिकभार्य इत्यनिष्टं स्यात् । टिकणि पुंवद्भावप्रसक्तेः? नैवम्, कोपधत्वादपि तथा स्यात् । तस्माद्वैचित्र्यार्थमेवाचिन्तयत् ।

२५६. हितयोगलभ्या चतुर्थी, श्रीपतिना तु हितयोगे षष्ठ्यपीष्टा ।

२५८. आगारान्तादिकः ।

देवागारिकः, भाण्डागारिकः ।

२५९. ऐकागारिकश्चौरः ।

निपात्यते, ऐकागारिकश्चौरः, ऐकागारिकौ ।

२६०. अधीतेऽदेशकालात् ।

तत्राधीत इत्यर्थे निषिद्धदेशकालाट्टिकण् स्यात् । श्मशानिकः, चातुष्पथिकः, त्रायोदशिकः । चातुर्द्दशिकः, आष्टमिकः ।

२६१. व्यवहरति कठिनान्तादेः ।

एभ्यस्तत्र व्यवहरतीत्यर्थे टिकण् स्यात् । वंशकठिने व्यवहरति वांशकठिनिकः, प्रास्ताविकः, प्रास्थानिकः, सांस्थानिकः ।

२६२. वसत्यावसथादेः ।

एभ्यस्तत्रवसतीत्यर्थे टिकण् स्यात् । आवसथिकः, नैकटिकम्, शासनिकम्, वार्क्षमूलिकः ।

२६३. लोक-सर्व्वलोक-वेदात् ख्याते ।

एभ्यस्तत्र ख्यात इत्यर्थे टिकण् स्यात् । लौकिकः, सार्व्वलौकिकः, वैदिकः ।

२६४. तदस्मै प्रभवति सन्तापादेः ।

एभ्योऽत्रार्थे टिकण् स्यात् । सन्तापाय प्रभवति सान्तापिकः । सांग्रामिकः ।

२६५. योगाद् यच्च ।

योग्यो यौगिकः ।

२६६. कर्म्मण उकण् ।

कर्म्मणे प्रभवति कार्म्मुकं धनुः ।

२६७. समयात्तदस्य प्राप्तम् ।

अत्रार्थे समयाट्टिकण् स्यात्, समयः प्राप्तोऽस्य सामयिकम् ।

---

२६०. देशश्च कालश्च देशकालम्, ततो नञ् समासः । तेन देशकालयोर्निषिद्धत्वमध्ययनविषयकमभिधीयते । आह (च) निषिद्धदेशकालादिति । श्माशानिक इति नाधीयते श्मशानान्ते—

अमावस्या गुरुं हन्ति, शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टमीका पौर्णमास्यौ, तस्मात्ताः परिवर्जयेदिति **मनुः** ।

२६२. वांशकठिनिकः । वंशा वैणवः कठिनाः । यस्मिन्देशे स वंशकठिनस्तस्मिन् देशे या क्रिया यथानुष्ठेया तान्थैवानुतिष्ठतीत्यर्थं ।

२६८. **ऋतोरण् ।**

ऋतुः प्राप्तोऽस्य आर्त्तवं पुष्पम् ।

२६९. **कालाद् यः ।**

कालः प्राप्तोऽस्य काल्यः ।

२७०. **विप्रकृष्टार्थे टिकण् ।**

विप्रकृष्टः कालोऽस्य (प्राप्तः) कालिकमृणम् ।

२७१. **संशयात्तमापन्ने ।**

टिकण् स्यात् । संशयमापन्नः सांशयिकः ।

२७२. **अकालादनियतकालवचने ।**

अनियतः कालोऽस्य तस्मिन् वाच्ये अकालाट्टिकण् स्यात् । आकालिको मेघः । आकालिकीं वीक्ष्य मधुप्रवृत्तिमिति कुमारः । * इकटिकौ च । अकालिका, अकालिकी, आकालिकी ।

२७३. **तदस्य प्रयोजनम् ।**

अत्रार्थे टिकण् स्यात् । उत्सवः प्रयोजनमस्य औत्सविकः, ऐन्द्रमहिकम् ।

२७४. **अनुप्रवचनादीयः ।**

अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम्, उत्थापनीयम् ।

२७५. **प्रवेशन-समापनारोहण-पूरण-प्रपतनेभ्यः सपूर्वपदेभ्यः ।**

गेहप्रवेशनीयम्, कलहसमापनीयं दानम् । अश्वारोहणीयम्, प्रपापूरणीयम्, अश्वप्रपतनीयम् ।

२७६. **स्वर्गादिभ्यो यः ।**

स्वर्गं प्रयोजनमस्य स्वर्ग्यम्, यशस्यम्, आयुष्यम्, वल्यम्, वृष्यम् ।

२७७. **वैशाखो मन्थे । आषाढो व्रतिनां दण्डे ।**

अणन्तौ द्वौ निपात्येते ।

२७८. **आहर्हात् ।**

तदर्हतीति पर्यन्तं येऽर्थास्तेषु इतस्त्यो विधिर्बोद्धव्यः, टिकण्णनुवर्त्तत एव ।

---

२६८. उपवस्तृप्राशितृभ्याञ्चवक्तव्यम् । उपवस्ता प्राप्तोऽस्य औपवस्त्रम्, एवं प्राशित्रम् । तथाहि उपवस्तृ तु प्राशितृभ्यष्टणिति वासवत सूत्रम् ।

२७१. संशयशब्दः संशयविषयत्वे लाक्षणिकोऽतः सन्दिह्यमानेऽस्य प्रवृत्तिर्नतु सन्दिहाने अतः प्रामाण्यं न स्वतो ग्राह्यं सांशयिकत्वादिति प्राचीनोक्तिः ।

२७८. अर्हा इति क्रीतं निमित्तं ईश्वरः विदितः वापः तदस्मिन् अस्मै च तद्वहति उत्पादयति सम्भवति संहरति, पचति तदस्य तदर्हतीति एष्वितस्त्यो विधिर्बोद्धव्यः, संयोगः, उत्पातः, शमनं, कोपनं, परिमाणं, अंशः भृतिः, मूल्यम् । अतः संख्यापूर्व्यादपि विधिः, तेनान्यपत्र तदत्तविनिधास्तीति ।

२७९. संख्याया अ-ति-शदन्तायाः कः । डतेश्च ।

आर्हीये क्रीताद्यर्थे संख्यायाः कः स्यात् । द्विकः, त्रिकः, पञ्चकः, बहुकः, गणकः, डतेः प्रतिषेधापवादः, कतिकः । अ-ति-शदन्ताया इति किम् ? वैंशतिकः, साप्ततिकः, पाञ्चाशत्कः ।

२८०. डावतोरिकश्च ।

डावत्वन्तसंख्याया इकः स्यात् । कश्च, तावतिकः, तावत्कः, विशेषविधानादिकः को न स्यात् ।

२८१. विंशतित्रिंशद्भ्यां वा ।

आभ्यामार्हीये को वा स्यात् । पक्षे टिकण् च । विंशतिकः, वैंशतिको वा त्रिंशत्कः, त्रैंशतिकः ।

२८२. डकोऽसंज्ञायाम् ।

विंशकः, त्रिंशकः ।

२८३. शतादिकयतावशतेः ।

आर्हीयेऽर्थे शतशब्दादिकयतौ स्याताम् । कस्यापवादः । शतिकोऽश्वः, शत्यः । अशत इति किम् ? शतं परिमाणमस्य शतकं स्त्रोत्रम्, शतमेव ।

२८४. अर्द्धकंसाभ्यां टिकः ।

अर्द्धिकम्, अर्द्धिकी, कंसिकः पटः ।

२८५. कार्षापणाद्वा प्रतिश्चास्य ।

टिको वा, प्रत्यादेशश्च । प्रतिकः, पक्षे टिकण्-कार्षापणिकः ।

२८६. शतमान विंशतिकःसहस्र-वसनादण् ।

एभ्य आर्हीयेऽण् स्यान् । शातमानम्, वैंशतिकम्, साहस्रम्, वासनम् ।

२८७. सूर्पाद् वा ।

सौर्पम् । सौर्पिकं वा ।

---

२८४. आभ्यामार्हीये टिकः स्यात् । चतुषष्टिपलैः कंस आढ़को भाजनं त्रयम् । चतुर्भिराढकैर्द्रोणस्ताभ्यां सूर्पश्च गोणिका । द्विसूर्पा खारिका चैव विद्वद्-भिरभिधीयते ।

२८८. **द्विगोरध्यर्द्धपूर्व्वाच्च लुगसंज्ञायाम् ।**

आभ्यामार्हीयस्य लुक् वा स्यात् । द्वाभ्यां कसाभ्यां क्रीतं द्विकंसम्, त्रिकंसम्, अध्यर्द्धकंसम् । असंज्ञायामिति किम् ? पाञ्चलौहितिकः पटः ।

२८९. **सहस्रकार्षापण-सुवर्ण-शतमानाद् वा ।**

लुग्वास्यात् । द्विसहस्रम्, द्विसाहस्रम् द्रव्यम्, द्विकार्षापणम्, द्विकार्षाणिकम्, द्विसुवर्णम्, द्विसौवर्णिकम्, द्विशतमानम्, द्विशातमानम् । परिमाणस्यशाणस्तत्युत्तरपद वृद्धिः । एवं अध्यर्धसहस्रम्, अध्यर्द्धसाहस्रम् । अध्यर्द्धसुवर्णम्, अध्यर्द्धसौवर्णिकम् ।

२९०. **द्वि-त्रिबहुपूर्व्वाद् बिस्तनिष्कात् ।**

लुग्वा स्यात् । द्वाभ्यां बिस्ताभ्यां क्रीतं द्विबिस्तम्, द्विबैस्तिकम्, बहुबिस्तम्, बहुबैस्तिकम्, एथं द्विनिष्कम्, द्विनैष्किकम्, त्रिनिष्कम्, त्रिनैष्किकम् ।

२९१. **विंशतिकादीनः ।**

अस्मादार्हीयस्य लुग्विषये ईनः स्यात् । द्विविंशतिकीनम् । अध्यर्द्धविंशतिकीनम्

२९२. **खारीकाकणीभ्यामोकः केवलाभ्याञ्च ।**

द्विखारीकम्, अध्यर्द्धखारीकम्, खारीकञ्च । द्विकाकिणीकम् । अध्यर्द्धकाकिणीकम् । काकिणीकञ्च ।

२९३. **पणपादमाषाद्यः ।**

द्विपण्यम्, द्विपाद्यम्, द्विमाष्यम्, अध्यर्द्धपण्यम्, अध्यर्द्धपाद्यम् । द्विग्वादेरित्येव, पाणिकः, माषिकः, टिकण् ।

२९४. **शताद् वा ।**

द्विशत्यम् । लुक् च, द्विशतम्, द्विशती, अध्यर्द्धशत्यम्, अध्यर्द्धशतं वा ।

२९५. **शाणाच्च ।**

द्विशाण्यम् । टिकण्लुकि—द्विशाण्यं द्विशाणं वा, अध्यर्द्धशाण्यम्, अध्यर्द्धशाणं वा ।

२९६. **द्वित्रिपूर्व्वादण् च ।**

द्वैशाणम्, त्रैशाणम् ।

२९७. **तेन क्रीतम् ।**

अत्रार्थे यथाविहितं टिकणादयः स्युः । निष्केण क्रीतं नैष्किम्, साप्ततिकम्, द्विकम्, त्रिकम्, शतिकम्, शत्यम्, द्विपाद्यम्, अध्यर्द्धमाष्यम् ।

२९८. **तस्य निमित्तं संयोगात्पातौ ।**

अत्रार्थे यथाविहितं टिकणादि स्यात् । शतस्य निमित्तमधर्मेण संयोगः शातिक, शत्यः, द्विशत्यः, द्विशतिकः । सहस्रस्य निमित्तमक्षिस्पन्दनमुत्पातः साहस्रम् । (इद्गोंण्याः । पञ्चगोणिः)

२९९. **गोद्व्यचोऽसंख्या-परिमाणाश्वादेर्यत् ।**

टिकणादेर्बाधा । गोनिमित्तं संयोग उत्पातो वा गव्यः । द्व्यचः—स्वर्ग्यः, धन्यः, यशस्यः, आयुष्यः । असंख्यादेरिति किम् ? पञ्चानां निमित्तम्, प्रास्थिकः । अश्वादेः—आश्विकम्, हास्तिकम् ।

३००. **ब्रह्मवर्च्चसाच्च ।**

यत् स्यात् । ब्रह्मवर्चसम् ।

३०१. **पुत्रादीयश्च ।**

यच्च । पुत्रस्य निमित्तं संयोग उत्पातो वा पुत्रीयः, पुत्र्यः ।

३०२. **तदीश्वर-तत्र विदितौ चेतण् पृथिवीसर्वभूमिभ्याम् ।**

आभ्यां निमित्ताद्यर्थेऽण् स्यात् । पृथिव्या निमित्तं संयोग उत्पातो वा, पृथिव्या ईश्वरो वा, पार्थिवः, एवं सार्वभौमः । अथ तदीश्वरस्तत्र विदितो वेति पृथग्योगः कर्तव्यः । तत्र यथाविहितं स्यात् । तेन भूमेरीश्वरो भूमौ विदितो वा भौमिकः, वेदे विदितो वैदिकः ।

---

२९७. तेन क्रीतमित्यर्थे तृतीयान्ताद् क्रयणात् मूल्यादिति यावत् टिकण्, यत् ईय इक अण् क ईन अक टिक उक ईक इत्येकादश प्रत्ययाः यथास्वं स्युः । अत्र करणञ्चेत् मूल्यञ्चेद्विवक्षितम्, तेन देवदत्तेन क्रीतम्, पाणिना क्रीतमित्यादौ न स्यात् । किञ्च वृत्तौ संख्याविशेषाप्रतीतेर्द्विवचनबहुवचनाभ्यां प्रत्ययो नेष्यते । यत्र तु तत्प्रतीतिस्तत्र स्यादेव । यथा द्विकः, बहुकः, तथा मुद्गैः क्रीतं मौद्गिकम् । तदेकत्वे न सम्भवतीति विशेषप्रतीतिः ।

३०३. **तच्छमन-कोपन-वात-पित्त-श्लेष्मसन्निपातेभ्यः ।**

अत्रार्थे वातादेष्टिकण् स्यात् । वातस्य शमनं कोपनं वा वातिकम् । पैत्तिकम्, श्लैष्मिकम्, सान्निपातिकम् ।

३०४. **तस्य वापः ।**

अत्रार्थे यथाविहितं टिकणादयः स्युः । उप्यतेऽस्मिन्निति वापः, प्रस्यस्य वापः क्षेत्रं प्रास्थिकम् । द्रौपिणकम्, पात्रिकं, क्षेत्रम् । पात्रिकी भूः, खारीकम् ।

३०५. **तदस्मिन्नस्मै च वृद्ध्यायलाभोपदाशुल्कं दीयते ।**

अत्रार्थे यथाविहितं स्यात् । पञ्चास्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा दीयते, पञ्चको विप्रः शतिकः ।

३०६. **पूर्णार्द्धादिकः ।**

द्वितीयं वृद्ध्यादिकमस्मिन्नस्मै वा दीयते, द्वितीयिकः । पञ्चमिकः, षोड़शिकः, अर्द्धिकः ।

३०७. **भागाद्यच्च ।**

इकश्च । भागो वृद्ध्यादिरस्मिन्नस्मै वा दीयते भाग्यम्, भागिकञ्च ।

३०८. **तद्धरति वहत्युत्पादयति वंशादेस्तदादिभाराच्च ।**

एभ्यस्तद्धरत्याद्यर्थेषु टिकण् स्यात् । वंशं हरति वहति उत्पादयति वा वांशिकः । वाल्वजिकः, कौटजिकः । वंशदिपूर्व्वभाराच्च—वांशभारिकः । वाल्वजभारिकः ।

३०९. **द्रव्यात् कः ।**

द्रव्यं हरति द्रव्यकः ।

३१०. **वस्नादिकः ।**

वस्निकः ।

---

३०२. चकारस्तस्य निमित्तं संयोगोत्पातावित्यस्य समुच्चयार्थः । लक्षणानुरोधात् लक्षणपार्थक्यमङ्गीकरोत्यथेति ।

३०४. ननु पात्रात् ष्टन्, इति सूत्रं वक्तव्यम् नेत्याह पात्रिकमिति । ननु पात्रिकभूमिर्वृषल इत्यत्र वृद्धिहेतोः (४।४।३४) इति पुंवद्भावनिषेधः कथं न स्यादिति चेत् । पाकादित्वात् पुंवत् ।

३०६. अर्ध-भाग शब्दौ रूपकस्यार्द्धे रूढ़ौ वेदितव्यौ ।

३११. सम्भवति संहरति पचति प्रस्थादेः ।

एभ्यः सम्भवतीत्याद्यर्थेषु टिकणादयः स्युः । प्रमाणादनतिरेकः सम्भवः । प्रस्थं सम्भवति संहरति पचति वा प्रास्थिकः कटाहः । खारीकः । कौड़विकः ।

३१२. पचतौ द्रोणादण् च ।

द्रोणं पचति द्रौणम्, द्रौणिकः ।

३१३. वाढ़काचितपात्रादीनः ।

पक्षे टिकण् । आढकं सम्भवति संहरति पचति वा आढ़कीना, आढकिकी स्थाली । आचितीना, आचितिकी । पात्रीणा पात्रिकी ।

३१४. टिकश्च द्विगौ ।

ईनश्च । द्वे आढ़के सम्भवति संहरति पचति वा, द्व्याढ़किकी द्व्याढ़कीना वा । पुर्नविधानसामर्थ्याद् द्विगोर्लुक् न भवति । टिकणस्तु लुगेव, द्व्याढ़की ।

३१५. अंश-भृति-मूल्यं तदस्य ।

इत्यर्थे यथा विहितं स्यात् । शतमंशा भृतयोर्मूल्यं वाऽस्य शतिकः, शत्यः, पञ्चकः ।

३१६. (तदस्य) परिमाणम् ।

तदस्य परिमाणमित्यर्थे यथाप्राप्तं स्यात् । प्रस्थः परिमाणमस्य प्रास्थिको राशिः । द्रौणिकः, खारिकः । शतिकः । वार्षशतिको रोगः । षष्टिजीवितपरिमाणमस्य षाष्टिकः । साप्ततिकः । इह द्वे षष्ठी परिमाणं जीवितमस्य द्विषष्टि जीवितम्, द्विगोर्लुक्, तदेव परिमाणमस्य पुनष्टिकण् द्विषाष्टिकः, अथवा द्व्यधिका षष्टिर्द्विषष्टिः, साऽस्य परिमाणम् । द्विषाष्टिकः । त्रिसाप्ततिकः ।

---

३११. आधेयस्य प्रमाणानतिरेकेण धारणं सम्भवः, अतिरेकेण धारणं संहारः संवरणार्थः, पाकः क्लेदनम् ।

३१४. कुलिजाच्चेति वक्तव्यम् । कुलिजान्ताद् द्विगौ पूर्वार्थे ईन-टिकौ वा स्याताम् । कुलिजः परिमाणभेदः । द्विकुलीनः द्विकुलिजिकी, पूर्ववत् ङी, टिकण्स्थितिमपि मन्यन्ते केचित्, द्वैकुलिजिकी । कुलिजाल्लुक्खाविति मुनिरपि प्रणिनाय (५।१।५५) पा० ।

३१६. जयादित्यमतमाह इहेति । द्विगोरध्यर्द्धपूर्व्वाच्चेति लुक् । तदस्येत्यर्थे निर्देशसामर्थ्यात् पुनष्टिकण् । अथामुं पक्षं गौरवपराहतं परिहरन्नाह अथवेति । द्विषाष्टिक इति संख्यायाः (५।१।११) इत्युत्तरपदवृद्धिः ।

३१७. संख्याया संज्ञा-सङ्घ-सूत्राध्ययनेषु ।

संख्यावाचिनः शब्दात् संज्ञादौ परिमाणार्थे यथाविहितं स्यात् । नाम्नि—पञ्चैव पञ्चकाः शकुनयः । पञ्च परिमाणमस्य पञ्चकः सङ्घः । अष्टाध्यायाः परिमाणमस्य अष्टकं पाणिनीयं सूत्रम् । पञ्चावृत्तयः परिमाणमस्य पञ्चकमध्ययनम् ।

३१८. पञ्चद्दशतौ वर्गे वा ।

निपात्येते । पञ्च परिमाणमस्य पञ्चद्वर्गः । दशद्वर्गः । पक्षे पञ्चको दशकः । पङ्क्ति विंशत्यादयः रूढाः सहस्रादिवत् । तथा च व्युत्पत्तिः । द्वौ पञ्चतौ पङ्क्तिः, द्वौ दशतौ विंशतिः, त्रयोदशतस्त्रिंशत् । एवं चत्वारिंशत् प्रभृतयः ।

३१९. तदर्हति ।

अत्रार्थे यथाविहितं स्यात् । छत्रमर्हति छात्रिकः शतिकः, शत्यः ।

३२०. छेदादेर्नित्यम् ।

नित्यमिति प्रकृत्यर्थविशेषणम् । नित्यं छेदमर्हति छैदिकश्छागः, भैदिकः ।

---

३१७. संज्ञायां स्वार्थे विधिरित्याह पञ्चेति । संख्यायाः (५।३।२१९) इति कः । एवं त्रिकः, शालङ्कायन इत्यादिः ।

३१८. सजातीयानां सङ्घातो वर्गस्तस्मिन् वाच्ये इत्यर्थः । अत्र तु प्रत्ययो निपात्यते । तथाहि पञ्चदशाभ्यां तौ वेति क्रमदीश्वरः प्रणिनायः । ननु पंक्ति विंशति त्रिचत्वारिंशत् पञ्चाशत् षष्टि सप्तत्यशीति नवति शतमिति सूत्रं मुनिना निपातितम्, तत्र वक्तव्यमित्याह पंक्तिविंशत्यादयो रूढाः सहस्रादिवदिति । तथा च भाष्यम्,—अनारम्भो वाऽस्य प्रातिपदिकज्ञानात् सहस्रादिष्विति । अवनौ पञ्चयतेः क्तिनि पंक्तिः, पञ्चाक्षरदशाक्षरपादच्छन्दसी उपचारात् । एवं स्तोमे डट् । अस्यार्थः संख्याया परिमाणे डट् स्यात् स्तोमे परिमाणिनि वाच्ये । ऋणादीनां समूह इह स्तोमः, पञ्चदशमात्रा परिमाणमस्य पञ्चदश स्तोमः । तथा त्रिंशच्चत्वारिंशतो ब्राह्मणसंख्यायां डण् । अस्यार्थः, आभ्यां परिमाणेऽण् स्यात् । त्रिंशदध्यायाः परिमाणमेषां त्रिंशतानि ब्राह्मणानि । चत्वारिंशानि । भाषायाञ्चेद् बाहुल्यात् समर्थनीयम् ।

३१९. छत्रं नार्हत्यच्छात्रिकः इत्यसाक्षात् सम्बन्धेऽपि वृत्तिरिष्यते ।

३२०. ननु विकल्पने निवृत्ते किं नित्यमित्युक्तमित्याह नित्यमिति । छेदादेः क्रियात्वात् प्रकृत्यर्थोऽत्र क्रयार्थः । यद्वाहर्हे इत्यर्थः । नित्यमर्हतीत्यर्थे इति पुरुषोत्तमेन विवृतः ।

३२१. **शीर्षच्छेदनाद् यच्च ।**

टिकण् च । शीर्षच्छेद्यः, शैर्षच्छेदिको वा ।

३२२. **दण्डादिभ्यश्च ।**

यत् स्यात् । दण्डमर्हति दण्ड्यः, छेद्यः, कशामर्हति कश्यः, अर्घ्यः, स्वर्ग्यः, मधुपर्क्यः, वध्यः ।

३२३. **पात्रदियच्च ।**

पात्रमर्हति पात्रिकः, पात्र्यश्च ।

३२४. **स्थालीबिलादीयः ।**

स्थाली विलीयास्तण्डुलाः (स्थालीबिल्याः) पाकयोग्याः ।

३२५. **कड़(ङ्ग) स्कर-दक्षिणाद् यच्च ।**

ईयश्च । कड़ (ङ्ग) स्करमर्हति कड़ (ङ्ग) ड्य्यों गौः, कड़ (ङ्ग) करीयश्च, दक्षिण्यो दक्षिणीयः ।

३२६. **ऋत्विज ईनण् ।**

ऋत्विजमर्हति आर्त्विजीनं ब्राह्मणकुलम् ।

३२७. **यज्ञादियः ।**

यज्ञमर्हति यज्ञियो मृगः । *तत्कर्मार्हे च । यज्ञियो देशः । आर्हीयाः पूर्णाः ।

३२८. **तेन शोभि ।**

अत्रार्थे टिकण् स्यात् । चन्दनेन शोभि चान्दनिकं वपुः, कार्णवेष्टिकिकं मुखम् । वास्त्रयुग्मिकं शरीरम् ।

३२९. **कर्मवेशाद् यः ।**

कर्म्मणा शोभि कर्मण्यम् शरीरम् । वेशेण शोभिनी वेश्या स्त्री ।

३३०. **अयः शूल-दण्डाजिनाभ्यामन्विच्छति ।**

आभ्यां तेनान्विच्छतीत्यर्थे टिकण् स्यात् । अयःशूलेन तीक्ष्णेनान्विच्छति मृग्यति आयःशूलिकः साहसिकः, दाण्डाजिनिको दाण्डिकः ।

---

३२२. चानुकृष्टं न सर्व्वत्र (७६ परि०) इति टिकणो निवृत्तिः ।

३२९. धातुपारायण-धातुप्रदीपादौ विष्लृ व्याप्तावित्यस्य चिन्तितत्वादिह वेषो मूर्द्धन्यवानेव । नेपथ्ये तु तालव्यवानपि ।

३३१. **पार्श्वात् कः।**

पार्श्वेण अनृजुपायेनान्विच्छति पार्श्वकः शठः।

३३२. **उदरादविजिगीषौ।**

टिकण् स्यात्। उदरेणाविजिगीषुः औदरिकः।

३३३. **तस्य दक्षिणा यज्ञनाम्नः।**

अस्मात्तस्य दक्षिणेत्यर्थे टिकण् स्यात्। आग्निष्टोमिकी दक्षिणा, राजसूयिकी दक्षिणा।

३३४. **कालात्।**

अधिकारोऽयम्।

३३५. **तेन निवृत्तम्।**

अत्रार्थे कालवाचिनष्टिकण् स्यात्। अह्ना निर्वृत्तम्, आह्निकम्, मासिकम्। सांवत्सरिकम्, द्विसांवत्सरिकम्।

३३६. **तमधीष्टो-भृत-भूतो-भावी।**

अत्रार्थे टिकण् भवति। अधीष्टः गुर्वादेः प्रार्थनया नियोजनम्, साममधीष्टो भृतो भूतो भावी वा मासिको गुरुर्भृत्यो व्याधिरुत्सवः। एवं सांवत्सरिकः।

३३७. **मासाद्वयसि येनणौ।**

मासं (भृतो) भूतो (भावी वा) मास्यो दारकः, मासीनः, वयसीति किम्? मासिको भृतकः।

३३८. **द्विगोर्यः।**

द्वौ मासौ भृतो भावी वा द्विमास्यो बालः।

३३९. **षण्मासाण्ण्यश्च।**

वयसि यः, ण्यष्टिकण् च भवति। षण्मास्यः, षाण्मास्यः, षाण्मासिकः शिशुः।

३४०. **इकश्चावयसि।**

चात् ण्यः। षण्मासिको रोगः षाण्मास्यः।

३४१. **समाया ईनः ।**

अस्या निर्वृत्त्याद्यर्थे ईनः स्यात् । समया वर्षेण निर्वृत्तः, समाधीष्टा भृतो भूतो भावी वा समीनः ।

३४२. **द्विगोर्व्वा ।**

द्विसमीनः । टिकण्—द्वैसमिकः ।

३४३. **अहोरात्रि-संवत्सवराच्च ।**

द्विगोरीनष्टिकण् च निवृत्ताद्यर्थे स्यात् । द्व्यहीनः, द्वैयह्निकः । द्विरात्रीणः; द्वैरात्रिकः ।' द्विसंवत्सरीणः, द्विसांवत्सरिकः । अत्रोत्तरपदवृद्धिः ।

३४४. **वर्षाल्लुक् च ।**

द्विगोरीनटिकणौ स्याताम् । लुक् च । द्विवर्षीणो रोगः द्विवार्षिको, द्विवर्षश्च ।

३४५. **नित्यं प्राणिषु ।**

लुक् स्यात् । द्विवर्षो वत्सः ।

३४६. **षष्टिको व्रीहौ ।**

षष्टिरात्रेण पच्यते षष्टिको (माषः) नाम व्रीहिः ।

३४७. **तेन परिजय्य-लभ्य-कार्य्य-सुकरम् ।**

अत्रार्थे कालाट्टिकण् स्यात् । मासेन परिजय्यो मासिको व्याधिः, लभ्यं कार्य्यं सुकरं वा मासिकम्, सांवत्सरिकम् ।

३४८. **तदस्य ब्रह्मचर्य्यम् ।**

अत्रार्थे टिकण् स्यात् । मासं ब्रह्मचर्यमस्य मासिको माणवकः । मासमतिसंयोगे द्वितीया । तदिति प्रथमान्तञ्च, तेन मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यमिति ।

पूर्णष्टिकणधिकारः ।

३४९. **तत्र दीयते कार्य्यञ्च भववत् ।**

अनयोरर्थयोः कालात्तत्र भववत् प्रत्ययाः स्युः । मासे दीयते कार्य्यं वा मासिकम् । प्रावृषेण्यम् । हैमनम् । सायन्तनम् शैशिरम् ।

३५०. **व्युष्टादेरण ।**

व्युष्टे प्रभाते दीयते कार्यं वा वैयुष्टम् ।

३५१. **तेन हस्ताद् यः ।**

हस्तेन दीयते कार्यं वा हस्त्यम् ।

३५२. **यथाकथाचाण्णः ।**

अव्ययसमुदायोऽयमनादरार्थः । यथाकथा च दीयते कार्य्यं वा यथाकथाचम् ।

इति श्री पद्मनाभदत्तकृतौ सुपद्मे व्याकरणे
पञ्चमाध्यायस्य तृतीयः पादः ।

———

अथ पञ्चमाध्यायस्य

चतुर्थः पादः

मधुतद्धित-प्रकरणम्

१. **यः प्राङ्मधोः ।**

अधिकारोऽयम् । मधोर्णो लुक् च वेति सूत्रात् प्राग् यो वेदितव्यः ।

२. **देवतान्तपादार्घात्तादर्थ्ये ।**

एभ्यस्तादर्थ्ये यः स्यात् । अग्निदेवतायै इदम् । पितृदेवत्यम् । पादाय इदं पाद्यं जलम् । अर्घ्यं पुष्पम् ।

३. **अतिथेर्ण्यः ।**

तादर्थ्ये, आतिथ्यम् ।

४. **तद्वति रथयुगप्रासङ्गेभ्यः ।**

अत्रार्थे रथादेर्यः स्यात् । रथं वहति रथ्यः । तदन्ताच्च—द्विरथ्यः युग्यः प्रासङ्ग्यः ।

५. **धुरष्टेयण् च ।**

धुरं वहति धौरेयः, धुर्य्यः ।

६. **ईनः सर्व्वधुरादेश्च ।**

धुरश्च, धुरीणः, सर्व्वधुरीणः, उत्तरधुरीणः, दक्षिणधुरीणः ।

७. **एकधराल्लुक् च ।**

एकधुरीणः एकधुरः ।

८. **शकटादण् ।**

शकटं वहति शाकटः, द्वैशकटः ।

---

२. इह ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेष्ट इत्याह देवतान्तेति । तादर्थ्ये गम्य इति तादर्थ्ये विधिर्नेष्टः । तस्मै इदमित्यर्थे गम्य इति शेषः । अतएवाग्निदेवतायै इदमिति विवृतम् । तथा च देवतान्वात्तदर्थमिति परसूत्रम् ।

७. एकधुरादिति क्लीबं छान्दसम् । सूत्रे लिङ्गं सख्या कालाश्चातन्त्राणीति वा ।

९ **हलसीराट्टिकण् ।**

हलं वहति हालिकः, द्वैहलिकम्, सैरिकः, द्वैसीरिकः ।

१०. **जन्यो वरप्रियादौ ।**

जनीं वधूं वहति जन्यो वरप्रियादिः ।

११. **जल्पे च ।**

जनस्य जल्पो जन्यः ।

१२. **धनगणाल्लब्धा ।**

आभ्यामत्रार्थे यः स्यात् । धनं लब्धा धन्यः, गण्यः ।

१३. **अन्नाण्णः ।**

अन्नं लब्धा आन्नः, आन्ना स्त्री ।

१४. **तद्विध्यति कर्म्मणोऽनस्त्रेण ।**

तद्विध्यीत्यर्थे कर्म्मणो यः स्यात् । पादौ विध्यति पद्यः कण्टकः । अनस्त्रेणति किम् ? विध्यति चौरं धानुष्कः ।

१५. **वशाद्गते ।**

वशं गतो वश्यः ।

१६. **तद्दृश्यमस्मिन् पदात् ।**

अत्रार्थे यः स्यात् । पदमस्मिन् दृश्यम्, पद्यः पन्थाः, पद्यः कर्द्दमः ।

१७. **धेनुष्या दुग्धबन्धके स्थिता ।**

(धेनुशब्दस्य ष्वागमो यच्च स्वार्थे संज्ञायायाम्) धेनुष्या निपात्यते । दुग्धबन्धके-स्थिता चेत् । गोर्म्महिषी वा ।

---

१०. जन्यः स्याज्जनके जन्यं संग्रामजनवादयोः । हट्टे त्रिषु वधुज्ञातौ जननीये वरप्रिये । इति भूरि प्रयोगः । *संज्ञायां जन्याः । किं निपात्यते ? जनन्यो जनीभावो निपात्यते यच्च प्रत्ययः । जन्या इति निपातनमनर्थकम् । किं कारणम् ? पञ्चमीनिर्द्देशात् । जनी शब्दादेषा पञ्चमी । इदं तर्हि प्रयोजनम्, सर्व्वकालः प्रत्ययविधिर्यथा विज्ञायते । जनीं वहन्ति, वोढारः, अवाक्षुः; जन्या इति ।

१६. पद्यः कर्द्दम इति नातितरलो नातिशुष्क इत्यर्थः ।

१८. **गार्हपत्योऽग्नौ ।**

गृहपतिना संयुक्तो गार्हपत्योऽग्निभेदः ।

१९. **नावादेस्तेन तार्य्यादौ ।**

यः स्यात् । नावा तार्यं नाव्यम् । "नाव्यं पयः केचिदतारिषुर्भुजैः" इति माघः । *वयसस्तुल्ये । वयस्यः । *धर्म्मात् प्राप्ये । धर्म्म्यो भोगः । *विषाद् वध्ये । विष्यः । *सीतायाः समिते । सीत्यम्, सीता लाङ्गलपद्धतिः । बहुसीत्यम् । *तुलायाः सम्मिते । तुल्यम् । *छन्दसो निर्मिते । छन्दसा इच्छया निर्म्मितं छन्दस्यं विश्वम् ।

२०. **मूलादनभिभवनीय-समार्बाहषु ।**

मूलेनानभिवनीयं मूल्यम्, मूलेन समो मूल्यः पटः' मूलेनार्बाहिणो ग्रहणमात्रादुत्पतन्तीति मूल्या मुद्गाः । बृहू उद्यमे ।

२१. **उरसो निर्म्मितेऽण् च ।**

उरसा निर्म्मितः औरसः पुत्रः, उरस्यश्च ।

२२. **न्याय-धर्मार्थ-पथोऽनपत्ये ।**

एभ्योऽनपत्ये यः स्यात् । न्यायादनपेतं न्याय्यम्, धर्म्म्यम्, पथ्यम्, इनो लोपः ।

२३. **हृदयात्तत्प्रिय-वशीकरणयोः ।**

यः स्यात् हृदयस्य प्रियो वशीकरणमन्त्रो वा हृद्यः । पुत्रेऽभिधानम् ।

२४. **मतात् करणे ।**

मतस्य करणं मत्यम् ।

---

१७. लाभक्रीतदुग्धेत्यर्थे धेनुष्या निपात्यते ।

१९. सीताशब्दो दन्त्यतालव्यः । इह रथसीताहलेभ्यो यविधौ तदन्तविधौ तदन्तविधिरिति स्थितः बहुसीत्यमित्युदाजहार ।

२०. मूल्य-वस्नौ भृताविति कोषः । मूल्यः पट इति पटोत्पत्तौ यावद्धनं लग्नं तादेव लभत इत्यर्थः ।

२१. उरः शब्दोऽत्र श्रेष्ठार्थे वर्त्तते । द्वादशभ्यः पुत्रेभ्यः उरसः श्रेष्ठत्वेन निर्म्मितः उरसः उरस्यश्च । पुत्र एवायमिति जयादित्यः । सजाते त्वौरसोरस्यावित्यमरः ।

२२. अपेतस्त्यक्तस्तदितिरोऽनपेतः । यत् पथोऽनपेतं तत् पथि च साध्विति चान्द्रैरुपेक्षितम् ।

२३. तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । इति कोषः ।

२५. **हलात् कर्षे ।**

हलस्य कर्षो हल्यः । तदन्ताच्च । द्विहल्यः ।

२६. **तत्रसाधुः ।**

सभायां साधुः सभ्यः, सामसु साधु सामन्यः, कर्मण्यः, शरण्यः ।

२७. **प्रतिजनादेरीनण् ।**

प्रतिजनं साधुः प्रातिजनीनः, सार्व्वजनीनः, सांयगीनः, ऐदंयुगीनः ।

२८. **भक्ताण्णः ।**

भक्ते साधुः भाक्तः शालिः ।

२९. **परिषदो ण्यश्च ।**

परिषदि साधुः पारिषद्यः । णश्च-पारिषदः ।

३०. **कथादिभ्यष्ठिकण् ।**

कथायां साधुः काथिकः । वैकथिकः, वार्तिकः, गौड़िक, इक्षुः, कौल्मासि(षि)को यवः, सांग्रा(ग्र)मि(हि)को भटः ।

३१. **पथ्यतिथि-वसति-स्वपतेढ्ढेयण् ।**

पथि साधु पाथेयम्, आतिथेयम्, वासतेयी, स्वापतेयं धनम् ।

३२. **समानतीर्थे वासी ।**

निपात्यते । तीर्थं गुरुः, वसतीति वासी, सतीर्थ्यश्चैकगुरवः ।

३३. **दूतात्तदभागे ।**

यः स्यात् । तस्यभागश्चेत् । दूत्यः ।

३४. **तप आदेर्मासि मत्वर्थे ।**

यः स्यात् । तपोऽत्रास्ति तपस्यो मासः नभस्यः । ऊक्तो यः ।

३५. **मधोर्णो लुक् च वा ।**

मध्वस्मिन्निति माधवो मासः । लुक् च वा, मधुर्मासः ।

---

३४. तपोनभःसहोभ्यो मासविशेषे वाच्ये यः स्यात् । नभो मेघाः सन्त्यत्र, नभस्यो भाद्रः, सहो बलमुपचितमत्रास्ति सहस्य पौषः ।

३५. अस्मान्मासविशेषे वाच्ये मत्वर्थे णः स्यात् । पक्षे तल्लुक् च विधीयते । लुक् चेति योगविभागात् यलुक्मपीच्छन्ति । तपा माघः, नभाः श्रावणः, सहा मार्गशीर्षः ।

३६. **इषोर्ज्जशुक्राश्च ।**

एते मासि निपात्यन्ते । इषः ऊर्ज्ज, शुक्रः ।

३७. **शिव-सम-रिष्टात्तातिस्तत्करणे ।**

शिवं करोति शिवतातिः, समतातिः, रिष्टतातिः ।

३८. **प्राग्धान्यादीयः ।**

अधिकारोऽयम् । धान्यसंशब्देनात् प्रागीयो विहितः प्रकृत्यादौ ज्ञेयः ।

३९. **उगवादेर्यः ।**

उकारान्ताद् गवादेश्च ईयापवादो यः स्यात् । वध्वै हितं वधव्यम्, शङ्क्वार्था प्रकृतिः शङ्क्व्यं दारुः, सक्तव्या धानाः । गवादेः—गव्यम्, युग्यम्, हविष्यम् । *नाभेरप्राण्यङ्गे नभ च । नाभ्यर्था प्रकृतिः नाभ्यं काष्ठम् । (नाभिश्चक्रमध्यम्) । शुनः शुनः शुनौ च । शून्यम्, शुन्यम् ।

४०. **ऊधसः सोनश्च ।**

ऊधन्यम् ।

४१. **नाम्नि कम्बलात् ।**

कम्बल्यमूर्णातन्तुपलशतम् ।

४२. **आमिक्षादेर्व्वा ।**

आमिक्ष्यम्, आमिक्षीयं दधि, पुरोडाश्यं पुरोडाशीयमौषधम्, अपूप्यम्, अपूपीयम्, तण्डुल्यम्, तण्डुलीयम्, सूर्य्याः, सूरीयाः ।

४३. **तस्मै हितम् ।**

अत्रार्थे यथाविहितं स्यात् । वत्साय हितं वत्सीयं नवतृणम् गव्यम्, शुन्यम् ।

---

३६. एते मासनाम्नि मत्वर्थे निपात्यन्ते । एषणमिट् यात्रा जिगीषूणामत्रास्ति । इषोर्ज्जावाश्विनकार्त्तिकौ । शुकः शोचनमत्रास्ति, रक् शुक्रो ज्यैष्ठः । रकारादिदपि, शुचिराषाढः ।

४२. ननु विकारेभ्यश्चेति न वक्तव्यमित्याह सूर्य्या इति । सुरायै हिताः सुरार्थाः प्रकृति वा सूर्य्याः । एवं पिष्टां पिष्टीयमित्यादि । धेन्वै हितं धेनव्यम् (३९) उगवादेर्यः, ओरवः (५।१।४५) इत्यादेशः । एवमाग्नेयं काष्ठम्, कालेयः कलहः, स्त्रैणस्तरुणः, पौंस्नी पुंश्चली ।

४४. **सर्व्वाण्णो वा ।**

सर्वस्मै हितः सार्व्वः सर्व्वीयः । *देहावयवात् प्रागुक्तो यः । नाभ्यम्, शुन्यम् ।

४५. **ब्रह्म-खल-यव-वृष-तिल-माषरथादृयः ।**

ब्रह्मणे हितं ब्रह्मण्यम्, खल्यम्, वृष्यम्, तिल्यम्, माष्यम्, रथ्यम् रथ्या प्रतोली ।

४६. **अजाविभ्यां थ्यः ।**

अजाय हितं अजथ्यम्, अविथ्यम् ।

४७. **विश्वजनात्म-पञ्चजन-मानव-भोगान्तादीनः ।**

विश्वजनेभ्यो हितं विश्वजनीनम्, आत्मनीनम् । गायन, वादक, नर्त्तक, दासी भण्डु, तेभ्यो हितं पञ्चजनीनम्, मानवीनम् । भोगान्तात्—मातृभोगीणः । आचार्यादणत्वञ्च । आचार्यभोगीनः ।

४८. **सर्व्वजनाट्टिकण् च ।**

सर्व्वजनेभ्यो हितः सर्व्वजनीनः, सार्व्वजनिकः ।

४९. **महाजनाच्च ।**

टिकण् । माहाजनिकः ।

५०. **चरकादीनण् ।**

चारकीनम् ।

५१. **पुरुषाट्टेयण् तदवृन्द-वध-विकारकृते च ।**

पुरुषस्य समूहादौ हिते च (टेयण् स्यात) पौरुषेयः ।

५२. **विकृतेस्तदर्थप्रकृतौ ।**

विकृतेर्यथाविहितं स्यात् । तदर्था प्रकृतिश्चेद् । अङ्गाराय इदम् अङ्गारीयं काष्ठम्, यूपीयं दारु, शङ्कव्यम् ।

५३. **छदिरुपधिबलेष्टेयण् ।**

छदिषे इदं छादिषेयं तृणम्, उपधेः स्वार्थे औपधेयम् । बालेयास्तण्डुलाः ।

५४. **ऋषभोपानहो ण्यः ।**

ऋषभार्थोऽयं आर्षभ्यो वत्सः, (औपानह्यो मुञ्जः) औपानह्यं चर्म्म ।

५५. **चर्म्मादण् ।**

तद्विकृतेस्तदर्थप्रकृतौ वध्र्यै इदं वाध्रं चर्म्म, वरत्रायै इदं वारत्रं चर्म्म ।

५६. तदिह स्यात्तदस्य च ।

अत्रार्थद्वये यथाप्राप्तं स्यात् । प्रासादोऽस्यां भूमौ स्यात् सम्भाव्यते प्रासादीया भूमिः, प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः ।

५७. परिखायाष्टेयण् ।

परिखा अस्यां भूमौ स्यात् पारिखेयी भूः ।

५८. मत्वर्थे सूक्तसाम्नोः ।

ईयः स्यात् । अच्छावाकोऽत्रास्ति अच्छावाकीयं सूक्तं (वारतन्तवीयम्) वारवन्तीयम् साम ।

५९. अध्यायानुवाकयोर्लुक् च ।

गर्द्भभाण्डीयो गर्द्भभाण्डोऽध्यायः अनुवाको वा ।

६०. विमुक्तादेण् ।

विमुक्तोऽत्रास्ति वैमुक्तोऽध्यायः, अनुवाको वा, दैवासुरः ।

६१. जात्यन्ताद् द्रव्ये ।

ईयः स्यात् ब्राह्मणजातीयः, ब्राह्मण एव, तज्जातीयः, स एव । द्रव्य इति किम् ? ब्राह्मणजातिरदुष्टा ।

६२. स्थानान्ताद् वा तत्सदृशे ।

पितृस्थानीयः पितृस्थानो वा, तत्तुल्य इत्यर्थः । *ईयविधिः पूर्णः ।

६३. धान्यादेरीनण् भवने क्षेत्रे ।

एभ्यः ईनण स्यात्, तदुत्पादि क्षेत्रञ्चेत् । भवन्त्यत्रेति भवनं क्षेत्रं धान्यानां भवनं क्षेत्रं धान्यीनम्, मौद्गीनम्, कौद्रवीणम् ।

६४. व्रीहिशालिभ्यां टेयण् ।

व्रैहेयम्, शालेयं क्षेत्रम् ।

६५. यव-यवक-षष्टिकाद्यः ।

यवव्यम्, यवक्यम्, षष्टिक्यम् ।

---

६२. स्थानशब्दस्तत्तुल्यवाची, तुल्यार्थेन चेत् स्थानान्तमर्थवत् तदा प्रत्ययः । पितृस्थानीय इति स्थानं सम्बन्धविशेषः । पितुरिव स्थानमस्येति बहुव्रीहिः, ततोऽनेन ईयः ।

६६. **तिलमाषभङ्गोमाणुभ्यो वा ।**

य ईनण् च । तिल्यम्, तैलीनम्, माष्यम्, माषीणम् । भङ्ग्यम्, भाङ्गीनम् । उम्यम्, औमीनम्, अणव्यम्, आणवीनम् ।

६७. **मूलकादेः शाकिनशाकटौ ।**

मूलकानां भवनं क्षेत्रं मूलकशाकिनम्, इक्षुशाकटकम् ।

६८. **आ प्रपदादीनस्तदाप्नोति ।**

तत् प्राप्नोतीत्यर्थे अस्मादीनः स्यात् । आप्रपदीनं वस्त्रम् ।

६९. **अनुपदाद्बद्धा ।**

अनुपदं बद्धा अनुपदीना पादुका ।

७०. **सर्व्वान्नाद् भक्षयति ।**

सर्वान्नं भक्षयति, सर्व्वान्नीनो भिक्षुः ।

७१. **अयानयान्नेये ।**

अयः प्रदक्षिणम्, आनयः प्रसव्यम्, अयानयं नेयोऽयानयीनः शारादिः ।

७२. **यथमुख-सम्मुखात्तद्दर्शने ।**

दृश्यतेऽस्मिन्निति दर्शनम् यथामुखीनो दर्पणः । सम्मुखीनः ।

---

७१. आनीयन्ते शारा अस्मिन्नित्यानयः, अयेन दक्षिणावर्त्तेनाप्रसव्यगमनेनानयः । अयानयः शीर्षस्थानम् । द्यूतविशेषे हि चतस्रो वीथयः प्रत्येकं द्वादशकोष्ठोपेताः, शारास्तु त्रिंशत्, ते च एकैककितवेन पञ्चदशशो ग्राह्याः, स्ववामपार्श्वस्थप्रथम-कोष्ठरूपं शीर्षस्थानरूपमयानयं दक्षिणावर्त्तेनाप्रसव्यगत्या सर्वेऽपि शारा नेयाः, अतस्तेऽयानयीना इत्युच्यन्ते ।

७२. ननु यथामुख-सम्मुखात् तदत्र दृश्यत इत्यन्यैरुक्तम्, तत् कथमित्याह, दृश्यतेऽस्मिन्नित्यधिकरणे टनेनैव तदर्थमिति भावः । मुखस्य सदृशं यथामुखम्, अस्मादेव निर्देशात् सादृश्ये यथा समस्यते, अनेन पदहरणाद् विम्बितं प्रतिबिम्बमुच्यते । यथामुखीनः सीताया इति भट्टिः समं मुखं सम्मुखम्, कर्म्मधारयः निपातनात् समशब्दस्याकारलुक् । सम्यगर्थेन संशब्देन वा प्रादिसमासः । उपचारादभिधेय-मात्रे **सम्मुखीनः ।**

७३. सर्व्वादेः पथ्यङ्ग-कर्म्म-पत्र-पात्रात्तद्व्याप्नोति ।

ईनः स्यात् । सर्वपथं व्याप्नोति सर्वपथीनो रथः, सर्वाङ्गीनः पटः । सर्व्व-कर्म्मीणः करः, सर्व्वपत्रीणः सारथिः, सर्व्वपात्रीणं भक्तम् ।

७४. परोवर-परस्पर-पुत्रपौत्रादनुभवति ।

परांश्चावरांश्चानुभवति निपातनात् परोवरीणः, परस्परीणः पुत्रपौत्रीणः ।

७५. अत्यन्तावारपारानुकामाद्गच्छति ।

अत्यन्यतं गच्छतीति अत्यन्तीनः पारीणः । संघाश्च । अवार पारीणः, परावारीणः अनुकामीनः ।

७६. तस्मै शक्तेऽलङ्कर्म्मालम्पुरुषात् ।

कर्म्मणेऽलम् अलङ्कर्मीणः, अलंपुरुषीणः ।

७७. अद्यश्वीनमासन्नक्रिये ।

निपात्यते । अद्यश्वो वा । विजायते भवति वा, अद्यश्वीना गौः, अद्यश्वीनो वियोगः ।

७८. समांसमीना प्रत्यब्दप्रसवा ।

आबन्ता निपात्यते। "समांसमीना सा यैव प्रतिवर्षं प्रसूयते। समां समां विजायते समायां वा।"

---

७३. गच्छतीति भविष्यत्सामीप्ये लट् । एभ्यस्तद्गच्छतीत्यर्थे ईनः स्यात् । अत्यन्त-स्याभावोऽत्ययो वा अन्तमतिक्रान्त इति वा अत्यन्तो भृशार्थः । पारावारः समुद्रे ना तटद्वये नपंसकम् । इति मेदिनी । काम इच्छा, कामं गाम्यनुकामीनः ।

७६. अलं कर्म्मणे, अलं पुरुषाय, पर्य्यादयः (४।३।४० वा०) इति समास इति केचित्, अलं भूषण इत्यनेनार्थविशेषस्य नियमत्वात् निपातनादस्मादेवेत्यपरे । भाव-प्रधानोऽयं पुरुषशब्दः, अलं पुरुषभावायेत्यर्थः । नन्वधीन इति पदसिध्यर्थमधि-शब्दमपीह पठन्ति, तत् कथं न लक्षितमिति । सत्यम्, अधीनो निघ्न आयत्त इत्यमरसिंहेनायत्तपर्य्याये उक्तः । इनमीधगतोऽधीन इति विग्रहे स एव रूढ़ः । तथाहि तदेतत् प्रयोक्त्र्याधीनमिति भाष्यम् । वाक्यं वक्तर्य्याधीनं स्यादिति श्लोकवार्त्तिकञ्च । अस्मास्वधीनं किमु निस्पृहाणामिति भारविः । अतएव शौण्डादौ श्रीपतिरधीनाधीते अस्त्वधीत एव । कथं चिरकालीन उत्तरकालीन एककालीन समानकालीनादयः सिध्यन्ति ? ईनस्याविहितत्वात् । क्रमदीश्वरस्तु समादिभ्यः कालात्तत्रभव इत्यसूत्रयत् । चिरकालीनमिति चिन्त्यम् इत्युपाध्याये योऽध्या-योऽनुवाको वा । *अध्युत्तरपदादिति पाणिनिः ।

७९. आगोदानं कर्म्मकार्य्यागवीनः ।

आगवीनः स्यात् । गोदानपर्यन्तं कर्म्मकारी चेत् ।

८०. अनुगवीनो गवानुगामी ।

स्यात् ।

८१. अषडक्षीणो द्विगोचरे ।

ईनः स्यात् अषड़क्षीणो मन्त्रः, द्विगोचर इत्यर्थः ।

८२. आशितङ्गवीनम् ।

आशितो गावोऽत्रेति, आशितङ्गवीनमरण्यम् ।

८३. स्वार्थे वाऽञ्चेरदिक् स्त्रियाम् ।

अञ्चेरीनो वा स्यात् स्वार्थे । प्राक् प्राचीनः, उदक् उदाचीनः । अदिक् स्त्रियामिति किम् ? प्राचीदिक् ।

८४· तदलंगामीत्यध्वनो यदीनौ ।

स्याताम् । अध्वानमलंगामी अध्वन्यः, अध्वनीनः ।

८५. अभ्यमित्रादीयश्च ।

अभ्यमित्रमलंगामी अभ्यमित्र्योऽभ्यमित्रीयोऽभ्यमित्रीणश्च ।

८६. गोष्ठादीनण् भूतपूर्वे ।

स्यात् । गोष्ठो भूतपूर्वः गोष्ठिनो देशः ।

८७. अश्वादेकाहगम्ये ।

आश्वीनोऽयं पन्थाः ।

८८. शालीनमधृष्टे ।

शाला प्रवेशमर्हति शालीना नववधुः ।

८९. कौपीनमकार्य्यगुह्ययोः ।

कूपप्रवेशमर्हति कौपीनम् ।

९०. व्रातीनः कर्म्मोपजीविनि ।

स्यात् ।

९१. साप्तपदीनं सख्ये ।

सप्तभिः पदैरवाप्यत इत्यर्थः ।

९२. हैयङ्गवीनं ह्योगोदोहोद्भवाज्ये ।

इदं घृतविशेषे स्यात् ।

९३. सर्वचर्म्मण ईनश्च कृते ।

ईनण् च । सर्व एव चर्म्मणा कृतः सर्वचर्म्माणो रथः, सर्वचर्म्मीणश्च ।

९४. तस्य मूलं कर्णादेर्जाहः ।

तस्य मूलमित्यर्थेकर्णादेर्जाहप्रत्ययः स्यात् । कर्णस्य मूलं कर्णजाहम्, कर्णजाह-विलोचना इति भट्टिः । अक्षिजाहम् । अक्षि नख मुख केश पाद अंश हस्त भ्रू दन्त ओष्ठ गुल्फ शृङ्ग पुच्छ पृष्ठानि ।

९५. पक्षात्तिः ।

पक्षस्य मूलं पक्षतिः ।

९६. पील्वादेः कुणः पाके ।

एभ्यः पाके कुणः स्यात् । पीलुकुणः, कर्कन्धुकुणः । शमी करीर बकुल बदर खदिर अश्वत्थाः ।

९७. तेन ख्याते चुञ्चु-चनौ ।

अत्रार्थे चुञ्चु-चनौ स्याताम् । केशेन ख्यातः केशचुञ्चुः, केशचनः, अक्षरचुञ्चुः, अक्षरचनः ।

९८. तिलादेः स्नेहे तैलम् ।

स्यात् । तिलतैलम्, कटुतैलम्, इङ्गुदीतैलम् ।

९९. न्यादेः कटः ।

स्यात् । निकटः, सङ्कटः, उत्कटादिः ।

१००. तिलादिभ्यो रजसि ।

तिलकटः, उमाकटः, भङ्गाकटः अलाबूकटः ।

---

९३. सर्व एव चर्म्मणा कृत इति सापेक्षत्वेऽपि समासोऽभिधानात् । मयूरव्यंसका-दित्वात् इत्यन्ये । अदेर्विधानादित्यपरे । षष्ठीसमासे सर्वसम्बधिना कृत इत्यर्थः प्रतीयते । कर्म्मधारये च सर्वेण चर्म्मणाकृत इत्यर्थद्वयमपि तद्धितेनाभीष्टमिति सापेक्षत्वे समासोऽभिहितः ।

१०१. अव्यादेः समूहे ।

अविकटः ।

१०२. वेः शालशङ्कटौ ।

विशालः, विशङ्कटः ।

१०३. स्थाने गोष्ठं पशुभ्यः ।

स्यात् । गोगोष्ठम्, महिषीगोष्ठम् । क्लीबनिर्द्देशो लिङ्गापेक्षः ।

१०४. द्वित्वे गोयुगम् ।

गोगोयुगम्, अश्वगोयुगम् ।

१०५. षट्के षड्गवम् ।

हस्तिषड्गवम् ।

१०६. विस्तारे पटः ।

अविपटः ।

१०७. अवात् कटकुटारौ वैरूप्ये ।

स्याताम् । अवकटः, अवकुटारः ।

१०८. टीट-नाट-भ्रटा नतनासिके ।

अवटीटः, अवनाटः, अवभ्रटः ।

१०९. नेरिन-पिट-का-श्चिक-चि-चिकश्च ।

नेरिन-पिट-काः प्रत्ययाः स्युः । यथासंख्यं चिक-चि-चिकादेशाश्च । चिकिनम्, चिपिटम्, चिक्कम् ।

११०. निविड़निविरीसौ ।

निपात्येते ।

---

१०१. अविशब्दादेवायं प्रत्यय इति लक्ष्यते। यतोऽस्योदाहरणान्तरं केनापि न दर्शितम्। अवेः सङ्घात इति वर्द्धमानलक्षणञ्च ।

१०२. तालव्यादी । स्वार्थे बृहदर्थाविमौ । चकार उक्तसमुच्चयार्थः ।

१०८. भ्रट-टीट-नाटा नासिकानमनादाविति परेषां सूत्रे अवभ्रटं नासिकानतिः, अवभ्रटा नासिका नता इत्यपि भवति ।

१११. **चुल्ल-चिल्ल-पिल्लान्यार्द्रे चक्षुषि, तद्वति च ।**

इमानि क्लिन्ने नेत्रे क्लिन्ननेत्रवति च निपात्यन्ते । चुल्ले चक्षुषी, चुल्लोऽयं मैत्रः, चिल्लः, पिल्लः ।

११२. **अध्युपाभ्यां त्यक-ऊद्‌र्ध्वासन्नयोः ।**

आभ्यां त्यको भवति । अधित्यका गिरेरूद्‌र्ध्वा भूमिः, उपत्यका गिरेरासन्ना भूमिः ।

११३. **तत्र घटते कर्मणोऽठः ।**

तत्र घटते इत्यर्थे कर्म्मणोऽठः स्यात् । कर्म्मणि घटते कर्म्मठः ।

११४. **तदस्य सञ्जातं तारकादेरितः ।**

एभ्योऽत्रार्थे इतः स्यात् तारकाः सञ्जाताऽस्य तारकितं नभः, कोरकितस्तरुः । तारका कोरक पुष्प, फल, पल्लव, मुकुल, सुख, दुःख, कुसुम, स्तबक, तन्त्र, अभ्र, प्रत्यय, बुभुक्षा, पिपासा, भर, व्रण, रोग, व्याधि, उत्कण्ठा, लज्जादि ।

११५. **गर्भादप्राणिनि ।**

गर्भितो व्रीहिः ।

११६. **माने मात्रट्-दघ्नट्-द्वयसटः ।**

तदस्य मानमित्यर्थे मात्रडादयः स्युः । जानुप्रमाणस्य जानुमात्रं जलम्, गिरिकूट-
दघ्नो गजः, उरुद्वयसी नदी । ऊद्‌र्ध्वे माने, दघ्नट्द्वयसटौ । मात्रट् पुनः सर्व्वत्र,
प्रस्थमात्रम् घृतम्, तन्मात्रम् ?

११७. **डियतु डावत्वन्तात् स्वार्थे मात्रट्द्वयसटौ ।**

कियदेव कियन्मात्रम्, कियद्वयसम्, तावन्मात्रम् तावद्वयसम् ।

११८. **हस्तिपुरुषाभ्यामण् च ।**

हस्ती ऊद्‌र्ध्वमानमस्य हास्तिनम्, हस्तिदघ्नम्, पौरुषी परिखा पुरुषमात्री ।

---

११६. परिच्छेदहेतुर्मानम् । तदस्येत्यनुवर्त्तते । ननु द्वयसट्दघ्नटौ चोद्‌र्ध्वं इति
परसूत्रम् । तत् कथं प्रत्याख्यातमित्याह ऊर्ध्वमान इत्यादि । अभिधानादिति
विशेषः ।

११७. स्वार्थे द्वयसडमात्रटोर्डियतु-डावत्वन्तादिति परैः सूत्रितम्, तदिह किं प्रत्या-
ख्यातमित्याह डियतु-डावत्वन्तात् स्वार्थे मात्रट् द्वयसटावित्याभिधानशक्ति-
वैचित्र्यात् ।

११९. **मानार्थान्मात्रड़ादेर्लुग्वा ।**

समं मानमस्य समः, सममात्रो वा । हस्तो हस्तमात्रो वा । वितस्तिर्वितस्तिमात्रा वा शस्त्री ।

१२०. **द्विगोर्नित्यम् ।**

लुक् स्यात् । द्विसमम्, द्विवितस्तिः, द्विहस्तिनी परिखा, द्विपुरुषी ।

१२१. **शद्दशान्तर्व्विंशतेर्डिन् वा ।**

त्रिंशत्प्रमाणमेषां त्रिंशिनो मासाः, त्रिंशन्मात्रा वा । पञ्चदशिनः पक्षाः, विंशिनोऽङ्गिरसः ।

१२२. **संख्या मानाभ्यां संशये मात्रट् ।**

पञ्च स्युर्नवेति पञ्चमात्रम्, समं स्यान्न वेति सममात्रम्, हस्तमात्रम् प्रस्थमात्रम् ।

१२३. **यत्तदेतेभ्यः परिमाणे डावतुः ।**

एभ्यः परिमाणार्थे डावतुः स्यात् । यत् परिमाणमस्य यावान्, तत् परिमाणमस्य तावान्, एतत् परिमाणमस्य एतावान् ।

१२४. **किमिदंभ्या डियतुरिदमोऽच्च ।**

आभ्यां परिमाणे डियतुः स्यात् । इदमोऽच्च ।

१२५. **किमः संख्यापरिच्छेदे डति च ।**

स्यात् । डियतुश्च । का संख्या एषां कति कियन्तश्च गुणिनः सन्ति ।

१२६. **संख्याया अवयवे तयट् ।**

अवयववृत्तेः संख्यायास्तयट् स्यात् । पञ्चावयवा अस्य पञ्चतयं वृन्दम्, चतुष्टयी शब्दप्रवृत्तिः ।

---

१२५. संख्यापरिच्छेद इति किम् ? केयमेषां संख्या दशानामिति क्षेपे मा भूत् । यत्तद्भ्यामपीति शाक्याः यति तेनाग्रशीर्षाणि, तति तेन, इति दुर्गमतान्तरमाह तदिह नालक्षितमपाणिनीयत्वात् ।

१२६. क्वचिदवयवमात्रेऽपि, तथापि चान्द्रलिङ्गानुशासनम् स्त्रीपुंसयोर्धर्म्मवृत्तिस्तथायान्तो हि कथ्यते । तेन वर्णानां चतुष्टयं चतुष्टयी च । देवत्रयान्निव्वर्द्धत(त) व्यद्योतिष्ठ सभावेद्यामसौ नरशिखित्रयी* । अवयवश्चान्द्रानुदभूतावयवभेदोऽपि समुदायस्तेन मुनितयं बहुतयमित्यादि च सिद्धम् ।

१२७. **विभाषा द्वित्रिभ्यामयट् ।**

आभ्यामयट् वा स्यात् । द्वितयम्, द्वयम्, त्रितयम्, त्रयम् ।

१२८. **उभान्नित्यम् ।**

उभौ अवयवौ अस्य उभयो मुनिः, उभये देवमनुष्याः ।

१२९. **शते सहस्रेऽस्मिंस्तदधिकमिति शद्दशान्तविंशतेर्डः ।**

शते सहस्रे च विषयेऽस्मिंस्तदधिकमित्यर्थे शदन्ताद्दशान्ताच्च विंशतेश्च डः स्यात् । त्रिंशदधिकास्मिन् शते त्रिंशं शतम् । चत्वारिंशं सहस्रम्, एकादशं शतम्, विंशं सहस्रम् । इह संख्यापूर्व्वाभिधानान्नेह—गोत्रिंशत् ।

१३०. **संख्याया पूरणे डट् ।**

तत् पूरणे डट् स्यात् । द्वादशानां पूरणः द्वादशः स्वर्गः । विंशो कारिका ।

१३१. **नान्ताया असंख्यादेर्म्मट् ।**

नान्तसङ्ख्यायाः पूरणे मट् स्यात् । डटो बाधःपञ्चानां पूरणः पञ्चमः । एवं दशमः । नान्तायाः किम् विंशः । असङ्ख्यादेरिति किम् ? एकादशः ।

१३२. **षट्-कति-कतिपय-चतुरस्थट् ।**

एभ्यः पूरणे थट् स्यात् । षण्णां पूरणः षष्ठः, कतिथः कतिपयथः, चतुर्थः चतुर्थी इति निपातनात् । *चतुरो येयौ, चलोपश्च । चतुर्णां पूरणः तुर्य्यः तुरीयः ।

---

१२८. पृथग्योगान्नित्यत्वे प्राप्ते नित्यमिति स्पष्टार्थम् । उभये देवमनुष्या इति कथं बहूनां द्वावंशौ । यद्यप्यत्र बहुत्वमस्ति द्वित्वमपि चास्त्येव, द्वावयविसमुदायस्यावयवौ, एको देवानामपरो मनुष्याणामिति ।

१२९. शतसहस्रमिति व्यस्तसमस्तग्रहणम्, व्यस्ते तथाह, शतमेव, समस्ते तु शतानां सहस्रम्, सहस्राणां शतमित्युभयथा समासः । द्वितीयपक्षे सहस्रशब्दस्य राजदन्तादित्वात् परनिपातः । त्रिंशं द्वादशं विंशं वा एवं पुराणविंशम्, पुराणविंशतिरधिका अस्मिन्, पुराणशते पुराणशतम् । सजातीयेनैवाधिक्य प्रतीतेस्तत्र विजातीयाधिक्यम् । तत्र न भवति विंशत्यधिका पुराणा अस्मिन् कार्षापणशतमित्युक्ते विंशतेः पुराणानां विजातीयमाधिक्यम् । शद्दशान्तविंशतेरिति किम् ? पञ्चाधिका अस्मिन् शतसहस्रे । शतसहस्र इति किम् ? एकादशाधिका अस्यां विंशतौ, इह संख्यापूर्वस्याभिधानादिति । गोत्रिंशदधिका अस्मिन गोशते त्रिंशदिति सङ्ख्याशब्दो न तु गोत्रिंशच्छब्दः ।

१३३. बहु-पूग-गण-संघात्तिथट् ।

एभ्यः पूरणे तिथट् स्यात् । बहूनां पूरणः बहुतिथः, पूगतिथः, गणतिथः, सङ्घतिथः ।

१३४. डावतोरिथट् ।

डावन्तात् पूरणे इथट् स्यात् । तावतां पूरणः तावतिथः, यावतां पूरणी यावतिथी ।

१३५. द्वित्रिभ्यां तीयो रेर्ऋश्च ।

आभ्यां पूरणे तीयः स्यात् । त्रेस्तु रिकारस्य ऋश्च । द्वितीयः, तृतीयः ।

१३६. विंशत्यादेस्तमड् वा ।

एभ्यः पूरणे तमड् वा स्यात् । पक्षे डट् । विंशतेः पूरणः विंशतितमो विंशो वा । त्रिंशत्तमः, त्रिंशो वा । एकविंशतितमः । एकविंशो वा । द्विपञ्चाशत्तमः द्विपञ्चाशः ।

१३७. नित्यं शतादि-मासार्ध-मास-संवत्सराच्च ।

एभ्यः पूरणे नित्यं तमट् स्यात् । शतस्य पूरणः शततमः । सहस्रतमः । एकशततमः । द्विलक्षतमः । मासतमो दिवसः अर्धमासतमः । संवत्सरतमः ।

१३८. षष्ट्यादेश्चासङ्ख्यादेः ।

एभ्यस्तमट् स्यात् । षष्ठः पूरणः सप्ततितमः । अशीतितमः । असंख्यादेरिति किम् ? एकषष्टितमः, एकषष्ठः । द्विनवतितमः, द्विनवतः । पूर्वेण विकल्पः ।

१३९. णो वा षष्ठाष्टमाद्भागे ।

णो वा स्यात् । षाष्ठोभागः, षष्ठो वा । आष्टमो भागः, अष्टमो वा ।

१४०. तत्र कुशले पथोऽकः ।

पथि कुशलः पथकः ।

---

१३७. शतेति लुप्तपञ्चम्यन्तम्, वा षष्ठ्यादेरित्यनेन तमटि सिद्धे शतादिग्रहणं संख्याद्यर्थम् । अतएव एकशतम इत्युदाहृतम् ।

१३९. अप्राप्तौ विभाषा । भागे अण् षष्ठाष्टमाभ्यां त्र्यटिति सूत्रेण अनभिधानात्, षाष्ठोभाग इत्यत्र अण् स्यात्, अत्र तु तदभावात् धान्यषष्ठः । तान्युञ्छष्ठाङ्कितसैकतानीत्याद्यसिद्धिः, पूरणप्रत्ययान्तेन षष्ठीसमासनिषेधात् । तस्मादत्र पक्षे अकारः कर्त्तव्यः, अभिधानात् ।

१४१. आकर्षादेः कः ।

आकर्षे कुशलः, आकर्षकः ।

१४२. धन-हिरण्यात् कामे ।

धने कामः, धनकः, मुमुक्षोर्धनकः कुतः हिरण्यकः ।

१४३. स्वाङ्गात् (प्रसक्ते) प्रसिते ।

तत्रेत्येव, केशेषु प्रसितः केशकः, दन्तकः, नखकः ।

१४४. स(श)स्योत्तेन सम्पन्ने ।

कः स्यात् । स(शा)स्येन गुणेन सम्पन्नः स(शस्यको मणिः । स(श)स्यको वत्सः, स(श)स्यकः शालिः ।

२४५. अशंको अंशहारी ।

कः स्यात् । अंशं हरति अंशको दायादः ।

१४६. तन्त्रादचिरापहृते ।

कः स्यात् । तन्त्रको नवपटः ।

१४७. उष्णिका यवागूः ।

अन्नशब्दात् उष्णादेशो निपात्यते यवागूश्चेत् । अल्पमन्नं यस्यां सा उष्णिका ।

१४८, ब्राह्मणकोऽस्त्रजीविब्राह्मणदेशे ।

स्यात् ।

१४९. शीतकोष्णकौ शिथिल-शीघ्रकारिणोः ।

शिथिलंकारी शीतकोऽलसः, उष्णकः शीघ्रकारी ।

---

१४३. केशेषु प्रसक्त इति प्रसित (२।२।६७) इति पक्षे सप्तमी स्वाङ्गसमुदायादपीत्येके, नखकेशकः, दन्तौष्ठक इत्यादि ।

1४४. सम् स्वस्ति स्वप्ने इत्यत्र सस्यमिति पारायणादौ चिन्तितत्वात् सत्यमिह दन्त्यम् । सस्यको मणिभेदे स्यादिति दन्त्यादौ रभसः । "तालव्या अपि दन्त्या स्युः शस्य शूकर पांशवः। कलशं शम्बलञ्चैव जिह्वायां व-श-नास्तथा ।" इति गदसिंहः । अत्र गुणेऽभिधानात् शस्येन फलेन सम्पन्न इति वाक्यमेव ।

१४९. संज्ञायामित्यनुवर्त्तत इत्याशयेनाहालस इत्यादि । अलसो हि कार्य्यकरणकाले शीतबाधामिव सूचयन् कार्य्ये प्रवर्त्तते । शीतं शिथिलं उष्णं शीघ्रं धात्वेकाधिकरणाभ्यां क प्रत्यय इत्यवधेयम् ।

१५०. अधिकं प्रमाणादतिरिक्ते ।

स्यात् । अध्यारूढशब्दात् उत्तरपदलोपश्च ।

१५१. अनुकाभिकाभीकाः कामुके ।

स्युः । अनुकोऽभिकोऽभीकश्च ।

१५२. तावतिथेन गृह्णातीति पूरणात् पूरणस्य लुक् च ।

अत्रार्थे पूरणान्तात् कः स्यात् । तस्य लुक् च । द्वितीयेन रूपेण ग्रन्थं गृह्णाति, द्विको मेधावी, त्रिकः, षट्कः ।

१५३. ग्रहणे लुग्वा ।

द्वितीयेन रूपेण ग्रन्थग्रहणं द्विकम्, द्वितीयकम् । चतुष्कम्, चतुर्थकं वा ।

१५४. स एषां ग्रामणीः ।

अत्रार्थे कः स्यात् । त्वं ग्रामणीरेषां त्वत्का इमे, मत्कं मतम्, देवदत्तको जनः ।

१५५. शृङ्खलकः करभे ।

शृङ्खलं बन्धनमस्येति शृङ्खलकः ।

१५६. उत्क उन्मनाः ।

उत्कः स्यादुन्मनाश्चेत् ।

---

१५०. प्रमाणमियत्ता, ततोऽतिरिक्ते गम्ये सति । इहातिरिक्त इत्युक्तेऽप्यभिप्रेतसिद्धौ प्रमाणादिति सुखप्रतिप्रत्त्यर्थम् । अतएवाध्यारूढाधिश्चातिरिक्त इति वर्धमान-सूत्रम् । अध्यारुहेः कर्त्तरि क्तेऽध्यारूढश्चेदधिको द्रोणः खारीम् । कर्म्मणि चेदध्यारूढस्तदाधिका खारी द्रोणेनेति । दौर्गास्तु कर्मण्येव दृश्यते न कर्त्तरीत्याहुः । सम्बद्धविवक्षायान्तु अधिको द्रोणः खार्य्याः । आधारविवक्षायां खार्य्यामिति स्यादेव । अतिरिक्त इति किम् ? अध्यारूढस्तरुम् ।

१५२. रूपेणेति रूपं ग्रन्थावृत्तिः, ग्रन्थग्रहणमेवाभिधानम् । तथाहि पुराणान्तात्तेन ग्रन्थं गृह्णाति पूरणलुक् चेति वासवत परिशिष्टम् । अन्यत्र तु पञ्चमेन दिनेन ग्रन्थं गृह्णाति वाक्यमेव । द्वितीयेन हस्तेन दण्डं गृह्णातीति वाक्यमेव ।

१५७. ज्वरे भवादौ कालादेः ।

ज्वरे वाच्ये भवादावर्थे कालवाचिनः शब्दादेः कः स्यात् । दिवसे भवति दिवसको ज्वरः, मासकः, द्वितीये भवः द्वितीयकः, चतुर्थको ज्वरः ।

१५८. तेन प्रयुक्ते ।

विषपुष्पेण प्रयुक्तो विषपुष्पको ज्वरः, काशपुष्पकः ।

१५९. तदस्य कार्य्यं शीतादेः ।

शीतं कार्य्यमस्य शीतको ज्वरः, तापकः ।

१६०. अज्ञात-कुत्सिताक्षेपेषु ।

कः स्यात् । न ज्ञायते कस्यायं किंस्वभावो वा अश्वः अश्वकः, कुत्सितो विप्र-विप्रकः । *समासे चोत्तरपदे । त्वत्कपितृकः, असर्वनामत्वादक् न स्यात् । आक्षेपे—व्याकरणेन गर्व्वितः व्याकरणकः ।

१६१. संज्ञायाम् ।

कः स्यात् । शूद्रकः ।

---

१५७. अत्रादिणद्वयं चिन्त्यम् ! कालाद् रोगनाम्नीति शिष्टैः सूत्रित्वात् । द्विती-यादिष्वेवायं विधिस्तत्रैव संज्ञो प्रतीतेः । अथ कालविशेषाणां कालवाचित्वा-भावात् कालादेरित्यादि पदं साध्वित्यन्ये ।

१६०. एष्वर्थेषु वर्त्तमानेभ्यः कः स्यात् । येन रूपेण ज्ञातः विशेषेणाज्ञात इत्यज्ञात इहोच्यते न ज्ञायते कस्यायमिति यस्यात्यन्तिकमेवाज्ञानं तस्य प्रयोगाभावात् न ज्ञायते कस्य कीदृशी वा पिबति च पाति च यासकौ रहस्त्वाम्, इति माघः । कुत्सायां वा । समासे चोत्तरपद इति बाहुल्यादिति शेषः त्वं (कुत्सितः) पिताऽस्येति विग्रहः कथं कुत्सितोऽनुकम्पितक इति कुत्सितस्यानुकम्पायाम् । अनुकम्पितस्य च कुत्सायां भविष्यति अथवा कुत्सितानुकम्पितशब्दयोरन्यैर-कुत्सानुकम्पा च प्रवृत्तिनिमित्तम् (इत्युक्तम्) अन्या च कप्रत्ययहेतुः । यदुक्तम्, इति शुक्लादिप्रकर्षस्याभिधायकं प्रकृष्टस्य प्रकर्षेतरादिस्तु विधीयते । देवदत्तादिकुत्सायां वर्त्तते कुत्सावान् सम्यगपि च कुत्सितः । अशब्दाभिहितः केन विशिष्टोऽर्थः प्रतीयते । आक्षेप इति अक्षिप्यते न्यक् क्रियते येन स आक्षेपः । वैयाकरणकत्वेन विकत्थसे । इह स्वभावः कुत्सितम्, परस्य कुत्सार्थं यदुपादीयते स आक्षेपः, यन्न कुत्सितमेव तत् कुत्सित इत्यस्यैव विषयः ।

१६१. संज्ञामात्रे गम्ये देवदत्तकः । कुत्सितत्वोपाधिविशिष्टसंज्ञायान्तु पूर्वेणैव सिद्धः, शूद्रकः लब्धकः इत्यादि । अन्ये तु कुत्सितत्वोपाधिविशिष्टेऽर्थे वर्त्तमानात् को भवति, तदन्तेन चेत् संज्ञा गम्यते, शूद्रकः, पूर्णकः इत्याहुः ।

१६२. **नीतौ ।**

क: स्यात् । धनकं गोप्यम् ।

१६३. **अनुकम्पायाम् ।**

क: स्यात् । पुत्त्रक:, वत्सक: ।

१६४. **बह्वचो नृ-नाम्न इयेकेलाश्चादिपदशेषश्च बहुलम् । उपादेरडश्च । उगन्तादिलुक् चेयादेः ।**

नृनाम्नः परे इय-इक-इलाः स्युः । कश्च । उपादि नाम्नोऽडश्च । उगन्तादियादेरिकारस्य लुक् च । तन्नाम्न आदिपदशेषश्च बहुल्यात् । के विकल्पितः । अनुकम्पायां—देवदत्तोऽनुकम्पितः देवदत्तकः, दत्तकः, देवियः, देविकः, देवितः । उपेन्द्रदत्तकः, उपकः, उपिकः, उपियः, उपिलः, उपडश्च । पितृनामकः, पितृकः, बाहुल्यान्न रेफः—पितृयः, पितृकः, पितृलः । वायुदत्तको वायुकः, वायुयः, वायुलः । षडङ्गुलिदत्तकः, षट्कः, षडियः, षडिकः' षडिलः । कृष्णाजिनकः, कृष्णकः, कृष्णियः, कृष्णिकः, कृष्णिलः । एव शेवलदत्तादेः । बाहुल्यात् क्वचिदन्तपदशेषश्च, दत्तको दत्तियः, दत्तिकः, दत्तिलः । बह्वच इति किम् ? गुप्तको व्याघ्रकः । सिंहकः । क्वचिदकारश्चदत्तः ।

---

१६२. नीतौ वर्त्तमानात् कः स्यात् । नीतिरर्थशास्त्रम्, तद्विहितक्रियायामित्यर्थः । धनकमित्यार्यवित्तमित्यादिवचनेन तद्गोपनस्य विहितत्वात् ।

१६३. नीतौ च तद्युक्तादिति वक्तव्यम् । तदित्यनेनानुकम्पापरामर्शः, नीतौ गम्यमानायानुकम्पायुक्तात् को भवति । हन्त ते वस्त्रकं दत्वा युक्तः समाश्वासयति, एहकि धानकाः, एहि नु ते धाना इति दयायुक्तो दानेन समाश्वासयति, सामदानात्मिकात्र नीतिर्गम्यते पूर्वेण प्रत्यासत्तेरनुकम्प्यमानात् प्रत्ययः । अनेन व्यवहितादपि यथा स्यादिति वचनम् ।

१६४. अनुकम्पायामित्यनुवर्त्तते । अनन्तरोक्त (नीत्यनुकम्पे) (?) रक्तस्नाताविति चेत्युभयमनुवर्त्तत इत्यन्ये । उपादेरड़श्चेति व्याचष्टे, उपाद्रि नृनाम्नोऽड़ इयेकेलाश्च भवन्ति । उगन्तादि—लुक् च । इयादेरिति व्याचष्टे—उगन्तान्नृनाम्नः इयादेरिकारस्य च लुक् स्यात् । कृष्णाजिन इति—अजिनान्ताल्लुक् चाजिनस्येति न वाच्यम् । व्याघ्राजिनकोऽनुकम्पितः, व्याघ्रकः, व्याघ्रियः, व्याघ्रिकः, व्याघ्रिलः । एवमिति—शेवल सुपरि विशाल विशाख-वरुणार्य्यमादीनां तृतीयादि न वाच्यम् । चतुःस्वरपूर्व्वात्तुर्य्यस्वरादूर्ध्वमित्यपि न वाध्यम् । बृहस्पतिदत्तोऽनुकम्पितः शिक्ष्यमाणो वा बृहस्पतिकः बृहस्पतियः, बृहस्पतिलः ।

१६५. स्वार्थे कः ।

कः स्यात् । अविरेव, अविकः, यावकः, मणिकः, श्रेयस्कः ।

१६६. स्नाताद्वेदसमाप्तौ ।

स्नातको मुनिः ।

बृहस्पत्याशीर्ददत्तोऽपि बृहस्पतिकः क्वचिदित्यादि । तेन, देवकः, दत्तकः, व्याघ्रकः, अजिनकः । बाहुल्यान्नृनाम्नो जातेरित्ययौ चेत्यन्ये । जातिशब्दो यो मानुषनामधेयस्तस्मादित्यर्थः । व्याघ्रो नाम कश्चित् सोऽनुकम्पितः व्याघ्रकः, व्याघ्रलः, व्याघ्रियः, सिंहकः, सिंहलः, सिंहियः । तथा एचोऽद्वितीयत्वे तदादेर्लुक् स्यात् । कुबेरदत्तोऽनुकम्पितः शिक्षितो वा—कुबिकः, कुविलः, कुबियः । कहोड़ः, कहिकः, कहिलः, कहियः । अप्रत्यय चेति न वाच्यमित्याह—क्वचिदकारश्चेति । क्वचिदुत्तरपदस्यैव—भीमः, भीमसेनः । सत्या सत्यभामा, भामा । क्वचिद् पूर्वपदस्यैव—हरिःभर्तृहरिः । *एषु प्रत्ययेषु परतः प्रकृतेर्द्वितीयाद् च ऊद्र्ध्वं सर्वं लुप्यते देविक इत्यादि । क ग्रहणमुको द्वितीयत्वे कविधानार्थम् (उगियुः (५।१।७२) इति शेषः) वायुदत्तः, वायुकः, पितृकः । चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः । बृहस्पतिक इत्यादि । अनजादौ च विभाषा लोपो वक्तव्यः । देवदत्तकः देवकः पूर्वपदस्य च । लोपः पूर्वपदस्य दत्तिक इत्यादि । विनापिप्रत्ययं पूर्वोत्तरपदयोर्वालोपो वाच्यः । देवदत्तः दत्तः देवः । उर्वणाल्ल इलस्य च । भानुदत्तः, भानुल । ऋवर्णादपि । सवित्रियः सवितृलः ।

१६५. अत्र बाहुल्यादर्थविशेषेऽपि प्रत्ययं स्मरन्ति । तथा यावालक्ताभ्यां द्रव्ये । यावकोऽलक्तकः लाक्षारसः । अन्यत्र यावोऽलक्तो लाक्षैव । एवं सर्वत्र प्रत्युदाहरणम् । मणेर्भाण्डे मिणकः । पीतात तरुव्याध्योः—पीतको दारुहरिद्रा रोगभेदश्च । चन्द्रान्मेचके—चन्द्रको मयूरपुच्छस्थो मेचकः । इवार्थे क इत्यन्ते । कञ्चुकटीभ्यां भूषणे—कञ्चुकः, कटीकः । इन्दोरौषधे—इन्दुकः । अस्थ्नः कङ्काले—अस्थिकः । अर्च्चिषः प्रदीपे सलोपश्च—अर्च्चिकः प्रदीपभेदः । गड़ोरव्याधौ—गडुकः । गेन्दोः कन्दुके । (गोण्डुकः) गेन्दुकः । समुद्गः सम्पुटाभ्यां तयोः—समुद्गकः, सम्पुटकः । तयोः किम् ? समुद्गं भुङ्क्ते—सम्पुटिः पत्रस्य । भृताद्वैतनिके—भृतकः । भिक्षोर्भिक्षाजीविनि—भिक्षुकः । पत्राद् गन्धद्रव्ये—पत्रकः । नलात् प्राण्यङ्गे—नलकम् । पुस्तात् पुस्तके—पुस्तकः । जालात् स्तवकादौ—जालकम् । वर्च्चसो विधि—वर्चस्कः । गण्डाद् वटचतुष्कादौ—गण्डकः । स्वस्तेर्वेश्मादौ—स्वस्तिकः । गन्धाद् गन्धाश्मनि—गन्धकः । अणोर्निपुणे अणुको निपुणः । अन्यत्राणुर्व्रीहिभेदः । उष्णशीताभ्यामृतौ—

१६७. काललोहितादनित्यवर्णे रक्ते च ।

कः स्यात् । वैलक्ष्येणकालकं मुखम्, कोपेन लोहितकं चक्षुः । रक्ते रागवाचिनः कालकः पटः लोहितकः । *लोहितको मणौ च । अयं मणौ च स्यात् ।

१६८. तूष्णीं शीले ।

तूष्णीकः, मलोपो निपात्यते ।

१६९. क्तादनत्यन्तगतावनर्द्धार्थे ।

क्तन्तात् कः स्यात् । नात्यन्तं भिन्नं भिन्नकम् । छिन्नकम् । अनर्द्धार्थे इति किम् ? अर्द्धङ्कृतम्, सामिभक्तम् ।

उष्णको ग्रीष्मः, शीतकः शिशिरः । लुलविदाताभ्यां पशौ—लुलको मेघविशेषः, विदातको मृगः । पुत्रात् कृत्रिमे । पुत्रकः पुत्तलिकादिः । यत्र कृत्रिमपुत्तलिकैरित्युक्तम्, तत्रानुकम्पार्थो बोध्यः । पुष्पाद् विमाने—पुष्पकं कुबेररथः । शून्याद्रिक्ते—शून्यको धनादिहीनः । दानात् कुत्सिते—दानकं कुत्साकरवेतनम् । तनोः सूत्रे—तनुकं पिचुविकारः । कुमारक्रीडनकेभ्यः—कन्दुकः, भ्रमरकः । गिरकः, शृङ्गकम् । जातौ प्रियादेः—प्रियकश्चित्रकः मृगजातिः । गुह्यको देवयोनिजातिः । गोलकः कुब्राह्मणजातिः । करको भाण्डजातिः । ईयसः । ज्यायानेव ज्यायस्कः । श्रेयानेव श्रेयस्कः । एवं नान्तकायकादयोऽपि ज्ञातव्याः ।

१६७. रक्ते रागवाचिन इति रक्तार्थे प्रत्ययो विधीयमानो रागवाचित्वमनयोरित्यर्थः । किञ्च यदावर्त्तस्य यावद् द्रव्यभावितः तदास्योदाहरणम् । अनित्यतायान्तु-पूर्वेणैव सिद्धिः । किञ्च लोहितशब्दात् प्रथमं स्त्रीत्वविवक्षायां श्वैतत् (५।२।२५) इति सिद्धाल्लोहिनीशब्दात् कप्रत्यये कृते लोहिनिकेति । प्रथमं कश्चेद्विधीयते तदा लोहितकेति । अनित्येति किम् ? लोहितो गौः । लोहितं रुधिरम् । यावद्द्रव्यभावित्वादत्र नित्यो वर्णः । यदि तु द्रव्यविनाशे वर्णनाशादनित्यत्वं स्यात् तदा नित्यग्रहणमनर्थकमेव स्याद्वृत्तेरभावात् । वर्णेति किम् ? यदतिवर्णग्रहणे द्रव्यस्य नित्यमिति विशेषणं स्यात्, ततश्च लोहितकः । परमाणव इति को न स्यात् । परमाणूनां नित्यत्वात् । वर्णग्रहणे सति नित्योऽपि द्रव्ये चानित्ये वर्णः प्रत्ययः सिध्यति । तैर्व्यवहारासम्भवाद् वर्णग्रहणमन्यैः प्रत्याख्यानम् । लोहितो यावद् द्रव्यभावित्वात् स्वभावरक्तत्वाच्च पूर्वस्यायमविषयः । लोहितकनिर्म्मित भुव इति माघः । मणौ किम ? लोहितः पर्व्वतः ।

१६९. विधये विशेषणमन्त्यमिति न्यायात् । क्तान्तादित्यर्थः अनत्यन्तार्थे गम्यमाने

१७०. **बृहत्या आच्छादने ।**

कः स्यात् । बृहतिकं वस्त्रम् ।

१७१. **ह्रस्वाल्पयोः ।**

अनयोरर्थयोः कः स्यात् । ह्रस्वो दण्डो दण्डकः, अल्पं घृतं घृतकम् । *संज्ञायाञ्च । ह्रस्वो वंशो वंशकः, वेणुकः ।

१७२. **कुटी-शमी-शुण्डाभ्यो रः ।**

अल्पा कुटी कुटीरः, शमीरः, शुण्डारः ।

१७३. **कुत्वा डुपः ।**

अल्पा कुतुः कुतुपः ।

१७४. **कासूगोणीभ्यां तरट् ।**

ह्रस्वाकासू कासूतरीः गोणीतरी (कासुः शक्तिर्नामास्त्रम् ।

१७५. **वत्सतरोऽति बाल्ये ।**

अतिक्रान्तबाल्ये तरडन्तो निपात्यते ।

१७६. **उक्षतरोऽतियौवने ।**

अयमतिक्रान्तयौवने स्यात् ।

१७७. **अश्वतरः खरजन्ये ।**

स्यात् ।

१७८. **ऋषभतरो मन्दे ।**

अयं वाहनादि मन्दे स्यात् ।

१७९. **पाद्-शत-मोदकाद् वीप्सार्थे संख्यापूर्व्वादिकः स्त्रियां पादस्य पदञ्च ।**

एभ्यो वीप्सार्थे संख्यापूर्वेभ्यः स्त्रियामिकः स्यात् । पदस्य पदञ्च । द्वौ द्वौ पादौ तद्धितार्थे द्विगुः, द्विपदिकां ददाति गच्छति वा, द्विपदिकां दण्डितः, द्विमोदकिकामश्नाति ददाति वा । *दण्डदानयोरवीप्सार्थे च । द्विपदिकां दण्डितः ददाति व्यवसृजति ।

क्तान्तात् स्वार्थे कन् स्यात् । अर्द्धार्थोपपदे तु न स्यात् । भिन्नकीकृत्य षड्जमिति माघः । अर्द्धकृतमिति स्वयं सामीति तत्पुरुषः । अनत्यन्तेति किम ? भिन्नं काष्ठम् (किञ्चानात्यन्तिकस्य) समादिभिरुक्तत्वादनर्द्धार्थे इति प्रत्याख्यातमन्यैः अभिन्नोपपन्नबहुसुकरादेस्तरादित्येके । अभिन्नतरकमित्यादि ।

१७२. प्रकृतिलिङ्गातिक्रमस्यापि क्वाचित्कत्वादाह कुटीर इति ।

१७९. पदञ्चेति चकारोऽयमन्वाचयशिष्टः, द्व्यपूपिकामश्नातीति दर्शनात् । पादशत-

१८०. **तदत्र भक्षं संज्ञायाम् ।**

अत्रार्थे इकः स्यात् । संज्ञा चेत् । गूड़ापूपा भक्षा अस्यां गुडापूपिका पौर्णमासी, तिलापूपिका ।

१८१. **वटकादिन् ।**

वटकिनी पौर्णमासी ।

१८२. **प्रकारे जातीयः ।**

स्यात् । पटुप्रकारः पटुजातीयः, मृदुजातीयः, तज्जातीयः ।

१८३. **स्थूलादेकः ।**

स्थूलप्रकारः स्थूलकः यवकः, अश्वकः, चञ्चत्कः बृहत्कः जटिलकः ।

मोदकादित्युपलक्षणम् । द्वौ द्वौ माषौ ददातीत्यनभिधानात् वाक्यमेव । किञ्च द्विमोदकिकां ददादीत्यत्र प्रत्ययस्य वीप्सार्थद्योतनान्न द्विरुक्तिः ददातिरप्यारोपणार्थः । दानार्थत्वे तु परसूत्रेण विधिः । अतएव वक्ष्यति व्यवसृजतीति । तत्पुनरवीप्सार्थमेव । *दण्डः दण्डे दाने च गम्यमानेऽवीप्सार्थे संख्यापूर्वेभ्यस्तेभ्यः स्त्रियामिकः स्यात् । इहापि द्वौ माषौ ददातीति वाक्यमेव ।

१८२. सामान्यस्य भेदको धर्मः प्रकारः । स च द्रव्याश्रितः पटुत्वादिः । अत्रोपचारात्तद्द्वति वर्त्तमानान्नाम्नो जातीयः स्यात् । तथा च प्रकार इति जातीय इति वासवतं परिशिष्टम् । पटुत्वप्रकारान् पटुजातीयः । था—प्रत्ययः प्रकारे । अयं प्रकारवतीति विषयभेदाज्जातीय इत्यत्र था प्रत्ययेनास्य बाधा न भवति । अतएव प्रकार वाचकात्तथाशब्दात्तत्प्रकारवति जातीयो भवतीत्याह तथाजातीय इति ।

१८३. तत्प्रकारवति वाच्ये स्थूलादेरुत्तरे जातीयबाधकः कः स्यात्—स्थूलको मणिः । यवाद्व्रीहौ—यवकः, वोरवधान्यम् । अणोर्माषेयु—अणुका माषाः । यः स्फुटकन्तिकत्वादचक्षन्नपि चक्षन् (चणवन्नि) लक्ष्यते स चञ्चत्कः । चञ्चता गत्वरेण सदृशचञ्चत्क इति पुरुषोत्तमः । एवं प्रभामण्डलयोगादबृहन्न यो बृहन्निव लक्ष्यते स बृहत्कः । अनयोः सादृश्यमेव प्रकारार्थं व्याचष्ये । अतएव चञ्चद्बृहतोश्चेति पाणिनिसूत्रम् । किञ्च कुमार्याः पुत्रश्शुरयोः । कुमारीपुत्रकः । कुमारीश्वशुरकः । पत्रमूलाद्व्यस्ताच्च—पत्रमूलकः, मूलकः, पत्रकः । अवदातात् सुरायाम्—अवदातिका । बटाच्चोलात् सुरायामित्येके, वटिका, अच्चोलिका । गोमूत्रादाच्छादने—गोमूत्रप्रकारमाच्छादनं गोमूत्रकम् । जीर्णाच्छालिषु—जीर्णाः प्रकाराच्छालयो जीर्णकाः । माषात् परिमाणे—माषकः

१८४. **प्रतिरूपे च**

कः स्यात् । वासुदेवस्य प्रतिरूपं वासुदेवकः । अश्वकः । गर्दभकः ।

१८५. **लुप्देवपथादेः ।**

एभ्यः कस्य लुप् स्यात् । देवपथस्य प्रतिरूपं देवपथः, हंसपथः, काश्यपपथः, चञ्चाप्रतिरूपो मनुष्यः चञ्चा, लुपि युक्तवत् ।

१८६. **जीविकार्थेऽप्यविक्रये ।**

लुप् स्यात् । वासुदेवकः, आजीवोऽस्य वासुदेवः, आदित्यः, या प्रतिमां गृहीत्वा भ्रमति स उच्यते । अविक्रय इति किम् ? वासुदेवकान् विक्रीणीते ।

१८७. **इवे कुशाग्रादीयः ।**

इवार्थे कुशाग्रदीयः स्यात् । कुशाग्रमिव कुशाग्रीया बुद्धिः ।

१८८. **काकतालादेराकस्मिके ।**

काकगमने तालपतनं निपातनात् (समासः) काकतालम्, तदिव आकस्मिको देवदत्तस्य दस्युना संयोग इति काकतालीयम, अजाकृपाणीयम् ।

१८९. **वस्तेष्टेयण् ।**

वस्तिरिव वास्तेयः, वास्तेयी ।

सुवर्णपरिमाणम् सुराया अहौ । सुरावर्णप्रकारः सुरकोऽहिः । केऽणोऽकपीति ह्रस्वः । कृष्णात्तिलेषु—कृष्णकास्तिलाः । दशगणत्राणजटिलप्रकारा जटिलिका ।

१८६. प्रतिमालेख्य (ख्याते) ध्वजेष्वभिधानम् । विक्रेयव्यरिक्तं यत् प्रतिमादि तत् जीविकार्थम्, तस्मिन् वाच्ये कस्य लुप् स्यात् । स्कन्दः, शिवः । आलेख्ये—रामः, अर्जुनः, कृष्णः । ध्वजे—मयूरः, गरुड़ः, हंसः, वृषभः । एष्विति किम् ? हस्तिकान्, सिंहकान् छायादर्शको दर्शयति ।

१८७. इवार्थोऽत्र सादृश्यम् । कुशाग्रमिव तीक्ष्णेति शेषः । कुशाग्रादित्युपलक्षणम् । अर्द्धजरतीशब्दस्तत्तुल्ये वर्त्तते, तद्वदिष्टानिष्टत्वात् अर्द्धजरतीयम् । एवं घुण-विकारात् कथाञ्चिल्लेख्यमक्षरम्, तदिव यत् कुशलेन दैवान्निष्पन्नं तत् घुणाक्षरीयम् ।

१८८. इह काकतालसमागमसदृशो दस्युसमागम इति समासार्थः । तत्प्रयुक्तः । काक-मरणसदृशस्तु प्रत्ययार्थः । काकतालशब्दः काकगमने तालपतनेन काकवधे वर्त्तते इति वासवतं परिविष्टम् । एवं खलतिबिल्वकीयम् ।

१९०. **शिलायाष्टेयश्च ।**

शिलेव शिलेयं शैलेयञ्च ।

१९१. **शाखादिभ्यो यः ।**

शाखेव शाख्यम्, मुख्यम्, जघन्यम् ।

१९२. **दोर्भव्ये ।**

द्रुरिव सर्वाश्रयं द्रव्यमयं ब्राह्मणः ।

१९३. **शर्क्करादेरण् ।**

एभ्योऽण् स्यात् । शर्क्करेव शार्क्करम्, कपालम् । *अः सपत्न्या इति वक्तव्यम्- सपत्नीव सपत्नः । प्रतिपक्ष उच्यते) ।

१९४. **अङ्गुल्यादेष्टिकण् ।**

अङ्गुलीव आङ्गुलिकः ।

१९५. **इकश्चैकशालायाः ।**

अस्या इकः स्यात् । एकशालेव एकशालिकः ऐकशालिकश्च ।

१९६. **कर्क्क लोहितादीकण् ।**

कर्क्क इव कार्क्कीको वृषः, लोहितीकः । गता इवार्थाः ।

१९७. **रूपः प्रशंसायायाम् ।**

रूपः स्यात् प्रशंसाचेत् । प्रशस्तो याज्ञिकः याज्ञिकरूपः, छात्ररूपः ।

---

१९२. द्रुरिव सर्वाश्रयो द्रव्यमसौ पुरुषः स्वभावान्नपुंसकलिङ्गम् । यथा द्रुः फलादिभिरर्थिनः प्रेणाति तथायमपि । स हि भवतीति भव्य. । आत्मगुणसम्पन्नोऽपि द्रव्यमुच्यते । यथा—क्रिया हि द्रव्यं विनयति नाद्रव्यमिति । हिरण्यादिकमपि द्रव्यम्, पुरुषार्थसाधकत्वात् । निर्द्रव्यं पुरुषं त्यजन्ति गणिका इति द्रव्यं स्यात् पित्तले वित्ते पृथ्वादौ च विलेपने । क्लीबेऽथ भेषजे द्रुविकारे च वाच्यवदिति मेदिनीकारः । द्रव्यं शुभे च सभ्ये च योग्ये भाविनि च त्रिष्विति ।

१९६. अनुपातार्थ विशेषाः प्रत्ययाः प्रकृत्यर्थविशेषकत्वात् तस्यैव लिङ्गवचनभाजो भवन्ति ।

१९७. आख्यातं क्रियाप्रधानमिति न्यायात् साधनस्थयोर्लिङ्गवचनयोस्तत्रायोगाद्रूपान्तादौत्सर्गिकमेकवचनम् ।

१९८. तिङः क्लीबे ।

प्रशस्तं पचति पचतिरूपम् ।

१९९. ईषदसमाप्ते कल्प-देश्य-देशीयाः ।

ईषदसमाप्ते वाच्ये कल्पादयः स्युः । ईषदिन्द्राण समाप्त इन्द्रकल्पः, पण्डित-देश्यः, मुनिदेशीयः । *तिङश्च— दीयतेकल्पम्, पचतिकल्पम् ।

२००. सुपो बहुर्व्वा पूर्व्वे तु ।

ईषदसमाप्तार्थात् सुबन्तात पूर्व्वे एव बहुर्व्वा स्यात् । बहुगुड़ा द्राक्षा, गुड़कल्पा "लघुर्बहुतृणं नयः" इति माघः, तृणदेश्यः ।

२०१. कियंत्तदेकेभ्यो डतरोद्वयोरेकस्य निर्धारणे ।

नामगुणादिभिर्द्वयोरेकस्य पृथक्करणे किमादेर्डतरः स्यात् । कतरो भवतोर्मैत्रः, यतरो भवतोः पटुः, ततरो भवतोः कारकः, एकतरो भवतोर्धनी ।

२०२. वा बहूनां डतमो जातिपरिप्रश्ने ।

जातिपरिप्रश्ने बहूनामेकस्य निर्द्धारणे कियतदेकेभ्यः डतमो वा स्यात् । कतमो भवतां कठः ? को वा । यतमो यो वा । ततमः स वा । एकतमः एको वा भवतां कठः । जातिपरिप्रश्न इति किम् ? को भवतां चैत्रः ।

२०३. एकादसहाये काऽऽकिनौ ।

स्याताम् । एककः, एकाकी, वेत्येव— एकः । एकलश्चेत्येके ।

२०४. भूतपूर्व्वे चरट् ।

स्यात् । आढ्यो भूतः पूर्वम्, आढ्यचरः, पटुचरी ।

---

२००. प्रातिपदिकादित्यधिकृत्यापि तिङोऽत्राननुवृत्त्यर्थं सुप इत्युक्तम् । पञ्चाम्यां तत् उत्तरे इति बाधनार्थं पूर्व्वे इत्युक्तम् । बहुगुड़ो द्राक्षे, स्वभावादयं प्रकृतिलिङ्गं नातिवर्तते । न हि स्वभावव्यतिरिक्तो लिङ्गव्यवस्थाहेतुरस्ति । तथाचोक्तम्— "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" अत एव स्यादीषदसमाप्तौ च वभूव प्रकृतिलिङ्गक इति गौरङ्गम्, न लिङ्गानुशासनम् । बभूव पूर्व्वस्य स्वलिङ्गतै-वेति श्रीपतिवासवतादयः । लघुर्बहुतृणं नर इति माघः । किञ्च बहुगुड़ा द्राक्षेति काशिकोदाहरणे स्त्रीत्वमिह लोकाश्रयत्वाल्लिङ्गस्येति न्यासकृता सिद्धान्तितम् । चान्द्रैरप्युभयमेव समर्थितम् ।

२०४. भूतपूर्व्वस्य वर्त्तमानार्थत्वमस्ति, पूर्वशब्दस्य दिग्देशार्थत्वमस्तीत्युभयग्रहणम् । तेनाढ्यादीनां सर्वथाऽतीतत्वे प्रत्ययः ।

२०५. **षष्ठ्या रूप्यो वा ।**

षष्ठ्यन्तात् रूप्यो वा स्यात् । ब्राह्मस्य भूतः पूर्व्वम् ब्राह्मणरूप्यो देशः पक्षे चरट्-ब्राह्मणचरः ।

२०६. **पाशो हीने ।**

हीने वाच्ये पाशः स्यात् । हीनो याज्ञिकः, याज्ञिकपाशः, शाब्दिकपाशः ।

२०७. **तमः सातिशयादिष्ठश्च गुणात् ।**

प्रकर्षयुक्तात् तमः स्यात् । (इमे पाचकाः) अयमेषामतिशयेन पाचकः पाचकतमः । गुणादिष्ठश्च, अयमेषामतिषयेन पटुः, पटिष्ठः पटुतमश्च ।

२०८. **द्विविभज्यस्य तरो गुणादीयसुश्च ।**

द्वयोर्व्विभक्तस्य च सातिशयात् तर, स्यात् । अयमनयोरतिशयेन पाचकः पाचकतरः गुणादीयश्च, अयमनयोरतिशयेन पटुः, पटीयान्, पटुतरश्च । विभज्यस्य सातिशयात् पाश्चात्या गौड़ेभ्यः पटुतराः, पटीयांसः ।

---

२०८. द्विविभज्यस्येति समाहारे द्वन्द्वः । विभज्येति यदणन्तादेतित्यादिपदाद् यत् । विभज्यस्य सातिशयादिति । अत्र पाश्चात्या विभक्तव्या गौडेभ्यः इति विभक्तात् पञ्चमी । अन्ये त्वत्रापि संप्रधारणायां द्वयोरेकस्य प्रकर्षः, बहुवचनन्त्वयवापेक्षमित्याहुः । किमथ पुरुषयं पटुरासीत् पटुतरश्चेत्यादौ व्यवस्थाभेदेन पृथकत्वम् । जातिद्रव्ययोः प्रकर्षाभावादेव तरो डित्थरः इति न भवति । यदात्वार्थोऽपि गुणक्रियाप्रकर्षौ विवक्ष्यते तदा तरतमौ भवत एव । पाणिनीयास्तु प्रकर्षाद्यर्थमन्तरेणापि क्वचित् स्वार्थमात्रेऽपि तरादयः सम्भवन्तीति तरतमपौ स्त इत्यनेन ज्ञापयाम्बभूवुः । तेन त्वत्तरो यासीत्यनेनात्र मध्यमपुरुषः युष्मदर्थस्यैव प्रकृतत्वात् परमार्थवदिति मैत्रेयः । भेदाभेदविवक्षायां कल्पादौ तूभयं भवेत् । यथा त्वात् कल्पो मैत्रेयोऽसीति मैत्रेयतावदेवादयः । प्रभूतं प्रचुरं प्राज्यमद्रवं बहुलं बहु । पुरुहं पुरु भूयिष्ठं स्थिरं भूयश्च भूरि चेत्यमरोऽपि पर्य्यायमाह । अन्यथा अतिशायनस्याधिक्यात् पर्य्यायो न स्यात् । अन्य एवान्यतरः एकार्थावितौ । तथा भिन्नमेवाभिन्नतरम् । तथोपपन्नतरमुच्चैस्तरमिति चान्द्रविस्तारादौ दर्शितम् । तदिहाप्यनिष्टविषयत्वात् प्रकर्षाद्यर्थाभावेऽपि मन्तव्यम् । कथं कुमारतराब्रह्मणतरेत्यादौ वयस्यवयवे जातेरस्त्रीविषयादिति ङी न स्यात् ? उच्च्यतेतरामुस्तानां तत्रारूढ़त्वात् रूढया वयोवचना जातिवचनान्ता एव तत्र गृह्यते । तरतमादयः स्वार्थका इति भाष्यम् । तथा प्रकृतेरेवार्था इत्यापिशलीयाः । स्वार्थिकानां प्रकर्षायर्थद्योतकत्वमात्रे प्रत्ययत्वमिति कातन्त्राः । नातत्स्थादिष्ठेयसौ । अतत्स्थादगुणात्तौ नः स्तः । शुक्लतरः शुक्लतमः

२०९. **तिङश्च तरतमौ ।**

सातिशयात् अयमनयोरतिशयेन पचति पचतितराम्, अयमेषामतिशयेन जल्पति जल्पतितमाम् ।

२१०. **वैसारिणो मत्स्ये ।**

निपात्यते ।

२११. **भेषजादेर्यण् स्वार्थे ।**

स्यात् । भेषजमेव भैषजम्, आनन्त्यम्, आवसथ्यम्, औपम्यम्, सामीप्यम्, सामान्यम्, चातुराश्रम्यम्, चातुर्वर्ण्यम्, चातुर्विद्यम्, यौगपद्यम्, सान्निध्यम्, साहित्यम्, त्रैलोक्यम्, षाड्गुण्यम्, वैश्यः । इतिह पारस्पर्योपदेशेऽव्ययम्—ऐतिह्यम् ।

२१२. **आभिजितादेर्बहुषु लुक् च ।**

एभ्योऽणन्तेभ्यः स्वार्थे यण् स्यात् । आभिजित्यः । बहुषु लुक् च । आभिजिताः, वैदभृत्यः, वैदभृताः । एवं शालावतः, शामीवतः, और्णावतः, आश्रुमतः, शैखावतः ।

२१३. **देवात्ताप् ।**

स्वार्थे ताप् स्यात् । देवता ।

२१४. **नव्य-नवीन-नूतन-नूत्ना-नवे ।**

चत्वारोऽमी नवार्थे निपात्यन्ते ।

२१५. **प्रीण-पण-प्रतन-प्रत्नाः पुराणे (पुरातने) ।**

एते चत्वारः पुरातनार्थे स्युः ।

२१६. **क्षेमादेर्यः ।**

स्वार्थे क्षेमादेर्यः स्यात् । क्षेम्यम्, मर्त्यः यविष्ठ्यः ।

२१७. **भाग-रूप-नाम्नो धेयः ।**

स्वार्थे धेयः स्यात् । भागधेयम्, रूपधेयम्, नामधेयम् ।

२१८. **प्रज्ञादेरण् ।**

स्वार्थे—प्रज्ञ एव प्राज्ञः, प्राज्ञी स्त्री, देवता दैवम्, वणिक् वणिजः, मनो—मानसम्, मरुत्—मारुतः, रक्षो—राक्षसः, चोर—चौरः, शत्रु—शात्रवः, पिशाचः—पैशाचः, बन्धुर्बान्धवः, विकृतं—वैकृतं; द्विता—द्वैता, प्रतिभा—प्रातिभम्, चण्डाल—चाण्डालः, चतुष्पथं चातुष्पथमित्यादि ।

शुक्लादयोऽपि स्वातन्त्र्येणार्थं प्रत्ययान्ति न पाटवादयः । यथा पटस्य शुक्लः । न तथा पटो पटुरिति बहुलानुवृत्तेरितिदमवसेयम् ?

२१९. **ओषधेरजातौ ।**

औषधं व्याधिनाशनम् ।

२२०. **वयसः काके ।**

वायसः ।

२२१. **कर्म्मणो वाचिकयुक्तात् ।**

वाचा प्रतिपादितं कर्म्म कार्म्मणम् ।

२२२. **विनयादिभ्याष्टिकण् ।**

स्वार्थे । विनय एव वैनयिकः, अनुगादी-अनुगादिकः, समयः-सामयिकः, उपचारः—औपचारिकः । उपायस्य ह्रस्वश्च—औपयिकम्, अत्ययः—आत्ययिकः । स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते । मुक्ता—मौक्तिम्, व्यवहारः—व्यावहारिकः, समूहः—सामूहिकः, विशेषो वैशेषिकः ।

२२३. **अकस्माट्टिलोपश्च ।**

आकस्मिकम् ।

२२४. **वाचो व्याहृतार्थायाः ।**

उक्तार्था वाग् वाचिकम्, सन्देशवागित्यर्थः ।

२२५. **तीयाट्टीकण्णविद्यायाम् ।**

स्वार्थे तीयान्तात् टीकण् स्यात् । द्वैतीयीकी, तार्त्तीयीकी । अविद्यायां किम् ? द्वितीया विद्या ।

२२६. **वर्णात्कारः ।**

स्वार्थे, अक्कारः, ककारः, ओङ्कारः ।

२२७. **रादिफः ।**

रेफः ।

२२८. **मृदस्तिकः ।**

मृत्तिका ।

२२९. **स-स्नौ प्रशंसायाम्**

प्रशस्ता मृत्—मृत्सा, मृत्स्ना, रूपस्यापवादः ।

२३०. **इन्द्रियमिन्द्रलिङ्गेन्द्रदृष्टादौ ।**

निपात्यते । इन्द्रः प्रत्यगात्मा, तस्य लिङ्गम्, तेन दृष्टं, तेन सृष्टं, तेन जुष्टं दत्तं वा इन्द्रियम् ।

२३१. **छन्दोऽधीत इति श्रोत्रियो वा ।**

अत्रार्थे श्रोत्रियो निपात्यते । पक्षे छान्दसः ।

२३२. **श्रोत्रियो जन्मान्तरदेहचिकित्स्ये ।**

निपात्यते क्षेत्रियोऽयं कुष्ठव्याधिः ।

२३३. **तत्भुक्तमनेन श्राद्धादिनिकौ ।**

अत्रार्थे श्राद्धादिनिकौ स्याताम् । श्राद्धं भुक्तमनेन श्राद्धी श्राद्धिकः ।

२३४. **इष्टादि-कृतपूर्व्वादेरिन् ।**

एभ्यः इन् स्यात् । अनेनेत्येव । इष्ठमनेन इष्ठी यागे । अधीती व्याकरणे । कृती कटे, श्रुती शब्दे, निराकृतीत्यादि । कृतादि पूर्व्वात् पूर्व्वादेव, कृतं पूर्व्वमनेन सुप्सुपेति समासः । कृतपूर्व्वीकटान् । अत्र न तद्धितप्रयोगे इति षष्ठी निषिद्धा । भुक्तपूर्व्वी, दृष्टपूर्व्वी, श्रुतपूर्व्वीत्यादि । *पूर्वाच्च—पूर्व्वं भुक्तं पीतं आ(शि)सितं वा अनेन पूर्व्वी पूर्व्वीणौ ।

२३५. **साक्षी साक्षाद् द्रष्टरि ।**

इनन्तः साक्षी निपात्यते ।

२३६. **अनुपद्यन्वेष्टा ।**

अनुपदी स्यात्, अन्वेष्टा चेत् ।

२३७. **तदस्यास्त्यस्मिन् वेति मतुः ।**

अत्रार्थे मतुः स्यात् । गुणोऽस्यास्ति अस्मिन् वा इति गुणवान् । भूम-निन्दा-प्रशंशासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां मत्वार्था हि भवन्त्यमी ॥

भूम्नि बहुत्वे—गोमान् । नन्दादौ— ककुदावर्त्ती ह्यः । प्रशंसायाम्—रूपवान् । नित्ययोगे—क्षीरी वृक्षः । अतिशये—उदरी । संसर्गे—छत्री । अस्ति विद्यते पुत्री(री) । शुक्लादयः शब्दा गुणिनि गुणे च वर्त्तन्ते एव, तेभ्यो मत्वादयो नेष्यन्ते । तथा—मत्वर्थाच्छैषिकात्तुल्यो न मत्वर्थो न शैषिकः । न भावप्रत्ययो भावान्न सन्निच्छासनन्ततः । तुल्यभावप्रत्ययनिषेधादिह भवति । दण्डिमान्, दाक्षिणात्यीयम्, पाकत्वम् । जुगुप्सिषते ।

२३८. चूड़ादेर्लो बहुलम् ।

चूड़ास्यास्ति अस्मिन् वा चूड़ालः, चूड़ावान्, जङ्घालः, शिरालः, सिध्मलः, सिध्मवान्, गड्डुलः, बहुलः, श्लेष्मलः। पार्ष्णिधमन्योर्द्दीर्घश्च बाहुल्यात्। पार्ष्णीलः, धमनीलः, स्नेहलः, यूकालः, मूर्च्छालः। *वत्सलः प्रक्रमवति। *अंशलो बलवति। *जटादेरुत्कटे। जटालः, घटालः, कीलालम्, विचर्च्चिकालः, विपादिकालः, कर्णिकालः।

२३९. अद् व्रीहादेरिनिकौ।

अदन्तात् व्रीह्यादेश्च सामान्येन इनिकौ स्याताम्। दण्डी, दण्डिकः, दण्डवान्, कार्षी, कायिकः। धनादुत्तमर्णे च। धनी, धनिकः। बहुलानुवृत्त्या एकाक्षराण्डकाज्जातेः सप्तम्यां च न तौ स्मृतौ। खवान्, कारकवान्, वृक्षवान्, दण्डाः सन्त्यस्यां, दण्डवती-शाला। सुखादेरिन्नेव, सुखी, दुःखी, पातकी, गृही। *द्वन्द्वेऽतन्दङ्गात् प्राणिस्थात्। कटकवलयिनी, शङ्खनूपुरिणी। न तदङ्गात्-स्तनकेशवती। *गहर्चरोगाभ्याञ्च। ककुदावर्त्ती, जरी, शूली,। *धर्मशीलवर्णान्ताच्च। द्विजधर्मी, भिक्षुशीली, द्विजवर्णी। *वयसि पूरणान्तात्। पञ्चमो मासो वयो यस्यास्ति पञ्चमी हयः, दशमी वृक्षः। *कर-हस्त-दन्ताद्गजे। करी, हस्ती, दन्ती। वर्णी ब्रह्मचारिणि। *अर्थी प्रार्थके। सर्व्वबीजादेः। सर्व्वबीजी, सर्व्वधनीः सर्व्ववेशी, बाहुबली, ऊरुबली। *पुष्करादेः संज्ञायाम्। पुष्करिणी, पद्मिनी, तपस्विनी, उत्पलिनी, हेमनी। *द्वीपी व्याघ्रे। व्रीह्यादेः खल्वपि। व्रीही, वीहिकः, व्रीहिमान्। शाली, शालिकः, शालिमान्। माषी, माषिकः, माषावान्। *शिखादेरिन्। शिखी, शिखावान्। माली, मेखली, संज्ञी, वीणी, जटी, पताकी, कर्मी, चर्मी। *नावादेरिकः। नाविक इत्यादि।

२४०. पिच्छादेरिलः।

पिच्छलः। मतुः सर्व्वत्र। पिच्छावान्। *फेनाल्लश्च। फेनिलः, फेनलश्च, जटिलः, तुन्दिल। बहुलमित्येव। तुन्दी, तुन्दिकः, उदरिलः, उदरी, उदरिकः, कर्णिकः, कर्णिलः, कर्णी।

२४१. स्वामीश्वरे।

अयमीश्वरे निपात्यते।

२४२. वातादेः किन्।

स्यात्। पातकी, अतिसारकी, पिशाचकी, पिशाचवान्।

२४३. लोमादेः शः।

लोमशः, कपिशः।

२४४. **पामादेर्नः ।**

पामः, श्लेष्मणः, हेमनः, बलिनः । लक्ष्म्या ईदच्च । लक्ष्मणः । अङ्गात् प्रशंसायाम् । अङ्गना । दद्र्वा वा ह्रस्वश्च । दद्रुणः, दद्रूणः ।

२४५. **ज्योत्स्नादेरण् ।**

ज्यौत्स्नः पक्षः, तामसः, साहसः, तमिस्रः, कौतपः, वैपादिकः, शार्करः, कौण्डलः, वैसर्पः । *सहस्रदिन् च । सहस्रः, सहस्री । तपो विन् वक्ष्यते । तपस्वी ।

२४६. **सिकता-शर्क्कराभ्यां देशे लुबिलौ च ।**

आभ्यां देशे वाच्ये इणोलुप् इलश्च, चकारादण् च । सिकता देशः, सिकतिलः, सैकतः सिकतावान । शर्करा, शर्करिलः, शार्क्करः, शर्क्करावान् ।

२४७. **प्रज्ञा-श्रद्धाऽर्च्चावृत्तिभ्यो णः ।**

एभ्यो णः स्यात् । प्राज्ञः, प्राज्ञा स्त्री, प्रज्ञावान् । श्राद्धः, श्रद्धावान्, आर्च्चः, अर्च्चावान्, वार्त्तः, वृत्तिमान् ।

२४८. **अस्-मायामेधास्रजोविन् ।**

एभ्यो विन् स्यात् । असन्तात्—तेजस्वी, तपस्वी, तपस्वान् । मायावी, मेधावी, स्रग्वी । *आमयादाविन् । आमयावी ।

२४९. **दन्तादुर उन्नतात् ।**

उन्नतो दन्तोऽस्यास्ति दन्तुरः ।

२५०. **ऊषादिभ्यो रः ।**

ऊषरः, ऊषवान्, शुखिरः, पुष्करः, मधुरः, मुष्करः । पाण्डरः, पाण्डुरः, कुञ्जरः, नगरम् । *कच्छ्वा ह्रस्वश्च । कच्छुरः । *मुखादबद्धमुखे । मुखरः । (खर इत्यधिक पाठः)

२५१. **हिरण्यादेर्व्वः ।**

हिरण्यवः, मणिवः, इष्टकावम्, केशवः । बहुलमित्येव, केशिकः, केशी, केशवान् । *राज्यादेः संज्ञायाम् । राजीवं पद्मम् । राजीवो मत्स्यः । गाण्डिवं, गाण्डीवम्, अजगवं पिनाकः, अजवमित्येके । *अर्णसः सलोपश्च अर्णवः । *मेधारथाभ्यामिरः । मेधिरः, रथिरः, रथी, रथिकश्च ।

२५२. **अण्डकाण्डादीरः ।**

अण्डीरः, काण्डीरः ।

२५३. कृष्यादिभ्यो वलः ।

कृषीवलः, आसुतीवलः, परिषद्वलः, पर्षद्वलञ्च । रजस्वला, ऊर्ज्जस्वलः, भ्रातृवलः । *दन्तावलो हस्तिनि । शिखावलः केकिनि ।

२५४. इनश्च बर्हादेः ।

बर्हिणः, फलिनः, शृङ्गिणः, मलिनः । बर्ही फलीत्यादि च यथादर्शनम् ।

२५५. गोमिन्मलीमसौ ।

एतौ निपात्येते । गोमी, गोमान्, मलीमसः, मलिनः पटः ।

२५६. द्युद्रुभ्यां मः ।

आभ्यां मत्वर्थे मः स्यात् । द्युमो दिवसः, द्रुमः ।

२५७. एकगोपूर्व्वाट्टीकण् ।

स्यात् । एकशतमस्यास्ति ऐकशतिकः, गौसहस्रिकः, ऐकदेशिकः, एकदेशी च । नैकद्रव्यात् । टिकण्णास्ति । एकद्रव्यवान् ।

२५८. शतसहस्रनिष्कादेः ।

टिकण् स्यात् । नैष्कशतिकः, नैष्कसहस्रिकः ।

२५९. रूपात् प्रशंसाहतयोर्यः ।

प्रशस्तं रूपमस्यास्ति रूप्यः पुरुषः । आहतं ताड़नानिष्पादितं रूपमस्यास्ति रूप्यो दीनारः ।

२६०. पदादेश्च ।

यः स्यात् । पदमस्यास्ति पद्यः श्लोकः, हिम्यः पर्व्वतः गुण्या द्विजाः ।

२६१. शृङ्ग-वृन्दाभ्यामारकः ।

शृङ्गारको—वृन्दारकः ।

२६२. ऊर्णायुः ।

निपात्यते ।

२६३. वाग्मी वावदूके ।

निपात्यते ।

२६४. वाचाट-वाचालौ बहुभाषिणि ।

इमौ निपात्येते ।

२६५. **अर्शादेरत् ।**

अत्स्यात् । अर्शोऽस्यास्ति अर्शसः, तुन्दः, काणः, खञ्जः, पलितः, शुक्लः, नीलः, गोधूलः इत्यादि ।

२६६. **पर्वमरुभ्यां तः ।**

पर्व्वतः, मरुतः ।

२६७. **शुभंय्वहंयु-कंयु-शंयु कंयशंया ।**

षडमी निपात्यन्ते । निपातनादनुस्वारः । शुभमस्यास्ति शुभंयु, अहंयु, रहङ्कारवान्, कंयुर्जलवान्, शंयु शुभान्वितः । एवं कंयः, शंयः ।

२६८. **कंशंभ्यां व-भ-ति-तु-ताश्च ।**

आभ्यां वादयश्च भवन्ति । कंवः, शंवः, कंभः, शम्भः, कन्तिः, शन्तिः, कन्तुः, शन्तुः, कन्तः, शन्तः ।

२६९. **तुण्डि-वलि-वटेर्भः ।**

तुण्डिभः, वलिभः, वटिभः, वलिनश्च ।

२७०. **कृपादेरालुः ।**

कृपाऽस्यास्ति कृपालुः, दयालुः, लज्जालुः, निद्रालुः, हृदयालुः, हृदयी, हृदयिको, हृदयवांश्च । *शीतादेस्तन्न सहते । तन्न सहते इत्यर्थः । शीतन्न सहते शीतालुः, उष्णालुः, तृप्रालुः । *हिमादेलुश्च । हिमं न सहते हिमालुः, हिमेलुः (हिमलुश्च) । *बलादूलः । बलं न सहते बलूलः । वातात् समूहे च । वातं न सहते तस्य समूहो (तदस्यास्ति) वा वातू (तु)लः । उक्ता मत्वर्थीयाः ।

२७१. **तस्य भावे त्वतापौ ।**

भवतोऽस्मादभिधानप्रत्ययाविति भावः शब्द प्रवृत्तिनिमित्तं वस्तुधर्मो जात्यादि । तस्य भाव इत्यर्थे त्वतापौ स्याताम् । त्व क्लीबे, ताप् स्त्रियाम् । गोर्भावः गोत्वम्, गोता, शुक्लत्वम्, शुक्लता, सत्त्वम्, सत्ता, क्रियात्वम् । समासादौ सम्बद्धप्रवृत्तिनिमित्तम्, राजपुरुषत्वम् । गार्ग्यत्वम् । पाचकत्वम् । स्वरूपमात्रे च । डित्थत्वम्, चैत्रत्वम् ममेत्यव्ययात् स्वार्थे ममत्वं ममता ।

२७२. **न शेषा नञ्तत्पुरुषादचतुर-सङ्गत-लवण-व (ट) ह-यु (वु) ध-कड़(त)रस-लसात् ।**

शेषा भावप्रत्यया नञ् पूर्व्वात्तत्पूरुषान्न स्युः । अपतित्वम् प्रत्यन्तान्न यण् ।

कथमपाटवम् ? पाटवसिद्धौ पश्चान्नञ्समासेन । चतुरादेस्तु भवति । आचतुर्यम्, आसङ्गत्यम्, आलवण्यम्, आवटचम, आयु(वू)ध्यम्, आकडचम्, आरस्यम्, आलस्यम् ।

२७३. **प्रियादिभ्य इमन् वा ।**

एभ्य इमन् वा स्यात् । इमन् पुंसि, प्रियात् क्लीबे च । प्रियस्य भावः प्रेमा प्रेम वा प्रियत्वं प्रियता । पृथो प्रथिमा पृथुत्वम् । अण् वक्ष्यते पार्थवम् । एवं तनुत्वं तनुमा । प्रिय, पृथु, तनु गुरु, लघु, मृदु, महत्, क्षिप्र, दीर्घ, बहुल, उरु, अणु ।

२७४. **वर्णदृढादेष्ट्यण् च ।**

एभ्यष्टचण् इमन् च वा स्यात् । वर्णात्—शौक्ल्यम्, शुक्लिमा । त्व-तापौ सर्व्वत्र, शुक्लत्वम्, शुक्लता, कार्ष्ण्यम्, कृष्णिमा । दृढादेर्दाढचम्, द्रढ़िमा । जड़चम्, जड़िमा, कार्श्यम्, कृषिमा, वैमनस्यम्, विमनिमा, माधुर्यम्, मधुरिमा । टित्त्वात् ङी—माधुरी, औचित्यम्, औचिती, आनुपूर्व्यम्, आनुपूर्व्वी, वैदग्ध्यम्, वैदग्धी, वार्धिष्यम्, शैत्यम्, औष्ण्यम् इत्यादि ।

२७५. **गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।**

एभ्यो भावे कर्म्मणि च टचण् स्यात् । गुणवचनात् । जड़स्य भावः कर्म्म वा जाडचम्, मौर्ख्यम्, कार्श्यम् । ब्राह्मणादेः—ब्राह्मण्यम्, आभिजात्यम्, मैत्र्यम्, माध्यस्थ्यम्, चापल्यम्, कौशल्यम्, नैपुण्यम्, पैशुन्यम्, काव्यम्, दायाद्यम् । *अर्हतो नुम च । आर्हन्त्यम् । अतो-भावकर्म्मणोर्विधिः प्राग्वतेः ।

२७६. **दूत-वणिक्स्तेनाद् यो नलोपश्च ।**

एभ्यो यः स्यात् । ब्रह्मणादित्वात् टचण् च । दूतस्य भावः कर्म्म वा दूत्यम्, दौत्यञ्च । वणिज्या स्त्रियाम्, वाणिज्यञ्च । स्तेनस्य न लोपश्च—स्तेयम्, स्तैन्यञ्च ।

२७७. **पत्यन्त-राजादेर्यण् ।**

पत्यन्तात् राजादेश्च यण् स्यात् । प्राजापत्यम्, सैनापत्यम् । राजादेः—राज्यम्, सैन्यम्, दैन्यम्, पौरोहित्यम् ।

२७८. **सख्युर्यः ।**

सख्यम् ।

२७९. **कपि-ज्ञातेष्टेयण् ।**

कपेर्भावः कर्म्म वा कापेयम्, ज्ञातेयम् ।

२८०. **अण् प्राणि-वयोन-वचनोद्गात्रादिभ्यः ।**

एभ्यो अण् स्यात् । अश्वस्य भावः कर्म्म वा आश्वम्, औष्ट्रम्, शौकम्, काकम्, मायूरम् । वयोवचनात्—कौमारम्, योवनम्, स्थाविरम् । उद्गात्रादेः—औद्गात्रम् । औन्नेत्रम्, पौरुषम् । हायनान्तात्—पौर्व्वाहाणः, सौहृदम् । ब्राह्मणदित्वात—सौहृद्यम्, चापलम्, दौहृतम्, नैपुणम्, कौशलम् । श्रोत्रियस्य श्रोत्रश्च । श्रौत्रम् ।

२८१. **इग(ण)न्ताच्च लघुपूर्व्वात् ।**

शुचेर्भावः कर्म्म वा, शौचम्, मौनम् पाटवम्, लाघवम्, पार्थवम्, हारीतकम् । लघुपूर्व्वादिति किम् ? पाण्डुत्वम् ।

२८२. **गुरूपोत्तमाद् योपधान्मनोज्ञादेश्चाकण् ।**

गुरूपोत्तमाद् योपधान्मनोज्ञादेश्चाकण् । रमणीयस्य भावः कर्म्म वा रामणीयकम्, कामनीयकम् , आचार्यकम्, औपाध्यायकम्, वैद्यकम्, साहाय्यकम्, साहाय्यञ्चेष्यते । मनोज्ञकम्, प्रैयरूपकम्, आभिरूपकम् ।

२८३. **द्वन्द्वामुष्यकुलादेरिकण् स्त्रियाम् ।**

एभ्यः स्त्रियामिकण् स्यात् । द्वन्द्वात् शैष्योपाध्यायिका, पैतापुत्रिका । अमुष्यकुलादेः—आमुष्यकुलिका, आमुष्यपुत्रिका ।

२८४. **गोत्र-चरणात् श्लाघाधिक्षेप-तदवेतेषु ।**

एषु प्रयुज्यमानेषु गोत्रचरणाभ्यां भावकर्म्मणोरिकण् स्यात् । गोत्रचरणान्नियमार्थो विधिरयम् । गोत्रात्—गार्गिकया श्लालते, दाक्षिकया अधिक्षिपति, दाक्षिकामवेतः । एवं चरणात्, काठिकया श्लाघतेऽधिक्षिपति वा । बाह्वृचिकामवेतः । अन्यत्र गार्ग्यत्वमित्यादि ।

२८५. **अहं पूर्व्वादेरिकः स्त्रियामिति वक्तव्यम् ।**

अहं पूर्व्विका, अहमहमिका, आहोपुरुषिका ।

२८६. **ऋत्विजो मित्रावरुणादेरीयः ।**

मित्रावरुणयोः भावः कर्म्म वा मित्रावरुणीयम्, अच्छावाकीयम् । उक्ताः भाव कर्म्मणोः प्रत्ययाः ।

२८७. **तदिवेत्यादौ वतिः ।**

तदिव तेनेव इत्याद्यर्थे वतिः स्यात् । विप्र इव विप्रवदधीते, मित्रमिव पुत्रं मित्रवदाचरेत्, देवेनेव देववत् कृतम्, देवा इह देववद्दत्तम्, पूर्व्वस्यादिव पूर्ववत्

सनः, मुनेरिव मुनिवच्चरित्रम्, गुराविव गुरुवद् गुरुपुत्रे वर्त्तितव्यम्। मथुरायामिव मथुरावत् स्रुघ्ने प्राकाराः।

२८८. **ए-किमव्यय-तिङस्तर-तमादामद्रव्ये।**

एकारान्तादिभ्यस्तर-तमादाम् स्यात्। पूर्वाह्णेतरां गायति, पूर्वाह्णेतमां गायति। अत्राधारशक्तेः सातिशयत्वम्। किन्तराम्, किन्तमाम्। अत्र क्रियाया गुणस्य वा प्रकर्षः। प्रातस्तराम्, सुतराम्, नितराम्, उच्चैस्तराम्, पचतितराम्। अद्रव्य इति किम्? उच्चैस्तरो गिरिः।

२८९. **विना नाना।**

एतौ निपात्ते। वेर्ना, नञो ना विना नाना।

२९०. **सुव्वत् प्राग्धः।**

धा-प्रत्ययात् प्राक् प्रत्ययाः सुब्बोद्धव्याः। सुपीव तदादे-ष्टेरदादि कार्य्यम्।

२९१. **प्राक्-प्रकारात् काले सप्तम्याः।**

प्रकारशब्दात् प्राक् सप्तम्यन्तात् काले प्रत्यया वाच्याः।

२९२. **सर्व्वैकान्य-किं-यत्त-दो-दा, सर्वस्य सो वा च।**

एभ्य सप्तम्यन्तेभ्यः काले दा स्यात्। सर्वस्य सो वा च। सर्व्वस्मिन् काले सर्वदा सदा, एकदा, अन्यदा, कदा, यदा, तदा।

२९३. **किं यत्तदेतदोर्हि।**

किमादेः कालेर्हि स्यात्। कस्मिन् काले कर्हि, यर्हि, तर्हि, एतर्हि।

२९४. **अधुनेदानीं तदानीञ्च।**

इदमः काले अधुना इदानीञ्च, तदस्तदानीञ्च निपात्यते।

२९५. **परुत्परार्य्यैषमः पूर्व्व-पूर्व्वतर-गच्छदब्देषु।**

निपात्यन्ते। पूर्वस्मिन् वर्षे परुत्, पूर्वतरे वर्षे परारि, गच्छदब्दे-ऐषमः।

२९६. **अहन्यन्यान्तरेतरपूर्व्वापराधरोत्तरेभ्यः एद्युस्।**

एभ्योऽहन्यभिधेये एद्युस् भवति। अन्यस्मिन्नहनि अन्येद्युः, अन्यतरेद्युः, इतरेद्युः, पूर्व्वेद्युः, अपरेद्युः, अधरेद्युः, उत्तरेद्युः।

२९७. **द्युश्चोभयात्।**

उभयद्युः, उभयेद्युः।

२९८. **अद्य-सद्य-परेद्यवि।**

अस्मिन्नहनि अद्य, समानेऽहनि सद्यः, परस्मिन्नहनि परेद्यविः। (उक्तं काले)

२९९. **उभयादेः प्रकारे था ।**

स्यात् । उभयेन प्रकारेण उभयथा, सर्व्वथा, अन्यथा, इतरथा, अवरथा, अपरथा, यथा तथा, बहुथा ।

३००. **कथमित्थम् ।**

किमिदमो पकारे (थमौ) निपात्येते । गता प्राग्दीव्याः ।

३०१. **संख्याया विधार्थे वा ।**

प्रकारबृत्तेः संख्यायां धा स्यात् । पञ्चभिःप्रकारैर्भुङ्क्ते, एवं पञ्चप्रकारवान् करोति पञ्चधा । षोढ़ा, विंशतिधा, कतिधा, बहुधा ।

३०२. **द्वित्रिभ्यामेधा च ।**

स्यात् । द्विधा, द्वेधा, त्रिधा, त्रेधा ।

३०३. **द्वैधं त्रैधमैकध्यं वा**

निपात्यते ।

३०४. **धंध्यमन्तात् स्वार्थे डश्च ।**

द्वैधीभावेन वर्त्तते, ऋते द्वैधानि त्रैधानि संशयम्, ऐकध्येन हि कार्याणि । बाहुल्यादनव्ययम् (अनव्ययत्वम्) ।

३०५. **आ वाराद्दिक्शब्देभ्यः प्रथमा पञ्चमी सप्तमीभ्यो दिग्देशकालेषु ।**

वाशब्दात् प्राक् दिक्शब्देभ्यः प्रथमाद्यन्तेभ्यो दिगादिषु वर्त्तमानेभ्यः स्वार्थे प्रत्ययाः वाच्याः ।

६०६. **पूर्व्वाधरावरेभ्योऽस्तातौ पुरधवश्च ।**

एभ्योऽस् अस्ताच्च भवति । तेषां पुर् अध् अवादेशाश्च । गिरे पूर्व्वा पुरः पुरस्तात् दिक् रमणीया, देशो वा । वैशाख्या पूर्व्वः पुरः पुरस्तात् कालोऽतिरम्यः । तथा आगतः, तत्र वसति वा पौरस्त्यः । एवं अधः अधस्तात्, रम्यः, आगतो वसति वा, अतः, अवस्तात् रम्या दिक् ।

३०७. **दक्षिणोत्तराभ्यामतस् ।**

स्यात् । दक्षिणतो रम्यम् । आगतो वसति वा दक्षिणतः, उत्तरतः ।

३०८. **पुरतः (पूर्वस्य) ।**

निपात्यते ।

३०९. परावराभ्यामस्ताच्च ।

अतस् च । परतः, परस्तात्, अवरतोऽवरस्तात् । पुनर्विधानादवादेशो न भवति ।

३१०. अञ्चेर्लुक् च ।

अञ्चत्यन्तात् दिक्शब्दात् अस्ताद् भवति । तस्य लुक् च । प्राक् रम्या आगतो वसति वा, उदक्, प्रत्यक् ।

३११. उपर्युपरिष्टात् ।

ऊर्द्ध्वशब्दस्य द्वौ निपात्येते ।

३१२. पश्चात् पश्च चार्द्धे ।

अपरस्य निपात्यते । अर्द्धशब्दे परे पश्चभावः । पश्चाद्रम्यम्, आगतः वसति वा, पश्चार्द्धम्, दक्षिणपश्चार्द्धः । (एवं दक्षिणपश्चात्, उत्तरपश्चात्, दक्षिणपाश्चार्द्धः, उत्तरपश्चार्द्धः) ।

३१३. उत्तराधरदक्षिणादात् ।

एभ्य आत् स्यात् । उत्तराद्रम्यम्, आगतो वसति वा, अधरात् दक्षिणात् ।

३१४. एनोऽन्यतरस्यामदूरेऽपञ्चम्याः ।

दिक्शब्दाददूरे एनो वा स्यात् । उत्तरेण, उत्तरात् रम्यं वसति वा । एवं पूर्व्वेण, अधरेण, दक्षिणेन. अपञ्चम्या इति किम् ? दक्षिणतो देशादागतः ।

२१५. दक्षिणादाजाही अदूर-दूरयोः ।

स्याताम् । आच्–अदूरे दक्षिणा रम्यं वसति वा, अहि–दूरे दक्षिणाहि रम्या वसति वा ।

३१६. उत्ताराद् दूरे ।

आजाही स्याताम् । उत्तराहि रम्यं वसति वा । उक्ता अतसर्थाः ।

३१७. वारे संख्यायाः कृत्वस् ।

क्रियावसरे गम्ये संख्याया कृत्वस् भवति । पञ्चवारान् पञ्चकृत्वो दिवसस्य भुङ्क्ते पञ्च कृत्वो रात्रेः स्मरति प्रियाम् ।

३१८. अदूरकाले धा च बहोः ।

बहुधाबहुकृत्वश्चाह्नो भुङ्क्ते, नेह बहुकृत्वो मासस्य भुङ्क्ते ।

३१९. **द्वि-त्रि-चतुर्भ्यः सुच् ।**

एभ्यो वारे सुच् स्यात् । द्विर्भुङ्क्ते, त्रिष्पचति, चतुरधीते, रात्त-स-दिपोरिति सलोपः ।

३२०. **एकस्य सकृच्च ।**

एकात् सुच् स्यात् । सकृदादेशः, संयोगान्तलोपश्च । सुकृद्ददाति ।

३२१. **बह्वल्पार्थाच्छस् कारकान्माङ्गलिक्ये ।**

बह्वर्थादल्पार्थाच्च स्वार्थे शस् स्यात् । माङ्गलिक्यां प्रवृत्तौ । बहूनि बहुभिर्बहुभ्यो बहुषु वा बहुशो ददाति, भूरिशः, प्रायशः, अल्पशः, स्तोकशः । नेह, श्राद्धे बहूनि ददाति । कारकादिति किम् ? बहूनां स्वामी ।

३२२. **संख्यैकार्थाद् वीप्सायाम् ।**

शस् स्यात् । संख्यायां—द्वौ द्वौ द्विशो ददाति, कतिशः, गणशः, तावच्छः । एकार्थात् पणं पणं ददाति पणशः, एकैकपणमित्यर्थः । एवं पुराणशः, पादशः । कारकादित्येव, द्वयोर्द्वयोर्स्वामी ।

३२३. **च्विरभूततद्भावे गम्ये कृभ्वस्तिष्विणो दीर्घः, ऋदवर्णयोश्च रीदीतौ ।**

अभूततद्भावे गम्ये कृभ्वस्तिषु परेषु च्विः स्यात् । स च चिन्हार्थ एव इणन्तस्य दीर्घश्च । अशुचिं शुचिं करोति शुचीकरोति, पटुभवति, मृदुस्यात् । ऋवर्णयोश्च रीदीतौ तकारावुच्चारणार्थौ । ऋतोरी, मात्रीभवति । ईदवर्णस्य. शुक्लीकरोति, माली भवति । ईत्वमिह नाव्ययस्य । दिवाभूता रात्रिः, दोषाभूतमहः ।

३२४. **अरुर्म्मनश्चक्षुश्चेतोरहोरजसोऽन्तलोपश्च ।**

एभ्यः च्विः स्यात् । अन्तलोपश्च । अरूकरोति, सुमनीकरोति, उन्मनीकरोति, उच्चक्षूभवति, सुचेती करोति, रहीभूतं दशाननम् । निरजीकृतम् ।

३२५. **साच्च कार्त्स्न्ये ।**

कृभ्वस्तिषु कार्त्स्न्ये गम्ये साद्भवति च्विश्च । काष्ठं भस्मसात् करोति, भस्मीकरोति, कृशानुसाद्भूतः ।

३२६. **अभिव्याप्तौ, सम्पद(दा)दि च ।**

सम्पदि कृभ्वस्तिषु चात्रार्थे साद्भति । उदकमभिव्याप्नोतीति उदकसात् करोति । (लवणमुदकसात् सम्पद्यते, अर्थात् लवणमुदकमभिव्यापकमुदकसात् सम्पद्यते) लवणसात् करोति ।

३२७. तदधीने ।

अत्रार्थे साद्भवति । राजाधीनं करोति—राजसात् करोति, स्त्रीसात् सम्पद्यते सुरा ।

३२८. देये त्रा च ।

दातव्ये अधीने च त्रा स्यात् साच्च । विप्राय देयमधीनं करोति विप्रत्राकरोति, देवत्रा, ब्रह्मत्रा करोति, विप्रसात्कृता भूयसीर्भुवः ।

३२९. देव-मनुष्य-पुरुष-पुरु-मर्त्य-बहोर्बहुलं कर्म्माधिकरणयोः ।

एभ्यो बहुलं धातुमात्रे कर्म्मादौ वा स्यात् । देवानधिगच्छति देवत्रागच्छति, मनुष्ये वसति मनुष्यत्रावसति, मर्त्यत्रावसति, बहुत्राजीव वासरान् ।

३३०. अव्यक्तानुकरणादनेकाचो डाच् कृभ्वस्तिषु ।

अव्यक्तशब्दानुकरणात् डाच् स्यात् कृभ्वस्तिषु । पटपटा करोति, मदमदाभवति । खरटखरटा स्यात् । अनेकाच इति किम् ? टात् करोति । कथं पटदिति करोति ? इति शब्दव्यवधानात् ।

३३१. बीजादेः कृञि कर्षणे ।

कृञि परे कर्षणेऽर्थे बीजादेर्डाच् स्यात् । बीजमुप्त्वा (बीजने सह वा) कर्षति—बीजाकरोति क्षेत्रम्, शम्बाकरोति, त्रिगुणाकरोति द्वितीयाकृतम् तृतीयाकृतम् ।

३३२. समयादतिक्रमणे ।

डाच् स्यात् । समयमतिक्रामति समया करोति (कालं यापयतीत्यर्थः) ।

३३३. सपत्र-निष्त्रादतिव्यथने ।

डाच् स्यात् । सपत्राकरोति मृगं व्याधः निष्पत्रा करोति ।

३३४. मद्र-भद्रान्माङ्गलिकमुण्डने ।

मङ्गलं प्रयोजनमस्य माङ्गलिकम्, तादृशमुण्डने भूषणे कृञि डाच् स्यात् । मद्राकृतो बालः, भद्राकरोति ।

३३५. निष्कुलान्निष्कोषणे ।

अन्तर्बहिष्करणे डाच् स्यात् । निष्कुला करोति दाड़िमम् ।

३३६. सत्यादशपथे ।

डाच् स्यात् । सत्या करोति निश्चिनोतीत्यर्थः शपथे तु नित्यं सत्यङ्करोति विप्रः ।

३३७. **शूलात् पाके ।**

डाच् स्यात् ? शूलाकरोति मांसम् ।

३३८. **दुखात् प्रातिकूल्ये ।**

डाच् स्यात् दुःखाकरोति कुपुत्रः ।

३३९. **सुखप्रियादानुकूल्ये ।**

डाच् स्यात् । सखि कान्तं सुखाकुरुः । सीतामूचे सुखाभव, प्रिया करोति सुपुत्रः ।

३४०. **किमः सुबन्ताच्चिचचनावसाकल्ये ।**

क्वचित् कस्मिंश्चित्, केनचिदित्यादि । वदाद्यव्ययम् ।

इति श्रीपद्मनाभदत्तकृतौ
सुपद्मे व्याकरणे
पञ्चमोऽध्यायः ।
समाप्तिञ्च गतोऽयं ग्रन्थः ।

सुपद्मसूत्रानुक्रमणिका

सुपद्मव्याकरणे उद्धृता ग्रन्थाः

सुपद्मव्याकरणे स्मृता आचार्याः

Bharatiya Vidya Prakashan

Oriental Publisher & Booksellers

1-UB, Jawahar Nagar
Bungalow Road
Delhi-110007
Call : 2521570

Post Box No. 1108
Kachauri Gali
Varanasi-221001
Call : 65965

(India)